SÂHITYA-DARPANA

OF

VIS'VANÂTHA KAVIRÂJA

With the Commentary of

RÂMACHARANA-TARKAVÂGÎS'A BHATTÂCHÂRYA.



ANNOTED BY


PANDIT DURGÂPRASÂDA DVIVEDA,

LATE HEAD PANDIT, MAHARAJA SANSKRIT COLLEGE, JAIPUR.

THIRD EDITION.

REVISED BY

SRÎNIVÂSA VENKATRÂMA S'ARMA.



PUBLISHED BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR, "NIRNAYA-SÂGAR" PRESS.

Bombay:

1915.

Price 3 Rupees.

साहित्यदर्पणः ।

श्रीविश्वनाथ-कविराज-प्रणीतः ।

श्रीरामचरण-तर्कवागीश-भट्टाचार्य-कृतया टीकया समेतः ।

जयपुरराजकीयसंस्कृतपाठशालाप्रधानाध्यापकेन

श्रीदुर्गाप्रसादद्विवेदेन

संकलितया टिप्पण्यानुगतः ।



वेङ्कटरामतनुजनुषा श्रीनिवासशर्मणा संशोधितः ।

(तृतीयं संस्करणं)

स च

मुम्बय्यां

तुकाराम जावजी इत्येतैः स्वीये निर्णयसागराख्यमुद्रण-

यन्त्रालये रामचन्द्र येसू शेडगे द्वारा

मुद्रयित्वा प्रकाशितः ।

१९१५.

मूल्यं रूप्यकत्रयम् ।

ॐ नमः शिवाय ।

भूमिका ।

अथ खल्विदं हिताहितौपयिकमौलिभूतं साहित्यशास्त्रं कदा प्रादुरासेति मीमांसाव्यतिकरे श्रौताङ्गोपाङ्गसमानकालिकमित्यध्यवसायः प्रमातृहृदयंगमः स्यात् । तत्तद्दर्शनानां तदनुप्राणितानामितरेषां चोच्चावचानां निबन्धानामाम्नायोपजीवकत्वेन मार्मिकाणां विप्रतिपत्त्यवसरः । यतोऽशतस्तत्र तत्र त्रय्यामनुस्यूतानां पदार्थसार्थानां रहस्यमादायैवाधिगतयाथातथ्यैर्भुवनगुरुभिर्महर्षिभिर्लोकोद्दिधीर्षया प्रसादमधुराणि गभीराणि तीर्थानि निरमायिषत । वेदेषु सर्वे दर्शनवादाः समासतो व्यासतश्च विनिर्दिष्टा इति व्यक्तमपि

'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्या ।
संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः ॥'

इति श्वेताश्वतरश्रुत्या व्यक्ततरमवसीयते ।

किं बहुना । तादृशः कोऽपि प्रमेयोऽद्यावधि तत्त्वविदां प्रतिभापथं नावतीर्णो यः खलु सम्यक् परीक्षितस्ततो व्यतिरिच्येत । कुहचिद् व्यतिरिक्त इवाभासमानोऽपि पौ-

---

१. **उपाङ्गेति** । 'अथ चत्वार्युपाङ्गानि वेदानां संप्रचक्षते । धर्मशास्त्रं पुराणं च मीमांसा न्यायविस्तरः ॥' इति ॥

२. **त्रय्यामिति** । ऋग्यजुःसामलक्षणेन रचनात्रैविध्येन त्रयीति व्यपदेशः, तेनाथर्वणस्यापि संग्रहः ॥

३. **महर्षिभिरिति** । ऋषन्ति वेदं पश्यन्तीति ऋषयः । इह दर्शनं प्रत्यक्षीकरणमेव, न चाक्षुषज्ञानम् । तथा चोक्तं तैत्तिरीये यजुरारण्यके—'अजान् ह वै पृश्नीस्तपस्यमानान् [illegible] न्यानर्ष त ऋषयोऽभवंस्तदृषीणामृषित्वम्' इति । पृश्नीन् पुरुषान् । स्वयंभु प्रमाणान्तरमनुपजीव्य प्रवृत्तम् । शेषं स्पष्टम् । अयमेवाशयो निरुक्तकाराणामपि ॥

४. **वेदेष्विति** । वेदेषु मन्त्रब्राह्मणेषु । 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इत्यागमात् ॥

५. **काल इति** । जगतः कालः कारणमिति कालविदः प्रतिपेदिरे । स्वभाव इति [illegible]तिकाः । नियतिर्नियमः पुण्यापुण्यलक्षणः स एव कारणमिति मीमांसकाः । पूर्वपूर्व[illegible] संचितपुण्यापुण्यानुगुणतया जगत्सर्वज्ञेनेश्वरेणोत्तरकल्पादौ न सृज्यते, किंतु [illegible]मन्तरेण यदृच्छया जायत इति निरीश्वराः । भूतानि कारणमिति जगन्नित्यत्वादिनः । योनिः प्रकृतिः कारणमिति प्रकृतिवादिनः शाक्ताः । पुरुषो हिरण्यगर्भ एव [illegible]मिति योगशास्त्रविदः । इतीत्थं चिन्त्या चिन्तामात्रमेव, न वस्तुस्थितिः । एवं काला[illegible] अत्यैकं कारणत्वं न भवेत् न वा एषां संयोगः कारणं भवेत् । आत्मभावात् । एता[illegible]मेव [illegible]कृत्य स्थितस्य भोक्तुरात्मनो भावात्, अत एषां भोग्यत्वेन परतन्त्रत्वात्स्वतन्त्र[illegible] मूल[illegible]त्वं न संभवेत् । आत्मापि कारणं न संभवेत् । यतोऽयं जगन्निर्माणेऽनीशोऽसंभवे[illegible] । किमाह । सुखदुःखहेतोः पुण्यापुण्यवशत्वेन सुखदुःखहेतुतया वर्तमानत्वात् ॥

वापर्यपर्यालोचनया विचिकित्साराहित्ये पुनस्तदवस्थ इत्यतिरोहिते किं निदर्शनोद्घोषणया । एवं कथमिह तदुपादेयतामूमाभिधीयत इति विधादारिद्र्येऽनिर्वचनीय इति निर्वचनाः स्मः ।

एतत्तीर्थरूढस्यैतस्य प्रमेयस्यैतस्मिन्नानुश्रविके वचसि सत्तालाभ इति परीक्षाप्रस्तावस्य प्रचुराभिधेयत्वात्प्रस्तुतानुपयुक्तत्वाच्चानवसर इत्यवसरोऽनुस्रियते । साहित्यशास्त्रस्यालंकारादयः कतिपये विषयास्तु श्रुतिषूत्ताना एव । यथा—

'अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् ।
जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः ॥'

इति निरुक्तोदाहृते कक्षीवत आर्षे, तथा—

'सूर्यस्येव वक्षसो ज्योतिरेषां समुद्रस्येव महिमा गभीरः ।
वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ॥'

इतीन्द्रस्यार्षे चोपमालंकारः । कक्षीवदार्षमधिकृत्य 'चतस्र उपमाः' इति **यास्को**क्तप्रतीकमुपादाय 'अभ्रातेव पुंस इत्येका । गर्तारोहिणीवेति द्वितीया । जायेव पत्य इति तृतीया । हस्रेवेति चतुर्थी ।' इति व्याख्यातं चाचार्य**दुर्गेण** ।

'तमेकनेमिं त्रिवृतं षोडशान्तं शताधारं विंशतिप्रत्पराभिः ।
अष्टकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहम् ॥'
'पञ्चस्रोतोऽम्बुं पञ्चयोन्युग्रवक्त्रां पञ्चप्राणोर्मिं पञ्चबुद्ध्यादिमूलाम् ।
पञ्चावर्तां पञ्चदुःखौघवेगां पञ्चाशद्भेदां पञ्चपर्वामधीमः ॥'

इति श्वेताश्वतरश्रुत्योः संसारस्य चक्ररूपत्वेन नदीरूपत्वेन च रूपणाद्रूपकम् ।

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्यो अभिचाकशीति ॥'
'महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥'

इति श्रुत्यो रसगङ्गाधरे **पण्डितराजे**नातिशयोक्ति–सारालंकारौ दर्शितावि निपुणं विभावनीयम् ।

एवमनेकेऽलंकारास्तत्र तत्र ऋगादिषु संक्रान्ता दृश्यन्ते । तत्र कतिचन साङ्ग कतिचन च निरङ्गाः । नह्यलंकारनिरूपणायैव त्रयी प्रवृत्ता, यत्सपरिकरा उपलभ्य रन् । अपि च–

'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति

इति श्रुतिः साकल्येन कविकर्मेतिकर्तव्यतोपज्ञामाज्ञापयति । तथाहि—'सम्यग्ज्ञा इत्यनेन जातिक्रियागुणयदृच्छोपाधिविशकलितपदार्थावबोधः, 'सुप्रयुक्त' इत्य हेयोपादेयनिगमनपूर्वकं पदार्थयोजनम्' 'स्वर्गे–' इत्यादिनैहिकामुष्मिकफलसंपत्ति श्चाध्यवसीयते । निरूपितलक्षणालक्षितप्रयोगे तु प्रत्यवायः । तथा च श्रुतिः—

'तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुस्तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः ।'

अत्र ब्राह्मणपदं द्विजात्युपलक्षकम्। तेनेतरेषामसाधुभाषणे प्रत्यवायायोगः। अत एव **भरत**मुनिना दृश्यकविषये स्त्रीशूद्रादीनां मुख्यतः प्राकृतपाठ्यं व्यवस्थापितम्। किं पल्लवितेन।

'ब्रह्मैव रसः। रसो वै सः।'

इत्यादिश्रुत्या कविकर्मजीवातू रसोऽप्युपदिश्यते। आग्नेयपुराणे हि भगवता **कृष्ण-द्वैपायनेन** समस्तमेतत्काव्यानुशासनरहस्यमुपन्यासि। एवमादिवेदार्थवेदकत्वेनैव पुराणस्य पञ्चमवेदत्वेन व्यपदेशः स्मर्यते—

'इतिहासपुराणं च पञ्चमो वेद उच्यते।'

इतिहासपुराणयोः पञ्चमवेदत्वेन व्यवहारस्तत्सादृश्यख्यापनार्थम्। सादृश्यं च 'तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्' इति। प्रकृते ऋग्यजुःसाम्नामानुपूर्व्या पाठासत्त्वे वेदभिन्नत्वम्, तदुक्तप्रमेयजातावितिभावकत्वेन पुमर्थसाधकत्वादमुष्य वेदधर्मवत्त्वम्। स्मर्यते हि—

'भारतव्यपदेशेन ह्याम्नायार्थाश्च वर्णिताः।'

इह भारतपदं पुराणस्यापि संग्राहकम्, इतरथा इतिहासपुराणयोः पञ्चमवेदत्वाख्यानं विरुध्येत। श्रुताबुदीरितानामर्थानां स्मरणादेव भगवता **जैमिनि**ना 'धर्मस्य शब्दमूलत्वाद्-' इत्यादिसूत्रद्वय्या स्मृतिप्रामाण्याधिकरणमकारि, निराकारि च तत्र—

'औदुम्बरीं स्पृष्ट्वोद्वायेत्।'
'औदुम्बरी सर्वा वेष्टयितव्या।'

इत्यादिश्रुतिस्मृतिविप्रतिपत्तौ स्मृत्या बोधितं ज्योतिष्टोमे मध्येसदोमण्डपं निखातुमर्हाया उदुम्बरशाखाया वाससा वेष्टनम्, सर्ववेष्टने श्रुतिबोधितस्पर्शसंभवाभावात्। अयमिह निर्यासो यत्खलु सर्वत्र श्रुत्यनुसरणमेव गौरवानुबन्धे बीजमित्यन्यत्र विस्तरः।

तत्त्वबुभुत्सूनां प्रतिपत्त्यर्थमाग्नेयप्रतिपादिताः साहित्यशास्त्रविषयः समासतो ते—

शदधिकत्रिशततमे(३३६)ऽध्याये—

'काव्यस्य नाटकादेश्च अलंकारान्वदाम्यथ।'

तिज्ञाय काव्यभेदं च समुद्दिश्य तत्र—

'नरत्वं दुर्लभं लोके विद्या तत्र च दुर्लभा।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र च दुर्लभा।
व्युत्पत्तिर्दुर्लभा तत्र विवेकस्तत्र दुर्लभः'

युक्त्या विवेकस्य परं परत्वमभिहितम्। ततो गद्य-पद्य-मिश्रभेदेन काध्यमभिधाय तत्र गद्यस्य चूर्णकादयो भेदाः सलक्षणं लक्षिताः। तत आख्यायिका-कथा-खण्डकथा-परिकथा-कथानिकेति पञ्चविधं गद्यकाव्यमुद्दिश्य प्रत्येकस्य लक्षणमाम्नातम्। तदनु—

'पद्यं चतुष्पदी तच्च वृत्तं जातिरिति त्रिधा।'

इत्यादिना पद्यभिदां तन्निर्वर्त्यस्य महाकाव्यस्य निर्माणपरिपाटीं चोपदिश्यन्ते—

'अत एव महाकाव्यं तत्कर्ता च महाकविः।
वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम् ॥'

इत्यादिनाध्याय उपसंहृतः ॥

ततः सप्तत्रिंशदधिकत्रिशततमे(३३७)ऽध्याये प्रथमं सभेदं नाटकादिरूपकं नाटिकाद्युपरूपकं चोद्दिश्य तत्र पूर्वरङ्गं तदङ्गभूताया नान्द्याः किंचित्स्वरूपादि च निर्णीतम्। तदनु प्रस्तावनापरपर्यायस्यामुखस्य तद्भेदभूतानां प्रवृत्तक-कथोद्घात-प्रयोगातिशयानां च लक्षणान्युक्तानि। ततो नाटकादिशरीरस्येतिवृत्तस्य सिद्धोत्प्रेक्षितभेदेन द्वैविध्यं बीजादिपञ्चार्थप्रकृतीनां प्रारम्भादिपञ्चचेष्टानां मुखादिपञ्चसंधीनां चाख्या आख्यायाध्यायोपसंहारो विहितः ॥

ततोऽष्टात्रिंशदधिकत्रिशततमे(३३८)ऽध्याये—

'अक्षरं परमं ब्रह्म सनातनमजं विभुम्।
वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम्।
आनन्दः सहजस्तस्य व्यज्यते स कदाचन।
व्यक्तिः सा तस्य चैतन्यचमत्काररसाह्वया ॥
आद्यस्तस्य विकारो यः सोऽहंकार इति स्मृतः।
ततोऽभिमानस्तत्रेदं समाप्तं भुवनत्रयम् ॥
अभिमानाद्रतिः सा च परिपोषमुपेयुषी।
व्यभिचार्यादिसामान्याच्छृङ्गार इति गीयते ॥'

इत्यनेन शृङ्गारं व्युत्पाद्य रागाच्छृङ्गारस्य तैक्ष्ण्याद्रौद्रस्यावष्टम्भाद्वीरस्य संकोचाद्बीभत्सस्य च व्यक्तिरुदिता। तदनु शृङ्गाराद्धासस्य रौद्रात्करुणस्य वीरादद्भुतस्य बीभत्साद्भयानकस्य च निष्पत्तिराम्नाता। ततश्च—

'[1]अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥
शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत्।
स चेत्कविर्वीतरागो नीरसं व्यक्तमेव तत् ॥'

इत्यनेन नाटकादिशरीरनिर्माणे कवयितुः स्वातन्त्र्यं दर्शितम्। तदनु रत्यादयः स्तम्भादयो निर्वेदादयश्च लक्षिताः। विभावादिकथनप्रसङ्गेन धीरोदात्तादयो नायकास्तदीयनर्मसचिवाः पीठमर्दादयो नायिकानां भेदाश्च निर्दिष्टाः। ततः शोभा-विलास-माधुर्यादिपौरुषाणां हाव-भाव-हेलादिस्त्रैणानामाभाषणादिसामान्यानां च विषयाणां वर्णनेनाध्यायोपसंहारो विहितः ॥

एकोनचत्वारिंशदधिकत्रिशततमे(३३९)ऽध्याये पाञ्चाल्यादिरीतिभारत्यादिवृत्तीराख्याय 'भरतेन प्रणीतत्वाद्भारती वृत्तिः' इति योगो दर्शितः। ततो वीथ्यादिभारत्यङ्गानामुद्घातकादिवीथ्यङ्गानां चाभिधानेनाध्यायोपसंहारो विहितः ॥

---

१ अपारे इति। 'अपारे—' इति श्लोकद्वयमुपन्यस्तमानन्दवर्धनाचार्यैर्ध्वन्यालोकस्य तृतीयोद्द्योते ॥

चत्वारिंशदधिकत्रिशततमे(३४०)ऽध्याये लीला–विलास–विच्छित्त्यादयश्चेष्टा निरूपिताः । ततः शिरःपाण्यादीन्यङ्गानि भ्रूलतादिप्रत्यङ्गानि चाभिधाय—

'आकम्पितं कम्पितं च धुतं विधुतमेव च ।
परिवाहितमाधूतमवधूतमथाञ्चितम् ॥
निकुञ्चितं परावृत्तमुत्क्षिप्तं चाप्यधोगतम् ।
ललितं चेति विज्ञेयं त्रयोदशविधं शिरः ॥'

इत्येवमाद्याः काश्चन भिदा अप्युद्भाविताः ॥

एकचत्वारिंशदधिकत्रिशततमे(३४१)ऽध्याये—

'आभिमुख्यं नयन्नर्थान्विज्ञेयोऽभिनयो बुधैः ॥'

इत्यभिनयपदार्थं व्युत्पाद्य सत्त्वाद्याश्रयेणामुष्य सात्त्विकादिभेदचतुष्टयी निरूपिता । ततः संभोगविप्रलम्भरूपेण शृङ्गारस्य द्वैविध्यमभिधाय पुनस्तयोः प्रच्छन्नाप्रच्छन्नगतत्वेन द्वैविध्यमुदीरितम् । तत्र च विप्रलम्भस्य पूर्वराग–मान–प्रवास–करुणात्मकत्वेन चातुर्विध्यम् । तदनन्तरजायमानसंभोगलक्षणस्य शृङ्गारस्य धर्मार्थकाममोक्षाख्येन चतुर्वर्गेणोपचयोऽभिहितः । पुनश्च वाङ्नेपथ्यक्रियात्मकतया शृङ्गारस्य भेदः । ततो हासस्य स्मितादयो भेदाः । धर्मोपघात–चित्तविलास–शोकजन्यत्वेन करुणस्य, अङ्गनेपथ्य–वाक्यजन्यत्वेन रौद्रस्य, दान–धर्म–युद्धजन्यत्वेन वीरस्य च त्रैविध्यमाम्नातम् । भयानकस्य कैवल्यम्, बीभत्सस्योद्वेजनक्षोभणाभ्यां द्वैविध्यम् । अथ च—

'काव्यशोभाकरान्धर्मानलंकारान्प्रचक्षते ।
अलंकरिष्णवस्ते च शब्दमर्थमुभौ त्रिधा ॥
ये व्युत्पत्त्यादिना शब्दमलंकर्तुमिह क्षमाः ।
शब्दालंकारमाहुस्तान्काव्यमीमांसका विदः ॥'

तमुक्त्वा छाया–मुद्रादयः शब्दालंकाराः कीर्तिताः । तत्र लोकोक्ति–अर्भकोक्ति–मत्तोक्तिभेदेन च्छायायाश्चातुर्विध्यम् ।

'अभिप्रायविशेषेण कविशक्तिं विवृण्वती ।
मुद्रायिनीति सा मुद्रा सैव शय्यापि नो मते ॥'

न्तरे शय्याख्यशब्दालंकृतेः पार्थक्यम् । एवमादिशब्दलभ्यानामपि भिदाः रिंशदधिकत्रिशततमे(३४२)ऽध्याये मधुरा–ललिता–प्रौढा–भद्रा–परुषेति ा लक्षणम् । तदनु—

'यमकं त्वव्यपेतं च व्यपेतं चेति तद्द्विधा ।
आनन्तर्यादव्यपेतं व्यपेतं व्यवधानतः ॥'

[illegible]दिभेदा संदर्भेण यमकभेदाः । प्रश्न–प्रहेलिका–गुप्त–च्युत–दत्त–च्युतदत्त–[illegible]भेदेन सप्तविधं चित्रम् । तत्रैकपृष्टद्विपृष्टोत्तरभेदेन प्रश्नस्य द्वैविध्यम् । शाब्दी, [illegible]र्थी चेति प्रहेलिकाया द्वैविध्यम् ।

'यस्मिन्गुप्तेऽपि वाक्याङ्गे भाव्यर्थोऽपारमार्थिकः ।
तदङ्गविहिताकाङ्क्षस्तद्गुप्तं गूढमप्यदः ॥'

इति गुप्तस्य कैवल्यम् । स्वर–व्यञ्जन–बिन्दु–विसर्गच्युतिभेदेन च्युतस्य चातुर्विध्यम् । उक्तोपाधिभिरेव दत्त–च्युतदत्तयोर्भेदाः ।

'सुश्लिष्टपद्यमेकं यन्नानाश्लोकांशनिर्मितम् ।
सा समस्या परस्यात्मपरयोः कृतिसंकरात् ॥'

इत्युक्तरूपायाः समस्याया नियम–विकल्प–बन्धभेदेन त्रैविध्यम् । ततः—

'अनेकधा वृत्तवर्णविन्यासैः शिल्पकल्पना ।
तत्तत्प्रसिद्धवस्तूनां बन्ध इत्यभिधीयते ॥'

इति परिभाष्य गोमूत्रिकादयो बन्धास्तद्विन्यासविधयो महता संदर्भेण कीर्तिताः ॥

त्रिचत्वारिंशदधिकत्रिशततमे(३४३)ऽध्याये—

'स्वरूपमथ सादृश्यमुत्प्रेक्षातिशयावपि ।
विभावना विरोधश्च हेतुश्च सममष्टधा ॥'

इत्युद्दिश्य सांसिद्धिक–नैमित्तिकभेदेन स्वरूपस्य द्वैविध्यम्, उपमा–रूपक–सहोक्ति–अर्थान्तरन्यासभेदेन सादृश्यस्य चातुर्विध्यावान्तरविधे, उत्प्रेक्षायाः कैवल्यम्, अतिशयस्य संभवासंभवाभ्यां द्वैविध्यम्, विभावना–विरोधयोः कैवल्यम्, हेतोः कारक–ज्ञापकभेदेन द्वैविध्यं चान्नातम् ॥

चतुश्चत्वारिंशदधिकत्रिशततमे(३४४)ऽध्याये—

'शब्दार्थयोरलंकारो द्वावलंकुरुते समम् ।
एकत्र निहतो हारः स्तनं ग्रीवामिव स्त्रियाः ॥'

इति शब्दार्थालंकारस्योभयोपकारकत्वमभिधाय प्रशस्ति–कान्ति–औचित्य–संक्षेप–यावदर्थता–अभिव्यक्तिभेदेन षोढात्वमुक्तम् । तत्राभिव्यक्तिभेदप्रतिपादनावसरेऽभिधेयसंबन्धात्सामीप्यात्समवायाद्वैपरीत्यात्क्रियायोगाच्च लक्षणायाः पञ्चविधत्वम् ॥

पञ्चचत्वारिंशदधिकत्रिशततमे(३४५)ऽध्याये—

'अलंकृतमपि प्रीत्यै न काव्यं निर्गुणं भवेत् ।
वपुष्यललिते स्त्रीणां हारो भारायते परम् ॥'

इत्याख्याय सामान्य–वैशेषिकभेदेन गुणस्य द्वैविध्यं वर्णितम् । तत्र सामान्यस्य शब्दार्थोभयनिष्ठत्वेन त्रैविध्यमभिधाय प्रत्येकप्रकारस्यावान्तरभिदा निरूपिताः । अन्ते–

'वैशेषिकः परिज्ञेयो यः स्वलक्षणगोचरः ।'

इत्युक्त्वाध्यायः समापितः ॥

षट्चत्वारिंशदधिकत्रिशततमे(३४६)ऽध्याये प्रारम्भत एकोनत्रिंशता श्लोकैरुच्चावचाः काव्यदोषा दर्शिताः । ततः कविसमयमूरीकृत्य—

'सिद्धसैद्धान्तिकानां च कवीनां चाविवादतः ।
यः प्रसिध्यति सामान्य इत्यसौ समयो मतः ॥
सर्वे सैद्धान्तिका येन संचरन्ति निरत्ययम् ।
कियन्त एव वा येन सामान्यस्तेन स द्विधा ॥
छेदसिद्धान्ततोऽन्यः स्यात्केषांचिद्भ्रान्तितो यथा ।
तर्कज्ञानं मुनेः कस्य कस्यचित्क्षणभङ्गिका ॥

भूतचैतन्यता कस्य ज्ञानस्य स्वप्रकाशता ।
प्रज्ञातस्थूलता शब्दानैकान्तत्वं तथार्हतः ॥
शैववैष्णवशाक्तेयसौरसिद्धान्तिनां मतिः ।
जगतः कारणं ब्रह्म सांख्यानां सप्रधानकम् ॥'

इत्युदीरितम् । अन्ते—

'विष्णुः स्वर्गादिहेतुः स शब्दालंकाररूपवान् ।
अपरा च परा विद्या तां ज्ञात्वा मुच्यते भवात् ॥'

इत्यनेन शब्दब्रह्मणो याथातथ्येनावगमात्कैवल्यलाभोऽपि दर्शितः ॥

एवं सपरिकरस्य साहित्यशास्त्रस्य बीजमङ्कुरोन्मुखमाग्नेये जागर्ति । तत एवैतदाहृत्य महामतिमन्तः स्वस्वप्रतिभोन्मेषमहिम्ना नैकभेदत्वमानिन्युः । अत एवाभाणि तत्रभवता दण्डिना—

'काव्यशोभाकरान्धर्मानलंकारान्प्रचक्षते ।
ते चाद्यापि विकल्प्यन्ते कस्तान्कात्स्न्र्येन वक्ष्यति ॥
किंतु बीजं विकल्पानां पूर्वाचार्यैः प्रदर्शितम् ।
तदेव परिसंस्कर्तुमयमस्मत्परिश्रमः ॥'

इत्थं च प्रभुसंमितेषु वाक्यकदम्बेषूत्तं सुहृत्संमितेष्वङ्कुरितं कान्तासंमितेषु पल्लवितं पुष्पितं फलितं चादो मुदो भाजनं दर्शनमतितरां परिपोषमापेदे ।

कोऽस्याग्नेये संनिवेशसमय इति पर्वपक्षे, धर्मराजस्य राज्यासन्नानेहेति सिद्धान्तमुपेयाः । तथाहि—

'आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ ।
षड्द्विकपञ्चद्वियुतः शककालस्तस्य राज्ञश्च ॥'

इति शाकद्वीपीय-श्रीवराहमिहिराचार्योक्त्या षड्विंशत्यधिकपञ्चविंशतिशतीसमो यौधिष्ठिरः शकः सिध्यति । स च वर्तमानेन शालिवाहनशकेन संकलितो यौधिष्ठिरशकादद्यावध्यतिक्रान्तः समासमूहः संपद्यते २५२६+१८२०=४३४६ अर्थात्त्रिसहस्रीमुखाब्धिपञ्चाशदधिकषट्शतीसंख्यवत्सरातिक्रमे यौधिष्ठिरः शकः प्रावर्तत । तथा चोक्तं कह्लणेन—

'शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले ।
कलेर्गतेषु वर्षाणामभूवन्कुरुपाण्डवाः ॥' इति ।

तथा च कलितः पाण्डवसत्ताकालः =६५३
ततः शालिवाहनसत्ताकालः=२५२६
वर्तमानशककालः=१८२०
गतकलिकालः=४९९९ एकोनपञ्चसहस्रम् ।

शाकेति । शाकद्वीपीयो भोजको मग इति पर्यायशब्दाः । अत्रत्यविशेषस्तु भविष्यपुराणे साम्बोपपुराणे च विस्तरतो वर्णितः । एतेन जयपुरादौ वर्तमानाः पाराशरा एव भोजका भवन्तीति प्रवादो भ्रममूलक एव ॥

अथ किं तावत्साहित्यम्, सहितस्य व्याकरणन्यायमीमांसाकलादेर्भाव इत्यवगच्छ। 'गुणवचन–' (५।१।१२४) इत्यादिना ष्यञ्। व्याकरणादीनामुपकारकत्वं तु प्रत्यक्षम्। उक्तं चाप्तैः—

'न स शब्दो न तद्वाच्यं न स न्यायो न सा कला।
जायते यन्न काव्याङ्गमहो भारो महान्कवेः॥'

एतेन व्याकरणादिपरिशीलनमन्तरा काव्यरचनोद्यमो महाननर्थकारीति भव्योदर्का ज्यायसी शिक्षावेद्यते। अत एवागादि कविमाणवकागदंकारैः—

'अधीत्य शास्त्रण्यभियोगयोगादभ्यासवश्यार्थपदप्रपञ्चः।
तं तं विदित्वा समयं कवीनां मनःप्रसक्तौ कवितां विदध्यात्॥' इति।

आवेद्यमानादेशातिक्रमणे तु—

'स्वाधीनो रसनाञ्चलः, परिचिताः शब्दाः कियन्तः, क्वचि-
त्क्षोणीन्द्रो न नियामकः, परिषदः शान्ताः, स्वतन्त्रं जगत्।
तद्यूयं कवयो वयं वयमिति प्रस्तावनाडुंकृति-
स्वच्छन्दं प्रतिसद्म गर्जत वयं मौनव्रतालम्बिनः॥'

इत्थंभूतानां परवाक्यानां पात्रीभवनमीषत्करम्॥

एतत्साहित्यशास्त्रमलंकारशास्त्रत्वेनापि व्यवहियते। तत्रालंकृतिरलंकार इति भावसाधनोऽलंकारशब्दः। अलंक्रियतेऽनेनेति करणव्युत्पत्त्या तूपमादिषु प्रयुज्यते। अथवा 'प्रधाने हि व्यपदेशा भवन्ति' इति नियममनुसृत्य करणव्युत्पन्नस्यापि शास्त्राभिधेयत्वेन न काचिदनुपपत्तिः॥

एतस्य साहित्यशास्त्रस्यानेके निबन्धा उत्पन्नाः प्रचरिताः प्रणष्टाश्चेति पूर्वपूर्वेतरग्रन्थावगाहनेन व्यक्तमेव तत्त्वनिर्णायकानाम्। विजयतां विजयतां श्रीमती **राजराजे-**

---

१. बहुविघ्नोपसंक्रमे दर्पणस्य शोधनटिप्पणीकरणोपक्रमे, क्रममाणे च काले, कालनियन्त्रिते लौकिके लोकनियन्तृशक्तिसमुन्मेषे, समुन्मिषत्तिमिरावरणशरणीभूते प्रभूते भारताभोगे, अपारपारमेश्वरविक्रस्वरानुग्रहेण निरवग्रहशुभोदर्कभूम्ने लोकालोककोकायमानमसमानप्रभावभास्वरं भास्करोद्गममिव सांप्रतं सांप्रतं श्रीमद्राजराजेश्वरसाम्राज्यपारिजातसंपज्जातमभितोऽभिनन्दन्ति नन्दितविश्वजनीनकर्तव्या भारतवर्षवास्तव्याः। भवन्ति चात्राभिनन्दनश्लोकाः—

'अये कलिन्दनन्दिनीतटावनीवनीस्फुरन्निकुञ्जकेलिकल्पनावलीवलीढमानस।
भवद्दयोदयादयान्नृपेन्द्रपीठमाश्रयन्प्रजाः प्रजावदूर्जयन्स **एडवर्ड** एधताम्॥ १॥
नमन्नरेन्द्रमण्डलीकिरीटकोटिसंचरत्स्फुरत्प्रतापवैभवे भवत्युदारभर्तरि।
निवर्ततां द्विषत्कथा प्रवर्ततां महोत्सवो विकासतां सतां मनो विजृम्भतां च भारतम् २
इतो महीमहोदया दयावदानशालिनो **युरोप**भूभुजस्तव स्तवोद्गमाभिषेचने।
स्वधर्मशासनाशनादिकक्रियाक्रियाक्रमं क्रमन्ति **लण्डने**ऽधुना विलोचनैकनन्दने॥ ३॥
न तादृगस्ति पत्तनं न केतनं न वायनं न यत्र संगताः समुच्छलत्प्रमोदमोदिताः।
गृणन्ति तावकं शिवं स्मरन्ति तावकं शिवं परस्परोक्तितो विजृम्भयन्ति तावकं शिवम् ४

कुहचिद्यशसा कुहचिन्महसा कुहचिद्यशसा महसा सहसा
वशयन्नमयन्विनयन्नभितो जनता जनतापविमर्दयिता।

श्वरी द्विरुक्तिरिन्दिराया उपनिषन्निःश्रेयसाद्वैतवादस्य, यत्प्रभावोद्द्योतदन्तुरे वर्तमानसमये साधारणीभवन्ति दुष्प्रापाण्यपि ग्रन्थरत्नानि, प्रभवन्तीव कलिकालविषमूर्च्छितापि भारतीया भारती ॥

अथास्मदृष्टश्रुतेषु शतासन्नेषु साहित्यग्रन्थेषु ध्वन्यालोक–काव्यप्रकाश–साहित्यदर्पण–रसगङ्गाधरा एव नायकायन्त इत्युक्तिर्नातिशयिता । तत्रापि ध्वन्यालोकस्य ध्वनिस्थापनार्थमेव प्रवृत्तत्वान्नेह तदतिरिक्तालंकारीयविषयविशेषप्रपञ्चनम् । ध्वनिकथा त्वत एव काव्यप्रकाशादिषु संकलिता । उक्तं चामुष्य निर्मातारमुद्दिश्य—

'ध्वनिनातिगभीरेण काव्यतत्त्वनिवेशिना ।
आनन्दवर्धनः कस्य नासीदानन्दवर्धनः ॥' इति ॥

काव्यप्रकाशे तु दृश्यकाव्यप्रतिपादनमन्तरा प्रायः सर्व एव साहित्यशास्त्रीयः पदार्थः सूक्ष्मानुसंधानेन व्यवस्थापितः । किं पल्लवितेन, प्रथितश्च गुणगरिम्णैव—

'काव्यप्रकाशो यवनः काव्याली च कुलाङ्गना ।
अनेन प्रसभाकृष्टा कष्टामेषाश्नुते दशाम् ॥'

इति तत्प्रशंसापर्यवसायी श्लोकः ।

रसगङ्गाधरस्तु सर्वातिशायी स्याद्, यदि दुर्दैवहतकेन तत्पूर्तिः सह्येत । अमुष्योत्कृष्टता यथोद्घुष्टा तथैव दरीदृश्यते । उक्तं च तैलङ्गपुंगवेन—

'निमग्नेन क्लेशैर्मननजलधेरन्तरुदरं
मयोन्नीतो लोके ललितरसगङ्गाधरमणिः ।
हरन्नन्तर्ध्वान्तं हृदयमधिरूढो गुणवता-
मलंकारान्सर्वानपि गलितगर्वान्रचयतु ॥'

अयमुदात्तालंकारप्रस्तावे पादोनार्यायामेव विरम्यते । अहो कीदृशी दुर्दैवघटनरि निपतिता, यन्नियन्त्रितः—

क कुर्वते दरिद्राः कासारवती धरा मनोज्ञतरा ।
: पावनस्त्रिलोक्याम्..... ॥'

न्तमार्यायाश्चरमं चरणमपि पूरयितुं न पारितवान् । समस्तसाहित्यसंमित्रीयस्यास्य कयापि कलया विकलाप्याननद्वयी सकलसहृदयहृदयावर्जणा । मन्ये चामुष्य पञ्चाननतायां साकल्येनालंकारिककुलकुञ्जराणां ति जगन्नियन्त्रान्तरायः पातित इति ॥

साहित्यदर्पणः ।

ाहित्यदर्पणस्तु ध्वन्यालोक–काव्यप्रकाशप्रभृतिपदार्थप्रतिपादको भूत्वापि

भव भारतभूवलयैकविभो परमेश्वरसान्द्रदयार्द्रदृशा ।
सह वेदनिवेदितवृत्तजुषा प्रभुमाधवसिंहधराधिभुवा ॥ ५ ॥

५. रसगङ्गाधरस्योपमर्दाय निष्पन्नोऽप्यलंकारकौस्तुभो नैतादृक् सहृदयहृदयावर्जकः । उपमालंकारावधिस्तु ख्यापयति ग्रन्थकर्तुर्व्याकरणन्यायपाण्डित्यम् ॥

दृश्यकविकर्मविषये केवलतन्निरूपकदशरूपकादिनिबन्धमधरीकरोति। प्रकाशवदेषोऽपि कारिकाव्याख्योदाहृतिभिस्त्रिधा निरूपितः। तत्र कारिकाः स्वीया एव, उदाहृतयस्तु परकीयाः स्वीयाश्चाप्यासते। प्रमेयाणामुपपादनं तु प्रायेण प्राञ्जलमेव, यत्तु कुत्रचिद्गहनं तद्विषयनिबन्धनमूलकम्, न तावल्लेखकाठिन्यमूलकम्। किं कथनारभव्या, दुर्गमा दुर्लभाश्चापि विषया इह तथा विशकलिता यथा सुखेन सुकुमारमतिभिरप्यवगन्तुं शक्यन्ते।

एवं चैष साहित्यशास्त्रे व्युत्पित्सूनां परिशीलितव्याकरणतर्काणां छात्राणामुदारधीशय्यामधिरोढुमर्हतीति न स्तुतिपाठः। अवादि चावसाने—

'साहित्यदर्पणममुं सुधियो विलोक्य
साहित्यतत्त्वमखिलं सुखमेव वित्त ॥'

यस्त्विह कुत्रचिच्छृङ्गारतरङ्गितः प्रस्तावः स नैतस्य दूषणाय प्रभवति, इति दोषमाशङ्क्यैवावादि काव्यालंकारे **रुद्रटेन**—

'नहि कविना परदारा एष्टव्या नापि चोपदेष्टव्याः।
कर्तव्यतयान्येषां नच तदुपायोऽभिधातव्यः ॥
किंतु तदीयं वृत्तं काव्याङ्गतया स केवलं वक्ति।
आराधयितुं विदुषस्तेन न दोषः कवेरत्र ॥'

अस्य दर्पणस्य कर्ता सांधिविग्रहिको महापात्रश्चन्द्रशेखरसूनुः श्री**विश्वनाथ**कविराजः। शं० १२८७ खि० १३६५।

एष शालिवाहनशकस्य त्रयोदशशताब्द्या अन्तिमभागे आसीत्, यतो **जयन्तम् अलावद्दीनं** च स्मरति। यद्यपि प्रसिद्धदर्पणपुस्तके जयन्तस्य नाम नोपलभ्यते तथापि [1]प्राचीनपुस्तके 'यः कौमारहरः—' इति श्लोकस्य प्रपञ्चे 'अत्र यज्जयन्तेनोक्तम्—' इत्यादिना नाम गृहीतम्। अयं जयन्तः खेषुविश्व (१३५०)मिते विक्रमाब्दे प्रकाशस्य दीपिकाख्यां व्याख्यां कृतवानिति तत्कृतदीपिकान्ते [2]व्यक्तम्। अलावद्दीनस्य नाम तु

---

१. **प्राचीनेति**। अस्य पुस्तकस्य षोडशपृष्ठे तृतीयपङ्क्तिस्थं **ग**-पुस्तकस्थपाठान्तरं निरीक्षणीयम् ॥

२. तथाहि 'संवत् १३५० वर्षे ज्येष्ठवदि ३ रवौ अद्येह आशापल्लीसमावासित-श्रीमद्विजयकटके सकलारातिभूपालमौलिमुकुटालंकारभूषितपादपङ्कजमहाराजाधिराजश्रीसारङ्गदेवकल्याणविजयराज्ये साहित्यविद्याविसिनीविकासनैकभास्करस्य सकलालंकारविवेकचतुरमानसमानसराजहंसस्य षड्दर्शनपारावारपोतायमानावान्तरप्रतिभानिमज्जनैकमहापोतस्य निखिलपुराणपुराणीकृतमार्गेतरविद्वज्जनमनोज्ञानमहान्धकारसंहारसहस्रकरस्य श्रुतिस्मृतिमहार्थनिर्भ्रान्तविभ्रान्तविद्वज्जनमनोऽज्ञानतिमिरपरिहारचन्द्रोदयस्य श्रीमद्दुर्जरमण्डलेशमुकुटालंकारप्रभापरिचुम्बनबहुलीकृतचरणनखकिरणस्य महामात्यपुरोहितश्रीमद्भरद्वाजस्याङ्गभुवा पुरोहितश्रीजयन्तभट्टेन सकलसुधीजनमनोऽज्ञानतिमिरविनाशकारणं विरचितेयं काव्यप्रकाशदीपिका।

श्रीमद्भरद्वाजपदाम्बुजीयप्रसादतो ग्रन्थरहस्यमेतत्।
विज्ञाय किंचित्कृतवाञ्जयन्तस्तत्र प्रमाणं सुधियां वितर्कः ॥
काव्यप्रकाशदीपिका समाप्ता ॥' इति ॥

चतुर्थपरिच्छेदे 'संधौ सर्वस्वहरणं–' इति श्लोके गृहीतम् । अयं यवनराजः शैलाग्निसूर्य(१२३७)मिते शालिवाहनाब्दे विषप्रयोगेण व्यापादित इत्यैतिहासिकाः ।

अथ चैनं काव्यप्रदीपे 'अर्वाचीनास्तु–' इत्यादिना 'तददोषौ काव्यार्थौ–' इति कारिकाव्याख्याने **गोविन्द**ठक्कुरः स्मरति । अयं मैथिलशिरोमणिः शालिवाहनस्य पञ्चदशशतकपूर्वभागे भवितुमर्हतीति बहवः ।

एवं च यदि अलावद्दीनस्य मृत्युकाले दर्पणकारस्य जन्मकालः कल्प्यते तदा पञ्चाशद्वर्षासन्ने वयसि दर्पणनिर्माणं संभाव्यते ।

राघवविलासमहाकाव्यस्य कुवलयाश्वचरितप्राकृतमहाकाव्यस्य चन्द्रकलाप्रभावतीनाटिकयोः षोडशभाषामय्याः प्रशस्तिरत्नावल्याश्च निर्माणानन्तरं दर्पणप्रणयनम्, तथा दर्पणस्य सुप्रसिद्धावस्थायामेव गोविन्दमहापण्डितस्य तादृशादरदर्शी लेखश्च प्रतिपादितकालकलनायां बीजम् ।

दर्पणरचनानन्तरं विश्वनाथेन नरसिंहविजयम्, काव्यप्रकाशदर्पण इति ग्रन्थद्वयी निरमायीति तत्कृतकाव्यप्रकाशदर्पणतो ज्ञायते ।

एतन्नाम सांधिविग्रहिक–महापात्र–कविराजेत्युपाधिघटितमास्ते, तत्र विचार्यते– संधिविग्रह इति राज्याधिकारविशेषः, तत्र नियुक्तः सांधिविग्रहिकः । संधिविग्रहाधिकृत इत्यर्थः । 'तत्र नियुक्तः' (४।४।६९) इति सूत्रेण ठक् । एष उपाधी राजतरङ्गिण्यादौ बहुत्र दृश्यते । सहृदयानन्दाख्यमहाकाव्यप्रणेता **कृष्णानन्दो**ऽप्यात्मानं सांधिविग्रहिक–महापात्रेति विशेषणाभ्यां कीर्तयति । महापात्रो ब्राह्मणविशेष इति केचित्। उपनामान्तरमिति परे। न च लेखकादिदोषवशान्महामात्रेण भवितव्यमिति वाच्यम्, तस्य प्रधानवाचकत्वे सांधिविग्रहिकेति सामान्योपाधिलेखस्य वैयर्थ्यापत्तेः । कविराज इति महाकविसमानार्थकम्, नतु **अवध**प्रान्तीयप्रधानहिन्दीभाषायां 'भाट' इति प्रसिद्धजातेरवगमकम् । अयमुत्कलदेशवासी स्मार्तवैष्णव इति ॥

अथ प्रसङ्गाद्दर्पणोद्दङ्कितानां ग्रन्थकाराणामितिवृत्तमकारादिक्रमेण मनाङ् निरूप्यते–

अभिनवः (अभिनवगुप्तः)

एष शैवशिखामणिः प्रत्यभिज्ञादर्शनपरमाचार्यः शालिवाहनस्य दशमशताब्द्याः पूर्वभागे कश्मीरान्पवित्रतरीकुर्वाण आसीत् । इदम्—

'इति नवतितमेऽस्मिन्वत्सरेऽन्त्ये युगांशे
तिथिशशिजलधिस्थे मार्गशीर्षावसाने ।'

इति तदीय-बृहत्प्रत्यभिज्ञाविमर्शिनीश्लोकाज्ज्ञायते । अयमत्यन्तमहानुभावत्वाद्'आचार्याभिनवगुप्तपादाः' इति सगौरवं कीर्त्यते राजानक-मम्मटादिभिः। एतस्य नामधेये गुप्तपदं काश्मीरिकब्राह्मणजातिविशेषदर्शकम्, नतु तदंशरूपत्वेनोपात्तम् । एवं च 'अभिनवः' इत्येव केवलं नाम । तथा प्रयुक्तमाचार्यशिष्येण **क्षेमराजे**न नेत्रोद्द्योतप्रारम्भे–

'अभिनवबोधादित्यद्युतिविकसितहृत्सरोजान्मे ॥'
रसयत तरसा परिमलमसारसंसारवासनाशान्त्यै ॥'

---

१. काश्मीरप्रचरिते लौकिके वर्षे । पञ्चविंशत्या वर्जितेषु कलिगतवर्षेषु शतावशेषितेषु यदवशिष्यते तल्लौकिकवर्षप्रमाणम् ।

आचार्येण प्रत्यभिज्ञाशास्त्रातिरिक्ता अपि ध्वन्यालोकलोचन–नाट्यलोचनाभिनवभारत्याख्यभारतीयनाट्यशास्त्रव्याख्याप्रभृतयो ग्रन्था विरचिताः। ध्वन्यालोकलोचनमेव लोचनशब्देन व्यवहृतवान्दर्पणकारः॥

उदयनः।

अयमाक्षपादीनां काणादीनां च गिरां रहस्याविर्भावकः परमाचार्यः शालिवाहनस्यैकादशशताब्याः प्रारम्भे मिथिलामण्डले जागरूक आसीत्। अमुं च सप्तशल्यन्ते **गोवर्धनः**—

'उदयन–बलभद्राभ्यां सप्तशती शिष्य–सोदराभ्यां मे।
द्यौरिव रवि–चन्द्राभ्यां प्रकाशिता निर्मलीकृत्य॥'

इत्यार्यायां स्वशिष्यत्वेन सादरं स्मरति। गोवर्धनश्च गङ्गाधिपतेर्**लक्ष्मण**सेनस्य सभायामेकः सभास्तार इतीतिवृत्तं तस्यैव सभासद्मशिलायामुत्कीर्णात्—

'गोवर्धनश्च शरणो जयदेव[1] उमापतिः।
कविराजश्च रत्नानि समितौ लक्ष्मणस्य च॥'

इति श्लोकादवगम्यते। लक्ष्मणसेनश्च स्वस्यैकादशशताब्याश्चरमभागपर्यन्तमासीदित्यैतिहासिकाः। एवं च गोवर्धनादीनां समानकालिकता सुव्यक्ता।

किंचैतदासन्नकाले तार्किक-गाणितिकशिरोमणिः **श्रीधरो**ऽप्यासीत्। यतोऽमुना प्रशस्तपादभाष्यस्य न्यायकन्दल्याख्यव्याख्यावसाने—

'त्र्यधिकदशोत्तरनवशत (९१३) शाकाब्दे न्यायकन्दली रचिता।
श्रीपाण्डुदासयाचितभट्टश्रीश्रीधरेणैषा॥'

इत्युक्तम्। अथो चायं सिद्धान्तशिरोमणिकारेण तत्रभवता भास्कराचार्येण तथा तदनुगामिभिश्च तत्र तत्र स्मर्यते। एतेनास्य गाणितिकतापि स्फुटा।

उदयनाचार्यप्रणीताः किरणावलीकुसुमाञ्जल्यादयो महापण्डितमान्या ग्रन्थाः सर्वत्र प्रख्याताः। आसंस्तदानीं वङ्गप्रान्ते लक्ष्मणसेन–पाण्डुदासप्रभृतयः कतिचन कायस्थपुंगवाः, येषामन्तिके एवंविधानि पण्डितरत्नानि व्यराजन्त। लक्ष्मणसेनस्य कायस्थता तु सेनपदेनैव व्यक्ता। वङ्गादिषु सांप्रतमपि कायस्थेषु सेनकुलं सुप्रसिद्धतरम्। गोवर्धनाचार्येण सप्तशल्यारम्भे—

'सकलकलाः कल्पयितुं प्रभुः प्रबन्धस्य कुमुदबन्धोश्च।
सेनकुलतिलकभूपतिरेको राकाप्रदोषश्च॥'

एवं वर्णितो लक्ष्मणसेनः। पाण्डुदासस्य कायस्थता तु गुणरत्नाभरणः कायस्थकुलतिलकः पाण्डुदास इत्यादिषु पदेषूच्चार्यमाणेषु क्रमभाविनो वर्णाः परं प्रतीयन्ते–इत्यादिन्यायकन्दलीफक्किकयातिरोहिता॥

कालिदासः।

उज्जयिनीनायकस्य श्री**विक्रमादित्य**महाराजस्य सभायामेकः कालिदास आसीदित्येके। तस्यैव चक्रवर्तिनः सभायां त्रयः कालिदासा आसन्निति परे। विक्रमार्ककाला-

---

१. अयं जयदेवश्चन्द्रालोकादिकर्तुर्जयदेवाद्भिन्नः॥

दर्वाक् राजशेखरमहाकविकालात् प्राक् त्रय इतीतरे । इत्थं विप्रतिपत्तौ मीमांस्यते तावत्—अभिनन्द महाकवी रामचरिते—

'हालेनोत्तमपूजया कविवृषः श्रीपालितो लालितः
ख्यातिं कामपि कालिदासकवयो नीताः शकारातिना[1] ।
श्रीहर्षो वितनोति गद्यकवये बाणाय वाणीफलं
सद्यः सत्क्रिययाभिनन्दमपि च श्रीहारवर्षोऽग्रहीत् ॥'

इत्युक्तवान् । तेन शकाख्ययवनोन्मूलकस्य विक्रमादित्यस्य संसदि लब्धसत्कारः कश्चित् कालिदास आसीदिति व्यक्तमेव । अपरे पुनरेवं परिष्कुर्वते—अत्र 'कालिदासकवयः' इति बहुवचनप्रयोगः कपिञ्जलालम्भवाक्यनयेन कालिदासत्रयीमवगमयति । न चादरातिशयार्थं बहुवचनोपादानमिति वाच्यम्, व्यक्तिमनुरुध्य विहितेषु कविप्रशंसाश्लोकेषु तादृशप्रयोगानुपलम्भात् । नच कविताशक्तिवैकल्येन तथा प्रयोग इत्यपि वाच्यम्, सुधासोदर्यस्य रामचरिताख्यमहाकाव्यस्य तत्कर्तृकत्वासंभवात् । आसंश्च महाराष्ट्रचूडामणेः कान्यकुब्जमहीमहेन्द्र–महेन्द्रपाल–सभालंकृतेर्बालरामायणादिकवयितृ राजशेखरमहाकवेः प्राक् त्रयः कालिदासा इति तत्कृतात्—

'एकोऽपि जीयते हन्त कालिदासो न केनचित् ।
शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु ॥'

इति सुभाषितहारावल्यादिस्थश्लोकाज्ज्ञायते । स च राजशेखरमहाकविः शालिवाहनस्य नवमशताब्द्या अन्त्यभागेऽभूदित्यैतिहासिकाः । इतरे पुनरेवं मन्यन्ते—विक्रमादित्यस्य सभाभरणभूत एकः कालिदासः । ततः

'जानकीहरणं कर्तुं रघुवंशे स्थिते सति ।
कविः कुमारदासश्च रावणश्च यदि क्षमः ॥'

इति सूक्तिमुक्तावलीधृत–राजशेखरमहाकविश्लोकतो जानकीहरणाख्यमहाकाव्यप्रणेतुर्विक्रमार्कसप्तमशताब्दीप्रारम्भभुवः कुमारदासकवेः किंचित्प्राक्कालिकत्वेन समानकालिकत्वेन वाध्यवसितो द्वितीयः कालिदासः । एताभ्यामधस्तनस्तृतीय इति ॥

एवं च कालिदासकृतित्वेन ख्यातेषु रघुवंशप्रभृतिष्वेककर्तृकता सुतरां व्युदस्यते । यतस्त्रयोऽपि कालिदासाः कवयः कविकर्मकरणालंकर्मीणाश्चाभूवन् । इतरथा कस्तान्स्मरेत् । तेषु कतमेन कतमा कृतिरकारीति परीक्षातिमात्रं दुःशका । तथापि रघुवंश–कुमारसंभवयोरेक एव कर्तेति प्रतिपादनं बाढं ज्यायः । यत एककर्तृकतायामेव 'आलोकमार्गं सहसा व्रजन्त्या–' इत्यादिश्लोकषट्कस्योभयत्र लेखः संगच्छते । एष एव प्रथमः कालिदास इत्यपि वक्तुं पार्यते । यतः 'उपमा कालिदासस्य–' इति चिरंतनी प्रतीतिः । अनुभूयन्ते च यथोपमालंकारा रघुवंशादौ तथा नेतरत्र । आ-

---

१. शकेति । 'यो रूमदेशाधिपतिं शकेश्वरं जित्वा गृहीत्वोज्जयनीं महाहवे । आनीय संभ्राम्य मुमोच तं त्वहो श्रीविक्रमार्कः समसह्यविक्रमः ॥' इत्यादिकथा विक्रमस्य शकारातिपदेनाभिधाने प्रमाणम् ॥

सीच्च राजशेखरमहाकवितोऽपि प्राचीनानां रामाभ्युदयादिनाटकनिर्मातृ–कान्यकुब्जेश्वरयशोवर्मनृपतिसभाभरणभूतानां महाकवि–भवभूति–वाक्पतिराज–प्रभृतीनां समये कस्यचित्कालिदासस्य साधीयसी प्रसिद्धिरित्यंशे—

'येनायोजि नवेऽश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म ।
स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः ॥'

इति पुलकेशिशिलालेखः प्रमाणम् । एतल्लेखकालस्तु—

'पञ्चाशत्सु कलौ काले षट्सु पञ्चशतासु (५५६) च ।
समासु समतीतासु शकानामपि भूभुजाम् ॥'

इति तच्छिलालेखश्लोकेनैव व्यक्तः । एतेन तदानींतनेऽपि काले यो दिगन्तविश्रान्तकीर्तितया लक्ष्यभूतः स एवात्र प्रथमत्वेन विवक्षित इति निष्प्रत्यूहम् ॥

मेघदूत–अभिज्ञानशाकुन्तल–विक्रमोर्वशीय–मालविकाग्निमित्रेषु कापि कृतिः प्रथमकालिदासस्य स्यान्न वा, द्वितीय–तृतीययोस्तु स्यादेव । अत्रोक्तानां प्रायः सर्वेषां कालिदासग्रन्थानां श्लोकास्तत्र तत्र प्राचीनालंकारनिबन्धेषूदाहरणतया न्यस्ताः । चतुर्थः कालिदासस्तु ज्योतिर्विदाभरणकृत् । अयमेतद्ग्रन्थस्यान्तिमेऽध्यायेऽष्टरसखाग्निमितेषु कलिगताब्देषु ग्रन्थनिर्माणं वदति । तथा च तद्वाक्यम्—

'अब्दे सिन्धुरदर्शनाम्बरगुणै(३०६८)र्याते कलेः संमिते
मासे माधवसंज्ञके च विहितो ग्रन्थक्रियोपक्रमः ।
नानाकालविधानशास्त्रगदितं ज्ञानं विलोक्यादरा-
दूर्जे ग्रन्थसमाप्तिरत्र विहिता ज्योतिर्विदां प्रीतये ॥'

वस्तुवस्तु चतूरसरुद्र(११६४)मिते शालिवाहनाब्दे ग्रन्थकरणं संभवतीति गणकतरङ्गिण्यां सरयूपारीणपुंगवाः । एतद्ग्रन्थस्यान्तिमाध्यायो नितरामप्राणाणिक इति प्रामाणिकाः । पञ्चमः कालिदासस्तु सम्राडकबरसमकालिकः । अकबरस्तु भतिथि-(१५२७)मिते शालिवाहनाब्दे स्वर्गातिथिरभूत् । कश्चित्कालिदासः कान्यकुब्ज इति श्रूयते, सोऽप्येतेष्वन्यतमः स्यात् । प्रथम इति केचित् । कालिदासविषये बहुभिर्बहूक्तं तदखिलमस्मन्मतेऽनावश्यकमिति विरम्यते ॥

चण्डीदासः ।

अयं विश्वनाथकविराजपितामहस्यानुजः काव्यप्रकाशटीकाकर्ता । अस्यैव मतं प्रदीपकारेण बहुत्रोपन्यस्तं दूषितं च । उक्तविश्वनाथकालादमुष्य सत्ताकाल उन्नेतुं सुशकः ॥

चन्द्रशेखरः ।

एष विश्वनाथकविराजस्य जनकः पुष्पमाला–भाषार्णवयो रचयिता ।

दण्डी ।

अयं महाकविर्मूर्धन्यो धन्यः शालिवाहनस्य पञ्चमशताब्द्यामासीत् ।

'त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः ।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ॥'

इति सुभाषितहारावलीधृत—राजशेखरमहाकविश्लोकादमुष्य ग्रन्थत्रयकर्तृकत्व व्यक्तमेव । तत्र काव्यादर्शो दशकुमारचरितं चेति कृतिद्वयी सुप्रसिद्धा तावत् । तृतीया छन्दोविचितिः[1] स्यात् ॥

धनिकः ।

अयं विष्णुतनूजन्मा धनिकपण्डितः शालिवाहनस्य नवमशताब्याश्चरमभागेऽभूत् । अनेन काव्यनिर्णय—दशरूपावलोकौ निरमायिषाताम् ॥

धर्मदत्तः ।

एष विश्वनाथकविराजवृद्धप्रपितामहस्य नारायणस्य पश्चाद्भावी साहित्ये कस्यापि ग्रबन्धस्य प्रणेतेति दर्पणादेव ज्ञायते । काव्यप्रकाशस्य दर्पणव्याख्यानतस्तु 'यदाहुः श्रीकलिङ्गभूमण्डलाखण्डलमहाराजाधिराजश्रीनरसिंहदेवसभायां धर्मदत्तं स्तुवयन्तः सकलसहृदयगोष्ठीगरिष्ठकविपण्डितास्तत्पितामहश्रीमन्नारायणदासपादाः' इति फक्किकया विशेषोऽवधार्यते । तत्र पितामहशब्ददर्शनेन प्राक्कालनिर्णये संदेहः[2] आपतति ॥

ध्वनिकारः ।

कोऽयं ध्वनिकारः किंच तन्नामेति न मनागपि ज्ञायते । किंतु संप्रति ध्वनिकारिकाणां व्याख्याता राजानकानन्दवर्धन एव ज्ञायते । व्यवह्रियते च कैश्चिदयं ध्वनिकारत्वेन । एतत्कृता ध्वनिव्याख्या आलोकपदवाच्या । एवं विभागसत्वेऽपि सव्याख्योऽयं ग्रन्थो ध्वन्यालोकपदेन व्यपदिश्यते । अस्योपरि श्रीमदाचार्याभिनवगुप्तपादैर्लोचनाख्या व्याख्योन्मीलिता । अयं राजानककुलोत्तंस **आनन्दवर्धनाचार्यो**ऽवन्तिवर्मणो राज्यकाले कश्मीराखासीत् । उक्तं च राजतरङ्गिण्यां कल्हणेन—

'मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः ।
प्रथां रत्नाकरश्चागात्साम्राज्येऽवन्तिवर्मणः ॥'

अवन्तिवर्मणो राज्यकालस्तु शालिवाहनस्य सप्ताश्वसप्त (७७७) मितवत्सरमारभ्य तर्कखेभ(८०६) मितवत्सरपर्यन्तमासीत् ॥

नखकुट्टः ।

कोऽयं नखकुट्टाचार्यः कश्च तद्विहितो निबन्ध इति भृशं विचारणीयम् । एतन्मतं तु दर्पणस्य षष्ठपरिच्छेदे 'नेपथ्योक्तं श्रुतं तत्र—' इत्यादिना प्रतिपादितमास्ते ॥

नारायणः (नारायणदासः) ।

अयं विश्वनाथकविराजस्य वृद्धप्रपितामह इत्युक्तं धर्मदत्तप्रस्तावे प्राक् ॥

पुरुषोत्तमः ।

द्वौ पुरुषोत्तमौ प्रसिद्धौ । एकस्तावत्त्रिकाण्डशेषादिप्रणेता, परो विष्णुभक्तिकल्पलतानिर्माता । तत्राद्यस्य त्रिकाण्डशेषादिसमाप्तौ पुरुषोत्तमदेव इति नामोपलभ्यते, द्वितीयस्य तु पुरुषोत्तम इति । परमाद्यस्यापि पद्यरचनायां पुरुषोत्तम इत्येव नामधेयं

---

१. **छन्दोविचितिरिति ।** 'छन्दोविचितिरिव मालिनीसनाथा' इति वासवदत्ताश्लेषः । तत्र छन्दोविचितिर्ग्रन्थविशेष इति तट्टीकाकृत् । अयं ग्रन्थो दण्डिना कृत इति जनश्रुतिः ॥

२. **संदेह इति ।** यतो दर्पणे नारायणो वृद्धप्रपितामहत्वेन कीर्तित इति ॥

दृश्यते । तथाहि—त्रिकाण्डशेषप्रारम्भे 'अयं प्रयत्नः पुरुषोत्तमस्य' इति । हारावली-प्रारम्भे 'हारावली विरचिता पुरुषोत्तमेन' इति । तदन्ते 'विनिर्मितेयं पुरुषोत्तमेन' इति । एतेन द्वयोरेकता संभाव्यते । यद्ययमेव विश्वनाथकविराजेन दर्पणस्य नवम-परिच्छेदे 'पुरुषोत्तमस्त्वाह—' इत्यादिना स्मृतः स्यात्तर्हि पूर्वोक्तविश्वनाथकविराजस-मयात्प्राग्दशमस्त्रिस्ताब्दशतकपर्यन्तं पुरुषोत्तमसत्तां कल्पयतामैतिहासिकानामुक्तयो मांसलीभवन्ति । पुरुषोत्तमानुबन्धिनस्तु हारावली-विष्णुभक्तिकल्पलतयोरुपसंहार-श्लोकेभ्योऽवसेयाः ॥

भरतः ।

सांप्रतमेतदुपज्ञमेव नाट्यशास्त्रं लोके प्रसिद्धम् । अत एव विक्रमोर्वशीये—

'मुनिना भरतेन यः प्रयोगो भवतीष्वष्टरसाश्रयो नियुक्तः ।
ललिताभिनयं तमद्य भर्ता मरुतां द्रष्टुमनाः सलोकपालः ॥'

इति प्रायोजि । यत्त्वयं भरतमुनिर्दर्पणादौ महर्षिपदेन व्यपदिष्टस्तदादरातिशया-र्थम् । यतो मन्त्रद्रष्टार एव महर्षयो भवितुमर्हन्तीति निरुक्तादौ प्रसिद्धम् । पुरा तु **शिलालि-कृशाश्व**प्रणीतानि कानिचिन्नटसूत्राणि प्रथितान्यासन् । यदनुरोधेन भगवान्**पाणिनिः**'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (४।३।११०,) 'कर्मन्दकृ-शाश्वादिनिः'(४।३।१११) इति सूत्रे सूत्रयामास । शिलालिना प्रोक्तमधीयते शैला-लिनो नटाः । कृशाश्विना प्रोक्तमधीयते कृशाश्विनो नटाः ।

अहो इह सर्वेषां पदार्थानामाविर्भावतिरोभावौ नैसर्गिकौ, न ज्ञायतेऽनाद्यनन्ते-ऽमुष्मिन्काले कियन्तः पदार्था उत्पद्यन्ते व्यवह्रियन्ते विलीयन्ते च । हंहो एकः स नाट्यप्रचारसमय आसीद्, यत्प्रचारकव्यपदेशेनाचार्याणां सूत्रप्रणयनावश्यकत्वमाप-तितम् । एकः सांप्रतमास्ते, यत्र पुरा प्रचरितस्यापि यथार्थतया भानं न भवति । ही सर्वातिशायी कालमहिमा । एवं च पुनरेष गण्डोपरि विस्फोटः स्फुरति, यत्खलु संप्रति सांप्रतिकैश्चिरंतनतया प्रतीतान्यपि विषयान्तराणि नानाविधदोषारोपभूम्ना कलुषीक्रिय-न्ते । कलुषीक्रियन्तां यथारुचि । किमनेन गगने बीजाकरणप्रयासेन । अत्रेदं विचार्यते—

आर्षबन्धमनुसृत्य मानुषबन्धप्रवृत्तिः, आहोस्विन्मानुषमनुसृत्यार्षप्रवृत्तिः । तत्र मानुषबन्धस्यार्षमूलकत्वं सर्वसंमतम् । इतरथा दशरूपकादिनूतननिबन्धा अपि ना-ट्यशास्त्रस्य मूलभूता भवेयुः । परमिदानीं दशरूपकप्रमेयनिरूपकाणां निबन्धानां विलुप्तप्रायत्वे नाट्यशास्त्रमेव बहु जानानानामायुष्मतामन्तःकरणे नाग्निपुराणवन्नाट्य-शास्त्रे काचन दुष्कल्पना प्रादुर्भूता । मन्ये प्रादुर्भविष्यति तत्तद्विषयजातप्रतिपादकनिब-न्धशतप्रसिद्धियोगेनाग्नेय इव नाट्यशास्त्रेऽपि नाट्यप्रदीप—नाट्यदर्पण—नाट्यलोचन —रत्नाकर—सुधाकर—नागरसर्वस्व—मदनोदय—भावप्रकाशिकादिप्रकाशेन अन्यथा कि-मपराद्धमग्निपुराणेन, यदिदं केनचिदितस्ततः संगृहीतमिति मिथ्यापवादमषीमलीमसं क्रियते । कस्मात्संगृहीतमित्यनुयोगदशायां किमुत्तरमुपादेयं स्यात् ।

(१) किमेतच्छन्दोभ्यः संगृहीतम्, छन्दांसि तु वैदिकानि लौकिकानि च ल-क्ष्याणि लक्ष्यीकृत्य प्रवृत्तानि । तत्र लौकिकानि लक्ष्याणि तु पुराणान्येव ।

(२) किमेतदलंकारेभ्यः संगृहीतम्, अलंकारास्तु ऋग्यजुःसामभ्यो निर्गत्येहैव प्रतिष्ठां प्रतिपेदिरे। किंचाग्नेयश्लोका ध्वन्यालोकादिषु प्राचीनालंकारिकनिबन्धेषूपलभ्यन्ते। न चैतावता तेभ्य आग्नेये संगृहीता इति निश्चेतुं पार्यते। किमसौ संग्रहः सौष्ठवार्थम् उतासौष्ठवार्थम्। यदि सौष्ठवार्थम् 'अपारे काव्यसंसारे–' इत्यादिभ्यो विशिष्टे ध्वन्यादिविषये वर्तमानेऽप्येषैव श्लोकद्वयी किमिति संगृहीता। नहि राजद्रव्यापहारकर्मणीव तत्र किमपि भयमाशङ्क्यते। यद्यसौष्ठवार्थम्, को नाम प्रेक्षावानसौष्ठवार्थं प्रयतेत।

(३) किमेतत्कोषात्संगृहीतम्, कोषस्तु प्रथममिहैव प्रादुर्भूतः। तदन्वमरकोषादयो जज्ञिरे। एतदुक्तं भवति—यथा निरुक्ते वैदिकशब्दानां संग्रहो निघण्टुपदवाच्यो भगवता **यास्केन** विहितस्तथैव लौकिकशब्दानां संग्रहो भगवता **कृष्णद्वैपायनेन** विहितः। ततोऽमुं शब्दसंग्रह**ममरसिंहो**ऽपह्नुत्य तत्कालप्रसिद्धनानाशब्दयोजनेन परिष्कृत्य च नामलिङ्गानुशासनाख्यतया प्रचारितवान्। उक्तं चामुना—'समाहृत्यान्यतन्त्राणि–' इति। अत्र 'तन्त्राणि' इति बहुवचनप्रयोगेण नानाग्रन्थेभ्योऽमरकोषनिर्माणं व्यक्तमेव। एषैव कोषनिर्मितिशैली। पुरुषोत्तमेनाप्युक्तम्—

'नानाकाव्यपुराणनाटककथाकोषेतिहासस्मृति-
ज्योतिःशास्त्रगजाश्वमानवभिषक्कोषान्प्रयत्नादियम्।
दृष्ट्वान्यानि च शाब्दिकैः सह कृता हारावली यत्नतः' इति॥

एवं चामरकोषनिर्माणेऽग्निपुराणं मुख्यं साधनमभूत्। यथा—**भास्करराय**निर्मितस्य वैदिककोषस्य निर्माणे यास्कोक्तं निरुक्तमिति। केवलमियती भिदा, यत्खलु सर्वतन्त्रस्वतन्त्रो भास्करराय दीक्षितो वैदिकमार्गावलम्बित्वात्—

'यास्कव्याख्यानुगतः संपूर्णो वैदिकः कोषः।'

इति नामग्रहणपुरःसरं स्वजीव्यमुदटङ्कयत्। अमरसिंहस्तु पुनर्वेदविरुद्धमतावलम्बित्वाद्वैदिकधर्मानुगतस्याग्नेयस्य महापुराणस्य तत्कर्तुर्वा नामग्रहणं नाकरोत्। किंतु स्वस्य सर्वापहारकत्वदोषनिरासाय 'अन्यतन्त्राणि' इतीहान्यग्रहणमेवालंकर्मीणमम्मंस्त। किं चामुष्य ग्रन्थापहारकत्वशीलमपि 'अमरसिंहो हि पापीयान्सर्वं भाष्यमचूचुरत्' इति परम्पराप्रसिद्धेन श्लोकगन्धिना गद्येनाकर्ण्यते। अत्रेदमपि बीजं संभाव्यते—यदा अमरसिंहो निजकोषेऽनेकान्व्याकरणभाष्यानुशिष्टशब्दकलापसिद्धान्तानुल्लिलेख, तदा तल्लेखमसहमानैः प्रचारितासौ किंवदन्तीति।

एवमितरेऽप्याक्षेपाभासा निरसितुमीषत्करा:। किं पल्लवितेन। सर्वेषां वेदानां प्रमेयाव्रभासकं हि पुराणम्, यत इत एवाचार्याणां सारस्वतवैभवः पप्रथे। न केवलमीदृग्गुणपरीतमग्निपुराणमेव, गारुडेऽप्यायुर्वेद–नीति–सामुद्रिक–रत्नपरीक्षादयोऽनेके विश्वजनीना विषया विप्रकीर्णाः। एवंप्रायानङ्कुरायमाणान्विषयानाहृत्यैवाचार्यैः स्वस्वग्रन्थाः सहस्रशाखीकृताः। आस्तां तावदियं महीयसी गवेषणा। आबालविदितं

---

१. 'अपारे काव्यसंसारे–' इत्यादयः॥

दिङ्मात्रमुदाहियते—कालिदासस्य काव्ये न तु कस्यापि परकाव्योद्भूतलशङ्का परं तत्काव्यमपि पुराणमनुसरिति । तथा च शिवपुराणे ज्ञानसंहितायाम्—

'रसानां बध्नती काचित्तथैव संयुता ययौ ।'
'काचिद्धस्ते शलाकां च धृत्वाञ्जनसमन्विताम् ।'
'काचित्तु कामिनी पादं रञ्जयन्ती यदा तदा ।'

इति श्लोकभागैः समं 'अर्धाञ्चिता–विलोचनं दक्षिणमञ्जनेन–प्रसादिकालम्बितमग्र-पादम्–' इति रघुवंश-कुमारसंभवयोः सप्तमसर्गश्लोकानां सूक्ष्मदशा संवादे विधीयमाने शिवपुराण-रघुवंशश्लोकानामुपजीव्योपजीवकभावो व्यक्तं फलति । तथैव—

'हित्वेन्द्रप्रमुखान्देवानैश्वर्यसंयुतानपि ।
पतिं पिनाकपाणिं वै प्राप्तुमिच्छति सांप्रतम् ॥'
'इयं महेन्द्रप्रभृतीनधिश्रियश्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्यं मदनस्य निग्रहात्पिनाकपाणिं पतिमाप्तुमिच्छति ॥'

एवमादयः । अत एव—

'छायोपजीवी पदकोपजीवी पादोपजीवी सकलोपजीवी ।
भवेदथ प्राप्तकवित्वजीवी स्वोन्मेषतो वा भुवनोपजीव्यः ॥'

इत्यालंकारिकसमयेन भगवद्वाल्मीकि–व्यासादीनां भुवनोपजीव्यत्वं तु सर्वत्रैवोपपद्यते, न क्वापि व्यभिचरतीत्यलं प्रसक्तानुप्रसक्त्या ॥

नाट्यशास्त्रं कदा प्रादुर्भूतमिति विचारे मुनीन्प्रति भरतवाक्यम्—

'पूर्वं कृतयुगे विप्रा वृत्ते स्वायंभुवेऽन्तरे ।
त्रेतायुगे संप्रवृत्ते मनोर्वैवस्वतस्य च ॥
ग्राम्यधर्मं प्रवृत्ते तु कामलोभवशंगते ।
ईर्ष्याक्रोधादिसंमूढ लोके सुखितदुःखिते ॥
देवदानवगन्धर्वै रक्षोयक्षमहोरगैः ।
जम्बूद्वीपे समाक्रान्ते लोकपालप्रतिष्ठिते ॥
महेन्द्रप्रमुखैर्देवैरुक्तः किल पितामहः ।
क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत् ॥
न च वेदविहारोऽयं संश्राव्यः शूद्रजातिषु ।
तस्मात्सृजापरं वेदं पञ्चमं सार्ववर्णिकम् ॥
एवमस्त्विति तानुक्त्वा देवराजं विसृज्य च ।
सस्मार चतुरो वेदान्योगमास्थाय तत्त्ववित् ॥
धर्म्यमर्थ्यं यशस्यं च सोपदेशं ससंग्रहम् ।
भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम् ॥
सर्वशास्त्रार्थसंपन्नं सर्वशिष्यप्रवर्तकम् ।
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम् ॥

संकल्प्य भगवानेवं सर्वान्वेदाननुस्मरन् ।
नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसंभवम् ॥
जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान्रसानाथर्वणादपि ॥
वेदोपवेदैः संबद्धो नाट्यवेदो महात्मना ।
येन नारदसंयुक्तो वेदवेदाङ्गकारणम् ॥
उपस्थितोऽहं लोकेशं प्रयोगार्थं कृताञ्जलिः ।
नाट्यस्य ग्रहणं प्राप्तं ब्रूहि किं करवाण्यहम् ॥' इति ॥

भर्तृहरिः (हरिः) ।

अयमुज्जयिनीनाथस्य विक्रमादित्यस्य ज्येष्ठो भ्रातासीत् । अतोऽस्य विक्रमकालिकत्वम् । अस्य हरिर्नाम । अत एव 'तथापि हरिबद्धेन-' इति प्रायुङ्क **कैयटः** । बहुत्र भर्तृ-हरिरित्यपि दृश्यते । तत्र भर्तृपदं प्रजापोषकलख्यापकम्, नतु काश्मीरिके **भर्तृमेण्ठा**दाविवोट्टङ्कीभूतम् । दुष्टस्त्रीखिन्नचेतसानेन राज्यलक्ष्मीमवज्ञाय वैराग्यमेवाश्रायि । अनेन वैयाकरणधुरीणेन साराख्यमहाभाष्यव्याख्या, वाक्यपदीयं, शतकत्रयं च निरमायि । तत्र सारस्य सारवत्ता लोकोत्तरैव, यदाधारेण काश्मीरिको महावैयाकरणः कैयटो भाष्योपरि प्रदीपं निरमात् । वाक्यपदीयं नाम वाक्यपदे अधिकृत्य कृतो ग्रन्थः । 'शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः' (४।३।८८) इति सूत्रेण च्छः । एतस्य **हेलराज-पुञ्जराजौ** व्याख्यातारौ, तत्र हेलराजः कङ्कणात्प्राक्तनः । तथा चोक्तम्—

'बद्धा द्वादशभिर्ग्रन्थसहस्रैः पार्थिवावलिः ।
प्राङ्महाव्रतिना येन हेलाराजद्विजन्मना ॥' इति ॥

भोजदेवः (भोजः) ।

अयं धारानगरीनाथो महाविचक्षणः शालिवाहनस्य त्रिचत्वारिंशदधिकनवमशताब्दामासीत् । अनेन सरस्वतीकण्ठाभरणप्रभृतयोऽनेके ग्रन्था रचिताः, दानमानाभ्यां विद्वांसोऽभ्यर्चिताश्च । विशेषज्ञप्त्यै तद्दानपत्रस्य संक्षेपोऽत्र प्रदर्श्यते—

'जयति व्योमकेशोऽसौ यः सर्गाय बिभर्ति ताम् ।
ऐन्दवीं शिरसा लेखां जगद्बीजाङ्कुराकृतिम् ॥'

परमभट्टारकमहाराजाधिराजपरमेश्वरश्री**सीयकदेव**पादानुध्यात–परमभट्टारकमहाराजाधिराजपरमेश्वरश्री**वाक्पतिराज**देवपादानुध्यात–परमभट्टारकमहाराजाधिराजपरमेश्वरश्री**सिन्धुराज**देवपादानुध्यात–परमभट्टारकमहाराजाधिराजपरमेश्वरश्री**भोजदेवः** कुशली नागह्रदपश्चिमपथकान्तःपातिवीराणके समुपगतान्समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिनिवासिपट्टकिलजनपदादींश्च समादिशति—अस्तु वः संविदितम्, यथा आतीताष्टसप्तत्यधिकसाहस्रिकसंवत्सरे माघासिततृतीयायां रवावुदगयन-

---

१. ग्रन्थशब्दः श्लोकवाची । तेन यथाश्रुतमर्थं योजयतां व्याख्या नादरणीया ।

पर्वणि कल्पितहलानां लेख्ये श्रीमद्वारायामवस्थितैरस्माभिः स्नात्वा चराचरगुरुं भगवन्तं भवानीपतिं समभ्यर्च्य संसारस्यासारतां दृष्ट्वा—

'वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने ॥'

इति जगतो विनश्वरं स्वरूपमाकलय्य उपरिलिखितग्रामः स्वसीमातृणागोचरयूतिपर्यन्तः सहिरण्यभागभोगः सोपरिकरः सर्वादायसमेतः ब्राह्मण**धनपति**भट्टाय भट्ट**गोविन्द**सुताय बह्वृचाश्वलायनशाखाय त्रिप्रवराय वेल्लवल्लप्रतिबद्धश्रीवादाविनिर्गताराधसुरसङ्गकर्णाटाय मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये अदृष्टफलमङ्गीकृत्य आचन्द्रार्कार्णवक्षितिसमकालं यावत्परया भक्त्या शासनेनोदकपूर्वं प्रतिपादित इति मत्वा यथादीयमानभागभोगकरहिरण्यादिकमाज्ञाश्रवणविधेयैर्भूत्वा सर्वमस्मै समुपनेतव्यम्। सामान्यं चैतत्फलं बुद्ध्वास्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मादायोऽयमनुमन्तव्यः पालनीयश्चेति। संवत् १०७८ चैत्रसुदि १४ स्वयमाज्ञामङ्गलं महाश्रीः। स्वहस्तोऽयं श्रीभोजदेवस्य ॥

महिमा (महिमभट्टः)।

अयं नैयायिकपुंगवो ध्वनिनिरूपितव्यञ्जनावृत्तिनिरासार्थं व्यक्तिविवेकाख्यं प्रबन्धं निर्मितवान्। एतच्च—

'अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम्।
व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम् ॥'

इत्यार्यया बुध्यते। बुध्यते च राजानकानन्दवर्धनादर्वाचीनता राजानकमम्मटात्प्राचीनता चास्य। यत एतेन ध्वनिध्वंसाय व्यक्तिविवेको विहितः। राजानकमम्मटेन व्यक्तिविवेकोत्प्रेक्षितप्रमेयः प्रकाशस्य पञ्चमोल्लासोपान्त्ये निरस्त इति तट्टीकाकारैर्विशदीकृतम् ॥

मम्मटः।

अयं राजानककुलोत्तंसो महावैयाकरणः परममाहेश्वरः शालिवाहनस्यैकादशशताब्द्याः पूर्वभागे कश्मीरानलंचकार। मम्मटस्य विशेषोदन्तस्तु प्रकाशस्य सुधासागराख्यटीकाप्रारम्भे कान्यकुब्जावतंसेन **भीमसेन**दीक्षितेन पद्यैरुपनिबद्धः। स यथा—

'शब्दब्रह्म सनातनं न विदितं शास्त्रैः क्वचित्केनचि-
त्तद्देवी हि सरस्वती स्वयमभूत्काश्मीरदेशे पुमान्।
श्रीमज्जय्यटगेहिनीसुजठराज्जन्माप्य युग्मानुजः
श्रीमन्मम्मटसंज्ञयाश्रिततनुं सारस्वतीं सूचयन् ॥
मर्यादां किल पालयञ्छिवपुरीं गत्वा प्रपठ्यादरा-
च्छास्त्रं सर्वजनोपकाररसिकः साहित्यसूत्रं व्यधात्।

---

१. साहित्येति। 'नियतिकृतिनियमरहितां—' इत्यादिकारिकारूपमित्यर्थः ॥

तद्वृत्तिं च विरच्य गूढमकरोत्काव्यप्रकाशं स्फुटं
वैदग्ध्यैकनिदानमार्थिषु चतुर्वर्गप्रदं सेवनात् ॥
कस्तस्य स्तुतिमाचरेत्कविरहो को वा गुणान्वेदितुं
शक्तः स्यात्किल मम्मटस्य भुवने वाग्देवतारूपिणः ।
श्रीमान्कय्यट उव्वटो ह्यवरजो यच्छात्रतामागतो
भाष्याब्धिं निगमं[1] यथाक्रममनुव्याख्याय सिद्धिं गतः ॥'

मम्मटेन काव्यप्रकाशः परिकरालंकारावधिरेव कृतः । अवशिष्टभागस्तूत्कर्षमहिम्ना शिशुपालवधमप्यधरीकुर्वाणस्य पञ्चाशत्सर्गात्मकस्य विद्याधिपत्यपरनामकराजानक—**रत्नाकर**-प्रणीतस्य हरविजयाख्यमहाकाव्यस्य टीकाकृता राजानक**कालक**सूरिणा पूरित इति प्रसिद्धम् । उक्तं च—

'कृतः श्रीमम्मटाचार्यवर्यैः परिकरावधिः ।
प्रबन्धः पूरितः शेषो विद्याधिपकालकसूरिणा ॥'

राघवानन्दः ।

अयं सांधिविग्रहिको महापात्रो दर्पणकारस्य कश्चिदनुबन्धीति प्रतीयते । अनेन किमपि नाटकं निरमायीति 'यथा—राघवानन्दानां नाटके' इति दर्पणतृतीयपरिच्छेदोक्त्या व्यक्तम् ॥

रुद्रटः ।

अयं काव्यालंकारप्रणेता महाकविर्महाराजभोजदेवात्प्राचीनः । यतः—

'किं गौरि मां प्रति रुषा ननु गौरहं किं
कुप्यामि कां प्रति मयीत्यनुमानतोऽहम् ।
जानाम्यतस्त्वमनुमानत एव सत्य-
मित्थं गिरो गिरिभुवः कुटिला जयन्ति ॥'

इति काव्यालंकारपद्यं सरस्वतीकण्ठाभरणे द्वितीयपरिच्छेदे उदाहृतम् । अस्य नामान्तरं **शतानन्दः**, जनको **वामकभट्टः**, वेदः सामेति सर्वं तत्कृतैः[2] खड्गमुसलचापबाणशूलशक्तिहलबन्धगर्भितैरष्टभिः श्लोकैर्यदष्टारं महाचक्रमुत्पद्यते तन्निर्गतात्—

---

१. निगमं यजुर्वेदसंहिताम् ॥

२. बन्धसृष्टिरत्नभूतस्य वक्ष्यमाणस्य चक्रबन्धस्य स्वरूपख्यात्यै दर्पणीयबन्धप्रकरणन्यूनतापूर्त्यै च खड्गादिबन्धाः साकारा विन्यस्यन्ते । तत्र

खड्गबन्धो यथा—

मारारिशक्रराजेभमुखैरासाररंहसा । सारारब्धस्तवा नित्यं तदर्तिहरणक्षमा ॥ १ ॥
माता नतानां संघट्टः श्रियां बाधितसंभ्रमा । मान्याथ सीमा रामाणां शं मे दिश्याद्रुमादिजा॥२॥

मुसलबन्धो यथा—

मायाविनं महाहावा रसायातं लसद्भुजा । जातलीलायथासारवाचं महिषमावधीः ॥ ३ ॥

धनुर्बन्धो यथा—

मामभीदा शरण्या मुत्सदैवारुक्प्रदा च धीः । धीरा पवित्रा संत्रासात्रासीष्टा मातरारम ॥४॥

'शतानन्दापराख्येन भट्टवामकसूनुना ।
साधितं रुद्रटेनेदं सामाजा धीमतां हितम् ॥'

इति श्लोकाज्ज्ञायते । शिशुपालवधादिविलक्षणोऽयं चक्रबन्धः कान्न विस्मापयति । शृङ्गारतिलककर्ता **रुद्रो** न तु रुद्रटः । उक्तं च तिलकान्ते—'शृङ्गारतिलकविधिना पुनरपि रुद्रः प्रसादयति' इति ॥

[1]वक्रोक्तिजीवितकारः ।

ग्रन्थतत्कर्त्रोर्विषये न किमपि बुध्यते ॥

वाचस्पतिमिश्रः ।

एष सर्वतन्त्रस्वतन्त्रो भामत्याख्यशारीरकमीमांसाभाष्यव्याख्यानादिनिर्माता षड्दर्शनीव्याख्यातृत्वेन ख्यातः शालिवाहनस्यैकादशाब्दाः पूर्वभागे मिथिलामण्डलं मण्डयामासेत्यैतिहासिकाः ।

कवितार्किकचक्रचूडामणिना कान्यकुब्जकुलकमलदिनमणिना कान्यकुब्जाधिपतिविजयचन्द्रसभालंकारेण नैषधीयचरितादिमहानिबन्धकारेण श्रीश्रीहर्षेण खण्डनखण्डखाद्ये खण्डितानां नैयायिकसिद्धान्तानामुद्धारकत्वेन खण्डनोद्धारसंज्ञां दधानस्य प्रबन्धस्य कर्ता तस्माद्भिन्नः ॥

वामनः ।

अयं सवृत्तिकाणां काव्यालंकारसूत्राणां प्रणेता शालिवाहनस्य सप्तमशताब्दाः प्रथमभागान्नोर्ध्वतनः । यस्मादसौ स्वग्रन्थे भवभूतिप्रणीतस्य वीरचरितस्य 'दोर्दण्डाञ्चित-

---

शरबन्धो यथा—

माननापरुषं लोकदेवीं सद्रस सन्नम । मनसा सादरं गत्वा सर्वदा दास्यमङ्ग ताम् ॥ ५ ॥

शूलबन्धो यथा—

मा मुषो राजस स्वासूँल्लोककूटेशदेवताम् । तां शिवावाशितां सिद्ध्याध्यासितां हि स्तुतां स्तुहि ६

शक्तिबन्धो यथा—

माहिषाख्ये रणेऽन्या नु सा नु नानेयमत्र हि । हिमातङ्कादिवामुं च कं कम्पिनमुपप्लुतम् ७

हलबन्धो यथा—

मातङ्गानङ्गविधिनामुना पादं तमुद्यतम् । तङ्गयित्वा शिरस्यस्य निपात्याहन्ति रंहसा ॥ ८ ॥

अष्टभिर्महाचक्रबन्धनिष्पत्तिः ॥

१. एतद्विषये डॉक्टर—रामकृष्ण—गोपाल—भाण्डारकरपण्डितवरैरस्मत्सविधे कृपापत्रं प्रेषितं तदेवोपयुक्तत्वादंशत उपन्यस्यते—'.....दुर्गाप्रसादाचार्यानसकृत्प्रणम्य विज्ञापयति पुण्यपत्तनस्थो रामकृष्णः—संप्राप्तो भवदीयलेखः । वक्रोक्तिजीवितं नाम कश्चिदलंकारविषये ग्रन्थः । स च रुय्यकृतालंकारसर्वस्वाख्ये संदर्भे प्रमाणत्वेन क्वचिदुपन्यस्तः । रुय्यकश्च श्रीकण्ठचरितकृतो मङ्खस्य गुरुः । मङ्खश्च जयसिंहाख्यस्य कश्मीराधिपतेरलंकारनाम्नो मन्त्रिणो भ्राता । स च जयसिंहः ११२९ खिस्तवत्सरतः ११५० वत्सरपर्यन्तं कश्मीरभूमिं भुक्तवान् ।.....॥'

चन्द्रशेखरधनुः–' इति पद्यमुदाहृतवान् । भवभूतिस्तु शालिवाहनसप्तमशताब्दीप्रारम्भे कान्यकुब्जाधिपतेर्यशोवर्मणः सभायामासीदिति व्यक्तम् । अथ च ध्वन्यालोकलोचने 'अनुरागवती संध्या–' इत्युदाहरणविचारावसरे 'वामनाभिप्रायेणायमाक्षेपः, **भामह**ाभिप्रायेण तु समासोक्तिरित्यमुमाशयं हृदये गृहीत्वा समासोक्त्याक्षेपयोरेकमेवोदाहरणं व्यतरद्ग्रन्थकृत्' इति श्रीमदाचार्याभिनवगुप्तपादव्याख्यानेन ध्वन्यालोकप्रणेतुरानन्दवर्धनाचार्यादस्य प्राचीनत्वमवगम्यते । तस्मान्नवमशताब्द्याः प्रथमभागतो नाधस्तनः ।

केचित्तु—

'मनोरथः शङ्खदत्तश्चटकः संधिमांस्तथा ।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ॥'

इति राजतरङ्गिणीबलेनैनं कश्मीराधिपते**र्जयापीड**स्यामात्यं कथयन्ति ।

पाणिनिसूत्रवृत्तिकाशिकाकर्ता **वामन**स्त्वस्मादन्यः प्रत्नश्चेति पाश्चात्यपण्डितानां परामर्शः । खिस्ताब्दस्य सप्तमशतकपूर्वार्धे भारतमण्डले तीर्थयात्रार्थं भ्रमतः कस्यचिच्चीनदेशीयस्य यात्रावर्णनपुस्तके वामनकृतपाणिनिसूत्रव्याख्यापठनपाठनप्राचुर्यलेखस्तत्परामर्शे मूलमिति ।

अथ चेयं साहित्यदर्पणस्य विवृतिः श्री**रामचरण**-तर्कवागीश-भट्टाचार्यैः शालिवाहनस्य द्वाविंशत्युत्तरषोडशशताब्द्यां व्यधायीत्येतद्विवृत्त्यन्ते 'अक्षिपक्षरसचन्द्रसंमिते–' इत्यादिपद्येन व्यक्तम् ।

एतट्टीका सम्यग्ग्रन्थं योजयन्ती प्रमेयांशविचारे प्रौढिं च प्रकटयन्ती सच्छात्राणामुपकर्त्रीति न मनागपि व्यतिक्रमः । किं तु बहुत्रात्र प्रतीकविकलो विरलार्थप्रतिपादकश्च लेखो मूलं न नियन्त्रयतीति मूलानुपूर्वीगवेषणे महान्क्लेशः । पञ्चषभिन्नमातृकपुस्तकाधारेण मूलशुद्ध्यै यतमानेनापि मया कुहचिन्मूलमुन्नेतुं नाशाकि ।

एतद्व्याख्यासद्भावे प्रद्योतनोद्द्योते प्रदीपद्योतवन्मूलयोजनमपार्थकमिति मन्यमानेन् प्रायो विशेषाधानायैव **छाया**ख्या विवृतिपूर्तिरकारि । अत्र प्राचामर्वाचां चालंकारिकाणां संदर्भेभ्यो विशिष्टभागं शब्दतस्तात्पर्यतश्चानूद्य मांसलीकृतो दर्पणानुक्तविषयो यत्नतो न्यासि । अनुक्तत्वेनावधार्यमाणा अपि नातिप्रयोजनीया उक्तिमुद्रादिका उपैक्षिषत । भवन्ति चात्रानुषङ्गिकाः श्लोकाः—

आदौ [१]दशकण्ठवधं तत [२]उपपत्तीन्दुशेखरस्तदनु ।
अल्पाप्यर्थप्रचुरा [३]रविसिद्धान्ते समीक्षा च ॥

---

१ दशकण्ठवधं चम्पूकाव्यम् ॥

२. उपपत्तीन्दुशेखरः श्रीमद्भास्कराचार्यप्रणीतस्य सिद्धान्तशिरोमणेर्व्याख्यारूपः ॥

३. सूर्यसिद्धान्तसमीक्षा (मुम्बय्यां निर्णयसागरे मुद्रिता ॥)

क्षेत्रमिति[1]नामधेयं शासनमथ देव[2]राजचरितं च ।
पञ्चान्मया व्यधायि च्छाया[3] षट्त्रिंशदब्देन ॥ (युग्मम्)
तत्तद्ग्रन्थावगाहेन शिलालेखादिकेन च ।
परीक्षितप्रमेयासौ संक्षिप्ता भूमिका कृता ॥
तातपादो रा[4]मभजो बापुदेव इति त्रयी ।
त्रेतेव स्मर्यतां चेतो यया शास्त्रावगाह्यभूः ॥
गुणदोषानुषङ्गेण या तुष्टिः किं तयाधुना ।
ईशानः सर्वविद्यानां स मे स्वामी प्रसीदतु ॥

इत्याशास्ते

श्रीदुर्गाप्रसादद्विवेदः ।

---

१ क्षेत्रमितिनामकं गणितशास्त्रम् (कलिकातायां मुद्रितम्) ॥

२. देवराजचरितं खण्डकाव्यम् (मुम्बय्यां निर्णयसागरे मुद्रितम्) ॥

३. प्रकृता दर्पणस्य टिप्पणी ॥

४. भूतपूर्वजयपुरराजकीयसंस्कृतपाठशालाध्यक्षः सर्वतन्त्रस्वतन्त्रो व्याकरणशास्त्रप्रधानाध्यायको महानुभावः ॥

साहित्यदर्पणे विशेषतोऽवलोकनार्हा विषयाः ।

प्रथमे परिच्छेदे–काव्यफलनिरूपणं वस्तुतो दर्शनार्हम् (३–५) । काव्यस्वरूपनिर्वचनावसरे सर्वाणि प्रमाणवचनानि दर्शनार्हाणि (६–१८) तत्र 'तददोषौ–' इत्यादिकाव्यप्रकाशकारोक्तकाव्यस्वरूपस्य खण्डनग्रन्थगताष्टिप्पण्यो दर्शनार्हाः ॥

द्वितीये परिच्छेदे–अभिधा (३०) संकेत (३१) पदगता टिप्पणी दर्शनार्हा । इतरग्रन्थविशिष्टं लक्षणाभेदानां निरूपणं वस्तुतो नैयायिकानामपि दर्शनार्हम् (३४–५२) । यद्यप्यत्र कतिपये भेदास्तत्र तत्र महाकाव्येष्वनवकाशतया मन्दप्रयोजनास्तथापि लक्षणाभेदव्युत्पादनाय लाक्षणिकाश्च एव । 'इदं च केऽप्यसहमानाः–' (५६–५७) इत्यादि मतान्तरं तत्प्रत्याख्यानं च भृशं विलोक्यम् । 'दुर्गालङ्घितविग्रहः–' (५८) इत्यत्रोभावलक्षणो भानुदेवनृपतिस्तदीयवर्णनग्रन्थश्च क इति गवेषणीयम् ॥

तृतीये परिच्छेदे—'विभावेन–' (६७) कारिकागता टिप्पणी निपुणं विभावनीया । उत्तमादिस्वरूपजिज्ञासुभिर्नेतृलक्षणगतानि प्रायः सर्वाण्येव विशेषणानि निरीक्षणीयानि (९२–९४) । पुरा भारतवर्षेऽन्तःपुरसहायाः किंविधाः कल्पिता इति तत्त्वजिज्ञासुभिः 'वामन–' (९७।४३) इत्यार्या समूललक्ष्यलक्षणान्वेषणपूर्वकं समाकलनीया । तत्र किरात–म्लेच्छ–आभीरशब्दगता विशेषा अप्युन्नेयाः । साधारणस्त्रीलक्षण(१११।४) निरूपणे कलापदार्थाः प्राचीनरहस्यवेदिभिरवश्यमनुसंधेयाः । स्वदारगुप्त्यर्थमनुरागोज्झितानि (११३।२) दर्शनार्हाणि । तत्र शिल्पिन्याद्या अभिसंधायिका भवन्तीति वात्स्यायनसंमतिर्द्रष्टव्या (१३५।२०) । शृङ्गारादीनां स्वरूपाणि (१६१–१८७) काव्यप्रकाशाद्यपेक्षया स्फीतानि दर्शनार्हाणि ॥

चतुर्थे परिच्छेदे—ध्वनिगुणीभूतव्यङ्ग्याख्यकाव्यभेदप्रतिपादनं सुप्रतीतमेव । तत्र 'प्रधान–' (२३७।४) पदनिष्ठा टिप्पणी विलोकनीया ॥

पञ्चमे परिच्छेदे—व्यञ्जनावृत्तेः स्थापनमितरग्रन्थापेक्षया स्फीतं प्राञ्जलं दर्शनार्हं चास्ते (२३९–२५६) ॥

षष्ठे परिच्छेदे—सर्वोऽपि विषयप्रपञ्चो वस्तुतो दर्शनयोग्यः । किं बहुना, यथात्र नाटकादीनां दशरूपकाणां नाटिकादीनामष्टादशोपरूपकाणां तद्गतविशेषजातानामन्येषां चोच्चावचानां विषयाणां विशदरूपेण निरूपणं निपुणतमं प्राप्यते, न तथा दशरूपकादिषु । सांप्रतमुपलभ्यमानेषु नाट्यशास्त्रपुस्तकेषु तु बहुत्र न्यूनता प्रतीयते । यदि किमपि नाट्यशास्त्रस्याविकलं पुस्तकं लभ्येत तर्हि दर्पणोल्लिखितविषयजातानां परीक्षा मौलिकदृश्यकाव्यान्वेषणाय विधातुं पार्येत । सति कुड्ये चित्रमिति न्यायात् । श्रीमता **हॉल्**साहिबेन दशरूपकेण सह तदुपकारिणो येऽध्यायाः (१९–२०,३४) मुद्रायितास्तेऽपि नाविकलाः । श्रीमता **वेबर**साहिबेन तु स्वनिबन्धे भरतप्रणीतस्य नाट्यशास्त्रस्यालंकारशास्त्रमिति नाम व्यवहृतं तन्नाट्यशास्त्रावलोकनेन भ्रममूलकं प्रतिभाति । किंच तेनैव महाशयेन टीकाकाररीत्या भरतकृतस्य नाट्यशास्त्र-

स्याग्निपुराणसंग्रहभूतत्वं विलिखितम्, प्रमाणत्वेन स्वप्रणीतं **बर्लिन्**पुस्तकालयस्थानां हस्तलिखितसंस्कृतपुस्तकानां सूचीपत्रस्य पृष्ठं च २२७ निर्दिष्टम् । कोऽयं टीकाकारः' यन्मते नाट्यशास्त्रमग्निपुराणसमुद्भूतं निश्चीयते । संप्रति प्राप्यमाणयोरग्निपुराण—नाट्यशास्त्रयोरवलोकनेन तु श्रीमतो **वेबर**साहिबस्य लेखो भ्रममूलक एव प्रतिभाति । 'आ गर्भात्—' (२८०।९) इत्यादिदर्पणलेखेन भरतकृतस्य नाट्यशास्त्रस्यैकदीकाकार आचार्याभिनवगुप्तः सुप्रतीत एव । काव्यप्रकाशस्य रसग्रन्थावलोकनेन भट्टलोल्लटप्रभृतयोऽपि तट्टीकाकाराः प्रतीयन्ते । किमेतेषु लोल्लट–श्रीशङ्कुक–भट्टनायक–अभिनवगुप्तेष्वेव कश्चन टीकाकृद् भिन्नो वेति प्राचीनतत्त्वान्वेषणाय पाश्चात्यैः पौरस्त्यैर्विद्वद्भिरवश्यं यतितव्यम् ।

किं चात्र परिच्छेदे बहवो दृश्यकाव्यग्रन्था उदाहरणत्वेनोपन्यस्ताः । तेषु कतिपयानां दर्पणादितरत्र नामापि नोपलभ्यते । नामधेयमात्रेणानुमितसत्ताकानां तेषां पुनरुद्भवाय युरोपादिमहापुस्तकालया निरीक्षणीयाः ॥

सप्तमे परिच्छेदे—अत्र झटित्युपस्थितये बहून्युदाहरणानि तनूकृत्य स्थापितानि यथा—

'अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः ।
आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा ॥'
'साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते ।
तस्य धीशालिनः कोऽन्यः सहेतारालितां भुवम् ॥'
'लीलातामरसाहतोऽन्यवनितानिःशङ्कदष्टाधरः
कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः ।
मुग्धा कुड्मलिताननेन ददती वायुं स्थिता तत्र सा
भ्रान्त्या धूर्ततयाथ वा नतिमृते तेनानिशं चुम्बिता ॥'
'मृदुपवनविभिन्नो मत्प्रियाया विनाशाद्
घनरुचिरकलापो निःसपत्नोऽद्य जातः ।
रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे कं हरेदेष बर्हीं ॥'

इत्यादौ प्रथमश्लोकस्य स्थाने 'कार्तार्थ्यं यातु तन्वङ्गी कदानङ्गवशंवदा ।' इत्यर्धम् (३६१।१४); द्वितीयस्य 'इत्थारिविजये राजन्साधनं सुमहत्तव ।' इत्यर्धम् (३६२।२); तृतीयचतुर्थश्लोकयोः स्थाने 'प्रससार शनैर्वायुर्विनाशे तन्वि ते तदा ।' इत्यर्धं च (३६२।३) सरलतरमुपन्यस्तम् । एवं प्रायोऽग्रेऽपि । इत्थं चेमान्युदाहरणानि प्राचीनोदाहरणपद्येभ्यो निष्कृष्य विहितानीति स्पष्टं प्रतीयते । तत एवामीषामुर्वीरितांशान्वेषणप्रयासो निष्फलः ॥

अष्टमे परिच्छेदे—वामनोक्तानां शब्दार्थगुणानां प्रकाशवत्प्रत्याख्यानं 'माधुर्यं द्रुतिकारणम्' इति प्रकाशोक्तिप्रत्याख्यानं च । वामनोक्तानामितरेषां गुणानामव-

गमार्थं 'ते त्रिधा–' (४२४।१) इति कारिकास्था टिप्पणी विलोक्या। आसीत्प्राग्वा-मनोक्तानां गुणानां प्रचुरः प्रचारः। यतः—

'प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविचक्षणाः।
भवन्ति कस्यचित्पुण्यैर्मुखे वाचो गृहे स्त्रियः॥'

इत्यादयः सूक्तयो जज्ञिरे एवं तत्तत्कालिककविकर्मावलोकनेन तत्तत्कालिकी साहित्य-शास्त्रस्थितिरुन्नेतुं सुशका॥

नवमे परिच्छेदे—रीतीनां प्रतिपादनम्। तत्र वैदर्भी—गौडी—पाञ्चाली—लाटीनां स्वरूपाकलनेन भारतवर्षीयाणां चिरंतनी विद्यासमृद्धिरवगन्तुं शक्यते। किंचैता रीतयस्तत्र तत्रोपजीव्यनिबन्धेष्वपि सूपपाद्यन्त इति नूतनलशङ्काङ्कुरोऽपि न प्ररोहतीति सूक्ष्मदृशा विभावनीयम्॥

दशमे परिच्छेदे—महाकाव्योपयुक्तानां शब्दालंकाराणां (४४४–४७२) चमत्कृतानामुपमाभेदानां च (४७३–४८९) निरूपणं तत्र 'यमकं–' (४५१।८) 'संस्कृतमहाराष्ट्र्योः' (४६०।३) 'साम्यं–' (४७३।१) इत्यादिग्रन्थगतं टिप्पणं च दर्शनार्हम्॥

काव्यप्रकाशाद्यपेक्षया बहुविषयप्रतिपादकोऽयं संदर्भ इत्यत्र निर्णायकानां न काचिदनुपपत्तिः। किं तु केवलमेतावद्दौर्भाग्यं यदमुष्यानुरूपं किमपि टीकारत्नं नाजनि। रामचरणकृतटीकायां या त्रुटिः सा भूमिकायाः २३ पृष्ठे दर्शितैव। प्रायोऽमुना टीकाकरणसमये मूलपाठक्षोदाय न यतितम्। अस्मदुपलब्धपुस्तकेषु तु **ग**-चिह्नपुस्तकमतीव विभिन्नं पञ्चमपरिच्छेदान्तं दृश्यते। कदाचिदभेऽपि स्यात्परं दैवयोगात्षष्ठपरिच्छेदात्समाप्तिं यावद्भिन्नमातृकं नूतनं चास्त इति महती दुर्घटना। अत्र पुस्तके न केवलं पाठभेद एव, प्रत्युत बहुत्र मूलकारिका-वृत्ति-उदाहरणानामपि भिदोपलभ्यते। आरम्भात्पञ्चमपरिच्छेदान्तं **ग**-पुस्तकपाठान्तराणि विलोक्यानि। किमिह पुनरुक्त्या।

अद्यावधि मुद्रितपुस्तकेष्वपि कारिकादीनां दुरवस्थैव प्रायः प्राप्यते। यथा–'नापि भविष्यन्–' (८७।४) इति कारिका पदच्छेदवैलक्षण्येन वृत्ति (गद्य) रूपतां नीता। 'मन्त्री स्यादर्थानां चिन्तायां तद्वदवरोधो (९६।१३,९७।९) इति कारिका वृत्तियोजनेन 'मन्त्री स्यादर्थचिन्तायामर्थास्तत्रावपादयः।' इत्यनुष्टुब्रूपत्वं प्रापिता। एवं 'काव्यान्तर्गडुभूततया तु नेह प्रपञ्च्यते।' (४७१।२) इति वृत्तिः 'काव्यान्तर्गडुभूता या सा तु नेह प्रपञ्च्यते' इति श्लोकत्वं गमिता। इति दिक्॥

'एष साहित्यमातङ्गो दुर्ग्राह्योऽतिमहत्तरः।
मुष्टिमेय इवाभाति दर्पणे प्रतिबिम्बितः॥

साहित्यदर्पणे प्रमाणत्वेनोद्धृतानां ग्रन्थानां नामानि

	पृष्ठस्य	पङ्क्तौ
अग्निपुराणम्	५	७
विष्णुपुराणम्... ...	५	१०
वक्रोक्तिजीवितम् ...	१४	३
व्यक्तिविवेकः... ...	१८	१
रामायणम् महाभारतम् रघुवंशम् ...	२६	१०
लोचनम्	७१	३
रत्नावली	९७	१४
मृच्छकटिकम् ...	९८	५
लटकमेलकम्... ...	११३	६
चन्द्रकलानाटिका ...	१२३	१४
कुवलयाश्वचरितम् ...	१४३	४
मालतीमाधवम् ...	१५९	३
कादम्बरी	१६५	१६
कुमारसंभवम् ...	१६७	७
विक्रमोर्वशी	१७२	३
नागानन्दम्	१८५	३
हयग्रीववधम्... ...	१९३	६
न्यायकुसुमाञ्जलिः ...	२४७	१
बालरामायणम् ...	२६१	४
अनर्घराघवम्... ...	२६३	३
पुष्पमाला	२६३	४
उदात्तराघवम् ...	२६५	१२
शाकुन्तलम्	२६६	१२
मुद्राराक्षसम्	२६९	१
वेणीसंहारम्	२७०	३
कुन्दमाला	२७०	१३
वीरचरितम्	२७५	११
रामाभिनन्दम् ...	२७७	२
बालचरितम्	२८७	१६
प्रभावती	२८७	१९

	पृष्ठस्य	पङ्क्तौ
चण्डकौशिकम् ...	२९१	५
जानकीराघवम् ...	२९५	१
मालविकाग्निमित्रम् ...	३०७	११
कृत्यरावणम् (?) ...	३११	७
रामाभ्युदयम्... ...	३१२	७
कर्पूरमञ्जरी	३१२	११
भाषार्णवः	३१६	१०
ययातिविजयम् ...	३१८	८
चन्द्रकला	३२०	९
गृहवृक्षवाटिका (?) ...	३२५	६
वध्यशिला(?) ...	३२८	१
राघवाभ्युदयम् ...	३३१	१०
मृच्छकटिकम् ...	३३५	१०
पुष्पभूषितम्	३३५	११
रङ्गवृत्तम्	३३५	१५
लीलामधुकरः ...	३३६	१२
सौगन्धिकाहरणम् ...	३३६	२०
समुद्रमथनम्... ...	३३८	२
कुसुमशेखरविजयम् ...	३३९	११
शर्मिष्ठाययातिः ...	३४०	२
छलितरामम्	३४२	१६
मालविका	३४४	८
कंदर्पकेलिः	३४४	१७
धूर्तचरितम्	३४५	२
विद्धशालभञ्जिका ...	३४५	२१
स्तम्भितरम्भम् ...	३४६	४
रैवतमदनिका... ...	३४६	११
कर्पूरमञ्जरी	३४६	१६
नर्मवती विलासवती ...	३४७	१
शृङ्गारतिलकम् ...	३४७	८

	पृष्ठस्य	पङ्क्तौ
देवीमहादेवम् ...	३४७	१४
यादवोदयः	३४८	२
वालिवधः	३४८	८
मेनकाहितम्	३४८	१६
मायाकापालिकम् ...	३४९	२
क्रीडारसातलम् ...	३४९	८
कनकावतीमाधवम् ...	३५०	३
बिन्दुमती	३५०	१९
केलिरैवतकम्	३५१	९
कामदत्ता	३५१	२२
शिशुपालवधम् नैषधम् राघवविलासम् ...	३५५	४
सेतुबन्धः कुवलयाश्वचरितम्	३५६	३
कर्णपराक्रमः	३५६	६
भिक्षाटनम् आर्याविलासः ...	३५६	९
मेघदूतम्	३५६	११
मुक्तावली	३५६	१४
हर्षचरितम्	३५७	२२
पञ्चतन्त्रम्	३५८	६
देशराजचरितम् ...	३५८	९
बिरुदमणिमाला ...	३५८	११
प्रशस्तिरत्नावली ...	३५८	१३
शारीरकमीमांसाभाष्य-व्याख्यानम् ...	५०४	६

साहित्यदर्पणस्य विषयानुक्रमणिका।

पृष्ठस्य पङ्क्तौ

प्रथमपरिच्छेदे—

मङ्गलम् २ १
काव्यफलानि ३ ३
काव्यलक्षणदूषणानि ... ६ १
काव्यस्वरूपम्... ... १९ ४
दोषस्वरूपम् २२ ६
गुणस्वरूपम् २२ १२

द्वितीयपरिच्छेदे—

वाक्यस्वरूपम् ... २४ ३
महावाक्यम् २६ ३
पदलक्षणम् २७ १
अर्थत्रैविध्यम्... ... २८ १
अभिधा २८ ६
संकेतः ३१ १
लक्षणा ३४ २
लक्षणाभेदाः ३७ ५
व्यञ्जना ५२ ५
तात्पर्यनिर्णायकाः ... ५४ २
तात्पर्यवृत्तिः ६५ ४

तृतीयपरिच्छेदे—

रसस्वरूपम् ६७ ३
रसास्वादनप्रकारः ... ७२ ६
करुणादीनां रसत्वस्थापनम् ७७ २
रसस्यानुकार्यगतत्वखण्डनम् ८४ १०
रसस्यानुकर्तृगतत्वखण्डनम् ८५ ५
रसस्य ज्ञानान्तरग्राह्यत्वखण्डनम् ८५ ११
रसस्य स्वप्रकाशत्वकथनम् ८९ १२
विभावः ९१ ८
विभावभेदौ ९२ २
नायकः ९२ ५
तत्र, धीरोदात्तः ... ९२ १४
धीरोद्धतः ९२ २०
धीरललितः ९३ २
धीरशान्तः ९३ ५
नायकानां षोडशभेदाख्यानम् ९३ ८
दक्षिणनायकः ... ९३ ११
धृष्टनायकः ९४ १
अनुकूलनायकः ... ९४ ८
शठनायकः ९४ १५
गायकानामष्टचत्वारिंशद्भेदाख्यानम् ९५ ६
पीठमर्दः ९५ १०
शृङ्गारसहायाः ... ९६ २
विटः ९६ ५
विदूषकः ९६ ९
मन्त्री... ... ... ९६ १३
अन्तःपुरसहायाः (वामन-शण्ड-किरात-म्लेच्छ-आभीर-शकार-कुब्ज-मूकाः) ९७ २
दण्डसहायाः ९८ ८
धर्मसहायाः ९८ १०
दूतभेदाः ९९ २
तत्र, निसृष्टार्थः ... ९९ ६
मितार्थः ९९ ९
संदेशहारकः ९९ १०
सात्त्विकनायकगुणाः... १०० २
तत्र, शोभा १०० ५
विलासः १०० १२
माधुर्यम् १०० १८
गाम्भीर्यम् ... १०१ २
धैर्यम् १०१ ६
तेजः १०१ १०

	पृष्ठस्य	पङ्क्तौ
ललितम्	१०१	११
औदार्यम्... ...	१०१	१२
नायिकाभेदाः ...	१०१	१५
स्वकीया...	१०२	५
मुग्धा...	१०२	११
मध्या	१०४	८
प्रगल्भा	१०५	११
मध्या धीरा मध्या धीराधीरा मध्याधीरा	१०७	१७
प्रगल्भा धीरा... ...	१०८	११
प्रगल्भा धीराधीरा ...	१०९	३
प्रगल्भाधीरा	१०९	८
भेदाख्यानम् ...	१०९–११०	१
कुलटा	११०	५
कन्या...	१११	१
वेश्या...	१११	३
भेदाख्यानम्	११३	९
स्वाधीनभर्तृका ...	११४	५
खण्डिता	११४	८
अभिसारिका... ...	११४	११
अभिसारिकाभेदाः ...	११५	१
अभिसारस्थानानि ...	११५	९
कलहान्तरिता... ...	११६	१०
प्रोषितभर्तृका ...	११६	१५
वासकसज्जा	११७	६
विरहोत्कण्ठिता ...	११७	१३
भेदाख्यानम्	११८	६
नायिकालंकाराः ...	१२१	१
तत्र, भावः	१२२	२
हावः	१२२	८
हेला	१२२	१४
शोभा	१२३	२
कान्तिः	१२३	९
दीप्तिः	१२३	१३

	पृष्ठस्य	पङ्क्तौ
माधुर्यम्	१२४	२
प्रगल्भता	१२४	९
औदार्यम्	१२४	१४
धैर्यम्...	१२५	२
लीला...	१२५	८
विलासः	१२५	१५
विच्छित्तिः	१२६	७
विव्वोकः	१२६	१४
किलकिंचितम् ...	१२७	६
मोट्टायितम्	१२७	१३
कुट्टमितम्	१२८	६
विभ्रमः	१२८	१२
ललितम्	१२९	२
मदः	१२९	७
विहृतम्	१२९	१४
तपनम्	१३०	५
मौग्ध्यम्	१३०	१२
विक्षेपः	१३१	२
कुतूहलम्	१३१	८
हसितम्	१३१	१३
चकितम्	१३१	१८
केलिः	१३२	७
मुग्धाकन्ययोरनुरागेङ्गितानि	१३२	१२
सर्वासामनुरागेङ्गितानि	१३३	२
दूत्यः	१३३	१८
दूतीगुणाः	१३४	९
प्रतिनायकः	१३६	२
उद्दीपनविभावाः ...	१३६	५
अनुभावाः	१३७	२
सात्त्विकाः	१३७	१३
तत्र, स्तम्भादयः ...	१३७	१८
स्तम्भादीनां लक्षणानि	१३८	३
व्यभिचारिणः ...	१३९	८
तत्र, निर्वेदः... ...	१४०	७
आवेगः	१४०	१३

	पृष्ठस्य	पङ्क्तौ
दैन्यम्	१४१	९
श्रमः	१४१	१६
मदः	१४२	७
जडता	१४३	२
उग्रता	१४३	८
मोहः	१४४	७
विबोधः	१४४	१३
स्वप्नः	१४५	७
अपस्मारः... ...	१४६	२
गर्वः	१४६	७
मरणम्	१४६	१३
आलस्यम्... ...	१४७	५
अमर्षः	१४७	१०
निद्रा	१४८	५
अवहित्था... ...	१४८	११
औत्सुक्यम् ...	१४९	२
उन्मादः	१४९	८
शङ्का	१५०	५
स्मृतिः	१५०	१३
मतिः	१५१	४
व्याधिः	१५१	१०
त्रासः	१५१	१४
व्रीडा	१५२	५
हर्षः	१५२	८
असूया	१५३	५
विषादः	१५३	११
धृतिः	१५४	५
चपलता	१५४	१३
ग्लानिः	१५५	८
चिन्ता	१५५	१६
वितर्कः	१५६	५
संचारिभावः	१५७	२
स्थायिभावः	१५७	६
स्थायिभावभेदाः ...	१५७	१२
स्थायिभावभेदलक्षणानि	१५८	१

	पृष्ठस्य	पङ्क्तौ
भावपदनिरुक्तिः ...	१६०	५
रसभेदाः	१६०	१०
तत्र, शृङ्गारः... ...	१६१	१
विप्रलम्भः, संभोगः ...	१५२	२
विप्रलम्भस्वरूपम्	१६२	४
विप्रलम्भभेदाः ...	१६२	६
तत्र, पूर्वरागः ...	१६३	२
कामदशाः ...	१६३	६
तत्र, मरणे विशेषः ...	१६५	२
कामदशासु विशेषः	१६६	२
पूर्वरागभेदः ...	१६६	९
मानः, कोपः ...	१६६	१६
ईर्ष्यामानः ...	१६८	८
मानभङ्गोपायाः ...	१६८	७
प्रवासः	१६९	१६
एकादश कामदशाः ...	१७०	४
प्रवासभेदाः	१७०	१७
करुणविप्रलम्भः ...	१७२	५
संभोगः	१७३	७
संभोगभेदाः	१७४	२
हासः	१७५	२
हास्यभेदाः	१७५	८
नायकाभेदकथनम् ...	१७६	८
करुणः	१७६	१४
करुणविप्रलम्भात्करुणस्य भेदाख्यानम् ...	१७७	१३
रौद्रः	१७८	२
युद्धवीरात्करुणस्य भेदाख्यानम्	१७९	२
वीरः	१७९	४
दानवीरः, धर्मवीरः, युद्धवीरः, दयावीरः ...	१७९	१०

	पृष्ठस्य	पङ्क्तौ
भयानकः	१८१	१४
बीभत्सः	१८२	९
अद्भुतः	१८३	४
शान्तः	१८४	४
दयावीराच्छान्तस्य भेदाख्यानम्	१८५	२
शान्तस्य रसत्वस्थापनम्	१८५	११
वत्सलः	१८६	१४
रसानां मिथो विरोधाख्यानम्		
भावः...	१८८	१६
रसाभासभावाभासौ ...	१९१	२
अनौचित्यदर्शनम् ...	१९१	७
भावशान्त्यादिः ...	१९४	७
चतुर्थपरिच्छेदे—		
काव्यभेदौ	१९७	२
अभिधामूलध्वनिः / लक्षणामूलध्वनिः	१९८	३
लक्षणामूलध्वनेर्भेदौ ...	१९९	२
अभिधामूलध्वनेर्भेदौ...	२०१	९
संलक्ष्यक्रमव्यङ्ग्यस्य ध्वनेस्त्रैविध्यम्	२०२	८
शब्दशक्त्युद्भवव्यङ्ग्यस्य द्वैविध्यम्	२०३	५
अर्थशक्त्युद्भवव्यङ्ग्यस्य द्वादशभेदाः ...	२०५	३
शब्दार्थशक्त्युद्भवव्यङ्ग्यस्यैकविधत्वाख्यानम्...	२१०	८
ध्वनेरष्टादशविधत्वनिरूपणम्	२११	८
अर्थशक्त्युद्भवध्वनेः प्रबन्धेऽतिदेशः ...	२१९	१०
पदांशादिष्वसंलक्ष्यक्रमव्यङ्ग्यस्याख्यानम् ...	२२१	१
ध्वनिभेदाख्यानम् ...	२२३	८
गुणीभूतव्यङ्ग्यम् ...	२२७	७
गुणीभूतव्यङ्ग्यस्य भेदनिरूपणम्	२२८	१
पञ्चमपरिच्छेदे—		
व्यञ्जनास्वरूपम् ...	२३९	३
अभिधातो व्यञ्जनायाः पार्थक्ये हेतवः ...	२४४	५
अभिधालक्षणयो रसादिप्रतिपादनेऽक्षमत्वनिरूपणम्	२४६	४
रसादिव्यङ्ग्याख्यानेऽनुमानस्याक्षमत्वप्रतिपादनम्	२४८	४
व्यञ्जनोपसंहारः ...	२५६	८
षष्ठपरिच्छेदे—		
काव्यस्य दृश्यश्रव्यभेदौ	२५७	४
रूपकसंज्ञाकारणम् ...	२५७	५
अभिनयः	२५७	१०
रूपकभेदाः	२५७	१४
उपरूपकभेदाः ...	२५८	३
नाटकलक्षणम् ...	२५८	११
अङ्कलक्षणम्	२५९	११
गर्भाङ्कलक्षणम् ...	२६१	२
नाटकरचनापरिपाटी ...	२६१	८
पूर्वरङ्गः	२६१	११
नान्द्या आवश्यकत्वम्...	२६१	१३
नान्दीस्वरूपम् ...	२६२	३
नान्द्यनन्तरेतिकर्तव्यता	२६५	४
भारतीवृत्तिः	२६७	७
भारतीवृत्तेरङ्गानि ...	२६७	९
आमुखं (प्रस्तावना) ...	२६८	२
प्रस्तावनाभेदाः ...	२६८	८
उद्घात्य(त)कः ...	२६८	११
कथोद्घातः	२६९	८
प्रयोगातिशयः ...	२७०	११
प्रवर्तकम्	२७१	३
अवलगितम्	२७१	७
नखकुट्टमितनिरूपणम्...	२७१	१५

	पृष्ठस्य	पङ्क्तौ
वस्तुनो द्वैविध्याख्यानम्	२७२	६
प्रासङ्गिकवस्तुकीर्तनम्	२७२	११
पताकास्थानम् ...	२७२	१६
प्रथमं पताकास्थानम्...	२७२	१९
द्वितीयं पताकास्थानम्	२७३	८
तृतीयं पताकास्थानम्	२७४	१
चतुर्थं पताकास्थानम्	२७४	१४
कविशिक्षा	२७५	८
अर्थोपक्षेपकाः ...	२७६	१२
विष्कम्भकः	२७६	१४
प्रवेशकः	२७७	४
चूलिका	२७७	९
अङ्कावतारः	२७८	१४
अङ्कमुखम्	२७८	२
अङ्कमुखे मतभेदः ...	२७८	७
कविशिक्षा	२७८	१६
अर्थप्रकृतयः	२७९	६
बीजम्	२७९	१०
बिन्दुः	२७९	१५
पताका (वृत्तम्) ...	२८०	३
प्रकरी...	२८१	३
कार्यावस्था	२८१	९
आरम्भः	२८१	१२
प्रयत्नः	२८१	१५
प्राप्त्याशा	२८२	४
नियताप्तिः	२८२	८
फलयोगः (फलागमः)	२८२	१३
संधिः...	२८२	१९
संधिभेदाः	२८३	२
तत्र, मुखम्	२८३	५
प्रतिमुखम्	२८३	८
गर्भः	२८३	१४
विमर्शः	२८४	४
निर्वहणम् (उपसंहृतिः)	२८४	१२
मुखसंधिभेदाः ...	२८५	३

	पृष्ठस्य	पङ्क्तौ
तत्र, उपक्षेपः ...	२८५	७
परिकरः	२८५	१४
परिन्यासः	२८६	१
विलोभनम्	२८६	११
युक्तिः	२८६	१७
प्राप्तिः	२८७	३
समाधानम्	२८७	७
विधानम्	२८७	१५
परिभावना	२८७	२०
उद्भेदः	२८८	४
करणम्	२८८	९
भेदः...	२८८	१२
प्रतिमुखसंधिभेदाः ...	२८८	१६
तत्र, विलासः ...	२८८	२१
परिसर्पः	२८९	५
विधुतम्	२८९	९
तापनम्	२८९	१२
नर्म	२९०	४
नर्मद्युतिः	२९०	८
प्रगमनम्	२९१	१
विरोधः	२९१	४
पर्युपासनम्	२९१	७
पुष्पम्...	२९१	११
वज्रम्...	२९१	१७
उपन्यासः	२९२	१
वर्णसंहारः	२९२	८
गर्भसंधिभेदाः ...	२९३	१
तत्र, अभूताहरणम् ...	२९३	५
मार्गः	२९३	११
रूपम्...	२९३	१५
उदाहरणम्	२९३	१९
क्रमः	२९४	६
संग्रहः...	२९४	११
अनुमानम्	२९४	१५
प्रार्थना	२९५	६

	पृष्ठस्य	पङ्क्तौ
क्षिप्तिः	२९५	१४
त्रो (तो) टकम् ...	२९५	१८
अधिबलम् ...	२९६	३
उद्वेगः	२९६	६
विद्रवः	२९६	१०
विमर्शसंधिभेदाः ...	२९६	१४
तत्र, अपवादः ...	२९६	१७
संफेटः	२९७	३
व्यवसायः ...	२९७	११
द्रवः	२९७	१५
द्युतिः	२९८	३
शक्तिः	२९८	९
प्रसङ्गः	२९८	१६
खेदः	२९९	९
प्रतिषेधः	२९९	१६
विरोधनम् ...	३००	५
प्ररोचना	३००	११
आदानम्	३०१	१
छादनम्	३०१	८
निर्वहणसंधिभेदाः ...	३०१	१४
तत्र, संधिः	३०१	१९
विबोधः	३०१	२३
ग्रथनम्	३०२	६
निर्णयः	३०२	११
परिभाषणम् ...	३०२	१९
कृतिः	३०३	१
प्रसादः	३०३	५
आनन्दः	३०३	७
समयः	३०३	१०
उपगूहनम्	३०३	१३
भाषणम्	३०३	२०
पूर्ववाक्यम् ...	३०४	१
काव्यसंहारः ...	३०४	४
प्रशस्तिः	३०४	६
चतुःषष्टयङ्गोपसंहारः	३०४	१७

	पृष्ठस्य	पङ्क्तौ
फलनिरूपणम् ...	३०५	४
अङ्गप्रशंसा	३०५	७
रसव्यक्त्यनुरोधेनाङ्गानां संनिवेशरूपणम् ...	३०५	१३
वृत्तयः	३०६	४
तत्र, कैशिकी... ...	३०६	९
कैशिक्या अङ्गानि	३०६	११
तत्र, नर्म	३०६	१४
नर्मस्फूर्जः ...	३०७	१०
नर्मस्फोटः ...	३०८	२
नर्मगर्भः	३०८	१०
सात्वती	३०८	१४
सात्वत्या अङ्गानि...	३०९	२
तत्र, उत्थापकः ...	३०९	४
सांघात्यः	३०९	१०
संलापः	३०९	१४
परिवर्तकः ...	३०९	१९
आरभटी	३१०	५
आरभट्या अङ्गानि ...	३१०	७
तत्र, वस्तूत्थापनम् ...	३१०	९
संफेटः	३१०	१५
संक्षिप्तिः	३१०	१७
अवपातनम् ...	३११	५
नाट्योक्तयः	३११	११
नामकरणम्	३१२	१
नाट्यपरिभाषाः ...	३१२	१२
भाषाविभागः ...	३१५	३
षट्त्रिंशल्लक्षणादीनामाख्यानम्	३१६	११
लक्षणानामुद्देशः ...	३१६	१६
तत्र, भूषणम्... ...	३१७	३
अक्षरसंघातः ...	३१७	७
शोभा	३१७	१०
उदाहरणम् ...	३१७	१५
हेतुः	३१८	४

	पृष्ठस्य	पङ्क्तौ
संशयः	३१८	७
दृष्टान्तः	३१८	११
तुल्यतर्कः... ...	३१८	१४
पदोच्चयः... ...	३१९	४
निदर्शनम् ...	३१९	९
अभिप्रायः ...	३२०	१
प्राप्तिः	३२०	५
विचारः	३२०	८
दिष्टम्	३२०	१३
उपदिष्टम्... ...	३२०	१७
गुणातिपातः ...	३२१	३
गुणातिशयः ...	३२१	७
विशेषणम् ...	३२१	१३
निरुक्तिः	३२१	१७
सिद्धिः	३२२	४
भ्रंशः	३२२	८
विपर्ययः	३२२	१२
दाक्षिण्यम् ...	३२२	१६
अनुनयः	३२२	२१
माला	३२३	३
अर्थापत्तिः ...	३२३	९
गर्हणम्	३२३	१४
पृच्छा	३२३	२०
प्रसिद्धिः	३२४	३
सारूप्यम्... ...	३२४	७
संक्षेपः	३२४	१०
गुणकीर्तनम् ...	३२४	१५
लेशः	३२४	१८
मनोरथः	३२५	१
अनुक्तसिद्धिः ...	३२५	५
प्रियोक्तिः ...	३२५	९
नाट्यालंकाराः ...	३२५	१४
तत्र, आशीः... ...	३२६	३
आक्रन्दः	३२६	७
कपटम्	३२६	१०
अक्षमा	३२६	१४
गर्वः	३२६	१८
उद्यमः	३२६	२०
आश्रयः	३२७	१
उत्प्रासनम् ...	३२७	४
स्पृहा	३२७	७
क्षोभः	३२७	११
पश्चात्तापः ...	३२७	१५
उपपत्तिः... ...	३२७	१८
आशंसा	३२८	४
अध्यवसायः ...	३२८	७
विसर्पः	३२८	११
उल्लेखः	३२८	१४
उत्तेजनम् ...	३२९	१
परीवादः	३२९	६
नीतिः	३२९	१०
अर्थविशेषणम् ...	३२९	१३
प्रोत्साहनम् ...	३३०	१
साहाय्यम् ...	३३०	५
अभिमानः ...	३३०	८
अनुवर्तनम् ...	३३०	११
उत्कीर्तनम् ...	३३०	१५
याञ्चा	३३१	१
परिहारः	३३१	५
निवेदनम्... ...	३३१	९
प्रवर्तनम्	३३१	१२
आख्यानम् ...	३३१	१६
युक्तिः	३३१	१९
प्रहर्षः	३३२	३
उपदेशनम् ...	३३२	६
मुनिनिरूपितं नाटक-		
स्वरूपम्	३३२	१३
लास्याङ्गानि	३३३	५
तत्र, गेयपदम् ...	३३३	१०
स्थितपाठ्यम् ...	३३३	१५

	पृष्ठस्य	पङ्क्तौ
आसीनम्... ...	३३३	१९
पुष्पगण्डिका ...	३३४	२
प्रच्छेदकः... ...	३३४	४
त्रिगूढकम् ...	३३४	६
सैन्धवम्	३३४	८
द्विगूढकम्... ...	३३४	११
उत्तमोत्तमकम् ...	३३४	१२
उक्तप्रत्युक्तकम् ...	३३५	१
महानाटकम्	३३५	३
प्रकरणम्	३३५	७
भाणः	३३६	२
व्यायोगः	३३६	१३
समवकारः	३३७	२
डिमः...	३३८	४
ईहामृगः	३३८	१४
अङ्कः	३३९	१३
वीथी...	३४०	४
वीथ्यङ्गानि	३४०	११
तत्र, प्रपञ्चः	३४०	१५
त्रिगतम्	३४०	१७
छलम्	३४१	३
वाक्केलिः	३४१	११
अधिबलम् ...	३४१	१९
गण्डम्	३४२	९
अवस्यन्दितम् ...	३४२	१५
नालिका	३४३	१
असत्प्रलापः ...	३४३	७
व्याहारः	३४३	१५
मार्दवम्	३४३	२२
प्रहसनम्	३४४	१०
प्रहसनभेदाः	३४४	१५
नाटिका	३४५	१३
त्रोटकम्	३४६	२
गोष्ठी	३४६	७
सट्टकम्	३४६	१३

	पृष्ठस्य	पङ्क्तौ
नाट्यरासकम्	३४६	१८
प्रस्थानकम्	३४७	४
उल्लाप्यम्	३४७	१०
काव्यम्	३४७	१६
प्रेङ्खणकम्	३४८	४
रासकम्	३४८	१०
संलापकम्	३४८	१८
श्रीगदितम्	३४९	४
शिल्पकम्	३४९	१३
विलासिका	३५०	६
दुर्मल्लिका	३५०	१३
प्रकरणिका	३५१	२
हल्लीशः	३५१	६
माणिका	३५१	११
श्रव्यकाव्यम्	३५२	५
पद्यलक्षणम्	३५२	७
मुक्तकादिलक्षणम् ...	३५२	७
महाकाव्यम्	३५३	४
खण्डकाव्यम्	३५६	१०
कोषः...	३५६	१२
गद्यलक्षणम्	३५६	१६
कथा	३५७	१३
आख्यायिका	३५७	१७
चम्पूः...	३५८	८
बिरुदम्	३५८	१०
करम्भकम्	३५८	१२

सप्तमपरिच्छेदे—

दोषस्वरूपम्	३६०	४
दोषाणां विभागाः ...	३६१	२
दुःश्रवत्वादिदोषाणां कीर्तनम्	३६१	६
तत्र, दुःश्रवत्वम् ...	३६१	१२
अश्लीलत्वम् ...	३६१	१५
अनुचितार्थत्वम् ...	३६२	६
अप्रयुक्तत्वम्	३६२	७

	पृष्ठस्य	पङ्क्तौ
ग्राम्यत्वम्	३६३	१
अप्रतीतत्वम्	३६३	४
संदिग्धत्वम्	३६३	८
नेयार्थत्वम्	३६३	९
निहतार्थत्वम्	३६४	४
अवाचकत्वम्	३६४	८
क्लिष्टत्वम्	३६५	१
विरुद्धमतिकारित्वम् ...	३६५	५
अविमृष्टविधेयांशत्वम्	३६५	६
वाक्ये दुःश्रवत्वादीनां कीर्तनम् ...	३६९	२
वाक्यदोषाः	३७६	९
तत्र, प्रतिकूलत्वम् ...	३७७	१
लुप्तविसर्गत्वम् आहतविसर्गत्वम्	३७७	७
अधिकपदत्वम् ...	३७७	१०
न्यूनपदत्वम् ...	३७८	१२
पुनरुक्तत्वम् ...	३७८	१४
हृतवृत्तत्वम् ...	३७९	२
पतत्प्रकर्षत्वम् ...	३८१	१२
संधिविश्लेषत्वम् ...	३८२	१
संध्यश्लीलत्वम् ...	३८२	५
संधिकष्टत्वम्	३८२	७
अर्धान्तरैकपदत्वम् ...	३८२	१०
समाप्तपुनरात्तत्वम् ...	३८३	३
अभवन्मतसंबन्धत्वम्	३८३	४
अक्रमत्वम्	३८४	९
अमतपरार्थत्वम् ...	३८५	१
वाच्यस्यानभिधानम् ...	३८५	४
भग्नप्रक्रमत्वम् ...	३८५	११
प्रसिद्धित्यागः	३८८	१
अस्थानस्थपदता ...	३८८	७
अस्थानस्थसमासता ...	३८९	१
संकीर्णत्वम्	३८९	७
गर्भितता	३८९	११

	पृष्ठस्य	पङ्क्तौ
अर्थदोषाः	३८९	१५
तत्र, अपुष्टत्वम् ...	३९०	३
दुष्क्रमत्वम्	३९०	९
ग्राम्यत्वम्	३९०	१३
व्याहतत्वम् ...	३९०	१४
अश्लीलत्वम् ...	३९१	७
कष्टार्थत्वम् ...	३९२	४
अनवीकृतत्वम् ...	३९२	७
निर्हेतुत्वम्	३९२	१६
प्रकाशितविरुद्धत्वम् ...	३९३	२
संदिग्धत्वम्	३९३	४
पनरुक्तता	३९३	८
प्रसिद्धिविरुद्धता ...	३९३	९
विद्याविरुद्धता ...	३९४	२
आकाङ्क्षता	३९४	६
सहचरभिन्नत्वम् ...	३९४	१०
अस्थानयुक्तता ...	३९५	३
अविशेषे विशेषः ...	३९५	५
अनियमे वियमः ...	३९५	८
विशेषेऽविशेषः ...	३९५	१०
नियमेऽनियमः ...	३९५	१२
विध्ययुक्तता	३९६	१४
अनुवादायुक्तता ...	३९६	१७
निर्मुक्तपुनरुक्तत्वम् ...	३९७	५
रसदोषाः	३९७	८
काव्यदोषेभ्यः पृथगलंकार-दोषाणामसंभवत्वप्रतिपादनम्	४००	५
दुःश्रवत्वस्य गुणत्वप्रतिपादनम्	४०५	५
अश्लीलत्वस्य गुणत्वप्रतिपादनम्	४०६	१०
श्लोषादौ निहतार्थाप्रयुक्तयोरदोषत्वप्रतिपादनम्	४०७	३

	पृष्ठस्य	पङ्क्तौ
अप्रतीतत्वस्य गुणत्वाख्यानम्	४०७	९
कथितपदस्य गुणत्वाख्यानम्	४०८	८
संदिग्धत्वस्य गुणत्वाख्यानम्	४०९	३
कष्टत्वदुःश्रवत्वयोर्गुणत्वाख्यानम्	४१०	१
ग्राम्यत्वस्य गुणत्वाख्यानम्	४११	९
निर्हेतुतायाः दोषाभावत्वनिरूपणम् ...	४११	६
ख्यातविरुद्धतायाः गुणत्वनिरूपणम् ...	४११	९
कविसमयख्यातानि ...	४१२	२
पुनरुक्तस्य गुणत्वाख्यानम्	४१३	६
न्यूनपदतायाः गुणत्वाख्यानम्	४१३	१९
न्यूनपदतायाः गुणदोषत्वाभावनिरूपणम् ...	४१४	४
अधिकपदस्य गुणत्वाख्यानम्	४१४	१५
क्वचित्समाप्तपुनरात्तत्वस्य गुणदोषाभावनिरूपणं	४१५	५
गर्भितत्वस्य गुणत्वाख्यानम्	४१५	१०
पतत्प्रकर्षतायाः गुणत्वनिरूपणम्	४१६	५
व्यभिचारिणः स्वशब्देनोक्तौ दोषत्वाभावकीर्तनम्	४१६	८
विरुद्धरसविभावादिसंग्रहस्य गुणत्वनिरूपणम् ...	४१७	३
विरुद्धरसयोः समावेशविचारः	४१७	७
अनुकरणे दोषाणामदोषत्वाख्यानम्	४२२	५

	पृष्ठस्य	पङ्क्तौ
अष्टमपरिच्छेदे—		
गुणाः	४२३	३
गुणानां त्रैविध्यम् ...	४२४	१
तत्र, माधुर्यम् ...	४२४	३
माधुर्यव्यञ्जकवर्णादिः	४२६	४
ओजः	४२८	१
ओजोव्यञ्जकवर्णादिः	४२८	५
प्रसादः	४२९	१
प्रसादव्यञ्जकशब्दाः	४२९	४
श्लेषादीनामोजस्यन्तर्भावाख्यानम् ...	४३०	५
असमासस्य माधुर्यव्यञ्जकत्वे कारणम्	४३२	८
अर्थव्यक्तेः प्रसादगुणेऽन्तर्भावः	४३३	१
ग्राम्यदुःश्रवत्वत्यागेन कान्तिसमतयोः संग्रहः	४३३	४
समताया गुणदोषयोरन्तःपातः	४३४	१
ओजआदीनां दोषाभावत्वेनाङ्गीकारः ...	४३५	३
अर्थव्यक्तिकान्त्योः स्वभावोक्त्यादिना संग्रहः...	४३६	१
श्लेषसमतयोर्वैचित्र्यादोषतयोरन्तःपातः ...	४३६	५
समाधेर्गुणत्वाभावः ...	४३७	५
खण्डनोपसंहारः ...	४३८	८
नवमपरिच्छेदे—		
रीतिः	४३९	४
रीतीनां चातुर्विध्यम् ...	४३९	७
तत्र, वैदर्भी	४३९	१०
गौडी	४४०	७
पाञ्चाली	४४०	३
लाटी	४४१	८

	पृष्ठस्य	पङ्क्तौ
वक्त्राद्यौचित्येन रचनाव-		
स्थानम्	४४२	७
दशमपरिच्छेदे—		
अलंकाराः	४४४	२
पुनरुक्तवदाभासः ...	४४५	३
अनुप्रासः	४४६	३
छेकानुप्रासः	४४७	१
वृत्त्यनुप्रासः	४४७	१०
श्रुत्यनुप्रासः	४४८	६
अन्त्यानुप्रासः ...	४४९	१
लाटानुप्रासः	४४९	९
यमकम्	४५१	७
वक्रोक्तिः	४५५	२
भाषासमयः	४५६	५
श्लेषः	४५६	१५
सभङ्गश्लेषः अभङ्गश्लेषः सभङ्गाभङ्गश्लेषः } ...	४६१	१
चित्रम्	४६९	५
प्रहेलिकाया अलंकारत्वख-		
ण्डनम्	४७१	३
च्युताक्षरादिः ...	४७१	४
उपमा	४७३	१
पूर्णोपमा	४७५	२
श्रौती उपमा	४७६	४
आर्थी उपमा... ...	४७६	५
तद्धिते समासे वाक्ये च		
श्रौत्यार्थ्युपमाख्यानम्	४७८	३
लुप्तोपमा	४८०	३
एकदेशविवर्तिन्युपमा	४८८	६
रसनोपमा	४८८	१३
मालोपमा	४८९	५
अनन्वयः	४९०	५
उपमेयोपमा	४९१	५
स्मरणम्	४९१	११

	पृष्ठस्य	पङ्क्तौ
रूपकम्	४९२	६
रूपकभेदाख्यानम् ...	४९३	३
परिणामः	४९८	८
संदेहः	५००	८
भ्रान्तिमान्	५०२	१
उल्लेखः	५०२	११
अपह्नुतिः	५०५	४
निश्चयः	५०६	९
उत्प्रेक्षा	५०७	१२
उत्प्रेक्षाभेदाख्यानम् ...	५१०	७
अतिशयोक्तिः ...	५१५	३
तुल्ययोगिता	५१८	७
दीपकम्	५१९	९
प्रतिवस्तूपमा	५२०	८
दृष्टान्तः	५२१	४
निदर्शना	५२२	१
व्यतिरेकः	५२४	३
सहोक्तिः	५२६	३
समासोक्तिः	५२८	१४
परिकरः	५३४	१०
श्लेषः	५३५	३
अप्रस्तुतप्रशंसा ...	५३५	९
व्याजस्तुतिः	५३९	९
पर्यायोक्तम्	५४०	५
अर्थान्तरन्यासः ...	५४१	९
काव्यलिङ्गम्	५४३	८
अनुमानम्	५४५	१४
हेतुः...	५४६	६
अनुकूलम्	५४६	९
आक्षेपः	५४७	१
विभावना	५४९	१
विशेषोक्तिः	५४९	१०
विरोधः	५५०	४
असंगतिः	५५२	१
विषमम्	५५३	१

	पृष्ठस्य	पङ्क्तौ
समम्...	५५४	६
विचित्रम्	५५५	१
अधिकम्	५५५	५
अन्योन्यम्	५५५	१४
विशेषः	५५६	३
व्याघातः	५५७	१
कारणमाला	५५७	१२
मालादीपकम् ...	५५८	१
एकावली	५५८	७
सारः	५५९	६
यथासंख्यम्	५६०	१
पर्यायः	५६०	७
परिवृत्तिः	५६१	१२
परिसंख्या	५६२	४
उत्तरम्	५६३	१२
अर्थापत्तिः	५६४	६
विकल्पः	५६५	६

	पृष्ठस्य	पङ्क्तौ
समुच्चयः	५६६	३
समाधिः	५६८	७
प्रत्यनीकम्	५६८	१७
प्रतीपम्	५६८	१६
मीलितम्	५६९	१८
सामान्यम्	५७०	९
तद्गुणः	५७०	१५
अतद्गुणः	५७१	१
सूक्ष्मम्	५७२	२
व्याजोक्तिः	५७२	१३
स्वभावोक्तिः	५७३	८
भाविकम्	५७४	३
उदात्तम्	५७६	१
रसवदाद्यलंकाराः ...	५७६	८
भावोदयाद्यलंकाराः ...	५७९	१०
संसृष्टिसंकरालंकारौ ...	५७९	४
ग्रन्थालंकारश्लोकौ ...	५८३	३

॥ श्री ॥

श्रीमद्विश्वनाथकविराजप्रणीतः

साहित्यदर्पणः ।

श्रीमद्रामचरणतर्कवागीशकृतया विवृत्यानुगतः ।

प्रथमः परिच्छेदः ।

ग्रन्थारम्भे निर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामो वाङ्मयाधिकृततया वाग्देवतायाः सांमुख्यमाधत्ते—

विवृतिः ।

वागीश्वरीसरसगीतगुणप्रवाहं सारस्वतीसततसेवितपादपद्मम् ।
हेमाद्रिमारकतशेखरकान्तमीशं वन्दे खगेन्द्रभुजमौलिगतं मुकुन्दम् ॥
श्रीविश्वनाथकविराजकृतिप्रणीतं साहित्यदर्पणमतिस्थगितप्रमेयम् ।
श्रीमद्विधाय चरणं शरणं गुरूणां यत्नेन रामचरणो विवृणोति विप्रः ॥
यः परः परगुणप्रकाशने लब्धवर्णनिकरो जयत्यसौ ।
दोषगानरचिताघसंचया यात्लधः पिशुनराजिरज्जसा ॥

समग्रसिद्धान्तग्रहव्यग्रमनसामनभिमते प्रकटदोषप्रकरविघटितादरकाव्यादिनिरूपणे सत्यप्यलंकारग्रन्थनिकरे तेषामभीष्टमदुष्टकाव्यादिनिरूपणमव्याहतराद्धान्तसंतानमलंकारग्रन्थमारभमाणः प्रथमकारिकायाः सरस्वत्याराधनप्रयुक्तस्वार्थनिर्वाहप्रयुक्तिपरतां प्रकाशयितुमवतरणिकां स्वयमेव ग्रन्थकृदाह—**ग्रन्थारम्भ इति** । ग्रन्थस्य महावाक्यविशेषस्यारम्भे आरम्भप्राक्काले आद्यकृतिरूपस्यारम्भस्य मङ्गलाचरणाधिकरणत्वबाधादियं लक्षणा, तत्प्रयोजनं च मङ्गलारम्भयोरव्यवहितत्वबोधः । केचित्तु 'आरम्भे भाविनि सतीत्यर्थः' इत्याहुः । तन्न । तथा सत्यारम्भप्राक्काल इति पदादिवारम्भे भाविनि सतीत्यस्मादारम्भप्रागभावसमानकालीनत्वस्यैव बोधः, न तु सदाचारपरम्परापरिप्राप्तस्यारम्भाव्यवहितप्राक्कालीनत्वस्य । नच कालान्तरीणमङ्गलाचरणस्या-

---

विवृतिपूर्तिः ।

एकत्र यत्र नवचम्पकदामहारि हारावदातमितरत्र चकास्ति शोचिः ।
तस्या इवाद्भुततनूवटनाय तस्मै कस्मैचिदस्तु महसे प्रणतिः परस्मै ॥
आचार्यरामचरणेन विकासितायां यद्दर्पणस्य विवृतौ विकलत्वमस्ति ।
तत्पूर्तये जयपुरेन्द्रसमाश्रितेन दुर्गाप्रसादकृतिना क्रियते प्रयत्नः ॥

1. **खगेति** । गरुडपृष्ठारूढम्, अत एव कनकाचलोपरिगतमरकतशृङ्गसुन्दरमित्यर्थः ॥

शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी ।
अपहृत्य तमः संततमर्थानखिलान्प्रकाशयतु ॥ १ ॥

प्यदृष्टद्वारा प्रकृतोपयोगित्वात्तयोरव्यवहितस्य बोधोऽकिंचित्कर इति वाच्यम् । तस्य प्राशस्त्येनात्यन्तोपयोगित्वकल्पनात् । निर्विघ्नेन प्रतिबन्धकीभूतदुरदृष्टविघातद्वारा प्रारिप्सितस्य चिकीर्षाविषयस्य परिसमाप्तिश्चरमवर्णपर्यन्तानुष्ठानं तत्कामः । 'ग्रन्थकृत्' इति शेषः । वाङ्मयान्यष्टादश विद्याः काव्यकलाः कामशास्त्रादीनि च, तदधिकृततया तदध्यक्षतया वाग्देवतायाः सरस्वत्याः सांमुख्यमाराधनेन स्वार्थसाधनानुकूलत्वमाधत्ते करोति । अत्र प्रथमपुरुषाभिधानं 'रामः स्वयं याचते', 'जीवत्यहो रावणः' इत्यादिवत्काल्पनिकभेदमूरीकृत्य । अन्यथा अस्मत्कर्तृत्वेनोत्तमपुरुष एव स्यात् । न च वृत्तिकारकारिकाकारयोर्वास्तवो भेद इति वाच्यम् । 'रसस्वरूपं निरूपयिष्यामः' इति प्रतिज्ञातुर्वृत्तिकारस्य कारिकया रसनिरूपणं तथात्वेऽसंगतं स्यात् । **शरदिन्दिति** । सा वेदागमादिप्रसिद्धा । सह एन विष्णुना वर्तमाना वा । गिरां देवी सरस्वती मम चेतसि वर्तमाना सती तमोऽज्ञानमपहृत्य विनाश्य अखिलान् सर्वान् वाच्यलक्ष्यतात्पर्यव्यङ्ग्यरूपानर्थान् वस्तूनि संततं यदा यदर्थज्ञानमुपयुक्तं तदैव प्रकाशयतु प्रकटीकरोतु । यद्वा 'संततं' इति 'तमः' इत्यस्य विशेषणम् । निबिडमित्यर्थः । सा कीदृशी । शरदिन्दोरिव सुन्दरी अतिविशदा रुचिर्दीप्तिर्यस्याः सा तथा । शरदिन्दुरपि तमो ध्वान्तं विनाश्य अर्थान् वस्तूनि प्रकाशयतीत्युपमा । वाङ्मयाधिकृतत्वख्यापनाय 'गिरां देवी' इत्यनेन सरस्वत्या उपन्यासः । अथवा देवी दुर्गा मम गिरामर्थान् चेतसि व्युत्पित्सूनां हृदि प्रकाशयतु । सा कीदृशी । शरदिन्दुसुन्दरः शिवस्तत्र रुचिरमिलाषो यस्याः सा तथा । अन्यत्समानम् । एतत्पक्षे 'वाङ्मयाधिकृततया' इति कर्तृविशेषणम् । वाङ्मयाधिकृतो ग्रन्थकृदित्यर्थः । 'अवाग्देवतायाः' इति गोपनीयदेवताया इत्यर्थः । इष्टदेवताया गोपनीयत्वमागमे प्रसिद्धम् । अत्र 'सा' इत्यनेन सरस्वत्याः श्रवणम् । 'चेतसि वर्तमाना' इत्यनेन मननं ध्यानं च लभ्यत इति त्रिविधं सरस्वत्याराधनमत्र फलितम् । तस्य विघ्नध्वंसद्वारा प्रारिप्सितपरिसमाप्तिः फलम् । स्वतःसिद्धविघ्नविरहस्य प्रारिप्सितपरिसमाप्तिरेव फलम्, न तु विशिष्टम् । यथा—निष्पापस्य ब्रह्मलोकप्राप्तिरेव संध्योपासनस्य फलम्, न तु पापक्षयपूर्वकब्रह्मलोकप्राप्तिः । तदुक्तम्—'संध्यामुपासते ये तु सततं शंसितव्रताः । विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम् ॥' इति । यद्वा निर्विघ्नेन विघ्नाभावद्वारेत्यर्थः । अभावश्च यथायथमत्यन्ताभावो ध्वंसश्च ग्राह्यः । अत्यन्ताभावपक्षे अन्वयव्यतिरेकानुविधायित्वरूपं जन्यत्वमादाय व्यापारत्वनिर्वाहः । एतन्मते सर्वत्रैव विशिष्टफलसंभव इति सर्वं समञ्जसम्[3] । प्रवृत्त्यङ्गं प्रयोजनवत्त्वं दर्शय-

१. 'प्रागभावनाशो वा' इति मुद्रितपुस्तकेऽधिकः पाठः. २. 'तस्य विघ्नाभावद्वारा प्रारिप्सितपरिसमाप्तिः फलम् । अभावश्चात्र ध्वंसः प्रागभावश्च विवक्षणीयो योग्यत्वात् । अत्यन्ताभावस्य ध्वंसप्रागभावाभ्यां सह विरोधेन विघ्नात्यन्ताभावस्य जन्तुमात्रेऽसंभवात् सदातनसंसर्गाभावरूपस्य तस्य व्यापारत्वाभावाच्च । न च प्रागभावस्य जन्यत्वाभावात्कथं व्यापारत्वमङ्गीकृतमिति वाच्यम् । कार्येनाशयस्य तस्य कालान्तरसंबन्धस्येष्टसाधनत्वेन व्यापारत्वाङ्गीकारात् कालान्तरसंबन्धस्य जन्यत्वस्य संभवात् । अन्यथा विघ्नरूपकार्येण तत्प्रागभावस्य नाशे इष्टसमाप्तिर्न स्यात् ॥' इति पुस्तकान्तरेऽधिकः पाठः.

अस्य ग्रन्थस्य काव्याङ्गतया काव्यफलैरेव फलवत्त्वमिति काव्यफलान्याह—

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव[1] यतस्तेन तत्स्वरूपं निरूप्यते ॥ २ ॥

[2]चतुर्वर्गफलप्राप्तिर्हि काव्यतो रामादिवत्प्रवर्तितव्यं न रावणादिवदित्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव ।

ति—**अस्येति** । प्रक्रम्यमानस्येत्यर्थः । काव्याङ्गतया काव्यफलसाधनेऽप्रधानकारणतया । काव्यफलैरिति धान्येन धनवानितिवदभेदे तृतीया । काव्यफलाभिन्नफलवत्त्वमित्यर्थः । यथा दर्शपौर्णमासाङ्गानां प्रयाजादीनां दर्शपौर्णमासफलेनैव फलवत्त्वं तथास्यापीति भाव्यम् । ननु प्रयाजादीनामङ्गापूर्वद्वारा परमापूर्वं प्रत्युपकारः संभवतीति तत्र तथास्तु, प्रकृते तु शास्त्रस्य काव्यगुणदोषादिज्ञापनोपक्षीणत्वेन चतुर्वर्ग प्रत्युपकारासंभवात् कथं तत्साधनत्वमिति चेत् । न । काव्यं हि स्वरूपसत्त्व कारणम्, किंतु कृतिज्ञत्यन्यतरविषयतया तत्रास्योपकारः संभवतीति न कापि विप्रतिपत्तिः । नन्वस्य चतुर्वर्गातिरिक्तकाव्यगुणादिज्ञानरूपफलसत्त्वात्कथमेवकारार्थान्वय इति चेत् । न । 'फलवत्त्वम्' इत्यत्र मतोः प्रशस्तार्थत्वेनोत्कृष्टफलपरत्वात् । एवं च चतुर्वर्गसाधनत्वज्ञानेनात्र लोकानां साभिनिवेशप्रवृत्तिर्भविष्यतीति भावः । काव्यफलदर्शनपुरःसरं काव्यस्वरूपनिरूपणं प्रतिजानीते—**चतुर्वर्गेति** । चतुर्वर्गो धर्मार्थकाममोक्षा एव फलम्। सुखादनायासात्। अल्पधियां सुकुमारमतीनाम्। अपिना परिणतबुद्धीनां च। एवकारेण वेदशास्त्रव्यवच्छेदः । 'यतः' इति 'काव्यात्' इत्यस्य विशेषणम्। एवं च प्राचीनासंमतं नीरसकाव्यं चतुर्वर्गसाधनत्वान्न निरूपणीयमिति फलितम्। तेनायासं विना चतुर्वर्गसाधनत्वेन, तस्य काव्यस्य स्वरूपमिति स्वसमसाधारणं रूपमितरव्यावर्तको धर्मः।लक्षणमित्यर्थः । निरूप्यते ज्ञाप्यते । काव्यस्य चतुर्वर्गसाधनत्वमुपपादयति—**चतुर्वर्गफलप्राप्तिर्हीति** । रामादिवत् रामादिनेव चतुर्वर्गकामेन पित्राज्ञापरिपालनादौ प्रवर्ति-

---

1. **काव्येति** । सकलपुरुषार्थसाधनक्षमस्य काव्यस्य प्रादुर्भावे शक्तिर्व्युत्पत्तिरभ्यासश्च कारणम्। शक्त्यादीनां स्वरूपमाह रुद्रटः—'मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य । अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः ॥ प्रतिभेत्यपरैरुदिता सहजोत्पाद्या च सा द्विधा भवति । पुंसा सह जातत्वादनयोस्तु ज्यायसी सहजा ॥ स्वस्यासौ संस्कारे परमपरं मृगयते यतो हेतुम् । उत्पाद्या तु कथंचिद् व्युत्पत्त्या जन्यते परया ॥ छन्दोव्याकरणकलालोकस्थितिपदपदार्थविज्ञानात् । युक्तायुक्तविवेको व्युत्पत्तिरियं समासेन ॥ विस्तरतस्तु किमन्यत्तत इह वाच्यं न वाचकं लोके । न भवति यत्काव्याङ्गं सर्वज्ञत्वं ततोऽन्यैषा ॥ अधिगतसकलज्ञेयः सुकवेः सुजनस्य संनिधौ नियतम् । नक्तंदिनमभ्यस्येदभियुक्तः शक्तिमान्काव्यम् ॥' इति । अयमेवाशयः 'शक्तिर्निपुणता—' इति श्लोकेन निबद्धो राजानकमम्मटैः ॥

---

१. 'चतु—' इत्यादिः 'सुप्रतीतैव' इत्यन्तः पाठो ग-पुस्तके नास्ति.

उक्तं च—

'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥' इति ।

किंच काव्याद्धर्मप्राप्तिर्भगवन्नारायणचरणारविन्दस्तवादिना । 'एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग्भवति' इत्यादिवेदवाक्येभ्यश्च सुप्रसिद्धैव । अर्थप्राप्तिश्च प्रत्यक्षसिद्धा । कामप्राप्तिश्चार्थद्वारैव । मोक्षप्राप्तिश्चैतज्जन्यधर्मफलाननुसंधानात् । मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायकत्वाच्च । चतुर्वर्गप्राप्तिर्हि वेदशास्त्रेभ्यो नीरसतया दुःखा-

---

तव्यम् । **न रावणादिवदिति** । रावणादिनेव परदारहरणादौ न प्रवर्तितव्यमित्यर्थः । कृत्यं विहितं कर्म, अकृत्यं निषिद्धं कर्म, तयोः प्रवृत्तिनिवृत्ती यन्नविशेषौ तयोरुपदेशस्तज्जनकं ज्ञानं स एव द्वारं व्यापारस्तेन । तथाहि—काव्याद्विहितकर्मणि कर्तव्यताज्ञानं ततस्तत्र प्रवृत्तिस्ततस्तदनुष्ठानं ततो धर्मस्तस्मादर्थकामौ । 'धर्मादर्थश्च कामश्च' इति स्मरणात् । विहितकर्मफलत्यागान्निषिद्धानुष्ठानाच्च मोक्षः । 'युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्' इति स्मरणात् । 'व्यापारे [illegible]पारिणो नान्यथासिद्धिः' इति न्यायेन काव्यस्य धर्मादिजनकत्वमिति भावः । अत्र प्राचीनानां संवादमाह—**उक्तं चेति** । धर्मार्थकाममोक्षेषु तदुपायेषु वैचक्षण्यं विशिष्टज्ञानं कलासु नृत्यगीतादिचतुःषष्टिप्रकारासु । साधुकाव्यस्य निषेवणं करणं ज्ञानं च । ननु काव्यं कर्तव्यत्वाकर्तव्यत्वज्ञानद्वारा कृत्याकृत्यप्रवृत्तिनिवृत्ती प्रति कारणमास्तां धर्मादिं प्रति त्वन्यथासिद्धमेव, इत्यत आह—**किंचेति** । 'काव्यात्' इति प्राग्यन्तपदचतुष्टयेऽन्वेति । स्तवो गुणज्ञापनम् । आदिना विष्णुजन्मादिज्ञापनं तद्द्वारेत्यर्थः । एवं च काव्यान्तरमफलमत आह—**एक इति** । एकोऽपीत्यर्थः । सुप्रयुक्तो रसवत्तया रचितः सम्यक् तादृप्येण ज्ञातः । अत्र वाकारो बोध्यः । इत्यादि(वेद)वाक्येभ्यः इत्यादिश्रुत्यादिभ्यः । सत्काव्यकृतिज्ञस्योरन्यतरस्य धर्मसाधनत्वं श्रौतमिति भावः । **प्रत्यक्षसिद्धेति** । धनिस्तवादिना कवीनां धनप्राप्तिर्लोके प्रसिद्धैवेत्यर्थः । **कामप्राप्तिश्चेति** । कामयते, कामो विषयभोगः । 'धर्मादर्थस्ततः कामः कामात्सुखसमुन्नतिः' इति स्मरणात् । **एतज्जन्येति** । काव्यजन्येत्यर्थः । धर्मफलस्यानुसंधानादेव तदधीनोत्पत्तिकयोरर्थकामयोरुत्पत्तिसंभवनैव नास्तीति तयोरनुपादानम् । यद्वा धर्मप्रधानं फलं धर्मफलं तेनार्थकामयोरपि संग्रहः । अननुसंधानात् अपारमार्थिकत्वेन साध्यत्वानिर्धारणात् मोक्षोपयोगिवाक्यमुपनिषदादिस्तत्र व्युत्पत्त्याधायकत्वाद् दृढतरज्ञानजनकत्वात् । ननु काव्यादुपनिषदादिव्युत्पत्तिस्ततस्तदर्थानुष्ठानं ततो मोक्षप्राप्तिरित्यन्यथासिद्धितादवस्थ्यमेवेति चेत् । सत्यम् । उपनिषदादिज्ञानादपि मोक्षप्राप्तिरित्यभिप्रायेणास्योत्थापनात् 'काव्यादेव'इत्येवकारव्यवच्छेद्यं दर्शयति—**चतुर्वर्गेति** । वेदा ऋग्यजुःसामानि । शास्त्राणि मीमांसादीनि । दुःखादेवेति सुखव्यवच्छेदः । परि-

---

१. 'सुज्ञातः' ग. २. 'अर्थप्राप्तिः' क-ख-गः ३. 'द्वारेणैव' क. ४. 'सामाथर्वाख्याः' इति मुद्रितपुस्तके

देव परिणतबुद्धीनामेव जायते । परमानन्दसंदोहजनकतया सुखादेव सुकुमारबुद्धीनामपि पुनः काव्यादेव ।

ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु किमिति[1] काव्ये यत्नः करणीय इत्यपि न वक्तव्यम् । कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात् ।

किंच । काव्यस्योपादेयत्वमग्निपुराणेऽप्युक्तम्—

'नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥'

'त्रिवर्गसाधनं नाट्यम्' इति च । विष्णुपुराणेऽपि—

'काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च ।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः ॥' इति ।

तेन[3] हेतुना तस्य काव्यस्य स्वरूपं निरूप्यते । एतेनाभिधेयं च

णतबुद्धीनां वेदादिभ्यो धर्मादिप्राप्तिः सुखान्न भवति । सुकुमारमतीनां तु दुःखादपि न भवतीति भावः । परमानन्दसंदोहो रसास्वादसुखपरम्परा । अपिना परिणतबुद्धिसमुच्चयः । तथा च रसास्वादार्थमपि प्रवर्तमानस्य कृत्याकृत्योपदेशपर्यवसन्नं सत् काव्यं चतुर्वर्गमपि जनयतीति भावः । ननु चतुर्वर्गार्थी प्रेक्षावन्तो वेदशास्त्राण्यनादृत्य कथमनाप्तवाक्ये काव्ये प्रवर्तन्तामित्यभिप्रायेणाशङ्कते—**नन्विति** । तर्हि काव्यस्य चतुर्वर्गसाधनत्वस्वीकारेऽपि । यत्नश्चतुर्वर्गार्थमुद्यमः । काव्यात्तावद्रसास्वादो दुःखं विना धर्मादिप्राप्तिश्च भवति । वेदादिभ्यस्तु दुःखादेव धर्मादिप्राप्तिरेवेति वेदाद्यपेक्षया काव्ये समादर इति समाधानं लौकिकदृष्टान्तेनाह—**कटुकौषधेति** । कटुकेति तिक्तकषायादीनामप्युपलक्षणम् । सितशर्करा अतिशुभ्रगुडविकारविशेषः । तथा च काव्यस्यानाप्तवाक्यत्वेऽपि स्मृतिसदाचारवद्वेदानुमापकत्वेन प्रामाण्यमिति भावः । काव्यस्य युक्तिसिद्धमुपादेयत्वमुपपाद्य वाचनिकं तदुपपादयति—**किंचेति** । तत्र नरजन्मनि शक्तिः काव्यकृतिज्ञत्यन्यतरजनकः संस्कारविशेषः । त्रिवर्गो धर्मार्थकामाः । नाट्यमभिनयप्रधानं नाटकादि । **काव्यालापा इति** । रसव्यञ्जकाः शब्दार्था इत्यर्थः । कारिकास्थं 'तेन–' इत्यादि व्याख्यायते—**तेनेत्यादि** । एतेन 'चतुर्वर्गफलप्राप्तिः–' इत्यादिश्लोकेन । **अभिधेयं चेति** । चकारेण प्रयोजनसंबन्धयोर्लाभः ।

---

१. 'काव्येषु किमिति प्रयत्नः' घ. २. 'च' क-ख; 'अपि' इति घ-पुस्तके नास्ति. ३. 'तेन–' इत्यादिः 'पुनः क्वापि, इति' इत्यन्तः पाठो ग-पुस्तके नास्ति. ४. 'शब्दाः' इति पुस्तकान्तरे.

प्रदर्शितम्। तत्किंस्वरूपं तावत्काव्यमित्यपेक्षायां कश्चिदाह—'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि' इति। एतच्चिन्त्यम्। तथाहि—यदि दोषरहितस्यैव काव्यत्वं तदा—

'न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।
धिग्धिक्कच्छकजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः॥' इति।

संबन्धश्चात्र प्रयोजनाभिधेययोः कार्यकारणभावरूपः। **कश्चिदिति**। काव्यप्रकाशधृतकारिकाकार इत्यर्थः। **तदिति**। काव्यमित्यर्थः। **शब्दार्थाविति**। विनिगमनाविरहेण उपस्थापकत्वसंबन्धेनार्थविशिष्टः शब्दः उपस्थाप्यत्वसंबन्धेन शब्दविशिष्टश्चार्थः काव्यमित्यर्थः। अत्र शब्दार्थयोर्विशेषणविशेष्यभावे व्यञ्जकत्वाव्यञ्जकत्वाभ्यां वैचित्र्यविशेषरूपालंकारप्रयोजकत्वाप्रयोजकत्वाभ्यां प्रधानाप्रधानभावो नियामकः। न च यत्रोभयोर्व्यञ्जकत्वं वैचित्र्यविशेषाधायकत्वं वा तत्र का गतिरिति वाच्यम्। बाहुल्येन व्यञ्जकत्वेन चमत्कारातिशयाधायकत्वेन वा तत्र व्यवहारोपपत्तेः। नच तथापि यत्र व्यञ्जकयोर्वैचित्र्यविशेषप्रयोजकयोर्वा तुल्यत्वं तत्र व्यवहारानुपपत्तिरिति वाच्यम्। प्रथमोपस्थितिविषयत्वेन शब्दस्यैव प्राधान्यादविशेष्यत्वोपगमात्। 'काव्यत्वं शब्दार्थोभयपर्याप्तम्' इति कश्चित्। तन्न। तथा सति शब्दमात्रस्य प्रत्यक्षे 'काव्यं शृणोमि' इति प्रतीतिसाक्षिकं काव्यत्वप्रत्यक्षं न स्यात्। व्यासज्यवृत्तिधर्मस्य लौकिकप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य कारणत्वात्। सगुणौ माधुर्यौजःप्रसादगुणविशिष्टौ। **अनलंकृती इति**। ईषदर्थे नञ्। अस्फुटालंकारावित्यर्थः। **क्वापीति**। प्रायेण स्फुटालंकारसद्भावे काव्यत्वम्, क्वचित्स्फुटालंकारविरहेऽपि। एतेन सर्वत्रैवालंकारसद्भावः सूचितः। अलंकाराश्च यमकोपमादयः। **चिन्त्यमिति**। दूष्यमित्यर्थः। दोषमुपपादयति—**तथाहीति। काव्यत्वमिति**।'अङ्गीकरोषि' इति शेषः। क्वचित्'काव्यत्वाङ्गीकारः' इत्येव पाठः। **न्यक्कार इति**। श्रीरामे राक्षसान्नाशयति सति रावणस्य स्वकीयभर्त्सनमिदम्। मम यदरयोऽयमेव न्यक्कारः। विनाशितप्रभूतारेरिसत्त्वस्यैवानादरातिशयप्रतिपादनाय न्यक्कारत्वेनारोपणम्। तत्रापि तेषु सत्त्वपि

---

1. **काव्यप्रकाशेति**। वृत्तिकार एव कारिकाकारः। तथाहि—'माला तु पूर्ववत्' इति कारिकायां 'पूर्ववत्' इति कथनेन वृत्तिकारकारिकाकारयोरेकत्व एव वृत्तिमात्रप्रदर्शितमालोपमायाः सूत्रे 'पूर्ववत्' इति दृष्टान्ततयोपन्यासः संगच्छेते। 'मालोपमा वृत्तौ लक्षिता कारिकायां तु सा दृष्टान्तीकृतेति वृत्तिकृत्कारिकाकृतोरैक्यं स्वयमेव राजानकमम्मटैः सूचितम्॥' इति सुधासागरे भीमसेनदीक्षिता अपि वदन्ति॥

---

१. 'तावत्' ग-पुस्तके नास्ति. २. 'आह' क-ख-घ-पुस्तकेषु नास्ति. ३. 'काव्यत्वाङ्गीकारः' क-ख-ग-घ. ४. 'इति' क-ख-घ. पुस्तकेषु नास्ति. ५. 'अत्र शब्दार्थयोः—'इत्यादिः 'विशेष्यत्वोपगमात्' इत्यन्तः पाठः पुस्तकान्तरे नास्ति. ६. 'संनिकर्षस्य' इति मुद्रितपुस्तकपाठः.

अस्य श्लोकस्य विधेयाविमर्शदोषदुष्टतया[1] काव्यत्वं न स्यात् । प्रत्युत ध्वनित्वेनोत्तमकाव्यतास्यांङ्गीकृता[2] । तस्मादव्याप्तिर्लक्षण-

असौ राम एकस्तापसः । तपस्विभक्षकस्य ममारिरयमपि न्यक्कारः । द्वेषातिशयाद्रामस्यादःपदेनैव निर्देशः, न[3] तु नाम्ना । सोऽपि तथाविधोऽपि अत्रैव लङ्कायामेव, न तु दूरे, राक्षसकुलं निहन्ति, न तु लुक्कायितः क्वापि दूरे तिष्ठति । द्वित्रराक्षसहनने कदाचित्क्षमः स्यात्तन्न, कुलं समूहम् । प्रबोधितवता प्रबुद्धेन । 'बुधिर् बोधने' इत्यस्य भौवादिकस्य रूपम् । न तु 'बुध अवगमने' इत्यस्य दैवादिकस्य । तस्यानिट्त्वात् । यद्वा प्रबोधितं प्रबोधनं तद्वता । जागरितेनेत्यर्थः । एतादृशपराभवेऽपि रावणो जीवतीत्याश्चर्यम् । अत्यन्तशत्रुपराभवकारित्वसूचनाय रावण इत्यनेनात्मन उत्कीर्तनम् । ग्रामटिका क्षुद्रग्रामः तस्या विलुण्ठनेन वृथोच्छूनैः व्यर्थमुद्रिक्तविक्रमैः । अत्र विधेयस्य न्यक्कारस्य रचनावैपरीत्येन गुणीभूतत्वमिति । '[3]स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः' इत्यत्र वृथात्वं विधेयं तच्च समासे गुणीभावादनुद्यप्रतीतिकृदिति च द्विरूपो विधेयाविमर्शः । अत्रेष्टापत्तौ दोषमाह—**प्रत्युतेति** । अयं[4] निपात(न)समुदायो विपरीतार्थकः । ध्वनिसत्त्वेन ईर्ष्याजन्यस्वावमाननरूपनिर्वेदाख्यभावध्वनिसंभवेन । अस्य 'न्यक्कारः—' इत्यादिवाक्यसमुदायस्य । **अङ्गीकृतेति** । 'इदमुत्तममतिशयिनि

1. **विधेयेति** । विधेयाविमर्शः, अयमेवाविमृष्टविधेयांश इति च कथ्यते । प्रकृते अयंपदस्योद्देश्यतया विवक्षितस्य विधेयता, न्यक्कारपदस्य विधेयतया विवक्षितस्योद्देश्यता च दोषमुद्घोषयति । 'अनुवाद्यमनुक्तवैव न विधेयमुदीरयेत् । न ह्यलब्धास्पदं किंचित्कुत्रचित्प्रतितिष्ठति ॥' इति न्यायेनोद्देश्यविधेययोः पौर्वापर्यस्य नियन्त्रितत्वात् । अत एव 'पर्वतो वह्निमान्' इत्येवाभिधीयते, न तु विपर्यासेन । तथा उच्छूनत्वमुद्दिश्य विधीयमानं वृथात्वं समासे गुणीकृतम् । एवं च 'न्यक्कारः,' 'अयं' इत्येतयोः पदयोर्विपर्ययो वाक्यदोषः । '—वृथोच्छूनैः' इत्यत्र समासगतत्वेन पददोषो नतु वाक्यदोषः ॥

2. **अङ्गीकृतेति** । आनन्दवर्धनाचार्यैरिति शेषः । तथाहि—'सुप्तिङ्वचनसंबन्धैस्तथा कारकशक्तिभिः । कृत्तद्धितसमासैश्च द्योत्यो लक्ष्यक्रमः क्वचित् ॥' इति कारिकानुसारेणात्र श्लोके भूयसा सर्वेषामप्येषां स्फुटमेव व्यञ्जकत्वं दृश्यते । तत्र 'मे यदरयः' इत्यनेन मम शत्रुसङ्घावो नोचित इति संबन्धाद्यौचित्यं क्रोधविभावं व्यनक्ति 'अरयः' इति बहुवचनम् । 'तत्राप्यसौ तापसः' इत्यत्र तपो विद्यते यस्येति पौरुषकथाराहित्यं 'अण् च' इति सूत्रविहितेन मत्वर्थीयेन तद्धितेनाभिव्यज्यते । तत्रापीति निपातान्तसमुदायेनात्यन्तासंभावनीयत्वम् । मत्कर्तृका यदि जीवनक्रिया तदा हननक्रिया तावदनुचिता । 'सोऽप्यत्रैव निहन्ति—' इत्यादावत्रैवेति मदधिष्ठितो देशोऽधिकरणम्, निःशेषेण हन्यमानतया राक्षसबलं च कर्मेति, तदिदमसंभाव्यमानमुपनतमिति पुरुषकारासंपत्तिर्ध्वन्यते कारकशक्तिप्रतिपा-

१. 'न तु नाम्ना' इति पुस्तकान्तरे नास्ति. २. 'वृथात्वस्य समासे गुणीभावो विधेयाविमर्शः' इति मुद्रितपुस्तके पाठः. ३. 'स्वर्गग्राम—' इत्यादिः 'विधेयाविमर्शः' इत्यन्तः पाठो मुद्रितपुस्तके नास्ति. ४. 'निपातनमेतद्विपरीतार्थम् । ध्वनिसत्त्वे वक्ष्यमाणपदांशगतासंलक्ष्यक्रमव्यङ्यरूपध्वनिसत्त्वे' इति पुस्तकान्तरे पाठः.

दोषः । ननु कश्चिदेवांशोऽत्र दुष्टो न पुनः सर्वं एवेति चेत्तर्हि यत्रांशे दोषः सोऽकाव्यत्वप्रयोजकः यत्र ध्वनिः स उत्तमकाव्यत्वप्रयोजक इत्यंशाभ्यामुभयत आकृष्यमाणमिदं काव्यमकाव्यं वा किमपि न स्यात् । [1]नं च कंचिदेवांशं काव्यस्य [2]दूषयन्तः श्रुतिदुष्टादयो

व्यङ्ग्ये वाच्यध्वनिर्बुधैः कथितः' इति वदता स्वयमेव स्वीकृतेत्यर्थः । तस्मादुक्तदोषसत्त्वेऽपि काव्यत्वस्वीकाराल्लक्षणदोषः दोषाभावघटितनिरुक्तकाव्यलक्षणदोषः । [3]ननु विधेयाविमर्शदोषस्तावदांशिकस्तेन सर्वं काव्यं न दुष्टं निर्दोषस्यैव गुणालंकारसद्भावे काव्यत्वमित्यभिप्रायेणाशङ्कते—**नन्विति** । अत्र 'न्यक्कारः—' इत्यादिवाक्ये सर्वोऽपीति समुदायोऽपीत्यर्थः । **यत्र ध्वनिरिति** । '[4]अरयः' इति बहुवचने 'अत्रैव' इति सर्वनाम्नि 'निहन्ति' इति तिङि 'अहो' इत्यव्यये 'ग्रामटिका' इति करूपतद्धिते 'विलुण्ठन' इत्युपसर्गे 'भुजैः' इति बहुवचने च यथायथं ध्वनिर्वेदितव्यः । अंशाभ्यां दुष्टादुष्टभागाभ्यामुभयतः काव्यत्वाकाव्यत्वाभ्यामाकृष्यमाणं व्यावर्त्यमानमिदं 'न्यक्कारः—' इत्यादिवाक्यं किमपि एकतरत् । अत्रापदा ईर्ष्यया वा उद्दीपितं 'जीवत्यहो रावणः—' इत्यादिना व्यज्यमानेन स्वानौजस्यरूपदैन्येनानुभावेन संवलितं स्वावमाननं निर्वेदाख्यभावरूपोऽसंलक्ष्यक्रमव्यङ्ग्यो ध्वनिः । वक्ष्यमाणाः पदांशव्यङ्ग्यास्तस्यैव परिपोषका इत्यवधेयम् । [5]नन्वदोषाविष्यनेनांशिकदोषातिरिक्तदोषाभाववन्ताविति विवक्षणीयमित्यत आह—**न चेति** । [6]श्रुतिकट्वादय इत्यादिपदा-

दकैश्च शब्दैः । रावण इति तु पदं लोकान्तरावयतीत्यर्थं जहदजहत्स्वार्थान्तरे संक्रमितम् । 'धिग्धिक्कच्छकजितं—' इत्यादौ धिग्धिगिति वीप्सायाः, शक्रं जितवानित्याख्यायिकेयमित्युपपदसमासेन सहकृतः स्वर्गेत्यादिसमासस्य स्वपौरुषानुस्मरणं प्रति 'ग्रामटिका' इत्यत्र 'अल्पे' इति सूत्रविहितस्य करूपतद्धितस्यावहुमानास्पदत्वम् । वृथेत्यव्ययस्य स्वात्मपौरुषनिन्दां प्रति व्यञ्जकत्वम् । एवं व्यञ्जकभूयस्त्वे च घटमाने काव्यस्य सर्वातिशायिनी बन्धच्छाया समुन्मीलति । यत्र हि व्यङ्ग्यावभासिनः पदस्यैकस्यैव तावदाविर्भावस्तत्रापि काव्ये कापि बन्धच्छाया, किमुत यत्र तेषां बहूनां समवाय इति ग्रन्थकाराशयः ॥

1. **न चेत्यादि** । यदि सर्वत्र दोषः काव्यस्य सर्वमेवांशं दूषयन्नकाव्यत्वमेवोत्पादयेत्तर्हि 'तुरङ्गकान्तामुखहव्यवाहज्वालेव' इत्यत्र वडवाग्निज्वालारूपस्यार्थस्य वि-

१. 'दूषयन्ति' ग. २. 'लक्षणस्य निरुक्तकाव्यलक्षणस्य दोष इतरेतरभेदानुमानेऽसाधकत्वप्रयोजिका' इति मुद्रितपुस्तके पाठः. ३. मुद्रितपुस्तके तु 'यद्यपि निरुक्तध्वनेः समुदायवाक्यार्थव्यङ्ग्यत्वेनांशिकत्वं न संभवति, तथापि ध्वनिप्रकरणे वक्ष्यमाणानां तत्परिपोषकाणां पदांशध्वनीनामांशिकत्वाभिप्रायेणेदम् । नन्वयमेव न्यक्कार इति न्यक्कारस्य विधेयत्वं विवक्षितं तच्च शब्दरचनावैपरीत्येन वाक्यदोष इति वक्ष्यमाणानुसरणेनाविमर्शविधेयान्तरस्य वाक्यदोषस्यात्र सत्त्वाद्यत्रांशे दोष इत्यसंगतमिति चेत् । न । वाक्यसमुदायस्यास्य एकवाक्यस्य दुष्टत्वेऽपि निर्दोषवाक्यान्तरसंभवात् ।' इति पाठोऽस्ति. ४. 'अरयः' इति—' इत्यादिः 'ध्वनिर्वेदितव्यः' इत्यन्तः पाठः पुस्तकान्तरे नास्ति. ५. 'काव्यत्वव्यवस्थापनव्यग्रधीराह—' इति मुद्रितपुस्तकपाठः. ६. 'श्रुतिकट्वादयः' इति पुस्तकान्तरे नास्ति.

दोषाः, किं[1] तर्हि सर्वमेव काव्यम् । तथाहि—काव्यात्मभूतस्य रसस्यानपकर्षकत्वे तेषां दोषत्वमपि [1]नाङ्गीक्रियते । अन्यथा नित्यदोषानित्यदोषत्वव्यवस्थापि न स्यात् । [2]यदुक्तं ध्वनिकृता—

'[2]श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः ।
ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः ॥' इति ।

द्विधेयाविमर्शादेः परिग्रहः[3]। यद्येवं तर्हि किं दूषयन्तो दोषाः स्युरत्राह—**सर्वमिति**। परम्परया रसदूषकत्वेनैव तेषां सर्वदूषकत्वमव्याहतमेवेत्यभिप्रायः । श्रुतिकष्टादीनां परम्परया रसदूषकत्वमङ्गीकारयन्नांशिकत्वाभावमुपपादयति—**तथाहीति** । अनपकर्षकत्वे अनपकर्षकत्वाङ्गीकारे । तेषां श्रुतिकष्टादीनाम् । नाङ्गीक्रियते 'युष्माभिः' इति शेषः । 'रसापकर्षकाः दोषाः' इति दोषसामान्यलक्षणायोगादिति भावः । अत्रेष्टापत्तौ दोषमाह— **अन्यथेति** । विपरीतमताङ्गीकारे इत्यर्थः । अत्रेष्टापत्तौ प्राचीनमतविरोधं दर्शयति—**यदुक्तमिति** । **अनित्या इति** । तेषां क्वचिद्दोषत्वात् क्वचिद्गुणत्वाच्चानित्यदोषत्वं तच्च दोषपरिच्छेदे व्यक्तीभविष्यति ध्वनिर्व्यञ्जकः शब्दो

प्रकृष्टतया भानात्क्लिष्टाख्यार्थदोषापत्तिः । एवं चात्र काव्यत्वं न स्यात् । परं समुद्रान्तर्लीनायां वडवानलज्वालायां कदाचित्संभाव्यमानस्य मध्योल्लसनस्य पुरि दर्शनाभेदाध्यवसायेनास्या ज्वालात्वोत्प्रेक्षणात्को नामास्य काव्यत्वं निवारयितुमीष्टे ॥

1. **नाङ्गीक्रियत इति** । क्वचिद्रसे भासमानेऽपि दोषत्वमङ्गीक्रियत एव । यथा भगवद्भर्तृहरिसंकलितवैराग्यशतकस्य 'अहौ वा हारे वा कुसुमशयने वा दृषदि वा—' इति श्लोके मिथ्यात्वेन परिभाव्यमानं जगदालम्बनम्, तपोवनादिकमुद्दीपनम्, सर्पहाराद्योः समदर्शनमनुभावः, मतिधृतिहर्षा व्यभिचारिभावाः, निर्वेदः स्थायिभावः, एवं शान्तरसनिष्पत्तौ सत्यामपि 'क्वचित्पुण्यारण्ये' इति यदभिहितं तद्विकल्पप्रतिपादकमभेदवासनाविरुद्धमनुचितमवभासते । धारारूढसर्वसाम्यविगलितभेदाभिमानग्रन्थेर्हि सर्वत्र सर्वं शिवमयं पश्यतस्तपोवने नगरावस्करकूटे च विमलात्मलाभतृप्ततया समानदृशः क्वचित्पुण्यारण्यादिवचनमनुचितोच्चारणमेव ॥

2. **श्रुतीति** । श्रुतिदुष्टा अर्थदुष्टा वाक्यार्थबलादश्लीलार्थप्रतिपत्तिकारिणः । यथा—'छिद्रान्वेषी महान्स्तब्धोघातायैवोपसर्पति ।' कल्पनादुष्टा तु द्वयोः पदयोः कल्पना ।

---

१. 'अपि तु' ग. २. 'उक्तं हि' ग. ३. 'सर्वदूषकत्वेनैव तेषां दोषत्वमित्यभिप्रायः । अपसिद्धान्तविलसितमिदमनादृत्य सोल्लुण्ठनं पृच्छति—किं तर्हीति । तदा किमुपपन्नमित्यर्थः । उत्तरमाह—सर्वमिति । न्यक्कार इत्यादिवाक्यं निर्दोषत्वात्सर्वमेव काव्यं वृत्तं नत्वेकदेश इति । एतन्मतं दूषयति—तथाहीति । तथा सतीत्यर्थः । यद्वा वादिनो मतं दूषयितुं तद्भावार्थं विवृणोति—किं तर्हीति । किमिति प्रश्ने । तर्हि दुःश्रवत्वादीनां प्रादेशिकत्वेन दोषत्वानङ्गीकारे सर्वं काव्यं दूषयन्तः श्रुतिकष्टादयो दोषा इत्यर्थः । 'अप्रतिषिद्धं परवचनं संमतम् ।' इति न्यायेनास्सिद्धार्थे वादिनः संमतिमुन्नीय तन्मतं दूषयति—तथाहीति । काव्यात्मभूतस्येति तेषां श्रुतिकष्टादीनाम् । नाङ्गीक्रियते 'भवता' इति शेषः । रसव्यञ्जकशब्दार्थसमुदायस्य काव्यत्वमवश्यं वाच्यं श्रुतिकष्टादीनां शब्दमात्रदूषकत्वेन रसव्यञ्जकशब्दार्थसमुदायादूषकत्वमित्यभिप्रायः ।' इत्यधिकं मुद्रितपुस्तके.

किंचैवं काव्यं प्रविरलविषयं निर्विषयं वा स्यात्, सर्वथा निर्दोषस्यैकान्तमसंभवात्।

[1]नन्वीषदर्थे नञः प्रयोग इति चेत्तर्हि 'ईषद्दोषौ शब्दार्थौ काव्यम्' इत्युक्ते निर्दोषयोः काव्यत्वं न स्यात्। सति संभवे 'ईषद्दोषौ' इति चेत्, एतदपि काव्यलक्षणेऽवाच्यम्[2]। रत्नादिलक्षणे कीटानुवेधादिपरिहारवत् नहि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशाः

व्यज्यमानो वार्थ आत्मा शरीरं यस्य तस्मिन् शृङ्गारे एव ते हेया वर्जनीया इत्यन्वयः। एवं च [3]श्रुतिकटुत्वादीनां शृङ्गारमात्रे व्यङ्ग्ये दोषत्वं न तु कोपादिमिश्रिते शृङ्गारे। तत्र दुःश्रवत्वादेर्गुणत्वादिति। [4]ननु सदोषवाक्यानां ध्वनिसत्त्वेऽपि काव्यत्वं नाङ्गीकरणीयमिति कथमुक्तकाव्यात्स्यवसर इत्यत आह—**किंचेति**। [5]एवं सदोषवाक्यानां ध्वनिसत्त्वेऽपि काव्यत्वानङ्गीकारे भवदुक्तकाव्यलक्षणं प्रविरलविषयं स्वल्पलक्ष्यम्। अत्रेष्टापत्तावाह—**निर्विषयमिति**। निर्लक्ष्यमित्यर्थः। [6]**एकान्तमिति**। अत्यन्तमित्यर्थः। [7]काव्यमात्रे यस्य कस्यापि दोषस्य सद्भावादिति भावः। ननु यदि सर्वत्रैव दोषः संभवति तदा ईषद्दोषौ शब्दार्थौ काव्यमिति विवक्षणीयमित्यभिप्रायेण शङ्कते—**नन्वीषदर्थे नञ इति**। 'अदोषावित्यत्र'इत्यादौ पूरणीयम्। यदि निपुणतरकविना निर्दोषं काव्यं रचयितुं शक्यते तदा तत्राति[8]व्याप्तिं दर्शयंस्तदूषयति—**तर्हीति**। नञ ईषदर्थत्वस्वीकारे इत्यर्थः। **सति संभवे इति**। दोषस्येत्यादि। एवं च सदोषाणां मध्ये ईषद्दोषावेव शब्दार्थौ काव्यमित्यर्थकरणे बलवद्दोषरहितत्वं फलितम्। [9]तदूषयति—**एतदपीति**। बलवद्दोषरहितत्वमपीत्यर्थः। रत्नादीत्यादिपदेन सुवर्णादिग्रहणम्। कीटानुवेधादीत्यादिपदेन मलिनत्वादिपरिग्रहः। परिहारो रहितत्वम्। दृष्टान्तं विवृण्वन्प्रकृतमुपपादयति—**नहीति**। रत्नस्य रत्नादे रत्नत्वं

यथा—'ववुरिन्दीवरश्रेणिवान्धवाः—' इत्यादौ। श्रुतिकटुस्तु—'अधाक्षीत्, अताप्सीत्, अजर्घट्ट्' इत्यादि। 'शृङ्गार' इत्युचितरसोपलक्षणार्थम्। वीरशान्ताद्भुतादावपि तेषां वर्जनात्॥

1. **नन्वित्यादि**। आहोपुरुषिकामात्रमिदम्। दोषाभावसत्तायां तु काव्यता निर्वाधैवेति सदोषेऽतिप्रसक्तिवारणाय 'अदोषौ' इत्यभिहितम्। तत्र दोषात्यन्ताभावस्य दुरुपपादत्वात्काव्यत्वोपमर्दका ये प्रबलतरा दोषास्तद्रहितौ शब्दार्थौ काव्यमित्यर्थोऽल्पार्थकनञ्स्वारस्याल्लभ्यते। एवं च क्वचिदनित्यदोषसत्त्वेऽपि काव्यत्वमव्याहतमेवेत्यर्थात्सिद्धम्। अत एव 'निःशेषच्युतचन्दनं स्तनतटं—' इत्यादौ विधेयाविमर्शदोषसत्त्वेऽपि ध्वनिका-

---

१. 'दुःश्रवत्वादीनाम्' इति मुद्रितपुस्तकपाठः. २. 'नन्वदोषावित्यनेन दोषरहितावेव शब्दार्थौ लक्ष्यावित्यत आह—इति पुस्तकान्तरे पाठः. ३. 'न वाच्यम्' घ. 'काव्यलक्षणं कीटानुवेधपरिहारवत्' क. ४. 'वेधे' ख. ५. 'एवं काव्यलक्षणेऽदोषत्वविशेषणसत्वे काव्यत्वं प्रविरलविषयं स्वल्पविषयम्' इति पुस्तकान्तरे पाठः. ६. 'निर्लक्ष्यमित्यर्थः' इति क्वचिन्नास्ति. ७. 'काव्य—' इत्यादिः 'भावः' इत्यन्तः पाठो मुद्रितपुस्तके नास्ति. ८. 'आह' इति मुद्रितपुस्तकपाठः. ९. 'बलवद्दोषरहितावित्यर्थः। संपद्यते' इति मुद्रितपुस्तकपाठः. १०. 'एतत्' इति मुद्रितपुस्तकपाठः.

किंतूपादेयतारतम्यमेव कर्तुम्, [1]तद्वदत्र श्रुतिदुष्टादयोऽपि काव्यस्य । उक्तं च—

'कीटानुविद्धरत्नादिसाधारण्येन काव्यता ।
दुष्टेष्वपि मता [2]यैत्र रसाद्यनुगमः स्फुटः ॥' [3]इति ।

रत्नादित्वं व्याहन्तुं व्यावर्तयितुम् । सव्यापकाभावप्रतियोगीकर्तुमिति यावत् । ईशाः समर्थाः । उपादेयतारतम्यमुत्कृष्टाद्वैलक्षण्यम् । अपकर्षमिति यावत् । 'कर्तुम्' इति 'ईशाः' इत्यनेनान्वितम् । अत्रापि काव्ये वर्तमाना अपि काव्यस्य काव्यत्वं व्याहन्तुं नेशाः, किंतूपादेयतारतम्यमेव कर्तुमित्यनेनान्वयः । साधारण्येन सामान्येन । [4]ननु 'कन्ये कामयमानं मां न त्वं कामयसे कथम्' इत्यादेरपि काव्यत्वं स्यादित्यत आह—**यत्रेति** । रसाद्यनुगमो रसाद्युपलम्भः स्फुटः बलवद्दोषजन्यवैरस्यातिशयानभिभूतः । तथा च उक्तस्थले ग्राम्यत्वादिरूपबलवद्दोषजन्यवैरस्यातिशयग्रस्तत्वादसोपलम्भस्य न काव्यत्वमिति भावः । 'अन्यत्र' इति पाठे अदुष्टेष्वित्यर्थः । रसाद्यनुगमो रसाद्युपलम्भः । **स्फुट इति** । दुष्टेषु यथा दोषोपलब्धिजन्यदुःखसंवलितस्तथा नेत्यर्थः । तथा चोक्ताव्याप्तिरवस्थ्यमेवात्र दोष इति भावः । केचित्तु 'अदोषौ' इति च्युतसंस्कृत्य भवन्मतयोगक्लिष्टत्वादयो ये शाब्दबोधविघटका दोषास्तत्सामान्याभाववन्ताविल्यर्थः । एते रसबोधप्रतिबन्धकाः । दोषान्तरं तु काव्यापकर्षकम्' इत्याहुः । तन्न । व्यतिरेकध्वनेरुदाहरणे 'धन्यासि या कथयसि प्रियसंगमेऽपि विश्रब्धचाटुकशतानि रतान्तरेषु । नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामि ॥' इत्यत्र 'शपामि' इति च्युतसंस्कृतिदोषसत्त्वात् 'निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।' इत्यादावञ्जनस्यात्यन्तासत्त्ववोधाभिप्रायेण प्रयुक्तस्य 'दूरं' इत्यस्य समासे गुणीभूतेन नञर्थेन सहान्वयेनाभवन्मतयोगत्वदोषसत्त्वाच्चाव्याप्तेः । अध्याहार्यक्रियान्वयेन तदुपपत्तावप्यभिमतान्वयाभावेन तद्दोषतादवस्थ्यात् । [5]काव्यप्रकाशकारेणैवानयोरुत्तमकाव्यत्वस्वीकारात् । 'अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता ॥ नादृष्टेन न दृष्टेन भवता लभ्यते सुखम् ॥' इत्यस्फुटाख्यगुणीभूतव्यङ्ग्योदाहरणे पूर्वार्धे भवच्छब्दार्थान्वयासंभवरूपाभवन्मतयोगसत्त्वाच्चाव्याप्तेः । 'नादृष्टे च न दृष्टे च भवति प्राप्यते सुखम्' इति पाठो युक्तः । नन्वदोषाविति काव्यप्रशंसार्थमुक्तं न तु तल्लक्षणघटकमिति कथमुक्ताव्याप्त्यवसर इत्यतो

व्यता जागरूकैव । नहीषद्दोषाविल्यनेन निर्दोषयोः काव्यत्वं व्यवच्छिद्यते सदोषयोर्वा लभ्यत इति केनापि सचेतसावधारयितुं पार्यते । निर्दोषयोः स्वतः काव्यत्वे सदोषयोर्लक्षणघटकासंभवत्वे कुत्रचिदीषद्दोषयोरेव तथात्वेन क्रोडीकरणात् ।

---

१. 'तथात्र' ख. २. 'अन्यत्र' ख. ३. 'इति' ग-पुस्तके नास्ति. ४. 'ननु कन्ये' इत्यादिः 'अदुष्टेष्वित्यर्थः' इत्यन्तः पाठः पुस्तकान्तरे नोपलभ्यते. ५. 'धन्यासि या कथयसीत्यादौ' इति मुद्रितपुस्तकपाठः. ६. 'काव्यप्रकाश—' इत्यारभ्य 'पाठो युक्तः' इत्यन्तं पुस्तकान्तरे नास्ति.

किंच शब्दार्थयोः [1]सगुणत्वविशेषणमनुपपन्नम् । गुणानां रसै-कधर्मत्वस्य[1] 'ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मन' इत्यादिना तेनैव प्रतिपादितत्वात् । रसाभिव्यञ्जकत्वेनोपचारत उपपद्यत इति चेत्, तथाप्ययुक्तम् । तथाहि—तयोः काव्यस्वरूपेणाभिमतयोः शब्दार्थयो रसोऽस्ति, न वा । नास्ति चेत्, गुणवत्त्वमपि नास्ति । गु-

दोषान्तरमाह—**किंचेति** । तेनैव 'तददोषौ–' इति लक्षणकृतैव रसाभिव्यञ्जकत्वेन स्वाश्रयरसाभिव्यञ्जकत्वेन । उपचारतः परम्परासंबन्धेन । [2]केचित्तु 'इदं च ग्रन्थकृतारोपबीजानवधानादेवोक्तम् । तथाहि—परम्परासंबन्धघटकस्य मध्यभूतसंबन्धिनो बहिरिन्द्रियप्रत्यक्षे सत्येव नैवमारोपः यत्र तु परम्पराघटकमध्यभूतसंबन्धी न बहिरिन्द्रियप्रत्यक्षस्तत्र त्वेवमारोपो दृश्यत एव । यथा—'शीतो वायुः, उष्णं जलम्, सुगन्धिर्वायुः' इत्यत्र परम्परासंबन्धघटकानां मध्यभूतजलाग्निपुष्पावयवानां सूक्ष्मत्वेनाप्रत्यक्षत्वात्तादृशारोपः । प्रकृते तु बहिरिन्द्रियप्रत्यक्षस्य रसादेः परम्परासंबन्धघटकत्वान्न संभवत्येव गुणत्वारोपः शब्दार्थयोरिति । अत एवैवं शब्दत्ववत्तारत्ववदाकाशमिति नारोपः । तत्र परम्परासंबन्धघटकस्य शब्दस्य बहिरिन्द्रियप्रत्यक्षत्वात् । न चैवं 'ज्ञानत्ववानात्मा' इत्यारोपापत्तिः तत्र परम्पराघटकस्य मध्यभूतस्य ज्ञानस्य बहिरिन्द्रियाप्रत्यक्षत्वादिति वाच्यम् । यदि च तादृशारोपो नास्ति तदा कारणान्तराभावस्यैव तत्र कल्पनीयत्वात् । अत एवोदयनाचार्येणोक्तम्–'अरोपे सति निमित्तानुसरणं नतु निमित्तमस्तीत्यारोपः' । यत्तु जवाकुसुमस्य बहिरिन्द्रियप्रत्यक्षत्वेऽपि लोहितः स्फटिक इत्यारोपस्तत्र जवाकुसुमं नेदृशपरम्पराघटकं जवाकुसुमस्य स्फाटिकावृत्तित्वात् । किंतु जवाकुसुमस्य स्वच्छद्रव्यसान्निध्यमेव तद्रहितं पृथगेवारोपनिमित्तमिति सुधीभिरवधेयम्' इत्याहुः । तन्न । स्थूलजलसंयोगेन शीतो वायुः,अर्कोपलसंयोगेन उष्णं जलमित्यादौ स्थूलजलार्कोपलसंयोगघटितयोः परस्परयोर्मध्यपदार्थयोः स्थूलजलार्कोपलयोर्बहिरिन्द्रियप्रत्यक्षत्वेऽपि विशिष्टधीनियामकत्वेन संबन्धत्वाङ्गीकारात् । चिदानन्दचमत्कारमयस्य रसस्य बहिरिन्द्रियप्रत्यक्षाविषयत्वेन तद्घटितपरम्परायाः संबन्धत्वाङ्गीकारे बाधाभावाच्च । वस्तुतस्तु यत्र परम्परया विशिष्टधीनियामकत्वं तत्रैव तस्याः संबन्धत्वं कल्प्यते । यत्र तु विशिष्टधीनियामकत्वं तत्र तु संबन्धत्वं न कल्प्यत एव । तेन 'ज्ञानत्ववानात्मा' इत्यादौ स्वसमवायिसमवायस्य न संबन्धत्वमिति । **रसोऽस्तीति** । रसोऽवश्यमस्तीत्यर्थः । **गुणवत्त्वमपि नास्तीति** ।

1. **सगुणत्वमिति** । अत्रेदमाकूतम्—निर्गुणेऽतिव्याप्तिवारणाय सगुणावित्युक्तम् । गुणानां रसैकनिष्ठत्वेऽपि परम्परया तदभिव्यञ्जकशब्दार्थनिष्ठत्वमिति भावः । अत एवाष्टमोल्लासे 'गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता' इत्यभिहितम् । तथा सत्येव मधुरः शब्दः मधुरोऽर्थ इत्यादिव्यवहारः संगच्छते ॥

---

१. 'रसैकधर्मत्वात्' ख. २. 'केचित्तु–' इत्यादिः 'स्वसमवायिसमवायस्य न संबन्धत्वमिति' इत्यन्तः पाठः पुस्तकान्तरे न दृश्यते.

णानां तदन्वयव्यतिरेकानुविधायित्वात् । अस्ति चेत्, कथं नोक्तं रसवन्ताविति विशेषणम् । गुणवत्त्वान्यथानुपपत्त्यैतल्लभ्यत इति चेत्, तर्हि सरसावित्येव वक्तुं युक्तम्, न सगुणाविति । नहि प्राणिमन्तो देशा इति वक्तव्ये शौर्यादिमन्तो देशा इति केनाप्युच्यते । ननु 'शब्दार्थौ सगुणौ' इत्यनेन गुणाभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्यावित्यभिप्राय इति चेत्, न । गुणाभिव्यञ्जकशब्दार्थवत्त्वस्य काव्ये उत्कर्षमात्राधायकत्वम्, न तु स्वरूपाधायकत्वम् । उक्तं हि—काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्[1], दोषाः काणत्वादिवत्[2], रीतयोऽवयवसंस्थानविशेषवत्, अलंकाराः कटककुण्डलादिवत्, इति । एतेन 'अनलंकृती पुनः क्वापि' इति यदुक्तम्, तदपि परास्तम् । अस्यार्थः[3]—

तथा च भवदुक्ते 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्' इति तृतीयकाव्यप्रकारेऽव्याप्तिः । नन्वत्रालंकारसत्त्वेनैव काव्यत्वमिति चेत्तर्हि 'सालंकारौ' इत्येव वक्तुं युक्तं किमव्याप्तिघटकेन 'सगुणौ' इत्यनेनेति भावः । **तदन्वयेति** । रसान्वयेत्यर्थः । रसे सति गुणस्य रसाभावे सति गुणाभावस्यावश्यं सत्त्वादित्यर्थः । शब्दार्थचित्रयोः काव्यत्वास्वीकारे त्वाह—**अस्ति चेदिति । कथमिति** । ननु रसगुणयोः समनियतत्वादेकतरोक्तौ प्रकृतनिर्वाहो भवतीति को दोष इति चेत्, न । माधुर्यादित्रितयसाधारणस्य गुणत्वस्यैकस्याभावादननुगमस्य संभवात् । 'रसवन्तौ' इत्युक्ते तु भावादिसाधारणस्याखण्डस्यास्वादविषयताविशेषस्य रसत्वस्वीकारान्नानुगम इति भावः । ननु गुणपदेन लक्षणया रसोपस्थितिरित्यभिप्रायेणाह—**गुणवत्त्वेति** । एतच्च शक्यसंबन्धज्ञापनाय । एतल्लभ्यते 'रसवन्तौ' इति विशेषणं लभ्यते । रूढिप्रयोजनाभावाल्लक्षणात्र न संभवतीत्यभिप्रायेण दूषयति—**तर्हीति** । ननु दृष्टान्ते रूढिप्रयोजनाभावाल्लक्षणा न संभवतु । प्रकृते तु काव्ये गुणाभिव्यञ्जकशब्दार्थप्रयोगोपदेश एव प्रयोजनमस्तीति कथं लक्षणाया असंभव इत्यभिप्रायेण शङ्कते—**नन्विति** । न तु स्वरूपाधायकत्वं तद्व्यतिरेकेणापि काव्यत्वसंभवादिति शेषः । तदेवोपपादयति—**उक्तं हीति** । 'शब्दार्थौ' इति सामान्यत एवोक्तं न तु गुणाभिव्यञ्जकशब्दार्थाविति । 'रसादिः' इत्यादिपदेन रसाभासभावतदाभासभावशान्तिभावोदयभावसंधिभावशबलत्वादीनां ग्रहणम् । गुणा वक्ष्यमाणा माधुर्यौजःप्रसादाः । दोषाः श्रुतिदुष्टापुष्टत्वादयः । रीतयो वैदर्भीगौडीपाञ्चालीलाट्याः । अलंकारा अनुप्रासोपमादयः । एतेन वक्ष्यमाणहेतुना यथाश्रुते दूषणं न संभवतीति तदर्थं परिष्करोति—**अस्यार्थ इति** । अत्र भवदुक्तकाव्यलक्षणे सप्तम्यर्थो घटकत्वं भवदुक्त-

---

१. 'शौर्यादय इव' घ. २. 'काणत्वखञ्जत्वादिवत्' क. ३. 'अस्य ह्यर्थः' क-ख. ४. 'यत्र रसो नास्ति तत्राव्याप्तिरिति भावः' इत्येव मुद्रितपुस्तके पाठः. 'भवदुक्ते—' इत्यादिः 'भावः' इत्यन्तः पाठस्तु तत्र टिप्पणीभूतो दृश्यते. ५. 'तु' इति मुद्रितपुस्तके नास्ति.

सर्वत्र सालंकारौ क्वचित्त्वस्फुटालंकारावपि शब्दार्थौ काव्यमिति । तत्र सालंकारशब्दार्थयोरपि काव्ये उत्कर्षमात्राधायकत्वात् । एतेन 'वक्रोक्तिः काव्यजीवितम्' इति वक्रोक्तिजीवितकारोक्तमपि परास्तम् । वक्रोक्तेरलंकाररूपत्वात् । यत्तु क्वचिदस्फुटालंकारत्वे उदाहृतम्—

'यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥' इति ।

काव्यलक्षणघटकयोः सालंकारशब्दार्थयोः उत्कर्षाधायकत्वात् उत्कर्षमात्राधायकत्वान्न स्वरूपाधायकत्वमित्यर्थः । एतेन उक्तहेतुना वक्रोक्तिः विचित्रा उक्तिर्वक्रोक्तिः । वैचित्र्यमलंकार इति सामान्यलक्षणमित्यभिप्रायः । **यः कौमारहर इति** । रेवातीरे वेतसीतले कृतक्रीडायास्तत्क्रीडास्थानं प्रत्युत्सुकतावर्णनमिदम् । विवाहेन कौमारं अनूढात्वं हरत्यपनयतीति कौमारहरः वरोऽभिमतः । एतेन श्रीमतः सुरतचतुरस्य पत्युः सत्त्वं प्रतिपादितम् । तदुक्तम्—'श्रीमान्सुरतदक्षश्च योषितां संमतः पुमान्' इति । एकार्थयोः 'एव हि'शब्दयोरुपादानमुपपतेरत्यन्तासंभवित्वसूचनाय । एतेनोपपत्यसंनिधानस्य खोत्कण्ठाकारणत्वं वारितम् । अत्रापि तत्तद्रतिकारणमस्तीत्याह— **ता एवेति** । यासु तत्र क्रीडनं कृतं तत्सजातीया एवेत्यर्थः । मालती वासन्तिकी जातिः । प्रशस्तमूढं गमनं येषां ते प्रौढाः । 'अनुकूलो वहन्वायुः—' इत्यादौ 'वह'धातोर्गमनार्थता प्रसिद्धा । वायुगमनस्य प्राशस्त्यमत्र मान्द्यम् । प्रौढवायोः स्मरोद्दीपकत्वाभावाद्यथाश्रुतार्थत्यागः । अथवा यथा—'महापण्डितः सत्कविः' इत्यादौ महत्त्वसत्त्वादिकं पाण्डित्यकवित्वादावन्वेति, तथात्र प्रौढत्वं सौरभेऽन्वेति,तच्चोत्कटत्वम् । यद्वा 'प्रौढाः' इति सखीनां संबोधनम् । सुरतचतुरा इति तदर्थः । कदम्बानिलाः धूलीकदम्बवायवः । चैत्रे तस्यैव संभवात् । केचित्तु—'कदम्बानिलाः कदम्बवनानिलाः, वनानिलानां प्रौढत्वे वनबहिर्भूतानां मान्द्योपलम्भादुद्दीपकत्वेनाह–'प्रौढाः' इति व्याचक्षुः, तन्न । तथात्वे कदम्बपर्यन्तानुधावनस्य निष्प्रयोजनत्वात् 'अरण्यानिलाः' इत्यनेनैव तदर्थलाभात् । न च मालतीसंबन्धेनैव अनिलानां सौगन्ध्यलाभात्कदम्बसंबन्धदर्शनं व्यर्थमिति वाच्यम्, विलक्षणसौगन्ध्यलाभाय तस्य सार्थकत्वात् । यथा—'रमणीकमनीयकपोलतले परिपीतपटीररसैरलसः । अयमञ्चति पञ्चशरानुचरो नवनीपवनीधुवनः पवनः ॥' नवेति नवपुष्पितेत्यर्थः । अत्र चन्दनसंबन्धेन सौगन्ध्यलाभेऽपि विलक्षणसौगन्ध्यलाभाय कदम्बसंबन्धदर्शनम् । सा चैव तदवस्थैव । तथापि तादृशसुरतसामग्रीसत्त्वेऽपि । सुरतव्यापारलीलाविधौ सुरतव्यापारलीलाविधाननिमित्तम् । विभावनाविशेषोक्तिमूलस्य विभावनाविशेषोक्तिनिरूपितस्य

१. 'कारमत ख. २. 'यच्च' क-ख. ३. 'अपि' इत्यधिकः पाठः ख-पुस्तके. ४. 'वक्रा–' इत्यादिः –प्रायः' इत्यन्तः पाठः पुस्तकान्तरे नास्ति.

[1]एतच्चिन्त्यम् । अत्र हि[1] विभावनाविशेषोक्तिमूलस्य संदेहसंकरालंकारस्य स्फुटत्वम् एतेन—

संदेहेन संदेहविषयत्वेन संकरो मेलकः । उत्कण्ठायाः पल्याद्यभावरूपंकारणं विना उत्कण्ठारूपकार्यकथनमितीयं विभावना, किंवा उत्कण्ठाभावस्य कारणसत्त्वे तस्याः कथनमिति विशेषोक्तिरिति संदेहासंदेहसंकरालंकारोऽयम् । विभावनायां कारणविरुद्धसद्भावमुखेन कारणाभावः । विशेषोक्तौ कार्यविरुद्धसद्भावमुखेनैव कार्याभावः प्रतीयते, न त्वभावबोधकनञेति तयोरस्फुटत्वम् । तदुभयकोटिकत्वेन संदेहस्य सुत-

---

1. **एतदिति** । अत्रेदं तत्त्वम्—इह 'हरो वरः—' इत्याद्यनुप्रासस्य स्फुटस्यापि प्रकृतशृङ्गाररसप्रतिकूलवर्णघटितत्वेन नालंकारता । विशेषोक्तिविभावने विद्यमाने अपि न स्फुटे । कथमिति चेत्, इत्थम्—विशेषोक्तिस्तावत्कारणसत्त्वेऽपि कार्याभावकथनम् । अत्र चानुत्कण्ठाकारणं वरोपकरणयोरुपभुक्तता । तत्सत्त्वे यद्यप्यनुत्कण्ठाभाव उत्कण्ठारूपो निर्दिष्ट एव, तथापि नानुत्कण्ठाभावत्वेन, किंतूत्कण्ठात्वेनैव । तस्मादस्फुटत्वमस्याः । यदि चेतोऽनुत्कण्ठितं नेत्यभिधीयेत तदा स्फुटत्वं भवेत् । एवं कारणाभावेऽपि कार्योत्पत्तिकथनं विभावना । तत्र चोत्कण्ठाकारणं वरोपकरणयोरतत्ता । तदभावश्च यद्यप्युक्त एव तथापि नातत्ताविरहत्वेन, किंतु तत्तारूपेणैव । अभावाभावस्य तत्त्वात् । अतोऽस्या अस्फुटत्वमेव । न च स एवेत्येवकारेणातत्त्वाभावप्रतीतेरतत्ताभावत्वेन प्रतीतौ कथमस्फुटत्वमिति वाच्यम् । विशेषणसंगतेनैवकारेण विशेष्ये विशेषणायोगस्य व्यवच्छेदो हि प्रत्याय्यते, न तु विशेषणाभावाभाव एवाहत्य । पर्यवसानं तु तत्रेत्यस्फुटत्वमेव । एवं विशेष्यसंगतेनाप्येवकारेण विशेष्यभिन्ने विशेषणाभाव एव नाहत्य प्रत्याय्यते, किंतु विशेषणयोगा भाव इति द्रष्टव्यम् । अत एव 'शङ्खः पाण्डुर एव' इत्यादौ 'नापाण्डुरः', 'पार्थ एव धनुर्धरः' इत्यादौ च 'नान्यो धनुर्धरः' इत्यादिः कदाचित्स्फुटत्वार्थं प्रयुज्यते । दण्ड्यप्याह—'त्वन्मुखं त्वन्मुखेनैव तुल्यं नान्येन केनचित्' इति । अन्यथा पुनरुक्तिस्तत्र स्यादिति । अनयोरस्फुटत्वे च संदेहरूपसंकरोऽप्यनयोरस्फुट इति विभावनीयम् । न चासीति क्रियाया विभक्तिविपरिणामेन सर्वत्र वरादावन्वयेन क्रियादीपकमेव स्फुटमिति वाच्यम् । अस्मीत्यहमर्थकाव्ययत्वात् क्रियापदत्वेऽपि न दीपकत्वम् । तदन्वयिनां सर्वेषामेव प्राकरणिकत्वात् । दीपकस्य तु प्राकरणिकाप्राकरणिकविषयत्वात्, विभक्तिविपरिणामकल्पनाया एवास्फुटात्मकत्वाच्च । एवकारस्याभेदपरत्वेनेतरनिषेधपरत्वायोगाच्च न परिसंख्या । वरादीनां गुणक्रियायौगपद्याभावान्न समुच्चयः । वरादीनामुपमानोपमेयभावाभावान्न तुल्ययोगिता । सदृशदर्शनाप्रयोज्यत्वाच्च 'स एव हि—' इत्यादेः प्रत्यभिज्ञाशरीरत्वाच्च न स्मरणालंकारः । यतः सुरभयोऽतः प्रौढाः स्वकार्यसमर्था इति काव्यलिङ्गमप्यस्फुटम्, अशाब्दत्वात् । शृङ्गाररूपरसस्य स्फुटत्वाद्रसवदलंकारः स्फुट इति चेत्, न । रसस्यात्र प्राधान्यात् । अप्राधान्य एव तस्यालंकारत्वोपगमात् । एतेन 'अनलंकृती पुनः क्वापि' इति यदुक्तम्, तदपि निर्बाधम् ॥

---

१. 'हि' इति पाठः क-ग-पुस्तकयोर्नास्ति,

'अदोषं गुणवत्काव्यमलंकारैरलंकृतम् ।
रसान्वितं कविः कुर्वन्कीर्तिं प्रीतिं च विन्दति ॥'

इत्यादीनामपि काव्यलक्षणत्वमपास्तम्[1] । यत्तु ध्वनिकारेणोक्तम्—'काव्यस्यात्मा[1] ध्वनिः—' इति, तत्किं वस्त्वलंकाररसादिलक्षणस्त्रिरूपो ध्वनिः काव्यस्यात्मा । उत रसादिरूपमात्रो वा । नाद्यः[2] । प्रहेलिकादावतिव्याप्तेः । द्वितीयश्चेदोमिति ब्रूमः । ननु यदि रसादिरूपमात्रो[3] ध्वनिः काव्यस्यात्मा, तदा—

रामस्फुटत्वमिति चेत् 'सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले' इत्यत्र रेफानुप्रासस्य स्फुटत्वं प्रतीहि 'रणौ लघू' इत्यनेन तस्य माधुर्यव्यञ्जकत्वमुपपादितम् । तेन च रसोपकारतया तस्यालंकारत्वमव्याहतमेव । 'लघू' इत्यस्य असंयुक्ताविल्यर्थं इति व्याख्यातव्यम् । केचित्तु—'रेवातीरे वेतसीतले कृतसंकेताया नायिकाया गृहे स्वयं परामर्शोऽयम्—यः कौमार इति । स एव हि वरः स वर एव विलक्षणरतिसमर्थ एव । एवं च रसस्य प्रधानत्वान्नालंकारत्वमिति काव्यप्रकाशोक्तौ रसस्य रसाभासस्येत्यर्थः । रतेरुपपतिगोचरत्वेन रसाभासस्यैव संभवात्' इत्याहुः, तन्न । व्यञ्जकाभावादुपपतेरत्रालाभात् । वक्तृवैशिष्ट्यमेवात्र व्यञ्जकमिति चेत्, न । वक्तुस्तादृशवैशिष्ट्ये मानाभावात् । प्रत्युत 'स एव हि वरः' इत्यनेनैवोपपतिरतेरत्यन्तासंभवित्वमुक्तम् । एतेनोक्तदोषसमूहेन । **अदोषमित्यादि** । निर्दोषस्य सगुणालंकारस्य सरसस्य काव्यस्य प्रशंसापरमिति भावः । **यत्त्विति** । त्रिरूपः त्रिप्रकारः । **प्रहेलिकादाविति** । 'तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः । गुरूणां संनिधानेऽपि कः कूजति मुहुर्मुहुः ॥' इत्यादाविल्यर्थः । अत्र किंचिदूनजलकलशरूपं

1. **काव्येति** । 'काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वस्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये । केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम् ॥' इति ध्वनिकारिका । अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः । शेषं नातितिरोहितम् ॥

१ ग-पुस्तके तु पाठक्रम एवं दृश्यते—'एतेन 'वक्रोक्तिः—' इत्यादिः '—रूपत्वात्' इत्यन्तः पाठो नास्ति. ततः 'एतेन 'अदोषं—' इत्यारभ्य '—अपास्तम्' इत्यन्तः पाठो दृश्यते. ततः 'यत्तु—' इत्यारभ्य '—संदेहसंकरालंकारस्य स्फुटत्वम्' इत्यन्तः पाठो वर्तते. पश्चात् 'अत्र यज्जयन्तेनोक्तं विभावनाविशेषोक्त्योः परिपूर्णात्मलक्षणाभावान्न तन्मूलः सदेहसंकर इति । न हि निश्शेषकारणाभावे कार्योत्पत्तौ विभावनायाः पूर्णत्वम्, किंतु प्रसिद्धकतिपयकारणनिषेधेऽपि विभावनायाः पूर्णता स्यात् । नापि निःशेषकारणसामग्र्या कार्यानुत्पत्तौ विशेषोक्तेः पूर्णत्वम्, अपि तु प्रसिद्धकतिपयकारणसामग्र्यां कार्यानुत्पत्तिकथनमात्रेणापि पूर्णता । अन्यथा विभावनाविशेषोक्ती उच्छिद्येताम् । ततश्च उक्तप्रकारेणापि विचित्रोक्तिनिर्वाहादुक्तवैचित्र्यस्यैवालंकारभूमित्वादतः परिपूर्णयोरेव तयोः साधकबाधकप्रमाणाभावात्तन्मूलः स्फुटः संदेहसंकर इति ।' इत्यधिकः पाठो लभ्यते. अन्यत्समानम्. २. 'तत्र नाद्यः' इति मुद्रितपुस्तकपाठः. ३. 'रसादिमात्ररूप एव' इति मुद्रितपुस्तकपाठः.

'अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि ।
मा पहिअ रत्तिअन्धिअ सज्जाए मह णिमज्जहिसि ॥'

इत्यादौ वस्तुमात्रस्य व्यङ्ग्यत्वे कथं काव्यव्यवहार इति चेत्, न[1] । अत्रापि रसाभासवत्त्वेवेति ब्रूमः । अन्यथा 'देवदत्तो ग्रामं याति[2]' इति वाक्ये तद्भृत्यस्य तदनुसरणरूपव्यङ्ग्यावगतेरपि काव्यत्वं स्यात् । अस्त्विति चेत्, न । रसवत एव काव्यत्वाङ्गीकारात् । काव्यस्य प्रयोजनं हि रसास्वादमुखपिण्डदानद्वारा[3] वेदशास्त्रविमुखानां सुकुमारमतीनां राजपुत्रादीनां विनेयानां रामादिवत्प्रवर्तितव्यम्, न रावणादिवदित्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेश इति चिरंतनैरप्युक्तत्वात् । तथा[4] चाग्नेयपुराणेऽप्युक्तम्[5]—'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' इति ।

वस्तु व्यङ्ग्यम् । ओमिति स्वीकरोमि । **अत्ता इत्यादि** । 'श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय । मा पथिक रात्र्यन्ध शय्याया मम निमङ्क्षसि ॥' इति संस्कृतम् । रात्र्यन्धकत्वेन कथितात्मानं पथिकं प्रति स्वयं दूत्या उक्तिरियम् । अत्ता श्वश्रूः । निमज्जति निमग्ना मृतप्राया तिष्ठति । वस्तुमात्रस्य स्वशय्यामात्रप्रवेशरूपवस्तुन एव रतेरुपपतिविषयत्वादत्र शृङ्गाराभासः । वस्तुतस्तु[6] रसाद्यसंकीर्णवस्त्वलंकारध्वनेः काव्यप्रकारमध्ये निर्वचनस्योन्मत्तप्रलपितप्रसङ्गभयेनास्माद्यव्यङ्ग्यमात्रस्य काव्यात्मत्वमवश्यं वाच्यम् । एवं च प्रकृते व्यङ्ग्यवस्तुरचनास्वाद्यतया तेनापि काव्यव्यवहारो भवितुमर्हति । आस्वाद्यत्वं चाह्लादसंवलितप्रतीतिविषयः । अन्यथा वस्तुमात्रस्य व्यङ्ग्यत्वेऽपि काव्यत्वस्वीकारे । नीरसस्य काव्यत्वास्वीकारे हेतुमाह—**काव्यस्य प्रयोजनं हीति** । 'रसास्वादसुखपिण्डदानद्वारा' इति पाठे पिण्डं समूहः । रसास्वादसुखसंतानद्वारेत्यर्थः । मुखेति पवर्गपञ्चमादिपाठे मुखपिण्डं लोभद्रव्यम् । विनेयानां कृत्याकृत्यज्ञापनीयानाम् । तथा च शब्दप्रधानेषु वेदेषु अर्थप्रधानेषु पुराणेतिहासादिषु चायासबहुलेषु विमुखानां सुकुमारमतीनां हि गुणीभूतशब्दार्थेषु रसास्वादप्रधानेषु प्रथमं तावद्रसास्वादमुखोद्देशेन प्रवृत्तिस्ततः काव्यार्थानां कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशपरतावधारणमिति भावः । तदुक्तम्—'खादुकाव्यरसोन्मिश्रवाक्यार्थमुपभुञ्जते । प्रथमालीढमधवः पिबन्ति कटु भेषजम् ॥' इति । वाक्यार्थं काव्यस्य परमतात्पर्यार्थमुपभुञ्जते आस्वादयन्ति । **वाग्वैदग्ध्येति** । वाचो वैदग्ध्यं वैचित्र्यं

---

१. 'न' क-ग-पुस्तकयोर्नास्ति. २. 'गच्छति' क. ३. 'मुख' क-ख-ग. ४. 'द्वारेण' क-ख-ग-घ. ५. 'अप्युक्तम्' क ख-पुस्तकयोर्नास्ति. ग-पुस्तके तु 'तथाचा–' इत्यादिः '–इति' इत्यन्तः पाठ एव नास्ति. ६. मुद्रितपुस्तके तु 'वस्तुतस्तु–' इत्यादेः '–संवलितप्रतीतिविषयः' इत्यन्तस्य पाठस्य स्थाने 'वस्त्वलंकारध्वन्योः काव्यात्मभावेऽपि काव्यप्रभेदकथनप्रकरणे तयोरुपादानं रसादेरुत्कर्षकत्वेन काव्यभेदकत्वादित्यवधेयम्' इति दृश्यते.

व्यक्तिविवेककारेणाप्युक्तम्—'काव्यस्यात्मनि सञ्ज्ञिनि रसादिरूपे न कस्यचिद्विमतिः' इति । ध्वनिकारेणाप्युक्तम्[1]—'नहि कवेरितिवृत्तमात्रनिर्वाहेणात्मपदलाभः । इतिहासादेरेव तत्सिद्धेः' इत्यादि[2]। ननु तर्हि प्रबन्धान्तर्वर्तिनां केषांचिन्नीरसानां पद्यानां[3] काव्यत्वं न स्यादिति चेत्, न । रसवत्पद्यान्तर्गतनीरसपदानामिव[4] पद्यरसेन प्रबन्धरसेनैव तेषां रसवत्ताङ्गीकारात् । यत्तु नीरसेष्वपि गुणाभिव्यञ्जकवर्णसद्भावाद्दोषाभावादलंकारसद्भावाच्च काव्यव्यवहारः स रसादिमत्काव्यबन्धसाम्याद्गौण एव । यत्तु[5] वामनेनोक्तम्—'रीतिरात्मा काव्यस्य' इति, तन्न । रीतेः संघटनाविशेषत्वात् । संघटनायाश्चावयवसंस्थानरूपत्वात्, आत्मनश्च तद्भिन्नत्वात् । यच्च ध्वनिकारेणोक्तम्—

'अर्थः[6] सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः ।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥' इति ।

प्रधानं यत्र तस्मिन् । एवकारेण अलंकारादिव्यवच्छेदः । अत्र काव्ये । जीवितं जीवनाधायकम् । सञ्ज्ञिनि अवश्यंस्थायिनि । विमतिरखरसः । इतिवृत्तं नीरसवाक्यप्रबन्धः । आत्मपदलाभः स्ववाचककाव्यशब्दप्राप्तिः । कविसंबन्धिप्रबन्धत्वेनैव काव्यशब्दप्रयोगो नास्तीति भावः । इतिहासादेर्भारतादेः । आदिना रघुवंशादिपरिग्रहः । तत्सिद्धेः काव्यपदप्राप्तिसिद्धेः । वीरादिरसप्रबन्धानां भारतादीनां सुतरां काव्यसंज्ञालाभ इति भावः । तर्हि रसवत एव काव्यत्वस्वीकारे । पद्यानामिति गद्यानामुपलक्षणम् । 'गद्यं पद्यं च मिश्रं च तत्त्रिधैव व्यवस्थितम्' इत्यनेन गद्यस्यापि काव्यत्वस्वीकारात् । तेषां नीरसपद्यानां व्यञ्जकप्रतिपाद्यप्रतिपादकसंबन्धेन रसवत्त्वमिति भावः । 'यत' इत्यव्ययं 'यः' इत्यर्थे । नीरसेषु 'चन्द्रे शरन्निशोत्तंसे कुन्दस्तबकविभ्रमे । इन्द्रनीलनिभं लक्ष्म संदधात्यलिनः श्रियम् ॥' इत्यादिषु संघटनाविशेषत्वाद्गुणाभिव्यञ्जकशब्दविन्यासरूपत्वात् । ननु रीतेः संघटनाविशेषरूपत्वेऽपि काव्यात्मत्वस्वीकारे को दोष इत्यत आह—**संघटनायाश्चेति** । काव्यशरीरस्य वाक्यस्यावयवाः पदानि तेषां संस्थानं समुचितस्थाने निवेशस्तद्रूपत्वादित्यर्थः । तद्भिन्नत्वादवय-

1. **उक्तमिति** । ध्वन्यालोकस्य तृतीयोद्द्योते 'विभावभावानुभाव—' इत्यादिकारिकाणां व्याख्यानावसरे ॥

2. **अर्थ इति** । शब्दार्थशरीरं तावत्काव्यम् । तत्र शरीरग्रहणादेव केनचिदात्मना तदनुप्राणकेन भाव्यमेव । तत्र शब्दस्तावच्छरीरभाग एव संनिविशते । सर्वजनसंवेद्य-

१. 'पद' क-ख-ग-पुस्तकेषु नास्ति '—निर्वहणेन किंचित्प्रयोजनम् । इतिहासादेव तत्सिद्धेः' इति-ध्वन्यालोकस्थः पाठः. २. 'पद्यानां' क-पुस्तके नास्ति. ३. 'इव' ग-पुस्तके नास्ति. ४. 'यच्च' ग. ५. 'विशेष' इत्यधिकः क-पुस्तके.

अत्र वाच्यात्मत्वं 'काव्यस्यात्मा ध्वनिः—' इति स्ववचनविरोधादेवापास्तम् ।

तत्किंस्वरूपं काव्यमित्युच्यते—

[1]वाक्यं रसात्मकं काव्यं

वसंस्थानभिन्नत्वात् । सहृदयश्लाघ्यः सहृदयानां हृदयंगमः । प्रतीयमानो व्यङ्ग्यः । **तदिति** । उक्तलक्षणस्य दूषितत्वादित्यर्थः । **किमिति**। किंस्वरूपमित्यर्थः । **वाक्य-**

धर्मत्वात्स्थूलकृशादिवत् । अर्थः पुनः सकलजनसंवेद्यो न भवति । न ह्यर्थमात्रेण काव्यव्यपदेशः । लौकिकवैदिकवाक्येषु तदभावात् । तदाह—सहृदयश्लाघ्य इति स एक एवार्थो द्विशाखतया विवेकिभिर्विभागबुद्ध्याभियुज्यते । तथाहि—तुल्येऽर्थरूपत्वे किमिति कस्मैचित्सहृदयः श्लाघते । तद्भवितव्यं केनचिद्विशेषेण । यो विशेषः स प्रतीयमानभागो विवेकिभिर्विशेषहेतुत्वादात्मेति व्यवस्थाप्यते । वाच्यसंकलनाविमोहितहृदयैस्तु तत्पृथग्भावो विप्रतिपद्यते । चार्वाकैरिवात्मपृथग्भावः । अत एवार्थ इत्येकतयोपक्रम्य सहृदयश्लाघ्य इति विशेषणद्वारा हेतुमभिधायापोद्धारणदृशा तस्य द्वौ भेदावंशावित्युक्तम् । ननु द्वावप्यात्मानौ काव्यस्येति ॥

1. **वाक्यमिति** । चिन्त्यमेवैतत्, वस्त्वलंकारप्रधानानां काव्यानामकाव्यत्वापत्तेः । न चेष्टापत्तिः, महाकविसंप्रदायस्याकुलीभावप्रसङ्गात् । लक्ष्यानुसारेण हि लक्षणव्यवस्था, नतु वैपरीत्येन । वर्णितानि च महाकविभिर्जलप्रवाहवेगनिपतनोत्पतनभ्रमणानि, कपिबालादिविलसितानि च । न च तत्रापि यथाकथंचित्परम्परया रसस्पर्शोऽस्त्येवेति वाच्यम् । ईदृशरसस्पर्शस्य 'गौश्चलति', 'मृगो धावति' इत्यादावतिप्रसक्तत्वेनाप्रयोजकत्वात् । एवं च प्रकाशोक्तं काव्यलक्षणमेव ज्यायः । यत्तु रसगङ्गाधरकारेण 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति सूत्रव्याख्याने 'काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोर्व्यासक्तम्, प्रत्येकपर्याप्तं वा । नाद्यः । एको न द्वाविति व्यवहारस्येव श्लोकवाक्यं न काव्यमिति व्यवहारापत्तेः । न द्वितीयः । एकस्मिन्पद्ये काव्यद्वयव्यवहारापत्तेः । तस्माद्वेदशास्त्रपुराणलक्षणस्येव काव्यलक्षणस्यापि शब्दनिष्ठतैवोचिता' इत्युक्तम्, तन्न । आस्वादव्यञ्जकत्वस्योभयत्राप्यविशेषाच्चमत्कारिबोधजनकज्ञानविषयतावच्छेदकधर्मवत्त्वरूपस्यानुपहसनीयकाव्यलक्षणस्य प्रकाशादिनिरूपितलक्ष्यतावच्छेदकस्योभयवृत्तित्वाच्च काव्यं पठितम्, काव्यं श्रुतम्, काव्यं बुद्धमित्युभयविधव्यवहारदर्शनाच्च काव्यपदप्रवृत्तिनिमित्तं व्यासज्यवृत्ति । अत एव वेदत्वादेरुभयवृत्तित्वप्रतिपादकं 'तदधीते तद्वेद' इतिसूत्रस्थं 'किमर्थमुभावप्यर्थौ निर्दिश्येते । न योऽधीते वेत्यप्यसौ । यस्तु वेत्त्यधीतेऽप्यसौ । नेतरयोरावश्यकः समावेशः । भवति ह कश्चित्संपाठं पठति न वेत्ति, तथा कश्चिद्वेत्ति न च संपाठं पठति' इति महाभाष्यं संगच्छते । लक्षणयान्यतरस्मिन्नपि तत्त्वात् 'एको न द्वौ' इतिवन्न तदापत्तिः । केचित्तु—कविकर्म काव्यमिति समाख्यानुरोधाच्छब्द एव काव्यत्वम्, न त्वर्थे । तस्य तत्कृतिसाध्यत्वाभावात् । तस्मात्पदसंदर्भविशेषः काव्यमिति लक्षणं स्वीकुर्वते । तन्न रमणीयम् । तथाहि—आस्वादोद्बोधकत्वमेव काव्यत्वप्रयोजकम्,

रसस्वरूपं निरूपयिष्यामः । रस एवात्मा साररूपतया जीवनाधायको यस्य । तेन विना तस्य काव्यत्वाभावस्य प्रतिपादितत्वात् । 'रस्यते इति रसः' इति व्युत्पत्तियोगाद्भावतदाभासादयोऽपि गृह्यन्ते ।

मिति । रसात्मकं वाक्यं काव्यमित्यन्वयः । ननु को रस इत्यत आह—**रसस्वरूपमिति** । विवृणोति—**रस एवेति** । एवकारेण ध्वनिकाराद्युक्तस्य वाच्यार्थस्य वस्त्वलंकारमात्रव्यङ्ग्यस्य च व्यवच्छेदः । साररूपतया आनन्दसान्द्रत्वेन श्रेष्ठस्वभावतया । जीवनाधायक उपादेयताप्रयोजकः । तेन रसेन । तस्य वाक्यस्य । **प्रतिपादितत्वादिति** । 'देवदत्तो ग्रामं याति' इत्यादिग्रन्थेनेति बोध्यम् । ननु शृङ्गारादिभेदेन नवप्रकारो रसस्तदभावात् 'यस्यालीयत—' इत्यादिवाक्यानां कथं काव्यत्वमत आह—**रस्यत इति** । आस्वाद्यत इत्यर्थः । भावादीनामप्यास्वादविषयत्वमव्याहतमेव । विषयत्वमप्यखण्डमतिरिक्तं बोध्यम् । तेन नाननुगम इति भावः । अत्र—'न्यक्कारो ह्ययमेव—' इत्यादौ विधेयाविमर्शदोषदुष्टतया उद्देश्यविधेयभावबोधकानुपूर्वीविरहेणाकाङ्क्षाविरहाद्वाक्यत्वस्यैवाभावः । काव्यज्ञानं विना रसपदार्थस्य दुर्निरूप्यत्वादन्योन्याश्रयः । रसघटकविभावादीनां काव्यघटितत्वात्' इति दूषणद्वयं कश्चित्पण्डितंमन्य उपन्यस्यति, तदतीव मन्दम् । आनुपूर्वीविशेषरूपाया आकाङ्क्षाया विरहेऽपि श्रोतृजिज्ञासारूपायास्तस्या विद्यमानत्वाद्वाक्यत्वाक्षतेः । तादृशाकाङ्क्षाया एव वाक्यघटकत्वेन ग्रन्थकृतैवाङ्गीकारात् । यद्वा संकीर्तनत्वगर्भितत्वदोषदुष्टयोः पदसमुदाययोरासत्तिकल्पनेन वाक्यत्वं कल्प्यते अन्यथा काव्यदोषत्वमेव न स्यात् । तथात्रापि कल्पितानुपूर्वीयोगादस्य वाक्यत्वाङ्गीकारादखण्डास्वादविशेषविषयत्वरूपस्य भावादिसाधारणस्य रसत्वस्य ग्रन्थकृतैव निरुक्तत्वाच्च । अखण्डास्वादविशेषत्वं चानन्दसंवलितज्ञानविषयत्वमेवात्र भावादिसाधारणं वाच्यम् । न च 'ब्राह्मण, पुत्रस्ते जातः'इत्यादिवाक्ये आनन्दसंवलितज्ञानजनकेऽतिव्याप्तिस्तद्वारणाय काव्यजन्यत्वं विशेषणमुपादेयं तथा सति अन्योन्याश्रयदोष इति वाच्यम् । अत्र हि शाब्दबोधानन्तरमेवानन्दो जायते । तयोः पौर्वापर्यक्रमस्थितोऽपि काललाघवादुत्पलपत्रशतव्यतिभेदनवत्स न गृह्यते । काव्ये तु शाब्दबोधानन्तरमलौकिकास्वादनाख्यव्यापारादिबलादेकमेवानन्दसंवलितमलौकिकं ज्ञानम् । तदेवास्माभी रसपदेनोच्यत इति । आनन्दसंवलितत्वमिह तादात्म्यसंबन्धेनानन्दविशिष्टत्वम्, न तु जनकतासंबन्धेन । विजातीययोर्ज्ञानानन्दयोस्तादात्म्याङ्गीकारोऽलौकिके न दोष इति सर्वमवदातम् । **तदाभासेति** । रसा-

---

तच्च शब्देऽर्थे चाविशिष्टम् । तत्रापि रसोद्बोधकत्वाङ्गीकारात् । अर्थेऽपि दृश्यकाव्ये इव काव्यत्वम् । कविकर्मत्वव्यवहारस्तु तत्प्रकाश्यत्वाद्भाक्त एव । शब्दनित्यत्ववादिमते शब्दरूपेऽपि काव्ये कविकर्मत्वव्यवहारो भाक्तः । अत एव 'शब्ददर्दुरं करोति' इति पाणिनिसूत्रं संगच्छते । अन्यथा स्वसिद्धान्तो व्याकुप्येतेति सर्वमनवद्यम् ॥

---

१. 'स्वरूपतया' क-ग. २. 'काव्यत्वानङ्गीकारात्' घ. ३. 'भावतदाभासाः' ग. ४. 'अपि' क-ख-पुस्तकयोर्नास्ति. ५. 'उच्यन्ते' ग. ६. 'अत्र—' इत्यादिः '—सर्वमवदातम्' इत्यन्तो ग्रन्थः पुस्तकान्तरे नोपलभ्यते.

तत्र रसो यथा—

'शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनै-
निंद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥'

अत्र हि[1] संभोगशृङ्गारा[2]ख्यो रसः ।

भावो यथा महापात्रराघवानन्दसांधिविग्रहिकाणाम्— मा

'यस्यालीयत शुल्कसीम्नि जलधिः, पृष्ठे जगन्मण्डलं,
दंष्ट्रायां धरणी, नखे दितिसुताधीशः, पदे रोदसी, ।
क्रोधे क्षत्रगणः, शरे दशमुखः, पाणौ प्रलम्बासुरो,
ध्याने विश्वमसावधार्मिककुलं कस्मैचिदस्मै नमः ॥'

अत्र भगवद्विषया रतिर्भावः ।

भासभावाभासेत्यर्थः । आदिना भावशान्त्यादीनां ग्रहणम् । **शून्यमिति** । सख्यादिहीनमित्यर्थः । शयनाच्छय्यायाः किंचिदुत्थानं प्रियजागरणे झटिति संवरणार्थम् । उत्थाने शनैस्त्वं जागरणहेतुशब्दानुत्पत्तये निद्राव्याजं छलनिद्रां सुचिरनिर्वर्णनं च निद्रानिश्चयाय । तेन विश्रब्धं विश्वस्तं यथा स्यात्तथा परिचुम्ब्य । गण्डस्थलीमिति पत्युरनुषज्यते । लज्जानम्रमुखी सतीत्यर्थः । केचित्तु—'लज्जत इति लज्जा क्रिया । तत्रैवालोचनानन्तर्यस्यान्वयः' इत्याहुः, तन्न । कृत्प्रत्ययानामभिधाननियम्यतया लज्जापदस्य लज्जाश्रयबोधे सामर्थ्याभावात् । स्थितादिपदाध्याहारेणैव एककर्तृकत्वमवधेयम् । बाला नववधूः । चिरचुम्बनं चाधिकर्णपरिशोधनार्थम् । वीरादिरसानामुदाहरणान्यग्रे दास्यति—**यस्येति** । 'अलीयत' इति च दशसु वाक्येष्वन्वेति । शल्को मत्स्यलक् तस्य सीम्नि एकदेशे । दितिसुताधीशो हिरण्यकशिपुः । रोदसी द्यावापृथिव्यौ । अत्रालीयतामिति वचनविपरिणामः । कस्मैचिदनिर्वचनीयमहिम्ने । अत्र दशभिर्वाक्यैर्दशावताराः दर्शिताः । ते यथा—'मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः । रामो रामश्च रामश्च बौद्धः कल्की च ते दश॥' अनुवर्तमानः सेवमानः । अन्यद्भावाभासादि ।

---

1. **असाविति** । असौ कृपाणे ॥

2. **कर्कीति**। 'कल्की' इति पाठः सर्वत्रैवोपलभ्यते । परंतु कर्को धवलघोटकोऽस्यास्तीति व्युत्पत्तिस्वारस्यात् 'कर्की' इत्येव पाठः साधीयान् । भगवतो घोटकवाहनत्वात् । कर्किकुलोत्पन्नत्वाद्वा कर्की । 'सितः कर्कः' इत्यमरः । 'उत्पत्स्यतेऽर्कसंकाशः शिशुः कर्किकुले द्विजः' इति दशावतारचरितम् ॥

---

१. 'हि' क-ख-ग-पुस्तकेषु नास्ति. २. 'आख्यो रसः' ग-पुस्तके नास्ति.

रसाभासो यथा—

'मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ॥

अत्र संभोगशृङ्गारस्य तिर्यग्विषयत्वाद्रसाभासः । एवमन्यत् ।

दोषाः[1] पुनः काव्ये किंस्वरूपा इत्युच्यन्ते—

दोषास्तस्यापकर्षकाः ।

श्रुतिदुष्टा[2]पुष्टार्थत्वादयः काणत्वखञ्जत्वादय इव शब्दार्थद्वारेण देहद्वारेणेव व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयो मूर्खत्वादय इव साक्षात्काव्यस्यात्मभूतं रसमपकर्षयन्तः काव्यस्यापकर्षका इत्युच्यन्ते । एषां विशेषोदाहरणानि वक्ष्यामः ।

गुणाः[3] किंस्वरूपा इत्युच्यन्ते—

उत्कर्षहेतवः प्रोक्ता गुणालंकाररीतयः ॥ ३ ॥

गुणाः शौर्यादिवत्, अलंकाराः कटककुण्डलादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, देहद्वारेणेव शब्दार्थद्वारेण तस्यैव[4] काव्यस्यात्मभूतं रसमुत्कर्षयन्तः काव्यस्योत्कर्षका इत्युच्यन्ते । इह यद्यपि गुणानां रसधर्मत्वं तथापि गुणशब्दोऽत्र गुणाभिव्यञ्जकशब्दार्थयोरुपचर्यते ।

ननु दोषादीनां काव्यलक्षणाघटकत्वान्निराकाङ्क्षतया तन्निरूपणमसंगतमित्यत आकाङ्क्षामुत्थापयति—**दोषाः पुनरिति** । तस्य काव्यस्य । **गुणा इति** । गुणानां शब्दार्थोत्कर्षद्वारा यथा रसोत्कर्षकत्वं तथा गुणपरिच्छेदे दर्शयिष्यते । शौर्यादीनामौपचारिकदेहधर्मत्वाभिप्रायेणायं दृष्टान्तः । ननु निरलंकारकाव्यापेक्षयालंकाराणामिव निर्गुणकाव्यापेक्षया गुणानां काव्योत्कर्षकत्वं नोपपद्यते । निर्गुणत्वस्य नीरसत्वसमनियततया नीरसस्य काव्यत्वानङ्गीकारेणैव निर्गुणस्य काव्यत्वानङ्गीकारादित्यभिप्रायेण शङ्कते—**इह यद्यपीति** । इह नवीनालंकारिकसंप्रदायमते । **रसधर्मत्वमिति** । काव्ये गुणानामव्यभिचारित्वज्ञापनाय प्रसादगुणप्रकरणे प्राचीनैरुक्तम्—यथा 'स च सर्वरसव्यापी काव्यजीवातुरिष्यते' इति । **तथापीति** । अत्रानन्तरोक्तकारिकायाम् । शब्दानां गुणाभिव्यञ्जकत्वं गुणपरिच्छेदे व्यक्तीभविष्यति । अर्थानां तूद्भतानुद्भततया ओजोमाधुर्यव्यञ्जकत्वं झटिति प्रतिपाद्यत्वेन प्रसादव्यञ्जकत्वमवगन्तव्यम् । उपचर्यते लक्षणया प्रयुज्यते । अतश्च गुणशब्दौपचारिकत्वस्वीकाराच्च । शब्दाः शब्दार्थाः । एवं च गुणाभिव्यञ्जकशब्दार्थहीनमपि व्यङ्ग्यं भवति तदपेक्षया गुणाभिव्यञ्जकशब्दार्थयोः

१. 'दोषा·'—इत्यादिः 'इत्युच्यन्ते' इत्यन्तः पाठो ग-पुस्तके नास्ति. २. 'अपुष्ट' क-पुस्तके नास्ति. ३. 'गुणा·—' इत्युपोद्घातो ग-पुस्तके न दृश्यते. ४. 'तमेव' ग-घ.

अतश्च[1] 'गुणाभिव्यञ्जकाः शब्दा रसस्योत्कर्षकाः—' इत्युक्तं भवतीति प्रागेवोक्तम् । एषामपि विशेषोदाहरणानि वक्ष्यामः ॥

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्यार्णवकर्णधारध्वनिप्रस्थापनपरमाचार्यकविसूक्तिरत्नाकराष्टादशभाषावारविलासिनीभुजंगसांधिविग्रहिकमहापात्र-श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे काव्यस्वरूप-निरूपणो नाम प्रथमः परिच्छेदः ।

काव्योत्कर्षकत्वमुपपन्नमिति भावः । ननु गुणाभिव्यञ्जकपदविन्यासस्य रीतित्वेन निरूपणीयतया रीतेरेतेनेव संग्रहे पृथक् तदुपादानमनर्थकमिति । तदेतच्चिन्त्यम् ॥

इति श्रीरामचरणतर्कवागीशभट्टाचार्यविरचितायां साहित्यदर्पणविवृतौ प्रथमः प्रकाशः ।

---

१. 'एव' क. २. 'मधुकर' क. ३. 'साहित्यविद्या' क. ४. 'वार' क-ख-पुस्तकयोर्नास्ति. ५. 'उल्लासः' ग.



द्वितीयः परिच्छेदः ।

वाक्यस्वरूपमाह—

[1]वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः ।

योग्यता पदार्थानां परस्परसंबन्धे बाधाभावः । पदोच्चयस्यैतदभा-

उपोद्घातसंगत्या वाक्यं निरूपयति—**वाक्यमिति** । प्रकृतसिद्ध्यनुकूलचिन्ताविषयत्वमुपोद्घातः । काव्यलक्षणं चात्र प्रकृतम् । योग्यतामाह—**पदार्थानामिति । परस्परसंबन्धे** परस्परान्वयबोधे । हेतुरिति शेषः । 'न तत्र करुणा हेतुः' इतिवत् पञ्चम्यर्थे सप्तमी । बाधो विपरीतबुद्धिः । तथा चान्वयबोधहेतुभूतबाधाभावो योग्यतेत्यर्थः । प्रत्यक्षादिकारणीभूतबाधाभाववारणाय भूतान्तं विशेषणम् । 'पयसा सिञ्चति' इत्यादौ श्रोतुः सेकः पयःकरणकत्वाभाववानित्यादिविपरीतबुद्धेरभावः । सा चात्र प्रमारूपा ग्राह्या । अन्यथा तादृशभ्रमभाजि श्रोतरि सति 'पयसा सिञ्चति' इति वाक्यं न स्यात् । ननु तादृशप्रमाया अप्रसिद्ध्या तद्विरहस्याप्रसिद्धिरिति निरुक्तयोग्यता शशविषाणवदलीकेति चेत्तर्ह्येवं व्याख्येयम्—**परस्परसंबन्धे इति ।** [2]सप्तम्यर्थो निरूपकत्वम् । परस्परसंबन्धनिरूपकाणां पदार्थानामित्यर्थः । तात्पर्यविषयीभूतपरस्परसंबन्धे सतीत्यर्थः । बाधाभावः सद्भावः । एवं च तात्पर्यविषयीभूतसंबन्धेन [2]तन्निरूपकाणां पदार्थानामेकतरस्मिन्नपरपदार्थसद्भावो योग्यतेति फलितम् । पाकादौ विद्यमानस्य वह्निकरणकत्वस्य सेकादौ येन केनचित्परम्परासंबन्धेन सद्भावे 'वह्निना सिञ्चति' इत्यादेर्वाक्यत्वप्रसक्तौ तद्वारणाय तात्पर्यविषयीभूतेति संबन्धविशेषणम् । अस्ति च 'पयसा सिञ्चति' इत्यादौ पयःकरणकत्वस्य स्वरूपसंबन्धेन सेके सद्भावः । योग्यताया व्यावृत्तिमाह—**पदोच्चयस्येति** । एतदभावे

---

1. वाक्यमिति । वाक्यबोधस्त्वेवम्—पूर्वं तावच्छब्दश्रवणादनन्तरं श्रोतुरात्मनि समुपस्थीयते तत्तदर्थैः । समुदीयते च योग्यतादिवशेन तेषां परस्परं विशिष्टान्वयबोधेन । उपस्थितिश्च स्मृतिरेव । स्मृतिर्लोके समनुभूतपदार्थस्योद्बोधकसहकृतसंस्कारेण जायते । तत्रान्योद्बोधकस्यानुपलम्भाच्छब्दश्रवणस्यैव तत्संस्कारोद्बोधे कारणत्वमङ्गीक्रियते । एकसंबन्धिज्ञानस्यापरसंबन्धिस्मारकतायां अन्यत्र दर्शनाच्छब्दार्थयोरपि परस्परं संबन्धित्वमवसीयते । अवसीयते च तस्यैव संस्कारोद्बोधकत्वम् । तथा च यदि शब्दानां पदार्थैः सह संबन्धो न स्यात्तर्हि ततोऽर्थस्मृतिर्न जायेत । स्मर्यन्ते चार्थाः शब्दैः । अतएव वाक्यपदीये—'सतिप्रत्ययहेतुत्वे संबन्ध उपपद्यते । शब्दस्यार्थैर्यतोऽस्तस्तत्संबन्धोऽस्तीति गम्यते ॥' इति प्रत्ययहेतुत्वान्यथानुपपत्त्यैव तयोः संबन्धसद्भावानुमितिः स च संबन्धो वृत्तिरूप इति ॥

---

१. 'सप्तम्यर्थः—' इत्यादिः 'पदार्थानामित्यर्थः' इत्यन्तः पाठः पुस्तकान्तरे नास्ति. २. तन्निरूपकाणां' पुस्तकान्तरे नास्ति.

वेऽपि वाक्यत्वे 'वह्निना सिञ्चति' इत्याद्यपि वाक्यं स्यात् । आकाङ्क्षा प्रतीतिपर्यवसानविरहः । सा[२] च श्रोतुर्जिज्ञासारूपः । निराकाङ्क्षस्य वाक्यत्वे 'गौरश्वः पुरुषो हस्ती' इत्यादीनामपि वाक्यत्वं स्यात् । आसत्तिर्बुद्ध्यविच्छेदः । बुद्धिविच्छेदेऽपि वाक्यत्वे इदानीमुच्चरितस्य देवदत्त[३]-

---

निरुक्तयोग्यताविरहे । **वह्निनेत्यादि** । अत्र कारणस्य कार्यनिरूपितत्वनियमात्कार्यव्यतिरेकेणानुपपत्त्या सेवारूपे कार्ये भवत्येवाकाङ्क्षेति ध्येयम् । आकाङ्क्षामाह—**आकाङ्क्षेति** । प्रतीतेः पदार्थोपस्थितेः पर्यवसानमन्वयबोधजनकत्वेनेच्छाविरहः । तस्य विरहः । अभाव इत्यर्थः । नन्वेवमाकाङ्क्षापदस्याभावबोधकत्वे लक्षणापत्तिरित्यत आह—**स चेति** । प्रतीतिपर्यवसानविरहश्चेत्यर्थः । अभावाभावः प्रतियोगिस्वरूप एव, न त्वतिरिक्तः कल्प्यत इति भावः । अस्ति च 'पयसा सिञ्चति' इत्यादौ पयसेति पदार्थस्य सिञ्चतीति पदार्थेनान्वयबोधजनने श्रोतुरिच्छा । प्रतीतिपर्यवसानं च क्वचित्स्वाभाविकं क्वचिज्जनितान्वयबोधत्वेन । तत्राद्यमाह—**गौरिति** । [४]अत्र गवादिप्रथमान्तपदोपस्थापितानां पदार्थानामभेदातिरिक्तसंबन्धेनान्वयबोधोऽव्युत्पन्न इति भवति पदार्थोपस्थितेरन्वयबोधजनने श्रोतुरिच्छाविरहः[५] । [६]अत्राभेदातिरिक्तसंबन्धेन बाधसत्त्वेऽपि सत्त्वादिसबन्धेन बाधविरहरूपयोग्यतास्तीति ध्येयम् । द्वितीयं यथा—'विमलं जलं नद्याः कच्छे महिषश्चरति' इत्यत्र नद्या इति पदार्थोपस्थितेर्जलमिति पदार्थेनान्वयबोधे सति सिद्धे 'इच्छाविरहात्' इति न्यायेन 'कच्छे' इत्यनेन श्रोतुरन्वयबोधे इच्छाविरहः । यदि पुनरुभयान्वयेच्छा प्रयुज्यते तदा 'नद्याः' इत्यस्य काकाक्षिगोलकन्यायादनुषङ्गाद्वा 'कच्छे' इत्यनेन संबन्धाद्गृहीतवक्तृतात्पर्यस्य श्रोतुरुभयान्वयबोधेच्छा संभवतीति ध्येयम् । आसत्तिमाह—**आसत्तिरिति** । बुद्धेः पदार्थोपस्थितेरविच्छेदोऽव्यवधानम् । [७]अव्यवहितपदार्थोपस्थितिरिति तात्पर्यार्थः । व्यवधानं च कालबाहुल्येन प्रकृतानुपयोगिपदार्थोपस्थित्या च संभवति । तत्राद्यमाह—**बुद्धीति** । वाक्यत्वे वाक्यत्वस्वीकारे । दिनान्तरेत्यत्यन्तव्यवधानदर्शनाय । प्रहरादिव्यवधानेनाप्यनासन्नत्वं बोध्यम् । संगतिर्वाक्यव्यवहारोपयोगिमेलकः । द्वितीयं यथा—'गिरिर्भुक्तमग्निमान्देवदत्तेन' इत्यत्र गिरिरग्निमान्, भुक्तं देवदत्तेनेति वाक्यार्थबोधद्वयं प्रकृतम् । तत्र प्रथमानुयोगिन्या भुक्तमिति पदार्थोपस्थित्या, द्वितीयानुयोगिन्या अग्निमानिति पदार्थोपस्थित्या व्यवधानम् । प्रकृतोपयोगिपदार्थोपस्थित्या व्यवधाने त्वासत्तिरस्त्येव । तेन 'अश्वेन ग्रामं गच्छति' इत्यादौ ग्रामपदार्थोपस्थितिव्यवधानेऽपि अश्वपदस्य गच्छतीत्यनेनासत्तिरव्याहतैव । स्वार्थबोधसमाप्तमपि पदोच्चयविशेषणं

---

१. 'इत्यपि' ख-ग-घ. २. 'स च' ग-पुस्तके नास्ति. ३. 'चैत्र' ग. ४. 'अत्र—' इत्यादिः 'भवति' इत्यन्तः पाठः पुस्तकान्तरे त्रुटित इति प्रतिभाति. ५. 'स्वाभाविक एव' इत्यधिकं पुस्तकान्तरे. ६. 'अत्राभेद—' इत्यारभ्य '—ध्येयम्' इति पर्यन्तः पाठो नास्ति पुस्तकान्तरे. ७. 'अव्यवहितपदार्थोपस्थितिरिति तात्पर्यार्थः' इति पुस्तकान्तरे नास्ति. ८. 'त्वासत्तिः—' इत्यादिः '—अव्याहतैव' इत्यन्तः पाठः पुस्तकान्तरे न दृश्यते.

[1]शब्दस्य दिनान्तरोच्चरितेन [2]गच्छतीति पदेन संगतिः स्यात्। [3]अत्राकाङ्क्षायोग्यतयोरात्मार्थधर्मत्वेऽपि पदोच्चयधर्मत्वमुपचारात्[1]।

वाक्योच्चयो महावाक्यम्

योग्यताकाङ्क्षासत्तियुक्त इत्येव।

इत्थं वाक्यं द्विधा मतम्॥ १॥

इत्थमिति वाक्यम्[5] महावाक्यत्वेन। उक्तं च—

'स्वार्थबोधे[6] समाप्तानामङ्गाङ्गित्वव्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते॥' इति।

तत्र वाक्यं यथा—'शून्यं वासगृहं—' इत्यादि। महावाक्यं यथा—रामायणमहाभारतरघुवंशादि।

पदोच्चयो वाक्यमित्युक्तम्। तत्र किं पदलक्षणमित्यत आह—

वोध्यम्। तेन 'शून्यं वासगृहं—' इत्यादिभागस्य न वाक्यत्वम्। योग्यताकाङ्क्षयोः पदोच्चयधर्मत्वमुपपादयति—**आकाङ्क्षेति**। आकाङ्क्षाया इच्छारूपत्वाद्विपरीतबुध्यभावरूपयोग्यतायाश्चात्मनिष्ठतयान्वयबोधहेतुत्वादात्मवृत्तित्वमेव। उपचारात्स्वजन्यजनकत्वरूपपरम्परासंबन्धात्। एकपदार्थीयापरपदार्थसद्भावरूपयोग्यतायास्तु पदार्थधर्मत्वेऽपि स्वाश्रयोपस्थापकत्वसंवन्धेन पदोच्चयधर्मत्वमेवावगन्तव्यम्। निरुक्तासत्तेरप्यात्मधर्मत्वात्। तत्राप्येषैव रीतिरनुसर्तव्या। यदि पुनः समभिहारविशेष आकाङ्क्षा, अव्यवधानोच्चरितत्वमासत्तिः, तदानयोः साक्षादेव पदोच्चयधर्मत्वमित्यास्तां विस्तरः। महावाक्यमाह—**वाक्योच्चय इति**। योग्यताद्यभावे महावाक्यत्वस्वीकारे 'चक्षुषा गृह्यतां गगनं वर्तते' इत्येतयोः 'भिक्षुरुपवसति गृही भुङ्क्ते' इत्येतयोर्भिन्नदिनोच्चारितयोः 'चक्षुषा गृह्यतां घटो वर्तते' इत्येतयोरपि महावाक्यत्वं स्यात्। अत्र प्राचां संवादमाह—**स्वार्थेति**। स्वार्थबोधेन निराकाङ्क्षाणां पुनरङ्गाङ्गित्वव्यपेक्षया गुणप्रधानभावेनाकाङ्क्षया संहत्य एकार्थप्रतिपादकत्वेन मिलित्वा वाक्यानामेकवाक्यत्वं जायत इत्यर्थः। वाक्यार्थानां गुणप्रधानभावेन वैशिष्ट्यादेकत्वं तत्प्रतिपादकत्वेन वाक्यानामेकवाक्यत्वमिति भावः। पदनिरूपणे प्रसङ्गसंगतिमुपपादयति—**पदोच्चय इति**। वाक्यनिरूपणे स्मृतस्य पदस्यानुपेक्षणीयत्वमिह प्रसङ्ग इति भावः। वर्णाः स्वरव्यञ्जनरूपाः।

1. **उपेति**। उपचारो लक्षणा।

---

१. 'पदस्य' ख. २. 'उच्चारितेन' घ. ३. 'तत्र' क. ४. 'योग्यता—' इति फक्किका ग-पुस्तके नास्ति; घ-पुस्तके तु 'वाक्योच्चयः—' इत्यस्य प्राग्दृश्यते. ५. 'वाक्यत्वेन महावाक्यत्वेन च' घ. ६. '—बोधसमाप्तानां' ख-घ. ७. 'आत्मवृत्तित्वमेव। एकपदार्थेऽपरपदार्थसद्भावरूपयोग्यताया अर्थधर्मत्वमेव। उपचारात्स्वजन्यजनकत्वरूपपरम्परासंबन्धात्स्वाश्रयोपस्थापकत्वाच्च पदोच्चयधर्मत्वमवगन्तव्यम्' इत्युपलभ्यते पाठभेदः पुस्तकान्तरे.

[1]वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः ।

यथा—घटः । प्रयोगार्हेति प्रातिपदिकस्य व्यवच्छेदः । अनन्वितेति वाक्यमहावाक्ययोः । एकेति साकाङ्क्षानेकपदवाक्यानाम् । अर्थबोधका इति कचटतपेत्यादीनाम् । वर्णा इति बहुवचनमविवक्षितम् ।

प्रयोगार्हाश्च ते अनन्वितैकार्थबोधकाश्चेति विग्रहः । सुबाख्यातान्यतरान्तत्वेन क्वचित्तद्भुगन्तत्वेन प्रयोगार्हत्वम् । प्रातिपदिकस्य विभक्तिरहितनाम्नः केवलस्य तस्याप्रयोगित्वात् । एतदुपलक्षणं धातोरित्यपि बोध्यम् । तस्यापि केवलस्याप्रयोगित्वात् । वाक्यमहावाक्ययोर्व्यवच्छेद इत्यनेनान्वयः । एवमग्रेऽपि । तयोरन्वितार्थबोधकत्वात् । [2]विशिष्टवाक्यार्थस्य विशेषणविशेष्यानतिरिक्तत्वेनैकत्वमित्यभिप्रायेणेदं लक्षणम् । 'अन्वितैकार्थबोधकाः' इत्यनेनैव वाक्यवारणे सिद्धे 'अनन्वित–'इत्युपादानं व्यर्थं स्यात् । **साकाङ्क्षेति** । [2]साकाङ्क्षाणामन्वयबोधाजनकानामनेकेषां पदानां वाक्यानां च समुदायस्य व्यवच्छेद इत्यर्थः । तथा चायोग्यानामनाकाङ्क्षाणामनासन्नानां च समुदायस्यान्वितार्थबोधकत्वेऽपि न पदत्वमिति भावः । आकाङ्क्षामात्रविशिष्टानामयोग्यानामनासन्नानां चानेकपदानामनेकवाक्यानां चेत्यर्थः । एषामन्वितार्थबोधकत्वेन पदत्वप्रसक्तौ तद्वारणाय **एकेति**ति भावः । नन्वेकवर्णद्विवर्णपदयोरव्याप्तिर्वर्णबहुत्वाभावादत आह—**वर्णा इतीति** । ननु प्रकृत्यर्थान्वितस्यार्थबोधकत्वं प्रत्ययानामिति नियमाद् घटीयं कर्मत्वमित्याद्यन्वितार्थबोधकस्य घटमित्यादेः कथं पदत्वम् । न च शक्तिमत्पदमिति मतानुसारेण 'घट' इत्येकं पदम् 'अम्' इत्यपरं पदम्, अनयोः प्रत्येकपदार्थोपस्थापकत्वेन अनन्वितार्थबोधकत्वमक्षतमिति वाच्यम् । तथा सति घटमित्यादेः पदसमुदायस्य वाक्यत्वं स्यात् । न चेष्टापत्तिः । एवं सति 'शून्यं वासगृहं–' इत्यादि यद्वाक्योदाहरणं दत्तं तदसंगतं स्यात् । तस्य तथाविधवाक्यस्य महावाक्यतयैवोदाहर्तुमुचितत्वात् । न च प्रत्ययार्थातिरिक्तानन्वितार्थबोधकत्वं विवक्षणीयमिति वाच्यम् । तथाप्यभेदसंबन्धेन नीलाद्यन्वितोत्पलादि-

---

1. **वर्णा इति** । वर्णोत्पत्तिस्तावदेवमुपवर्ण्यते—चेतनेन ज्ञातार्थविवक्षया तद्बोधकशब्दनिष्पादनाय प्रेरितमन्तःकरणं मूलाधारस्थितमनलं चालयति, तच्चालितोऽनलस्तत्स्थलवर्तिवायुचालनाय प्रभवति, तच्चालितेन वायुना तत्रैव सूक्ष्मरूपेणोत्पादितः शब्दः परावागित्यभिधीयते । ततो नाभिदेशपर्यन्तचलितेन तेन तद्देशसंयोगादुत्पादितः शब्दः पश्यन्तीति व्यवह्रियते । एतद्वयस्य सूक्ष्मसूक्ष्मतरतयेश्वरयोगिमात्रगम्यता, नासदीयश्रुतिगोचरता । ततस्तेनैव हृदयदेशं परिसरता हृदयसंयोगेन निष्पादितः शब्दो मध्यमेत्युच्यते । सा च स्वकर्णपिधानेन ध्वन्यात्मकतया सूक्ष्मरूपेण कदाचिदसाकमपि समधिगम्या । ततो मुखपर्यन्तमाक्रामता तेन कण्ठदेशमासाद्य मूर्धानमाहत्य तत्प्रतिघातेन परावृत्य च मुखविवरे कण्ठादिकेष्वष्टसु स्थानेषु स्वाभिघातेनोत्पादितः शब्दो वैखरीति कथ्यते ॥

---

१. 'विशिष्ट–' इत्यादिः '–व्यर्थं स्यात्' इत्यन्तः पाठः पुस्तकान्तरे नास्ति. २. 'साकाङ्क्षाणां–' इत्यादिः '–न पदत्वमिति भावः' इत्यन्तः पाठः पुस्तकान्तरे न दृश्यते.

अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः ॥ २ ॥

एषां[1] स्वरूपमाह—

वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः ॥ ३ ॥

ता अभिधाद्याः ।

तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा ।

उत्तमवृद्धेन मध्यमवृद्धमुद्दिश्य 'गामानय' इत्युक्ते तं गवानयन-

---

बोधकेषु 'नीलोत्पलम्' इत्यादिपदेषु मुख्यार्थान्वितार्थबोधकेषु लाक्षणिकश्वेतादिपदेषु चाव्याप्तेरनुद्धारात् समस्तस्य पदस्याखीकारे 'क्षीरोदजावसतिजन्मभुवः प्रसन्ना' इत्यादि पदगतक्लिष्टत्वोदाहरणमसंगतं स्यात् । एवमेकेति न संगच्छते, 'घटौ' 'घटाः' इत्यादिद्विवचनान्तबहुवचनान्तपदेष्वनेकार्थबोधकेष्वव्याप्तेः । न च एकेत्येकजातीयेत्यर्थ इति वाच्यम् । 'धवखदिरपलाशाः' इत्यादौ युगपच्चन्द्रसूर्योपस्थापके 'पुष्पवन्तौ' इति पदे चाव्याप्तितादवस्थ्यात् । अपि च पदघटकानां यावतां वर्णानामनन्वितैकार्थबोधकत्वमुत केषांचिद्वा । तत्र, नाद्यः । 'सुन्दरस्य देवदत्तस्य धनम्' इत्यादौ विशेषणविभक्तेरनर्थकत्वात् 'सुन्दरस्य' इत्यादिपदेऽव्याप्तेः । नापि द्वितीयः । 'वह्निना सिञ्चति' इत्यादौ सर्वेषामनन्वितैकार्थबोधकत्वाभावेऽपि प्रत्येकं तथात्वसद्भावादव्याप्तेः । यद्वा 'द्वौ घटौ' इति समुदायस्य संभेदेनान्यतरवैयर्थ्यमिति न्यायाद् 'द्वौ' इति भागस्यानर्थकत्वेऽपि 'घटौ' इति भागस्यानन्वितैकार्थबोधकत्वात्तत्रातिव्याप्तेः । एवं च पदलक्षणमेवं वाच्यम्—'असमासाङ्गसुप्तिङन्तत्वोपयुक्तप्रकृतिः पदम्' । युगन्तेन केवलप्रकृतेः । असमासाङ्गेत्यनेन 'पितुःस्वसा, जहिजोडः' इत्यादौ पूर्वावयवस्य । 'राजदन्तः' इत्यादौ उभयोरपि । 'प्रकृतिः' इत्यनेन वाक्यमहावाक्ययोर्व्यवच्छेदः । समासावयवस्य पदत्वाङ्गीकारे 'नीलोत्पलम्' इत्यादिपदस्य वाक्यत्वं स्यात् । योग्यतालक्षणघटकपदार्थानाह—**अर्थ इति** । पदप्रतिपाद्य इत्यर्थः । एषां वाच्यादीनाम् । **अभिधया बोध्य इति** । अभिधाजन्यबोधविषय इत्यर्थः । अर्थबोधे शब्दस्य वृत्तीनां च कारणत्वमिह विषयविषयिणोरभेदोपचाराद्बोध्यम् । वास्तवकारणं तु शब्दतद्वृत्तिज्ञानमेव । शब्दस्य प्रकृतेः प्रत्ययस्य च शक्तयोऽर्थबोधे सहकारिण्यो वृत्तयः । अभिधादिशक्तिमाह—**तत्रेति** । अभिधादिषु मध्य इत्यर्थः । **संकेतितार्थस्येति** । संकेतितग्रहविषयार्थस्येति तु नार्थः, संकेतस्याभिधाया अभिन्नत्वेनात्माश्रयापत्तेः । किंतु कोशव्याकरणादिप्रसिद्धस्य मुख्यार्थस्येत्यर्थः । मुख्यत्वं च लक्ष्यव्यङ्ग्यापेक्षया प्रथमोपस्थितिविषयत्वम् । बोधनात् स्वज्ञानेन शाब्दबोधजननात् । संकेतग्रहोपायान्वृद्धव्यवहारादीनाह—**उत्तमेति** । वृद्धेन संकेतग्रहवता । प्रयोजकप्रयोज्यभावसंपादनाय उत्तमत्वमध्यमत्वाभ्यां

---

१. 'तत्र' इत्यधिकं ग-घ-पुस्तकयोः. २. 'यद्वा—' इत्यादिः '—अतिव्याप्तेः' इत्यन्तः पाठः पुस्तकान्तरे नास्ति. ३. 'पदलक्षणमेवं वाच्यम्' इति पुस्तकान्तरे नास्ति. ४. 'अनेन' इति पुस्तकान्तरे नास्ति.

प्रवृत्तमुपलभ्य बालोऽस्य वाक्यस्य 'सास्नादिमत्पिण्डानयनमर्थः' इति प्रथमं प्रतिपद्यते अनन्तरं च 'गां बधान' 'अश्वमानय' इत्यादावावापोद्वापाभ्यां गोशब्दस्य 'सास्नादिमानर्थः' आनयनपदस्य च 'आहरणमर्थः' इति संकेतमवधारयति । क्वचिच्च प्रसिद्धार्थपदसमभिहारात् यथा—'इह प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति' इत्यत्र क्वचिदासोप-

---

वृद्धयोरुपन्यासः । तं मध्यमवृद्धं गवानयनप्रवृत्तं गवानयनगोचरयत्नवन्तमुपलभ्य गवानयनक्रियया अनुमाय बालः संकेतग्रहाभाववान् अस्य 'गामानय' इत्यस्य प्रथमं शक्तिग्रहात्पूर्वं प्रतिपद्यते इति । अनुमितेन यत्नेन मध्यमवृद्धस्य गवानयनगोचरं ज्ञानमनुमिनोति, तद्गोचरप्रवृत्तिं प्रति तद्गोचरज्ञानस्य हेतुत्वात् ततस्तस्य ज्ञानस्य को हेतुरित्याकाङ्क्षायामुपस्थितत्वात् 'गामानय' इति वाक्यस्यैव तादृशज्ञानहेतुतां कल्पयतीति भावः । **अश्वमानयेत्यादाविति** । उक्त इति शेषः । **आवापोद्वापाभ्यामिति** । आवापोद्वापाभ्यामन्वयव्यतिरेकाभ्यां 'गां बधान' इत्यत्र गोपदसत्त्वे सास्नादिमत्पदार्थबोधः । आनयनपदव्यतिरेकेणाहरणपदार्थबोधाभावः । 'अश्वमानय' इत्यत्र गोपदव्यतिरेकेण सास्नादिमत्पदार्थबोधाभावः । आनयपदसत्त्वे आहरणपदार्थबोधः, इत्येवंरूपावन्वयव्यतिरेकौ । संकेतमभिधानामशक्तिम् । सा चातिरिक्तैव । न ह्यस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छा । ईश्वरं दूषयतां पामरादीनामपि शाब्दबोधोदयादतिप्रसङ्गाच्च । अत एवाधुनिकसंकेतितानां चैत्रादिपदानामपि संकेतः संगच्छते । न चाशौचव्यपगमे पिता नामधेयं कुर्यादिति सामान्यतश्चैत्रादिपदानामपीश्वरसंकेतितत्वमिति वाच्यम् । तत्र तथागतिसंभवेऽपि यादृच्छिकसंकेतितडित्थादिपदानां संकेतासंगतिप्रसङ्गात् । तस्माच्च पदार्थे वैशिष्ट्यं नाम संबन्धः कल्प्यते 'अयं घटपदाभिधेयः' इत्यादिप्रतीतिबलादिति सांप्रदायिकाः । **क्वचिदिति** । प्रसिद्धस्य गृहीतसंकेतस्य पदस्य समभिहारात् साहचर्यात् । समीपोच्चारितत्वादित्यर्थः । प्रेक्षावद्भिः प्रायेण योग्यपदार्थोपस्थापकं पदं समीपे प्रयुज्यत इत्यादिसंबन्धतः प्रसिद्धपदार्थान्वययोग्यपदार्थावेशेषोक्तिग्रहो भवतीति भावः । एवं च शक्यार्थे योग्यतासत्त्वेऽपि वक्तृतात्पर्यविशेषस्यात्र हेतुत्वकल्पनात्तत्र न शक्तिग्रहः । संकेतमवधारयतीत्यनुषङ्गः । एवमग्रेऽपि **प्रभिन्नेति** । प्रफुल्लेत्यर्थः । 'अत्र कमले मधुकरो मधु पिबति' इति पदानामन्वययोग्यतार्थकत्वज्ञानेन मधुकरपदस्य भ्रमर एव शक्तिग्रहः । मक्षिकादौ तादृशयोग्यतासत्त्वेऽपि वक्तृतात्पर्यविशेषज्ञानाभावान्न शक्तिग्रहः । कमलाभ्यन्तरे भ्रमर एव मधु पिबतीति जानता जनेन कमलपदसमभिहारान्मधुकरपदस्य भ्रमरे संकेतो गृह्यते । आप्तोपदेशात् प्रामाणिकवचनात् । एतदुपलक्षणम् ।

---

1. **सास्नेति** । सास्ना गलकम्बलः, आदिपदेन लाङ्गूलककुदखुरादि गृह्यते.

---

१. 'अर्थ' इति ख-घ-पुस्तकयोर्नास्ति. २. 'इह' ग-पुस्तके नास्ति. ३. 'संकेताग्रहवान्' इति पुस्तकान्तरे. ४. 'प्रसिद्धस्य–' इत्यादिः '–न शक्तिग्रहः' इत्यन्तो ग्रन्थः पुस्तकान्तरे न दृश्यते. ५. 'अत्र कमले–' इत्यादिः '–ज्ञानाभावान्न शक्तिग्रहः' इत्यन्तः पाठो बहुत्र नोपलभ्यते.

देशात् यथा—'अयमश्वशब्दवाच्यः' इत्यत्र । तं च संकेतितमर्थं बोधयन्ती शब्दस्य शक्त्यन्तरानन्तरिता शक्तिरभिधानाम[1] ।

व्याकरणादयोऽपि शक्तिग्रहोपाया द्रष्टव्याः । तदुक्तम्—'शक्तिग्रहं व्याकरणोपमान-कोषाप्तवाक्याद्व्यवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः ॥' इति । दाक्ष्यादिशब्दानां दक्षाद्यपत्येषु शक्तिग्रहो व्याकरणात् । गोसदृश-पिण्डदर्शनाद् गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यस्मरणे अयं गवयपदवाच्य इत्युपमानात् । 'विनायको विघ्नराजद्वैमातुरगणाधिपाः' इत्यादौ कोषात् । आप्तवाक्या-दित्रयमुदाहृतं स्वयमेव ग्रन्थकृता । वाक्यशेषाच्छक्तिग्रहो यथा—'यवमयश्चरुर्भवति। वाराही चोपानत् । वैतसे कटे प्राजापत्यं धिनोति' इत्यत्र यववराहवेतसशब्दाः किं म्लेच्छप्रयोगात् कड्वार्यसजम्बूनां वाचकाः, उत आर्यप्रयोगाद् दीर्घशूकसूकरवञ्जुला-नामिति विप्रतिपत्तौ 'वसन्ते सर्वसस्यानां जायते पत्त्रशातनम् । मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः ॥','वराहं गावोऽनुधावन्ति','अप्सुजो वेतसः' इति वाक्यशेष-रूपवेदविरोधिनी म्लेच्छप्रतीतिः स्मृतिरिव वेदविरुद्धा हेया । इत्यार्यप्रयोगादेव दी-र्घशूकादौ शक्तिग्रह इति । शक्तिः कवित्वबीजरूपसंस्कारविशेष इत्यादौ विवृतेः । आ-

1. **अभिधेति** । सेयमभिधा त्रिविधा—केवलसमुदायशक्तिः, केवलावयवशक्तिः, समु-दायावयवशक्तिसंकरश्चेति । आद्याया डित्थादिरुदाहरणम्, तत्रावयवशक्तेरभावात् । द्वितीया-यास्तु पाचकपाठकादिः, तत्र धातुप्रत्ययशक्तिबोध्ययोरर्थयोरन्वयेनोल्लसितात्पाककर्तृरूपा-दर्थादतेऽर्थान्तरस्यानवभासेन समुदायशक्तेरभावात् । तृतीयायाः पङ्कजादिः । इह धातुपद-प्रत्ययरूपावयवशक्तिवेद्यानां पङ्कजननकर्तृणामाकाङ्क्षादिवशादन्वये प्रकाशमानात्पङ्कजनिक-र्तृरूपादर्थादतिरिक्तस्य पद्मत्वविशिष्टस्य प्रत्ययेन तदर्थसमुदायशक्तेरपि कल्पनादुभयोः संकरः । एता एवंविधा रूढि–योग-योगरूढिशब्दैर्व्यपदिश्यन्ते । अश्वगन्धाश्वकर्णमण्डप-निशान्तकुवलयादिपदेषु का शक्तिरिति । अत्र केचित्–'अश्वगन्धारसं पिबेत्' इत्यादिषु विष-यविशेषे केवलसमुदायशक्तिः । 'अश्वगन्धा वाजिशाला' इत्यादिषु तु केवलयोगशक्तिः । समुदायावयवशक्त्योरुभयोरेकशब्दाश्रयत्वे कथं केवलत्वविशेषितयोराद्यद्वितीयभेदयोरिति तु न शङ्क्यम् । समुदायावयवशक्तिवेद्ययोरर्थयोरन्वयेन तादृशशक्त्योः कैवल्यस्य साम्रा-ज्यात् । इदमेव हि केवलत्वमिह विवक्षितं यदन्वयायोग्यार्थबोधकत्वम् । संकरस्त्वन्वययो-ग्यार्थबोधकयोरेवेति न तस्यात्र प्रसक्तिः–इत्याहुः । अन्ये तु—अश्वकर्णादिशब्देषु नाभि-धायाः प्रथमद्वितीययोर्विधयोः प्रसक्तिः । कैवल्यविरहात् । परंतु संकरस्य द्वौ भेदौ—यो-गरूढियौगिकरूढिश्च । तत्राद्यस्योदाहरणं पङ्कजादिशब्दाः । द्वितीयस्य त्वश्वकर्णादयः–इत्याहुः । 'चतुर्थ एवायमभिधाया भेदः' इत्यप्यन्ये । 'अखण्डा एव हि शब्दाः । तत्र समासेषु पदानां कृत्तद्धितिङन्तेषु च प्रत्ययानां विभागः काल्पनिक एवेति कुत्रास्ति यौगशक्तिः, विशिष्टस्य विशिष्टार्थे रूढेरेवाभ्युपगमादित्यपि वदन्ति ॥

१. 'रायस' इति पुस्तकान्तरे.

संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु च ॥ ४ ॥

नन्त्यव्यभिचारदोषप्रसङ्गशङ्कया व्यक्तिशक्तिवादमपहायोपाधिशक्तिवादमाह—**संकेत इति** । द्रव्यं संज्ञाविषयः । संज्ञा च द्विविधा—चिरंतनी, आधुनीकी च ।

1. **संकेत इति** । अत्रायं निष्कर्षः—यद्यपि सकलप्रयोजनसंपादकतया व्यक्तिरेव संकेतसहा तथाप्यानन्त्याद्व्यभिचाराच्च न तत्र संकेतो युक्तः । तथाहि—किं सर्वासु गोव्यक्तिषु संकेतग्रहः, आहोस्वित् कस्यांचिदेकव्यक्तौ । नाद्यः । अनन्तानां गोव्यक्तीनां युगपदुपस्थानासंभवात् । नान्त्यः । यस्यां गोव्यक्तौ संकेतग्रहस्तदतिरिक्तायां गोशब्देन भानासंभवात् । अपि च व्यक्तिशक्तिवादे—'गौः शुक्लवर्णवांश्चलनक्रियावान् डित्थनामा' इत्यभिप्रायेण 'गौः, शुक्लः, चलः, डित्थः' इति प्रयोगे गवादिभिश्चतुर्भिरपि शब्दैरेका सैव गोव्यक्तिरुच्यत इति पदार्थभेदो न स्यात् । तत्र व्यक्तेरेव पदार्थत्वात्, तस्याश्च प्रकृते एकत्वात् । तथा च विषयविभागाभावे गवादिशब्दार्थानां घटः कलश इत्यादीनामिवैकार्थवाचकत्वेन सहप्रयोगो न स्यात् । **उपाधिशक्तिवादे** तु—जातिगुणक्रियासंज्ञानां प्रवृत्तिनिमित्तभेदेन गवादिशब्दानां पर्यायत्वाभावाद् भवति सहप्रयोग इति । तत्र **जाति**र्गोत्वादिः संस्थानविशेषाभिव्यङ्ग्या प्रत्यक्षसिद्धा गवादिपदानामभिधेया । अनुमानसिद्धा च प्राणत्वरसनत्वादिर्घ्राणरसनादिपदानाम् । अयं जातिरूपः शब्दः प्राणप्रद इत्यभिधीयते । प्राणनं प्राणो व्यवहारयोग्यता । तं ददाति संपादयतीति प्राणप्रदस्तन्निर्वाहक इत्यर्थः । सर्वगोवृत्तिर्जातिरिति यावत् । 'प्राणप्रदत्वं च यावद्वस्तुस्थितिसंबन्धित्वम्' इति नरसिंहादयः । तदुक्तं वाक्यपदीये—'गौः स्वरूपेण न गौर्नाप्यगौः, गोत्वाभिसंबन्धाद्गौः' इति । अस्यार्थः—गौः गोपदोद्देश्यः सास्नादिमान्धर्मी स्वरूपेण जातिरहितव्यक्तित्वमात्रेणेत्यर्थ इति व्याख्यातारः । अज्ञातगोत्वकेन धर्मिस्वरूपमात्रेणेत्यर्थ इत्यन्ये । न गौः । न गोव्यवहारनिर्वाहकः । नाप्यगौः । नापि गोभिन्न इति व्यवहारस्य निर्वाहकः । तथा सति दूरादनभिव्यक्तसंस्थानतया गोत्वाग्रहदशायां गवि गौरिति गोभिन्न इति वा व्यवहारः स्यात् । स्वरूपस्याविशेषाद्घटे गौरिति गवि चागौरिति वा व्यवहारः स्यादिति भावः । 'अगौः' इत्यत्र 'गोरतद्धितलुकि' इति टच्प्रत्ययो न भवति 'नञस्तत्पुरुषात्' इति निषेधात् । गोत्वाभिसंबन्धाद्गोत्ववत्तया ज्ञानाद्गौरगोशब्दव्यवहार्य इति । एवं च यावद्गोव्यवहारं तत्र गोपिण्डे गोत्वस्य सत्त्वात्प्राणप्रदत्वमिति भावः । एवं च नित्यमेकमनेकानुगतं सामान्यं जातिरिति तल्लक्षणं बोध्यम् । **गुणः** शुक्लादिः शुक्लादिपदानामभिधेयः । शुक्लादिना हि लब्धसत्ताकं गवादिकं वस्तु व्यावर्त्यत इति तात्पर्यम् । अत्रेदं तत्त्वम्—उत्पन्नस्य द्रव्यस्य गुणेन पश्चाद् योग इति । एवं चोत्पन्नस्य द्रव्यस्य क्षणमेकं निर्गुणत्वम् । जातियुक्तस्यैव द्रव्यस्योत्पत्तिः । 'जन्मना जायते जातिः' इत्युक्तेः । एवं जातिगुणयोर्महान्भेद इति बहवः । प्रदीपकृतस्तु—'यद्यपि शुक्लत्वादेर्नित्यत्वाभ्युपगमे गोत्वादिना समकालमेव संबन्धित्वम्, तथापि तस्य संबन्धः कदाचिदपैत्यपि, न तु गोत्वादेरिति विशेषः' इत्याहुः । कदाचित्पाकाद्यवस्थायाम् । आदिपदेन रञ्जनावस्थाया ग्रहणम् । पाकेन रञ्जनेन च वर्णान्तरसंपादन इति तदर्थः । एवं च 'सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते । आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः ॥' इति गुणलक्षणं बोध्यम् । अयमर्थः—द्रव्यमाश्रयते,

जातिर्गोपिण्डादिषु गोत्वादिका । गुणो विशेषाधानहेतुः सिद्धो

तत्राद्या हरिहरादिः । द्वितीया डित्थडवित्थादिः । जात्यादिपदार्थमाह—**जातिरिति** । गोपिण्डादिषु गोव्यक्त्यादिषु । सिद्धो नित्यः । एतन्मते गुणानामपि नित्यत्वम् । आ-

तत एव च द्रव्यान्निवर्तते, भिन्नजातीयेषु द्रव्येषु दृश्यते यः स गुणः । एतेन जातेर्गुणत्वं वारितम् । सा हि द्रव्ये निविशमाना द्रव्यं न कदाचिज्जहाति । नच भिन्नजातीयानि द्रव्याण्यभिनिविशते । यद्यपि गवाश्वादिषु प्राणित्वमस्ति, तथापि प्राणित्वेन तेषामेकजातीयत्वमेव । ननु क्रियायाः पूर्वोक्तलक्षणयोगाद्गुणत्वं प्राप्नोति, सापि हि द्रव्ये निविशते, कदाचिद् द्रव्यान्निवर्तते, निष्क्रियं हि द्रव्यं कदाचिद् भवति, कदाचित्सक्रियम्, भिन्नजातीयानि च द्रव्याण्याश्रयतीत्याह—आधेय इति । उत्पाद्य इत्यर्थः । यथा घटादेः पाकजो रूपादिः । अक्रियाजोऽनुत्पाद्यः । यथा—आकाशादेर्महत्त्वादिः । क्रिया तूत्पाद्यैव न नित्येति, तस्या द्वैविध्याभावाद्गुणत्वाभावः । नन्वेवं द्रव्यस्यापि गुणत्वं प्राप्नोति, अवयविद्रव्यमवयवद्रव्येषु निविशते, असमवायिकारणसंयोगनिवृत्तौ च विनाशात्ततोऽपैति, भिन्नजातीयेषु च हस्तपादादिषु दृश्यते, द्विविधं तन्नित्यानित्यभेदेन निरवयवस्य द्रव्यस्यात्मपरमाण्वादेर्नित्यत्वादवयविद्रव्यस्यानित्यत्वादित्यत आह—असत्त्वप्रकृतिरिति । अद्रव्यस्वभाव इत्यर्थः । 'पृथग्जातिषु' इत्यत्र व्यासः । समासे 'जात्यन्ताच्छ बन्धुनि' इति छः स्यात् । तत्र व्यक्तिषु जात्याधारेषु दृश्यमानो जातिषु दृश्यत इत्युच्यत इति 'वोतो गुणवचनात्' इति सूत्रे भाष्यकैयटयोः स्पष्टम् । **क्रिया च** भावना उत्पादयितुर्व्यापाररूपा साध्यत्वेनाभिधीयमानेति ज्ञेयम् । तदुक्तम्—'व्यापारो भावना सैवोत्पादना सैव च क्रिया' इति, 'यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते । आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते ॥' इति च । यावदिति । सर्वमित्यर्थः । सिद्धमसिद्धं वेति । सिद्धं वर्तमानध्वंसप्रतियोगि । तद्भिन्नमसिद्धम् । तच्च वर्तमानं भविष्यच्चेति द्विविधम् । तेन 'अपचत्' 'पक्ष्यति' 'पचति' इत्यादौ सर्वत्र साध्यत्वेनासत्त्वरूपत्वेनाभिधीयमाना क्रियेति क्रियाशब्दस्य रूढिर्दर्शिता । यौगिकत्वमप्याह—आश्रितेति । आश्रितक्रमं रूपं यस्यास्तत्त्वात् । पूर्वापरीभूतावयवकत्वादित्यर्थः । तदीयावयवानामधिश्रयणाद्यधःश्रयणपर्यन्तानां क्रमेणोत्पत्तेः । क्रियापदेन तत्समुदायोऽभिधीयते । यत्र च क्रमिको व्यापारोऽस्ति तत्र रूढिरादरणीयेति पौर्वापर्यारोपणेन वा सर्वत्र फलस्य स्वजनकव्यापारगतपौर्वापर्यारोपाद्यौगिकत्वम् । किंच क्रमिकावयवानामेकदासत्त्वेऽपि यत्किंचिदवयवसत्त्वकाले वर्तमानत्वव्यवहारः । अवयवावयविनोरभेदारोपात् । भूतभविष्यत्त्वव्यवहारस्तु सर्वेषामवयवानां भूतभविष्यत्त्वयोरेव । न तु यत्किंचित्क्रियाभूतत्वादौ । उक्तं च—'गुणभूतैरवयवैः समूहः क्रमजन्मनाम् । बुद्ध्या प्रकल्पितभेदः क्रियेति व्यपदिश्यते ॥' इति । अस्यार्थः—क्रमिकतत्तद्व्यापारं प्रति गुणभूतैर्गुणभावेन भासमानैरवयवैरुपलक्षितः एकत्वबुद्ध्या प्रकल्पितोऽभेदो यस्मिंस्तद्रूपः क्रमजन्मनां व्यापाराणां समूहः क्रियेति । अत्र क्षणनश्वराणां व्यापाराणां मेलनाभावेन बुद्ध्येत्युक्तम् । तथा च—बुद्धिजन्यसंस्कारद्वारा तेषां मेलनसंभव इति भावः । अत एव भाष्ये—'क्रिया हि नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूतावयवा न शक्यते पिण्डीभूता निदर्शयितुम्' इति । व्यापारसमुदायात्मिकायाः क्रियाया दर्शनायोग्यत्वोक्त्या तदवयवानां तद्विषयत्वं व्यति-

वस्तुधर्मः । शुक्लादयो हि गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्तयन्ति । द्रव्यशब्दा एकव्यक्तिवाचिनो हरिहरडित्थडवित्थादयः । क्रियाः साध्यरूपा वस्तुधर्माः पाकादयः । एषु हि अधिश्रयणावश्रयणान्तादिपूर्वापरीभूतो व्यापारकलापः पाकादिशब्दवाच्यः । एष्वेव हि व्यक्तेरुपाधिषु संकेतो गृह्यते । न व्यक्तौ । आनन्त्यव्यभिचारदोषापातात् ।

विर्भावतिरोभावावेव उत्पत्तिविनाशप्रतीतिविषयौ । वस्तुधर्मो द्रव्यमात्रवृत्तिः । विशेषाधानहेतुत्वमुपपादयति—**शुक्लादयो हीति** । साध्यरूपा जन्यस्वभावाः । एषु साध्यरूपवस्तुधर्मेषु । **अधिश्रयणेति** । अधिश्रयणादीत्यर्थः । अधिश्रयणं चुल्ल्यां स्थाल्या आरोपणम् आदिराद्यवयवो यस्य । अवश्रयणं चुल्ल्यां स्थाल्या अवरोपणम् । अन्तोऽन्तावयवो यस्य, तयोः कर्मधारयः । आदिशब्देन गृहनिर्गमादिग्रामान्तरप्रवेशान्तप्रभृतीनां ग्रहणम् । पाकादीत्यादिना गमनादिग्रहणम् । **एष्वेव हीति** । जात्यादिषु चतुर्षु मध्ये ये व्यक्तेरुपाधयो धर्माः जातिगुणक्रियास्वरूपास्तेष्वेवेत्यर्थः । संज्ञाशब्दानां तु व्यक्तावेव संकेतग्रहः । द्रव्यस्य शक्तिव्यतिरिक्तत्वाभावेनोपाधित्वाभावान्नात्वाभावेनोक्तदोषद्वयाभावाच्च । अत एवोक्तम्—'द्रव्यशब्दा एकव्यक्तिवाचिनः' इति । केचित्तु 'सज्ञाशब्दानां संज्ञायामेव संकेतग्रह उपस्थाप्योपस्थापकभावेनाविनाभावाद् व्यक्तेराक्षेपः' इत्याहुः । तन्न । संज्ञायाः शब्दानतिरिक्तत्वेन तस्य चोच्चारणभेदेन भिन्नतया निरुक्तदोषद्वयप्रसङ्गात् । एवं च डित्थत्वादिकं व्यक्तिस्वरूपमेव न तु पदार्थान्तरमित्यवधेयम् । **आनन्त्येति** । नानाव्यक्तिषु नानाशक्तिकल्पनागौरवमित्यभिप्रायः । ईश्वरेच्छापक्षे तद्विषयत्वस्य नानात्वकल्पनमेव गौरवमित्यवगन्तव्यम् । ननु नानन्तव्यक्तिषु शक्तिग्रहः, किंतु दृष्टव्यक्तावेवेति कुतो गौरवमित्यत आह—**व्यभिचारेति** । संकेतग्रहकालादृष्टव्यक्तावपि बोध्यस्य कार्यस्य सत्त्वाद् व्यक्तिसंकेतग्रह-

---

रेकमुखेन दर्शितम् । तस्माश्चाभिन्नैकबुद्धिविषयतयैकत्वव्यवहार इत्यपि बोध्यम् । अथ च शुक्लादीनां चलादीनां च प्रतिव्यक्तिभेददर्शनादानन्त्यव्यभिचाराभ्यां व्यक्तिशक्तिवाददोषाभ्यामिहापि कलुषीकरणमिति चेत्, तेषां लाघवात्प्रत्यभिज्ञाबलाच्चैकतायाः अभ्युपगमात् । तदुक्तम्—'गुणक्रियायदृच्छानां वस्तुत एकरूपाणामाश्रयभेदाद्भेद इव लक्ष्यते' इति । तथा च भेदप्रतीतिर्भ्रम एवेति भावः । इदमुपलक्षणम् । उत्पत्तिविनाशप्रतीतिरपि तथैव । वर्णनित्यतावादे गकाराद्युत्पत्तिविनाशप्रतीतेर्भ्रमत्वस्य स्वीकारात् । **यादृच्छिकस्तु** वक्ता स्वेच्छया डित्थादिशब्दाना प्रवृत्तिनिमित्तत्वे संनिवेशितो धर्मः स च 'परम्परया व्यक्तिगतश्चरमवर्णाभिव्यङ्ग्योऽखण्डः स्फोटः' इत्येके । 'आनुपूर्व्यव्यवच्छिन्नो वर्णसमुदायः' इत्यपरे 'केवला व्यक्तिरेव' इतीतरे । तत्राद्यमतद्वये विशेषणज्ञानाद्विशिष्टप्रत्ययः । तृतीयमते च निर्विकल्पात्मकः प्रत्ययः । तदित्थं चतुष्टयी शब्दानां प्रवृत्तिरिति दर्शनं व्यवस्थितम् । सर्वेषां शब्दानां जातिरेवार्थः । गुणक्रियाशब्दानां गुणक्रियागतायाः यदृच्छाशब्दानां च बालवृद्धैशुकाद्युदीरिततत्तच्छब्दवृत्तेस्तत्तत्समयभेदभिन्नार्थवृत्तेर्वा जातिरेवाभिधेयतासंभवात् । इति जातिशक्तिदर्शनमिति संक्षेपः ॥

अथ लक्षणा[1]—

[1]मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते ।
रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता ॥ ५ ॥

रूपकारणस्य सिद्धत्वाद् व्यभिचार इति भावः । ननु गुणक्रियाणां प्रतिव्यक्तिभिन्नत्वेन आनन्त्यव्यभिचाराभ्यां कथं संकेतग्रह इति चेत् न । तन्मते गुणादीनामपि जातिवदेकत्वमेव । भेदप्रतीतिस्तु आश्रयभेदादौपचारिकी । एतदसहमाना अन्ये जातावेव शक्तिरिति वदन्ति । यथा काव्यप्रकाशे—'संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा' इति । एतन्मते गवादौ गोत्वादिरिव, शुक्लादौ शुक्लत्वादिः, पाकादौ पाकत्वादिः, डित्थादौ डित्थत्वादिरस्ति । डित्थादीनां प्रकृत्यवस्थाकालभिन्नत्वेन भिन्नत्वाङ्गीकारात्तद्वृत्तिडित्थत्वादिजातिस्वीकारः । एवं शुक्लत्वादिजात्याश्रयस्य शुक्लादिगुणस्यैवाक्षेपः । पटादिपरत्वे तु लक्षणेति मन्तव्यम् । ननूपाधौ संकेतग्रहाङ्गीकारे 'विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे' इति न्यायाद् 'गामानय' इत्यादौ गोपदादिना कथं गवादेर्ग्रह इति चेत्, न । गवादेराक्षेपेण लाभात् । तदुक्तम्—'व्यक्त्यविनाभावात्तु जात्या व्यक्तिराक्षिप्यते' । यथा—'क्रियते' इत्यादौ कर्ता । 'कुरु' इत्यादौ कर्मेति । आक्षेपो नानुमानम् । व्याप्यादिज्ञानव्यतिरेकेणापि व्यक्तेरनुभवात् । किंतु स्मरणमेव, गोत्वादिप्रकारकगवादिस्मरणाभावेन गोत्वादिविशिष्टशाब्दबोधानुपपत्तेः । अत एवोक्तम्—'जातिशक्तं पदं व्यक्तिमेवानुभावयति स्मारयति च' इति । जातिशक्तमुपाधिशक्तमित्यर्थः ॥ **अथ लक्षणेति** । अभिधानिरूपणानन्तरं लक्षणा निरूप्यत इत्यर्थः । **मुख्यार्थस्या**भिधेयार्थस्य । **बाधे** अन्वयानुपपत्तिग्रहे । अत्र 'मुख्यार्थसंबन्धग्रहे' इत्यपि बोध्यम् । तेन विना लक्षणाया अग्राहकत्वात् । उक्तं च—'संबन्धानुपपत्तिभ्यां शब्दलक्षणा' इति । **तद्युक्त इति** । मुख्यार्थसंबन्धीत्यर्थः । मुख्यार्थासंबन्धिनि लक्षणा नास्तीति सूचनायैतत् । अन्यो मुख्यार्थतावच्छेदकातिरिक्तधर्मावच्छिन्नः । मुख्यार्थभिन्न इत्यर्थस्तु न मनोरमः । प्रयोजनाभावात् । स्वार्थस्यापि बोधिकायामुपादानलक्षणायां 'रामोऽस्मि सर्वं सहे' इति वक्ष्यमाणायां स्वार्थस्यैव दुःखसहिष्णुत्वेन

1. **मुख्येति** । यद्यपि 'काकेभ्यो दधि रक्ष्यताम्' 'छत्रिणो यान्ति' इत्यादौ न मुख्यार्थबाधस्तथापि तात्पर्यार्थविषयवाक्यार्थबोधाभावोऽत्राभिप्रेतः । आधे उपघातकत्वेनैव मुख्यार्थस्यान्वयो न तु काकत्वेन, अन्त्ये एकसार्थप्रवृत्तत्वेनैव मुख्यार्थस्यान्वयो न तु च्छत्रित्वेनेति नाव्याप्तिः । यत्र काकमात्रे तात्पर्यं न तत्र लक्षणा । एतेन तात्पर्यानुपपत्तिरेव लक्षणाबीजं नत्वन्वयानुपपत्तिरिति सूचितम् । यद्यपि 'यष्टीः प्रवेशय' 'गङ्गायां घोषः' इत्यादावुभयापेक्षादर्शनाद्विनिगमनाविरहस्तथापि 'गङ्गायां घोषः' इत्यत्र तात्पर्याभावे कुतो गङ्गापदेऽपि स्वार्थसंबन्धिनौकादौ न लक्षणा, तावतापि अन्वयानुपपत्तिशान्तेः । अतस्तात्पर्यानुपपत्तिरेव लक्षणाबीजमित्यवधेयम् । घोषपदस्य मीनादौ लक्षणा कि न स्यादिति तु न युक्तम् । न विधौ परः शब्दार्थ इति लक्षणायाः कर्तुमशक्यत्वादिति दिक् ॥

१. 'निरूप्यते' इत्यधिकं ग-पुस्तके.

'कलिङ्गः साहसिकः' इत्यादौ कलिङ्गादिशब्दो देशविशेषादिरूपे स्वार्थेऽसंभवन्यया शब्दशक्त्या स्वसंयुक्तान्पुरुषादीन्प्रत्याययति, यया च 'गङ्गायां घोषः' इत्यादौ गङ्गादिशब्दो जलमयादिरूपार्थवाचकत्वात्प्रकृतेऽसंभवन्स्वस्य सामीप्यादिसंबन्धसंबन्धिनं तटादिं बोधयति, सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम । पूर्वत्र हेतू रूढिः प्रसिद्धिरेव । उत्तरत्र 'गङ्गातटे घोषः' इति प्रतिपाद-

---

बोधिकायां रामशब्दलक्षणायामव्याप्त्याधायकत्वाच्च । अत एव 'कदली कदली–' इत्यादर्थान्तरसंक्रमितवाच्यलक्षणामूलध्वनेरुदाहरणमपि संगच्छते । अत्र द्वितीयकदल्यादिपदानां पौनरुक्त्या कदलीत्वादिना अन्वयमलभमानानां शीतत्वादिना कदल्यादिरूपमुख्यार्थस्यैव बोधकत्वेन लक्षणास्वीकारात् । एवं 'पण्डितकवयः कवयोऽन्ये कवयस्तु केवलं कवयः' अत्र द्वितीयकविपदस्य काव्यजन्यलाभपूजाख्यात्यादिभागित्वेन कवेरेवोपस्थापनेऽपि लक्षणा । एवं च सामान्यशब्दस्य विशेषपरत्वेऽपि लक्षणा संभवति । शक्यतावच्छेदकघटितविशिष्टधर्मस्यापि शक्यतावच्छेदकातिरिक्तत्वस्वीकारात् यथा 'त्वामस्मि वच्मि–' इत्यादौ । रूढिः प्रसिद्धिः । सा च भूरिप्रयोगरूपा तस्या ज्ञानात् । अवाचकशब्दप्रयोगः सप्रयोजनक इति सामान्यतः प्रयोजनज्ञानाद्वा । प्रयोजनस्य विशेषज्ञानं तु लक्षणाजन्यबोधानन्तरमेव भवतीति तस्य हेतुत्वमनुपपन्नम् । 'प्रयोजनादित्युद्देश्ये पञ्चमी' त्यन्ये । अत्र प्रागुक्तयोर्दण्डचक्रादिन्यायेन मिलितयोरेव कारणत्वम् । चरमयोस्तु तृणारणिमणिन्यायेन प्रत्येकमेवेति विशेषज्ञापनाय भिन्नविभक्त्या व्यवधानेन च तेषां निर्देशः । वक्तृतात्पर्यं हि लक्षणा । तच्चास्माच्छब्दान्मुख्यार्थसंबन्धी बोद्धव्य इति वक्तुरिच्छाविषयत्वम् । निरुक्तहेतवस्तु तस्या एव बोधकाः । एवं च निरुक्तहेतुत्रयजन्यज्ञानविषयीभूतलक्षणया मुख्यार्थसंबन्धी प्रत्याय्यत इति भावः । मुख्यार्थसंबन्धबोधिनी या व्यञ्जना तत्रैतादृशज्ञानविषयत्वाभावान्नातिव्याप्तिः । रूढिहेतुकायाः प्रयोजनहेतुकायाश्च लक्षणायाः प्रसिद्धलक्षणयोर्लक्षणां संगमयन्कारिका विवृणोति—**कलिङ्ग इति** । साहसं चेतनधर्मः । तस्माचेतने देशविशेषेऽनुपपत्तिं दर्शयति—**कलिङ्गादिशब्द इति** । देशविशेषे स्वार्थे वर्तमानः कलिङ्गादिशब्दोऽसंभवन्साहसिक्याद्यन्वययोग्यमर्थमभिधया बोधयितुमशक्नुवन्नित्यर्थः । स्वसंयुक्तान्स्वार्थसंबद्धान् । प्रकृते घोषवसनाद्यन्वययोग्येऽसंभवन्नभिधया वर्तितुमशक्नुवन् । केचिदभिधां स्वाभाविकं शब्दव्यापारं वदन्ति । तन्नये लक्षणायां वैलक्षण्यमाह—**स्वाभाविकेतरेति** । अन्ये त्वीश्वरेच्छाविषयत्वरूपमाहुः । तन्नये त्वाह—**ईश्वरेति** । अनुद्भाविता अनुत्थापिता । इदानींतनवक्तृभिरुत्थापितेति यावत् । पूर्वत्र कलिङ्ग इत्यादौ । उत्तरत्र गङ्गायामित्यादौ । **गङ्गातट इति** । प्रतिपादयतीति प्रतिपादनं वाक्यम्, तदलभ्यस्य । मुख्यशब्दघटितवाक्येनाप्रतिपाद्यस्येत्यर्थः । तीरस्य विप्रकृष्टांशगतशीतत्वाद्यपेक्षया संनिकृष्टांशगतशीत-

---

१. 'इत्यत्र' क. २. 'पण्डिताः' इत्यसमस्तं पुस्तकान्तरे.

नालभ्यस्य शीतत्वपावनत्वातिशयस्य बोधनरूपं प्रयोजनं हेतुं विनापि यस्यकस्यचित्संबन्धिनो लक्षणेऽतिप्रसङ्गः स्यात्, इत्युक्तम्—'रूढेः प्रयोजनाद्वापि' इति ।

केचित्तु 'कर्मणि कुशलः' इति रूढावुदाहरन्ति । तेषामयमभिप्रायः—कुशांल्लातीति व्युत्पत्तिलभ्यः कुशग्राहिरूपो मुख्योऽर्थः प्रकृतेऽसंभवन्विवेचकत्वादिसाधर्म्यसंबन्धसंबन्धिनं दक्षरूपमर्थं बोधयति । [1]तदन्ये न मन्यन्ते । कुशग्राहिरूपार्थस्य व्युत्पत्तिलभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वात् । अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तम् ।

त्वादेराधिक्यमत्रातिशयः । एवं च 'अतिशीतेऽतिपावने तीरे घोषः' इति व्यञ्जनाजन्यबोधो लाक्षणिकशब्दप्रयोगस्य प्रयोजनमिति भावः । 'कांश्चिन्नैव त्वशक्तितः' इति लक्षणाया निषेधः उक्तः । अशक्तितो रूढिप्रयोजनविरहात् । यथा—'कमले चरणाघातं मुखं मुमुखि तेऽकरोत्' । अत्र निर्जितत्वं लक्ष्यते । एषा नेयार्थलक्षणा दोषतया वक्ष्यते । सा च कविप्रयोगानर्हत्वात् प्रकृतलक्षणस्य लक्ष्या न भवतीति तत्रातिव्याप्तिवारणाय चरमहेतुद्वयं न्यस्तम् । तदेव दर्शयति—**हेतुमिति** । रूढिप्रयोजनयोरन्यतरमित्यर्थः । संबन्धिनो मुख्यार्थसंबन्धिनः । लक्षणे लक्षणायामुदाहरन्ति—'काव्यप्रकाशकारादयः' इति शेषः । लाति गृह्णाति । व्युत्पत्तिः प्रकृतिप्रत्ययविभागकल्पना । तल्लभ्यस्तत्प्रतिपाद्यः । प्रकृते लौकिककर्मान्वयेऽसंभवन्योग्यतामलभमानः पदार्थस्यान्वयानुपपत्तिप्रतिसंधानद्वारा लक्षणायामुपयोक्तित्वमित्यभिप्रायेणेदम् । **अन्य इति** । स्वपक्षाभिप्रायेण दक्षरूपस्यैवेत्येवकारेण कुशग्राहित्व्यवच्छेदः । अत्र हेतुमाह—**अन्यद्धीति** । व्युत्पत्तिलभ्यार्थप्रतीतौ प्रकारीभूतो धर्मो व्युत्पत्तिनिमित्तं यथा गोशब्दस्य गमनकर्तृत्वं संकेतग्रहे प्रकारीभूतो धर्मः प्रवृत्तिनि-

1. **तदन्य इति** । नातिरुचिरमेतत् । असति बाधकेऽवयवशक्ते रूढिशक्त्या नियन्त्रणायोगेन कुशलपदस्य कुशग्राहिणि शक्तत्वमव्याहतमेव । किंच प्रयोगप्रवाहेणैव प्रवृत्तिनिमित्तत्वस्वीकारे यौगिकव्यवहारस्य मूलच्छेदो दुर्वारः । तथा चाह्लादनार्थकाच्चदिधातोरौणादिके रकि निष्पन्नस्य चन्द्रपदस्य शशिनि योगशक्त्या नियन्त्रितस्याप्यन्यथा प्रवृत्तिनिमित्तत्वे तत्पदादेव स्वर्णकर्पूरकाम्पिल्लमेचकपदार्थानां भाने खण्डाखण्डत्वयोः को भेदः । अत एव 'अश्वगन्धादिपदमौषधिविशेषबोधे रूढम् । अश्वसंबन्धवत्तया वाजिशालाबोधे यौगिकमिदं यौगिकरूढमित्युच्यते । 'रूढियौगापहारिणी' इति प्रकरणाद्यभावे बोध्यम् । यत्र मण्डपपदादिभ्यो मण्डपानकर्त्रादि रूढ्यर्थमण्डपादिगुणवत्त्वेन बोधस्तत्र प्रथमप्रतीतरूढिविषयमुख्यार्थात्यागेन योगाद् रूढिपूर्वकलक्षणाया बलवत्त्वेन लक्षणयैव बोधः' इति मञ्जूषायां व्यवस्थापितम् । एतेन कुशलपदे दक्षत्वरूपाखण्डोपाधिमात्रं समर्थयतष्टीकाकृतोऽप्युक्तिर्न पेशला ॥

---

१. 'कैश्चित्' इति पुस्तकान्तरे.

व्युत्पत्तिलभ्यस्य मुख्यार्थत्वे 'गौः शेते' इत्यत्रापि लक्षणा स्यात् । 'गमेर्डोः' (उणादि–२।६७) इति[1] गमधातोर्डोप्रत्ययेन व्युत्पादितस्य गोशब्दस्य शयनकालेऽप्रयोगात् ॥

तद्भेदानाह—

मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये ।
स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा ॥ ६ ॥

मित्तं यथा गोत्वजातिः । शब्दानां व्युत्पत्तिनिमित्तमेव प्रवृत्तिनिमित्तमिति तु न नियमः । पाचकादिशब्दस्य द्वयोरैक्यसत्त्वेऽपि गवादिशब्दस्य व्यभिचारात् । प्रकृते तु कुशग्राहित्वरूपव्युत्पत्तिनिमित्तस्यानेकपदार्थघटितत्वेन गुरुत्वात्तदपेक्ष्य लघुना दक्षत्वरूपाखण्डोपाधिनैव कुशलशब्दस्य संकेतग्रहः । ननु रूढिवद्व्युत्पत्तिरपि पदार्थोपस्थापिकेति रूढिविषयस्येव व्युत्पत्तिविषयस्यापि मुख्यत्वमास्ताम्, इति चेत्, न । रूढ्या प्रतिरुद्धायाः व्युत्पत्तेः पदार्थोपस्थापकत्वाभावात् । तदुक्तं भट्टपादैः—'लब्ध्यात्मिका सती रूढिर्भवेद्योगापहारिणी । कल्पनीया तु लभते नात्मानं योगबाधतः ॥' इति लब्ध्यात्मिका जनितपदार्थोपस्थितिका कोषपरम्पराप्रसिद्धा सत्यनादिसिद्धा योगापहारिणी व्युत्पत्तिलभ्यार्थप्रतीतिप्रतिबन्धिका कल्पनीया । लाघवप्रतिसंधातृभिरिदानींतनैरुद्भावनीया । आत्मानं पदार्थोपस्थितिं न लभते न जनयति । योगबाधतः योगेन बाधनात् । रूढेस्तस्याः पदार्थोपस्थापकत्वस्य च कल्पनामपेक्ष्य कृत्स्नयोगस्यैव पदार्थोपस्थापकत्वमात्रं कल्प्यत इति भावः । व्युत्पत्तिलभ्यस्य मुख्यत्वस्वीकारे दोषमाह—**व्युत्पत्तिलभ्यस्येति** । मुख्यार्थत्वे मुख्यार्थत्वस्वीकारे शयनकाले गमनकर्तृरूपमुख्यार्थबाध इति भावः । यदि पुनरुणादिप्रत्ययानां व्युत्पत्तेः प्रायिकत्वमुपगम्यते तदा 'निषङ्गे सायकाः सन्ति' इत्यत्र लक्षणापत्तेर्दोषो द्रष्टव्यः । 'षो अन्तकर्मणि' इत्यस्माण्ण्वुल्प्रत्ययनिष्पन्नस्य सायकशब्दस्य विनाशाभावकालेऽपि प्रयोगादिति । लक्षणायाः सामान्यलक्षणमुक्त्वा विशेषलक्षणमाह—**मुख्यार्थस्येति** । अत्रापि यथेत्यध्याहार्यम् । तृतीयार्थे षष्ठी । **वाक्यार्थ इति** । सप्तम्यर्थो घटकत्वम् । तथा च मुख्यार्थस्य वाक्यार्थघटकान्वयबोधाय यया वृत्त्या वाक्यार्थे समभिव्याहृतपदार्थे आत्मनोऽविकारादन्यस्याप्यन्वयसिद्धये अन्वयबोधाय मुख्यार्थेन इतरस्य शक्यतावच्छेदकातिरिक्तधर्मावच्छिन्नस्य आक्षेपः प्रत्यायनम् एषोपादानलक्षणा स्यादित्यर्थः । संज्ञाबीजमाह—**आत्मनोऽपीति** । मुख्यार्थस्यापीत्यर्थः । उपादानात् प्रत्यायनात् ।

---

१. 'इति' क पुस्तके नास्ति. २. पुस्तकान्तरे 'भट्टैः' इत्येवास्ति. ३. 'जनित–' इत्यादिः परम्पराप्रसिद्धा' इत्यन्तः पाठः पुस्तकान्तरे न दृश्यते. ४. 'व्युत्पत्ति–' इत्यादिः '—भावः' इत्यन्तः पाठः पुस्तकान्तरे नास्ति. ५. 'अत्रापि यथेत्यध्याहार्यम्' इति पुस्तकान्तरे नास्ति. ६. 'वाक्यार्थ इति' इति पुस्तकान्तरे नास्ति. ७. पुस्तकान्तरे 'तथा च–' इत्यादिः '—एषोपादानलक्षणा स्यादित्यर्थः' इत्यन्तः पाठो न दृश्यते, किंतु तत्र 'वाक्यार्थघटकस्यान्वयोपपत्तये मुख्यार्थेन इतरस्य मुख्यार्थसंबन्धिन आक्षेपो झटित्युपस्थितिर्यया सा उपादानलक्षणेत्यर्थः । अत्र मुख्यार्थस्योपयोगित्वं स्वबाधसंबन्धज्ञानाभ्यामेव' इति पाठभिदोपलभ्यते. ८. 'अपरित्यागात्' इति पुस्तकान्तरे.

रूढावुपादानलक्षणा यथा—'श्वेतो धावति'। प्रयोजने यथा—

मुख्यार्थविषयिणी प्रतीतिरुपादानम्, तद्धेतुर्लक्षणा उपादानलक्षणा। यद्वा उपादीयते स्वार्थो गृह्यतेऽनेनेत्युपादानम्, तन्नास्ति लक्षणा उपादानलक्षणा। 'उपादानं लक्षणं च' इति काव्यप्रकाशे नाम व्यक्तम्। अत्र लक्ष्यार्थः। क्वचिन्मुख्यार्थ एव। क्वचिन्मुख्यार्थविशिष्टो मुख्यार्थभिन्न एव। क्वचिन्मुख्यार्थस्तद्भिन्नश्चेत्युभयम्। आद्यो यथा—'कदली कदली—' इत्यादि। द्वितीयो यथा—'कुन्ताः प्रविशन्ति' इति। तृतीयो यथा—'एते राजकुमारा गच्छन्ति' इति। अभिधाजन्यमुख्यार्थोपस्थितेरन्वयानुपपत्तिग्रहाद्युपक्षीणत्वेन तदुपस्थितये पुनर्लक्षणापेक्षेत्यवगन्तव्यम्। ननु 'छत्रिणो यान्ति' इत्यादावुपादानलक्षणायामन्वयानुपपत्तिग्रहविरहात्कथं सामान्यलक्षणगमनम्। न चात्र लक्षणैव नास्ति, किंतु 'देवदत्तो याति' इत्यादिवाक्ये तद्भृत्यानुसरणमिव वक्त्रादिवैशिष्ट्यसचिवया व्यञ्जनयैव छत्रिभिन्नगमनादि प्रतीयत इति वाच्यम्। तथा सति राजकुमारेषु तत्सदृशेषु च गच्छत्सु 'राजकुमारा गच्छन्ति' इति गौणोपादानलक्षणोदाहरणमसंगतं स्यात्। उदीच्यवोधेऽनुभवसिद्धं मुख्यार्थविषयत्वं च न स्यात्। अत्र केचित्—'मुख्यार्थबाधश्च तात्पर्यविषयस्यान्वयस्य मुख्यतावच्छेदकरूपेण निर्वाहे एव। 'गङ्गायां घोषः' इत्यादौ तात्पर्यविषयस्य तीरादौ घोषान्वयस्य मुख्यतावच्छेदकप्रवाहत्वादिना 'छत्रिणो यान्ति' इत्यादौ तात्पर्यविषयस्य छत्र्यच्छत्रिणां गमनाद्यन्वयस्य मुख्यतावच्छेदकच्छत्रित्वादिना चानिर्वाहात्' इत्याहुः, तन्न। तात्पर्यस्य प्रथममुप-

---

१. 'मुख्यार्थ—' इत्यादि· '—यद्वा' इत्यन्तः पाठः पुस्तकान्तरे नास्ति. २ एकस्मिन्पुस्तके "उपादानलक्षणं चेत्युक्ता शुद्धैव सा द्विधा' इति काव्यप्रकाशे तन्नाम। अत्र वाक्यार्थ इत्यनेन तात्पर्यविशेषो धात्वर्थो ग्राह्यः, अन्यथेदमनर्थकम्, तेन 'छत्रिणो यान्ति' इत्यत्र छत्रिगमनकर्तृत्वरूपवाक्यार्थस्य घटकोभयान्वयबोधाय मुख्यार्थस्याक्षेपो युज्यते। 'कदली कदली—' इत्यादावुपादानलक्षणासंग्रहाय शक्यतावच्छेदकातिरिक्तेति। अत्र क्वचिन्मुख्यार्थ एव धर्मान्तरेण प्रतीयते। यथा—'कदली कदली—' इत्यादौ। अत्र द्वितीयकदलीपदं शैत्यरूपधर्मान्तरेण कदलीमेव बोधयति। क्वचिन्मुख्यार्थस्तद्भिन्नश्च धर्मान्तरेण प्रतीयते। यथा—'काकेभ्यो रक्ष्यतामन्नम्' इत्यत्र काकपदेनात्रोपघातकत्वेन काककुक्कुरमार्जारा लक्ष्यन्ते। अत्र प्रयोजनाभावाद्वृत्तिः। 'छत्रिणो यान्ति' इत्यादौ छत्रिसार्थवाहित्वेन छत्रिणस्तद्भिन्नाश्च प्रतीयन्ते। छत्रिणां बाहुल्यमनितरत्र प्रयोजनम्। क्वचिन्मुख्यार्थविशिष्टः प्रतीयते। यथा—'श्वेतो धावति' 'कुन्ताः प्रविशन्ति' इति। ननु 'काकेभ्यो रक्ष्यतामन्नम्' इत्यादावन्वयानुपपत्तिरेव नास्ति कथं लक्षणेति चेत्, न। तात्पर्यविषयस्यान्वयस्य काकत्वरूपशक्यतावच्छेदकेनानिर्वाहः स्फुटः। एवमन्यत्रापि। अन्यथेहापि। गतसिद्धये स्वस्य प्रकारतयान्वयसिद्धये। आक्षिप्यन्ते स्वसंपर्किपदैः प्रत्याय्यन्ते। मुख्यार्थस्योपयोगित्वान्वयानुपपत्तिज्ञानेन स्वसम्बन्धित्वज्ञानेन च संभवति। अत्रेदमवधेयम्—'श्वेतो धावति' इत्यादाविंतराक्षेपेऽपि श्वेतस्य गुणतया क्रियावैशिष्ट्यरूपकर्तृत्वस्यापि बाध इति। तस्योपलक्षणरूपप्रकारतयैव बोधः। 'यष्टयः प्रविशन्ति' इत्यादौ यष्टीनां क्रियासंभवाद्विशेषणतया बोधः। कृत्रिमत्वरूपकर्तृत्वपक्षेतूभयत्रैव तद्बाधाद्द्वयोरेवोपलक्षणत्वेन प्रकारत्वमिति प्रयोजनीभूतज्ञानविषयः। एवमन्यत्रापि। अस्याः संज्ञान्तरमाह—इयमेवेति। अजहदजत् स्वार्थो याम्। 'गां वह्नीयात्' इत्यादौ नोपादानलक्षणोदाहर्तव्या। रूढिप्रयोजनाभावात्। किंत्वाक्षेपादेव व्यक्तेस्तत्र लाभः। न चात्र प्रयोगप्राचुर्यरूपा रूढिरस्तीति वाच्यम्। लक्ष्यार्थविनिर्मोकेण शक्यार्थे प्रयोगार्हस्य शब्दस्य लक्ष्यार्थे प्रयोगप्राचुर्यं रूढिरिति विनिक्षणात्। अन्यथा 'जात्या व्यक्तिराक्षिप्यते' इति प्राचीनप्रवादविलयः स्यात्॥" इति पाठो दृश्यते.

'कुन्ताः प्रविशन्ति' । अनयोर्हि श्वेतादिभिः कुन्तादिभिश्चाचेतनतया केवलैर्धावनप्रवेशनक्रिययोः कर्तृतयान्वयमलभमानैरेतत्सिद्धये आत्मसंबन्धिनोऽश्वादयः पुरुषादयश्चाक्षिप्यन्ते । पूर्वत्र प्रयोजनाभावाद्रूढिः । उत्तरत्र तु कुन्तादीनामतिगहनत्वं प्रयोजनम् । अत्र च मुख्यार्थस्यात्मनोऽप्युपादानम् । लक्षणलक्षणायां तु परस्यैवोपलक्षणमित्यनयोर्भेदः । इयमेवाजहत्स्वार्थेत्युच्यते ॥

स्थापकाभावेनानुपस्थितौ तद्घटितान्वयानुपपत्तेरप्यनुपस्थितेः । न च प्रकरणादिना तदुपस्थितिः, कथमनुपस्थिते तीरादौ मुख्यार्थसंबन्धग्रह इति वाच्यम् । तथा सत्यलमन्वयानुपपत्तिप्रतिसंधानादिना, वक्तृतात्पर्यलक्षणायाः प्रकरणादिनैवोपस्थितिसंभवात् । नन्वन्वयव्यतिरेकाभ्यामन्वयानुपपत्तिग्रहादेरपि कारणत्वमवगम्यते, प्रकरणादिना विशिष्य ज्ञातायामनेकार्थशब्दाभिधायामतिव्याप्तिवारणाय तस्योपादानं सार्थकमिति चेदन्वयानुपपत्तिरेवास्ताम् । किमपरेण मुख्यार्थसंबन्धग्रहमन्तरेण । यस्यकस्यचिदुपस्थापिकायां नेयार्थलक्षणायामतिव्याप्तिवारणाय तदिति चेत्तदेवास्तु । किमाद्येन । तेनैव नानार्थशब्दाभिधावारणसंभवात् । एवं च 'छत्रिणो यान्ति' इत्यादौ व्यभिचाराद् व्यावृत्त्यभावाच्च अन्वयानुपपत्तिज्ञानमनुपादेयमेव तस्य लक्षणाविशेषज्ञापकत्वम् । लक्षणासामान्यज्ञापकं तु मुख्यार्थसंबन्धज्ञानमेव । अत एवोक्तम्—'अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता ॥' इति । अभिधेयस्याविनाभूतमविनाभावः संबन्धमात्रं तस्मात्तद्ग्रहात् प्रतीतिर्यस्या वृत्तेः सा लक्षणोच्यत इत्यर्थः । अन्यच्च 'शक्यादशक्योपस्थितिर्लक्षणा' इति । शक्यात् शक्यसंबन्धज्ञानात् । उपस्थीयतेऽनयेत्युपस्थितिः । शक्यसंबन्धज्ञानज्ञाता शक्यतावच्छेदकभिन्नधर्मावच्छिन्नोपस्थितेरुपायो लक्षणेत्यर्थः । अनयोर्यथाश्रुतार्थस्तु न सम्यक् । वक्तृतात्पर्यविशेषरूपाया लक्षणायाः स्वकार्योपस्थितिरूपत्वाभावात् । एवं 'छत्रिणो यान्ति' इत्यादावेकसार्थवाहित्वरूपशक्यसंबन्धज्ञानादेव ज्ञातया लक्षणया छत्रिसार्थवाहित्वेन छत्र्यच्छत्रिण उपस्थाप्यन्ते । नत्वत्रान्वयानुपपत्तिप्रतिसंधानापेक्षापीति । उक्तोदाहरणयोर्लक्षणं योजयति—**अनयोर्हीति** । एतत्सिद्धये धावनप्रवेशनकर्तृत्वान्वयबोधाय । **आत्मसंबन्धिन इति** । यथायथं समवायिनः स्वसंयोगिनश्चेत्यर्थः । आक्षिप्यन्ते प्रत्याय्यन्ते । प्रयोजनं प्रयोजनीभूतज्ञानविषयः । एवमन्यत्रापि । अस्याः संज्ञान्तरमाह—**इयमेवेति** । अजहदित्यजन्त्स्वार्थो मुख्यार्थो यामिति विग्रहः । अत्र 'श्वेतो धावति' इत्युदाहरणं चिन्त्यम् । धावनानुकूलकृतिरूपस्य धावनकर्तृत्वस्याश्वसंबन्धेनापि श्वेतगुणेऽन्वयासंभवात् । न च 'कुन्ताः प्रविशन्ति' इत्यादौ यथा कुन्तस्याचेतन-

---

1. **अजहदिति** । ज्ञानेन्द्रसरस्वतीचरणास्तु—'जहत्स्वं पदं यं स जहत्स्वः, सोऽर्थो यस्यामिति बहुव्रीहिगर्भो बहुव्रीहिः' इत्याहुः । स्वशब्दस्य सर्वनामत्वात्पूर्वनिपाते प्राप्ते भाष्यप्रयोगाद्राजदन्तादित्वाद्वा न पूर्वनिपातः ॥

अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये ।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा ॥ ७ ॥

रूढिप्रयोजनयोर्लक्षणलक्षणा यथा—'कलिङ्गः साहसिकः', 'गङ्गाया घोषः' इति च । अनयोर्हि पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये कलिङ्गगङ्गाशब्दावात्मानमर्पयत ।

यथा वा—

'उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम् ॥'

स्यापि पुरुषसबन्धेन प्रवेशकर्तृत्वमुपचर्यते तथात्राप्यचेतनस्य वावनकर्तृत्वमौपचारिकमिति वाच्यम् । कुन्तस्य पुरुषसबन्धोत्पन्नक्रियासबन्धेनैव कर्तृत्वोपचारात् । प्रकृते तु श्वेतगुणस्याश्वसबन्धेनापि क्रियासबन्धासभवात् । तस्माल्लक्षणलक्षणाया एव तदुदाहरणम् । एव च 'श्वेत शोभते' 'श्वेत पश्यति' इत्यादेतदुदाहरण बोध्यम् । अत्र श्वेतगुणविशिष्टाश्वस्य शोभादर्शनयोरन्वयस्तात्पर्यविषय । यत्र शक्यस्योपाधेर्व्यक्तिव्यतिरिक्तप्रयोगरूपा रूढिरस्ति तत्र लक्षणयैवाविनाभूताया अपि व्यक्तेरुपस्थिति । न ल्लाक्षेपेण । गवादिपदाना तु तादृशरूढे प्रयोजनस्य चाभावाल्लक्षणाया असभवादाक्षेपेणैव व्यक्तेरुपस्थापकत्वमित्यभिप्रायेणेदमुदाहरणमुपन्यस्तम् । 'गुणे शुक्लादय पुसि गुणिलिङ्गास्तु तद्वति' इति विशिष्टशक्तिवादिना मते लक्षणात्र नास्तीत्यवधेयम् । लक्षणलक्षणामाह—**अर्पणमिति** । अत्रापि यथेत्यनुपज्यते । स्वमभिव्याहृतपदार्थे मुख्यार्थभिन्नस्यैवान्वयबोधाय यया वृत्त्या शब्देनैवात्मनोऽर्पण मुख्यार्थभिन्नबोधेनोपयोगीकरणम् । एषा लक्षणलक्षणा स्यादिति सबन्ध । सङ्गतीबीजमाह—**उपलक्षणहेतुत्वादिति** । वाक्यार्थान्वयिनो मुख्यार्थस्येतरव्यावृत्तिबोध उपलक्षणम् । 'कलिङ्ग साहसिक' इत्यादौ वाक्यार्थे साहसादावन्वयिनो मुख्यार्थस्य देशविशेषादे पश्चालप्रभृतेर्व्यावृत्तिबोधो लक्षणयैव जायते' इत्यन्ये । तन्न । 'उपदिशति कामिनीना—' इत्यादौ मुख्यार्थस्येतरव्यावृत्तिबोधाभावेनाव्याप्त्यापत्ते । एव च वाक्यार्थान्वयिमुख्यार्थामिश्रितमुख्यार्थान्यपदार्थोपस्थितिरूपलक्षणमिहावगन्तव्यम् । 'उपदिशति—' इत्यादौ शिक्षावचनरूपोपदेशेनामिश्रित एवाविष्कार प्रतीयते । 'कलिङ्ग साहसिक' इत्यत्र तु देशविशेषरूपमुख्यार्थस्य मिश्रितस्य पुरुषस्य प्रतीतिरस्ति । किंतु तस्य वाक्यार्थान्वयित्वासभवेन विशिष्टमुख्यार्थामिश्रण सभवत्येव । 'कुन्ता प्रविशन्ति' इत्यादावुपादानवारणाय मिश्रितान्त विशेषणम् । 'कलिङ्ग साहसिक' इत्यादिसग्रहाय वाक्यार्थान्वयीति मुख्यार्थविशेषणम् । लक्ष्यते[1] उपलक्ष्यतेऽनेनेत्युपलक्षणम् । तत्रात्मा लक्षणा उपलक्षणलक्षणा । पूर्वत्रात्मनोऽप्युपादानादित्युपादानपदम्, अत्रोपलक्षणहेतुत्वादित्युपलक्षणपद च भावसाधनमवगन्तव्यम् । क्रमेणोदाहरति—**रूढिप्रयोजनयोरिति** । अर्पयत यथायथ पुरुषतटबोधेनोपयोगीकुरुत । **उपकृत-**

---

१ 'लक्ष्यते' इति पुस्तकान्तरे नास्ति

अत्रापकारादीनां वाक्यार्थेऽन्वयसिद्धये उपकृतादयः शब्दा आत्मानमर्पयन्ति । अपकारिणं प्रत्युपकारादिप्रतिपादनान्मुख्यार्थबाधो वैपरीत्यलक्षणः संबन्धः फलमपकारातिशयः । इयमेव जहत्स्वार्थेत्युच्यते ॥

आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा ।

ताः पूर्वोक्ताश्चतुर्भेदलक्षणाः ।

मिति । यत्र भवता बहूपकृतं तत्र किमुच्यत इत्यर्थः । 'तत्र' इत्येव क्वचित्पुस्तके पाठः । परमुत्कृष्टं यथा स्यात्तथा सुजनता प्रथिता प्रकटीकृता । यद्वा 'परम्' इति वान्तमव्ययमेवकारार्थकम् । सुजनता प्रथितैवेत्यर्थः । सुखितं यथा स्यात्तथा आस्स्व तिष्ठ । ततो बहूपकरणसुजनताप्रथनाभ्यां शरदां वत्सराणां शतमिति । अविच्छेदे द्वितीया । **अत्रापकारादीनामिति** । आदिपदादसुजनतासुखितयोर्ग्रहणम् । **उपकृतादय इति** । आदिपदात्सुजनतासुखितयोर्ग्रहणम् । संज्ञान्तरमाह—**इयमेवेति** । लक्षणलक्षणैवेत्यर्थः । जहत्त्यजहत्स्वार्थौ यामिति विग्रहः । पुनरपि लक्षणाया द्वैविध्यमाह—**आरोपाध्यवसानाभ्यामिति** । अत्र विशेषणे तृतीयाँ । तेन सारोपाः साध्यवसानाश्चेति । 'अश्वः श्वेतः' इत्यादौ निराकाङ्क्षपदद्वयेन धारावाहिकभेदप्रतीतिरेव जायते । ननु लक्षणाजन्यप्रतीतिरिति तत्प्रतिबन्धकः पदयोः समानविभक्तिकत्वबलेन शक्यलक्षणयोरभेदारोपः कल्पनीय इति भावः । ननु भेदप्रतीत्यनन्तरमभेदारोप आहार्य एव संभवति, तस्य प्रतिबन्धकत्वं केनापि नाङ्गीक्रियत इति चेत्, न । लाक्षणिकबोधानुरोधेन शुक्लगुणविशिष्टबोधाभिप्रायबोधसहकृतस्याहार्यस्याप्यभेदारोपस्य प्रतिबन्धकोऽस्तु, किमाहार्यस्य प्रतिबन्धकत्वकल्पनेनेति वाच्यम् । ग्राह्याभावावगाहित्वेन तस्य प्रतिबन्धकत्वकल्पनाया अन्याय्यत्वात् । वस्तुतस्तु आहार्यत्वस्य तत्प्रतिबन्धकत्वस्य च कल्पनामपेक्ष्यावश्याङ्गीकरणीयस्य सहकारिण एव प्रतिबन्धकत्वकल्पने लाघवमस्ति, तथापि प्राचीनमतानुसारादेवं व्याख्यातमिति । प्रतीयमानेन लक्ष्यार्थेन शक्यार्थस्याहार्यभेदप्रतीतिरध्यवसानम् । लक्षणाजन्यपदार्थोपस्थितेः प्राक्काले तादृशारोपाध्यवसानयोः सत्त्वाल्लक्षणायास्तद्वैशिष्ट्यमवगन्तव्यं

---

१. 'ताः पूर्वोक्ताश्चतुर्भेदलक्षणाः' इति ग-पुस्तके नास्ति. २. पुस्तकपञ्चके 'तच्च' इत्येव पाठः प्राप्यते. ३. 'अनुपकारादीनां' इति टीकास्थ पाठः. ४. पुस्तकान्तरे "जनकतासंबन्धेन आरोपाध्यवसानाभ्यां विशिष्टेत्यर्थः । लक्षणाजन्यबोधोत्तरं हि वाक्यस्य समानाधिकरणपदघटितत्वरूपवैशिष्ट्यसचिवयार्थ्या व्यञ्जनया शक्यलक्ष्ययोराहार्याभेदप्रतीतिरूपारोपाध्यवसाने जन्येते । केचित्तु 'पदयोः समानविभक्तिकत्वबलेन लक्षणाजन्यबोधात्प्रागेव शक्यलक्ष्ययोरभेदारोपो भवति' इत्याहुः । तन्न । रूपकालंकारवदाहार्याभेदप्रतीतिरूपशाब्दबोधजनने वाक्यस्य निराकाङ्क्षतया पुनर्लक्षणया वाक्यार्थजनकत्वासंभवात् ! अत एव काव्यप्रकाशकारेण 'गौर्वाहीकः' इत्यत्राहार्याभेदप्रतीतिर्लक्षणा प्रयोजनत्वेनाङ्गीकृता । गौणीमूलकत्याभेदारोपस्य रूपकत्वमङ्गीकृतं च । आरोपाध्यवसानयोर्विशेषग्रहणार्थं निरुक्तलक्षणयोः स्वरूपमाह—विषयस्येति । विषयस्य लक्षणाजन्यबोधविशेष्यस्यानिगीर्णस्य उच्चरितशब्दप्रतिपादितस्य अन्यतादात्म्यप्रतीतिकृत् । शक्यार्थाभेदप्रतीतिजनिका लक्षणाजन्यवाक्यार्थबोधानन्तरं जायमानस्य तादृशाभेदारोपस्य लक्षणाजन्यत्वाङ्गीकारात् ।" इति पाठो दृश्यते.

विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत् ॥ ८ ॥
[1]सारोपा स्यान्निगीर्णस्य मता साध्यवसानिका ।

[2]विषयिणा अनिगीर्णस्य विषयस्य तेनैव सह तादात्म्यप्रतीतिकृत्सारोपा । इयमेव रूपकालंकारस्य बीजम् । रूढावुपादानलक्षणा सारोपा यथा—'अश्वः श्वेतो धावति' । अत्र हि श्वेतगुणवानश्वोऽनिगीर्णस्वरूपः स्वसमवेतगुणतादात्म्येन प्रतीयते । प्रयोजने यथा—'एते कुन्ताः प्रविशन्ति' । अत्र सर्वनाम्ना कुन्तधारिपुरुषनिर्देशात्सारोपत्वम् । रूढौ लक्षणलक्षणा सारोपा यथा—'कलिङ्गः पुरुषो युध्यते' । अत्र पुरुषकलिङ्गशब्दयोराधाराधेयभावः संबन्धः । प्रयोजने यथा—'आयुर्घृतम्' । अत्रायुष्कारणमपि घृतं कार्यकारणभाव[3]संबन्धसंबन्ध्यायुस्तादात्म्येन प्रतीयते । अन्यवैलक्षण्येनाव्यभिचारेणायुष्करत्वं प्रयोजनम् ।

कलपरिचेयम् । तयोः स्वरूपमाह—**विषयस्येति** । निरुक्तारोपविशेष्यस्येत्यर्थः । अनिगीर्णस्य प्रयुक्तशब्दप्रतिपादितस्य । अन्यतादात्म्यप्रतीतिकृत् स्वजन्यपदार्थोपस्थितिद्वारा शक्यतावच्छेदकातिरिक्तधर्मावच्छिन्नस्याभेदप्रतीतिकृद्या लक्षणा सा सारोपा स्यादित्यर्थः । 'अश्वः श्वेतो धावति' इत्यत्रापि 'धावति' इत्यत्र 'शोभते' इति द्रष्टव्यम् । अन्यथोपादानलक्षणा न स्यादिति प्रागेव दर्शितम् । अत्र निरुक्तारोपसत्त्वमुपपादयति—**अत्र हीति** । 'लक्षणाजन्यपदार्थोपस्थितेः प्राक्काले' इति शेषः । अनिगीर्णस्वरूपः प्रयुक्तशब्देन प्रतिपाद्यः । **एते कुन्ता इति** । विषयस्य सामान्यवाचिना सर्वनाम्ना निर्देशेऽपि विशेषरूपेणानुपस्थितौ साध्यवसाना लक्षणैवेति काव्यप्रकाशकारमतम् । तद्वद्भूतलमिति प्रतीतिसत्त्वे 'घटाभाववद्भूतलम्' इति प्रतीत्यनुदयात्सर्वनाम्नोऽपि विशेषरूपेणोपस्थापकत्वं कल्प्यत इत्यभिप्रायेण पूर्वमतमनङ्गीकृत्य तत्रापि सारोपा लक्षणेति दर्शयति—**अत्र सर्वनाम्नेति । आयुर्घृतमिति** । अत्र शक्यसंबन्धारोपं च दर्शयति—**आयुष्कारणमपीति** । अन्यवैलक्षण्येनाव्यभिचारेणेत्यत्र वाकारो बोध्यः । लक्षणाबीजं विविधं शक्यसंबन्धं दर्शयन्बहून्युदाहरणान्याह—

---

1. **सारोपेति** । आरोपेण सह वर्तत इति सारोपा । विषयविषयिणोर्भेदेनोपन्यासोऽत्रारोपार्थः । विषयनिगरणेन विषयिणोऽभेदप्रतिपत्तिरध्यवसानम्, तेन सह वर्तत इति साध्यवसाना । विषयनिष्ठासाधारणधर्मप्रतिपत्तिसहकृतान्यस्यान्यतादात्म्यप्रतीतिः सारोपा । विषयनिष्ठासाधारणधर्मप्रतीत्यसहकृतान्यस्यान्यतादात्म्यप्रतीतिः साध्यवसाना । एवं च लक्ष्यवाचकपदसत्त्वासत्त्वमात्रेणारोपाध्यवसानव्यवहार इति बोध्यम् ॥

---

१. 'विषयिणा' इत्यारभ्य 'बीजम्' इत्यन्तं क-ख-घ पुस्तकेषु नास्ति. २. 'लक्षणलक्षणा सारोपा' इत्यधिकं ख-पुस्तके. ३. 'कार्यकारणसंबन्धादायुस्तादात्म्येन' क; 'कार्यकारणसंबन्धेन तदात्मनोपचरितम्' ग. ४. 'अव्यभिचारेण' इति ग-पुस्तके नास्ति. ५. 'आयुरेवेदम् इत्यत्र साध्यवसानायामव्यभिचारेणायुष्करत्वं प्रयोजनम्' इत्यधिकं ग-पुस्तके.

[1]यथा वा—राजकीये पुरुषे गच्छति 'राजासौ गच्छति' इति । अत्र स्वस्वामिभावलक्षणः संबन्धः । यथा वा—[1]अग्रेमात्रे[3]ऽवयवभागे 'हस्तोऽयम्' । अत्रावयवावयविभावलक्षणसंबन्धः । 'ब्राह्मणोऽपि तक्षासौ' । अत्र तात्कर्म्यलक्षणः । 'इन्द्रार्थासु स्थूणासु अमी इन्द्राः' । अत्र तादर्थ्यलक्षणः संबन्धः । [2]एवमन्यत्रापि । निगीर्णस्य पुनर्विषयस्यान्यतादात्म्यप्रतीतिकृत्साध्यवसाना । अस्याश्चतुर्षु भेदेषु पूर्वोदाहरणान्येवं ॥

राजकीय इति । अत्र राजकर्मातिशयः परिच्छेदातिशयौ राजवदलङ्घ्यशासनत्वं वा प्रयोजनम् । अवयवभागे इत्यत्र भागशब्दः स्वरूपार्थः । अत्र प्रयोजनाभावाद्रूढिरेव । हस्तवत्कार्यकारित्वं प्रयोजनमित्यन्ये । ब्राह्मणोऽपीत्यपिकारात्क्षत्रियादिपरिग्रहः । तक्षा जातिविशेषः । समस्ततक्षकर्मणि नैपुण्यमत्र प्रयोजनम् । **इन्द्रार्थास्विति** । इन्द्रपूजार्थं कल्पितास्वित्यर्थः । स्थूणासु स्तम्भेषु । इन्द्रवत्पूज्यमानत्वमत्र प्रयोजनम् । एतदुदाहरणचतुष्टयमपि सारोपाया एव । '—निगीर्णस्य मता साध्यवसानिका' इति कारिकाञ्चलं(दलं) व्याकरोति—**निगीर्णस्येति** । शब्दं विनैवाक्षेपादिना प्रतीयमानस्य विषयस्य निरुक्ताध्यवसानविशेषस्य । पूर्वोदाहरणान्येवेति । श्वेतो धावति । कुन्ताः प्रविशन्ति । कूलिङ्गः साहसिकः । गङ्गायां घोषः [illegible] तवसतीति । एतानीत्यर्थः । एष्वश्वादीनां विशेष्याणां शब्दं विनैव प्रतीयमानत्वाद् [illegible] यायाम्' इत्यादौ तीरं विशेष्यम् । तच्च शब्दं विनैव प्रतीयते । पुनरपि लक्ष-

1. **अग्रेति** । अग्रहस्त इत्यत्राग्रमात्रेऽवयवस्वरूपे हस्तशब्दो लाक्षणिक । हस्तावयवेन हस्तव्यापारं संपादयतीति पराक्रमातिशयः प्रयोजनं व्यङ्ग्यम् । [illegible] । हस्तस्याग्रमिति षष्ठीसमासे तु । 'पीता कार्पटिकैर्गङ्गा' इत्युदाहार्यम् । इह गङ्गाशब्दो गङ्गावयवे लाक्षणिक इति ध्येयम् । अवयवपुञ्ज एवावयवीति मतेऽवयवान्तरव्युदासाय मात्रम् ॥

2. **एवमिति** । गौतमोऽप्याह—'सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणबालकटराजसक्तुचन्दनगङ्गाशकटान्नपुरुषेष्वतद्भावेऽपि तदुप-

१. 'यथा च' क-ग; ख-पुस्तके तु 'यथा' इत्येव. २. 'बाहुमात्रे' ख. ३. 'अवयवे' ग. 'हस्तावयवे भागे' घ; क-पुस्तके तु 'अग्रमात्रे' इत्येव दृश्यते. ४. 'भाव' इति ख-पुस्तके नास्तिः ५. 'तदेवमष्टप्रकारा लक्षणा' ग. ६. 'इति' पुस्तकान्तरे नास्ति. ७. कुत्रचित् "एषु यथायथमेतदादिपदमध्याहार्यम् । एतेन लक्षणात्वावच्छेदेन सारोपात्वसाध्यवसानात्वान्यनरधर्मयोगित्वं ग्रन्थकृतां संमतम् । वस्तुतस्तु 'त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति' इत्यादौ 'उपदिशति कामिनीन-' इत्यादौ चाध्याहारेणापि समानविभक्तिकपदासंभवात् 'कदली कदली करभः करभः' इत्यादौ 'रामोऽस्मि सर्वंसहे' इत्यादौ च शक्यलक्ष्ययोर्भेदाभावान्निरुक्तारोपाध्यवसानासंभवात्तादृशनियमस्य व्यभिचारः । अत एव काव्यप्रकाशकारेण 'सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा । विषयस्यन्तःकृतेऽन्यस्मिन्साभ्यात्साध्यवसानिका ॥' इति लक्षणं कृतम् । अन्योपादानत्वनिरुक्तप्रकारद्वयातिरिक्तप्रकारावच्छिन्ना लक्षणात्वान्यतरव्याप्यलक्षणाविभाजकधर्मान्तरावच्छिन्नेत्यर्थः । एतेन लक्षणाविशेषस्यैव सारोपात्वसाध्यवसानात्वान्यतरधर्मयोगित्वं प्रतीयते । न तु यावतीनां लक्षणानाम् । एवं च 'गङ्गायां घोषः' इत्यादाविदमादिपदाध्याहारं विनापि लक्षणा संगच्छते ।" इत्यधिकं दृश्यते.

सादृश्येतरसंबन्धाः शुद्धास्ताः सकला अपि ॥ ९ ॥
सादृश्यात्तु मता गौण्यस्तेन षोडश भेदिताः ।

ताः पूर्वोक्ता अष्टभेदा लक्षणाः । सादृश्येतरसंबन्धाः कार्यकारणभावादयः । अत्र शुद्धानां पूर्वोदाहरणान्येव[2] । रूढावुपादानलक्षणा सारोपा गौणी यथा—'एतानि तैलानि हेमन्ते सुखानि' । अत्र तैलशब्दस्तिलभवस्नेहरूपं मुख्यार्थमुपादायैव सार्षपादिषु स्नेहेषु वर्तते[3] ।

णाया द्वैविध्यमाह—**सादृश्येतरेति** । सादृश्यादितरे संबन्धा हेतवो यस्या इति समासः । 'सादृश्यात्संबन्धात्' इति शेषः । सादृश्यसंबन्धहेतुका लक्षणा गौण्य इत्यर्थः । तेन निरुक्तद्वैविध्येन पूर्वोदाहरणान्येवेति । 'अश्वः श्वेतो धावति' इत्यादीन्येवेत्यर्थः । **एतानीति** । हेमन्ते हि तैलाद्यभावादत्यन्तं दुःखमुत्पद्यते । तन्निराकरणेन तैलानामत्युपकारित्वमिति सूचनाय 'हेमन्ते' इत्युक्तम् । उपादायैव अपरित्यज्यैव सार्षपादि-

---

चारः' इति । तस्य भावस्तद्धर्मः । तदभावेऽपि तदुपचारः । तच्छब्दव्यवहार इत्यर्थः । स च तद्धर्मारोपेणारोपनिमित्तानि च सहचरणादीनि । यष्टीः प्रवेशय । मञ्चाः क्रोशन्ति । वीरणेष्वास्ते । अयं राजा यमः । प्रस्थः सक्तुः । चन्दनं तुला । गङ्गायां घोषः । कृष्णः शकटः । अन्नं प्राणाः । अयं कुलस्य राजा । इत्युदाहरणानि क्रमेण । यष्टित्वारोपो ब्राह्मणे, सादृश्यात् । मञ्चत्वारोपो बालेषु, तात्स्थ्यात् । कटेषु वीरणत्वारोपस्तादर्थ्यात् । राशि यमत्वारोपः वृत्तात् । सक्तौ प्रस्थत्वारोपः, तन्मानकत्वात् । चन्दने तुलात्वारोपः, तद्धार्यत्वात् । गङ्गायां तीरधर्माधारत्वारोपः, तत्सामीप्यात् । शकटे तद्धर्मकृष्णत्वारोपः, कृष्णगुणयोगात् । अन्नेषु प्राणत्वारोपः, प्राणसाधनत्वात् । पुरुषे राजत्वारोपः, कुलाधिपत्वात् । इति तव्याख्यातारः । अत्र साहचर्यं नाम यष्ट्या नित्यसंबन्धः । तत्संबन्धात्तु 'यष्टिकावान्' इत्येव स्यात् । न तु 'यष्टिका' इति । 'यष्टिकावान्' इति तु मुख्य एव । तस्मादुपचारबीजमन्यद्वक्तव्यम् । उच्यते—यष्टिकायां तावदयं यष्टिकाशब्दो यष्टिकात्वजातिनिमित्तकस्तत्र संयुक्तसमवेतां जातिं ब्राह्मणे समवायेनाध्यारोप्य ब्राह्मणं यष्टिकेत्याहेति न्यायवार्तिककाराः । 'गौर्वाहीकः' इत्यादावपि साधारणधर्मजडत्वादिरूपेण निमित्तेन वाहीकस्यारोपितगोत्वेन बोधः । ततो व्यञ्जनया मुख्यगवाभेदप्रतीतिः प्रयोजनम् ॥

1. **गौण्य इति** । गुणेभ्य आगता गौण्य इति विग्रहः । 'तत आगतः' इत्यण् 'टिड्ढा—' इति ङीप् ॥

---

१. 'तत्र' **ग.** २. ग पुस्तके तु 'एव' इत्यस्याग्रे 'सादृश्येतर—' इत्यादिः फक्किका वर्तते, तदग्रे "आदिग्रहणादिन्द्रार्था स्थूणा इन्द्रः तादर्थ्यलक्षणात् । क्वचित्स्वस्वामिभावात् 'राजकीयः पुरुषो राजा' इति । क्वचित्तात्कर्म्यात् 'अतक्षा तक्षा इति । क्वचिदवयवावयविभावात् 'अग्रमात्रेऽवयवे हरतोऽयम्' इति । क्वचित्साहचर्यात् 'छत्रिणो यान्ति' इति । एवमन्यान्यप्युदाहरणान्यूह्यानि । एकशतं षष्टयर्था इति वचनात् । सादृश्यसंबन्धाच्च ता एवाष्टधा लक्षणा गौण्यो भवन्ति ।" इति पाठान्तरं वर्तते.
३. 'नेयं प्रयोजनवती । नालिकेरादिस्नेहव्यावृत्त्या सर्षपस्नेहादिजातीय एव प्रसिद्ध्या नियमनात्' इति ग-पुस्तकेऽधिकः पाठः.

प्रयोजने यथा—राजकुमारेषु तत्सदृशेषु च गच्छत्सु 'एते राजकुमारा गच्छन्ति' । रूढावुपादानलक्षणा साध्यवसाना गौणी यथा—'तैलानि हेमन्ते सुखानि' । प्रयोजने यथा—'राजकुमारा गच्छन्ति' । रूढौ लक्षणलक्षणा सारोपा गौणी यथा—'राजा गौडेन्द्रं कण्टकं शोधयति' । प्रयोजने यथा—'गोर्वाहीकः' रूढौ लक्षणलक्षणा साध्यवसाना गौणी यथा—'राजा कण्टकं शोधयति' । प्रयोजने यथा—'गौर्जल्पति' । अत्र केचिदाहुः—गोसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यन्ते । ते च गोशब्दस्य वाहीकार्थाभिधाने निमित्तीभवन्ति । तदयुक्तम् । गो-

---

स्नेहेषु वर्तत इति घृतादिविलक्षणद्रवत्वरूपैकधर्मसंबन्धेन सर्षपादिस्नेहान्प्रतिपादयतीत्यर्थः । 'छत्रिणो यान्ति' इतिवत्तिलस्नेहस्यापि सुखजननेऽन्वयोऽस्तीति भाव्यम् । नन्वेवं कथमत्र मुख्यार्थबाध इति चेत्, सर्षपादिस्नेहानां तिलभवत्वाभावात् । सामानाधिकरण्येनान्वयानुपपत्तेरेवात्र मुख्यार्थबाधत्वाङ्गीकारात् । न चैतत्पदार्थैकदेशस्य तिलस्नेहस्य तिलभवत्वसंभवात्कथमन्वयानुपपत्तिरिति वाच्यम् । तादृशान्वयस्याव्युत्पन्नत्वेनाङ्गीकारात् । नहि पिकहरिणविहंगमभुजंगा इत्यन्वयः केनाप्यप्रमत्तेनाङ्गीक्रियते । एवं च 'तैलानि सुखानि' इत्यत्र प्रतीयमानेनैतत्पदार्थेन तैलपदार्थस्यान्वयानुपपत्तिरेव मुख्यार्थबाधः । न चैवं 'गङ्गायां घोषः' इत्यादौ सर्वत्रैव तादृशमुख्यार्थबाधसंभवे किमिति ग्रन्थकारैर्मुख्यार्थबाधान्तरं दर्शितमिति वाच्यम् । विसृष्टस्य मुख्यार्थबाधस्य प्रतिसंधानेनैवोपपत्तौ श्लिष्टस्य तस्य प्रतिसंधानानुसंधानस्यान्याय्यत्वात् । **एते राजकुमारा इति** । अत्र विलक्षणपरिच्छेदकत्वरूपैकधर्मलक्षणसादृश्यसंबन्धेन राजकुमारास्तत्सदृशाश्च प्रतीयन्ते । सदृशानामपि राजकुमारवदादरणीयत्वं प्रयोजनम् । **राजा गौडेन्द्रमिति** । शोधयति दमनेन निर्वैरं करोति । तीक्ष्णाग्रवृक्षाङ्गविशेषः कण्टकपदस्य मुख्यार्थः । तस्य शोधनासंभवाद्दुःखदत्वेन तत्सदृशे शत्रौ लक्षणा । 'क्षुद्रशत्रौ च कण्टकः' इत्यादिकोषस्तु निरूढलक्षणाया एव ग्राहकः, न त्वभिधाया इति भाव्यम् । **गौर्वाहीक इति** । वाहीको हलवाहकः । **गौर्जल्पतीति** । जल्पनं व्यक्तवचनम् । तच्च गोर्न संभवतीत्यन्वयानुपपत्तिः । 'गौर्वाहीकः' इत्यत्र शाब्दबोधप्रकारं दर्शयन्परमतं निराकरोति—**अत्र केचिदाहुरिति**। गोसहचारिणो गोवृत्तयो गोत्वसमानाधिकरणावा, जाड्यमज्ञत्वं मान्द्यं विदग्धकर्मा-

---

1. **वाहीक इति** । वाहीको नाम देशविशेषः । तत्रत्यः पुरुषो वाहीकः । केचित्तु बहिर्भवो वाहीक इति व्युत्पत्त्या सदाचारबहिर्भूत इत्यर्थः । 'बहिषष्टिलोपो यच्च,' 'ईकक् च' इति वार्तिकाभ्यां टिलोपे ईककि च कृते बवयोरभेदाद् वाहीक इति रूपम्' इत्याहुः ॥

---

१. 'तूपादानलक्षणा सारोपा गौणी' इति ग-पुस्तकेऽधिकम्. २. 'अत्र सौन्दर्याद्यतिशयः प्रयोजनम्' इत्यधिकं ग-पुस्तके.

शब्दस्यागृहीतसंकेतं वाहीकार्थमभिधातुमशक्यत्वाद् गोशब्दार्थमात्रबोधनाच्च । अभिधाया विरतत्वाद् विरतायाश्च पुनरुत्थापनाभावात् ।

अन्ये च पुनर्गोशब्देन वाहीकार्थो नाभिधीयते । किंतु स्वार्थसहचारिगुणसाजात्येन वाहीकार्थगता गुणा एव लक्ष्यन्ते । तेऽप्यन्ये न मन्यन्ते । तथाहि—अत्र गोशब्दाद्वाहीकार्थः प्रतीयते, न वा । आद्ये गोशब्दादेव वा । लक्षिताद्वा गुणादविनाभावद्वारा । तत्र न प्रथमः । वा-

---

क्षमत्वम्, आदिना दुःखसहिष्णुत्वादिपरिग्रहः । वाहीकार्थाभिधाने वाहीकरूपस्यार्थस्याभिधया बोधने निमित्तीभवन्ति । प्रवृत्तिनिमित्ततामुपयान्ति । ननु गोत्वे गृहीता शक्तिर्व्यक्तिमिव तत्सदृशमपि बोधयतीत्यत आह—**गोशब्दार्थमात्रबोधनाच्चेति** । विरतत्वात् प्रतीतियोग्यताविरहेण नष्टप्रायत्वात् । सकृदुच्चरितशब्दस्याभिधया सकृदर्थबोधकत्वनियमादित्यभिप्रायः । नन्वस्य नियमस्य श्लेषादौ व्यभिचारदर्शनात्फलबलेन पुनरपि प्रतीतियोग्यता कल्पनीयेत्यत आह—**विरतायाः इति** । उत्थानाभावात् प्रतीतिजननोन्मुखीभावविरहात् । श्लेषादौ धर्मान्तरे गृहीतं शक्त्यन्तरमर्थान्तरं बोधयतु । प्रकृते तु गोत्वे गृहीता शक्तिर्गोत्वाश्रयं बोधयित्वा यदि तत्सदृशमपि बोधयेत्तदाभिधर्थैव लक्ष्यार्थबोधसंभवेन लक्षणैव नाङ्गीक्रियेतेति भावः । **स्वार्थेति** । स्वार्थो गोत्वम् । तत्समानाधिकरणेत्यर्थः । **गुणसाजात्येनेति** । लक्षणगतगुणानां शक्यार्थसहचरितत्वासंभव इति भावः । आद्ये प्रतीतिपक्षे । न प्रथमः, न गोशब्दजन्यप्रत्ययपक्षः । असंकेतितत्वाद् गोशब्दसंकेतविषयत्वाभावात् । न द्वितीयः, नाविनाभावजन्यप्रत्ययपक्षः । शाब्देऽन्वयेऽसंभवात् शाब्दबोधविषयत्वासंभवात् । अत्र हेतुमाह—**शाब्दीति** । एतच्च शब्दाध्याहारवादिनां मतमाश्रित्योक्तम् । अर्थाध्याहारवादिनां मीमांसकानां मते त्वविनाभावलभ्यस्याप्यर्थस्य शाब्दबोधविषयत्वाङ्गीकारान्नेतदूषणम् । अन्यथोपाधिशक्तिवादिनां मते व्यक्तेः शाब्दबोधविषयत्वं न स्यात् । न च लक्षणयैव तत्र व्यक्तेरुपस्थितिरिति वाच्यम् । रूढिप्रयोजनाभावात्तत्र लक्षणाया असंभवात् । न च गवादिपदानां व्यक्तौ रूढिरस्तीति वाच्यम् । लक्ष्यार्थव्यतिरिक्तशक्यार्थप्रयोगशालिनः शब्दस्य लक्ष्यार्थप्रयोगरूपाया रूढेर्लक्षणाहेतुत्वाङ्गीकारात् । गवादिपदानां तु व्यक्तिसहकृत एव गोत्वादौ प्रयोगः । लक्ष्यार्थे प्रयोगमात्रस्यैव लक्षणाहेतुत्वाङ्गीकारे उपाधिशक्तिवादमते सर्वत्रैव लक्षणया व्यक्तिबोधसंभवात् । 'ऐन्द्र्या ऋचा गार्हपत्यमुपतिष्ठते' इत्यादौ द्वितीयान्तपदरूपायाः श्रुतेर्लिङ्गापेक्षया झटित्यर्थोपस्था-

---

1. **शब्देति** । भाट्टमीमांसकानाम् ॥
2. **अर्थेति** । प्राभाकराणाम् ॥

---

१. 'असामर्थ्यात्' **ग.** २. 'गो–' इत्यारभ्य '–पुनरुत्थापनाभावात्' इत्यन्तः पाठो ग-पुस्तके न दृश्यते. ३. '–गुणाः साजात्येन वाहीकगता एव लक्ष्यन्ते' **क.** ४. 'एतदप्यन्ये' **क.** ५. 'आद्येऽपि' **ख-ग.** ६. 'वा' इति नास्ति **क**-पुस्तके. ७. 'लक्षिताद्वा गुणात् अविनाभावाद्वा' **क.**

हीकार्थस्यासंकेतितत्वात्[1] । न[2] द्वितीयः । अविनाभावलभ्यस्यार्थस्य शाब्देऽन्वये प्रवेशासंभवात् । शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यते । न तृतीयः यदि हि गोशब्दाद्वाहीकार्थो न प्रतीयेत, तदास्य वाहीकशब्दस्य च सामानाधिकरण्यमसंगतं[3] स्यात् ।

तस्मादत्र गोशब्दो मुख्यया वृत्त्या वाहीकशब्देन सहान्वयमलभमानोऽज्ञत्वादिसाधर्म्यसंबन्धाद्वाहीकार्थं लक्षयति । वाहीकस्याज्ञत्वाद्यतिशयबोधनं प्रयोजनम् । इयं[4] च[5] गुणयोगाद्गौणीत्युच्यते । पूर्वा तूपचारामिश्रणाच्छुद्धा । उपचारो हि नामात्यन्तं विशकलितयोः शब्दयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम्[6] । यथा—'अग्निमाण-

---

पकत्वरूपबलवत्त्वम् । 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इति जैमिनिसूत्रोक्तं न स्यात् । आक्षेपापेक्षया लक्षणाया मुख्यार्थबाधादिप्रतिसंधानसापेक्षत्वेन विलम्ब्यार्थोपस्थापकत्वात् समवाये विरोधेऽर्थविप्रकर्षाद्विलम्ब्यार्थोपस्थापकत्वात् । 'श्रुतिर्द्वितीया क्षमता च लिङ्गं वाक्यं पदान्येव तु संहतानि । सा प्रक्रियायाः कथमित्यपेक्षास्थानं क्रमो योगबलं समाख्या ॥' इति कारिकया सूत्रार्थव्याख्या । न द्वितीयः । न प्रतीतिरित्यभावपक्षः । अस्य गोशब्दस्य, वाहीकशब्दस्येत्यनन्तरं चकारो बोध्यः । सामानाधिकरण्यमेकार्थप्रतिपादकत्वम् । स्वमतमाह—**तस्मादत्रेति** । तस्मादुपदर्शितमतद्वये दोषसंभवात् । **अन्वयमिति** । अभेदसंबन्धेनेत्यादि । **अज्ञत्वादीति** । व्यक्तिभेदेऽपि गुणक्रिययोरैक्यमित्यभिप्रायेणेदं निर्वचनम् । अन्यथा शक्यलक्ष्ययोरेकधर्मत्वरूपसंबन्धो न संभवति । **प्रयोजनमिति** । अत्राहार्यभेदप्रतीतिः प्रयोजनमिति काव्यप्रकाशकारः । **इयं चेति** । गुणस्य साधारणधर्मस्य योगात् स्वविषयकज्ञानजनकत्वसंबन्धात् । तदुक्तम्—'लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता' इति । लक्ष्यमाणस्य गुणैः साधारणधर्मैर्योगादुपदर्शितसंबन्धाद्वृत्तेर्लक्षणायाः पूर्वा सादृश्यातिरिक्तसंबन्धनिबन्धना । शक्यलक्ष्ययोरभेदारोपमेव केचिदुपचारमाहुः । तथा सति 'शुक्लः पटः' इत्यादावपि सारोपाया उपचारमिश्रणाच्छुद्धत्वं न स्यादित्यतः प्रकारान्तरेणोपचारबीजं निर्वक्ति—**अत्यन्तमिति** । व्युत्पत्तिवैचित्र्यात्समासैकदेशे भेदप्रतीतावभेदसंबन्धेनान्वेति। विशकलितयोर्निराकाङ्क्षयोः सादृश्यातिशयमहिम्ना सादृश्यातिशयबोधाभिप्रायबोधेन भेदामिश्रितसाधर्म्यमेव सादृश्यातिशयः । भेदप्रतीतेरात्यन्तिकत्वं च शक्यलक्ष्ययोः संबन्धानवगाहितया तथा शुक्लः पट इत्यत्र शुक्लगुणवान्पटः शुक्लगुणाद्भिन्न इति शक्यलक्ष्ययोः समवायो भासते, न तथा अग्निर्माणवक इत्यत्र लक्षणाजन्यबोधात्प्राक्

---

१. 'न द्वितीयः । गोगवयचन्द्रमुखादिशब्दद्वन्द्वानामवयवप्रसादादिसाम्येऽप्यन्योन्यस्यान्यतमशब्दार्थानभिधायकत्वात्' ख. २. 'न तृतीयः' ख. ३. 'असमञ्जसं स्यात्' ग. ४. 'इत्थं' क. ५. 'हि' ग. ६. 'च' क. ७. 'सरण' घ.

वकयोः' । शुक्लपटयोस्तु नात्यन्तभेदप्रतीतिः । तस्मादेवमादिषु शुद्धैव लक्षणा ।

व्यङ्ग्यस्य गूढागूढत्वाद्द्विधा स्युः फललक्षणाः ॥ १० ॥

प्रयोजने या अष्टभेदा लक्षणा दर्शितास्ताः प्रयोजनरूपव्यङ्ग्यस्य गूढागूढतया प्रत्येकं द्विधा भूत्वा षोडश भेदाः । तत्र गूढः; वाक्यार्थ-भावनापरिपक्वबुद्धिविभवमात्रवेद्यः । यथा—'उपकृतं बहु तत्र—'

शक्यलक्ष्ययोः सादृश्यसंबन्धो भासते । किंतु सादृश्यबोधाभिप्रायबोधानन्तरमेवात्यन्तिकभेदप्रतीतिः संभवति । तस्माच्च सादृश्यातिशयबोधाभिप्रायबोधसहकृतेनाभेदारोपेण स्थगनमनुत्पत्तिरेवोपचारः । न त्वभेदारोप इत्यर्थः । अत्यन्तपदव्यावृत्तिमाह—**शुक्लपटयोरिति । नात्यन्तभेदप्रतीतिरिति** । अत्र कृदभिहितभावस्यापि विशेषणस्यात्यन्तमित्यस्य कर्मत्वक्लीवत्वे 'अपृथग्भूतक्रियाविशेषणस्य कर्मत्वं क्लीवत्वं च' इति सूत्रस्थस्यापृथग्भूतेत्यादेर्नयुक्तमनित्यमिति न्यायेन व्यभिचारात् । अत्र भेदप्रतीतेः समवायाख्यशब्दशक्यसंबन्धावगाहनान्नात्यन्तिकत्वमित्यभिप्रायः । ननु गौणलक्षणातो रूपकालंकारस्य को भेदः, रूपकालंकारेऽप्यभेदारोपानन्तरं सादृश्यबोधस्यानुभवसिद्धत्वादिति चेद्, रूपकेऽभेदारोपात्प्रागपि सादृश्यप्रतीतिः संभवति । गौणलक्षणायां तु पश्चादेव, सादृश्यप्रतीत्योः कारणवैलक्षण्यादपि वैलक्षण्यं संभवति । 'आरोप्यमाणस्य प्राङ्निर्देशे हि गौणलक्षणाप्रयोगवाक्यम्, पश्चान्निर्देशे रूपकप्रयोगवाक्यमिति नियमः' इति केचित् । 'गौडेन्द्रं कण्टकं शोधयति' इति गौणलक्षणोदाहरणं 'राजति व्योमकान्तारे राजहंसः सुधाकरः' इति रूपकोदाहरणं ददतो ग्रन्थकृतस्तन्नाभिमतमिति मन्तव्यम् । प्रयोजनलक्षणाया द्वैविध्यमाह—**व्यङ्ग्यस्येति** । बुद्धेर्विभवः सूक्ष्मविषयगामित्वेनातिशयः । **उपकृतमिति** । अत्र वक्तृतात्पर्यरूपाया लक्षणायाः

---

१. 'प्रत्येकं गूढव्यङ्ग्यतयागूढव्यङ्ग्यतया च द्वैविध्यात्षोडशभेदाः' ग.

२. "मुखं विकसितस्मितं वशितवक्रिम प्रेक्षितं
समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः ।
उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं
वतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥'

मुखं विकसितस्मितमित्यादि । वतेत्याश्चर्ये । इन्दुवदनातनौ चन्द्रमुखीशरीरे तरुणिमोद्गमस्तारुण्यप्रादुर्भावो मोदते । वृद्धिं यातीत्यर्थः । तमेव मोदनप्रकारमाह—मुखमित्यादिना । विकसितस्मितमिति । विकसिनं च तत्स्मितं चेति विकसितस्मितम् । विकासित्वं हि कुसुमधर्मः । स च सितेऽनुपपन्नः । यन्तु विकसति स सच्छायो भवतीति विकसितशब्दो बाधितविकासमुख्यार्थः सन्सच्छायत्वसादृश्यात्स्मितं लक्षयन्हृद्यत्वसुरभित्वादिप्रयोजनसहत्वं व्यनक्ति । वशितवक्रिमेति । वशित आयत्तीकृतो वक्रिमो येन तद्वशितवक्रिम । अत्र वशीकरणं चेतनधर्मः । स च वक्रिमणि अनुपपन्नः । यो हि यस्य वशो भवति स तस्यायत्तो भवति । वशितशब्दो बाधितमुख्यार्थ आयत्तत्वादिसादृश्याद्वक्रिमाणं लक्षयंस्तदनुसरणत्वादिप्रयोजनं व्यञ्जयति । समुच्छलितविभ्रमा गतिरिति । समुच्छलित उद्गता विभ्रमा यस्या सा समुच्छलितविभ्रमा । अत्र समुच्छलनं जलादेर्धर्मः । स च विभ्रमेऽनुपपन्नः । यस्तु सः उत्कल्लोलो भवतीति समुच्छलनशब्दो बाधितसमुच्छलनमुख्यार्थ उत्कल्लोलादिसादृश्याद्विभ्रमं लक्षयन्प्रौढप्रौढतरं सर्वजनाभिलषणीयत्वादितिप्रयोजनं प्रत्याययति । अपारतसंस्थेति । अपास्ता मुक्ता संस्था मर्यादा यया सा अपा-

इति । अगूढ, [1]अतिस्फुटतया सर्वजनसंवेद्यः । यथा—

'[2]उपदिशति कामिनीनां यौवनमद एव ललितानि ।'

अत्र 'उपदिशति' इत्यनेन 'आविष्करोति' इति लक्ष्यते । [3]आविष्कारातिशयश्चाभिधेयवत्स्फुटं प्रतीयते ।

[4]धर्मिधर्मगतत्वेन फलस्यैता अपि द्विधा ।

एता अनन्तरोक्ताः षोडशभेदा[5] लक्षणाः फलस्य धर्मिगतत्वेन धर्मगतत्वेन च प्रत्येकं द्विधाभूत्वा द्वात्रिंशद्भेदाः ।

दिङ्मात्रं यथा—

सूक्ष्ममतिमात्रवेद्यत्वेन तन्मूलकव्यञ्जनाजन्यबोधविषयो गूढ इति भावः । **उपदिशतीति** । 'श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम्' इति पूर्वार्धमस्य । एतदर्थे दृष्टान्तः 'उपदिशति–' इति । ललितानि हेलालीलादीनि । आविष्करोति प्रकाशयति । परप्रवर्तकवाक्यरूपस्योपदेशस्य चेतनधर्मतया यौवनमदे बाधादाविष्कारे लक्षणा । स्फुटत्वं सर्वजनवेद्यत्वादिति भावः । पुनरपि तस्या द्वैविध्यमाह—

स्तसंस्था । अत्रापासनं चेतनधर्मः । स चामूर्तायां मतावनुपपन्नः । यो हि येनापास्यते स तस्य न भवतीति बाधितत्वार्थोऽपास्तशब्दः स्वपरिवृत्तिसादृश्यात्संस्थानं लक्षयन्पुनरस्वीकारादिकं प्रयोजनं व्यञ्जयति । मुकुलितस्तनमिति । मुकुलितौ किंचिदुद्भिन्नौ स्तनौ यस्य तन्मुकुलितस्तनम् । अत्र मुकुलितत्वं कुसुमधर्मः स च स्तनयोरनुपपन्नः । यो हि मुकुलितः स च किंचिदुद्भिन्नो भवतीति मुकुलितशब्दो बाधितकोरकरूपमुख्यार्थोऽभिनवोद्भेदसादृश्यात्स्तनयुग्मं लक्षयन्स्पृहणीयत्वादि प्रयोजनसहस्रं व्यनक्तीति । अंसबन्धोद्धुरमिति । अंसबन्धेन उद्धुरमंसबन्धोद्धुरम् । धुरायामुद्धुरीकरणमुद्धुरत्वम् । तच्च चेतनधर्मो जघनेऽनुपपन्नः । यो ह्युद्धुरो भवति स किंचिदुच्चैर्भवतीत्युद्धुरशब्दो बाधितधुरामुख्यार्थः सन्नुन्नतत्वादिसादृश्यादंसबन्धवज्जघनं लक्षयन्मनोहरत्वादिप्रयोजन प्रत्याययति । इन्दुवदनेति । इन्दुवद्वदन यस्याः सेन्दुवदना । अत्र वदने इन्दुत्वमनुपपन्नम् । यो हीन्दुसदृशो भवति स पारिमाण्डल्यादियुक्तो भवतीतीन्दुशब्दो बाधितस्वार्थः पारिमाण्डल्यादिसादृश्याद्वदनं लक्षयञ्जगज्जीवनतापोपशान्त्यादि प्रयोजनं व्यञ्जयति । उद्गम इति । उद्गमो ह्युद्धुरादेर्धर्मः । स च तरुणिमनि अनुपपन्नः । यो ह्युद्गच्छति स च किंचिदुद्भिन्नो भवतीत्युद्गमशब्दो बाधितोदयमुख्यार्थः सन्नभिन्नोद्भेदसादृश्यात्तारुण्यं लक्षयन्सौन्दर्यादिप्रयोजनं व्यनक्ति । मोदत इति । मोदनं चेतनधर्मः स चोद्गमेऽनुपपन्नः । यो हि मोदते स सप्रसरो भवतीति मोदतेशब्दः (मोदतिपदं) बाधितहर्षमुख्यार्थः सन्नुद्गमं लक्षयन्पृहणीयत्वादिप्रयोजनं व्यनक्ति । कुशाग्रबुद्धेरेवैतादृशव्यङ्ग्यस्फुरणाद्रूढत्वमित्यर्थः ।" इत्यधिकं ग पुस्तके. २. '–क्रियाया विशेषणस्य' इति पुस्तकान्तरे पाठः.

१. 'अगूढस्त्वतिस्पष्टतया' ग. २. 'श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम्' इति पूर्वार्धमपि क-ख-पुस्तकयोर्दृश्यते. ३. 'आविष्कारातिशयश्च प्रयोजनम्' ग. ४. 'अत्रोपदेशशब्देन शिक्षादानप्रकटनाच्छिक्षा[illegible]स्य वाच्यायमानत्वेनाचमत्काररूपत्वादगूढतेत्यर्थः ।' ग. ५. 'किं च' इत्यधिकं ग-पुस्तके. ६. 'भेदाः' इति ख-पुस्तके नास्ति; 'षोडशभेदा अपि' ग. ७. 'द्वैविध्याद्' ग. ८. 'क्रमेणोदाहरणानि' क., 'क्रमेणोदाहरति' ख-घ.

'[1]स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव ॥'

धर्मीति । धर्मी लक्ष्यः । तद्वृत्तिपदार्थो धर्मः । **स्निग्धश्यामलेति** । विरहिणः श्रीरामस्योक्तिरियम् । **लिप्तेति** । व्याप्तेत्यर्थः । वेल्लद्बलाकाः संचरद्बकविशेषाः । पयोदसुहृदां मयूराणामानन्दजनिका आनन्दजनिता वा केका ध्वनयः । कला मधुराः ।

1. **स्निग्धश्यामलेति** । व्याख्यातोऽप्ययं श्लोकः चमत्कारातिशयलाभाय पुनर्व्याख्यायते—अत्र रामशब्दसंगतिरुक्ता । तथाहि—स्निग्धया सलिलसंबन्धसरसया श्यामलया द्रविडवनितोचितासितवर्णया कान्त्या कालवर्णेन लिप्तमाच्छुरितं वियन्नभो यैः । वेल्लन्त्यो व्याजृम्भमाणास्तथा चलन्त्यः परभागवशात्प्रहर्षवशाच्च बलाकाः सितपक्षिविशेषा येषु तथाभूता घनाः । एवं नभस्तावद्दुरालोकं वर्तते । दिशोऽपि दुःसहाः । यतः सूक्ष्मजलकणोद्गारिणो वाता इति मन्दमन्दत्वमेषामनियतदिग्भागगमनं च बहुवचनेन सूचितम् । तर्हि गुहासु क्वचित्प्रविश्यास्यतामित्यत आह—पयोदो मेघः सुहृत् केकाजनकाह्लादजनकतया मित्रं येषां केकापदसंनिध्यान्मयूराणामानन्देन हर्षेण केकाः शब्दविशेषाः कला अव्यक्तमधुराः । ताश्च दुःसहं पयोदवृत्तान्तं स्मारयन्ति । स्वयं च दुःसहा इति भावः । एवमुद्दीपनविभावोद्बोधितो विप्रलम्भः । परस्परापेक्षाधिष्ठानत्वाद्व्रतेः । विभावानां साधारण्यमभिमान्येत एवं प्रभृति प्रियतमां हृदये निधाय स्ववृत्तमाह—काममिति । दृढमिति सातिशयम् । कठोरहृदय इति । रामशब्दार्थध्वनिविशेषावकाशदानाय कठोरहृदयपदम् । यथा 'तद्देहं' इत्युक्तेऽपि 'तत्तद्भित्ति' इति । अन्यथा रामपदं दशरथकुलोद्भवत्वकौशल्यास्नेहपात्रत्वबाल्यचरितजानकीलाभादिधर्मान्तरपरिणतमर्थं कथं न ध्वनयेदिति । स एवाहं रामः सकलदुःखपात्रत्वेन प्रसिद्धोऽस्मि । अत एव सर्वमुक्तोद्दीपकातिशयजनितं क्लेशं सहे । उत्तमपुरुषैकवचनमेतत् । भविष्यतीति क्रियासामान्यम् । तेन किं करिष्यतीति । अथ च भवनमेवास्या असंभाव्यमित्युक्तप्रकारेण हृदयनिहितां प्रियां स्मरणशब्दविकल्पपरम्परया प्रत्यक्षीभावितां हृदयस्फोटनोन्मुखीं ससंभ्रममाह—हहा हेति । निपातसमुदायः खेदातिशये । अत्र द्रवद्द्रव्यसंयोगविशेषस्य लेपनस्यामूर्ते वियति कान्त्या बाधात्, अचेतने मेघे चित्तवृत्तिविशेषस्य सौहार्दस्य बाधाच्चोक्तार्थलक्षणा । लेपनसौहार्दयोः सर्वथान्वयासंभवादत्यन्ततिरस्कृतत्वम् लक्ष्यातिशयौ व्यङ्ग्यौ । तयोस्निरूपसंकराभावात्संसृष्टिः । रामपदेन च सर्वसहत्वानुपयुक्तार्थतया उक्तार्थसंक्रमितवाच्येन पीडासहस्रसंपातेऽपि प्राणधारणादात्मनि न्यक्कारो व्यज्यते । तत्र च घनकेकाचिरस्थायित्वयोर्लिप्तसुहृत्पदव्यङ्ग्ययोरनुग्राहकत्वं व्यक्तम् । एवमेकेन रामपदेन दुःखभाजनत्वलक्षणया राज्यत्यागवनवासजटावल्कलधारणस्त्रीवियोगादिपात्रतया तदतिशयव्यक्तिः । तद्वास च सीतां विना अपि जीविष्यामीति शोकावेगनिर्वेदाद्यभिव्यक्तमुखेन विप्रलम्भपारिपोषः । इत्थं लक्षणामूलातिशयध्वनिरसध्वन्योः संकर इति सहृदयाः ॥

[1]अत्रात्यन्तदुःखसहिष्णुरूपे रामे धर्मिणि लक्ष्ये तस्यैवातिशयः [2]फलम् । 'गङ्गायां [3]घोषः' [4]इत्यत्र [5]तटे शीतत्वपावनत्वरूपधर्मस्यातिशयः फलम् ।

तदेवं [6]लक्षणाभेदाश्चत्वारिंशन्मता बुधैः ॥ ११ ॥

रूढावष्टौ फले द्वात्रिंशदिति चत्वारिंशल्लक्षणाभेदाः ।

किं च—

पदवाक्यगतत्वेन प्रत्येकं ता अपि द्विधा ।

हहाशब्दो हाशब्दश्च कष्टवचनः । कष्टातिशयद्योतकत्वान्न पौनरुक्त्यम् । अत्यन्तेति । व्यङ्ग्यार्थवैशिष्ट्याभिप्रायेणोक्तं दुःखसहिष्णुरूप इत्यवगन्तव्यम् । तस्यैव दुःखसहिष्णोरेव । नन्वत्यन्तदुःखसहिष्णुरित्यत्रात्यन्तत्वं यदि क्रियाविशेषणं तदा धर्मगतत्वमेव । यदि पुरुषविशेषणं तथापि महापण्डित इत्यादौ महत्त्वादिरिव धर्मिणि तात्पर्याभावाद् दुःखासहनाभाव एव पर्यवस्यतीति चेत्, 'उपदिशति' इत्याद्युदाहरणं बोध्यम् । कठोरहृदयत्वस्य सर्वसहत्वस्य चोपपत्तये राम इत्युक्तम् । अन्यथा रामस्य वक्तृत्वादस्मीत्यनेन तल्लाभात्पौनरुक्त्यं स्यात् । रामत्वेनोपस्थितस्य तदुभयमनुपपन्नम् । अतो लक्षणया दुःखसहिष्णुत्वेन मुख्यार्थ एवोपस्थाप्यते । एवं च कठोरहृदयत्वाद्दुःखसहिष्णुत्वं ततः सर्वसहत्वमुपपन्नम् । पुनरपि लक्षणाया द्वैविध्यमाह—पदेति । नन्व-

---

१. 'स्निग्धश्यामलेत्यादि' इत्यधिक ग-पुस्तके. २. प्रयोजनम्' ग. ३. 'घोषः' इति ख-पुस्तके नास्ति; 'धर्मगतत्वे गङ्गायां घोष इत्यादि' ग. ४. 'इति' नास्ति क-ख-पुस्तकयोः. ५. 'तटादिषु लक्ष्येषु शीतत्वपावनत्वादि' घ; 'शीतत्वपावनत्वाद्यतिशयस्य धर्मनिष्टत्वात्' ग. ६. 'लक्षणा—' इत्यादिकारिकार्धं ग-पुस्तके त्रुटितमिति प्रतिभाति. ७. 'बहुतरदुःखसहत्वेऽप्यनुद्विग्नचित्तत्वमत्यन्तदुःखसहिष्णुत्वम्। तस्यैव रामस्यैवातिशय उत्कर्षो धीरत्वादिरूपः । अत्र वक्तृत्वादेव रामस्य लाभे पुनरुक्तमिति लक्षणाबीजमत्रावधेयम् । केचित्तु—'तस्य दुःखसहिष्णो रामस्यातिशयो विप्रलम्भरूपः । न चात्र दुःखसहिष्णुत्वस्याप्यतिशयः प्रतीयत एव, तत्कथमिदं धर्मिगतस्योदाहरणमिति वाच्यम्, विवक्षितविवेकेन तस्यापि धर्मगतत्वादेव । तथाहि—दुःखसहिष्णुत्वं दुःखद्वेषाभावः । तस्यातिशयान्तराभावात्सामान्याभावत्वमेवातिशयः, स च नातिरिक्तः । किंत्वभावरूप एव तस्य रामरूपधर्मिगतत्वादेव' इत्याहुः । तत्र । अस्यार्थव्यञ्जनागम्यविप्रलम्भस्य लक्षणामूलव्यञ्जनागम्यत्वाभावाल्लक्षणाप्रयोजनाभावाद् दुःखसहिष्णुत्वातिशयस्य धर्मगतत्वेऽपि विप्रलम्भस्य धर्मिगतत्वेनैव धर्मिगतोदाहरणत्वाक्षतेः । 'अत्यन्तदुःखसहिष्णुरूपे' इति वदता ग्रन्थकृता दुःखसहिष्णुत्वातिशयपर्यवसितस्यात्यन्तदुःखसहिष्णुत्वस्य लक्ष्यतावच्छेदकत्वाङ्गीकाराप्रयोजनत्वासंभवान्निरुक्तदुःखसहिष्णुत्वस्य प्राणिमात्रेऽसंभवाच्च कस्यापि कुत्रापि दुःखे सत्त्वात् । न च रामस्येश्वरत्वेन द्वेषसामान्याभावसत्त्वेन दुःखद्वेषसामान्याभावः सिध्यतीति वाच्यम् । ईश्वरस्यापि रामादिशरीरे जन्यसुखादिवत्परदुःखानुभवजन्यदुःखद्वेषस्याप्यङ्गीकारात्तस्यैव हहाशब्देन हाशब्देन च व्यञ्जितत्वात्, अन्यथा तयोरनर्थकत्वापत्तेः । न च दुःखद्वेषाभावो दुःखसहिष्णुत्वम्, तस्य सामान्यधर्मावच्छिन्नप्रतियोगितात्वमतिशयः, तस्य लक्ष्यतावच्छेदककुक्षिनिक्षिप्तस्यापि प्रयोजनत्वाङ्गीकारे को दोष इति वाच्यम् । 'प्रयोजनेन लक्षणीयं न युज्यते' इति वदद्भिरालंकारिकैर्लक्षणाजन्यबोधविषयस्य प्रयोजनत्वाङ्गीकारात् । यद्यप्यत्र लिप्तपदस्य व्याप्तेर्लक्षणा व्याप्तेरतिशयः फलमिति धर्मगतफललक्षणाया उदाहरणमत्रैव संभवति । तथापि गङ्गायामिति प्रसिद्धोदाहरणमुपन्यस्तम् ।' इति पाठभेदः कुत्रचिद्दृश्यते. ८. 'ननु यद्यपि' इति पुस्तकान्तरे.

[1]ता अनन्तरोक्ताश्चत्वारिंशद्भेदाः । तत्र पदगतत्वे [2]यथा—'गङ्गायां घोषः' । वाक्यगतत्वे [3]यथा—'उपकृतं बहु तत्र' इति । [4]एवमशीतिप्रकारा लक्षणा ॥

अथ व्यञ्जना ।

विरताम्वभिधाद्यासु [5]ययार्थो बोध्यते परः ॥ १२ ॥
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ।

'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति नयेनाभिधालक्षणाभिधावल्लक्षणायाः [6]पदधर्मत्वेन कथं वाक्यगतत्वमिति चेद् यत्र वाक्ये वाक्यसमुदाये वा बहुपदेषु लक्षणा तत्रैव तस्या वाक्यगतत्वम् उपचारात् । क्रमप्राप्तां व्यञ्जनां निरूपयितुमाह—**अथेति** । [7]वृत्तिर्व्यापारः । सा च वक्तृतात्पर्यविशेषरूपा । वक्तृतात्पर्यं च

1. **एवमिति** । झटित्युपस्थितये लक्षणाया अशीतिप्रकाराः संख्यायन्ते—(१) रूढौ सारोपा उपादानलक्षणा—'अश्वः श्वेतो धावति' । (२) प्रयोजने सारोपा उपादानलक्षणा—'एते कुन्ताः प्रविशन्ति' । (३) रूढौ सारोपा लक्षणलक्षणा—'कलिङ्गः पुरुषो युध्यते' । (४) प्रयोजने सारोपा लक्षणलक्षणा—'आयुर्घृतम्' । (५) रूढौ साध्यवसाना उपादानलक्षणा—'श्वेतो धावति' । (६) प्रयोजने साध्यवसाना उपादानलक्षणा—'कुन्ताः प्रविशन्ति' । (७) रूढौ साध्यवसाना लक्षणलक्षणा—'कलिङ्गः साहसिकः' । (८) प्रयोजने साध्यवसाना लक्षणलक्षणा—'गङ्गायां घोषः' । (९) रूढौ गौणी सारोपा उपादानलक्षणा—'एतानि तैलानि हेमन्ते सुखानि' । (१०) प्रयोजने गौणी सारोपा उपादानलक्षणा—'एते राजकुमारा गच्छन्ति' (११) रूढौ गौणी सारोपा लक्षणलक्षणा—'राजा गौडेन्द्रं कण्टकं शोधयति' । (१२) प्रयोजने गौणी सारोपा लक्षणलक्षणा—'गौर्वाहीकः' । (१३) रूढौ गौणी साध्यवसाना उपादानलक्षणा—'तैलानि हेमन्ते सुखानि' । (१४) प्रयोजने गौणी साध्यवसाना उपादानलक्षणा—'राजकुमारा गच्छन्ति' । (१५) रूढौ गौणी साध्यवसाना लक्षणलक्षणा—'राजा कण्टकं शोधयति' । (१६) प्रयोजने गौणी साध्यवसाना लक्षणलक्षणा—'गौर्जल्पति' । इहाष्टविधा प्रयोजनलक्षणा व्यङ्ग्यस्य गूढागूढत्वेन षोडशविधा भवति । सा च धर्मिधर्मगतभेदेन प्रत्येकं द्विधा भूत्वा द्वात्रिंशद्विधा जायते । एषा चाष्टभी रूढिलक्षणाभिः सह चत्वारिंशत्प्रकारा भवति । ततः पदवाक्यगतत्वेनाशीतिप्रकारेति ॥

2. **व्यञ्जनेति** । 'मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्यार्थसंबद्धसंबद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जनेति

१. 'ताः—' इत्यादि '—भेदाः' इत्यन्तं ग-पुस्तके नास्ति. २. 'चत्वारिंशद्भेदाः' इति ख-घ-पुस्तकयोर्नास्ति. ३. 'यथा' ग-पुस्तके नास्ति. ४. ग-पुस्तके 'यथा' इति नास्ति, तदग्रे "त्वामस्मि वच्मि विदुषां—" इत्यादि इत्युदाहरणं वर्तते. ५. 'इति सर्वमवदातम्' इति ग-पुस्तकेऽधिकः पाठः. ६. 'अपि पदधर्मत्वमेवेति कथं वाक्यगतत्व तस्याः' इति पुस्तकान्तरे. ७. 'वृत्तिः—' इत्यारभ्य '—स्वार्थं बोधयति' इत्यन्तः पाठः पुस्तकान्तरे नास्ति.

तात्पर्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं बोधयित्वोपक्षीणासु यया-न्योऽर्थो बोध्यते सा शब्दस्यार्थस्य [1]प्रकृतिप्रत्ययादेश्च [2]शक्तिर्व्यञ्जनध्व-ननगमनप्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम ।

[3]तत्र—

अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा ॥ १३ ॥

[4]अभिधामूलामाह—

अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते ।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया ॥ १४ ॥

[4]आदिशब्दाद्विप्रयोगादयः ।

'एतत्पदं वाक्यं वा इममर्थं बोधयतु' इति वक्तुरिच्छाविशेषः । शाब्द्या व्यञ्जनायाः पदधर्मत्वम् । आर्थ्यास्तु वाक्यधर्मत्वम् । एतत्पदं वाक्यं वैतदर्थबोधाभिप्रायकमिति ज्ञानविषय एव सा स्वार्थं बोधयति । तिसृषु वृत्तिष्वन्यो मुख्यलक्ष्यतात्पर्यार्थभिन्नः । अर्थादिकस्येत्यादिपदं विवृणोति—**प्रकृतीति** । आदिपदादुपसर्गादिग्रहणम् । नियन्त्रिते नियम्यप्रतिपादिते अन्यस्यार्थान्तरस्य धीहेतुर्बोधोपायः । यत्र तु प्रकरणादि-

---

मञ्जूषाकाराः । एतद्वृत्तिप्रतिपाद्योऽर्थो व्यङ्ग्यः । स च वाच्यार्थ इव न नियतः, किंतु वक्तृ-प्रकरणादिवशादनियतः । तथाहि—'गतोऽस्तमर्कः' इति वाक्ये राज्ञः सेनापतीन्प्रति शत्रूणां हठेनामर्त्तसर इति, दूतीनामभिसारिकाः प्रति अभिसरणमुपक्रम्यतामिति, सख्या वासकसज्जां प्रति प्राप्तप्रायस्ते प्रेयानिति, कर्मकरस्य सहकर्म कुर्वतः प्रति कर्मकर-णान्निवर्तामहे इति, भृत्यस्य धार्मिकं प्रति सांध्यो विधिरुपक्रम्यतामिति, आप्तस्य कार्यव-शेन बहिर्गच्छतः प्रति दूरं मा गा इति, गृहिणो गोपालकं प्रति धेनवो गृहं प्रवेक्ष्यन्ता-मिति, दिवसेऽतिसंतप्तस्य बन्धून्प्रति संतापोऽधुना न भवतीति, आपणिकानां भृत्यान्प्रति विक्रेयवस्तूनि संहियन्तामिति, नायिकागमनप्रस्तावे प्रोषितभर्तृकायास्तत्कथकं प्रति नागतोऽद्य प्रेयानिति, एकस्यैव वा वक्तुर्बहून्प्रति तत्प्रकरणवशादेवमादिरनवधिर्व्यङ्ग्योऽर्थः प्रकाशते । वाच्यस्तु सर्वान्प्रत्यविशिष्ट एव ॥

1. **प्रकृतीति** । प्रकृतिर्नाम अर्थावबोधहेतुः प्रत्ययविधानावधिभूतः शब्दविशेषः । सर्वेषामेव प्रत्ययानां प्रकृतिं निमित्तीकृत्यैवोत्पत्तिविधानात् । भाष्येऽप्युक्तम्—'तावेव सुप्तिङौ यौ ततः परौ सैव प्रकृतिराद्या' इति । (ततः) विधानावधेः (यौ परौ तावेव सुप्तिङौ) या च तयोः (आद्या) विधानावधिभूता (सैव प्रकृतिः) इति तदर्थः । प्रत्य-यस्तु प्रकृतिमवधीकृत्य विधीयमानः स्वार्थबोधकः शब्दविशेषः । अत एवाह भगवान्भ-र्तृहरिः—'यः शब्दः स्वेतरस्यार्थे स्वार्थस्यान्वयबोधने । यदपेक्षस्तयोः पूर्वा प्रकृतिः प्रत्ययः परः ॥ इति ॥

---

१. 'वृत्तेः' घ. २. 'तत्र' घ-पुस्तके नास्ति. ३. 'तत्र' इत्यधिकं घ-पुस्तके. ४. 'आदिशब्दा-द्विप्रयोगादयः' इति क-ख-ग-पुस्तकेषु नास्ति.

उक्तं हि[1]—

'संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥

नियमो नास्ति तत्र यावदर्थबोधे वक्तृतात्पर्यं तावन्त एवार्था वाच्याः। यथा—'व्यथां द्वयेषामपि मेदिनीभृताम्' इति । अत्र राजपर्वतयोरन्यतरस्य व्यङ्ग्यत्वे 'द्वयेषां' इत्यन्वितं स्यात् । अभिधाश्रया अभिधामूला । प्राकरणिकमर्थं बोधयित्वाभिधायां विरतायामप्राकरणिकबोधे व्यञ्जना अभिधान्तरमपेक्षत इत्यभिधामूलत्वमस्याः । नन्वभिधान्तरस्य संयोगादिना प्रतिरुद्धत्वेन कथं व्यञ्जनाजन्यबोधे सहकारित्वमिति चेत्, न । अभिधायाः स्वातन्त्र्येणार्थान्तरोपस्थापने संयोगादेः प्रतिबन्धकत्वकल्पनात् । नन्वभिधैवार्थान्तरमुपस्थाप्यतां किं व्यञ्जनया संयोगादेः प्रतिबन्धकत्वस्य च कल्पनेनेति चेत्, न । अप्राकरणिकद्वितीयार्थबोधान्निष्कम्पप्रवृत्त्यभावेन तस्यास्वादविशेषजनकत्वेन च तत्र वैजात्यस्यावश्यं वाच्यत्वेन तस्य च कारणविशेषाधीनसिद्धिकत्वेन व्यञ्जनासिद्धेरभिधया द्वितीयार्थस्य प्रथममुपस्थाने संयोगादेः प्रतिबन्धकत्वकल्पनस्यावश्यकत्वाच्च । विप्रयोगस्त्यागः । साहचर्यं सहकारित्वेन कार्यकारित्वम् । विरोधिता वैरम् । एतच्चतुष्टयं समभिव्याहृतपदार्थान्तरेण सहेति बोध्यम् । अर्थः प्रयोजनम् ।

---

1. **उक्तमिति** । 'वाक्यपदीये हरिणा' इति शेषः । संयोगो नाम नानार्थशब्दशक्यान्तरवृत्तितया अप्रसिद्धत्वे सति तच्छक्यवृत्तितया प्रसिद्धः संबन्धः । प्रयोगो विश्लेषः । एकस्मिन्कार्ये परस्परापेक्षित्वं साहचर्यम् विरोधिता प्रसिद्धं वैरम्, सहानवस्थानं च । अर्थः प्रयोजनम्, चतुर्थ्यादिभिधेयम् । प्रकरणं वक्तृश्रोतृबुद्धिस्थता । लिङ्गं नानार्थपदशक्यान्तरावृत्तिरेकशक्यगतः साक्षाच्छब्दवेद्यो धर्मः । शब्दस्यान्यस्य संनिधिर्नानार्थपदैकार्थमात्रं संसर्ग्यर्थान्तरवाचकपदसमभिहारः । सामर्थ्यं कारणता । औचिती योग्यता । देशो नगरादिः । कालो दिवसादिः । व्यक्तिः पुंनपुंसकस्त्रीलिङ्गानि । स्वर उदात्तादिः । एते संयोगादयः शब्दार्थस्यानवच्छेदे तात्पर्यसंदेहे तदपाकरणद्वारेण विशेषस्मृतिहेतवः । निर्णयहेतव इत्यर्थः । उपस्थितानामनेकेषामेकतरमात्रार्थतात्पर्यनिर्णयद्वारा तन्मात्रार्थविषयकान्वयबोधजनका इति भावः । 'अत्र सामर्थ्यमेवैकं मुख्यं निर्णायकं संयोगादयस्तद्व्यञ्जकप्रपञ्चः । तैः सामर्थ्यस्यैवाभिव्यक्तेः' इत्यपरे । 'सशङ्ख—' इत्यत्र शङ्खचक्रयोः संयोगो भगवन्मात्रनिष्ठतया प्रसिद्धो भगवति हरिशब्दस्याभिधाया नियमेनावस्थापकः । 'अशङ्ख—' इत्यत्र तयोरेव विश्लेषः । 'भीमार्जुनौ' इत्यत्रार्जुने भीमसाहचर्यमर्जुनशब्दस्य पार्थेऽभिधानियामकम् । 'कर्णार्जुनौ' इत्यत्र वध्यघातकभावादर्जुनशब्दस्य पार्थे । सहानवस्थानलक्षणविरोधे तु 'छायातपौ' इत्युदाहार्यम् । अर्थादिव्यक्तयन्तानामुदाहरणानि टीकायां सम्यग्व्याख्यातानि । स्वरस्य नियामकत्वे तु 'इन्द्रशत्रुर्वर्धस्व' इत्युदाहार्यम् । अत्र इन्द्रः शत्रुः शातयिता हिंसको यस्येति बहुव्रीहौ 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इत्यनेन पूर्वपदप्रकृतिस्वरे 'अनुदात्तं पदमेकवर्जम्' इत्यनेन शेषनिघाते आद्युदात्तत्वम् । तेन चेन्द्रस्य

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥' इति ।

'सशङ्खचक्रो हरिः' इति शङ्खचक्रयोगेन हरिशब्दो विष्णुमेवाभिधत्ते । 'अशङ्खचक्रो हरिः' इति तद्वियोगेन तमेव । 'भीमार्जुनौ' इति अर्जुनः पार्थः । 'कर्णार्जुनौ' इति कर्णः सूतपुत्रः । 'स्थाणुं वन्दे' इति स्थाणुः शिवः । 'सर्वं जानाति देवः' इति देवो भवान् । 'कुपितो

लिङ्गं चिह्नम् । संभवद्विशेषणमिति यावत् । अन्यस्य तुल्यविभक्तिकस्य सामर्थ्यं निर्दिष्टजननशक्तिः । औचिती प्रकृतोपयोगित्वम् । तच्च यदुपस्थितौ श्रोतुर्जिज्ञासा निवर्तते तत्त्वम् । केचित्तु—'अर्थद्वयेऽन्वयसंभवेऽप्येकार्थ एव तात्पर्यमौचिती' इत्याहुः । तन्न । तात्पर्यविशेषस्य प्रतिबन्धकत्वकल्पने सर्वत्रैव तत्संभवे संयोगादेः प्रतिबन्धकत्वकल्पनानौचित्यात्, एतद्ग्राहकस्य प्रकृतोपयोगित्वस्य प्रथमोपस्थितत्वेन तस्यैव प्रतिबन्धकत्वकल्पनौचित्याच्च । ननु भवन्मतेऽपि औचित्या एव सर्वत्र नियामकत्वमस्तु किमन्येषां तत्कल्पनेनेति चेत्, न । नियन्त्रकान्तरासंनिधान एव तस्या नियन्त्रकत्वकल्पनात् । देशः समभिव्याहृतप्रदेशः । कालः समभिव्याहृतदिनरात्र्यादिः । व्यक्तिः शब्दस्य पुंस्त्वादि लिङ्गम् । स्वर उदात्तादिः । अनवच्छेदे अनेकत्वेन प्रतिपत्त्यनियमे विशेषस्यैकतरस्य स्मृतौ पदार्थोपस्थितिरूपायां हेतव इत्यर्थः । एतच्च मीमांसकनये । नैयायिकनये तु—सर्वेषामेव पदार्थानामुपस्थितिनियन्त्रणवशादेकस्यैवार्थस्य शाब्दोऽनुभव इति । एकत्रैव संयोगादीनां द्वित्राणां संभवे यथास्फूर्ति नियन्त्रकत्वं बोध्यम् । क्रमेण संयोगादीनां नियन्त्रणमुदाहरति—**सशङ्खेति** । तद्वियोगेन शङ्खचक्रविरहेण तमेव विष्णुमेवाभिधत्त इति पूर्वेणान्वयः । शङ्खचक्रवति विष्णौ तद्विरहः कालविशेषे संभवति । पार्थो धनंजयः । **स्थाणुमिति** । अत्र 'भवच्छिदे' इति चरमांशो बोध्यः । अन्यथा भवच्छेदरूपस्य प्रयोजनस्यानुपस्थितौ तस्य नियामकत्वं न स्यात् । 'भवान्' इत्यनेन प्रकान्तराजरूपार्थ एव दर्शितः, न तु युष्मत्त्वेन । 'तत्र शक्तिः' इत्यपरे । **कुपित इति** । मकरध्वजपदं कर्मधारयबहुव्रीहिभ्यामनेकार्थकम् । कोपस्य मकराकारध्वजेऽसंभवात्कामस्यैव बोधकम् । केचित्तु—'मकरध्वजपदं कामसमुद्रानेकार्थकम् । कोपस्तु कामस्यैव चिह्नम् । समुद्राधिष्ठातुः कोपसंभवे-

---

शातनकर्तृत्वं बोध्यते । इन्द्रस्य शत्रुरिति षष्ठीतत्पुरुषे 'समासस्य' इति सूत्रेणान्तोदात्तत्वम् । तेन चेन्द्रस्य शातनकर्मतयावगमः । इन्द्रशत्रुत्वस्य विधेयत्वान्न संबोधनविभक्तिः । एवं 'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत' इत्यत्रापि तत्पुरुषबहुव्रीह्यर्थनिर्णय इति पस्पशादौ स्पष्टम् । आदिना सत्वषत्वनत्वणत्वादिग्रहः । 'सुसिक्तम्' इत्यादौ पूजार्थः सुः कर्मप्रवचनीयः । 'सुषिक्तम्' इत्यत्रोपसर्गोऽन्यार्थः । 'प्रनायके' प्रगतनायकदेशबोधः । 'प्रणायके' प्रणयनक्रियाकर्ता । णत्वात् । इति मञ्जूषादौ स्पष्टम् ॥

---

१. 'इत्यत्र' ख. २. 'शङ्ख—' इत्यादि 'हरिः' इत्यन्तं ग-पुस्तके नास्ति.

मकरध्वजः' इति मकरध्वजः कामः 'देवः पुरारिः' इति पुरारिः शिवः 'मधुना मत्तः पिकः' इति मधुर्वसन्तः । 'पातु वो[2] दयितामुखम्' इति मुखं सांमुख्यम् । 'विभाति[3] गगने चन्द्रः' इति चन्द्रः शशी । 'निशि चित्रभानुः' इति चित्रभानुर्वह्निः । 'भाति[4] रथाङ्गम्' नपुंसकव्यत्तया रथाङ्गं चक्रम् । स्वरस्तु वेद एव विशेषप्रतीतिकृन्न काव्य इति[5] तस्य विषयो[6] नोदाहृतः ।

इदं च केऽप्यसहमाना आहुः—'स्वरोऽपि काकादिरूपः काव्ये विशेषप्रतीतिकृदेव । उदात्तादिरूपोऽपि मुनेः पाठोक्तदिशा शृङ्गारादिरसविशेषप्रतीतिकृदेव' इति । एतद्विषये उदाहरणमुचितमेव इति ।

ऽपि विरहिविषयः कोपोऽत्र बोध्यः' इत्याहुः । तन्न । 'संप्राप्तं मकरध्वजेन मथनं—' इत्यादिप्रयोगबलान्मकरध्वजपदस्य समुद्रे शक्तिकल्पनेऽपि तदधिष्ठातृदेवताबोधस्तु लक्षणैवेति तत्र कोपसंभवस्याकिंचित्करत्वात्कोपविशेषप्रतिसंधानस्य मकरध्वजपदार्थविशेषप्रतिसंधानाधीनतया तस्य प्रथममनुपस्थितौ नियन्त्रकत्वायोगाच्च । **देवः पुरारिरिति** । "पुरं देहेऽपि दृश्यते' इति हारावलीदर्शनात्पुरशब्दस्य देहवाचकत्वम् । 'पुरस्यारिः' इति व्युत्पत्त्या पुरारिपदं योगादिवाचकमपीत्यनेकार्थकं तुल्यविभक्तिकस्य देवपदस्य सांनिध्याद्देवपदं शिवमात्रबोधकम्' इत्याहुः । तन्न । 'पुरारिः शिवः' इति ग्रन्थविरोधाद् राजादेर्व्यावर्तकत्वेन सुरमात्रबोधकमित्यस्यैव वक्तुं युक्तत्वाच्च देवपदस्य शिवत्वेन शक्त्यभावात्सामान्यशब्दविशेषपरत्वाङ्गीकारेऽपि पौनरुक्त्यापातात् । मधुपदं दैत्यविशेषाद्यनेकार्थकम् । कोकिलमादने वसन्तस्यैव सामर्थ्यम् । **पातु व इति** । मुखपदमाननाद्यनेकार्थकम् । प्रापणे सांमुख्यस्यैवौचिती । 'पातु वः' इति क्वचित्पाठः । प्रियासुरतप्रातिकूल्यजनितखेदं नायकं प्रति सख्या उक्तिरियम् । प्रियाया मुखं सांमुख्यं सुरतानुकूलत्वं वो युष्मान्पातु । प्रातिकूल्यजनितखेदाद्रक्षत्वित्यर्थः । अत्र सांमुख्यस्यैव प्रकृतोपयोगित्वम्, नत्वाननादेः । चन्द्रपदं कर्पूराद्यनेकार्थकम् । चित्रभानुपदं वह्निसूर्याद्यनेकार्थकम् । **रथाङ्गमिति** । चक्रवाकपरत्वे पुंस्त्वं स्यात् । **वेद इति** । इन्द्रशत्रुरित्यादौ बहुव्रीहितत्पुरुषयोः स्वरभेदो वेद एव विशेषप्रतीतिकृत् । न तु काव्यादावित्यर्थः । **मुनेः पाठोक्तदिशेति** । भरतेन मुनिना शृङ्गारादौ स्वरविशेष उक्तस्तदनुसारेणेत्यर्थः । यथा—'हास्यशृङ्गारयोः स्वरितोदात्तम्, वीररौद्राद्भुतेषूदात्तस्वरितम्, करुणबीभत्सभयानकेष्वनुदात्तस्वरितमुत्पादयेत्' इति । उच्च उदात्तः । नीचोऽनुदात्तः । समाहृतः स्वरितः । स च मध्यम एव । आदौ स्वरितः पश्चादुदात्तः

---

१. 'पुरारातिः' ग. २. 'त्वा' क. ३. 'भाति' क. ४. 'मित्रो भातीति सूर्यः' ग. ५. 'इत्थं' क. ६. 'इति—' इत्यादिफक्किका ग-पुस्तके नास्ति. ७. 'विषये नोदाहृतम्' ख. ८. 'इह' क. ९. 'पाठगुणोक्तिदिशा' क. १०. सांप्रतमयमेव पाठः सर्वत्रोपलभ्यते. ११. 'प्रियायाः' इति पुस्तकान्तरे. १२. 'नायकं' इति नास्ति कुत्रचित्.

तन्न । तथाहि—स्वराः काकादयः उदात्तादयो वा व्यङ्ग्यरूपमेव विशेषं प्रत्याययन्ति, न खलु प्रकृतोक्तमनेकार्थशब्दस्यैकार्थनियन्त्रण-रूपं विशेषम् । किं च । यदि यत्र क्वचिदनेकार्थशब्दानां प्रकरणादि-नियमाभावादनियन्त्रितयोरप्यर्थयोरनुरूपस्वरवशेनैकत्र नियमनं वाच्यं तदा तथाविधस्थले श्लेषानङ्गीकारप्रसङ्गः । न च तथा । अत एवाहुः श्लेषनिरूपणप्रस्तावे—'काव्यमार्गे स्वरो न गण्यते' इति च नयः । इत्यलमुपजीव्यानां मान्यानां व्याख्यानेषु कटाक्षनिक्षेपेण । आदिशब्दात् 'एतावन्मात्रस्तनी—' इत्यादौ हस्तादिचेष्टादिभिः स्तनादीनां कमलको-रकाद्याकारत्वम् ।

एवमेकस्मिन्नर्थेऽभिधया नियन्त्रिते या शब्दार्थस्यान्यार्थबुद्धिहेतुः शक्तिः साभिधामूला व्यञ्जना ।

स्वरितोदात्तः । एवमन्यत्रापि । **न च तथेति** । स्वरभेदसत्त्वेऽपि महाकविभिः श्ले

---

1. **एतावदिति** । एषा प्राकृतगाथा, अत्र तु तच्छायांश एवोपन्यस्तः । तथाहि—'एद्दहमेत्तत्थणिआ एद्दहमेत्तेहिं अच्छिवत्तेहि । एद्दहमेत्तावत्था एद्दहमेत्तेहिं दिअहेहि ॥' एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम् । एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः॥' इति संस्कृतम् । सौन्दर्यातिशयशालिन्या नयनगोचरमगताया गुणश्रवणमात्रजनितानुरागेण नायकेनावस्थायां पृष्टायां दूत्या इयमुक्तिः । 'चिरप्रवासिनि नायके नायकावस्थां बोध-यन्त्याः कस्याश्चिदुक्तिरियम्' इत्यन्ये । एतावत्परिमाणं ययोस्तौ एतावन्मात्रौ आमल-कादिपरिमाणौ स्तनौ यस्याः सा । एतावत्परिमाणं ययोस्ते एतावन्मात्रे विवक्षितकमल-दलादिपरिमाणे, ताभ्याम् अक्षिपत्राभ्यां लोचनदलाभ्याम्, उपलक्षितेत्यर्थः । उपलक्षणे तृतीया । एतावद् विवक्षितं परिमाणं उच्चत्वादि यस्याः सा, तथाभूतावस्था स्वरूपं यस्याः सा । एतावद् बुद्धिस्थं परिमाणं संख्या येषां तथाविधैर्दिवसैर्लक्षणया संवत्सरैरुपलक्षिता । परिच्छिन्नेति यावत् । वर्षकथनस्यैव प्रायशो लोकव्यवहारसिद्धत्वात् । अत्र मुकुलाकार-हस्ताभिनयेन स्तनपरिमाणविशेषे, पद्मदलाकृतिना तेन नेत्रपरिमाणविशेषे, उच्चता पुष्टि-प्रदर्शकेन तद्विशेषे, अङ्गुल्यङ्कधारणादिरूपेण च दिवससंख्याविशेषे बुद्धिस्थमात्रपदशक्त्या एतावच्छब्दा नियमितशक्तय इति ॥

2. **एवमित्यादि** । अत्रेदमवधेयम्—यत्रोभयोरर्थयोस्तात्पर्यं स श्लेषः, यत्र त्वेकस्मिन्नर्थे तात्पर्यम्, सामग्रीमहिम्ना तु द्वितीयार्थप्रतीतिः सा व्यञ्जनेति । अत एव रसगङ्गाधरेऽप्युक्तम्—'श्लेषे द्वयोरर्थयोर्वाच्यत्वम्, एककालत्वं च । इह त्वेकस्य वाच्यत्वम्, अपरस्य व्यङ्ग्यत्वम्, भिन्नकालत्वं च' इति । आनन्दवर्धनाचार्योऽप्याह—'यत्र शब्दशक्त्या साक्षादलंकारो वाच्यः सन्प्रतिभासते स सर्वः श्लेषविषयः । यत्र तु शब्दशक्त्या सामर्थ्या-क्षिप्तं वाच्यव्यतिरिक्तं व्यङ्ग्यमेवालंकारान्तरं प्रकाशते स ध्वनेर्विषयः' इति ॥

---

१. 'एकार्थनियन्त्रण—' क-ख. २. 'मान्यानां' इति ग-पुस्तके नास्ति.

यथा मम[1] तातपादानां महापात्रचतुर्दशभाषाविलासिनीभुजंगम-हाकवीश्वरश्रीचन्द्रशेखरसांधिविग्रहिकाणाम्—

'दुर्गालङ्घितविग्रहो मनसिजं संमीलयंस्तेजसा
प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः ।
नक्षत्रेशकृतेक्षणो[2] गिरिगुरौ गाढां रुचिं धारय-
न्गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः ॥'[3]

अत्र प्रकरणेनाभिधेये उमावल्लभशब्दस्योमानाम्नीममहादेवीवल्लभभानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपोऽर्थो बोध्यते । एवमन्यत् ।

लक्षणामूलामाह—

लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम् ।
यया प्रत्याय्यते[4] सा स्याद्व्यञ्जना लक्षणाश्रया ॥ १५ ॥

षाङ्गीकारात् । श्लेषानङ्गीकारो न कर्तव्य इत्यर्थः । **दुर्गेति** । दुर्गैः परिखादिभिरलङ्घितः प्रतिरोद्धुमपारितो विग्रहः संग्रामो यस्य सः । दुर्गं भित्त्वापि रिपुभिः सह विग्रहः क्रियत इति भावः । यद्वा दुर्गैरलङ्घितोऽव्यवहितो विग्रहो यस्य । दुर्गव्यवधानं विनैव युध्यत इत्यर्थः । मनसिजं कामं तेजसा कान्त्या संमीलयन् पराभवन् । प्रोद्यत् प्रकृष्टाभ्युदययुक्तं राजकं राजसमूहं लाति वश्यतया गृह्णाति स तथा । गृहीतगरिमा प्राप्तगौरवः । भोगिभिरुपभोगयुक्तैः पुरुषैर्विष्वक् सर्वतो वृतो व्याप्तः । क्षत्रेशे क्षत्रियश्रेष्ठे कृतेक्षणो दत्तदृष्टिर्न भवतीति । तत्रापि तुच्छबुद्धिरिति भावः । गिरिर्हिमालयो गुरुः श्वशुरो यस्य स शिवः, तत्र रुचिमभिलाषं धारयन् । यद्वा गुरौ गभीरार्थायां गिरि वाचि गाढामुत्कृष्टां रुचिं प्रकाशं धारयन् कुर्वन् । गां पृथ्वीमाक्रम्य पराक्रमेण स्वीकृत्य विभूत्या धनसंपदा भूषिता तनुर्यस्य स उमावल्लभो राजविशेषो राजति । अयमर्थः प्रथममभिधयैव प्रतिपाद्यते । पश्चादस्य वाक्यस्यानेकार्थपदघटितत्वज्ञानाज्जायमानं वक्तृतात्पर्यज्ञानमभिधान्तरग्रहसहकृतमेवमर्थं बोधयति । दुर्गया पार्वत्या लङ्घितोऽर्धत्वेनाक्रान्तो विग्रहः शरीरं यस्य सः । मनसिजं कामं तेजसा तृतीयनयनोत्थज्योतिषा संमीलयन्नाशयन् । प्रोद्यन्ती राजकला चन्द्रखण्डं यस्य सः । गृहीतगरिमा प्राप्तशरीरगौरवः । भोगिभिः सर्पैः नक्षत्रेशेन चन्द्रेण कृतमीक्षणं येन सः गिरिगुरौ हिमालये गां वृषभमाक्रम्य आरुह्य विभूत्या भस्मना भूषितदेहः उमावल्लभः शिवः । **प्रकरणेनेति** । 'नियन्त्रिते' इत्यत्रेणान्वेति । अभिधेयेऽभिधया प्रतिपाद्ये । 'अभिधया' इति पाठे प्रकरणेन सहाभिधया नियन्त्रिते इत्यर्थः । **लक्षणामूलामिति** । 'व्यञ्जनाम्' इत्यनेन प्रकरणलभ्येनान्वेति । लक्षणा

---

१. ग-पुस्तके 'मम' इत्यादि नास्ति. क-ख-पुस्तकयोस्तु 'विलासिनीभुजंग' इति नास्ति. २. 'क-लक्षणः' क. ३. '—नाम्नी महादेवी तद्वल्लभ' घ. ४. 'प्रख्याप्यते' ख.

'गङ्गायां घोषः' इत्यादौ जलमयाद्यर्थबोधनादभिधायां[1] तटाद्यर्थबोधनाच्च लक्षणायां विरतायां यया शीतत्वपावनत्वाद्यतिशयादिर्बोध्यते सा लक्षणामूला व्यञ्जना ।

एवं शाब्दीं व्यञ्जनामुक्त्वार्थीमाह[2]—

वक्तृबोद्धव्यवाक्यानामन्यसंनिधिवाच्ययोः ।
प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च ॥ १६ ॥
वैशिष्ट्यादन्यमर्थं[3] या बोधयेत्सार्थसंभवा ।

व्यञ्जनेति संबध्यते ।

तत्र वक्तृवाक्यप्रस्तावदेशकालवैशिष्ट्ये यथा मम—

'कालो मधुः कुपित एष च पुष्पधन्वा
धीरा वहन्ति रतिखेदहराः समीराः ।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जु-
र्दूरे पतिः कथय किं करणीयमद्य[4] ॥'

अत्रैतं[5] देशं प्रति शीघ्रं प्रच्छन्नकामुकस्त्वया प्रेष्यतामिति सखीं प्रति कयाचिद्व्यज्यते[6] ।

प्रयोजनवती उपास्यते शब्दशक्तित्वेनाङ्गीक्रियते यस्य कृते यस्य बोधनिमित्तम् । अभिधायामिति विरतायामित्यग्रेणान्वयः । चकारात्तात्पर्यार्थबोधनात् । तात्पर्याख्यायां वृत्तौ चेति लभ्यते । **वक्रिति** । वक्त्रादिचेष्टापर्यन्तानां वैशिष्ट्याद्वैलक्षण्यज्ञानाज्जायमाना या शक्तिरन्यमर्थं बोधयति सा अर्थसंबन्धा व्यञ्जनेत्यर्थः । विवक्षितार्थं यः प्रतिपद्यते स बोद्धव्यः । प्रस्तावः प्रकरणम् । काकुः स्वरविकारः, तस्या वैलक्षण्यं वक्तृशिरश्चालनम् । वाच्येति लक्ष्यव्यङ्ग्योपलक्षणम् । वञ्जुलोऽशोकस्तस्य कुञ्जेन तन्मूलस्थलतादिगृहेण मञ्जुर्मनोज्ञः । व्यङ्ग्यार्थमाह—**अत्रेति** । वक्त्र्याः कामुकत्वम्, वाक्यस्योद्दीपनविभावसमूहकामोद्रेककजनकतत्कालपत्यलाभकर्तव्यनिश्चयविषयत्वम्, प्रस्तावस्य सुरतविषयत्वम्, कालदेशयोः कामोद्रेककजनकत्वम् । वैशिष्ट्येऽप्येतदेवोदाहरणम् । वाच्यस्य पत्यसंनिधिकामोद्रेककालीनकर्तव्यप्रश्नस्य स्वरहस्यवेदिवयस्यासमाधानीयत्वं वैशिष्ट्यम् ।

---

१. 'विरतायां' इत्यधिकं ग-घ-पुस्तकयोः. २. 'आर्थीं व्यञ्जनां' घ. ३. 'या वैशिष्ट्यादन्यमर्थ' ख. ४. 'अत्र' ग. ५. 'एतं' क-पुस्तके नास्ति. ६. 'द्योत्यते' क-ख-ग. ७. ग-पुस्तके 'भिन्नकण्ठध्वनिः—' इत्यारभ्य '—पद्मनिमीलनादिचेष्टया कयाचिद्द्योत्यते' इत्यन्तोऽग्रिमग्रन्थ इहैव दृश्यते । तथा 'त्रैविध्यादियमर्थानां—' इत्यादिः 'उभ णिचलेत्यादि' इत्यन्तोऽग्रिमग्रन्थस्थः पाठो न दृश्यते.

बोद्धव्यवैशिष्टे यथा—

'[1]निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी [2]तवेयं तनुः ।

निःशेषेति । नायकमानेतुं प्रेषितां तदुपभोगेन लुप्तचन्दनादीन्स्नानव्याजेन गो-

---

1. **निःशेषेति** । एतद्व्याख्या नातिरुचिरेति पुनर्व्याख्यायते—नायकानयनाय प्रेषितां तं संभुज्यागतां दूती प्रति स्नानकार्यप्रकाशनमुखेन संभोगं प्रकाशयन्त्या विदग्धोत्तमनायिकाया उक्तिरियम् । अयि मिथ्यावादिनि, मया गत्वा बहुधा प्रसादितोऽपि नायात इति मिथ्याभाषणशीले, बान्धवजनस्य मद्रूपस्य अज्ञातः स्वार्थसाधनतत्परतया अनाकलितोऽगणितः पीडाया वियोगानलसंभूताया आगम आगमनं यया तथाभूते । हे दूति, न तु सखि । प्रतारणकर्तृत्वादूतीपदेन मिथ्याभाषणशीलत्वयोग्यता व्यज्यते । त्वम् इतो मत्सकाशाद् वापी स्नातुं स्नानार्थं गतासि तस्य बहुधा कृतापराधस्य अत एवाधमस्य परवेदनानभिज्ञतया दुःखप्रयोजककर्मशीलस्य अन्तिकं समीपं न पुनरिति 'गतासि' इत्यनुषज्यते । पुनरेवार्थे । नैव गतासीत्यर्थः । उक्तार्थे साधकमाह—निःशेषेत्यादि । तवेत्यस्य स्तनतटादिभिः सर्वैरन्वयः । यतस्तव स्तनयोस्तटं प्रान्तसमदेशो निःशेषं यथा स्यात्तथा च्युतं स्खलितं चन्दनं यस्मात्तथाभूतम् । न तूरःस्थलम्, नापि संध्यादिरूपनिम्नोन्नतभागोऽपि । वापीगतबहलयुवजनत्रपापारवश्यादंसद्वयं लज्जाग्रस्तस्तिकीकृतभुजलतायुगलेन तटस्यैवोन्नततया मुहुर्मुहुः परामर्शात् । अत एव च्युतमित्युक्तम्, न तु च्यावितं क्षालितं वेति । युवजनसंमर्देन तत्राप्यनवकाशात् । व्यङ्ग्यपक्षे तु—तट एव मर्दनाधिक्यात्संध्यादौ नायककरपरामर्शायोगाच्च तटमेव तथाभूतमिति व्यक्तमेव । एवमधरोऽधरोष्ठो निःशेषं यथा स्यात्तथा मृष्टो न त्वीषन्मृष्टः रागः ताम्बूलरक्तिमा यस्य तथाभूतः । उत्तानत्वेन बहलजलसंबन्धात् । न तूत्तरोष्ठः । न्युब्जतया तत्संबन्धमान्द्यात् । व्यङ्ग्यपक्षे तु—अधरोष्ठ एव कामशास्त्रे चुम्बनविधेः उत्तरोष्ठे चुम्बननिषेधाच्च तत्रैव तत्कृतं तथात्वम् । किंच, नेत्रे लोचने दूरं प्रान्तभागे एव अनञ्जने अञ्जनरहिते । स्नानकाले नयनयोर्मुद्रणान्मध्ये जलसंबन्धाभावात् । व्यङ्ग्यपक्षे तु—प्रान्त एव चुम्बनविधेर्मध्ये तन्निषेधाच्च तत्रैवाञ्जनत्वम् । तथा इयं दृश्यमाना तव तनुः शरीरं तन्वी कृशा । स्नानजन्यशीतवशात् । अत एव पुलकिता पुलका रोमोद्गमाः संजाता यस्यास्तथाभूता । व्यङ्ग्यपक्षे तु—कार्श्यं सुरतश्रमात्, पुलकश्च तत्रानुभूताद्भुतरससस्मरणात् । एवं विदग्धाया गूढतात्पर्यवाचोयुक्त्या साधारणेष्वेतेषु वाक्यार्थेष्ववगतेषु विदग्धोत्तमनायिकात्वदुःशीलत्वादिरूपवक्तृबोद्धव्यवैशिष्ट्यबलादधमपदार्थो दुःखप्रयोजककर्मशीलत्वरूपः साधारणो वाच्यतादृशायां तादृशकर्मान्तरशीलत्वरूपेणावस्थितो व्यञ्जनया दूतीसंभोगरूपतादृशकर्मशीलत्वाकारेण पर्यवस्यति । अत एव झटिति व्यङ्ग्यबोधकत्वादधमपदस्य प्राधान्यम् । वक्तृबोद्धव्यवैशिष्ट्यबलेन विशेषाकारेण पर्यवसाने विलम्बाभावात् । चन्दनच्यवनादीनां तु

---

१ 'तथा' ख.

मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥'

पयन्तीं सखीं प्रति नायिकायाः सोल्लुण्ठनोक्तिरियम् । मच्चेष्टया नायात इति मिथ्यावादिनि, हे दूति, बान्धवजनस्य मम अज्ञातपीडागमे, त्वमितो मत्सकाशात्स्नातुं वापीं गता, न पुनस्तस्याधमस्यान्तिकं गता । यतस्ते स्तनतटं निःशेषच्युतचन्दनम्, अधरश्च निर्म्रिष्टरागः, नेत्रे दूरमत्यन्तमनञ्जने, तन्वी कृशा तनुः पुलकिता । स्नानकार्यमिदं सर्वमिति बोधयन्त्या आपाततो दुर्विदग्धानभिधया बोधयितुं विदग्धनायिकया तथा प्रयुक्तं पश्चादनुरणनरीत्या 'भम धम्मिअ–' इत्यादाविवात्र तदन्तिकमेव रन्तुं गतासीति व्यञ्जनया प्रतीयते । एतदर्थस्याभिधया बोधने ग्राम्यत्वदोषः स्यादिति केचिदाहुः । एतद्व्याख्यानं प्राचां वाचस्पतिमिश्रप्रभृतीनामसंमतम् । तेषामयमभिप्रायः—'भम धम्मिअ–' इत्यादौ भ्रमणविघ्नकारिणः शुनो विनाशाद्भ्रमणं युक्तमिति प्रथममभिधयान्वयबोधो जायते । तदनन्तरमेव सिंहान्तिके भ्रमणमत्यन्तमयुक्तमिति भ्रमणबाधावतारो भवति । प्रकृते तु पदार्थविशेषानुसंधानचतुराणां झटिति तत्तत्पदार्थविशेषप्रतिसंधानात्प्रथममेव बाधावतारः । तथाहि—तटदेशमेकदेशपरं सभयरतौ सम्यक् पीडनाभावेन स्तनैकदेशस्यैव चन्दनच्यवनम्, स्नाने तु सर्वस्यैव स्तनस्य चन्दनच्यवनं स्यात् । तटपदस्य स्वरूपार्थकत्वे स्तन एव लुप्तचन्दनः, न त्वङ्गान्तरम् । मुखमुत्तानीकृत्य चुम्बनेनाधरस्यैव रागभ्रंशः, न तूत्तरोष्ठस्य । मुखं न्युब्जीकृत्य स्नानेनोभयोरेव रागभ्रंशः स्यात् । इयमिदानींतनी । तदानीमपि तत्प्रसङ्गेन पुलको भवति । ह्रीव्रीपुलकस्य पथि श्रमादिना नाशसंभवात् । अधमस्य प्रागपि ज्ञातनिकृष्टपरिग्रहस्य । एवं च निरुक्तसुरतनिर्णयचिह्नत्रयस्य तत्समीपगमनमन्तरेणासंभवाद् विना लक्षणामन्वयबोधो न भवतीति नञ्पदस्य एवकारार्थे लक्षणा । अयोगव्यवच्छेदरूप एवकारार्थे नञर्थस्याभावस्य प्रतियोगित्वं संबन्धः । एवं वापीं स्नातुमित्यत्रापि विपरीतलक्षणया गमनाभाव एव प्रतीयते । तथा च त्वमितो वापीं स्नातुं न गता, तस्याधमस्यान्तिकमेव गतेत्यन्वयबोधः । रन्तुमिति प्रयोजनं व्यञ्जनया प्रतीयते । यत्रान्वयबोधात्प्राग्बाधावतारस्तत्र लक्षणा, यत्र तु पश्चात्तत्र व्यञ्जना । अन्यथा 'उपकृतं–' इत्यादावपि लक्षणा न स्यात् । तदुक्तम्—'क्वचिद्बाध्यतया ख्यातिः क्वचित्ख्यातस्य बाधनम् । पूर्वत्र लक्षणैव स्यादन्यत्र व्यञ्जनैव तु ॥' इति ।

स्नानकार्यतया निबद्धाना योग्यतया संभोगाङ्गभूताश्लेषचुम्बनादिकार्यताप्रतिसंधाने सति तद्व्यञ्जनद्वारा संभोगगमकत्वमिति विशेषः । अत्र च त्वय्यकृतज्ञायां यद्बान्धवबुद्धया शिंश्वसिमि यच्च तत्रैवंविधे दृढमनुरक्तास्मि तद्युक्तमेव ममैवंविधविविधवञ्चनाजनितपरितापपात्रत्वमितीर्ष्याहेतुकविप्रलम्भसंचारिनिर्वेदध्वनिः । तदनुगुणश्च दूतीसंभोगः । चन्दनच्यवनादीनां च वाच्यानां व्यङ्ग्यानां च परिरम्भचुम्बनाद्यनुभावानां संभोगोत्कर्षद्वारेणेर्ष्योत्तेजकानां निर्वेदोत्कर्षत्वमिति संक्षेपः ।

---

१. पुस्तकान्तरे 'निर्णय' इति नास्ति,

अत्र तदन्तिकमेव रन्तुं गतासीति विपरीतलक्षणया लक्ष्यम्। तस्य च रन्तुमिति व्यङ्ग्यप्रतिपाद्यं दूतीवैशिष्ट्याद्बोध्यते।

अन्यसंनिधिवैशिष्ट्ये यथा—

'उअ णिच्चल णिप्फन्दा भिसिणीपत्तम्मि रेहइ बलाआ।
णिम्मलमरगअभाअणपरिट्ठिआ सङ्खसुत्ति व्व॥'

क्वचित् 'उत्तरत्राभिधैव तु' इति चतुर्थचरणे पाठः। अत्र वक्त्रादिवैशिष्ट्याद् व्यङ्ग्यान्तरमपि दूत्यकर्मणात्यन्तहीनायामपि त्वयि सापराधायां तस्मिन्नप्यधमे मम नासूया। किं त्वेवमकृतज्ञायां त्वयि यद्वान्धवबुद्ध्या विश्वसिमि, या च तस्मिन्नेवंविधे हरिद्रारागिणि दुर्विदग्धे मन्दभागिनी दृढमनुरक्तास्मि, तदेवंविधवञ्चनासहस्रजनितप्रौढपरितापपुटपाकपात्रत्वं मम युक्तमेवेति विप्रलम्भप्रभेदेर्ष्यामानव्यभिचारिनिर्वेदध्वनिरिति। अत्र फलस्य लक्ष्यतद्धर्मान्यतरवृत्तित्वनियमेन रमणस्य तदन्यतरवृत्तित्वाल्लक्षणामूलव्यञ्जनाया असंभवात्प्रतिपाद्यवैशिष्ट्येनैव रमणस्य प्रतीतिरित्यभिप्रायेण ग्रन्थकृदाह—

तदन्तिकमेवेति। विपरीतेति। तत्समीपगमनाभावभावबोधनादिति भावः। निरुक्तसुरतचिह्नत्रयमेव दूतीवैशिष्ट्यम्। केचित्तु—'तदन्तिकं न गतासीत्यस्य वाक्यत्वाल्लक्षणायाश्च शब्दमात्रवृत्तित्वादत्र लक्षणा न संभवति' इत्याहुः। तन्न। उक्तक्रमेण नञ्पद एव लक्षणास्वीकारात्। 'वापीं स्नातुं गतासि तदन्तिकमेव गतासीति योजनया तदन्तिकगमनं वाच्यमेव। तस्यैव रन्तुमिति व्यङ्ग्यम्' इत्यपरे। तदपि न सम्यक्। त्वर्थपुनःशब्देन नञर्थस्य पूर्वान्वयस्य व्यवच्छेदात्। केचित्तु—'स्नाने चन्दनाधररागयोः क्षालनमेव, न च्युतिनिर्माजने, तयोः संभोगघर्षणादेरसंभवात्, अतश्च्युतनिर्म्रिष्टपदे अपि तैर्व्यञ्जके' इत्याहुः। तन्न। तयोः स्नानकार्यत्वानङ्गीकारे स्वमतसिद्धप्राथमिकबोधानुदयप्रसङ्गात्। अन्यसंनिधिवैशिष्ट्ये व्यङ्ग्यार्थव्यञ्जनामाह—

उअ णिच्चलेति। 'पश्य निश्चल निःस्पन्दा बिसिनीपत्रे राजते बलाका। निर्मल-

---

1. **उएति।** 'उअ' इति पश्येत्यर्थे देशीति नरसिंहठक्कुराः, अव्ययमिति नागेशभट्टाः। बिसिनी कमलिनी तस्याः पत्रे बलाका सितपक्षिविशेषो बकपङ्क्तिर्वा राजते। त्वं पश्येति वाक्यार्थः कर्म। किंभूता। निश्चलनिःस्पन्दा। निश्चला चासौ निःस्पन्दा चेति विशेषणोभयपदः कर्मधारयः। 'पुंवत्कर्मधारय—' इति पुंवद्भावः। चलनं देशान्तरप्राप्तिका शरीरक्रिया, स्पन्दस्त्ववयवमात्रक्रिया। 'स्पदि किंचिच्चलने' इत्यनुसारात्। तेन न पौनरुक्त्यम्। केव राजत इत्याह—निर्मलेत्यादि। निर्मलं स्वच्छं यन्मरकतस्य नीलमणेर्भाजनं पात्रं तत्र परिस्थिता विद्यमाना शङ्खशुक्तिरिव। शङ्खशुक्तिश्च शङ्खघटितं शुक्त्याकारं पात्रम्। अत्राचेतनोपमया लेशतोऽपि क्षोभाभावस्तेन निर्जनत्वं गम्यते॥

2. **हरिद्रेति।** हरिद्रारागश्चिरं नावतिष्ठते॥

---

१. 'व्यङ्ग्यं प्रतिपाद्य' घ. २. 'अत आह—च्युतनिर्म्रिष्टपादेऽपि' इति पुस्तकान्तरे. ३. व्यञ्जने' इति पुस्तकान्तरे.

अत्र बलाकाया निःस्पन्दत्वेन[1] विश्वस्तत्वम्, तेनास्य देशस्य विजनत्वम्, अतः संकेतस्थानमेतदिति कयापि संनिहितं प्रच्छन्नकामुकं प्रत्युच्यते[2] । अत्रैव स्थाननिर्जनत्वरूपं[3] व्यङ्ग्यार्थवैशिष्ट्यं प्रयोजनम् ।

'भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते[4]' इत्युक्तप्रकारायाः काकोर्भेदा आकरेभ्यो ज्ञातव्याः । एतद्वैशिष्ट्ये यथा—

'गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम् ।
अलिकुलकोकिललालिते नैष्यति सखि सुरभिसमयेऽसौ ॥'

अत्र नैष्यति, अपि तर्हि एष्यत्येवेति काका व्यज्यते ।

चेष्टावैशिष्ट्ये यथा—

'संकेतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥'

अत्र संध्यासंकेतकाल इति पद्मनिमीलनादिचेष्टया कयाचिद्द्योत्यते ।

मरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ॥' इति [संस्कृतम्] । उअ पश्य । निश्चलेति संबोधनम् । 'संकेतस्थानचेष्टाशून्य' इति तदर्थः । 'निश्चला पृथिवी सेव निःस्पन्दा' इति केचित् । 'अतिनिश्चला' इत्यपरे । शङ्खशुक्तिः शङ्खकपालम् । अन्यस्य संनिधिः सामानाधिकरण्यम्, तस्य प्रच्छन्नकामुकत्वं वैशिष्ट्यमुच्यते व्यज्यते । अत्रैव अस्मिन्नुदाहरण एव निर्जनत्वातिशयो वैशिष्ट्यं प्रयोजनं तृतीयव्यञ्जनायाः कारणम् । **भिन्नेति** । शोकहर्षभयादिकृतेत्यर्थः । आकरेभ्य उपजीव्यभरतादिग्रन्थेभ्यः । सुरभिसमये वसन्तकाले । **अपि तर्हीति** । अपि त्वित्यर्थः । **संकेतेति** । विटमुपपतिम् । हसत्प्रफुल्लम् । नेत्राभ्यामर्पितमाकूतमात्माभिप्रायो यत्र तद्यथा स्यात्तथा नि-

---

1. **निःस्पन्देति** । निःस्पन्दत्वेन वाच्येन विश्वस्तत्वं व्यङ्ग्यमिति शेषः । तेन व्यङ्ग्येन विजनत्वं व्यङ्ग्यमिति शेषः ॥

2. **उच्यत इति** । व्यञ्जनया प्रतिपाद्यते इत्यर्थः ॥

3. **काकुरिति** । कायत्यर्थान्तरमिति काकुः । यद्वा काकुर्जिह्वेति पस्पशायां भाष्यकारः । तद्व्यापारविशेषसंवाद्यत्वाच्छोकहर्षभयादिभिर्ध्वनेर्विकारः काकुः । तथा चोक्तम्—'वाक्याभिधेयमानेऽर्थे येनान्यः प्रतिपद्यते । भिन्नकण्ठध्वनिर्धीरैः स काकुरिति कथ्यते ॥'इति ॥

4. **संकेतेति** । संकेतकाले मनो यस्य । तं जिज्ञासुमित्यर्थः । अत एव हसद्भ्यां नेत्राभ्यामर्पितं सूचितमाकूतं रहस्यं येन । हसदिति भिन्नं प्रफुल्लमित्यर्थकं पद्मविशेषणं वा । शेषं व्यक्तम् । इह नेत्रेङ्गितेन लक्षितो गूढाभिप्रायः कामिन्या निशासूचकेन पद्मनिमीलनेन प्रकाशितः ॥

---

१. 'विश्रब्धत्वं' ख. २. '–रूपव्यङ्ग्यार्थ–' ख-घ. ३. 'प्रयोजकम्' ख-घ; ग-पुस्तके तु 'अत्रैव–' इति फक्किका नास्ति. ४. 'ईषत्' क.

एवं वक्रादीनां व्यस्तसमस्तानां वैशिष्ट्ये बोद्धव्यम् ।

त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता ॥ १७ ॥

अर्थानां[1] वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्वा अप्यनन्तरोक्ता व्यञ्जनास्त्रिविधाः । तत्र वाच्यार्थस्य व्यञ्जना यथा—'कालो मधुः—' इत्यादि । लक्ष्यार्थस्य यथा—'निःशेषच्युतचन्दनं—' इत्यादि । व्यङ्ग्यार्थस्य यथा—'उअ णिच्चल—' इत्यादि । प्रकृतिप्रत्ययादिव्यञ्जकत्वं तु प्रपञ्चयिष्यते ।

शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः ।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ॥ १८ ॥

यतः शब्दो व्यञ्जकत्वेऽप्यर्थान्तरमपेक्षते, अर्थोऽपि शब्दम्, तदेकस्य व्यञ्जकत्वेऽन्यस्य सहकारितावश्यमङ्गीकर्तव्या ।

अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः ।
शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा ॥ १९ ॥

मीलितमित्यर्थः । यद्वा, हसदिति नेत्रविशेषणम् । एतदेव पद्मनिमीलनस्य नेत्रार्पिताकूतत्वं वैशिष्ट्यम् । चेष्टादिकस्येत्यादिपदाच्चेष्टाविरहादिग्रहः । तद्वैशिष्ट्ये यथा—'नादत्ते भूषणं दत्तं नाहूता चिरमृच्छति । मृगाक्षी न क्षिपत्यक्षि सादरं मयि पश्यति॥' अत्र चेष्टाविरहेण कोपो व्यज्यते । तस्य च कान्तापराधकालीनत्वं वैशिष्ट्यम् । व्यस्तानां प्रत्येकं समस्तानां द्वित्र्यादिसंकीर्णानाम् । त्रैविध्यादिति इयं व्यञ्जना । प्रपञ्चयिष्यते । 'असंलक्ष्यक्रमव्यङ्ग्यध्वन्युदाहरणे'इति शेषः । ननु शाब्द्यां व्यञ्जनायामर्थस्यार्थ्यामपि शब्दस्योपयोगिलमस्त्येव तत्कीदृशमनयोर्भेदकारणमत आह—**शब्दबोध्य इति** । अर्थान्तराश्रयः अर्थान्तरोपस्थापकः । 'व्यनक्ति' इत्यनुषज्यते । इत्यनुपपत्तिदर्शनानन्तरमुपपत्तिमाह—**एकस्येति** । सहकारिता अप्रधानकारणत्वम् । अप्रधानत्वं च व्यवहितोपकारित्वेन । एवं च यत्र यस्याव्यवहितोपकारित्वेन प्रधानत्वं तत्र तत्संबन्धित्वेनैव तस्यां व्यवहार इति भावः । ननु नाटकादौ वेशाभिनयादेरपि व्यञ्जकत्वसंभवेन व्यञ्जकद्वैविध्यमात्रमुक्तमिति चेत्, न । तत्रापि शब्दोपहितार्थस्यैव व्यञ्जकत्वाङ्गीकारात् । वेशाभिनयादेस्तु चेष्टादिवैशिष्ट्यरूपसहकारित्वोपगमात्तत्र शब्दसत्त्वेऽपि वेशाभिनयदर्शनस्य प्राधान्येनैव दृश्यत्वव्यवहारः । अत एव वक्ष्यति—'श्रवणैः पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभिः । भवदर्थमिव निबद्धं नाट्यं सीतास्वयंवरणम् ॥' इति । अभिधादिव्यापारत्रयं निरूप्य तत्प्रयुक्तं शब्दस्यापि त्रैविध्यमाह—**अभिधेति** । उपाधिर्व्यापारः । अभिधया लक्षणया वा शब्दैः प्रत्ये-

---

१. 'अस्यार्थानां' ख. २. 'ननु—' इत्यादिः 'सीतास्वयंवरणम् । इति' इत्यन्तः पाठः पुस्तकान्तरे न दृश्यते.

अभिधोपाधिको वाचकः । लक्षणोपाधिको लक्षकः । व्यञ्जनोपाधिको व्यञ्जकः ।

किं च—

[1]तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने ।
तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे ॥ २० ॥

अभिधाया [2]ऐकैकपदार्थबोधनविरमाद्वाक्यार्थरूपस्य [3]पदार्थान्वयस्य

कमुपस्थापितानां पदार्थानां संसर्गो वाक्याद्भासमानस्तात्पर्याख्यां वृत्तिमपेक्षत इति प्राचीननैयायिकमतमाह—**किं चेति** । मतान्तरसूचनाय 'आहुः' इति 'परे' इति परेणान्वयः । इयमेवाधुनिकैः संसर्गमर्यादोच्यते । अभिधाया इति लक्षणाया उपल-

---

1. **तात्पर्येति** । एतदुक्तं भवति—लाघवात्पदानां पदार्थमात्रे शक्तिः नत्वन्वयांशेऽपि । गौरवादनन्यलभ्यत्वाच्च । तदंशो हि तात्पर्यार्थो वाच्यार्थविलक्षणशरीर आकाङ्क्षायोग्यतासत्तिवशादपदार्थोऽपि प्रतीयते । न चापदार्थविषयस्यापि शाब्दबोधविषयत्वे कथंचिदुपस्थितस्य गगनादेरपि तद्विषयत्वापत्तिरिति वाच्यम् । अपदार्थविषयस्य शाब्दबोधविषयतायामप्रयोजकत्वात् । इत्यभिहितान्वयवादिनो नैयायिक-भाट्ट-मीमांसकाः । तेषामयमभिप्रायः—'घटं करोति' इत्यादौ घटवृत्तिकर्मत्वानुकूला कृतिरित्यर्थो बोध्यते । तत्र घटपदस्य घटोऽर्थः, अम्प्रत्ययस्य च कर्मता, वृत्तिता तु न कस्यापि, इत्यपदार्थोऽपि वृत्तिता तात्पर्यवशादनयोः संसर्गविधया भासते । अन्विताभिधानवादिनः प्राभाकरास्तु—'अन्वयरूपे वाक्यार्थेऽपि पदानां शक्तिः । व्यवहारेणान्वितस्यैवोपस्थापनात्तत्रैव शक्तिग्रहात् । तथाहि—'देवदत्त, गामानय' इत्युक्तमवृद्धप्रयोगात्साक्षादिमती व्यक्ति मध्यमवृद्धे संचारयति, तच्चेष्टया तस्य वाक्यस्य तदर्थबोधकतामनुमाय पश्चात् 'गां नय, अश्वमानय' इति प्रयोगे गवापसरणमश्वाहरणं च दृष्ट्वान्वयव्यतिरेकाभ्यां क्रियापदार्थान्विते कारके कारकपदस्य, कारकपदार्थान्वितायां क्रियायां च क्रियापदस्य शक्तिं बालोऽवधारयति । ततः प्रयोगकाले तस्य प्रथमत एवान्वितबुद्धिर्जायते । न च गौरवेणान्वयांशपरिहारः । प्रथमगृहीतान्वयशक्तेरुपजीव्यत्वेन तदपरित्यागात् । शाब्दबोधे तु आकाङ्क्षादिवशाद्वृत्तितादिविशेषरूपमेव भासत इति नापदार्थो वाक्यार्थः' इति वदन्ति । अत्रारुचिबीजं तु—'अन्वितत्वेन शक्तावपि अन्वयविशेषावगमाय आकाङ्क्षादिकं कारणमवश्यमङ्गीकार्यम् । एवं च विशेषाकारेण अशक्यस्यैव भानमिति तैरप्यवश्यमभ्युपेयम्' इति ॥

---

१. 'पदार्थमात्रबोधविरमात्पदार्थानामन्वयप्रतिपादिका तात्पर्याख्या शक्तिः' ग. २. 'पदानां क., पदार्थानां' ख.

बोधिका तात्पर्यं नाम वृत्तिः । तदर्थश्च तात्पर्यार्थः । तद्बोधकं च वाक्यमित्यभिहितान्वयवादिनां[1] मतम् ॥

इति साहित्यदर्पणे वाक्यस्वरूपनिरूपणो नाम द्वितीयः परिच्छेदः ।

क्षणम् । अभिहितानामभिधया लक्षणया वा पदोपस्थापितानामन्वयबोधवादिनां प्राचीननैयायिकानामित्यर्थः । अन्विताभिधानवादिनो[2] मीमांसकगुरवस्तु—'क्रियाकारकयोः प्रथमत एवान्वयबोधो जायते ततः शक्तिग्रहः । पदविशेषसमभिहारात्तु विशेषस्मृतिरिति, किं तात्पर्याख्यवृत्तिस्वीकारेण' इत्याहुः ॥

इति श्रीरामचरणतर्कवागीशभट्टाचार्यविरचितायां साहित्यदर्पणविवृतौ द्वितीयः प्रकाशः ।

---

1. **अभिहितेति** । अभिहितानां स्वस्ववृत्त्या पदैरुपस्थितानामर्थानामन्वय इति ये वदन्ति तेऽभिहितान्वयवादिन इत्यन्वर्थमभिधानम् ॥

2. **अन्वितेति** । पदान्यन्वितानि भूत्वानन्तरं विशिष्टमर्थं बोधयन्तीति ये वदन्ति तेऽन्विताभिधानवादिन इत्यन्वर्थं नाम ॥

---

१. 'तदर्थं च तात्पर्यार्थं' घ.

तृतीयः परिच्छेदः ।

अथ कोऽयं रस इत्युच्यते—

विभावेनानुभावेन व्यक्तः संचारिणा तथा ।
रसतामेति रत्यादिः स्थायिभावः सचेतसाम् ॥ १ ॥

काव्यलक्षणरूपैककार्यानुकूलत्वसंगत्या वाक्यनिरूपणानन्तरं रसं निरूपयितुमाह— **अथेति** । वाक्यनिरूपणानन्तरं कोऽयमिति जिज्ञासाविषयो रसो निरूप्यत इत्यर्थः । अयं काव्यलक्षणनिविष्टो रसः । **विभावेनेत्यादि** । **सचेतसामिति** । नायकादिनि-

---

1. **विभावेनेति** । इह स्वस्वप्रतिभोन्मेषवशेन 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति मूलभूतं भरतसूत्रं व्याचक्षाणानामनेके पक्षाः तेषु कतिचन प्रकृतोपयोगित्वाद् व्युत्पत्त्याधायकत्वाद् हृदयंगमत्वाच्च प्रदर्श्यन्ते प्राञ्जलीक्रियन्ते च । तत्र **भट्टलोल्लट**प्रभृतीनामेष सिद्धान्तः—'स्थायिनां विभावेनोत्पाद्योत्पादकभावरूपादनुभावेन गम्यगमकभावरूपाद्व्यभिचारिणा पोष्यपोषकभावरूपात्संबन्धाद्रसस्य निष्पत्तिरुत्पत्तिरभिव्यक्तिः पुष्टिश्चेत्यर्थः । तथाहि—ललनादिभिरालम्बनविभावैः स्थायी रत्यादिको जनितः, उद्यानादिभिरुद्दीपनविभावैरुद्दीपितः, अनुभावैः कटाक्षभुजक्षेपणादिभिः प्रतीतियोग्यः कृतः, व्यभिचारिभिरुत्कण्ठादिभिः परिपोषितो रामादावनुकार्ये नाट्येनाभिनेये रसः । नटे तु तुल्यरूपतानुसंधानवशादारोप्यमाणः सामाजिकानां चमत्कारहेतुः' इति । पिण्डितार्थस्त्वयम्—यथा सर्पाभावेऽपि सर्पतयावलोकिताया रज्जोरपि भयमुत्पद्यते तथा सीतादिविषयानुरागरूपा रामादिरतिरविद्यमानापि नर्तकेऽभिनयनैपुण्येन तस्मिन्स्थितेव प्रतीयमाना सहृदयहृदये चमत्कारमर्पयन्त्येव रसपदवीमधिरोहतीति । अयं क्रमः—'प्रथमं रामादिगतसीतादिविषयकरत्यादिरेव रसः सहृदयैः काव्योपात्तलिङ्गद्वारेणानुमीयते । ततस्तस्य कमनीयविभावाद्यभिनयप्रदर्शननिपुणे रामाद्यनुकारिणि नर्तके सादृश्यज्ञानरूपदोषादारोपः साक्षात्कारात्मको धर्म्यंशे लौकिक आरोप्यांशे त्वलौकिकः 'रामोऽयं सीताविषयकरतिमान्' इत्याकारकश्चमत्कृतिहेतुरिति । न च सादृश्यस्य भेदगर्भत्वाद्बाधे सति कथं रामाद्यारोप इति चेत्, न । भेदस्य नर्तकनैपुण्यदोषेणाग्रहणात् । नेदं हृदयग्राहि । सामाजिकेषु रसनिष्पत्त्यभावे तत्र चमत्कारानुभवविरोधात् । न च तज्ज्ञानमेव चमत्कारहेतुः । लौकिकशृङ्गारादिविलोकनेनापि चमत्कारप्रसङ्गात् । न चानुभावादिविज्ञानबलायात आरोपस्तथा नतु साक्षात्कारमात्रमिति वाच्यम् । [1]चन्दनसुखादौ वैपरीत्यदर्शनात्, अन्यथैवोपपत्त्या तादृशकल्पनायां मानाभावाच्च' इति ॥ **श्रीशङ्कुकस्य** तु—'स्थायिनो विभावादिभिरनुमाप्यानुमापकभावरूपसंबन्धाद्रसस्य निष्पत्तिरनुमितिरित्यर्थः । तथाहि—नियमविषया धीः सम्यग्बुद्धिः । यथा 'राम एवायम्'

---

1. नहि चन्दनारोपश्चमत्कारहेतुः किंतु वस्तुतश्चन्दनसंबन्ध एव । तथा सुखमपि नारोप्यमाणं तथा, किंतु वस्तुतो विद्यमानमेव ।

'अयमेव रामः' [1]इत्ययोगान्ययोगव्यवच्छेदविषये । अनन्तरावतीर्णबाधा तु मिथ्याबुद्धिः । यथोत्तरकालिके 'न रामोऽयम्' इति बाधे 'रामोऽयम्' इति । विरुद्धोभयकोटिका तु संशयबुद्धिः । यथा 'अयं रामो न वा' इति । सदृशोभयविषया तु सादृश्यबुद्धिः । यथा 'रामसदृशोऽयम्' इति । एताभ्यो लोकप्रसिद्धप्रतीतिभ्यो विलक्षणया चित्रे 'तुरगोऽयम्' इतिवत् 'रामोऽयम्' इति बुद्धया प्रथमं पक्षभूतो नटो विषयीक्रियते । ततस्तत्राविद्यमानमपि विभावादित्रयं लिङ्गमवगम्यते । कस्मात् । पूर्वमेव रोमाञ्चाविर्भावने गुरुशिक्षामासाद्य कृतदृढाभ्यासेन नटेन—'[4]सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः । मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता ॥' इति । 'दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च[5] । अविरलविलोलजलदः कालः समुपागतश्चायम् ॥' इत्यादिकाव्यानुसंधानबलादालम्बनोद्दीपनविभावाभिव्यक्तौ तदनुगुणस्य रोमाञ्चादेर्दर्शनीयस्यानुभावस्याविर्भावनेन व्यञ्जनीयस्योत्कण्ठादेर्व्यभिचारिभावस्य तत्कार्यशून्यदृष्टित्वादिप्रकटनेन च प्रकाशनात् । अथ तैः कृत्रिमत्वेनातल्लिङ्गैरपि कृत्रिमत्वेनाज्ञानात्स्थायी रत्यादिरनुमीयते । अनुमानाकारस्तु—'रामोऽयं सीताविषयकरतिमान् सीताद्यालम्बनविभाववर्षर्तुरूपोद्दीपनविभावरोमाञ्चाद्यनुभावौत्सुक्यादिसंचारिभावसंबन्धित्वात् 'यो यदात्मकविभावत्वे सत्यनुभावसंचारिभाववान् स तद्रतिमान्' इति यत्तद्भ्यां सामान्यतो व्याप्तिः । 'यो नैवं स नैवम्' इति व्यतिरेकव्याप्तिर्वेति । सैव चानुमितिः सचमत्कारप्रतीतिरूपा चर्वणा । अतस्तया विषयीक्रियमाणः स्थायी रस इत्युच्यते । चर्वणा च सामाजिकानामिति तेष्वेव रस इति व्यवहारः । ननु साक्षात्कार एव सचमत्कारः, नत्वनुमित्यादिरपि । अन्यथा सुखादावनुमीयमानेऽपि रसः स्यात् । न स्यात् । वस्तुसौन्दर्यबलाद्रसनीयत्वेन रत्यादिस्थायिनामितरानुमेयवैलक्षण्यात् । तथापि रत्यादीनां

---

1. यत्र विशेषणान्वित एवकारस्तत्र विशेष्ये विशेषणस्यासंबन्धरूपमयोगं निषेधति । यथा 'राम एवायम्' इत्यत्र रामस्य विशेषणत्वेन तदन्विते एवकारेण इदमर्थे विशेष्ये रामत्वायोगं निवर्तयन्नस्य रामत्वं नियमयति । यत्र विशेष्यान्वित एवकारस्तत्र विशेष्येतरस्मिन्विशेषणीभूतधर्मसंबन्धं निवारयति । यथा—'अयमेव रामः' इत्यत्र रामभिन्ने रामत्वसंबन्धं निवारयन्नस्मिन्रामत्वं नियमयति ।

2. यथा 'नेदं रजतम्' इत्यौत्तरकालिके बाधे सति शुक्तौ रजतबुद्धिः । बाधाभावे तु न मिथ्यात्वम् । स्वतःप्रामाण्यबाधे यावद्बाधं प्रामाण्यग्रहात् ।

3. यद्यपि चित्रे तुरगबुद्धिरपि मिथ्याबुद्धिरेव तथापि बाधशिरस्कस्यैवात्र भ्रमत्वेन विवक्षणान्न दोषः । इह बाधानवतारः स्फुट एव, अन्यथा तद्रूपेण पक्षत्वमेव न सिध्येत् ।

4. यदनुध्यानवशेन एतावान्कालो यापितः सेयं प्राणेश्वरी मम मनसः सकाशाल्लोचनगोचरं गतेति संबन्धः । पूर्वं मनस्येवासीत् संप्रति बहिर्दृष्टेति भावः । अङ्गेषु सुधारसच्छटा, परीरम्भेण सर्वाङ्गीणसंतापशान्त्या लौहित्यसंपादनात् पीयूषरसवृष्टिः । दृशोर्नेत्रयोः शोभनः पूरो द्रवो यस्य तथाभूतस्य कर्पूरस्य शलाकिका अञ्जनतूलिका । अतिशयितानन्दहेतुत्वात् । शरीरिणी मनोरथस्य श्रीः संपत्तिः ।

5. 'अभूवम्' इति शेषः ।

नटेऽसत्त्वाद्बाधावतारेऽनुमितिरेव कथं स्यादिति चेत्, न। तेषामभावनिश्चयाभावात्स्मार्यितया संभाव्यमानत्वात्।' इति। एतन्मतनिष्कर्षस्त्वयम्—यथा कुज्झटिकापातसंकुले देशेऽविद्यमानस्यापि धूमस्याभिमानाद् धूमनियतस्य धूमध्वजस्यानुमानम्। तथा नटेनैव 'ममैवैते विभावाद्याः' इति निपुणं प्रकटीकृतैस्तत्राविद्यमानैरपि विभावादिभिस्तन्नियता रतिरनुमीयमानापि निजसौन्दर्यबलात्सामाजिकानामास्वाद्यमानतया चमत्कृतिमावहन्ती रसतामेतीति रतेरनुमितिरेव रसनिष्पत्तिरिति। नेदमपि हृदयग्राहि। प्रत्यक्षमेव ज्ञानं चमत्कारजनकम्, नानुमित्यादिरिति लोकप्रसिद्धिमवधूयान्यथा कल्पने मानाभावात्सूत्रस्यान्यथैव योजनासंभवात्॥ **भट्टनायकस्य** तु—'न तावन्नटगतत्वेनानुमीयते, तदानी रामाद्यभावेन तद्रत्यादेरप्यभावादसतः सत्त्वेनानुमानाविषयत्वाद्वस्तुतो रामादिविषयिण्या नटगतत्वेनानुमितयापि रत्या सामाजिकेऽसत्या तच्चमत्कारजननासंभवाच्च। न रामादिनायकगतत्वेनोत्पद्यते, विभावादीनां पारमार्थिकत्वाभावात्। न वा सामाजिकगतत्वेनाभिव्यज्यते, सिद्धस्यैव व्यङ्ग्यत्वसंभवाद्रसस्य चासिद्धत्वात् सर्वेषामेवाभिव्यक्तिप्रसङ्गाच्च। तस्माद्विभावादिभिः संयोगाद्भोज्यभोजकभावसंबन्धाद्रसस्य निष्पत्तिर्भुक्तिरिति। न च भोगपक्षेऽपि रसस्यासिद्धत्वाद्भोगासंभव इति वाच्यम्। भोगस्यालौकिकतयाभ्युपगमात्। एवं सत्यप्यन्यनिष्ठो रत्यादिः स्थायी अन्यनिष्ठैरेव विभावादिभिः कथमन्येन भोक्तव्यः अतिप्रसङ्गात्—इति चेत्, उच्यते—शब्दात्मनः काव्यस्य त्रयो व्यापाराः—अभिधायकत्वं वाच्यविषयम्, भावकत्वं रसादिविषयम्, भोजकत्वं सहृदयविषयम्' इति। यच्चाहुः—"अभिधा भावना चैव तद्भोगी कृतिरेव च' इति। तत्राभिधा निरन्तरसान्तरार्थगतत्वेन द्विविधा।[1] तेन लक्ष्यविषयस्यापि संग्रहः। भावकत्वं साधारणीकरणम्। तेन हि व्यापारेण विभावादयः स्थायी च साधारणीक्रियन्ते। साधारणीकरणं चैतदेव यत्सीतादिविशेषाणां कामिनीत्वादिसामान्येनोपस्थितिः स्थाय्यनुभावादीनां च संबन्धि विशेषानवच्छिन्नत्वेन। अन्त्यं व्यापारद्वयं नाट्येऽपि। एवं काव्ये नाट्ये च भावकत्वव्यापारेण साधारणीकृतैर्विभावादिभिर्भोजकत्वव्यापारसाहित्येन तथाकृत एव रत्यादिः स्थायी भुज्यते। भोगश्च सत्त्वगुणोद्रेकात्प्रकाशते न्न आनन्दस्तत्स्वरूपा अनन्यालम्बना या संवित्तत्स्वरूपो लौकिकसुखानुभवविलक्षणः। सत्त्वरजस्तमोगुणानामुद्रेकेण क्रमात्सुखदुःखमोहाः प्रकाश्यन्ते। उद्रेकश्च श्वेतरावभिभूयावस्थानम्' इति। एष सारांशः—शब्दैस्याभिधाव्यापारवत्काव्यनाट्ययोस्तद्विलक्षणं भावकत्वभोजकत्वनामकं व्यापारद्वयमतिरिक्तमस्ति। काव्यार्थबोधोत्तरमेव तत्राद्येन भावकत्वव्यापारेण विभावादिरूपसीतादयो रामादिसंबन्धिनी रतिश्च सीतात्वरामत्वसंबन्धांशमपहाय सामान्यतः कामिनीत्वरतित्वादिनैवोपस्थाप्यते। अन्त्येन भोजकत्वव्यापारेण तूक्तरीत्या साधारणीकृतविभावादिसहकृतेन सा रतिः सहृदयैरास्वाद्यत इति रतेरास्वाद एव रसनिष्पत्तिरिति। एतदपि न सम्यक्। लक्षणाप्रयोजनव्यञ्जकतया एकत्राभिधानियत्रणेऽपरार्थव्यञ्जकतया वक्तृवैशिष्ट्यादिसहकारेण तत्तदर्थावगमकतया च सिद्धेन व्यञ्जनाव्यापारेणैव गतार्थतया तदतिरिक्तव्यापारद्वयकल्पने

---

1. निरन्तरार्थो मुख्यः। अन्तरं व्यवधानं तेन सह वर्तत इति सान्तरः मुख्यार्थबाधाद्युपस्थित्या व्यवहितोऽर्थः सान्तरार्थः लक्ष्यरूप इत्यर्थः।

विभावादयो वक्ष्यन्ते । सात्त्विकाश्चानुभावरूपत्वान्न पृथगुक्ताः ।

ष्टोऽपि रत्यादिर्ज्ञानसंबन्धेन सामाजिकनिष्ठो रसो भवतीत्यभिप्रायः । ननु 'विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः' इत्यादिना सात्त्विकभावानामपि रसघटकत्वमुक्तम्, भवता तत्किं नोच्यत इत्यत आह—**सात्त्विकाश्चेति** । सात्त्विकाः स्तम्भस्वेदादयः । दध्यादीत्यादिना प्रपाणकादिपरिग्रहः । रूपान्तरं विभिन्नरूपं परिणतः प्राप्तः । यद्वा रूपान्तरं परिणतं निष्पन्नं यस्य स तथा । अभ्याहित इतिवत्क्रान्तस्य परनिपातः । पयो यथाम्लयोगेन रूपान्तरपरिणतं सद्दध्युच्यते । यथा वामिक्षा

मानाभावात् । न च व्यञ्जनास्थाने तादृशभोग एव कश्चन व्यापारः कल्पनीय इति वाच्यम् । तथापि भावकत्वरूपाधिकव्यापारान्तरकल्पनस्यैवानौचित्यात् ॥ **आचार्याभिनवगुप्तपादानां** तु—'स्थायिनां विभावादिभिः समं व्यङ्ग्यव्यञ्जकभावरूपात्संबन्धाद्विभावादीनां वा परस्परं संयोगान्मिलनाद्रसस्य निष्पत्तिरभिव्यक्तिः । तथाहि लोके प्रमदादिभिरालम्बनकारणैश्चन्द्रिकादिभिरुद्दीपनकारणैरश्रुपातादिभिः कार्यैश्चिन्तादिभिः सहकारिभिश्च स्थायिनो रत्यादेरनुमितिविषये परिशीलनवलेन झटिति प्रवृत्तिमतां सामाजिकानां वासनारूपतयान्तःस्थितः, काव्ये नाट्ये च गुणालंकारयोगेन कायिकवाचिकसात्त्विकाहार्यरूपेणाभिनयेन च तैरेव कारणत्वादिव्यपदेशपरित्यागेन विभावनानुभावनसंचारणरूपव्यापारवत्तया अलौकिकविभावानुभावसंचारिपदव्यवहार्यैः—ममैवैते, शत्रोरेवैते, उदासीनस्यैवैते, इति संबन्धिविशेषस्वीकारनियमस्य न ममैवैते, न शत्रोरेवैते, नोदासीनस्यैवैते, इति संबन्धिविशेषपरिहारनियमस्य चाज्ञानात्सीतात्वादिविशेषांशमपहाय कामिनीत्वादिना प्रतीतैः अभिव्यक्तो रत्यादिः स्थायी तत्तदात्मनिष्ठोऽपि विभावादिसाधारण्यबलाद्रसानुभवकाले विगलितपरिमितप्रमातृत्वादिनिजधर्मतया प्रादुर्भूततत्तज्ज्ञानशून्यापरिमितभावेन प्रमात्रा—सकलसहृदयसंवादकारिणा प्रमातृविशेषसंबन्धाग्रहरूपेण साधारण्येन स्वाकार इवाभिन्नोऽपि प्रत्यक्षीकृतः, चर्व्यमाणैकप्राणतया चर्वणानाशे विनष्टो रस इति प्रतीतिगोचरः, विभावादिकालमात्रस्थायित्वेनानित्यचर्वणः, पानकरसन्यायेन चर्व्यमाणः, पुर इव परिस्फुरन्, हृदयमिव प्रविशन्, सर्वाङ्गीणमिवालिङ्गन्, अन्यत्सर्वमिव तिरोदधन्, ब्रह्मास्वादमिवानुभावयन्, अलौकिकचमत्कारकारी शृङ्गारादिको रसः' इति । तत्रायं क्रमः—प्रथमं तावत्काव्यपदेभ्यस्तत्तदर्थोपस्थितिः ततो यथोपस्थितविभावादिगोचरो वाक्यार्थबोधः, ततो गुणालंकाराभिनयादि, ततो रत्यादिवासनावतः सहृदयस्य साधारण्येन विभावादिबोधः, तेन च साधारण्येनैव विभावादिसंवलितरत्यवच्छिन्नचिदानन्दावरणभङ्गात्प्रकाशमानानन्दचिद्विषयो विभावादिसंवलितः स्थायी रत्यादिको रस इति ॥ **नव्यानां** तु—'काव्ये नाट्ये च कविना नटेन च प्रकाशितेषु विभावादिषु व्यञ्जनाव्यापारेण रामादौ सीतादिरतौ गृहीतायामनन्तरं च सहृदयतोल्लासितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना कल्पितरामत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने शुक्तिकाशकल इव रजतखण्डः समुत्पद्यमानोऽनिर्वचनीयः साक्षिभास्यसीतादिविषयकरत्यादिरेव रसः' इति । अयं च कार्यो दोषविशेषस्य । नाश्यश्च । तन्नाशस्य स्वोत्तरभाविना लोकोत्तराह्लादेन भेदाग्रहात्सुखपदव्यवहार्यो भवति । स्वपूर्वोपस्थितेन रत्यादिना तदग्रहात्तद्रतित्वेनैकत्वाध्यवसानाद्वा व्यङ्ग्यो वर्णनीयश्चोच्यत इति ॥

व्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतो व्यक्तीकृत एव रसः । न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते ।

तदुक्तं लोचनकारैः—'रसाः प्रतीयन्त इति त्वोदनं पचतीतिवद्व्यवहारः' इति । अत्र च रत्यादिपदोपादानादेव स्थायित्वे प्राप्ते

कर्पूरखण्डमरिचादियोगेन रूपान्तरपरिणता प्रपाणकमुच्यते । तथा रत्यादिः स्थायिभावः काव्योपस्थापितविभावादियोगेन रूपान्तरपरिणतश्चिदानन्दचमत्कारस्वरूपं प्राप्तः, विषयस्यैव ज्ञानत्वेन परिणाम इति परिणामवादिनां मतम् । ननु चिरविनष्टस्य रत्यादेः कथं रूपान्तरापत्तिरिति चेत्, न । रत्यादिपदेन रत्यादितादात्म्येनाध्यवसिताया सामाजिकवासनाया लक्षणात् । तदुक्तं प्रकाशकृता—'सामाजिकानां वासनात्मतया स्थितो रत्यादिर्भावः' इति । वासनामनङ्गीकुर्वतां मतमाह—**व्यक्तीकृत इति** । व्यक्तीकृत एव ज्ञानविषयतामापन्न एव रत्यादी रसः । एवकारेण वस्तुसत्त्वव्यवच्छेदः । चिरविनष्टस्यापि ज्ञानविषयत्वसंभवादिति भावः । व्यक्तीकृत एवेत्यनन्तरं वाकारो बोध्यः । एतद्व्यक्तीकरोति—**नत्विति** । रूपान्तरपरिणामे सदृष्टान्तप्राचीनसंवादमाह—**तदुक्तमिति** । यथा पाकसंबन्धेन ओदनरूपं प्राप्तस्तण्डुल ओदनत्वेन व्यवह्रियते तथा प्रतीतिसंबन्धेन रसरूपं प्राप्ता सामाजिकवासना रसत्वेन व्यवह्रियत इति भावः । रसस्य प्रागनवस्थाङ्गीकारे प्राचीनसंवादमाह—**तदुक्तमिति** । नन्वोदनं पचतीत्यत्र पाकात्पूर्वमोदनस्यानवस्थाने क्रियानिमित्तत्वाभावेन कर्मत्वं न स्यात्, अत ओदनपदस्य तण्डुललक्षणावश्यमङ्गीकरणीयेत्यसिद्धो दृष्टान्त इति चेदुद्भाव्यते, तदा 'कटं करोति' इति दृष्टान्तो द्रष्टव्यः । 'क्रियानिमित्तं हि कारकम्' इति प्रवादस्य प्रायिकत्वमिति भावः । यद्यपि रत्यादीनां नायकादिनिष्ठतया पूर्वसिद्धत्वमस्त्येव तथापि सामाजिकनिष्ठतया ज्ञानात्पूर्वमिहासत्त्वं विवक्षितम् । यथा तण्डुलानां पाकात्पूर्वमोदनत्वं नास्ति तथा रत्यादीनामपि प्रत्ययात्पूर्वं रसत्वं नास्तीत्यर्थः । ननु 'रतिर्हासश्च–' इति वक्ष्यमाणकारिकया रत्यादीनां स्थायित्वं प्रतिपादितं तदत्र स्थायिपदं निरर्थक-

---

1. रसा इति । अत्रायं पूर्वापरसंदर्भः—प्रतीतेः स्वपरगतत्वादिविकल्पने सर्वपक्षेषु प्रतीतिरपरिहार्या । रसस्य प्रतीतिर्हि पिशाचवदव्यवहार्या स्यात् । किंतु यथा प्रतीतिमात्रत्वेनाविशिष्टत्वेऽपि प्रात्यक्षिक्यानुमानिक्यागमोत्था प्रतिभानकृता योगिप्रत्यक्षजा च प्रतीतिरुपायवैलक्षण्यादन्यैव, तद्वदियमपि प्रतीतिश्चर्वणास्वादनभोगापरनामधेया भवतु । तन्निदानभूताया हृदयसंवाद्युपकृताया विभावादिसामग्र्या लोकोत्तररूपत्वाद्रसाः प्रतीयन्त इति । ओदनं पचतीतिवद्व्यवहारः प्रतीयमान एव हि रसः । प्रतीतिरेव विशिष्टा रसना । सा च नाट्ये लौकिकानुमानप्रतीतेर्विलक्षणतां प्रमुखे उपायतया संदधाना । एवं काव्ये शाब्दप्रतीतेश्च विलक्षणतां प्रमुखतामुपेक्ष्यमाणेति ॥

---

१. 'व्यक्तीकृत एव रसः' ग-पुस्तके नास्ति; 'व्यक्तः' इति ख-पुस्तकेऽधिकम्. २. 'स एव' क. ३. 'लोचनकारेण' ग. ४. 'च' ग-पुस्तके नास्ति. ५. 'रूपान्तर–' इत्यादिः '–विवक्षितम्' इत्यन्तः पाठ एकस्मिन्पुस्तके नास्ति. ६. 'यथा' इत्यारभ्य '–नास्तीत्यर्थः' इत्यन्तो द्वितीयस्मिन्पुस्तके नास्ति.

पुनः स्थायिपदोपादानं रत्यादीनामपि रसान्तरेष्वस्थायित्वप्रतिपादनार्थम्[1]। ततश्च हासक्रोधादयः शृङ्गारवीरादौ व्यभिचारिण एव ।

तदुक्तम्—

'रसावस्थः परं भावः स्थायितां प्रतिपद्यते' इति ।

अस्य स्वरूपकथनगर्भ आस्वादनप्रकारः कथ्यते—

सत्त्वोद्रेकाद्[1]खण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ॥ २ ॥
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥ ३ ॥
रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते ।

इत्युक्तप्रकारो वाह्यमेयविमुखतापादकः कश्चनान्तरो धर्मः सत्त्वम् । तस्योद्रेको रजस्तमसी अभिभूय आविर्भावः । तत्र हेतुस्तथाविधालौकिककाव्यार्थपरिशीलनम् । अखण्ड इत्येक एवायं विभावादिरत्या-

---

मित्याशङ्क्य समाधत्ते—**अत्र चेति** । रसलक्षणे चेत्यर्थः । **रसान्तरेष्विति** । 'व्यभिचारितया' इति शेषः । **रसावस्थ इति** । परमिति मान्तमव्ययमेवुकारार्थम् । रसेष्ववश्यमवस्थानात् स्थायी । अनावश्यकत्वे व्यभिचारीत्यर्थः । रत्यादिर्यत्स्वरूपं प्राप्य रसो भवति तद्दर्शयंस्तत्रास्वाद एव प्रमाणमिति तन्निरूपणं प्रक्रमते—

---

1. **ब्रह्मेति** । ब्रह्मास्वादे ब्रह्ममात्रं प्रकाशते रसे तु विभावादिकमपीति भेदात्सहोदरत्वकथनम् ॥

2. **स्वाकारवदिति** । यथा ज्ञानस्यैवाकारो घटादिस्तत्सादभिन्नोऽपि तद्विषयो बाह्यैरङ्गीक्रियते तथात्रापीत्यर्थः । अत्रेदं तत्त्वम्—स्वयं वेदनं तावदङ्गीकार्यम् । अन्यथा जगदान्ध्यं प्रसज्येत । एवं च स्वव्यतिरिक्तग्राह्यविरहात्तत्तदात्मिका बुद्धिः स्वयमेव स्वात्मरूपप्रकाशिका । प्रकाशवदिति । तदुक्तम्—'नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः । ग्राह्यग्राहकवैधुर्यात्स्वयं सैव प्रकाशते ॥' इति । ग्राह्यस्य बाह्यविषयजातस्य ग्राहकं स्वयंवेदनापरपर्यायं बुद्धितत्त्वं तयोर्वैधुर्यं नाम ग्राह्यत्वेन ग्राहकत्वेन च रूपेण भेदराहित्यम् । तयोरभेदश्चानुमातव्यः । येन वेदनेन यद्वेद्यते तत्ततो न भिद्यते । यथा ज्ञानेनात्मानः (चक्षुरादीनि पञ्चेन्द्रियाणि) तैश्च नीलादयो वेद्यन्ते । भेदे सति वेदनेन सहार्थस्य संबन्धित्वं न स्यात् । तादात्म्यस्य संबन्धनियमहेतोरभावात् । तस्माद्बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति स्थितम् ॥

---

१. 'अवस्थायित्व–' ग. २. 'रत्या प्रकाशगुणश्च' ख.

दिप्रकाशसुखचमत्कारात्मकः । अत्र हेतुं वक्ष्यामः—स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या । चिन्मय इति स्वरूपार्थे मयट् । चमत्कारश्चित्तविस्तार-रूपो विस्मयापरपर्यायः । तत्प्राणत्वं चास्मद्वृद्धप्रपितामहसहृदयगोष्ठीग-रिष्ठकविपण्डितमुख्यश्रीमन्नारायणपादैरुक्तम् । तदाह धर्मदत्तः स्वग्रन्थे—

'रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते ।
तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः ।
तस्मादद्भुतमेवाह कृती नारायणो रसम् ॥' इति ।

अस्येति । रसस्येत्यर्थः । **स्वप्रकाशेति** । यथा ज्ञानान्तरं स्वगोचरं घटादिकं प्रकाशयति तथा रस आत्मानमेव प्रकाशयतीत्यर्थः । चिद् विभावादिसंवित् । **वेद्यान्तरेति** । विषयान्तरसंपर्केणानवच्छिन्नप्रवाहः । ब्रह्मास्वादसहोदरः ब्रह्मसा-क्षात्कारसदृशः । लोकप्रधानचमत्कारसारः । **स्वाकारवदिति** । यथा स्वस्माद्भि-न्नोऽपि देहोऽहं स्थूल इत्यादि भेदोल्लेखाभावेन प्रतीयते, तथा रसोऽपि ज्ञातृज्ञान-भेदोल्लेखाभावेनास्वाद्यत इत्यर्थः । घटादिज्ञाने जाते वेत्तीति यथा ज्ञातृज्ञानभेदः प्र-तीयते तथात्र नेति भावः । यद्वा स्वाकारवत्स्वविषयवत् । परिणामवादिभिर्ज्ञान-तद्विषययोर्भेदानङ्गीकारादिति भावः । कामलोभादिबीजभूतौ मनोधर्मौ रजस्तमसी, ताभ्यामस्पृष्टं स्वकार्यजननेऽसंस्पृष्टं मनो मनोधर्मः । विवृणोति—**इत्युक्त इति** । उक्तस्वरूप इत्यर्थः । बाह्यं बहिर्भवम् । लौकिकमिति यावत् । मेयं वस्तु विमुखता-ज्ञानानुकूलव्यापाराभावः । तस्यापादकः प्रयोजकः । ज्ञानानुकूलव्यापारश्चात्र दृङ्मनो-योगः । अभिभूय स्वकार्याक्षमे कृत्वा । आविर्भावः प्रतिबन्धकाभावेन स्वकार्य-क्षमत्वेनावस्थानम् । तत्र सत्त्वोद्रेके । अलौकिको यः काव्यार्थो विभावादिः तस्य परिशीलनमत्यन्ताभिनिवेशः प्रकाशः संवित् । ननु मिलिता विभावादयो रसस्तत्कथ-मस्याखण्डत्वमत आह—**अत्रेति** । अखण्डतायामित्यर्थः । **हेतुमिति** । समूहाल-म्बनज्ञानतादात्म्यमेव हेतुर्वक्ष्यते । स्वप्रकाशत्वाद्यपीत्यादिना सुखतादात्म्यपरिग्रहः । **स्वरूपार्थ इति** । न त्वन्नमयो यज्ञ इतिवत्प्राचुर्यार्थे । लोकातीतार्थाकलनेन किमेतदिति ज्ञानधाराजनने चित्तस्य दीर्घप्रायत्वं चित्तविस्तारः । दृष्टहेतुभ्योऽसंभ-वित्वज्ञानेन हेत्वनुसंधाने मनोव्यापारणमेव चित्तविस्तार इत्यपरे । विस्मयो विस्मय-शब्दोऽपरपर्यायो वाचकान्तरं यस्य सः । यद्वा अपरपर्यायोऽभिन्नः । तत्प्राणत्वं चमत्कारसारत्वम् । सारः स्थिरांशः । सर्वत्र शृङ्गारादौ चमत्कारसारत्वे चम-त्कारस्थायिभावत्वे । तस्मात्सर्वत्राद्भुतरससंभवात् । वस्तुतस्तु रत्यादिवंशस्यानुभूयमा-नत्वे यथायथं शृङ्गारादिव्यपदेशस्तस्याननुभावेऽद्भुतव्यपदेश इति मन्तव्यम् ।

---

१. 'प्रतीति' ख-ग-पुस्तकयोः. २. 'अस्य' ग. ३. 'यद्वा' इति नास्ति कुत्रचित्. ४. प्रतीकं नास्ति पुस्तकान्तरे. ५. 'तस्य' इति नास्ति पुस्तकान्तरे. ६. 'प्रकाशः' नास्ति कुत्रचित्.

कैश्चिदिति प्राक्तनपुण्यशालिभिः ।

यदुक्तम्—

'पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससंततिम् ।' इति ।

यद्यपि 'स्वादः काव्यार्थसंभेदादात्मानन्दसमुद्भवः ।' इत्युक्तदिशा रसस्यास्वादानतिरिक्तत्वम्, तथापि 'रसः स्वाद्यते' इति काल्पनिकं भेदमुररीकृत्य कर्मकर्तरि वा प्रयोगः । तदुक्तम्—'रस्यमानतामात्रसारत्वात्प्रकाशशरीरादनन्य एव हि रसः' इति । एवमन्यत्राप्येवंविधस्थलेषूपचारेण प्रयोगो ज्ञेयः ।

नन्वेतावता रसस्याज्ञेयत्वमुक्तं भवति । व्यञ्जनायाश्च ज्ञानविशेषत्वाद् द्वयोरैक्यमापतितम् । ततश्च—

प्राक्तनेति । ऐहिकपुण्यस्यैतच्छरीरे सुखजननासंभवादिति भावः । प्रमिण्वन्ति आस्वादयन्ति । **यद्यपीति** । काव्यार्थसंभेदाद्विभावादिमेलकात् । आत्मा बुद्धिः, आनन्दः सुखम्, तयोः समुद्भवो विषयान्तरतिरोधानेनाविर्भावः । 'रसः स्वाद्यते' इति प्रयोग इति वक्ष्यमाणेनान्वयः । काल्पनिकमारोपितमुररीकृत्य अङ्गीकृत्य । रसास्वादयोः कर्मक्रियाभावेनोल्लेखो भेदग्रहणमन्तरेण न संभवतीति भावः । तत्प्रयोगस्य प्रामाण्योपपत्त्यर्थमाह—**कर्मकर्तरि वेति** । रसः स्वयमेव स्वाद्यते । स्वाभिन्नत्वादविषय इत्यभिप्रायः । रसस्यास्वादरूपत्वे प्राचां संवादमाह—**रस्यमानतेति** । रस्यमानता आस्वादः, तन्मात्रस्य । न व्यतिरिक्तस्य । सारत्वात् सामाजिकानामुपादेयत्वात् । प्रकाशशरीरात् संवित्स्वरूपात् । ज्ञानरूपतापन्न एव रत्यादिः सामाजिकानामानन्दचमत्कारसंवलनोपादेयत्वाद्रस इति भावः । ननु विभावादिमेलकाज्जायमानानन्दसंवलितमिलितविभावादिसंविद्रस इत्युक्तं भवति । विभावादीनां मेलकश्च विभावादिविशिष्टवैशिष्ट्यावगाह्येकज्ञानविषयत्वमित्यवश्यं वाच्यम् । प्रकारान्तरेण तन्निरूपणस्याशक्यत्वात् । तादृशज्ञानं च विभावादीनां प्रत्येकज्ञानादेव भवति । एवं च तादृशज्ञानानन्तरं रसास्वादः कथं जायतामुपायाभावादित्यभिप्रायेण शङ्कते—**नन्विति** । एतावता रसस्य विभावादिसमुदायप्रकारस्य रसत्वाङ्गीकारेण । **अज्ञेयत्वमिति** । उपायत्वाभावादित्यर्थः । स्वप्रकाशस्य स्वानुत्पत्त्यैवाज्ञेयत्वमिति भावः । ननु व्यञ्जनयैव रसास्वादो जायतामित्यत आह—**व्यञ्जनायाश्चेति** । विभावादिसमुदायसा-

---

१. 'स्थानेषु' क-ख. २. 'भवतीति' घ. ३. 'इदानीं स्वादनास्व्यव्यापारेण सामाजिकानां स्वात्मसंवेदनसाक्षात्कार एव रस इत्यभिनवगुप्ताचार्यादीनां मतमुपन्यस्यति—नन्वित्यादिना तादात्म्येन गोचरीकृत इत्यन्तेन' इत्यधिकं कुत्रचित्. ४. 'उपायत्वाभावादित्यर्थः' इति नास्ति पुस्तकान्तरे. ५. 'व्यञ्जनायाश्चेति । व्यञ्जनाजन्यप्रतीतेश्चेत्यर्थः । ज्ञानविशेषत्वाद् आस्वादविलक्षणज्ञानरूपत्वात् । ननु सामाजिकादृष्टवशाद्विषयसौन्दर्याच्च व्यञ्जनाजन्यप्रतीतेरप्यास्वादरूपत्वमुपपद्यत इत्यत आह—द्वयोरैक्यमाप-

'स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः ।
यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात् ॥'

इत्युक्तदिशा घटप्रदीपवद् व्यङ्ग्यव्यञ्जकयोः पार्थक्यमेवेति कथं रसस्य व्यङ्ग्यतेति चेत्, सत्यमुक्तम् । अत एवाहुः—'विलक्षण एवायं कृतिज्ञप्तिभेदेभ्यः स्वादनाख्यः कश्चिद्व्यापारः ।' इति । अत एव हि

मर्थस्य चेत्यर्थः । ज्ञानविशेषत्वाद् विशिष्टवैशिष्ट्यज्ञानरूपत्वात् । द्वयोर्व्यङ्ग्यव्यञ्जकयोः । ततश्च द्वयोरैक्यापाताच्च । अस्य हेतोः कथं रसस्य व्यङ्ग्यतेत्यत्रान्वयः । द्वयोः पार्थक्य एव व्यङ्ग्यव्यञ्जकभावः संभवतीत्याह—**स्वज्ञानेनेति** । स्वं व्यञ्जकत्वेनाभिमतं तस्य ज्ञानेन अन्यधीहेतुर्व्यङ्ग्यप्रतीतिकरः सिद्धेऽर्थे सतीत्यर्थः । अन्यथाभावेऽसिद्धार्थज्ञापकत्वे अस्य ज्ञापकस्य कारकाज्जनकात् । जनको हि कार्यमुत्पाद्य प्रकाशयतीति भावः । अभिनवगुप्ताचार्यमतानुसारेण रसास्वादोपायमाह—**अत एवेति** । निरुक्तपूर्वपक्षादेवेत्यर्थः । आहुः । अभिनवगुप्ताचार्यमतानुयायिन इति शेषः । भट्टलोल्लटादयस्तु—रसस्य व्यङ्ग्यत्वमेवाङ्गीकुर्वन्ति । तथाहि—रामादौ व्यञ्जनया प्रतीयमानो रत्यादिज्ञानसंबन्धेन सामाजिकवृत्ती रसः, तच्च ज्ञानं 'रामः सीताविषयकरतिमान्' इत्याकारकमेव । यथा चिरविनष्टस्यापि यागादेः स्वजन्यापूर्वसत्त्वेनैव स्वर्गाद्यव्यवहितपूर्ववृत्तित्वं कल्प्यते, तथा रत्यादेरतीतस्यापि स्वगोचरज्ञानसत्त्वेनैव सामाजिकवृत्तित्वं कल्प्यत इत्यवधेयम् । लाघवानुसंधानपरेण ग्रन्थकृता अस्मिन्नेव मते 'अभिधादिविलक्षणं—' इत्यादिना स्वरसः प्रकाशयिष्यते । अयं रससाक्षात्कारानुकूलः, कृतिरुत्पादनम्, ज्ञप्तिभेदा ज्ञानानुकूलव्यापारविशेषा व्यञ्जनादयः, कश्चित्सहृदयानुभवसिद्धः । अत एव विलक्षणव्यापारस्वीकारादेव विलक्षणाः करणव्यञ्जनादिभिन्नाः । व्यपदेशा व्यवहाराः । एवं च यथा संयुक्तसमवायेन सुखादिसाक्षात्कारः, तथास्वादनाख्यव्यापारेण वक्ष्यमाणस्वावासनासाक्षात्कार इति भावः । यथा भूतलं रजतवदिति ज्ञानं शुक्त्यंशे लौकिकं रजतांशे त्वलौकिकम्, तथा रससाक्षात्कारोऽपि वासनांशे लौकिको रत्याद्यंशे उपनीतभानात्मकालौकिक इत्यवधेयम् । ननु वासना तावदिच्छादिवद्गुणविशेष एवास्तु, तथा सति संयुक्तसमवायेनैव तद्ग्रहो भविष्यति किं स्वादनाख्यव्यापारेणेति चेत्, न । तस्या गुणविशेषत्वे प्रमाणाभावात् । न च लाघवमेव तत्र मानमिति वाच्यम् । तत्र सत्तागुणत्वसंबन्धकल्पने गौरवात् । न च तस्या अदृष्टरूपत्वमस्तिति वाच्यम् । तथात्वे साक्षात्कारानुपपत्तेः । नापि ज्ञानेच्छारूपत्वम् । प्राक्तनीत्यनेन स्थिरत्वलाभाज्ज्ञानेच्छायास्तृतीयक्षणे नाशात् । नापि

तितम् । ततश्चेति । ततो विभावाद्यास्वादस्य रसत्वाङ्गीकारात् । द्वयोर्व्यङ्ग्यव्यञ्जकयोरैक्यमापतितं चेत्यर्थः । फलीभूतज्ञानकारणीभूतज्ञानविषयविभावाद्यतिरिक्तविषयत्वाभावादित्यर्थः । विषयभेद एव व्यङ्ग्यव्यञ्जकभावः संभवतीति । प्राचीनसंवादेनाह—स्वज्ञानेति' इत्यधिकं पुस्तकान्तरे.

१. 'सत्यमुक्तम्' इति ग-पुस्तके नास्ति. २. 'इति' क-पुस्तके नास्ति. ३. 'ततः' ख-ग. ४. 'स्वं—' इत्यादि '—अर्थः' इत्यन्तं पुस्तकान्तरे नास्ति.

रसनास्वादनचमत्करणादयो विलक्षणा एव व्यपदेशा इति। अभिधादिविलक्षणव्यापारमात्रप्रसाधनग्रहिलैरस्माभी रसादीनां व्यङ्ग्यत्वमुक्तं भवतीति।

संस्काररूपत्वम्। तस्यातीन्द्रियत्वेन प्रत्यक्षासंभवाद्रसस्य स्मृतित्वापत्तेश्च। ननु तथापि 'वासनावानहम्' इति ज्ञानाकारः स्यादिति चेत्, न। प्रथमं नाट्यकाव्यदर्शनश्रवणाभ्यां विभावानुभावयोरुपस्थितिः। एवमाक्षेपेण झटित्येव व्यभिचारिस्थायिभावयोरुपस्थितिः। क्वचिच्छब्देनापि तयोरुपस्थितिः। सा च दोषतया वक्ष्यते। ततो वक्ष्यमाणसाधारणीकरणाख्यव्यापारेण सीतादयो मम रामस्य वेति विभावादिचतुष्टये प्रत्येकं साधारण्यप्रत्ययस्तदनन्तरं व्यञ्जनया रससमानाकारप्रत्ययस्तदनु तत्सहकृतेन स्वादनाख्यव्यापारेण 'रामोऽहं सीताविषयकरतिमान्' इत्याकारकः स्ववासनायां रत्याद्यभेदं स्वस्मिन्नायकाभेदमवगाहमानः साक्षात्कारः संपद्यते। 'भूतलं रजतवत्' इति भ्रमे भुक्तिस्वादिकमिव वासनास्वादिकमत्र न भासत इति भावः। 'प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते' इति 'उत्साहादिसमुद्बोधः साधारण्याभिमानतः' इति वक्ष्यमाणबलादवसीयते[४]। अस्मिन्मते पदार्थान्तरस्य वासनायाः, स्वादनादिव्यापारस्य च कल्पने गौरवमसहिष्णुराह—**अभिधादीति**। आदिना लक्षणातात्पर्ययोर्ग्रहणम्। अभिधादिविलक्षणव्यापारो व्यञ्जना तन्मात्रप्रसाधने ग्रहिलैः सयत्नैरस्माभिर्नवीनालंकारिकैः। मात्रपदेन स्वादनादिव्यवच्छेदः। व्यङ्ग्यत्वं व्यञ्जनाजन्यबोधविषयत्वम्। तच्च रसस्य स्वप्रकाशव्यञ्जनाजन्यविभावादिसंवलितरत्यादिज्ञानरूपत्वाङ्गीकारेण संभवति। तथा च निरुक्तसाक्षात्कारे रत्यादेरुपनायकत्वेन रत्यादिव्यञ्जनं भवद्भिरवश्यमङ्गीकार्यम्। तदेवास्माभी रस उच्यते। किमधिकेन वासनादिनानापदार्थकल्पनेनेति भावः। अत एव वक्ष्यति—'अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम्' इति। अत एव रसादेरसंलक्ष्यक्रमव्यङ्ग्यत्वमुपपद्यते। व्यञ्जनापक्षे 'द्वयोरैक्यमापतितं—' इत्यादि यद्दूषणमुक्तम्। तदपि न सम्यक्[५]। व्यञ्जनाया वक्तृतात्पर्यरूपज्ञानत्वेन निरूपितत्वाद्रसस्य च तद्भिन्नभावात्। यद्वा विभावादीनां प्रत्येकं ज्ञानं जनकं विशिष्टज्ञानं जन्यमिति भेदाङ्गीकारात्। न च साक्षात्कारस्यैवास्वादरूपत्वं न तु व्यञ्जनाजन्यबोधस्येति वाच्यम्। व्यङ्ग्यचारुत्वेनैव व्यञ्जनाजन्यबोधस्याप्यास्वादरूपत्व-

---

१. 'इति' ग-पुस्तके नास्ति. २. 'आदि' क-पुस्तके नास्ति. ३. 'व्यापारबलेन' इति पुस्तकान्तरे. ४. 'ननु व्यञ्जनाया रससमानाकारप्रतीत्यङ्गीकारे किं मानमिति चेत्, न। रसोद्बोधे रत्यादिमत्ताभानार्थं तदङ्गीकारात्। न च प्राथमिकरत्यादिमत्ताज्ञानेनैव तन्मानमिति वाच्यम्। साधारणप्रतीत्यनन्तरं तस्य नाशात्। न च विभावादिजीवितावधिरिति काव्यप्रकाशदर्शनेन तस्य क्षणचतुष्टयावस्थायित्वमिति वाच्यम्। तदनुद्भावयतां ग्रन्थकृतां तदनङ्गीकारात्। यदि च विनश्यदवस्थमेव विभावादिज्ञानं रसोद्बोधकमित्युच्यते तदा सामाजिकानां नायकाद्यभेदभानार्थं तदङ्गीकार इति मन्तव्यम्। यदि त्वभेदस्य संसर्गविषयाभानमङ्गीक्रियते तदा तदङ्गीकारं विनाप्युपपत्तिरिति ध्येयम्' इत्यधिकं कुत्रचित्. ५. 'एतन्मते विभावादिज्ञानसहकृतया व्यञ्जनया रसरूपरत्यादिज्ञानं जन्यत इति व्यङ्ग्यव्यञ्जकयोः पार्थक्यसंभवात्' इत्यधिकं पुस्तकान्तरे.

ननु तर्हि करुणादीनां रसानां दुःखमयत्वाद्रसत्वं न स्यादित्युच्यते—

[1]करुणादावपि रसे जायते यत्परं सुखम् ॥ ४ ॥
सचेतसामनुभवः प्रमाणं तत्र केवलम् ।

आदिशब्दाद्बीभत्सभयानकादयः । [2]तथाप्यसहृदयानां मुखमुद्रणाय पक्षान्तरमुच्यते—

किंच तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः ॥ ५ ॥

नहि कश्चि[3]त्सचेतन आत्मनो दुःखाय प्रवर्तते । करुणादिषु च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शनात्सुखमयत्वमेव[3] ।

संभवात् । ननु वासनाया अनङ्गीकारे कथं श्रोत्रियजरन्मीमांसकानां रसाभिव्यक्तिर्न जायत इति चेत्, न । रसास्वादसुखजनकपुण्याभावात् । अत एव 'कैश्चित्प्रमातृभिः' इत्युक्तम् । तर्हि रसस्यानन्दमयत्वस्वीकारे । तदुन्मुखः करुणादिरसव्यञ्जककाव्यादि-

---

1. **करुणेति** । रसगङ्गाधरेऽप्युक्तम्—ननु रतेरस्तु नाम रामादाविव सहृदयेऽपि सुखविशेषजनकता, करुणरसादिषु तु स्थायिनः शोकादेर्दुःखजनकतया प्रसिद्धस्य कथमिव सहृदयाह्लादहेतुत्वम् । प्रत्युत नायक इव सहृदयेऽपि दुःखजननस्यैवौचित्यात् । न च सत्यस्य शोकादेर्दुःखजनकत्वं कृप्तम्, न कल्पितस्येति नायकानामेव दुःखम्, न सहृदयस्येति वाच्यम् । रज्जुसर्पादेर्भयकम्पाद्यनुत्पादकतापत्तेः । सहृदये रतेरपि कल्पितत्वेन सुखजनकतानुपपत्तेश्चेति चेत्, सत्यम् । शृङ्गारप्रधानकाव्येभ्य इव करुणप्रधानकाव्येभ्योऽपि यदि केवलाह्लाद एव सहृदयहृदयप्रमाणकस्तदा कार्यानुरोधेन कारणस्य कल्पनीयत्वाल्लोकोत्तरकाव्यव्यापारस्यैवाह्लादप्रयोजकत्वमिव दुःखप्रतिबन्धकत्वमपि कल्पनीयम् । अथ यद्याह्लाद इव दुःखमपि प्रमाणसिद्धं तदा प्रतिबन्धकत्वं न कल्पनीयम् । स्वस्वकारणवशाच्चोभयमपि भविष्यति । अथ तत्र कवीनां कर्तुं सहृदयानां च श्रोतुं कथं प्रवृत्तिः । अनिष्टसाधनत्वेन निवृत्तेरुचितत्वात् । इति चेत्, इष्टसाधिक्यादनिष्टस्य च न्यूनत्वाच्चन्दनद्रवलेपनादाविव प्रवृत्तेरुपपत्तेः । केवलाह्लादवादिनां तु प्रवृत्तिरप्रत्यूहैव । अश्रुपातादयोऽपि तत्तदानन्दानुभवस्वाभाव्यात् । न तु दुःखात् । अत एव भगवद्भक्तानां भगवद्गुणाकर्णनादश्रुपातादय उत्पद्यन्ते । नहि तत्र जात्वपि दुःखानुभवोऽस्ति । न च करुणरसादौ स्वात्मनि शोकादिमद्दशरथादितादात्म्यारोपे यद्याह्लादस्तदा स्वप्नादौ संनिपातादौ वा स्वात्मनि तदारोपेऽपि स स्यात् । आनुभविकं च तत्र केवलं दुःखम् । इतीहापि तदेव युक्तमिति वाच्यम् । अयं हि लोकोत्तरस्य काव्यव्यापारस्य महिमा, यत्प्रयोज्या अरमणीया अपि शोकादयः पदार्था आह्लादमलौकिकं जनयन्ति । विलक्षणो हि कमनीयः काव्यव्यापारसमुद्भूत आस्वादः प्रमाणान्तरजगदनुभवादिति ॥

---

१. 'त–' इत्यादि '–ते' इत्यन्तं घ-पुस्तके नास्ति. २. 'सचेताः' घ. ३. 'इति' ग.

अनुपपत्त्यन्तरमाह—

तथा रामायणादीनां भविता दुःखहेतुता ।

[1]करुणरसस्य दुःखहेतुत्वे करुणरसप्रधानरामायणादिप्रबन्धानामपि दुःखहेतुताप्रसङ्गः [2]स्यात् ।

[3]ननु [4]कथं दुःखकारणेभ्यः सुखोत्पत्तिरित्याह—

हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात् ॥ ६ ॥
शोकहर्षादयो लोके जायन्तां नाम लौकिकाः ।
अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात् ॥ ७ ॥
सुखं संजायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः ।

'ये खलु वनवासादयो लोके दुःखकारणानि' इत्युच्यन्ते त एव हि काव्यनाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारणशब्दवाच्यतां विहायालौकिकविभावशब्दवाच्यत्वं भजन्ते । तेभ्यश्च सुरते दन्तघातादिभ्य इव सुखमेवं जायते । [5]अतश्च 'लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते' इति लोक एव प्रतिनियमः । काव्ये पुनः 'सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते' इति नियमान्न कश्चिद्दोषः ।

कथं तर्हि हरिश्चन्द्रादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामश्रुपातादयो जायन्त इत्युच्यते—

अश्रुपातादयस्तद्द्रुतत्वाच्चेतसो मताः ॥ ८ ॥

[6]तर्हि कथं काव्यतः सर्वेषामीदृशी रसाभिव्यक्तिर्न जायत इत्यत आह—

श्रवणादौ प्रवृत्तः । सचेतनः सामाजिकः । अनुपपत्त्यन्तरमनिष्टापत्त्यन्तरम् । चराचरवस्तुजातं लोकस्तस्य संश्रयात् स्वभावात् । काव्यसंश्रयात् काव्यसंबन्धात् । सुखं सुखमेव सर्वेभ्यो लौकिकशोकहर्षनिमित्तेभ्यः । तर्हि करुणादीनां सुखमयत्वस्वीकारे । अश्रुपातादय इत्यादिना निःश्वासादिपरिग्रहः । द्रुतत्वाद् हर्षेण[8] गलितप्रायत्वात् ।

---

१. 'करुणादि' क. २. 'स्यादित्यर्थः' ग. ३. 'ननु हर्षशोकादिकारणेभ्यो हर्षशोकादय एव जायन्त इति व्याप्तिः, तत्कथं विभावादिभ्यः सुखोत्पत्तिरित्याह' ग. ४. 'अलौकिक' इति नास्ति ग-पुस्तके. ५. 'एव' क-पुस्तके नास्ति. ६. 'अतश्च' इति ग-पुस्तके नास्ति. ७. 'अपि' क. ८. ग-पुस्तके त्वेतस्याः कारिकायाः 'चेतसो द्रवीभावात्सुखेऽप्यश्रुपातादयो भवन्तीत्यर्थः' इति व्याख्या. ९. 'ननु कथं' ग.

न जायते तदास्वादो विना रत्यादिवासनाम् ।

वासना चेदानींतनी प्राक्तनी च रसास्वादहेतुः । तत्र यद्यद्या न स्यात्तदा श्रोत्रियजरन्मीमांसकादीनामपि सा स्यात् । यदि द्वितीया न स्यात्तदा यद्रागिणामपि केषांचिद्रसोद्बोधो न दृश्यते तन्न स्यात् ।

उक्तं च धर्मदत्तेन—

'सवासनानां सभ्यानां रसस्यास्वादनं भवेत ।
निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसन्निभाः ॥' इति ।

ननु कथं रामादिरत्याद्युद्बोधकारणैः सामाजिकरत्याद्युद्बोध इत्युच्यते—

व्यापारोऽस्ति विभावादेर्नाम्ना साधारणी कृतिः ॥ ९ ॥
तत्प्रभावेण यस्यासन्पाथोधिप्लवनादयः ।
प्रमाता तद्भेदेन स्वात्मानं प्रतिपद्यते ॥ १० ॥

परमते वासनाया रसबोधहेतुत्वे अन्वयव्यतिरेकौ । प्रमाणमाह—**न जायत इति** । तदास्वादो रसास्वादः । रत्यादिवासनानां रत्यादितादात्म्येन प्रतीयमानां वासनाम् । मिलितयोरेव तयोः कारणत्वं दर्शयति—**तत्रेति** । श्रोत्रियो वैदिकः । स रसास्वादः । तद्रत्युद्बोधादर्शनम् । ननु श्रोत्रियादीनां प्राक्तनवासनासत्वे किं प्रमाणमिति चेत्, तदभावे प्रमाणासत्वेनैव तत्सिद्धेः । न च फलाभाव एव तत्र मानमिति वाच्यम् । इदानींतनवासनाव्यतिरेकस्यैव फलाभावप्रयोजकत्वोपगमेनोपपत्तौ तदभावस्य तत्प्रयोजकत्वकल्पनाया अन्याय्यत्वात् । वस्तुतस्तु इदानींतनवासनायां प्रमाणं नास्ति । न च रागाद्यन्यथानुपपत्तिरेव मानमिति वाच्यम् । तस्या रागादिं प्रत्यजनकत्वादिष्टसाधनताज्ञानादिनैव तत्सिद्धेः । रङ्गान्तर्नृत्यशालामध्ये । कुड्यं भित्तिः । निर्वासनानां काष्ठादिवद्रत्याद्युद्बोधो न जायत इत्यर्थः । रसबोधे साधारण्याभिमानस्य कारणतां व्यवस्थापयितुमाशङ्कते—**ननु कथमिति** । रामादिरत्याद्युद्बोधकारणैरिति । सीतादिभिरित्यर्थः । सामाजिकरत्याद्युद्बोधः सामाजिकरत्यादिवासनोद्बोधः । तेषां तं प्रत्यसाधनत्वादित्यर्थः । सामाजिकानां सजातीयरत्यादिसाजात्येनापि नायकाद्यभेदावगाहिरसप्रहोपपत्तौ वक्ष्यमाणसमाधानमकिंचित्करमित्यतो मनुष्यसामाजिकानां सुदुर्जयप्रतिवीरालम्बनोत्साहोद्बोधोऽत्यन्तासंभवीति तमुपपादयितुं वीररसं दर्शयन्समाधत्ते—**व्यापारोऽस्तीति** । स्वा[illegible]रणं नायकसामाजिकसंबन्धिनं करोति उभयसंबन्धित्वेन प्रतिपादयतीति साधारणी कृतिः । तत्प्रभावेण तज्जन्य-

---

१. 'रसास्वादहेतुः' इति ग-पुस्तके नास्ति. २. 'तदा' ख-घ-पुस्तकयोर्नास्ति. ३. 'नन्वित्युपोद्घातो' ग-पुस्तके नास्ति.

ननु कथं मनुष्यमात्रस्य समुद्रलङ्घनादावुत्साहोद्बोध इत्युच्यते—

उत्साहादिसमुद्बोधः साधारण्याभिमानतः ।
नृणामपि समुद्रादिलङ्घनादौ न दुष्यति ॥ ११ ॥

रत्यादयोऽपि साधारण्येनैव प्रतीयन्त इत्याह—

साधारण्येन रत्यादिरपि तद्वत्प्रतीयते ।

रत्यादेरपि स्वात्मगतत्वेन प्रतीतौ सभ्यानां व्रीडातङ्कादिर्भवेत् । परगतत्वेन त्वरस्यतापातः ।

साधारण्याभिमानेन यस्य रामस्य पाथोधिप्लवनादयः समुद्रनिग्रहादयः । आदिना रावणनिग्रहादिग्रहणम् । प्रमाता सामाजिकः । तदभेदेन रामाभेदेन । स्वात्मानं स्वम् । 'स्तवोपवासादिभिरप्युदग्रैः स्वरूपमस्यानवलोकयन्तम् । भ्रूभेदभीमाननबिम्बमब्धिं विव्याध बाणत्रितयेन रामः ॥' अस्य श्रीरामस्य । अत्र श्रीरामोत्साहस्य समुद्र आलम्बनविभावः । स्वरूपानवलोकनमुद्दीपनविभावः । समुद्रवेधनमनुभावः । भ्रूभेदो व्यङ्ग्यः । क्रोधो व्यभिचारिभावः । एषु साधारण्याभिमानान्मनुष्यसामाजिकानामपि 'रामोऽहं क्रुद्धः स्वरूपानवलोकनोद्दीपितसमुद्रवेधनानुकूलसमुद्रनिग्रहविषयकोत्साहवान्' इति प्रतिपत्तिरुत्पद्यते । अत्र ज्ञानोपनीतस्य श्रीरामोत्साहस्याभेदेन स्वादनाख्यव्यापारेण स्ववासनैव सामाजिकैरास्वाद्यते । न च 'यस्य हनूमतः पाथोधिप्लवनादयः समुद्रतरणादयः' इति यथाश्रुतमेव सम्यगिति वाच्यम् । तादृशोत्साहस्य वीररसत्वाभावेन प्रकृतानुपयोगित्वात् युद्धदानदयाधर्मोत्साहस्यैव वीररसत्वाङ्गीकारात् । नायकसामाजिकाभेदबोधमुपपाद्य वासनोत्साहाद्यभेदबोधमुपपादयितुमाह—**कथमिति** । मनुष्याणां तादृशोत्साहाद्यसंभवेन साजात्येनाभेदप्रतीतिर्न भवतीति सूचनाय मनुष्यमात्रस्येति । लङ्घनं निग्रहः । **साधारण्याभिमानत इति** । समुद्रलङ्घनोत्साहादिः मम रामादेश्चेति साधारण्यग्रहादित्यर्थः । न दुष्यति उपपद्यते । ननु ज्ञानप्रत्यासत्त्या संनिकृष्टस्योत्साहादेः साक्षादेव सामाजिके प्रकारत्वमस्तु किं वासनायाः प्रकारत्वाङ्गीकारेणेति चेत्, न । वासनांशे साक्षात्कारत्वप्रमात्वानुपपत्तेः । लौकिकप्रत्यक्षस्यैव साक्षात्कारत्वाङ्गीकारात् 'पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससंततिम्' इत्यादि प्राचीनव्यवहारेण 'धर्मिणि सर्वमभ्रान्तं प्रकारे तु विपर्ययः' इत्युक्तदिशा रसबोधस्य वासनांशे प्रमात्वमङ्गीक्रियते । एतदभिप्रायेणैव पूर्वकारिकायां प्रमातृपदोपन्यासः । स्थायिभावानां साधारण्यप्रतीतौ प्रतिबन्धकाभावमुपपादयितुमाह—**रत्यादयोऽपीति** । आदिना[1] रत्यादिपरिग्रहः । तद्वद् विभावादिवत् । उपपादयति—**रत्यादेरपीति** । आत्मगतत्वेन आत्ममात्रसंबन्धित्वेन । आतङ्कः शङ्का । परगतत्वेन नायकमात्रसंबन्धित्वेन प्रतीतावित्यन्वयः । अरस्यतापातो निरुक्तसाक्षात्का-

---

१. 'रत्यादेः—' इत्यारभ्य '—इत्याह' इत्यन्तः पाठः ग-पुस्तके नास्ति. २- 'स्वात्मगतत्वेन' घ.

विभावादयोऽपि प्रथमतः[1] साधारण्येन प्रतीयन्त इत्याह—

परस्य न परस्येति ममेति न ममेति च ॥ १२ ॥
तदास्वादे विभावादेः परिच्छेदो न विद्यते ।

ननु[2] तथापि[3] कथमलौकिकत्वमेतेषां विभावादीनामित्युच्यते—

विभावनादिव्यापारमलौकिकमुपेयुषाम् ॥ १३ ॥
अलौकिकत्वमेतेषां भूषणं न तु दूषणम् ।

आदि[4]शब्दादनुभावनसंचारणे । तत्र विभावनं रत्यादेर्विशेषेणास्वादाङ्कुरणयोग्यतानयनम् । अनुभावनमेवंभूतस्य रत्यादेः समनन्तरमेव रसादिरूपतया भावनम् । संचारणं तथाभूतस्यैव तस्य[5] सम्यक्कारणम्[6] ।

रविषयत्वाभावापत्तिः । एवं च रत्यादिर्ममैवेति नायकस्यैवेति संबन्धविशेषस्वीकाराध्यवसायस्य प्रतिबन्धकस्याभावः सूचितः । एतदुपकरणं नैव ममेति नैव नायकस्येति संबन्धविशेषपरिग्रहाध्यवसायस्याप्यभावो बोध्यः । विभावादौ साधारण्यप्रतीतिं प्रतिबन्धकाभावप्रदर्शनेनोपपादयति—**विभावादयोऽपीति** । आदिना अनुभावव्यभिचारिभावयोर्ग्रहणम् । प्रथमतो रसबोधात्प्राक् । परस्य नायकस्यैव, न परस्य नैव नायकस्य, ममेति ममैवेति, न ममेति नैव ममेति, तदास्वादे रसास्वादे भाविनि सति परिच्छेदः संबन्धविशेषस्वीकारपरिहाराध्यवसायः । तथा च तादृशाध्यवसायस्य प्रतिबन्धकस्याभावेनोपहितः साधारणीकरणाख्यव्यापारः सामाजिकानां सीतादयो मम रामादेश्चेति साधारणप्रत्ययमव्याहतमेव जनयतीति भावः । लौकिकानामपि विभावादीनामलौकिकत्वसाधनोपायं साधयितुमाशङ्कते—**नन्विति** । तथापि साधारणीकृत्याख्यव्यापारस्वीकारेऽपि । एवं रसोत्पत्त्यँनुगुणमेतेषां विभावादीनाम् । नन्वेतेषामलौकिकत्वं रसोत्पत्तेर्विगुणमेव न त्वनुगुणमलौकिकात्फलसिद्धेरदृष्टचरत्वादत आह—**भूषणमिति** । 'अलौकिकरससिद्धेः' इति शेषः । भूषणमनुगुणम् । दूषणं विगुणम् । तथा चालौकिकाल्लौकिकफलसिद्धिर्मास्तु, विभावादीनां काव्यनिबन्धनादलौकिकत्वे सति तेभ्योऽलौकिकरसोत्पत्तिः सामाजिकानामनुभवसिद्धेवेति दुरपलप एवालौकिकयोः कार्यकारणभाव इति भावः । रसस्यालौकिकत्वमुपपादयिष्यते । विभावनादिपदव्युत्पत्तिलभ्यमेव विभावनादिस्वरूपमाह—**तत्रेति** । विशेषेणेति विभावनपदघटितस्य विशब्दस्यार्थः । अतिशयेनेति तदर्थः । अङ्कुरणमङ्कुरसदृशीभवनं सूक्ष्मरूपेणाविर्भावः । एवं च रत्यादेः सूक्ष्मास्वादरूपेण य आविर्भावस्तच्छक्तिप्रापणमिति समुदितार्थः ।

---

१. 'प्रथमतः' क-ख-पुस्तकयोर्नास्ति. २. 'नन्वित्युपोद्घातो' ग-पुस्तके नास्ति. ३. 'तथापि' क-पुस्तके नास्ति. ४. 'आदि-' इत्यादिः 'रणे' इत्यन्तः पाठो ग-पुस्तके नास्ति. ५. 'तस्य' ग-पुस्तके नास्ति. ६. 'परिपोषणमित्यर्थः' इत्यधिकं ग-पुस्तके. ७. 'अनुभवं' पुस्तकान्तरे. ८. 'इष्टचरणत्वात्' पुस्तकान्तरे.

विभावादीनां[1] यथासंख्यं कारणकार्यसहकारित्वे कथं त्रयाणामेव[2] रसोद्बोधे कारणत्वमित्युच्यते—

कार्यकारणसंचारिरूपा अपि[3] हि लोकतः ॥ १४ ॥
रसोद्बोधे विभावाद्याः कारणान्येव ते मताः ।

प्राप्त्यर्थचौरादिक'भू' धातुना विभावनपदसिद्धिरवधेया। एवंभूतस्य सूक्ष्मास्वादरूपेणाविर्भूतस्य समनन्तरमिति अनुभावनपदघटितस्यानुशब्दस्यार्थः। रसादिरूपतया शृङ्गारादिरूपतया। यद्वा रत्यादेरित्यादिपदेन देवादिविषयरत्यादीनामपि परिग्रहः। रसादीत्यादिपदेन भावादिपरिग्रहः। एतेन भावादीनामपि विभावादिजन्यत्वमुक्तं भवति। भावनमुत्पादनम्। सूक्ष्मास्वादरूपेणाविर्भूतस्यापि तस्य रसव्यपदेशो नास्ति, किं त्वनुभावपरिपुष्टस्यैव। नत्वङ्कुरे वृक्ष इति व्यपदेशः, किंतु काण्डपल्लवोद्गम एव। तथाभूतस्य रसादिरूपेणोत्पन्नस्य तस्य रत्यादेः सम्यगर्थं चारणमास्वादपात्रीकरणम्। व्यभिचारिभावेनात्यन्तपरिपुष्टस्यैव रत्यादेरत्यन्तास्वादनमिति भावः। एवं चास्वादपरिपोषातिपरिपोषजनकत्वेनैवानुभावसंचारिभावयोरास्वादजनकत्वमिति भावः। विभावाः कारणानि। अनुभावाः कार्याः(र्याणि)। संचारिणः सहकारिण इति क्रमः। ननु सहकारिपदं कारणविशेषपरं कथं रत्यादेः कार्यविशेषाणां निर्वेदादिसंचारिभावानां सहकारित्वमुपपद्यते। उच्यते—साधनस्यानुमानवादिमते स्वकारणानुमितौ मनसः सहकारितया लोके तथाव्यपदेशात्। ननु तथापि निर्वेदादीनां रत्यादिकार्यत्वे नानुभावत्वमेव युज्यते कथं संचारित्वमिति चेत्, न। तेषां व्यापारवैलक्षण्येन फलवैलक्षण्याद्यपदेशवैलक्षण्यस्योचितत्वात्। संचारिरूपाः सहकारिरूपाः। लोकतः लोके कारणान्येव। इति निरुक्तव्यापारत्रयबलाद्रत्यादेरास्वादरूपत्वेनोत्पादनादिति भावः। ननु 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति मुनिवचनाद्विभावादीनां समुदितानामेव कारणत्वं वाच्यम्। तथा सति कारणान्येवेति बहुवचनमनुपपन्नम्। तादृशस्थले एकवचनस्यैव युक्तत्वात्, तृणारणिमणिन्यायेन प्रत्येकं कारणताप्रत्ययप्रसङ्गाच्च। अत एव काव्यप्रकाशे—'शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्। काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥' इत्यत्र 'त्रयः समुदिता हेतुर्न तु हेतवः' इत्युक्तम्। उच्यते—कारणपदस्यैकधर्मावच्छिन्नकार्यतानिरूपितकारणतापरत्वे ह्येकवचनम्। कारणतामात्रपरत्वे तु तादृशस्थलेऽपि बहुवचनं साधु। प्रकृते रत्यादेः कार्यभूतयोरप्यनुभावव्यभिचारिभावयो रसरूपतोत्पत्तौ कारणत्वमिति कारणतामात्रे तात्पर्यम्, न तु तादृशकारणतायाम्। काव्यप्रकाशनिर्वचनस्य तु कार्यकारणभावग्राहकतया कार्यतावच्छेदकेऽपि तात्पर्यमिति। रसं प्रति विभावादीनां व्यञ्जनाजन्यैकज्ञानवि-

---

१. 'ननु विभावादीनां प्रत्येकं कारणकार्यसहकारिरूपाणां रसं प्रति कथं कारणत्वमित्युच्यते' ग.
२. 'अपि' ख. ३. 'कारणकार्य' ख; 'कारणं' घ.

ननु[1] तर्हि कथं रसास्वादे तेषामेकः प्रतिभास इत्युच्यते—

प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते ॥ १५ ॥
ततः संमिलितः सर्वो विभावादिः सचेतसाम् ।
प्रपाणकरसन्यायाच्चर्व्यमाणो रसो भवेत् ॥ १६ ॥

यथा खण्डमरिचादीनां संमेलनादपूर्व इव कश्चिदास्वादः प्रपाणकरसे[2] संजायते । विभावादिसंमेलनादिहापि तथेत्यर्थः ।

ननु यदि[3] विभावानुभावव्यभिचारिभिर्मिलितैरेव रसस्तत्कथं तेषामेकस्य द्वयोर्वा सद्भावेऽपि स[4] स्यादित्युच्यते—

सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत् ।
झटित्यन्यसमाक्षेपे तथा दोषो न विद्यते ॥ १७ ॥

अन्यसमाक्षेपश्च प्रकरणादिवशात् ।

पयत्वे सत्येव कारणत्वमुपपादयितुमाह—**ननु तर्हीति** । तेषां कारणीभूतविभावादीनामेकप्रतिभास एकरसस्वरूपतया परिणामः । विभिन्नकारणानां विभिन्नकार्यतया परिणामस्यैवौचित्यादिति भावः । विभावादेरतीतस्यापि रसास्वादकारणत्वकथनं तज्ज्ञानाभिप्रायेणेति ध्येयम् । **प्रतीयमानः प्रत्येकमिति** । प्रत्येकं विभावादौ साधारण्यप्रतीतिरित्यभिप्रायेणेदम् । नत्वन्तरा प्रत्येकं प्रतीत्यनन्तरं कल्पनीयं प्रमाणाभावात् । ततः प्रत्येकप्रत्ययानन्तरं संवलितः व्यञ्जनया विशिष्टवैशिष्ट्यावगाह्येकज्ञानरूपतां प्राप्तः । प्रपाणकरसन्यायात् प्रपाणकद्रव इव चर्व्यमाणः । स्वाभिन्नाह्लादमयचर्वणविषयः प्रपाणकः । पक्षे विलक्षणरसवत्तयोपलभ्यमानो रसश्चिदात्मकः पदार्थः । उपमानोपमेययोश्चर्व्यमाणत्वमुपपादयति—**यथेति** । खण्डमरिचादीनामित्यादिपदेनामिक्षाकर्पूरयोर्ग्रहणम् । यथा खण्डादिचतुष्टयमेलकाज्जायमाने प्रपाणकद्रवे माधुर्यादिविलक्षणो विशिष्य निर्देष्टुमशक्य आस्वादो रसाख्यगुणविशेष इव विभावादिचतुष्टयमेलकात्तथा जायमाने शृङ्गारादिरसेऽप्याह्लादः संजायत इत्यन्वयः । 'देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः । आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः ॥' इत्यादाविव सप्तम्यन्तप्रथमान्तपदार्थयोरुपमाद्वयमुपस्थापयतोर्यथेवशब्दयोर्न[5] पौनरुक्त्यम् । अत एव रसास्वादपदयोः श्लिष्टत्वादुपमानोपमेयभावः । स स्यात् रसः स्यात् । समाक्षेपे व्यञ्जनया बोधे सति । दोषो रसानुप-

---

१. नन्वित्यतः प्राक् 'तदुक्तं ध्वनिकृता—'विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः । आनीयमानः स्वाद्यत्वं स्थायीभावो रसः स्मृतः ॥' इत्यधिकं ग-पुस्तके. २. 'प्रतीयते' ग. ३. 'यदि' ग-पुस्तके नास्ति. ४. 'रसः' क-ख.

यथा

[1]'दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः
संक्षिप्तं निबिडोन्नतस्तनभुरः पार्श्वे प्रमृष्टे इव ।
मध्यः पाणिमितो नितम्बि जघनं पादावुदग्राङ्गुली
छन्दो नर्तयितुर्यथैव मनसः सृष्टं तथास्या वपुः ॥'

अत्र मालविकामभिलषतोऽग्निमित्रस्य मालविकारूपविभावमात्रवर्णनेऽपि संचारिणामौत्सुक्यादीनामनुभावानां च नयनविस्फारादीनामौचित्यादेवाक्षेपः । एवमन्याक्षेपेऽप्यूह्यम् ।

अनुकार्यगतो रस इति [1]वदतः प्रत्याह—

पारिमित्यालौकिकत्वात्सान्तरायतया तथा ।
अनुकार्यस्य रत्यादेस्तद्बोधो न रसो भवेत् ॥ १८ ॥

पत्तिः । प्रकरणादिवशात् प्रस्तावादिवैशिष्ट्यात् । **दीर्घाक्षमिति** । बाहू नताविति स्त्रीणां नतस्कन्धत्वं प्रशस्तमिति भावः । संक्षिप्तमविस्तीर्णम् । स्त्रीणामविस्तीर्णवक्षस्त्वं गुण इति भावः । प्रमृष्टे लिप्ते । पार्श्वस्श्यामलक्ष्यत्वादियमुत्प्रेक्षा । छन्दोऽभिप्रायः । मनसो नर्तयितुश्चपलीकर्तुः कामस्य । अस्या मालविकायाः । औचित्याद् वाच्यस्य विभावस्य वैशिष्ट्यात् । **एवमिति** । अन्याक्षेपे विभावाक्षेपे । यथा—'परिमृदितमृणाली म्लानमङ्गं प्रवृत्तिः कथमपि परिवारप्रार्थनाभिः क्रियासु । कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मीमभिनवकरिदन्तच्छेदकान्तः कपोलः ॥' [2]अत्र विप्रलम्भशृङ्गारस्यानुभावमात्रस्याङ्गासौष्ठवादेः सत्त्वम् । तदालम्बनविभावस्य, तच्चेष्टादेरुद्दीपनविभावस्य, व्यभिचारिभावस्य विषादादेश्चाक्षेपेण लाभः । अनुकार्यो नायकः । पारिमित्यान्नायकमात्रगतत्वेनाल्पत्वात् । रसस्य तु नानासामाजिकगतत्वेन तदसंभवादिति भावः । **अलौकिकत्वादिति** । रसस्यालौकिकत्वमलौकिकविभावादिजन्यत्वाद्वक्ष्यमाणप्रकारेण चावगन्तव्यम् । सान्तरायतया नाट्यकाव्यदर्शनश्रवणप्रतिकूलतया । तस्मात्पारिमित्यादित्रयसंबन्धात् । पारिमित्यादीनां रसभेदव्याप्यत्वमुपपादयति—

---

1. वदत इति । भट्टलोल्लटादीन् ॥

---

१. ग पुस्तके तु 'वियदलिमलिनाम्बुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः । धरणिरभिनवाङ्कुराङ्कुरङ्का प्रणतिपरे दयिते प्रसीद मुग्धे ॥' आलम्बनोद्दीपनविभावमात्रवर्णनेऽपि प्रसीदेति पदसामर्थ्यात्कटाक्षविक्षेपभुजाक्षेपादीनामनुभावादीनां मुग्धे इत्यतो गर्वामर्षासूयादीनां च व्यभिचारिणामौचित्यादेवाक्षेपः ।' इत्युदाहरणं वर्तते. २. 'अत्र संभोगशृङ्गारालम्बनविभावस्य नायकस्य तच्चेष्टादेरुद्दीपनविभावस्य चाक्षेपेण लाभः' इति पुस्तकद्वये पाठान्तरम्.

[1]सीतादिदर्शनादिजो रामादिरत्याद्युद्बोधो हि परिमितो लौकिको नाट्यकाव्यदर्शनादेः[3] सान्तरायश्च, [3]तस्मात्कथं रसरूपतामियात्। रसस्यैतद्धर्मत्रितयविलक्षणधर्मकत्वात्।

[1]अनुकर्तृगतत्वं चास्य निरस्यति—

शिक्षाभ्यासादिमात्रेण राघवादेः सरूपताम्।
दर्शयन्नर्तको नैव रसस्यास्वादको भवेत्॥ १९॥

किं च।

काव्यार्थभावनेनायमपि सभ्यपदास्पदम्।

यदि पुनर्नटोऽपि काव्यार्थभावनया रामादिस्वरूपतामात्मनो दर्शयेत्तदा सोऽपि सभ्यमध्य एव गण्यते।

नायं ज्ञाप्यः स्वसत्तायां प्रतीत्यव्यभिचारतः॥ २०॥

यो हि ज्ञाप्यो घटादिः स सन्नपि कदाचिदज्ञातो भवति न ह्ययं तथा प्रतीतिमन्तरेणाभावात्।

रसस्येति। एतदिति पारिमित्यादीत्यर्थः। विलक्षणत्वं च तदभावव्याप्यत्वमेव। एवं च यद्धर्माभावव्याप्यो यद्वृत्तिधर्मस्तद्धर्मस्तद्भेदव्याप्य इति नियमः संपद्यते। यथा—पटवृत्तिधर्मः पटत्वं घटत्वरूपधर्माभावव्याप्यो भवति, घटत्वधर्मोऽपि पटभेदव्याप्यो भवति। यथाश्रुतं तु न सम्यक्। तथाहि—यद्धर्मो यद्वृत्तिधर्मभिन्नस्तद्धर्मस्तद्भेदव्याप्य इति नियमो नोपपद्यते। घटत्वं घटवृत्तिधर्मान्तरविलक्षणं न तु घटभेदव्याप्यमिति व्यभिचारात्। यदि तु यद्वृत्तित्वावच्छिन्नप्रतियोगिताको भेदो विवक्ष्यते तदा नायं दोष इत्यवधेयम्। (अनुकर्तृगतत्वं नटवृत्तित्वमस्य रसस्य। गुरुतो ग्रहणं शिक्षा। शिक्षितार्थस्य मुहुरनुष्ठानेन संस्कारातिशयोऽभ्यासः। मात्रपदेन काव्यार्थभावनाव्यवच्छेदः। अयमपि नर्तकोऽपि सभ्यपदास्पदं सभ्यपदवाच्यः। रसस्य स्वप्रकाशत्वं पर्यवसाययितुं ज्ञानान्तरग्राह्यत्वं निरस्यति—**नायमिति**। अयं रसो ज्ञाप्यो जन्यज्ञानविषयः, रसस्य जन्यताभावो निरूपयिष्यते, नातो बाधः। ईश्वरज्ञानविषयत्वस्य केवलान्वयितया साध्याप्रसिद्धिरतो जन्येति। स्वसत्तायां स्वावस्थाने। षष्ठ्यर्थे सप्तमी। प्रतीतिं विना स्वावस्थानस्याभावादित्यर्थः। अत्र साध्यसाधनयोः पक्षमात्रवृत्तित्वेनान्वयदृष्टान्ताभावादन्वयव्याप्तिग्रहो न संभवतीति व्यतिरेकव्याप्तिग्रहोपायं व्यतिरेकदृष्टान्तमाह—**यो हीति**।

---

1. **अन्विति**। न्यायरीत्या भरतसूत्रं योजयतां श्रीशङ्कुकादीनां मते रसस्यानुकर्तृगतत्वम्॥

---

१. 'अनुकार्यो रामादिः, तद्गतो रत्यादिना परिमितः, न अलौकिकश्च, कालान्तरभूतत्वात्सान्तरश्च। स कथमपरिमितालौकिकानुभूयमानो रसतां गच्छेत्।' इति पाठान्तरं ग-पुस्तके. २. 'दितः' ख. ३. 'तत्' ख.

यस्मादेष विभावादिसमूहालम्बनात्मकः ।
तस्मान्न कार्यः

यदि रसः कार्यः स्यात्तदा विभावादिज्ञानकारणक एव स्यात् । ततश्च रसप्रतीतिकाले विभावादयो न प्रतीयेरन् । कारणज्ञानतत्कार्यज्ञानादीनां युगपददर्शनात् । नहि चन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानं चैकदा संभवति । रसस्य च विभावादिसमूहालम्बनात्मकतयैव प्रतीतेर्न विभावादिज्ञानकारणकत्वमित्यभिप्रायः ।

अत्र वीप्सा वेदितव्या । सन्नपि अवस्थितोऽपि । कदाचित् ज्ञानसामग्र्यभावदशायाम् । तथा च यो यो ज्ञाप्यः स प्रतीतिं विना कदाचिदवतिष्ठते यथा घटादिरित्यभिप्रायः । अत्र ज्ञानाभावकालीनावस्थानाभाव एव हेतुः पर्यवसन्नः । ज्ञानं चात्र स्वविषयकमीश्वरज्ञानातिरिक्तमवगन्तव्यम् । नातो हेत्वप्रसिद्धिः । ज्ञाप्यत्वाभावस्य साध्यस्य व्यतिरेको ज्ञाप्यत्वमेव निरुक्तहेतुव्यतिरेकश्च ज्ञानाभावकालीनावस्थानं तयोः सहचारग्रहेण साधने साध्यव्याप्तिं ग्राहयित्वा पक्षधर्मत्वं ग्राहयति—**न ह्यर्यमिति** । अयं रसः । तथा सन्नपि न कदाचिदज्ञातः । तत्रापि हेतुमाह—**प्रतीतिमिति** । अन्तरेण विना । रसस्य कार्यसुखज्ञानान्तरवैलक्षण्यात्कार्यत्वाभावं साधयति—**यस्मादिति** । एष रसः विभावादिसमूहालम्बनात्मकः यथासंभवविशेषणविशेष्यभावापन्नविभावादिसमूहविषयकः । 'रसः कार्यत्वाभाववान् सुखमयत्वे सति विभावादिसमूहविषयकत्वात्' इत्यनुमानम् । रससमानाकारे व्यञ्जनाजन्यज्ञाने व्यभिचारवारणाय सत्यन्तं हेतुविशेषणम् । बाधोत्सारकं तर्कमाह—**यदीति** । रसप्रादुर्भावप्राक्क्षणे विभावादिज्ञानस्यैव संभवात्तत्कारणकत्वमेवोपपद्यत इत्येवकारेण । ननु कार्यत्ववति घटादौ विभावादिज्ञानकारणकत्वं नास्तीति मूलशैथिल्यमिति चेत्, न । विभावादिविशिष्टवैशिष्ट्यावगाहिज्ञानत्वसमानाधिकरणकार्यत्वस्यापाद्यस्य विवक्षणीयत्वाद् रससमानाकारे व्यञ्जनाजन्यज्ञानादावापाद्यापादकयोर्व्याप्तिग्रहः । अत्रेष्टापत्तौ दोषमाह—**ततश्चेति** । रसस्य विभावादिज्ञानकारणकत्वाङ्गीकाराच्चेत्यर्थः । रसप्रतीतिकाले रसप्रतीतौ न प्रतीयेरन् न विषयाः स्युः । **ज्ञानेति** । ज्ञायमानकारणज्ञायमानतज्जन्यसुखयोर्युगपददर्शनात् एकसंविद्विषयत्वादर्शनात् । एतदेव दृष्टान्तेनोपपादयति—**नहीति** । चन्दनस्पर्शतज्जन्यसुखं चैकज्ञानविषयो न भवतीत्यर्थः । आपत्तेरनुगुणं बाधं दर्शयति—**रसस्य चेति** । आनन्दरूपस्य विभावादिसमूहालम्बनात्मकप्रतीतिरूपस्येत्यर्थः । एवं च विभावादिज्ञानकारणकत्वरूपस्यापाद्यस्याभावे सिद्धे तेनैव कार्यत्वरूपविशेष्याभावकृतो निरुक्तापादकस्य विशिष्टाभावः सिध्यतीति भावः । तदुक्तं काव्यप्रकाशटीकाकृता चण्डीदासेन—'कार्यं सुखं स्वकारणैः सह नैकस्यां संविद्यवभासमानं दृष्टम् । एतच्च सुखं विभावादिसंवलितं भासते, तस्मान्न कार्यम्' इति । एवं च विभावादिज्ञानस्य रसं प्रति यत्कारणत्वमुक्तं तत्पूर्ववर्तित्वमात्रेणौपचारिकमिति ध्येयम् ।

नो नित्यः पूर्वसंवेदनोज्झितः ।
असंवेदनकाले हि न भावोऽप्यस्य विद्यते ॥ २१ ॥

न खलु नित्यवस्तुनोऽसंवेदनकालेऽसंभवः ।

नापि भविष्यन्साक्षादानन्दामयप्रकाशरूपत्वात् ।
कार्यज्ञाप्यविलक्षणभावान्नो वर्तमानोऽपि ॥ २२ ॥
विभावादिपसमर्शविषयत्वात्सचेतसाम् ।
परानन्दमयत्वेन संवेद्यत्वादपि स्फुटम् ॥ २३ ॥
न निर्विकल्पकं[1] ज्ञानं तस्य ग्राहकमिष्यते ।

रसस्य नित्यत्वाभावमप्युपपादयति—**नो नित्य इति** । एष इत्यनुषज्यते । पूर्वसंवेदनं विभावादिज्ञानात् प्राग्ज्ञानं तद्रहित इत्यर्थः । यदि रसो नित्यः स्यात्तदा विभावादिज्ञानात्प्रागपि ज्ञायेतेति बाधोत्सारकस्तर्कः । ननु विभावादिज्ञानं तद्ग्राहकमिति प्राक्काले कथं रसः प्रतीयेतेत्यतो दोषान्तरमाह—**असंवेदनेति** । अस्य रसस्य संवेदनशरीरत्वादसंवेदनकाले सुतरामसंभव इति भावः । साध्यसाधनयोर्व्याप्तिग्राहकं साध्याभावसाधनाभावयोः सहचारं दर्शयति—**न खल्विति** । रसस्य भविष्यत्त्वाभावं साधयति—**नापीति** । एष इत्यनुषज्यते । **साक्षादिति** । साक्षात्कारविषयानन्दबहुलप्रकाशरूपत्वादित्यर्थः । लौकिकप्रत्यक्षे विषयस्य कारणत्वाङ्गीकारेण भविष्यतस्तदसंभवादिति भावः । रसस्य वर्तमानत्वाभावमपि साधयति—**ज्ञाप्येति** । ज्ञाप्यकार्येति प्रामादिकः पाठ आर्याघटकगणभङ्गप्रसङ्गात् । कार्यज्ञाप्येत्येव पाठः सम्यक् । एवं वर्तमान इत्यत्र नशब्दः प्रामादिकः, नोशब्दः सम्यक् । वर्तमानस्य वस्तुनः कार्यज्ञाप्यान्यतरत्वनियमादिति भावः । रसग्रहस्य निर्विकल्पकज्ञानस्वरूपत्वाभावं साधयति—**विभावादीति** । परामर्शोऽत्र विशिष्टवैशिष्ट्यावगाही ग्रहः । तद्विषयत्वात्तन्मात्रविषयत्वात् । **परानन्देति** । परमानन्दत्वप्रकारकसंवेदनविषयत्वादित्यर्थः । निर्विकल्पकं संसर्गानवगाहि । भासमान-

---

1. **नेति** । नामरूपजात्यादिशून्यं निर्विकल्पकम् । तद्युक्तं सविकल्पकम् , तत्र रसः केन गृह्यत इत्याशङ्क्य नान्यतरेण गृह्यत इति व्यवस्थापितम् ॥

---

१. आर्येयं मुद्रितपुस्तकेषु पदच्छेदवैलक्षण्येन गद्यरूपतां नीता. २. 'पूर्वेति । संवेदनात्पूर्वं प्राग्वृत्ति पूर्वसंवेदनं धर्मपरनिर्देशात्प्राग्वृत्तित्वमस्त्येव । रसस्य तद्विलक्षणैतद्धर्मयोगित्वान्नित्यत्वाभावः सिध्यतीति भावः । ननु स्वप्राग्वृत्ति यत्संवेदनं तद्रहित इत्यर्थः । रसस्योत्पत्तेः प्रागनुत्पित्सादिसंभवे स्वप्राग्वृत्तिसंवेदनविषयत्वाभावस्य हेतोः स्वरूपासिद्धेः, नित्यानां प्राक्कालासंभवेन निरुक्तहेतोस्तत्र, सद्भावाद्व्यभिचाराच्च । नापि पूर्वमतीतं यत्संवेदनं तद्विषयत्वाभावो हेतुः रससंवेदनस्यापि । अतीतत्वसंभवेनातीतत्वसंवेदनविषयत्वस्य केवलान्वयितया तस्याप्रसिद्धेः । ननु रसस्य नाशोत्तरमप्युपनीतभानादिसंभवात्संवेदनप्राग्वृत्तित्वाभावस्य हेतोः स्वरूपासिद्धत्वमत आह—असंवेदनेति ।' इति पुस्तकान्तरे.

[1]तथाभिलापसंसर्गयोग्यत्वविरहान्न च ॥ २४ ॥

सविकल्पकसंवेद्यः

[2]सविकल्पकज्ञानसंवेद्यानां हि वचनप्रयोगयोग्यता । न तु रसस्य तथा ।

साक्षात्कारतया न च ।

परोक्षस्तत्प्रकाशो नापरोक्षः शब्दसंभवात् ॥ २५ ॥

तत्कथय कीदृगस्य तत्त्वमश्रुतादृष्टपूर्वनिरूपणप्रकारस्येत्याह—

तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयम् ।

तर्हि पुनः प्रमाणं तस्य सद्भाव इत्याह—

प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषां मतम् ॥ २६ ॥

संसर्गप्रतियोगित्वरूपप्रकारत्वस्यापि संसर्गग्रहमन्तरेणासंभवादिति भावः । तस्य रसस्य ग्राहकं विषयतानिरूपकम् । [3]रसग्रहो निर्विकल्पस्वरूप इत्यर्थः । विभावादिनिष्ठप्रकारतायाः परमानन्दत्वनिष्ठप्रकारतायाश्च निरूपकस्य रसग्रहस्य निष्प्रकारात्मकनिर्विकल्पकस्वरूपत्वं न संभवतीति भावः । एतेन स्वमात्रग्राह्यस्य रसस्य निर्विकल्पकज्ञानरूपत्वमपि न सिध्यतीति ध्येयम् । रसग्रहस्य सविकल्पकज्ञानस्वरूपत्वाभावमपि साधयति—**तथेति** । अभिलापो वचनं तस्य संसर्गः प्रयोगः । तद्योग्यत्वाभावादित्यर्थः । **स** रसः सविकल्पकसंवेद्यः संसर्गावगाहिज्ञानविषयः । प्रागुक्तहेतुद्वयासंगतेरस्य सविकल्पकज्ञानविषयत्वमस्त्येव । किंतु सविकल्पकवेद्यान्तरादस्य वैलक्षण्यसाधने तात्पर्यं वेदितव्यम् । स्वप्रकाशकत्वेनापि ज्ञानान्तरग्राह्यात्सविकल्पकादस्य वैलक्षण्यं बोध्यम् । गुरुनये तु—सविकल्पकज्ञानानां स्वेनैव ग्रह इति नैतद्वैलक्षण्यम् । **साक्षात्कारतयेति** । स्वादनाख्यव्यापारस्य मनःसंनिकर्षत्वाङ्गीकारेण तज्जन्यत्वादिति भावः । परोक्षः प्रत्यक्षविलक्षणः । तत्प्रकाशो रसग्रहो नापरोक्षः नापि प्रत्यक्षरूपः । शब्दसंभवात् काव्यजन्यविभावादिज्ञानजन्यत्वनियमात् । अनेन प्रत्यक्षान्तरवैलक्षण्यमेव साधितं न तु प्रत्यक्षभिन्नत्वम् । प्रागुक्तविरोधात् । अस्य रसस्य तत्त्वं याथार्थ्यम् । अश्रुतोऽदृष्टपूर्वश्च निरूपणप्रकार इतरभेदानुमापको धर्मः स्वभावो यस्य तस्येत्यर्थः । तस्मादुपदर्शितलौकिकज्ञानानन्दवैलक्षण्यात् । सत्यमित्येवकारार्थे । अलौकिक एवेत्यर्थः । अन्यत्राश्रवणदर्शनं चालौकिकवस्तुसिद्धौ गुण एव न तु दोष इति भावः । तदुक्तम्—'अलौकिकसिद्धेर्भूषणमेव न तु दूषणम्' इति । विदुषां चर्वणेत्यन्वयः । अत्र रसे स्वाभिन्ने चर्वणास्वरूपे । तदुक्तम्—

---

1. **तथेति** । तथेत्यादि सविकल्पकसंवेद्य इत्यनेनान्वेति । आस्वादे ज्ञानान्तरासंभवाद्रसमात्रविषयिण्यां चर्वणायां नामरूपाद्युल्लेखाभावाच्च न सविकल्पकत्वपक्षोऽपि संभवतीति तात्पर्यम् ॥

---

१. 'सविकल्पक–' इत्यादि फक्किका **ग**-पुस्तके नास्ति. २. 'रस' इत्यादिः '–ध्येयम् ।' इत्यन्तः पाठः पुस्तकान्तरे न दृश्यते.

चर्वणा आस्वादनम् । तच्च 'स्वादः काव्यार्थसंभेदादात्मानन्दसमुद्भवः' इत्युक्तप्रकारम् ।

ननु यदि रसो न कार्यस्तत्कथं महर्षिणा 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति लक्षणं कृतमित्युच्यते—

निष्पत्त्या चर्वणस्यास्य निष्पत्तिरुपचारतः ।

यद्यपि रसाभिन्नतया चर्वणस्यापि न कार्यत्वं तथापि तस्य कादाचित्कतया उपचरितेन कार्यत्वेन कार्यत्वमुपचर्यते ।

अवाच्यत्वादिकं तस्य वक्ष्ये व्यञ्जनरूपणे ॥ २७ ॥

तस्य रसस्य । आदिशब्दादलक्ष्यत्वादि ।

ननु यदि मिलिता रत्यादयो रसास्तत्कथमस्य स्वप्रकाशत्वं कथं चाखण्डत्वमित्याह—

रत्यादिज्ञानतादात्म्यादेव यस्माद्रसो भवेत् ।
ततोऽस्य स्वप्रकाशत्वमखण्डत्वं च सिध्यति ॥ २८ ॥

यदि रत्यादिकं प्रकाशशरीरादतिरिक्तं स्यात्तदैवास्य स्वप्रकाशत्वं न

'चर्वणैव भगवती स्वसंवित्स्वस्वरूपादभिन्ने तस्मिन्प्रमाणम्' इति । **ननु यदीति ।** अस्या विप्रतिपत्तेः 'तस्मान्न कार्यः' इत्यनन्तरमेवोत्थापयितुमौचित्येऽपि सिद्धान्तस्य चर्वणाग्रहसाध्यत्वाच्चर्वणानिरूपणानन्तरमेवोत्थापनमुचितमेव । महर्षिणा भरतेन । अस्य रसस्योपचारतः स्वाश्रयग्राह्यत्वसंबन्धेन । प्रतीयत इति शेषः । तस्य चर्वणस्य कादाचित्कतया आविर्भावतिरोभाववशेन कदाचिद्भवतया । अत्राभेदे(न) तृतीया । उपचरितेन लक्षणया प्रतीतेन कार्यत्वेन कार्यसादृश्येन हेतुना कार्यत्वं कार्यसादृश्यमुपचर्यते निरुक्तपरम्परासंबन्धेन प्रयुज्यते । अवाच्यत्वमनभिधेयत्वम् । व्यञ्जनानिरूपणे व्यञ्जनायाः प्रामाण्यनिरूपणे पञ्चमपरिच्छेदे । अलक्ष्यत्वादीत्यादिना तात्पर्यत्वग्रहः । रसस्य स्वप्रकाशत्वमखण्डत्वं चोपपादयति—**ननु यदीति ।** स्वप्रकाशत्वं स्वस्वरूपज्ञानविषयत्वं रत्यादीनां तदसंभवादिति भावः । अखण्डत्वमेकरूपत्वं परिणामवादिमते । सिद्धान्तमाह—**रत्यादिरिति ।** अस्य रसस्य न तथा प्रकाशशरीरादतिरिक्तत्वम् । ननु रसस्य स्वप्रकाशचिन्मयत्वाङ्गीकारेण तद्ग्राहकस्य चर्वणस्यापि तद्रूपत्वमुपपन्नम् । एवं च 'निष्पत्त्या चर्वणस्यास्य निष्पत्तिरुपचारतः'

---

1. **विभावेति ।** सूत्रे 'विभावादिसंयोगात्' इति पञ्चम्या विभावादीनां हेतुत्वमुक्तम् । तच्च कारकत्वं ज्ञापकत्वं वा स्यादिति शङ्कोद्भावनम् ॥

---

१. 'तस्य–' इत्यादि '–दि' इत्यन्तं ग-पुस्तके नास्ति. २. नन्वित्याद्युपोद्घातः ग-पुस्तके न दृश्यते. ३. 'यदि–' इत्यादिः '–उपेया इति च' इत्यन्तः पाठो ग-पुस्तके नास्ति.

सिध्येत् । न च तथा । तादात्म्याङ्गीकारात् । यदुक्तम्[1]—'यद्यपि रसानन्यतया चर्वणापि न कार्या तथापि कादाचित्कतया कार्यत्वमुपकल्प्य तदेकात्मन्यनादिवासनापरिणतिरूपे रत्यादिभावेऽपि व्यवहार इति भावः' इति[2] ॥ सुखादितादात्म्याङ्गीकारे चास्माकीं सिद्धान्तशय्यामधिशय्य दिव्यं वर्षसहस्रं प्रमोदनिद्रामुपेया इति चेत्[3] । 'अभिन्नोऽपि स प्रमात्रा वासनोपनीतरत्यादितादात्म्येन गोचरीकृतः' इति च । ज्ञानस्य स्वप्रकाशत्वमनङ्गीकुर्वतामुपरि वेदान्तिभिरेव पातनीयो दण्डः । तादात्म्यादेवास्याखण्डत्वम् ।

इति यदुक्तं तदसंगतमित्यत आह—**यद्यपीति** । उपकल्प्य लक्षणया व्यवहृत्य । तदेकात्मनि चर्वणास्वरूपे । **अनादीति** । सामाजिकानां प्राक्तनी या वासना तस्याः परिणतिरूपे । आविर्भूतज्ञानरूपे रसे इत्यर्थः । एतेन रसस्याकार्यत्वमुपपादितम् । ननु चर्वणातोऽभिन्ने रसे लक्षणया साक्षादेव कार्यत्वं प्रतीयते कथं निरुक्तपरम्परया व्यवहर्तव्यमत आह—**रत्यादीति** । रत्यादिविषयावच्छेद इत्यर्थः । 'विभावादिसंयोगाद्रत्यादी रसो जायते' इत्यत्र रसे साक्षाद्रत्यादौ रसद्वारैव निष्पत्तिः प्रतीयत इति भावः । व्यवहारं निरुक्तपरम्परया प्रयुङ्क्ष्व । ननु परिणामवादिमते रत्यादेर्ज्ञानतादात्म्यं स्वप्रकाशत्वं चोपपद्यतां 'स्वप्रकाशानन्दचिन्मयः' इत्यनेन रसस्यानन्दमयत्वं 'चमत्कारप्राणः' इत्यनेन चमत्कारमयत्वं चोक्तम्, तदसंगतं विजातीयानां चिदानन्दचमत्काराणामेकरूपत्वासंभवादत आह—**सुखादीति** । आदिना चमत्कारपरिग्रहः । आस्माकीमालंकारिकसंप्रदायसंबन्धिनीम् । 'तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयम्' इति सिद्धान्त एव सुखसंपादकत्वेन शय्यां तामधिशय्य अधिश्रित्य । **दिव्यमिति** । मनुष्याणां षष्ट्यधिकत्रिंशतसंख्यकवर्षैं देवानामेकवत्सरो भवति । एवं वर्षसहस्रं प्रमोद एव नेत्रनिमीलनादिकारित्वेन निद्रा तामुपेयाः प्राप्नुहि । तथा चास्माकं सिद्धान्ताश्रयणेन चिरकालमपि चिन्तया वादिभिर्दोषोद्भावनं कर्तुं न शक्यमिति भावः । रसस्य स्वप्रकाशत्वमुपसंहरति—**अभिन्नोऽपीति** । 'स्वस्मात्' इति शेषः । स रसः । प्रमात्रा इति भावप्रधानो निर्देशः । तेन चर्वणारूपप्रमयेत्यर्थः संपद्यते । वासनायामुपनीतो ज्ञानप्रत्यासत्त्या अभेदेन प्रकारीकृतो यो रत्यादिस्तस्य तादात्म्येन विशिष्टः गोचरीकृतो विषयीकृतः । ननु ज्ञानस्यानुव्यवसायेनैव ग्रहो भवति कथं स्वप्रकाशत्वमिति वदतो नैयायिकानाक्षिपति—**ज्ञानस्येति** । उपरि मते दण्डो दोषः पातनीय उपन्यसनीयः । ज्ञानस्यानुव्यवसायेन तस्यापि ज्ञानान्तरेण ग्रह इत्यनवस्यारूपोऽत्र दोषो वेदितव्यः । रसस्याखण्डत्वेऽपि ज्ञानतादात्म्यमेव हेतुमनुषज्य दर्शयति—**तादात्म्यादेवेति** ।

---

१. 'उक्तं हि' ख. २. 'च' क-पुस्तके नास्ति. ३. 'तदुक्तं मुनिना' इति ग-पुस्तकेऽधिकम्.

[1]रत्यादयो हि प्रथममेकैकशः प्रतीयमानाः सर्वेऽप्येकीभूताः स्फुरन्त एव रसतामापद्यन्ते । तदुक्तम्—

'विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः ।
प्रतीयमानाः प्रथमं खण्डशो यान्त्यखण्डताम् ॥' इति ।

'परमार्थतस्त्वखण्ड एवायं वेदान्तप्रसिद्धब्रह्मतत्त्ववद्वेदितव्यः' इति [2]च ।

[3]अथ के ते विभावानुभावव्यभिचारिण इत्यपेक्षायां विभावमाह—

रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः ।

ये हि लोके रामादिगतरतिहासादीनामुद्बोधकारणानि सीतादयस्त एव काव्ये नाट्ये च निवेशिताः सन्तः विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिः इति विभावा उच्यन्ते ।

तदुक्तं भर्तृहरिणा—

'शब्दोपहितरूपांस्तान्बुद्धेर्विषयतां गतान् ।
प्रत्यक्षानिव कंसादीन्साधनत्वेन मन्यते ॥'

तद्भेदानाह—

आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ ।

स्पष्टम् ।

ज्ञानतादात्म्यादेवेत्यर्थः । अस्य रसस्य । ननु व्यस्तानां रत्यादिविभावादीनां कथमेकरूपत्वमत आह—**रत्यादयो हीति** । आदिना विभावादिपरिग्रहः । एतच्च शृङ्गाररसे । वीरादौ तूत्साहादयो ज्ञेयाः । एकीभूता व्यञ्जनाजन्यैकज्ञानविषयत्वेन एकरूपत्वं प्राप्ताः स्फुरन्तश्चिद्रूपत्वं प्राप्नुवन्तः । सात्त्विकानुभावयोर्गोबलीवर्दन्यायेन पृथगुपादानम् । खण्डशः प्रत्येकम् । ननु ज्ञानतादात्म्याङ्गीकारेऽप्यखण्डत्वं न संभवति सुखचमत्काराभ्यामैक्यासंभवादत आह—**परमार्थतस्त्विति** । वस्तुतस्त्विति यावत् । अलौकिकस्वभावादिति यावत् । अलौकिकमेव दृष्टान्तमाह—**वेदान्तेति** । ब्रह्ममीमांसा वेदान्तस्तत्र यथा चिदानन्दरूपोऽयं पुरुष इत्यनेन चिदानन्दयोरेकब्रह्मरूपत्वमुपपादितं तथा चिदानन्दचमत्काराणामेकरसरूपत्वमिति भावः । शब्दोपहितरूपान्काव्यप्रकाशितस्वरूपान् । बुद्धेर्व्यञ्जनाजन्यबोधस्य । **कंसादीनिति** । वीररसाद्यालम्बनविभावाभिप्रायेण । साधनत्वेनेति विशेषणे तृतीया । मन्यते ।

---

१. 'रत्यादयः—' इत्यादिः '–तदुक्तं' इत्यन्तः पाठो ग-पुस्तके नास्ति. २. इति 'रसनिरूपणम्' इत्यधिकं ग-पुस्तके. ३ अथ–' इत्यादिः 'मन्यते ॥' इति हरिकारिकान्तः पाठो ग-पुस्तके नास्ति' किंतु 'ननु विभावादिभ्यो रस इत्युक्तं के ते विभावाद्या इत्याह—बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयात्मकाः । अनेन यस्मात्तेनायं विभाव इति कीर्तित ॥' इत्येव पाठोऽस्ति.

तत्र—

आलम्बनो नायकादिस्तमालम्ब्य रसोद्गमात् ॥ २९ ॥

आदिशब्दान्नायिकाप्रतिनायिकादयः । अत्र यस्य रसस्य यो विभावः स तत्स्वरूपवर्णने वक्ष्यते । तत्र नायकः—

त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता ॥ ३० ॥

दक्षः क्षिप्रकारी । शीलं सद्वृत्तम् । एवमादिगुणसंपन्नो नेता नायको भवति ।

तद्भेदानाह—

धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ।
धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः ॥ ३१ ॥

स्पष्टम् ।

तत्र धीरोदात्तः—

अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः ॥ ३२ ॥

अविकत्थनोऽनात्मश्लाघाकरः । महासत्त्वो हर्षशोकाद्यनभिभूतस्वभावः । निगूढमानो विनयच्छन्नगर्वः । दृढव्रतोऽङ्गीकृतनिर्वाहकः ।

यथा—रामयुधिष्ठिरादिः ।

अथ धीरोद्धतः—

मायापरः प्रचण्डश्चपलोऽहंकारदर्पभूयिष्ठः ।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः ॥ ३३ ॥

यथा—भीमसेनादिः ।

सामाजिकः इति शेषः । तद्भेदौ विभावप्रकारौ । तस्य विभावस्य । **नायकादिरिति** । नायको रतेर्नायकः आलम्बनं तं नायकादिमालम्ब्य विषयीकृत्य । त्यागी दाता । कृती वीरः । कुलीनः सत्कुलोद्भवः । उत्साहः कर्मण्यध्यवसायः । रूपादित्रयवान् । निगूढाभिप्रायज्ञत्वं वैदग्ध्यम् । शीलं सद्वृत्तम् । नेता नायकः । तद्भेदान्नायकप्रकारान् । अतिगम्भीरो दुरवबोधाभिप्रायः । स्थेयान् कर्मणि स्थिरतरः ।

---

१. 'कृती कृतज्ञः' इत्यधिकं ग-पुस्तके. २. 'एवम्—' इति फक्किका ग-पुस्तके नास्ति. ३. महा सत्त्वपदव्याख्या ग-पुस्तके नास्ति.

अथ धीरललितः—

निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात् ।

कला नृत्यादिका । यथा—रत्नावल्यादौ वत्सराजादिः ।

अथ धीरप्रशान्तः—

सामान्यगुणैर्भूयान्द्विजादिको धीरशान्तः स्यात् ॥ ३४ ॥

यथा—मालतीमाधवादौ माधवादिः ।

एषां च शृङ्गारादिरूपत्वे भेदानाह—

एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोडशधा ।

तत्र तेषां धीरोदात्तादीनां प्रत्येकं दक्षिणधृष्टानुकूलशठत्वेन षोडशप्रकारो नायकः ।

एषु त्वनेकमहिलासमरागो दक्षिणः कथितः ॥ ३५ ॥

द्वयोस्त्रिचतुःप्रभृतिषु नायिकासु तुल्यानुरागो दक्षिणनायकः ।

यथा—

'स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसु-
र्द्यूतै रात्रिरियं जिता कमलया देवी प्रसाद्याद्य च ।
इत्यन्तःपुरसुन्दरीः प्रति मया विज्ञाय विज्ञापिते
देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिकाः ॥'

अहंकारः अहं महानिति ज्ञानविशेषः । दर्पः शौर्यवीर्याद्यतिशयः । मृदुरप्रचण्डचरितः । सामान्यगुणैर्नायकसामान्यगुणैः । धीरोदात्तादित्रितयभिन्नो नायको धीरप्रशान्त इत्यभिप्रायः । एषां धीरोदात्तादीनाम् । **षोडशेति** । शृङ्गारे षोडशप्रकारो नायको भवति रसान्तरे तु चतुष्प्रकार इत्यवधेयम् । स्नाता ऋतुस्नाता । वारः सुरतार्थं नियमितदिवसः । जिता जयेनात्मसुरतार्थं प्राप्ता । देवी कृताभिषेका राजपत्नी । देवेन राज्ञा । अप्रतिपत्त्या कर्तव्यानिश्चयेन मूढं व्याकुलम्

---

1. **एभिरिति** । दक्षिणधीरोदात्तः, दक्षिणधीरोद्धतः, दक्षिणधीरललितः, दक्षिणधीरप्रशान्तः, एवं धृष्टादिपदयोजनेन षोडशप्रकारका नायका इत्यवधेयम् ॥

2. **इतीति** । इति अन्तःपुरसुन्दरीः प्रति विज्ञाय यस्या यद् वक्तव्यं तदवगम्य मया विज्ञापिते विविच्य निवेदिते सति । एतदुक्तं भवति—ऋतुस्नातैव तावदनुपेक्षणीया किमुत कुन्तलमहाराजतनया, साधारणोऽपि समयो दुर्लङ्घ्यः किमुताङ्गनाथस्वसृसमीहितन्यायागतसमागमसमयः, सामान्येऽपि जये परतन्त्रता किमुत कमलाललामकमलाप्रयुक्ते । एवमुत्तरोत्तराधिककार्यसंपातेऽपि महाराज्ञाः प्रसादनं तावत्सर्वोपरीति रहस्यम् ॥

3. **नाडिका इति** । अत्यन्तसंयोगे द्वितीया ॥

---

१. ग-पुस्तके कलापदव्याख्या नास्ति. क-पुस्तके तु 'कळा रत्यादिका' इति पाठः. २. 'धीरप्रशान्तः' ब. ३. 'महिलासु' घ. ४. 'नायिकासु' इति कं-पुस्तके नास्ति. ५. 'नायकः' इति नास्ति ग-पुस्तके.

कृतागा अपि निःशङ्कस्तर्जितोऽपि न लज्जितः ।
दृष्टदोषोऽपि मिथ्यावाक्कथितो धृष्टनायकः ॥ ३६ ॥

यथा[1] मम—

'शोणं वीक्ष्य मुखं विचुम्बितुमहं यातः समीपं, ततः
पादेन प्रहृतं तया, सपदि तं धृत्वा सहासे मयि ।
किंचित्तत्र विधातुमक्षमतया बाष्पं सृजन्त्याः सखे
ध्यातश्चेतसि कौतुकं वितनुते कोपोऽपि वामभ्रुवः ॥'

अनुकूल एकनिरतः

एकस्यामेव[2] नायिकायामासक्तोऽनुकूलनायकः ।

यथा—

'अस्माकं सखि वाससी न रुचिरे ग्रैवेयकं नोज्ज्वलं
नो वक्त्रा गतिरुद्धतं न हसितं नैवास्ति कश्चिन्मदः ।
किंत्वन्येऽपि जना वदन्ति सुभगोऽप्यस्याः प्रियो[3] नान्यतो
दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम्[4] ॥'

शठोऽयमेकत्र बद्धभावो यः ।
दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति ॥ ३७ ॥

यः[5] पुनरेकस्यामेव नायिकायां बद्धभावो द्वयोरपि नायिकयोर्बहिर्[6]-र्दर्शितानुरागोऽन्यस्यां नायिकायां गूढं विप्रियमाचरति स शठः ।

अप्राप्तिनिश्चयशून्यं वा मनो यस्य तेन । कृतागाः कृतापराधः । मिथ्यावाक् मयैतन्न कृतमित्ययथार्थवचनः । तं पादम् । अत्र प्रथमपादेन कारिकायाः प्रथमपादोक्तं द्वितीयपादेन द्वितीयपादोक्तं लक्षणं वेदितव्यम्। **अस्माकमिति** । कस्याश्चिन्नायिकाया उक्तिरियम् । ग्रैवेयकं कण्ठभूषणम्। वक्त्रा चित्रा । उद्धतमुत्कटम्। सौभाग्ययौवनाद्यवलेपजो विकारो मदः । नायकवशीकरणकारणं मम किमपि नास्ति । किंतु तथापि । अन्ये परकीयाः । अपिना स्वकीयाः । सुभगोऽपि नायिकान्तरप्रियोऽपि । यद्वा मनोज्ञोऽपि । अन्यतो नायिकान्तरे । इयता मिथ्यावादेन दुःस्थितं दुष्टचित्तं प्रतिकूलं वा । बद्धभावो निभृतानुरागः । दर्शितो भूषणदानादिसाम्येन प्रकटितो बहिः सुरतातिरिक्तेऽनु-

---

१. ग-पुस्तके तु 'तस्याः सान्द्रविलेपनस्तनयुगप्रश्लेषमुद्राङ्कितं किं वक्षश्चरणाननिव्यतिकरव्याजेन गोपाय्यते । इत्युक्ते क तदित्युदीर्य सहसा तत्संभ्रमाद्गुं मया साश्लिष्टा रभसेन तत्सुखवशात्तन्व्या च तद्विस्मृतम् ॥' इति परकीयमुदाहरणं दृश्यते. २. 'एकस्यां–' इति फक्किका ग-पुस्तके नास्ति ३. 'पतिः' ग. ४. 'इत्यादि' इत्यधिकं क-पुस्तके. ५. 'यः' इत्यादिफक्किका ग पुस्तके नास्तिः ६. 'बहिः' क-पुस्तके नास्ति.

यथा—

'शठान्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा
यदाश्लिष्यन्नेव प्रशिथिलभुजग्रन्थिरभवः ।
तदेतत्काचक्षे घृतमधुमयत्वाद्बहुवचो
विषेणाधूर्णन्ती किमपि न सखी मे गणयति ॥'

एषां च त्रैविध्यादुत्तममध्याधमत्वेन ।
उक्ता नायकभेदाश्चत्वारिंशत्तथाष्टौ च ॥ ३८ ॥

एषामुक्तषोडशभेदानाम् ।

अथ प्रसङ्गादेतेषां सहायानाह—

दूरानुवर्तिनि स्वात्तस्य प्रासङ्गिकेतिवृत्ते तु ।
किंचित्तद्गुणहीनः सहाय एवास्य पीठमर्दाख्यः ॥ ३९ ॥

तस्य नायकस्य बहुव्यापिनि प्रसङ्गसंगते इतिवृत्तेऽनन्तरोक्तैर्नायकसामान्यगुणैः किंचिदूनः पीठमर्दनामा सहायो भवति । यथा—रामचन्द्रादीनां सुग्रीवादयः ।

रागो येन सः । **शठेति** । दृष्ट्वा वचनमिदम् । काचक्षे कुत्र कथयामि । न कुत्रापीत्यर्थः । **घृतमधुमयेति** । घृतमधुतुल्येत्यर्थः । घृतमधु यथा आपाततः स्वादु पश्चाद्विषम्, तथा तव वचनमप्यापाततो रमणीयं पश्चादनिष्टाचरणेनायथार्थत्वप्रतिभासाद्विषतुल्यमिति भावः । किमपि हितमहितं वा । गणयति निश्चिनोति । एषां नायकानाम् । दूरानुवर्तिनीत्यस्यार्थमाह—**बहुव्यापिनीति** । इतिवृत्ते कर्तव्यकर्मणि ।

---

1. **एषामिति** । अत्रेदमप्यवधेयम् । कामशास्त्रे दत्तादिजातिभेदेन चतुर्विधो नायकः । तथा चोक्तम्—'पुनश्चतुर्धा कथितः कामशास्त्रेषु जातितः । दत्तो भद्रः कूचिमारः पाञ्चाल इति सूरिभिः ॥ पद्मिनीवल्लभो दत्तो भद्रः स्याच्चित्रिणीप्रियः । पाञ्चालकूचिमारौ तु पद्मिनीशङ्खिनीप्रियौ ॥' इति ॥

2. **पीठेति** । कार्यविशेषेऽधिकृतत्वात्पीठं मृद्नातीति पीठमर्द इत्यन्वर्था संज्ञा ॥

---

१. 'मयत्वद्बहुवच' इति पाठ. २. 'सर्वेषामुत्तममध्यमाधमत्वेन' **क-ख.** 'सर्वेषामुत्तमाधममध्यमत्वेन' **घ. ग**-पुस्तके तु 'एषां तु नायकानामुत्तममध्यमाधमत्वेन । कथिता नायकभेदाश्चत्वारिंशत्तथा चाष्टौ ॥' इति पाठः. ३. 'रामस्य सुग्रीवः' **ग.**

[1]अथ [2]शृङ्गारसहायाः—

शृङ्गारेऽस्य सहाया विटचेटविदूषकाद्याः स्युः ।
भक्ता नर्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः ॥ ४० ॥

[3]आदिशब्दान्मालाकाररजकताम्बूलिकगान्धिकादयः ।

तत्र विटः—

संभोगहीनसंपद्विटस्तु धूर्तः कलैकदेशज्ञः ।
वेशोपचारकुशली वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम् ॥ ४१ ॥

चेटः प्रसिद्ध एव ।

कुसुमवसन्ताद्यभिधः कर्मवपुर्वेशभाषाद्यैः ।
हास्यकरः कलहरतिर्विदूषकः स्यात्स्वकर्मज्ञः ॥ ४२ ॥

[4]स्वकर्म भोजनादि ।

अर्थचिन्तने सहायमाह—

मन्त्री स्यादर्थानां चिन्तायां

अर्थास्तन्त्रावापादयः । यत्त्वत्र सहायकथनप्रस्तावे 'मन्त्री [5]स्वं चोभय

भक्ता नायकानुरक्ताः । नर्मसु परिहासेषु । शुद्धाः परदारगमनादिदोषरहिताः । संभोगहीना अपकृष्टा संपद् यस्य सः । नृत्यादिकलानामेकदेशं जानाति, नतु समुदायम् । वेशस्य उपचारे करणे कुशलः । विदूषकमाह—**कुसुमेति । वपुरिति ।** शरीरचेष्टाविशेष इत्यर्थः । **मन्त्रीति ।** अस्य इति सहायः इति चानुषज्यते । चिन्तायामुपायनिरूपणे । स्वमण्डले क्रियमाणं कर्म तन्त्रम् । परमण्डले क्रियमाणं कर्म आवापः । आदिना शत्रुनिग्रहादयः । **यत्त्विति ।** स्वं चेति चकारो वार्थः ।

---

1. **विट इति ।** वेश्यानागरिकयोः परस्परं संदेशं विटति कथयतीति विटः । 'विट शब्दे' इति यशोधरः ॥

2. **गोष्ठ्यामिति ।** वेश्याभवने सभायामन्यतमस्योदवसिते वा समानविद्याबुद्धिशीलवित्तवयसां सह वेश्याभिरनुरूपैरालापैरासनबन्धो गोष्ठीति वात्स्यायनः । अन्यतमस्य नागरस्योदवसिते गृहे वा । स्त्रीप्रतिबद्धकलाप्रतिपत्त्यर्थं वेश्यानां गोष्ठ्यामन्तर्भाव इति तद्व्याख्यातारः ॥

3. **तन्त्रेति ।** तन्त्रणं तन्त्रम् । स्वाधीनत्वात्स्वराष्ट्रे क्रियमाणं कर्मापि तन्त्रशब्देनो-

---

१. 'अथ–' इति फक्किका **ग**-पुस्तके नास्ति. २. 'शृङ्गारविषये' इति **ख**- ३. 'आदि–' इति फक्किका **ग**.पुस्तके नास्ति. ४. **ग** पुस्तकेषु तु 'स्वकर्म–' इत्यारभ्य '–अथ दण्डसहायः' इत्यन्तो ग्रन्थो न दृश्यते. ५. **क**-पुस्तके तथा मुद्रितपुस्तकेषु 'मन्त्री स्यादर्थानां चिन्तायां तद्वदवरोधे ।' इत्यार्धं स्वविवरणगतपदयोजनेन 'मन्त्री स्यादर्थचिन्तायामर्थास्तन्त्रावापादयः ।' इत्येवमनुष्टुप्रूपत्वं प्रापितम् 'तथा तद्वदवरोधे' इति खण्डं गद्ये योजितम्. ६. 'स्वस्योभयस्यापि' **क**.

चापि सखा तस्यार्थचिन्तने' इति केनचिल्लक्षणं कृतम्, तदपि राज्ञोऽर्थ-चिन्तनोपायलक्षणप्रकरणे लक्षयितव्यम् । न तु सहायकथनप्रकरणे, 'नायकस्यार्थचिन्तने मन्त्री सहायः' इत्युक्तेऽपि नायकस्यार्थत एव सिद्धत्वात् । यदप्युक्तम् 'मन्त्रिणा ललितः शेषा मन्त्रिण्वायत्तसिद्धयः' इति, तदपि स्वलक्षणकथनेनैव लक्षितस्य धीरललितस्य मन्त्रिमात्राय-त्तार्थचिन्तनोपपत्तेर्गतार्थम् । न चार्थचिन्तने तस्य मन्त्री सहायः । किं तु स्वयमेव संपादकः । तस्यार्थचिन्तनाद्यभावात् ।

अथान्तःपुरसहायाः—

तद्वदवरोधे ।

वामनशण्ढकिरातम्लेच्छाभीराः शकारकुब्जाद्याः ॥ ४३ ॥

मदमूर्खताभिमानी दुष्कुलतैश्वर्यसंयुक्तः ।

सोऽयमनूढाभ्राता राज्ञः श्यालः शकार इत्युक्तः ॥ ४४ ॥

आद्यशब्दान्मूकादयः । तत्र शण्ढवामनकिरातकुब्जादयो यथा

उभयं मन्त्रिस्वरूपद्वयम् । तस्य नायकस्य । सहायकथनपरत्वे दोषमाह— **नायकस्येति** । एवं च स्वं चेत्यादि निरर्थकम् । तदनुपादानेऽपि तल्लाभात् । स्वयं चिन्तापक्षे स्वस्य सहकारित्वरूपसहायत्वानुपपत्तेरुभयचिन्तायां कारणान्तरप्रस-ङ्गाच्चेति भावः । सखिशब्दस्योपायार्थत्वम् । न तु सहायपरत्वमित्यवगन्तव्यम् । **मन्त्रिणेति** । आयत्तसिद्धिरित्यन्वयः । ललितो धीरललितः । शेषा धीरोदात्तादयः । **स्वलक्षणेति** । **चिन्तन इति** । धीरललितलक्षणनिविष्टेन तस्यार्थचिन्तनाद्यभावः । तेन च मन्त्रिमात्रायत्तार्थसिद्धिकत्वं प्रतीयत इति भावः । तस्य धीरलली-तस्य । स्वयमेव निष्पादकः प्रधानकारणम् । **तद्वदिति** । अवरोधेऽन्तःपुरे । वामनादयो नायकस्य सहाया इत्यर्थः । शण्ढश्छिन्नोपस्थः क्लीबो वा । शका-रमाह—**मदेति** । मदमूर्खताभ्यामभिमानी अहं महानिति ज्ञानवान् । मदा-

---

च्यते । आ समन्ताद् वपन्ति इतिकर्तव्यताबीजमत्रेत्यावापः । 'ट्डुवप् बीजतन्तुसंताने' 'ह-लश्च' इति घञ् । 'परं प्रत्यावापः फलति कृतसेकस्तरुरिव' इति ॥

1. **केनचिदिति** । दशरूपके धनंजयेनेत्यर्थः ॥

2. **शण्ढेति** । शाम्यति पौरुषाभावादिति शण्ढः । 'शमु उपशमे' । शमेर्ढः । मूर्धन्या-दिस्तु षणुप्रकृतिकः । तत्र अमन्ताड्डुस्तस्य बाहुलकाद्धत्वं धातोः षस्य सत्त्वाभावश्च । शण्ढो वर्षवर इत्यनर्थान्तरम् 'ये त्वल्पसत्त्वाः प्रथमाः क्लीबाश्च स्त्रीस्वभाविनः । जात्या न दुष्टाः कार्येषु ते वै वर्षवराः स्मृताः ॥' इति ॥

रत्नावल्याम्—

'नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्तःकञ्चुकि कञ्चुकस्य विशति त्रासादयं वामनः ।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ॥'

शकारो मृच्छकटिकादिषु प्रसिद्धः । अन्येऽपि यथादर्शनं ज्ञातव्याः ।

अथ दण्डसहायाः—

दण्डे सुहृत्कुमाराटविकाः सामन्तसैनिकाद्याश्च ।

दुष्टनिग्रहो दण्डः । स्पष्टम् ।

ऋत्विक्पुरोधसः स्युर्ब्रह्मविदस्तापसास्तथा धर्मे ॥ ४५ ॥

ब्रह्मविदो वेदविदः, आत्मविदो वा ।

अत्र[1] च

उत्तमाः पीठमर्दाद्याः

आद्यशब्दान्मन्त्रिपुरोहितादयः ।

मध्यौ विटविदूषकौ ।
तथा शकारचेटाद्या अधमाः परिकीर्तिताः ॥ ४६ ॥

आद्यशब्दात्ताम्बूलिकगान्धिकादयः ।

अथ प्रसङ्गाद्दूतानां विभागगर्भलक्षणमाह—

निसृष्टार्थो मितार्थश्च तथा संदेशहारकः ।

दित्रयवान् वा । **नष्टमिति** । वानरवेषेणान्तःपुरप्रविष्टं विदूषकमालोक्य भयेनान्तःपुरस्थानां पलायनवर्णनमिदम् । नष्टमदर्शनतां प्राप्तम् । वर्षवरैः शण्डैः । 'सौविदल्लाः कञ्चुकिनः' इत्यमरः । किरं पर्यन्तदेशमततीति किरात इति नाम्नः स्ववाचकशब्दस्य सदृशं योग्यं पर्यन्तदेशं प्राप्त इत्यर्थः । मृच्छकटिका नाटिकाविशेषः । अन्ये म्लेच्छाभीरादयः । आटविका वनचारिणः । **ऋत्विगिति** । धर्मे धर्मकर्मणि

1. **मृच्छेति** । मृच्छकटिकं प्रकरणविशेष इत्युचितम् ॥

---

१. 'तत्र च' क, 'अत्र च—' इत्यादिः '—लक्षणमाह' इत्यन्तः पाठो ग-पुस्तके नास्ति.

कार्यप्रेष्यस्त्रिधा [1]दूतो [2]दूत्यश्चापि तथाविधाः ॥ ४७ ॥

तत्र कार्यप्रेष्यो दूत इति लक्षणम् ।

तत्र—

उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम् ।
सुश्लिष्टं कुरुते कार्यं निसृष्टार्थस्तु स स्मृतः ॥ ४८ ॥

उभयोरिति येन प्रेषितो यदन्तिके प्रेषितश्च ।

मितार्थभाषी कार्यस्य सिद्धकारी मितार्थकः ।
यावद्भाषितसंदेशहारः संदेशहारकः ॥ ४९ ॥

नायकस्य सहाया इत्यर्थः । आत्मविदो योगिनः । सुश्लिष्टं सुमङ्गलम् । मितार्थभाषी अल्पार्थकथकः । स्वामिना यावदुक्तं तावदेव संदेशः, तं हरति व्याहरतीति स तथा ।

---

1. **दूत इति** । पढुता धार्ष्टर्यमिङ्गिताकारज्ञता प्रतारणकालज्ञता विषह्यबुद्धित्वं लब्धी प्रतिपत्तिः सोपाया चेति दूतगुणाः । अन्यत्राप्युक्तम्—'आत्मवान्मित्रवान्युक्तो भावज्ञो देशकालवित् । असाध्यमप्ययत्नेन कार्यं संसाधयेन्नरः ॥' इति । आत्मन्याहितगुणत्वादात्मवान् । सहायविमर्शेन मित्रवान् । युक्त इति राजवृत्तानुष्ठानेन युक्तः स्वकर्मनिष्ठ इति तदर्थः ॥

2. **दूत्य इति** । अन्यत्र विशेषः—निसृष्टार्थो परिमितार्थो पत्रहारी स्वयंदूती मूढदूती भार्यादूती मूकदूती वातदूती चेति दूतीविशेषाः । तत्र नायकस्य नायिकायाश्च यथामनीषितमर्थमुपलभ्य स्वबुद्ध्या कार्यसंपादिनी निसृष्टार्था, इदं करणीयमित्येतावतोऽर्थस्य निसृष्टत्वान्निसृष्टार्थेति । कार्यैकदेशमभियोगैकदेशं चोपलभ्य शेषं संपादयतीति परिमितार्था, परिमितः परिच्छिन्नोऽर्थो यस्या इति । संदेशमात्रं प्रापयतीति पत्रहारी, संदेशमात्रमिति कार्यस्य स्थिरत्वात्तन्मात्रं पत्रेण वचसा वा प्रापयतीति पत्रहारीत्यर्थः । दौत्येन प्रहिता अन्यया स्वयमेव नायकमभिगच्छेत्, अजानती नाम तेन सहोपभोगं स्वप्ने कथयेत्, गोत्रस्खलितं भार्यां चास्य निन्देत्, तव्यपदेशेन स्वयमीर्ष्यां दर्शयेत्, नखदशनचिह्नितं वा किंचिद्दद्यात्, भवतेऽहमादौ दातुं संकल्पितेति चाभिदधीत, मम भार्यायां वा का रमणीयेति विविक्ते पर्यनुयुञ्जीत सा स्वयंदूती । नायकभार्यां मुग्धां विश्वास्यायत्नेनयानुप्रविश्य नायकस्य चेष्टितानि पृच्छेत्, योगाञ्शिक्षयेत्, साकारं मण्डयेत्, कोपमेनां ग्राहयेत्, एवं च प्रतिपद्यस्वेति श्रावयेत्, स्वयं चास्यां नखदशनपदानि निर्वर्तयेत्, तेन द्वारेण नायकमाकारयेत्सा मूढदूती । स्वभार्यां वा मूढां प्रयोज्य तया सह विश्वासेन योजयित्वा तयैवाकारयेत्, आत्मनश्च वैचक्षण्यं प्रकाशयेत्सा भार्यादूती । बालां वा परिचारिकामदोषज्ञामदुष्टेनोपायेन ग्रहिणुयात्, तत्र स्रजि कर्णपत्रे वा गूढलेखनिधानं नखदशनपदं वा सा मूकदूती । पूर्वप्रस्तुतार्थलिङ्गसंबद्धमन्यजनाग्रहणीयं लौकिकार्थं व्यर्थं वा वचनमुदासीना या श्रावयेत्सा वातदूती ॥

अथ सात्त्विकनायकगुणः—

शोभा विलासो माधुर्यं गाम्भीर्यं धैर्यतेजसी ।
ललितौदार्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥ ५० ॥

तत्र[2]—

शूरता दक्षता सत्यं महोत्साहोऽनुरागिता ।
नीचे घृणाधिके स्पर्धा यतः शोभेति तां विदुः ॥ ५१ ॥

तत्रानुरागिता यथा—

'[1]अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत् ।
उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित् ॥'

एवमन्यदपि ।

अथ विलासः—

धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः ।

यथा—

'[2]दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम् ।
कौमारकेऽपि गिरिवद्गुरुतां दधानो
वीरो रसः किमयमित्युत दर्प[3]एव ॥'

संक्षोभेष्वप्यनुद्वेगो माधुर्यं परिकीर्तितम् ॥ ५२ ॥

सात्त्विकाः सत्त्वगुणाज्जाताः । स्तम्भादीनां सात्त्विकत्वेऽपि ते नायकस्य नायिकायाश्च भवन्ति । एते पुनर्नायकस्यैवेति विशेषः । पौरुषा नायकसंबन्धिनः । महानुत्साह उद्यमः । नीचे क्षुद्रे । घृणा दया । महीपतेरजस्य । प्रकृतिषु मन्त्रिप्रभृतिषु । निम्नगाशतेषु नदीसमूहेषु । अस्य अजस्य । अन्यच्छूरतादि । तृणीकृतौ तुच्छीकृतौ जगत्त्रयस्य सत्त्वमुत्साहः सारो बलं च यया सा । धीरा मन्थरा । उद्धता उद्भटा च । एतेन गतेश्चित्रत्वं नैकरूपत्वं च । अत्र नायकस्य उत्साहदर्पयोरतिशयसूचनाय वीरर-

---

1. **अहमिति** । यथा नानादेशागतासूच्चावचासु सरित्सु सरित्पतेरेकाकारतया प्रेमभेदो न लक्ष्यते तथा महीपतेरजस्यापि प्रजासु क्वापि जने विमाननावतारो नालक्ष्यतेति भावः ॥

2. **दृष्टिरिति** । संग्रामाङ्गणमलंकुर्वन्तं कुशमवलोक्य रामचन्द्रस्योक्तिरियमुत्तररामचरिते ॥

---

१. 'धैर्यं गाम्भीर्यतेजसी' इति क-पुस्तके; 'स्थैर्य—' इति ख. लक्षणमपि पाठक्रमेणैव. २. 'तत्र—' इत्यादिः 'एषामुदाहरणान्यूह्यानि' इत्यन्तः पाठो ग-पुस्तके नास्ति. ३. 'एषः' घ.

ऊह्यमुदाहरणम् ।

भीशोकक्रोधहर्षाद्यैर्गाम्भीर्यं निर्विकारता ।

यथा—

'आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ॥'

व्यवसायादचलनं धैर्यं विघ्ने महत्यपि ॥ ५३ ॥

यथा—

'श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्[1]हरः प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां नहि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति ॥'

अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् ।
प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ॥ ५४ ॥

वाग्वेषयोर्मधुरता तद्वच्छृङ्गारचेष्टितं ललितम् ।
दानं सप्रियभाषणमौदार्यं शत्रुमित्रयोः समता ॥ ५५ ॥

एषामुदाहरणान्यूह्यानि ।

अथ नायिका त्रिभेदा[1] स्वान्या[2] साधारणी स्त्रीति[3] ।

सत्वेन दर्पत्वेन चोल्लेखः । **ऊह्यमुदाहरणमिति** । यथा मम रामविलासे—'तन्निपीय कटु कर्णपदव्या खेदमाप न मनागपि रामः । शूलपाणिरिव घोरमुदग्रं कालकूटपटलं किल पूर्वम् ॥' तस्य श्रीरामस्य । आकारो मुखनेत्रादि तस्य विभ्रमो वैपरीत्यं येन हर्षशोकादयो लक्ष्यन्ते । व्यवसायात् प्रारब्धकर्मणः । अचलनम् अप्रच्यवनम् । प्रसंख्यानपरो योगनिष्ठः । आत्मेश्वराणां मनोनिरोधक्षमाणाम् । अधिक्षेपो भर्त्सनम् । अपमानः पराभवः । आदिना अपकारादि । प्रयुक्तस्य कृतस्य । परेण शत्रुणा । उदाहरणं यथा रामविलासे—'विस्फारस्फुरदोष्ठपल्लवमतिस्खिन्नातिकान्तं कुधा किंचिल्लोहितलोचनाम्बुजयुगेनाकुञ्चितभ्रूलतम् । युक्तं तस्य दुरुक्तमुत्तरयितुं तेजोभराद्युद्यतं नेत्रान्तेन निवार्य लक्ष्मणममुं प्रोचे स्वयं राघवः ॥' विस्फारमत्यन्तं स्फुरदोष्ठं यस्य तम् । तस्य भार्गवस्य । अमुं भार्गवम् । तद्वन्मधुरतायुक्तम् । ललितौदार्ययोरुदाहरणे मम—'वीक्ष्य तस्य रुचिरं कलेवरं संनिशम्य मधुरं च भाषितम् । स्मारसारमुपलभ्य विभ्रमं दास्यमस्य कलयन्ति सुभ्रुवः ॥', 'दत्ते सहासवचनं सप्रियवचनं च भूपालः । रिपुरपि लभते मानं निरीतिभावं धरा तस्मात् ॥' स्वा स्वकीया । अन्या

---

1. **अस्मिन्निति** । अस्मिन्क्षणे वसन्ताविर्भावसमये ॥

---

१. 'अथ नायिकाभेदाः' क., '–त्रिविधा' घ. २. 'साधारणा स्त्री च' ग. ३. 'तस्य–' इत्यादिः 'लक्ष्यन्ते' इत्यन्तः पाठो हि 'मनोनिरोधक्षमाणाम्' इत्यस्मादग्रे दृश्यते कुत्रचित्.

नायकसामान्यगुणैर्भवति यथासंभवैर्युक्ता ॥ ५६ ॥

[1]नायिका पुनर्नायकसामान्यगुणैस्त्यागादिभिर्यथासंभवैर्युक्ता भवति। सा च स्वस्त्री अन्यस्त्री साधारणस्त्रीति त्रिविधा।

तत्र स्वस्त्री—

विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया।

यथा—

'लज्जापज्जत्तपसाहणाइँ परभत्तिणिप्पिवासाइं।
अविणअदुम्मेधाइँ धण्णाण घरे कलत्ताइं ॥'

सापि कथिता त्रिभेदा मुग्धा मध्या प्रगल्भेति ॥ ५७ ॥

तत्र—

[1]प्रथमावतीर्णयौवनमदनविकारा रतौ वामा।
कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ॥ ५८ ॥

तत्र प्रथमावतीर्णयौवना यथा मम तातपादानाम्—

'[2]मध्यस्य प्रथिमानमेति जघनं, वक्षोजयोर्मन्दता
दूरं यात्युदरं च, रोमलतिका नेत्रार्जवं धावति,।

अन्यदीया। साधारणी सर्वोपभोगयोग्या। 'स्त्री' इति सर्वत्रान्वेति। **यथासंभवैरिति**। तेन दक्षतोत्साहतेजांसि नायिकानां न वर्णनीयानि। अत एव दक्षतादयो नायकस्यैव सात्त्विका गुणा उक्ताः। **लज्जेति**। 'लज्जापर्याप्तप्रसाधनानि परभर्तृनिष्पिपासानि। अविनयदुर्मेधानि धन्यानां गृहे कलत्राणि ॥' [इति संस्कृतम्।] लज्जायै पर्याप्तानि समर्थानि प्रसाधनानि भूषणानि येषां तानि। अविनयदुर्मेधानि अविनयानभिज्ञानि। सापि स्वकीयापि। अवतीर्णमुत्पन्नम्। **मध्यस्येति**। प्रथिमानं स्थूल-

---

1. **प्रथमेति**। प्रथमावतीर्णौ अभिनवोन्मेषौ यौवनमदनविकारौ तारुण्यानङ्गविभ्रमौ यस्याः सा। 'सकम्पा चुम्बने वक्त्रं हरत्येषोपगूहिता। परावृत्य चिरं तल्प आस्ते रन्तुं च वाञ्छति ॥' इत्यादिदिशा रतौ वामत्वमवधेयम्। 'अन्यां निषेवमाणेऽपि यदि कुप्यति सा प्रिये। रोदित्यस्याग्रतः स्वल्पमनुनीता च तुष्यति ॥' इत्युक्तदिशा माने मार्दवमवसेयम् ॥

2. **मध्यस्येति**। मध्यभागे या विशालतासीत्सा जघनेन लुण्ठिता तेन तद्विशालं जातम्, एवं जघने यत्काश्यं तन्मध्यभागेन लुण्ठितं तेन स कृशो जातः। एवमुदरस्थौल्यं निर्लुण्ठितं सत् कुचयोर्जातम्, कुचयोश्च काश्यमुदरे। रोमलताकौटिल्यं नेत्रयोः संगतम्, नेत्रयोः सारल्यं रोमलतायामिति तात्पर्यम् ॥

---

१. 'नायिका पुनः' इति ख-पुस्तके नास्ति; 'नायिका—' इत्यादि '—कलत्ताई' इत्यन्तं ग-पुस्तके नास्ति. २. 'त्रिभेदा' क-ख. ३. 'त्रिविधा' घ.

कंदर्पं परिवीक्ष्य नूतनमनोराज्याभिषिक्तं क्षणा-
दङ्गानीव परस्परं विदधते निर्लुण्ठनं सुभ्रुवः ॥'

[1]प्रथमावतीर्णमदनविकारा यथा मम प्रभावतीपरिणये—

'दत्ते सालसमन्थरं भुवि पदं, निर्याति नान्तःपुरात्,
नोद्दामं हसति, क्षणात्कलयते ह्रीयन्त्रणां कामपि, ।
किंचिद्भावगभीरवक्रिमलवस्पृष्टं मनाग्भाषते,
सभ्रूभङ्गमुदीक्षते प्रियकथामुल्लापयन्तीं सखीम् ॥'

रतौ वामा यथा—

'दृष्ट्वा दृष्टिमधो ददाति, कुरुते नालापमाभाषिता,
शय्यायां परिवृत्य तिष्ठति, बलादालिङ्गिता वेपते, ।
निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते,
जाता [1]वामतयैव संप्रति मम प्रीत्यै नवोढा प्रिया ॥'

माने मृदुर्यथा—

'सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति [2]सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।

त्वम् । मन्दता कृशत्वम् । धावति प्राप्नोति । नूतनं यथा स्यात्तथा मनोराज्येऽभिषिक्तम् । राज्ञः प्रथमाभिषेकसमये प्रजा हर्षेण परस्परं द्रव्यं लुण्ठन्तीति व्यवहारः । **दत्त इति** । सालसं मन्थरं च यथा स्यात्तथा दत्ते । क्षणात् प्रतिक्षणं कलयते धत्ते । ह्रिया यन्त्रणां व्याकुलभावम् । कामप्यनिर्वचनीयाम् । भावेन निगूढाभिप्रायेण किंचिद्गभीरं दुरवबोधं वक्रिम्णा लवं स्पृष्टं च यथा स्यात्तथा भाषते । उल्लापयन्तीं सादरं कथयन्तीम् । ईहते चेष्टते । **सा पत्युरिति** । अपराधोऽन्य-

---

1. **वामतयेति** । इति प्रतिकूलाचरणतयैव संप्रति नवसंगमे नवोढा नवपरिणीता प्रिया मम प्रीत्यै जाता । अत्रेदमाकूतम्—अभिनवसमागमे वध्वाः प्रतिकूलवर्तित्वमेव नितरां भूषणम् । अन्यथा गौरवराहित्येन दौःशील्यं स्यात् ॥

2. **सविभ्रमेति** । सविभ्रमं यथा स्यात्तथा अङ्गस्य भ्रुकुट्यादेः वलना स्वाभिप्रायाविष्करणाय चालनं वक्रीकरणम्, याश्च वक्रोक्तयः, ताभिः संसूचनमिति समस्ते स्वारस्यम् । स्वच्छैरतिनिर्मलैः । अच्छयोर्निर्मलयोः कपोलयोर्मूलेन गलितैः । अञ्जनपत्ररचनाव्यपगमादश्रुकपोलयोः स्वच्छता, तेन रोदनाधिक्यम् । उत्तानशयनान्मूलेन गलनम् । 'अश्रुभिः' इतीत्थंभूतलक्षणे तृतीया । अश्रुशाप्यं विशिष्टं वा केवलं रोदनमेव करोतीत्यर्थः ।

---

१. 'प्रथम–' इत्यादिः '–पुनः कथनम्' इत्यन्तः पाठो ग-पुस्तके नास्ति.

स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ॥'

समधिकलज्जावती यथा—

'दत्ते सालसमन्थरं—'इत्यत्र श्लोके ।

अत्र समधिकलज्जावतीत्वेनापि लब्धाया रतिवामताया विच्छित्तिविशेषवत्तया पुनः कथनम् ।

अथ मध्या—

मध्या विचित्रसुरता प्ररूढस्मरयौवना ।
ईषत्प्रगल्भवचना मध्यमव्रीडिता मता ॥ ५९ ॥

विचित्रसुरता यथा—

'कान्ते तथा कथमपि प्रथितं मृगाक्ष्या
चातुर्यमुद्धतमनोभवया रतेषु ।

नायिकासंगमः । प्राथमिकतज्ज्ञानसमये सख्या सख्येन वा य उपदेशस्तम् । विभ्रमः स्मरविकारः, अङ्गस्य वलनं संवरणम्, ताभ्यां सहिता । यदि विभ्रमो न स्यात्तदा पत्युरपराधे ईर्ष्यापि न स्यादिति भावः । वक्रोक्तायाः अपराधव्यञ्जिकायाः उक्तेः संसूचनं कथनम् । पर्यस्ते चपले, व्याकुले वा नेत्रोत्पले यस्याः सा । रोदित्येव । न तु भ्रुकुटिबन्धादिकं करोति । लुठन्तो लोलाश्चला अलका यत्र तैः । ननु समधिकलज्जावती तावद्रतौ प्रतिकूला भवतीति 'रतौ वामा' इत्यनेनैव तस्या ग्रहणे सिद्धे 'समधिकलज्जावती' इति पृथगुपादानं किमर्थमित्याह—**अत्रेति** । विच्छित्तिविशेषवत्तया वैचित्र्यविशेषसंपादकत्वेन । प्ररूढे अत्यर्थमुत्पन्ने स्मरयौवने यस्याः सा । मध्यमं व्रीडितं

---

1. **कान्त इति** । हे कान्ते, उद्धत उत्कटो मनोभवो यस्यास्तया मृगाक्ष्या रतेषु सुरतव्यतिकरेषु । चित्तपरिस्पन्देन रमणाद्रतम् । कपोतानां चिराभ्ययनलाभाय रतेष्विति बहुवचनम् । अन्यथा तादृशं शिष्यता भज्येत । कथमपि महता व्यवसायेन तथा चातुर्यं सुरतसंगरवैदग्ध्यं प्रथितं यथास्याः तानि विविधभङ्गिवैलक्षण्येन प्रथितानि । एतेन ग्राह्यत्वं सूच्यते । कूजितानि मणितविशेषान् अनेकवारमसकृत् अनुवदद्भिः कूजनाव्यवहितोत्तरकालं गृणद्भिः गृहकपोतशतैः शिष्यायितम् । अन्तेवासिवदाचरितमित्यर्थः ॥

2. **सख्येनेति** । सख्येन सौहृदेनेत्येव पक्षो ज्यायान् ॥

---

१. ग-पुस्तके तु 'मध्या यथा—मध्यातयौवनानङ्गा मोहान्तः सुरतक्षमा ।' इत्येव लक्षणं दृश्यते. २. 'यथा' क, 'तथा' ख. ३. 'विचित्र–' इत्यादेः '–अन्यत्रापि' इत्यन्तस्य ग्रन्थस्य स्थाने 'तत्र यौवनस्थती मध्या यथा—'आलापान्भ्रूविलासो विरलयति रसद्राक्षुविक्षेपपातं नीवीग्रन्थि प्रथिम्ना प्रतनयति दृश्यनिम्नो नितम्बः । उत्पुष्यत्पार्श्वमूर्ध्वत्कुचशिखरसुरो नूनमन्तःसरेण स्पृष्टा कोदण्डकोट्या हरिदृश्यते यौवनश्रीः ॥' एवं मध्याभावादिकमूह्यम् ।' इति पाठो ग-पुस्तके.

तत्कूजितान्यनुवदद्भिरनेकवारं
शिष्यायितं गृहकपोतशतैर्यथास्याः ॥'

प्ररूढस्मरा यथात्रैवोदाहरणे ।

प्ररूढयौवना यथा मम—

'नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि पाणिद्वयं
वक्षोजौ करिकुम्भविभ्रमकरीमत्युन्नतिं गच्छतः ।
कान्तिः काञ्चनचम्पकप्रतिनिधिर्वाणी सुधास्पन्दिनी
स्मेरेन्दीवरदामसोदरवपुस्तस्याः कटाक्षच्छटा ॥'

एवमन्यत्रापि ।

अथ प्रगल्भा—

स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीडा प्रगल्भाक्रान्तनायका ॥ ६० ॥

स्मरान्धा यथा—

'[1]धन्यासि या कथयसि प्रियसंगमेऽपि
विश्रब्धचाटुकशतानि रतान्तरेषु ।

लज्जा यस्याः सा । त(अ)स्याः कूजितानि अव्यक्तशब्दविशेषान् । शिष्यायितं शिष्यवदाचरितम् । **नेत्रे इति** । खञ्जनानां गञ्जने पराभवकारिणी । प्रत्यर्थि वैरि ताभ्यां सादृश्यलाभः । करिकुम्भयोर्विशिष्टभ्रमं करोति या ताम् । स्मेरस्य प्रफुल्लस्य इन्दीवरदाम्नः सोदरं सदृशं वपुः स्वरूपं यस्याः सा । छटा धारा । **एवमिति** । एवं लक्षणानुसारेण अन्यत्र किंचित्प्रगल्भवचनामध्यमत्रीडितयोरुदाहरणमूह्यम् । यथा—'सुभग कुरबकस्त्वं किं ममालिङ्गनोत्कः किमु मुखमदिरेच्छुः केसरो नो हृदिस्थः । त्वयि नियतमशोके युज्यते पादघातः प्रियमिति परिहासात्पेशलं काचिदूचे ॥, किंचिदाकुञ्चयत्यास्यं मन्दहासातिसुन्दरम् । दरमुद्रितनेत्रान्ता चुम्बतीशे नितम्बिनी॥' भावैरनुभावैरुन्नता प्राप्ताधिकरूपा । **धन्यासीति** । सखीनां मध्ये सुरतसमये बा-

---

1. **धन्येति** । हे सखि, या त्वं प्रियसंगमे रतान्तरेष्वपि रतिमध्येष्वपि विश्रब्धानां विश्वस्तानां चाटुकानां प्रियवाक्यानां शतानि कथयसि सा त्वं धन्यासि । इति योजना । प्रथमतः प्रियसंगमे एव विलक्षणानन्दमन्थरतया तत्कथनमशक्यम् । तत्रापि रते । तत्रापि नादौ नान्ते, किं तु मध्ये । तस्य च पुनरिदानीं स्मरणमित्याश्चर्यभूतं तव सावधानत्वमिति भावः । भोः सख्यः, प्रियेण नीवीं नाभितलवसनग्रन्थिं प्रति करे प्रणिहिते प्रणिधानविषयीकृते, नीव्यां करोऽर्पितव्य इति संकल्पविषयीकृते । न त्वर्पिते इत्यर्थः । आदिकर्मणि क्तः ।

---

१. 'सुधास्पर्धिनी' क.

नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः शपामि यदि किंचिदपि स्मरामि ॥'

[1]गाढतारुण्या यथा—

'अत्युन्नतस्तनमुरो नयने सुदीर्घे
वक्रे भ्रुवावतितरां वचनं ततोऽपि ।
मध्योऽधिकं तनुरनूनगुरुर्नितम्बो
मन्दा गतिः किमपि चाद्भुतयौवनायाः ॥'

[2]समस्तरतकोविदा यथा—

'क्वचित्ताम्बूलाक्तः क्वचिदगरुपङ्काङ्कमलिनः
क्वचिच्चूर्णोद्गारी क्वचिदपि च सालक्तकपदः ।
वलीभङ्गाभोगैरलकपतितैः शीर्णकुसुमैः
स्त्रियाः सर्वावस्थं कथयति रतं प्रच्छदपटः ॥'

ह्यकथालापिनीं कांचिदुपहसन्त्याः कस्याश्चिदुक्तिरियम् । प्रियस्य संगमेऽपि स्पर्शमात्रेऽपि या त्वं विश्रब्धेन विश्वासेन चाटुकशतानि प्रियोक्तिशतानि कथयसि सा त्वं धन्या । किमुत रतान्तरेषु । शपामि शपथं करोमि । अत्र परस्मैपदमशिष्टम् । ततोऽपि भ्रूभ्यामपि । अतितरामत्यर्थं । वक्रमित्यर्थः । अनूनगुरुः अतिस्थूलः । किमप्यत्यर्थम् । अद्भुतयौवनायाः उद्दामयौवनायाः । **क्वचिदिति** । ताम्बूलाक्तः ताम्बूलजन्यरागोक्षितः । अगरु कालागरु । अङ्कं चिह्नम् । चूर्णानि गन्धद्रव्यविशेषानुद्गिरति निष्ठीवतीति सः । पदं चिह्नम् । वलीभिस्त्रिवलीभिः कृता ये भङ्गा निम्नत्वानि तेषामाभोगैः परिपूर्णताभिः । अलकेभ्यः केशेभ्यः पतितैः स्खलितैः शीर्णकुसुमैः उपमर्दितपुष्पैश्चोपलक्षितः । सर्वावस्थं सर्वप्रकारम् । कथयति सूचयति । प्रच्छदपटः

अवाचकत्वापत्तेः अभिप्रायस्य लाघवापत्तेश्च । यदि किंचिदपि स्मरामि तदा शपामि । शपथं करोमीति योजना । भवतीनां शपथोऽहं तु न किंचिदपि स्मरामि । किं पुनस्तादृशवाक्यमित्यपिशब्दार्थः । यद्यपि 'शप उपालम्भने' इति वार्तिकेनात्मनेपदं प्राप्नोति तथापि शपथकरणप्रकाशनाविवक्षया न तत्प्रवृत्तिरिति शब्देन्दुशेखरे स्पष्टम् ॥ अस्यैव श्लोकस्य च्छायाभूतः 'धन्यास्ताः सखि योषितः प्रियतमे सर्वाङ्गलग्नेऽपि याः प्रागल्भ्यं प्रथयन्ति मोहनविधावालम्ब्य धैर्यं महत् । अस्माकं तु तदीयपाणिकमलेऽप्युन्मोचयत्यंशुकं कोऽयं का वयमत्र किं नु सुरतं नैव स्मृतिर्जायते ॥' इति रुद्रकविश्लोकः ॥

---

१. ग-पुस्तके तु गाढतारुण्याया उदाहरणं नास्ति. २. 'समस्त—' इत्यादिः '—भेदान्तराण्याह' इत्यन्तः पाठो ग-पुस्तके नास्ति.

भावोन्नता यथा—

'मधुरवचनैः सभ्रूभङ्गैः कृताङ्गुलितर्जनै
रभसरचितैरङ्गन्यासैर्महोत्सववन्धुभिः ।
असकृदसकृत्स्फारस्फारैरपाङ्गविलोकितै-
स्त्रिभुवनजये सा पञ्चेषोः करोति सहायताम् ॥'

स्वल्पव्रीडा यथा—

'धन्यासि या कथयसि–'इत्यत्रैव ।

आक्रान्तनायका यथा—

'स्वामिन्भङ्गुरयालकं, सतिलकं भालं विलासिन्कुरु,
प्राणेश त्रुटितं पयोधरतटे हारं पुनर्योजय, ।
इत्युक्त्वा सुरतावसानसमये संपूर्णचन्द्रानना
स्पृष्टा तेन तथैव जातपुलका प्राप्ता पुनर्मोहनम् ॥'

मध्याप्रगल्भयोर्भेदान्तराण्याह—

ते धीरा चाप्यधीरा च धीराधीरेति षड्विधे ।

ते मध्याप्रगल्भे ।

तत्र—

प्रियं सोत्प्रासवक्रोक्त्या मध्या धीरा दहेद्रुषा[1] ॥ ६१ ॥
धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः ।

तत्र मध्या धीरा यथा—

'[2]तदवितथमवादीर्यन्मम त्वं प्रियेति
प्रियजनपरिभुक्तं यद्दुकूलं दधानः ।
मदधिवसतिमागाः कामिनां मण्डनश्री-
र्व्रजति हि सफलत्वं वल्लभालोकनेन ॥'

शय्यावरणवस्त्रम् । **मधुरेति** । कृतानि अङ्गुलितर्जनानि यत्र सः । रभसरचितैः हर्षकृतैः । महोत्सवस्त्र बन्धुभिः जनकैः । स्फारस्फारैः अतिदीर्घैः । **स्वामिन्निति** । भङ्गुरय भङ्गीयुक्तं कुरु । त्रुटितं छिन्नम् । तेन स्वामिना । मोहनं सुरतसुखादिज्ञानम् । 'मध्या' इति स्थानत्रयेऽन्वेति । सोत्प्रासवक्रोक्त्या सपरिहासश्लिष्टवचनेन । दहेत् संतापयेत् । रुषेति कर्तृविशेषणम् । **तदिति** । अवितथं सत्यम् । मण्डनेन भूषणेन

---

१. 'वदेत्' क. घ. २. इदमुदाहरणं ग-पुस्तके नास्ति.

मध्यैव धीराधीरा यथा—

'बाले, नाथ, विमुञ्च मानिनि रुषं, रोषान्मया किं कृतं,
खेदोऽस्मासु, न मेऽपराध्यति भवान् सर्वेऽपराधा मयि, ।
तत्किं रोदिषि गद्गदेन वचसा, कस्याग्रतो रुद्यते,
नन्वेतन्मम, का तवास्मि, दयिता, नास्मीत्यतो रुद्यते ॥'

इयमेवाधीरा यथा—

'सार्धं मनोरथशतैस्तव धूर्त कान्ता
सैव स्थिता मनसि कृत्रिमहावरम्या ।
अस्माकमस्ति नहि कश्चिदिहावकाश-
स्तस्मात्कृतं चरणपातविडम्बनाभिः ॥'

प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा ॥ ६२ ॥
उदास्ते सुरते तत्र दर्शयन्त्यादरान्बहिः ।

तत्र प्रिये ।

यथा—

'एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरत-
स्ताम्बूलानयनच्छलेन रभसाश्लेषोऽपि संविन्नितः ।

कृता श्रीः शोभा । वल्लभा प्रिया तत्कर्तृकालोकनेन । अत्र च [अ]वितथमिति मिथ्या यद् यस्मात् मम तापाय प्रतिनायिकापरिहितवस्त्रं परिधाय मम गेहमागाः । यद्यहं ते प्रिया स्यां तदा मत्तापजनकं कर्म न कुर्याः । एतत्तावत्सतां मण्डनं न भवति । यदि तवैतन्मण्डनं तदा तज्जन्यशोभां या प्रिया भवति तामेवावलोकय । ममालोकनया किं प्रयोजनमिति श्लेष एवात्र वक्रोक्तिः । **बाले इति** । नायकस्य नायिकायाश्चोक्तिप्रत्युक्तिरूपः श्लोकोऽयम् । खेदोऽस्मासु कृत इत्यन्वयः । भवतस्तावदपराधो नास्ति । मम रुषा कथं खेद इत्यभिप्रायेणाह—**का तवेति** । दयिता भार्या । **नास्मीति** । अहं न दयिता । प्रेमपात्रमित्यर्थः । इयमेव मध्यैव । **सार्धमिति** । कृत्रिमेण स्वाभाविकेतरेण हावेन भावविशेषेण तव मनोरमा इह तव मनसि । कृतं वैयर्थ्यम् । चरणपातेन विडम्बनाभिर्विद्रावैः । **प्रगल्भेति** । छन्ना संवृता कोपाकृतिः कोपसूचको मुखरागादिर्यया । उदास्ते उदासीना अनुरागहीना भवति । बहिर्बाह्यान् । न त्वान्तरान् । तत्रेति विवृणोति—**प्रिये इति** । **एकत्रेति** । एकस्मिन्नासने आसनसंस्थितिः । उपवेशनसंबन्धः । रभसाश्लेषो हर्षालिङ्गनम् । संविन्नितः

---

१. 'एवं मध्यधीरादिष्वयूह्यम्' ग. २. 'सार्धं—' इति श्लोको ग-पुस्तके नास्ति. ३. 'तत्रेति नायके' ग.

आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥'
धीराधीरा तु सोल्लुण्ठभाषितैः खेदयत्यमुम् ॥ ६३ ॥

अमुं नायकम्[1] ।

यथा[2] मम—

'अनलंकृतोऽपि सुन्दर हरसि मनो मे यतः प्रसभम् ।
किं पुनरलंकृतस्त्वं संप्रति नखरक्षतैस्तस्याः ॥'

तर्जयेत्ताडयेदन्या

अन्या अधीरा । यथा[3]—'शोणं वीक्ष्य मुखं—' इत्यत्र । अत्र च सर्वत्र 'रुषा' इत्यनुवर्तते ।

प्रत्येकं ता अपि द्विधा ।
कनिष्ठज्येष्ठरूपत्वान्नायकप्रणयं प्रति ॥ ६४ ॥

ता[4] अनन्तरोक्ताः षड्भेदा नायिकाः[5] ।

यथा—

'दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रितकंधरः सपुलकः प्रेमोल्लसन्मानसा-
न्मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥'[1]

सम्यक्प्रतिरुद्धः । न मिश्रितः नोत्तरेण युक्तः कृतः । व्यापारयन्त्या नायकपरिचर्यार्थं सव्यापारीकुर्वत्या । **अन्तिके इति** । विजनत्वाभावोपपत्तये उपचारतः प्रीतिहेतु-व्यापारान् विधाय । **कोप इति** । संभोगप्रतिरोधः क्रोधस्य फलम् । तेनैव कान्तो वशीकृत इति भावः । प्रियवद्भासमानमप्रियं सोल्लुण्ठनम् । **अनलंकृत इति** । किं पुनरिति । किमुतेत्यर्थः । तस्याः प्रतिनायिकायाः । शोणमित्यादि धृष्टनायकोदाह-रणे उक्तम् । सर्वत्र लक्षणपद्यके । **दृष्ट्वेति** । प्रियतमे भार्ये । एकस्याः स्वल्पप्रणय-नायिकायाः । क्रीडायामनुबन्ध आरम्भः । अपरामतिप्रणयिनीम् । **तस्मादिति** ।

---

1. **अन्तरिति** । अन्तर्यो हासस्तेन लसन्तौ नायिकाप्रतारणदृष्टनायकवैदग्ध्यजन्यबह-लानन्दोदयेन देदीप्यमानौ कपोलौ फलकाविव यस्यास्ताम् ॥

---

१. 'सोल्लुण्ठवचनैः' इत्यधिकं **ग**-पुस्तके. २. 'यथा–'इत्यादि '–तस्याः' इत्यन्तं **ग**-पुस्तके नास्ति. ३. 'अनयोरुदाहरणम्' **ग**. ४. 'अनन्तरोक्ताः' **ग** पुस्तके नास्ति. ५. 'नायिकाः' **ग**-पु-स्तके नास्ति.

मध्याप्रगल्भयोर्भेदास्तद्वद्वादश कीर्तिताः ।
[1]मुग्धा त्वेकैव तेन स्युः स्वीयाभेदास्त्रयोदश ॥ ६५ ॥
परकीया द्विधा प्रोक्ता परोढा कन्यका तथा ।

[1]तत्र

[2][3]यात्रादिनिरतान्योढा कुलटा गलितत्रपा ॥ ६६ ॥

[3]यथा—

'स्वामी निःश्वसितेऽप्यसूयति, मनोजिघ्रः सपत्नीजनः,
श्वश्रूरिङ्गितदैवतं, नयनयोरीहालिहो यातरः ।
तद्दूरादयमञ्जलिः, किमधुना दृग्भङ्गिभावेन ते,
वैदग्धीमधुरप्रबन्धरसिक, व्यर्थोऽयमत्र श्रमः ॥'

अत्र हि मम परिणेतान्नाच्छादनादिदातृतया स्वाम्येव । न तु वल्लभः । त्वं तु वैदग्धीमधुरप्रबन्धरसिकतया मम वल्लभोऽसीत्यादिव्यङ्ग्यार्थवशादस्याः परनायकविषया रतिः प्रतीयते ।

उपदर्शितलक्षणभेदादित्यर्थः । **यात्रादीति** । उत्सवादीत्यर्थः । कुलटा परभर्तृगामिनी । **स्वामीति** । निःश्वसिते सतीत्यर्थः । निःश्वसितेन प्रच्छन्नकामुकाप्राप्तिदुःखमनुमाय मय्यमीर्ष्यतीति भावः । मनसो घ्राणजप्रत्यक्षासंभवेन अभिप्रायवेदने लक्षणा, तस्य याथार्थ्यं प्रयोजनम् । एवमग्रयोरपि । इङ्गितमभिप्रायसूचकश्चेष्टाविशेषः, तद्दैवतं तदभिज्ञा । ईहालिहश्चेष्टाविशेषसूचनीयार्थाभिज्ञाः । यातरः पतिभ्रातुः पत्न्यः । वैदग्ध्या मधुरो मनोहरः प्रबन्धः सुरतप्रयोगस्तस्य रसयुक्तः । यद्वा, वैदग्ध्या मधुरः प्रबन्धो यस्य तत्संबोधने तथा । अत्र स्वाम्याद्याकीर्णे देशे । श्रमो मत्प्राप्तिसाधनव्यापारः । ननु स्वप्राप्तिसाधनव्यापारव्यर्थत्वकथनेनास्याः परनायकरत्वभावः प्रतीयते तेन च कुलटात्वाभाव इति कथमस्याः परनायिकात्वमत आह— **अत्र हीति** । परिणेता विवाहकर्ता । एतदुपलक्षणम् । 'अधुना'-'अत्र'पदाभ्यामपि कालान्तरे देशान्तरे च श्रमसार्थकत्वव्यञ्जनेनापि रतिः प्रतीयत इति । अजातो-

---

1. **मुग्धेति** । रुद्रोऽप्याह—'एकाकारा मता मुग्धा पुनर्भूश्च यतोऽनयोः । अतिसूक्ष्मतया भेदः कविभिर्न प्रदर्शितः ॥' इति ॥

2. **यात्रादीति** । आदिशब्देन द्वारदेशावस्थान-गोष्ठीयोजन-राजमार्गावलोकन-तरुणप्रातिवेश्यसदनगमनादयो ज्ञेयाः ॥

---

१. कन्यका अनूढा । 'अस्याश्च पित्राद्यायत्तत्वात्परकीयात्वम् ।' इति ग. २. 'यात्रा–' इति कारिकार्धं नास्ति ग-पुस्तके. ३. 'तत्र परोढा यथा' इति ग. ४. ग-पुस्तके तु 'द्वितीया यथा सागरिकादिः' इत्येव पाठः न तु 'अत्र–' इत्यादिः 'प्रतीयते' इत्यन्तः.

[1]कन्या त्वजातोपयमा सलज्जा नवयौवना ।

[2]अस्याश्च पित्राद्यायत्तत्वात्परकीयात्वम् । [3]यथा मालतीमाधवादौ मालत्यादिः ।

धीरा [1]कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका ॥ ६७ ॥
निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि ।
वित्तमात्रं समालोक्य सा रागं दर्शयेद्बहिः ॥ ६८ ॥

पयमा अजातविवाहा । उदाहरणान्तरं तु नैषधीयचरिते यथा—'अनैषधायैव जुहोति तातः किं मां कृशानौ न शरीरशेषाम् । ईष्टे तनूजन्मतनोः स नूनं मत्प्राणनाथस्तु नलस्तथापि ॥' अत्र विवाहात्पूर्वं दमयन्त्या नलानुरागः । साधारणस्त्रियमाह—**धीरेति** । सुरतपण्डितेत्यर्थः । कला नृत्यगीतादयः, तत्र प्रगल्भा अति-

---

1. **कलेति** । कलाश्चतुःषष्टिः । ता एताः—(१) गीतम्, (२) वाद्यम्, (३) नृत्यम्, (४) आलेख्यम्, (५) विशेषकच्छेद्यम्, (६) तण्डुलकुसुमबलिविकाराः, (७) पुष्पास्तरणम्, (८) दशनवसनाङ्गरागः, (९) मणिभूमिकाकर्म, (१०) शयनरचनम्, (११) उदकवाद्यम्, (१२) उदकाघातः, (१३) चित्राश्च योगाः, (१४) माल्यग्रथनविकल्पाः, (१५) शेखरकापीडयोजनम्, (१६) नेपथ्यप्रयोगाः, (१७) कर्णपत्रभङ्गाः, (१८) गन्धयुक्तिः, (१९) भूषणयोजनम्, (२०) ऐन्द्रजालाः, कौचुमाराश्च योगाः, (२१) हस्तलाघवम्, (२२) विचित्रशाकयूषभक्ष्यविकारक्रिया, (२३) पानकरसरागासवयोजनम्, (२४) सूचीवानकर्माणि, (२५) सूत्रक्रीडा, (२६) वीणाडमरुकवाद्यानि, (२७) प्रहेलिका, (२८) प्रतिमाला, (२९) दुर्वाचकयोगाः, (३०) पुस्तकवाचनम्, (३१) नाटकाख्यायिकादर्शनम्, (३२) काव्यसमस्यापूरणम्, (३३) पट्टिकावेत्रवानविकल्पाः, (३४) तक्षकर्माणि, (३५) तक्षणम्, (३६) वास्तुविद्या, (३७) रूप्यरत्नपरीक्षा, (३८) धातुवादः, (३९) मणिरागाकरज्ञानम्, (४०) वृक्षायुर्वेदयोगाः, (४१) मेषकुक्कुटलावकयुद्धविधिः, (४२) शुकसारिकाप्रलापनम्, (४३) उत्सादने संवाहने केशमर्दने च कौशलम्, (४४) अक्षरमुष्टिकाकथनम्, (४५) म्लेच्छितविकल्पाः, (४६) देशभाषाविज्ञानम्, (४७) पुष्पशकटिका, (४८) निमित्तज्ञानम्, (४९) यन्त्रमातृका, (५०) धारणमातृका, (५१) संपाठ्यम्, (५२) मानसी, (५३) काव्यक्रिया, (५४) अभिधानकोषः, (५५) छन्दोज्ञानम्, (५६) क्रियाकल्पः, (५७) छलितकयोगाः, (५८) वस्त्रगोपनानि, (५९) द्यूतविशेषाः, (६०) आकर्षक्रीडा, (६१) बालक्रीडनकानि, (६२) वैनयिकीनां (६३) वैजयिकीनां (६४) व्यायामिकीनां च विद्यानां ज्ञानम् । ५—विशेषकेति । विशेषकस्तिलकः यो ललाटे दीयते । तस्य भूर्जादिपत्रमयस्यानेकप्रकारं छेदनमेव छेद्यम् । ६—तण्डुलेति । नानावर्णैरखण्डतण्डुलैः सरस्वतीभवने मणिकुट्टिमेषु तथा कुसुमैर्ग्रथितैः शिवार्चनार्थं च भक्तिविकाराः । ८—दशनेति । रागशब्दः प्रत्येकमभिसंबध्यते । तत्राङ्गरागोऽङ्गमार्ष्टिः कुङ्कुमादिना । ११—उदकेति । उदके मुरजादिवद्वाद्यम् । १२—उदकेति । हस्तयन्त्रमुक्तैरुदकैस्ताडनम् ।

---

१. एतत्कारिकार्धं ग-पुस्तके नास्ति. २. 'अस्याः—' इत्यादिः '—त्वम् ।' इत्यन्तः पाठो ग-पुस्तके 'परोढा कन्यका' इति कारिकाया अग्रे दृश्यते. ३. 'यथा—' इत्यादि नास्ति ग-पुस्तके.

[1]कामममङ्गीकृतमपि परिक्षीणधनं नरम् ।
मात्रा निष्कासयेदेषा पुनःसंधानकाङ्क्षया ॥ ६९ ॥

निपुणा । बहिः कृत्रिमम् । काममत्यर्थमङ्गीकृतं वल्लभत्वेन स्वीकृतम् । मात्रा गृहीतोपकरणद्रव्याणि(व्यं) निःसारयेद् वाहयति(येत्) । संधानं सुरतार्थं संनिधानम् ।

१३–चित्रा इति । नानाप्रकारदौर्भाग्यैकेन्द्रियपलितीकरणादयः । २०–कौचुमारा इति । कुचुमारस्यैते सुभगंकरणादयः उपायान्तरासिद्धसाधनार्थाः । २४–सूचीति । सूच्या यत्संधानकरणं तत्सूचीवानम् । २५–सूत्रेति । नालिकासंचारनालादिसूत्राणामन्यथान्यथा दर्शनम् । छित्त्वा दग्ध्वा च पुनरच्छित्त्वादग्ध्वा च दर्शनम् । तच्चाङ्गुलिन्यासात् । देवकुलादिदर्शनम् । २८–प्रतीति । यस्या अन्त्याक्षरिकेति प्रतीतिः । सा क्रीडार्था वादार्था च । यथोक्तम्—'प्रतिश्लोकं क्रमाद्यत्र संधायाक्षरमन्तिमम् । पठेतां श्लोकमन्योन्यं प्रतिमालेति सोच्यते ॥' इति । २९–दुरिति । शब्दतोऽर्थतश्च दुःखेनोच्यत इति दुर्वाचकम् । तस्य प्रयोगाः क्रीडार्था वादार्थाश्च । ३२–काव्येति । समसनं समस्या । 'असु क्षेपणे' । ण्यत् । 'संज्ञापूर्वको विधिरनित्यः' इति वृद्धिर्न । तस्याः पूरणम् । तद्यथा मम दशकण्ठवधे—'गीर्वाणगेहेषु महाशयानां वेशान्तरालेषु च कामुकानाम् । रागाङ्कुरं पल्लवयत्यमन्दं यत्राच्युतोदारकथाप्रसङ्गः ॥' अत्र तुरीयः पादः समस्या । ३५–तक्षति । वर्धकिकर्म । शयनासनाद्यर्थम् । ३८–धात्विति । क्षेत्रवादः । स हि मृत्प्रस्तररत्नधातूनां पातनशोधनमेलनादिज्ञानहेतुरर्थार्थः । ४०–वृक्षेति । रोपणपुष्टिचिकित्सावैचित्र्यकृतो गृहोद्यानार्थाः । ४३–उत्सादन इति । मर्दनं द्विविधम्—पादाभ्यां हस्ताभ्यां च । तत्र पादाभ्यां यन्मर्दनं तदुत्सादनमुच्यते । हस्ताभ्यां यच्छिरोभ्यङ्गकर्म तत्केशमर्दनम् । शेषाङ्गेषु मर्दनं संवाहनम् । ४४–अक्षरेति । अक्षराणां मुष्टिरिव मुष्टिका मुष्टिरिति । सा साभासा निराभासा च । तत्र साभासा अक्षरमुद्रेत्युच्यते । तया कथनं गूढवस्तुमन्त्रणार्थं ग्रन्थसंक्षेपार्थं च । तदुक्तमाचार्यरविगुप्तेन चन्द्रप्रभाविजये—'गहनप्रसन्नसर्वा कतिपयसूत्रामिमामनन्तमुखीम् । अनधीत्याक्षरमुद्रां वादसमुद्रे परिप्लवते ॥' इति । निराभासा मुद्रेत्युच्यते । तया कथनं गोप्यवस्तुमन्त्रणार्थम् । यथोक्तम्—'मुष्टिः किसलयं चैव च्छटा च त्रिपताकिका । पताकाङ्कुशमुद्राश्च मुद्रावर्गेषु सप्तसु ॥ अङ्गुल्यश्चाक्षराण्येषां स्वराश्चाङ्गुलिपर्वसु । संयोगादक्षरं युक्तं भूतमुद्रा प्रकीर्तिता ॥' इति । ४५–म्लेच्छितेति । यत्साधुशब्दोपनिबद्धमप्यक्षरविन्यासादस्पष्टार्थं तन्म्लेच्छितम् । गूढवस्तुमन्त्रार्थमेतत् । ४९–यन्त्रेति । सजीवानां निर्जीवानां यन्त्राणां यानोदकसंग्रामार्थं घटनाशास्त्रम् । ५०–धारणेति । श्रुतस्य ग्रन्थस्य धारणार्थं शास्त्रम् । ५२–मानसीति । मनसि भवा चिन्ता दृश्यादृश्यभेदविषया । ५७–छलितकेति । परव्यामोहनार्थाः । आकर्षेति । पाशकक्रीडा । द्यूतविशेषत्वेऽपि पुनर्वचनमादरार्थम् । सश्रृङ्गारत्वाद्युर्विज्ञेयत्वाद्वा । अक्षहृदयापरिज्ञाने हि नलयुधिष्ठिरयोरपि पराजयात् । ६२–वैनेति । स्वपरविनयप्रयोजनाद्वैनयिक्यः आचारशास्त्राणि । एवमितरे अपि ॥

1. **काममित्यादि** । स्पष्टोऽयमर्थो वात्स्यायनीये वैशिकाधिकरणे—'सक्तं तु पूर्वोपकारिणमप्यल्पफलं व्यलीकेनानुपालयेत् । असारं तु निष्प्रतिपत्तिकमुपायतोऽपवाहयेत् । अन्यमवष्टभ्य ।' इति, 'वर्तमानं निष्पीडितार्थमुत्सृजन्ती पूर्वसंसृष्टेन सह संदध्यात् । स चेदवसितार्थो वित्तवान्सानुरागश्च ततः संधेयः ।' इति च ॥

[1]तस्कराः [2]पण्डका मूर्खाः सुखप्राप्तधनास्तथा ।
लिङ्गिनश्छन्नकामाद्या आसां प्रायेण वल्लभाः ॥ ७० ॥
एषापि मदनायत्ता क्वापि सत्यानुरागिणि ।
रक्तायां वा विरक्तायां [3]रतमस्यां सुदुर्लभम् ॥ ७१ ॥

[3]पण्डको [4]वातपाण्ड्वादिः । छन्नं प्रच्छन्नं ये कामयन्ते ते [5]छन्नकामाः । तत्र रागहीना यथा लटकमेलकादौ मदनमञ्जर्यादिः । रक्ता यथा मृच्छकटिकादौ वसन्तसेनादिः ।

पुनश्च—

अवस्थाभिर्भवन्त्यष्टावेताः षोडशभेदिताः ।

---

1. **तस्करा इति** । अयमर्थो वात्स्यायनीये सविशेषमुक्तः—'स्वतन्त्रः पूर्वं वयसि वर्तमानो वित्तवानपरोक्षवृत्तिरधिकरणवानकृच्छ्राधिगतवित्तः । संघर्षवान्संततायः सुभगमानी श्लाघनकः पण्डकश्च पुंशब्दार्थी । समानस्पर्धी स्वभावतस्त्यागी । राजनि महामात्रे वा सिद्धो दैवप्रमाणो वित्तावमानी गुरूणां शासनातिगः सजातानां लक्ष्यभूतः सवित्त एकपुत्रो लिङ्गी प्रच्छन्नकामः शूरो वैद्यश्च ।' इति ॥

2. **रतमिति** । रतमस्यां सुदुर्लभमित्युक्तिस्तु नितरां जघन्यतमा हरितालपातयोग्या च । शास्त्रस्य वन्तुस्थितिख्यापनमात्रपरतया तदनुमोदनानुपलम्भाच्छिष्टैरनादृतत्वाच्च । अत एव कामसूत्रकृताप्यभिहितम्—'धर्ममर्थं च कामं च प्रत्ययं लोकमेव च । पश्यन्नेतस्य तत्त्वज्ञो न च रागात्प्रवर्तते ॥ अधिकारवशादुक्ता ये चित्रा रागवर्धनाः । तदनन्तरमत्रैव ते बलाद्विनिवारिताः ॥ तदेतद्ब्रह्मचर्येण परेण च समाधिना । विहितं लोकयात्रायै न रागार्थोऽस्य संविधिः ॥' इति । एवं परकीयाविषयोऽपि जघन्यतम एव । उक्तं च तेनैव—'संदृश्य शास्त्रतो योगान्पारदारिकलक्षितान् । न याति च्छलनां कश्चित्स्वदारान्प्रति शास्त्रवित् ॥ पाक्षिकत्वात्प्रयोगाणामपायानां च दर्शनात् । धर्मार्थयोश्च वैलोम्यान्नाचरेत्पारदारिकम् ॥ तदेतद्दारगुप्त्यर्थमारब्धं श्रेयसे नृणाम् । प्रजानां दूषणायैव न विज्ञेयोऽस्य संविधिः' इति ॥

3. **पण्डक इति** । पण्डको नरंमन्यो नपुंसकः । स चात्मनः पुंस्त्वज्ञापनार्थं बहु वितरति । वस्तुतस्तु पण्डको वातपण्डकादिरिति व्याख्यानं ज्यायः । तथा चोक्तं चरकसंहितायां शारीरस्थानेऽतुल्यगोत्रीयाख्ये द्वितीयाध्याये—'वाय्वग्निदोषाद्दूषणौ तु यस्य नाशं गतौ वातिकपण्डकः सः ।' इति । एवमन्येऽपि पण्डकभेदा निरूपिताः । पण्डते । 'पडि गतौ' । अच् । यद्वा, पणते । 'पण व्यवहारे स्तुतौ च' । जमन्ताद्वुः ॥

4. **छन्नेति** । प्रच्छन्नकामिनो हि प्रकटं न कामयन्ते लोको मा ज्ञासीदिति । ते कामेन बाध्यमाना बहु वितरन्ति । छन्नं यथा स्यात् तथा कामयन्ते इति कर्मण्यण् ॥

5. **षोडशेति** । त्रयोदश स्त्रीयाः, द्वे परकीये, एका सामान्येति मिलित्वा षोडशभेदिता एताः स्वाधीनपतिकाद्यष्टावस्थाभिः प्रत्येकं भिद्यन्त इति तात्पर्यम् ॥

---

१. 'पण्डकाः' घ. २. 'वातरोग' क-घ.

स्वाधीनभर्तृका तद्वत्खण्डिताथाभिसारिका ॥ ७२ ॥
कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका ।
अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता तथा ॥ ७३ ॥

तत्र—

[3]कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम् ।
विचित्रविभ्रमासक्ता सा स्यात्स्वाधीनभर्तृका ॥ ७४ ॥

यथा—'अस्माकं सखि वाससी–' इत्यादि ।

[4]पार्श्वमेति प्रियो यस्या अन्यसंयोगचिह्नितः ।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥ ७५ ॥

यथा—'तदवितथमवादीः–' इत्यादि ।

अभिसारयते कान्तं या मन्मथवशंवदा ।
स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका ॥ ७६ ॥

[5]क्रमाद्यथा—

'[6]न च मेऽवगच्छति यथा लघुतां करुणां यथा च कुरुते स मयि ।
निपुणं तथैनमभिगम्य वंदेरभिदूति काचिदिति संदिदिशे ॥'

'[7]उत्क्षिप्तं करकङ्कणद्वयमिदं बद्धा दृढं मेखला
यत्नेन प्रतिपादिता मुखरयोर्मञ्जीरयोर्मूकता ।
आरब्धे रभसान्मया प्रियसखि क्रीडाभिसारोत्सवे
चण्डालस्तिमिरावगुण्ठनपटक्षेपं विधत्ते विधुः ॥'

सुखेन अनायासेन प्राप्तं धनं यैस्ते । लिङ्गिनस्तपस्विवेषधारिणः । आसां वेश्यानाम् । एषा वेश्यापि । ईर्ष्याकषायिता ईर्ष्यया कलुषीकृतचित्ता । अभिसारिकापदस्य व्युत्पत्तिलभ्यमर्थद्वयमेव लक्षणद्वयमाह—**अभिसारयत इति । न चेति** । स कान्तः अभिदूति अभिमुखागतां दूतीं प्रति संदिदिशे वाचिकं न्यस्तवती । उत्क्षिप्तम् ऊर्ध्वं न्यस्तम् । एतेन तयोः शब्दप्रतिरोधः । प्रतिपादिता कृता । तिमिरमेव अव-

---

1. **वदेरिति** । विध्यर्थे प्रार्थने वा लिङ् ॥

---

१. 'यथा' क. २. 'यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति ।' ग ३. ग-पुस्तके तु—'निद्राकषायमुकुलीकृतताम्रनेत्रो नारीनखव्रणविशेषविचित्रिताङ्गः । यस्याः कुतोऽपि गृहमेति पतिः प्रभाते सा खण्डितेति कथिता मुनिभिः पुराणैः ॥' यथा—'नवनखपदमङ्कं गोपयस्यंशुकेन–' (इत्यादि)इति पाठः. ४. 'क्रमात्' इति ग-पुस्तके नास्ति. ५. 'त्वरय प्रस्तुतविधये यावत्तिमिराणि तरुणतरणानि । भावी कुलटाघाटः शशधरकरकल्पटकैरवहः ॥' ग. ६. 'उत्क्षिप्तं–' इत्यादि. 'उदाहरणम् ।' इत्यन्तः पाठो ग-पुस्तके नास्ति.

संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा ।
अवगुण्ठनसंवीता कुलजाभिसरेद्यदि ॥ ७७ ॥
विचित्रोज्वलवेषा तु रणन्नूपुरकङ्कणा ।
प्रमोदसेरवदना स्याद्वेश्याभिसरेद्यदि ॥ ७८ ॥
मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना ।
आविद्धगतिसंचारा स्यात्प्रेष्याभिसरेद्यदि ॥ ७९ ॥

तत्राद्ये 'उत्क्षिप्तं—' इत्यादि । अनयोरूह्यमुदाहरणम् ।

प्रसङ्गादभिसारस्थानानि कथ्यन्ते—

क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम् ।
मालापञ्चः[1] श्मशानं[2] च नद्यादीनां तटी तथा ॥ ८० ॥

गुण्ठनपटः आच्छादनवस्त्रं तस्य क्षेपं निरासम् । प्रसङ्गादभिसरणक्रममाह—**संलीनेति** । गात्रेषु अङ्गेषु । संकुचितसर्वाङ्गीत्यर्थः । अवगुण्ठनेन आच्छादनपटेन संवीता संवृतदेहा । एतदुपलक्षणम् । अनुलेपादिनापि संवीता । तत्रान्धकारे नीलवस्त्रकुसुमकस्तूरिकासंवीता । ज्योत्स्नायां चन्दनद्रवसंवीता । क्रमेण यथा—'सिनं वसनमर्पितं वपुषि नीलचेलभ्रमान्मया मृगमदाशया मलयजद्रवः सेवितः । करेण परिवोधितः स्वजनशङ्कया दुर्जनः परं परमपुण्यतः सखि न लङ्घिता देहली ॥','मल्लिकामालभारिण्यः सर्वाङ्गीणार्द्रचन्दनाः । क्षौमवस्त्रो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः ॥' आविद्धः उद्भावितः पत्युः सद्भावो यया । 'आविद्धगतिसंचारा' इति पाठे आविद्धया उद्धतया गत्या संचारः संकेतस्थानप्राप्तिर्यस्याः सेत्यर्थः । आद्ये कुलजाभिसरणप्रकारे अनयोर्वेश्याप्रेष्याभिसरणप्रकारयोः । तत्र क्रमेणोदाहरणम् । यथा मम—'[2]कामेषुवेधविधुरं धुरि दत्तवित्तं शिञ्जानमञ्जुमणिनूपुरकिङ्किणीका । मन्दं वृहत्कुचनितम्बभरेण दूरादाश्वसयत्यभिसरत्युत कापि धन्यम् ॥','कान्तं तमेकान्तगुणाभिरामं मदीहिताधानविवृद्धकामम् । प्राप्यापमोदं विदधे सखीति ब्रुवत्यभीष्टं प्रमदाभियाति ॥' अत्र 'संमोदम्' इति वक्तव्ये 'अपमोदम्' इति संलापस्खलनम् । क्षेत्रं सस्योत्पत्ति-

---

1. **मालेति** । मालापञ्च इति शब्दः संदिग्ध एव सर्वत्रोपलभ्यते । तथापि टीकाविवृतपुष्पोद्यानपदस्वारस्येन 'मालानां पञ्चो व्यक्तीकरणं यस्मात्' इत्यादिरीत्या कथंचिद् व्याख्येयः । मा नास्ति आलापो यत्र तच्छून्यं गृहमित्यर्थ इति 'मालापं च' इति पाठे योज्यम् ॥

2. **कामेति** । लक्षणानुसरणमात्रमेतत् । उदाहरणं तु 'लोलच्चोलचमत्कृति—' इत्यादि द्रष्टव्यम् ॥

---

१. 'मालापञ्चाः' क; 'मालायश्चाः' ख; 'मालायाश्चः' ख-पुस्तकटिप्पणी; 'मालामश्चाः' ग; 'मालयं च' घ. २. 'श्मशानानि' क.

एवं कृताभिसाराणां पुंश्चलीनां विनोदने ।
स्थानान्यष्टौ [1]तथा ध्वान्तच्छन्ने कुत्रचिदाश्रये ॥ ८१ ॥
[2]चाटुकारमपि प्राणनाथं रोषादपास्य या ।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥ ८२ ॥

[3]यथा मम तातपादानाम्—

'नो चाटुश्रवणं कृतं न च दृशा हारोऽन्तिके वीक्षितः
कान्तस्य प्रियहेतवो निजसखीवाचोऽपि दूरीकृताः ।
पादान्ते विनिपत्य तत्क्षणमसौ गच्छन्मया मूढया
पाणिभ्यामवरुंध्य हन्त सहसा कण्ठे कथं नार्पितः ॥'

[4]प्रियः कृत्वापि संकेतं यस्या नायाति संनिधिम् ।
विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता ॥ ८३ ॥

यथा—

'उत्तिष्ठ दूति यामो यामो यातस्तथापि नायातः ।
यातः परमपि जीवेज्जीवितनाथो भवेत्तस्याः ॥'

[5]नानाकार्यवशाद्यस्या दूरदेशं गतः पतिः ।
सा मनोभवदुःखार्ता भवेत्प्रोषितभर्तृका ॥ ८४ ॥

स्थानम् । [1]वाटी निर्जनवास्तु । मालापद्मः पुष्पोद्यानम् । **विनोदने इति** । सुरतोत्सवायेत्यर्थः । कुत्रचिदाश्रये । पुंश्चल्योऽभिसरन्ति इति शेषः । 'आश्रयः' इति प्रथमान्तपाठे ध्वान्तच्छन्ने कुत्रचिद्देशे आश्रयोऽधिष्ठानं पुंश्चलीनां विनोदे भवतीत्यर्थः । चाटुं प्रियोक्ति करोतीति चाटुकारः तम् । हारो नायकेन प्रसादाय दीयमानो मुक्ताकलापः । यामः संकेतकालः । **नानाकार्यवशादिति** । शापसंभ्रमयोरप्युप-

---

1. **वाटीति** । गृह्योद्यानमित्युचितम् । मालापद्म इत्यस्याग्रे लिखितं 'पुष्पोद्यानम्' इति लेखदोषाद्भ्रष्टम्, 'निर्जनवास्तु' इति तु तत्रत्यमिव प्रतिभाति ॥

---

१. 'मुनिः प्राह ध्वान्तच्छन्नं स्थलं तथा ।' **ग.** २. 'पादयोः पतिते कान्ते या मानं न विमुञ्चति । तस्मिन्गते तु तापार्ता कलहान्तरिता तु सा ॥' **ग.** ३. 'यथा मम तातपादानाम्' **ग**-पुस्तके नास्ति. ४. 'अहरहरनुरागाद्भूतिका प्रेष्य पूर्वं सरलसमभिसृत्य क्वापि संकेतके च । न मिलति खलु यस्या वल्लभो दैवयोगात्प्रवदति भरतस्तां नायिकां विप्रलब्धाम् ॥' इति **ग.** ५. **ग**-पुस्तके तु 'सखि स विजितो वीणाद्यूते—' (इत्यादि) इति पाठः. ६. 'दूरदेशं गते कान्ते विवर्णा मलिना कृशा । या तिष्ठति तदाकाङ्क्षा सा स्यात्प्रोषितभर्तृका ॥' इति **ग.** ७. 'मालायं च' इत्येकस्मिन्पुस्तके; 'मालायाश्चः' इति द्वितीयस्मिन्पुस्तके.

यथा—

'तां[1] जानीयाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥'

कुरुते[2] मण्डनं यस्याः सज्जिते वासवेश्मनि ।
सा तु वासकसज्जा स्याद्विदितप्रियसंगमा ॥ ८५ ॥

यथा राघवानन्दानां[3] नाटके—

'विदूरे केयूरे कुरु,करयुगे रत्नवलयै-
रलं, गुर्वी ग्रीवाभरणलतिकेयं किमनया ।
नवामेकामेकावलिमपि मयि त्वं विरचये-
र्न नेपथ्यं पथ्यं बहुतरमनङ्गोत्सवविधौ ॥'

आगन्तुं[4] कृतचित्तोऽपि दैवान्नायाति यत्प्रियः ।
तदनागमदुःखार्ता विरहोत्कण्ठिता तु सा ॥ ८६ ॥

लक्षणम् । तेनोक्तोदाहरणे नाव्याप्तिः । **तां जानीया इति** । कुबेरशापात्प्रोषितस्य यक्षस्य मेघं प्रत्युक्तिरियम् । पद्मिनीं वेति वाशब्द इवार्थः । 'वा स्याद्विकल्पोपमयोरिवार्थे च समुच्चये ।' इति विश्वप्रकाशः । उत्तरार्धे द्वितीयान्तपादेषु प्रथमान्तपाठः क्वचित्पुस्तकेषु दृश्यते तदा पुनरिवशब्द एव । **कुरुत इति** । सखी इति शेषः । सज्जिते शय्याप्रदीपादिभिः परिष्कृते । **विदूरे इति** । मण्डयन्तीं सखीं प्रति कस्यचिदुक्तिरियम् । नवां नवगुम्फिताम् । अन्यथा परिरम्भभरेण झटिति त्रुटिता स्यात् । बहुयष्टिकहारस्य परिरम्भातिविघ्नहेतुत्वादाह—**एकावलिमिति** । एकयष्टिकहारमित्यर्थः । **यत्प्रिय इति** । यस्याः प्रिय इत्यर्थः । **तदनागमेति** । प्रियानागमने

---

१. **ग**-पुस्तके तु 'आधिक्षामां विरहशयने–' इत्युदाहृतम्. २. 'वासवेश्मनि सुकल्पिततल्पे या समागमविधिं विदधाना । तिष्ठति प्रियसमागमसज्जा तां मुनिर्वदति वासकसज्जाम् ॥' इति **ग**. ३. **ग**-पुस्तके तु 'राघवानन्दानां–' इत्यादिः '–विधौ ॥' इत्यन्तः पाठो नास्ति, किंतु तत्स्थाने 'अङ्गे-ष्वाभरणं करोति बहुशः पत्रेऽपि संचारिणि प्रातं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति । इत्याक-ल्पविकल्पतल्परचनासंकल्पलीलाशतव्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति ॥' इति दृश्यते, ४. 'उद्दाममन्मथमहाज्वरवेपमानां रोमाञ्चकञ्चुकितमङ्गकमावहन्ती । गाढानुरागवचनां पुरतः सखीनामु-त्कण्ठितां वदति तां भरतः कवीन्द्रः ॥' इति **ग**.

यथा—

किं[1] रुद्धः प्रियया कयाचिदथवा सख्या ममोद्वेजितः
'किंवा [1]कारणगौरवं किमपि यन्नाद्यागतो वल्लभः ।
इत्यालोच्य मृगीदृशा करतले विन्यस्य वक्त्राम्बुजं
दीर्घं निःश्वसितं चिरं च रुदितं क्षिप्ताश्च पुष्पस्रजः ॥'
[2]इति साष्टाविंशतिशतमुत्तमम[2]ध्याधमस्वरूपेण ।
चतुरधिकाशीतियुतं शतत्रयं [3]नायिकाभेदाः ॥ ८७ ॥

नेत्यर्थः । **किं रुद्ध इति** । संकेतस्थाया नायिकायाः प्रियानागमने वितर्कोऽयम् ।

---

1. **कारणेति** । कारणगौरवं हेतूद्रेकः । प्रयोजनविशेष इति यावत् ।

2. **इतीति** । स्वीया तावत्त्रिविधा—मुग्धा मध्या प्रगल्भा चेति । तत्र मुग्धैकधा, मध्याप्रगल्भे तु धीराधीरोभयभेदेन षड्विधे । धीरा मध्या, अधीरा मध्या, धीराधीरा मध्या । एवमग्रेऽपि । एताश्च षड्विधा ज्येष्ठत्वकनिष्ठत्वाभ्यां द्विविधाः । धीरा ज्येष्ठा–कनिष्ठा, अधीरा ज्येष्ठा–कनिष्ठा, धीराधीरा ज्येष्ठा–कनिष्ठा चेति । एवं द्वादशभेदा मुग्धया सह त्रयोदश भवन्तीति स्वीयाकथा । परकीया द्विविधा—परोढा कन्यका चेति । सामान्या त्वेका । एताः पुनः सभेदाः स्वकीयापरकीयासामान्याः स्वाधीनपतिकाद्यष्टावस्थाभिः प्रत्येकं भिद्यन्ते । एवं चतुरधिकशतं स्वीयाः । षोडश परकीयाः । अष्टौ सामान्याः । आसां संकलनेऽष्टाविंशत्यधिकशतं नायिकाः । १०४+१६+८=१२८ । तासामप्युत्तममध्यमाधमभेदगणनया चतुरधिकाशीतियुतं शतत्रयं भेदाः । ३×१२८=३८४ । तत्रापि दिव्यादिव्योभयभेदगणनया द्विपञ्चाशदधिकैकादशशतं भेदा जायन्ते । ३×३८४=११५२ । अत्रेदमध्यवधेयम्—यद्यपि मुग्धाया लज्जाप्राधान्येन, मध्यायाः लज्जामदनप्राधान्येन, प्रगल्भायाः प्रौढिप्राधान्येन, धीरायाः धैर्यप्राधान्येन, अधीरायाः अधैर्यप्राधान्येन, धीराधीरायाः धैर्याधैर्यप्राधान्येन, ज्येष्ठायाः प्रेमज्यैष्ठ्यप्राधान्येन, कनिष्ठायाः प्रेमकानिष्ठ्यप्राधान्येन, परोढायाः रहस्यप्राधान्येन मुग्धाया **इव** कन्यकायाः, सामान्यायाः वित्तप्राधान्येन, अष्टविधा नायिका भवन्ति तथापि 'प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं दृष्ट्वा न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः । यातुं निश्चितचेतसि प्रियतमे सर्वं समं प्रस्थिता गन्तव्ये सति जीवितप्रिय सुहृत्सार्थः किमु त्यज्यते ॥' इत्यादिलक्ष्यादुत्तरक्षणे कृतदेशान्तरगमनाध्यवसाये प्रिये प्रवत्स्यद्भर्तृका नवमी नायिका भवितुमर्हति । तस्याः प्रोषितभर्तृकाविप्रलब्धाविरहोत्कण्ठितासु नान्तर्भावः । संनिहिते प्रेयसि तत्त्वायोगात् । न कलहान्तरितायामन्तर्भावः । कलहाभावादनवमानित्वाच्च । न खण्डितायामन्तर्भावः । अन्योपभोगलाञ्छितस्य प्रियस्यागमनाभा-

---

१. 'एणीदृशः प्रबलतापभयादिवास्याः श्वासानिलाः प्रति मुहुः प्रसरन्ति दूरम् । बाष्पाम्बुवीचिषु निमज्जनकातरेव निद्रा दृशोर्न सविधेऽपि पदं विधत्ते' ॥ इति **ग.** २. 'मध्यमाधमस्वरूपमतः' **क-ख**; **ग**-पुस्तके तु 'भेदे पूर्ववदासामुत्तममध्याधमत्वेन ।' इति पूर्वार्धम्; 'मध्यमाधमस्वरूपतः' **घ.** ३.'नायिकाभिदानां स्यात्' **क-ख**; 'नायिकाभिधानं स्यात्' **ग**; 'नायिकाभेदानां स्यात्' **घ.**

'इह च परस्त्रियौ [1]कन्यकान्योढे संकेतात्पूर्वं विरहोत्कण्ठिते । पश्चाद्विदूषकादिना सहाभिसरन्त्यावभिसारिके । कुतोऽपि संकेतस्थानमप्राप्ते नायके विप्रलब्धे । इति अवस्थैवानयोः । अस्वाधीनप्रिययोरवस्थान्तरायोगात् ।' इति [2]केश्चित् ।

क्वचिदन्योन्यसांकर्यमासां लक्ष्येषु दृश्यते ।

यथा—

'[1]न खलु वयममुष्य दानयोग्याः पिबति च पाति च यासकौ रहस्त्वाम्।
विट विटपमुं ददस्व तस्यै भवति यतः सदृशोश्चिराय योगः ॥'

अवस्था त्रयो भेदाः अनयोः परस्त्रियोः । **अवस्थान्तरायोगादिति** । प्रकारासंभवादिति भावः । तथाहि—परस्त्रियाः पार्श्वे नायकस्य [3]सततमवस्थानायोगान्न स्वाधीनभर्तृकात्वम् । नायिकान्तरसंभोगेन ईर्ष्यया असंभवान्न खण्डितात्वम् । नायिकान्तरसंभोगदोषात्कान्तत्यागासंभवेन न कलहान्तरितात्वम् । कान्तस्य दूरदेशगमनेन मनोभवदुःखार्तत्वाभावान्न प्रोषितभर्तृकात्वम् । परालोकनशङ्कया सज्जितवासवेश्मनि मण्डनासंभवान्न वासकसज्जात्वम् । तथा चानयोस्त्रैविध्येन षडेव भेदाः । न तूक्तविधत्वेन षोडशेति । तत्र चतुरशीत्यधिकशतत्रयसंख्या नोपपन्नेति भावः । 'अस्वाधीनप्रिययोः' इत्युपदर्शनमात्रम् । आसामुपदर्शितप्रकाराणां नायिकानाम् । लक्ष्येषु महाकविप्रयोगेषु । **न खल्विति** । सपुष्पपल्लवां वृक्षशाखां प्रियायै यच्छन्तं नायकं प्रति नायिकाया उक्तिरियम् । अमुष्य विटपस्य । पिबति चुम्बति । पाति योषिदन्तरेभ्यो वारयति । हे विट हे षिङ्ग कामुक । विटपं सपुष्पमालां शाखाम् । **सदृशोरिति** । विटं त्वां पिबति पाति वेति व्युत्पत्तिद्वयेन सैव विटपा अयमपि विटप इति

वात्, प्रियायाः कोपाभावदर्शनात्, काकुवचनकातरावलोकनादिसूचितान्तरिकपक्षपातदर्शनाच्च । न वासकसज्जायामन्तर्भावः । गच्छति प्रिये सज्जीकरणाभावात् खेदोद्गमाच्च । न स्वाधीनभर्तृकायामन्तर्भावः । उत्तरक्षण एव विप्रयोगदर्शनात् भर्तरि स्वाधीनत्वव्याघाताच्च । नाप्यभिसारिकायामन्तर्भावः । उत्साहराहित्याद् अन्तस्तापदर्शनाच्चेति । एतल्लक्षणं तु 'पतिर्देशान्तरं यस्या यास्यत्येवोत्तरक्षणे । प्रवत्स्यत्पतिका सा स्यात्प्रयाणच्छेदनोद्यमा ॥' इति ज्ञेयमिति नव्याः ॥

1. **नेति** । वयममुष्य दानयोग्या न भवामः खलु । किंतु या असावेवासकौ त्वत्प्रिया रहः एकान्ते त्वां पिबति पानं करोति पाति मदनानलसंतापाद्रक्षति च । तस्यै अमुं विटान्पातीति विटपं पल्लवम् । 'विटपः पल्लवे षिङ्गे' इति विश्वः । ददस्व प्रयच्छ । व्रज गच्छ । यतो दानाच्चिराय चिरकालाय सदृशोरनुरूपयोर्योगो भवतु । उभयोरपि विटपत्वादिति भावः ॥ हे कितव धूर्त, वृथा व्यर्थमेवाहितैः । तत्कार्यस्यान्यथासिद्धत्वादिति भावः । तव संबन्धिभिः क्षितिरुहाणां पल्लवाः पुष्पाणि च तान्येव कर्णं

---

१. 'कन्यकोढे' ख-ग-घ. २. 'क्वचित्' क. ३. 'सततस्थान–' इति पुस्तकान्तरे.

तव कितव किमाहितैर्वृथा नः क्षितिरुहपल्लवपुष्पकर्णपूरैः ।
ननु जनविदितैर्भवद्बलीकैश्चिरपरिपूरितमेव कर्णयुग्मम् ॥'
'मुहुरुपहासेतावेवालिनादैर्वितरसि नः कलिकां किमर्थमेनाम् ।
वैसतिमुपगतेन धाम्नि तस्याः शठ कलिरेष महांस्त्वयाद्य दत्तः ॥'
'इति गदितवती रुषा जघान स्फुरितमनोरमपक्ष्मकेसरेण ।
श्रवणनियमितेन कान्तमन्या सममसितांबुरुहेण चक्षुषा च ॥'

इयं हि वक्रोक्त्या परुषवचनेन कर्णोत्पलताडनेन च धीरमध्यताधीरमध्यताधीरप्रगल्भताभिः संकीर्णा । एवमन्यत्राप्यूह्यम् ।

इतरा अप्यसंख्यास्ता नोक्ता विस्तरशङ्कया ॥ ८८ ॥

ता नायिकाः ।

तुल्ययोर्योगो योग्यो भवतीत्यर्थः । भवद्बलीकैर्भवतोऽप्रियवचनैः । स्फुरितो मनोरमः पक्ष्मवत्केसरो यस्य तेन । चक्षुःपक्षे—पक्ष्मैव केसरो यस्य तेन । **वक्रोक्त्येति** । विटशब्दस्य नानार्थकल्पनाविचित्रोक्त्येत्यर्थः । इतरा अपि पद्मिनीहस्तिनीप्रभृतयः ।

पूरयन्तीति कर्णपूराः कर्णावतंसाः । तैर्नोऽस्माकं किं तत्साध्यम् । न किंचिदस्तीत्यर्थः । ननु अङ्ग, जनविदितैर्भवद्बलीकैस्तवाप्रियवचनैः कर्णयुग्मं चिरपरिपूरितं नित्यं पूर्णमेव । अतः पूरितस्य पूरणायोगादलमेभिरिति ॥ अलिनादैर्मुहुरुपहसितां प्रतारणार्थेति प्रहस्यमानामिव स्थितामेनां कलिकां कोरकम्, अल्पं कलिं कलहं च । 'कलहे च युगे कलिः' इति वैजयन्ती । स्त्रीप्रत्ययस्त्वविवक्षितः श्लेषे । नः अस्माकं किमर्थं वितरसि । हे शठ गूढविप्रियकारिन्, तस्याः त्वत्प्रियाया धाम्नि भवने वसति स्थितिमुपगतेन त्वया अद्यैष वर्तमानो महान् कलिः कलहो दत्तः । त्वदत्त एव महति कलौ स्थिते किं कल्पान्तरेणेत्यर्थः ॥ इति गदितवती उक्तवती अन्या स्त्री रुषा कान्तं स्फुरितान्युज्ज्वलानि मनोरमाणि च पक्ष्माणीव केसराणि । अन्यत्र केसराणीव पक्ष्माणि, यस्य तेन श्रवणे नियमितेन श्रोत्रे निरुद्धेन असिताम्बुरुहेण नीलोत्पलेन चक्षुषा च समं युगपज्जघान ताडयामासेति ॥

1. **इतरा इति** । तथा चोक्तम्—'पुनश्च ताश्चिधा ज्ञेया दिव्यादिव्योभयात्मना । चतुर्धा चोद्धतोदात्ता ललिता शान्तिका तथा ॥ अक्षता च क्षतायाता याता यायावरेत्यपि । पुनश्चतुर्धा कथिताः पूर्वैर्भोजादिभिर्बुधैः ॥ पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनीति च । पुनश्चतुर्धा कथिताः कामशास्त्रेषु जातितः ॥ कर्किनी वाडवला पित्तला प्रकृत्या पुनस्त्रिधा । अथोक्तानां च भेदानां लक्षणोदाहृती ब्रुवे ॥ दिव्याः शच्यादयः प्रोक्ता अदिव्या मालतीमुखाः । दिव्यादिव्या इति प्रोक्ता जानकीरुक्मिणीमुखाः ॥ गर्वशालिन्युद्धता स्यादुदात्ता गूढमानिनी । ललिता साध्यमानेहाशान्ता निर्मानमानसा ॥

---

१. अयं श्लोकः क-ग-घ-पुस्तके नास्ति. २. 'इतरा–' इति कारिकार्धं नास्ति ग-पुस्तके.

अथासामलंकाराः—

यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः ।
अलंकारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः ॥ ८९ ॥
शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता ।
औदार्यं धैर्यमित्येते सप्तैव स्युरयत्नजाः ॥ ९० ॥
लीला विलासो विच्छित्तिर्विब्बोकः किलकिञ्चितम् ।
मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ॥ ९१ ॥
विहृतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम् ।
हसितं चकितं केलिरित्यष्टादशसंख्यकाः ॥ ९२ ॥
स्वभावजाश्च भावाद्या दश पुंसां भवन्त्यपि ।

पूर्वे भावादयो धैर्यान्ता दश नायकानामपि संभवन्ति । किंतु सर्वेऽप्यमी नायिकाश्रिता एव विच्छित्तिविशेषं पुष्णन्ति ।

नायिका निरूप्य कार्यत्वसंगत्या तदलंकारं निरूपयति—**अथेति** । तासां नायिकानाम् । अलंकाराणामङ्गजत्वायत्नजत्वस्वभावजत्वैस्त्रैविध्यं दर्शयन्नुद्देशं करोति—**शोभेति** । 'भवन्त्यपि' इत्यपिशब्दस्य योजनां दर्शयन्विवृणोति—**पूर्वे इति** ।

उदात्तैव भवेद्धीराधीरा तूद्धता मता । ललिता तु भवेन्मुग्धा शान्ता स्वीयोत्तमा मता ॥ भुक्तान्येन पुरा पश्चादूढान्येनाक्षता मता । भुक्ता शक्तिसुतेनोढा राज्ञा सत्यवती यथा ॥ गते भर्तरि यद्यन्यं श्रिता सा तु क्षता मता । यथा तारा रविसुतं श्रिता वालिनि मारिते ॥ यातायाता तु युगपदूढानेकैस्तु भर्तृभिः । यथा पाण्डुसुतैरूढा द्रुपदस्य कुमारिका ॥ ऊढैकेन तु संत्यक्ता क्रमाद्यायावरा मता । यथा बहुवरैरूढा माधवी चोपलात्मजा ॥ पद्मिनी चन्द्रवदना शिरीषमृदुला तथा । शङ्खिनी स्याद्दृढन्मध्या कोपिन्यल्पस्तनी तथा ॥ दीर्घपादा द्रुतगतिः कुटिलाक्षी च पिङ्गला । हस्तिनी बहुभुक्क्रूरा निर्लज्जा पिङ्गकुन्तला ॥ ह्रस्वा स्थूलाधरा गौरशरीरा मन्दगामिनी । कफिनी दृढरागा स्याच्छ्यामा सुस्निग्धलोचना ॥ वातुला तु कठोराङ्गी चञ्चला कृष्णपाणिजा । श्यामधूसरवर्णा च बहुभोज्या प्रलापिनी ॥ पित्तला शोणनयना गौराङ्गी कुशला रते । सा चतुर्धा पुनरपि नायिका प्रतिनायिका च ॥ यथा द्रुपदजा प्रोक्ता वेणीसंहारनाटके । हेतुरीर्ष्यारुढादीनां सपक्षा प्रतिनायिका ॥ दुर्योधनस्य दयिता तत्र भानुमती यथा । तस्याः कैश्चिद्गुणैर्हीना पूज्या चैवोपनायिका ॥ समा न्यूनापि वा किंचित्कनीयस्यनुनायिका ॥' इत्यादि ॥

---

१. 'विहृतं' ख-घ. २. 'स्वभाव—' इत्यादिः 'पुष्णन्ति' इत्यन्तः पाठो ग-पुस्तके नास्ति. ३. 'स्युः' क-ख. ४. 'भवन्ति' क-ख. ५. 'कार्यत्वसंगत्या' इति पुस्तकान्तरे नास्ति.

[1]तत्र भावः—

[2]निर्विकारात्मके चित्ते भावः प्रथमविक्रिया ॥ ९३ ॥

[3]जन्मतः प्रभृति निर्विकारे मनसि उद्बुद्धमात्रो विकारो भावः ।

[4]यथा—

'[5]स एव सुरभिः कालः स एव मलयानिलः ।
सैवेयमबला किंतु मनोऽन्यदिव दृश्यते ॥'

अथ हावः—

**[6]भ्रूनेत्रादिविकारैस्तु संभोगेच्छाप्रकाशकः ।
भाव एवाल्पसंलक्ष्यविकारो हाव उच्यते ॥ ९४ ॥**

यथा—

'[7]विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ॥'

अथ हेला—

[8]हेलात्यन्तसमालक्ष्यविकारः स्यात्स एव तु ।

स एव भाव एव ।

यथा—

'तह से झत्ति पउत्ता वहुए सव्वङ्गविब्भमा सअला ।
संसइअमुद्धभावा होइ चिरं जह सहीणं पि ॥'

विच्छित्तिविशेषं विलक्षणवैचित्र्यम् । प्रथमविक्रिया संभोगेच्छायाः प्रथमः प्रकृतिविपर्यासः । उद्बुद्धमात्रः, नतु स्फुटं प्रतीयमानः । एतेन हावहेलालक्षणातिव्याप्तिर्वारिता । कौमारे चाञ्चल्यादिरहितानां भ्रूनेत्रादीनां चाञ्चल्यादिरूपप्रकृतिविपर्यासैरल्पसंलक्ष्यविकारः ईषल्लक्ष्यस्वभावः । एतेन हेलालक्षणातिव्याप्तिर्वारिता । विवृण्वती प्रकटयन्ती । साचीकृता वक्रीकृता । पर्यस्तविलोचनेन शिवे परिक्षिप्तनेत्रेण । बालकदम्बेत्यनेन पुलकस्याल्पत्वं तेन च भावस्याल्पलक्ष्यत्वं प्रतीयते । **तह से इति ।**

---

१. 'लक्षणान्याह' ग. २. 'निर्विकारात्मकात्सत्त्वाद्भावस्तत्राद्यविक्रिया' । इति ग. ३. 'जन्मतः–' इति फक्किका नास्ति ग-पुस्तके. ४. 'यथा' इत्यतः प्राक् ग-पुस्तके 'तत्र विकारहेतौ सत्यपि अविकारकरं सत्त्वम् ।' इति पाठः. ५. 'स एव–' इति नास्ति ग-पुस्तके, तत्स्थाने तु 'श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्–'इति श्लोको दृश्यते. ततः 'अविकाररूपात्तत्सात्त्वाद्यः प्रथमो विकारान्तर्विपरिवर्ती बीजस्योच्छूनतेव स भावः । यथा–हरस्तु किंचित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः । उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥' इति पाठः. ६. 'हेवाकस्तु सशृङ्गारो हावोऽक्षिभ्रूविलासकृत् । प्रतिनियताङ्गविकारकारी सशृङ्गारः स्वभावविशेषो हावः ॥' इति ग. ७. 'विवृण्वती–'इति श्लोको नास्ति ग-पुस्तके. ८. 'स एव हेला सुव्यक्तशृङ्गाररससूचिका । हाव एव स्पष्टभूतो विकारभूतत्वात्सुव्यक्तशृङ्गाररससूचको हेला ।' इति ग.

[3]अथ शोभा—

रूपयौवनलालित्यभोगाद्यैरङ्गभूषणम् ॥ ९५ ॥
शोभा प्रोक्ता

तत्र यौवनशोभा यथा—

'असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं [1]करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ [2]वयः प्रपेदे ॥'

एवमन्यत्रापि ।

अथ कान्तिः—

सैव [3]कान्तिर्मन्मथाप्यायितद्युतिः ।

[3]मन्मथोन्मेषेणातिविस्तीर्णा शोभैव कान्तिरुच्यते ।

यथा—'नेत्रे खञ्जनमञ्जने—' इत्यादि ।

अथ दीप्तिः—

[4]कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते ॥ ९६ ॥

यथा मम चन्द्रकलानामनाटिकायां चन्द्रकलावर्णनम्—

'तारुण्यस्य विलासः [3]समधिकलावण्यसंपदो हासः ।
[4]धरणितलस्याभरणं युवजनमनसो वशीकरणम् ॥'

'तथा तस्या झटिति प्रवृत्ता वध्वाः सर्वाङ्गविभ्रमाः सकलाः । संशयितमुग्धभावा भवन्ति चिरं यथा सखीनामपि ॥' इति संस्कृतम् । संशयितमुग्धभावाः संदिग्धशैशवाः । लालित्यमङ्गानां सुकुमारत्वम् । भोगः स्रक्चन्दनादिजनितसुखानुभवः । आद्यशब्देन अलंकारादिग्रहणम् । **तारुण्यस्येति** । अत्र तारुण्यविलासादी-

---

1. **करणमिति** । मदस्य करणं साधकमित्यर्थः ॥

2. **वय इति** । यौवनोन्मेषेणैव हि युवतयो भूष्यन्ते माद्यन्ते काम्यन्ते चेति भावः ॥

3. **समधिकेति** । 'मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥' इति तल्लक्षणं ज्ञेयम् ॥

4. **धरणीति** । तलशब्दः स्वरूपवाची ॥

---

१. 'अथ—' इत्यादिः 'एवमन्यत्रापि' इत्यन्तः पाठो ग-पुस्तके नास्ति, तत्स्थाने 'अथायङ्गजाः—(शोभा) रूपोपभोगतारुण्यैः शोभाङ्गानां विभूषणम् ।' यथा—'ताः प्राङ्मुखीं तत्र निवेश्य बालां क्षणं व्यलम्बन्त पुरो निषण्णाः । भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने संनिहितेऽपि नार्यः ॥' इति. २. 'मन्मथाप्यायितच्छाया सैव कान्तिरिति स्मृता ।' इति ग. ३. ग-पुस्तके तु 'मन्मथ—' इति फक्किका नास्ति. तदग्रे 'उन्मीलद्वदनेन्दुदीप्तिविसरैर्दूरे समुत्सारितं भित्रं पीनकुचस्थलस्य च रुचा हस्तप्रभाभिर्हृतम् । एतस्याः कलविङ्ककण्ठकदलीकल्पं मिलत्कौतुकादप्राप्ताङ्गसुखं रुषेव सहसा केशेषु लग्नं तमः ॥' इत्युदाहरणं दृश्यते. ४ 'दीप्तिः कान्तेश्च विस्तारः' इति ग.

अथ माधुर्यम्—

सर्वावस्थाविशेषेषु[1] माधुर्यं[2] रमणीयता ।

यथा—

'[1]सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥'

अथ प्रगल्भता—

निःसाध्वसत्वं प्रागल्भ्यम्[3]

यथा—

'[4]सँमाश्लिष्टाः समाश्लेषैश्चुम्बिताश्चुम्बनैरपि ।
दष्टाश्च दंशनैः कान्तं दासीकुर्वन्ति योषितः ॥

अथौदार्यम्—

औदार्यं विनयः सदा ॥ ९७ ॥

यथा—

'न ब्रूते परुषां गिरं, वितनुते न भ्रूयुगं भङ्गुरं,
नोत्तंसं क्षिपति क्षितौ श्रवणतः सा मे [2]स्फुटेऽप्यागसि ।
कान्ता [3]गर्भगृहे गवाक्षविवरव्यापारिताक्ष्या बहिः
सख्या वक्त्रमभि प्रयच्छति परं पर्यश्रुणी लोचने ॥'

नामतिशयो लक्षणाप्रयोजनम् । **सरसिजमिति** । शकुन्तलाया वल्कलधारणेऽपि शोभातिशयमनुभवतो दुष्यन्तस्य स्वयं परामर्शोऽयम् । अनुविद्धं व्याप्तम् । लक्ष्मीं शोभाम् । **समाश्लिष्टा इति** । दन्तेनाधरादिखण्डनं दंशनम् । उत्तंसं कर्णभूषणम् । गर्भगृहे वासगृहाभ्यन्तरे । गवाक्षविवरेण व्यापारितं संचारितमक्षि यया

---

1. **सरसिजमिति** । यथा शैवललक्ष्मसंपर्कस्य माधुर्यविघटकत्वेऽपि कमलचन्द्रमसोर्नैसर्गिकमाधुर्यसत्त्वान्न क्वापि क्षतिस्तथा वल्कलधारणेन शकुन्तलाया अपीति भावः ॥

2. **स्फुट इति** । अन्योपभोगरूपेऽपराधे व्यक्ते सत्यपीत्यर्थः ॥

3. **गर्भेति** । गर्भगृहे स्थिता सती बहिरवलोकनार्थं गवाक्षविवरेण वातायनपथेन व्या-

---

१. 'अनुल्वणं माधुर्यम्' ग. २. 'उक्तं च—अभूषणेऽपि रम्यत्वं माधुर्यमिति गीयते' इत्यधिकं ग-पुस्तके. ३. 'मनःक्षोभपूर्वकोऽङ्गसादः साध्वसम्, तदभावः प्रागल्भ्यम् ।' इत्यधिकं ग-पुस्तके. ४. 'तथा व्रीडा विधेयापि तथा मुग्धापि सुन्दरी । कलाप्रयोगचातुर्यसभास्वाचार्यतां गता ॥' इत्युदाहरणान्तरं ग-पुस्तके.

अथ धैर्यम्—

[1]मुक्तात्मश्लाघना धैर्यं मनोवृत्तिरचञ्चला ।

यथा—

'ज्वलतु गगने रात्रौ रात्रावखण्डकलः शशी
दहतु मदनः किंवा मृत्योः परेण विधास्यति ।
[1]मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया
कुलममलिनं न त्वेवायं जनो न च जीवितम् ॥'

अथ लीला—

[2]अङ्गैर्वेषैरलंकारैः प्रेमिभिर्वचनैरपि ॥ ९८ ॥
प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः ।

यथा—

'[3]मृणालव्यालवलया वेणीबन्धकपर्दिनी ।
हरानुकारिणी पातु लीलया पार्वती जगत् ॥'

अथ विलासः—

[4]यानस्थानासनादीनां मुखनेत्रादिकर्मणाम् ॥ ९९ ॥
विशेषस्तु विलासः स्यादिष्टसंदर्शनादिना ।

तस्याः । अभिलक्ष्यीकृत्य प्रयच्छति अर्पयति । पर्यश्रुणी अश्रुव्याप्ते । **ज्वलत्विति** । ज्वलतु संतापकः सन् दीप्यताम् । 'परेण' इत्यव्ययमधिकार्थे । 'श्लाघ्य इति काकाक्षिगोलकन्यायेन उभयत्रान्वेति । यद्वा 'अमलान्वया' इति लिङ्गव्यत्ययेनान्वयः । न त्वेवायं जनः । स्थिर इति शेषः । मृणालमेव व्यालः सर्पो वलयं यस्याः, वेणीबन्ध

पारिते क्षिप्ते अक्षिणी यथा तथाभूतायाः सख्या वक्त्रमभि आननं लक्ष्यीकृत्य परं केवलं परिगतानि अश्रूणि ययोस्तथाभूते लोचने प्रयच्छति योजयति । विषयान्तरावलोकनप्रवणेयं ममैवंविधामवस्थां न ज्ञास्यतीति तथाचरति । अन्यथा स्वजनसमक्षं दुःखोत्पीडस्य प्रतिरोद्धुमशक्यतया तत्कारणाभिव्यक्तौ विनयव्यत्यासः स्यात् ॥

1. **ममेति** । मम तु दयितः प्रेयान् श्लाघ्यः, पिता च श्लाघ्यः, जननी च अमलान्वया महाकुलोत्पन्ना, कुलं स्वामिकुलममलिनं निष्कलङ्कम् । अयं मल्लक्षणो जनः न त्वेव स्थिरः, जीवितं च न स्थिरम् । अचिरावस्थायिनः शरीरस्य कृते मातृपितृभर्तृकुलकलङ्कनमतितरामनुचितमिति भावः ॥

---

१. 'चापलाविहता धैर्यं चिद्वृत्तिरविकत्थना । चापलानुपहता मनोवृत्तिरात्मगुणानाख्याविका धैर्यम् । तथा चोक्तम्—'शीलानुल्लङ्घनं धैर्यं कीर्त्यतेऽत्र मनीषिभिः ।' इति ग. २. 'लीलाप्रियानुकरणं वाग्भिर्गत्याथ चेष्टितैः ।' इति ग. ३. ग-पुस्तके तु 'इयं चेष्टानुरागेण तथानुकुरुते प्रियम् । मुक्तासूयं सपत्न्योऽपि वीक्षन्ते सस्पृहं यथा ॥' इत्युदाहरणम्. ४. 'तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु ॥' इति ग.

यथा—

'अत्रान्तरे किमपि वाग्विभवातिवृत्त-
वैचित्र्यमुल्लसितविभ्रममायताक्ष्याः ।
तद्भूरिसात्त्विकविकारमपास्तधैर्य-
माचार्यकं विजयि मान्मथमाविरासीत् ॥'

अथ विच्छित्तिः—

स्तोकाप्याकल्परचना विच्छित्तिः कांतिपोषकृत् ।[1]

यथा—

'स्वच्छाम्भःस्नपनविधौतमङ्गमोष्ठ-[2]
स्ताम्बूलद्युतिविशदो विलासिनीनाम् ।
वासस्तु प्रतनु विविक्तमस्त्रितीया-[1]
नाकल्पो यदि कुसुमेषुणा न शून्यः ॥'

अथ विव्वोकः—

विव्वोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः ॥ १०० ॥[3]

एव कपर्दो जटाजूटो यस्या अस्तीति । अत्रान्तरे नायकसंदर्शनादिसमये । वाग्विभवमतिवृत्तमतिक्रम्य स्थितं वैचित्र्यं गमनादिचातुरी यस्मात्तत् । ते प्रसिद्धाः भूरिसात्त्विकविकाराः स्तम्भादयो यस्मात्तत् । आचार्यकमुपाध्यायकर्म । उपदेश इत्यर्थः । स्तोका अल्पा आकल्परचना वेषविन्यासः । प्रतनु अतिसूक्ष्मम् । विविक्तं विमलम् ।

---

1. इतीति । इत्येवंरूप इयान् एतावानेव विलासिनीनामाकल्पो नेपथ्यमस्तु । किमन्यैरित्यर्थः । यदि स कुसुमेषुणा कामेन शून्यो न स्यात् । अन्यथा उद्विजितानामिव कनकभूषणमपि भारायत एवेति भावः ॥

---

१. 'स्तोकभूषणयोगेन विच्छित्तिरतिरन्यता ।' इति ग. २. 'कर्णायितो रोध्रकषायरूक्षे गोरोचनामेदनितान्तगौरे । तस्याः कपोलेऽपरभागलाभाद्बबन्ध चक्षूंषि यवप्ररोहः ॥' इति ग. ३. 'गर्वाभिमानादिष्टेऽपि विव्वोकोऽनादरक्रिया ।' तथा वात्स्यायनः—'सौभाग्यस्यातिगर्वेण यत्प्रियस्यावधीरणम् । ताडनं वावतंसेन स्रजा काञ्च्याथ बन्धनम् ॥ प्रियेऽल्पागसि शिञ्जाननूपुरेणाङ्घ्रिणा हतिः । दन्तखण्डितपत्रैश्चारोपस्थानेऽपि यत्स्मितम् ॥ प्रेयस्ताम्बूलरागेण रागश्चौष्ठप्रचालके । विव्वोकाख्यः स्मृतो हावः कामशास्त्रविचक्षणैः ॥ अभिनवगुप्तैस्तूपकृतावपि गर्वादनादरस्तन्व्याः । स्खलनं प्रियस्य संयम (न) ताडनमत्राभिधायि विव्वोकः ॥' अवधीरणे यथा कालिदासः—'निर्विभुज्य दशनच्छदं ततो वाचि भर्तुरवधीरणापरा । शैलराजतनया समीपगामाललाप विजयामहेतुकम् ॥' इति ग.

यथा—

'[3]यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परा
या [1]प्राणान्वरमर्पयन्ति न पुनः संपूर्णदृष्टिं प्रिये ।
अत्यन्ताभिमतेऽपि [2]वस्तुनि विधिर्यासां निषेधात्मक-
स्ताश्चैलोक्यविलक्षणप्रकृतयो [3]वामाः प्रसीदन्तु ते ॥'

अथ किलकिञ्चितम्—

[4]सितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम् ।
सांकर्यं किलकिञ्चितमभीष्टतमसंगमादिजाद्धर्षात् ॥ १०१ ॥

यथा—

'[4]पाणिरोधमविरोधितवाञ्छं भर्त्सनाश्च मधुरस्मितगर्भाः ।
कामिनः स कुरुते करभोरूर्हारि शुष्करुदितं च सुखेऽपि ॥'

अथ मोट्टायितम्—

तद्भावभावितं चित्ते वल्लभस्य कथादिषु ।

यासामिति । कंचित्कामिनं प्रति सख्युराशीर्वचनमिदम् । सद्गुणानामनुसरणे परैरुद्भावने दोषाणामनुवृत्तिः स्वयं पुनःपुनरुद्भावनम् । सांकर्यं मेलनम् । पाणिरोधं वस्त्रक्षेपणादिप्रवृत्तनायककरप्रतिबन्धम् । हारि मनोहरम् । कारणं विना रुदितं शुष्करुदितम् । सुखेऽपि सुखसमयेऽपि । तद्भावेन कान्तसद्भावेन भाविते व्याप्ते चित्ते

---

1. **प्राणानिति** । मानग्रहग्रस्तत्वात्प्राणार्पणं तावत्सुकरम्, न पुनः संपूर्णदृष्ट्यर्पणम् ॥

2. **वस्तुनीति** । नीवीस्रंसनादिरूपे ॥

3. **वामा इति** । वामा योषितः । इष्टेपि वस्तुनि अनिष्टोद्भावनं विलक्षणप्रकृतित्वे बीजम् ।

4. **पाणीति** । करभोरूः स्त्री अविरोधितवाञ्छमनिवारितप्रियमनोरथं यथा तथा कामिनः पाणिरोधं नीवीमोक्षणे व्यापृतस्य प्रियपाणेर्निवारणं कुरुते स्म । तथा मधुरं स्मितं गर्भे अन्तर्वर्ति यासु ता मन्दहासमिश्रा भर्त्सनास्तर्जनाश्च कुरुते स्म । तथा सुखेऽपि अधरपीडनादौ सुखातिरेके सत्यपि हारि मनोहरं शुष्करुदितमनश्रुत्वादनार्द्रं कृत्रिमरोदनं च कुरुते स्म । स्त्रीणामेष स्वभावो यदिष्टमप्यनिष्टतया निवारयन्त्य एव सुरतसुखमुपभुञ्जत इत्यर्थः ।

---

१. 'यासां–' इति श्लोको नास्ति ग-पुस्तके. २. 'क्रोधाश्रुहर्षमीत्यादेः संकरः किलकिञ्चितम् ।' इति ग. ३. 'रतिक्रीडाद्यूते कथमपि समासाद्य समयं मया लब्धे तस्याः क्षणितकलकण्ठार्धमधरे । कृतभ्रूभङ्गासौ प्रकटितविलक्षार्धरुदितस्मितक्रोधोद्भ्रान्तं पुनरपि विदध्यान्मयि मुखम् ॥' इति ग. ४. 'श्रुत्वा कथां प्रियजनस्य तु संनिधौ वा कर्णादरस्थितचलत्तनुजन्मनीकम् । यद्वाङ्गमङ्गमपि जृम्भितमङ्गनानां मोट्टायितं तदुदितं सरहस्यविद्भिः ॥' तथा च मुनिः—'कथायां संनिधौ वापि कर्णकण्डूविवृम्भणम् । कान्तस्य क्रियते वृथ्वा तद्धि मोट्टायितं मतम् ॥' इति ग.

मोट्टायितमिति प्राहुः कर्णकण्डूयनादिकम् ॥ १०२ ॥

यथा—

'[1]सुभग त्वत्कथारम्भे कर्णकण्डूतिलालसा ।
उज्जृम्भवदनाम्भोजा भिनत्त्यङ्गानि साङ्गना ॥'

अथ कुट्टमितम्—

**[2]केशस्तनाधरादीनां ग्रहे हर्षेऽपि संभ्रमात् ।
आहुः कुट्टमितं नाम शिरःकरविधूननम् ॥ १०३ ॥**

यथा—

'[3]पल्लवोपमितिसाम्यसपक्षं दष्टवत्यधरबिम्बमभीष्टे ।
पर्यकूजि सरुजेव तरुण्यास्तारलोलवलयेन करेण ॥'

अथ विभ्रमः—

**[4]त्वरया हर्षरागादेर्दयितागमनादिषु ।
अस्थाने विभ्रमादीनां विन्यासो विभ्रमो मतः ॥ १०४ ॥**

यथा—

'[5]श्रुत्वा यान्तं बहिः कान्तमसमाप्तविभूषया ।
भालेऽञ्जनं दृशोर्लाक्षा कपोले तिलकः कृतः ॥'

सति । कथादिषु सत्सु 'कर्णकण्डूयनादिभिः' इति पाठेऽभेदे तृतीया । आदिना-जृम्भाङ्गभङ्गादि । कर्णकण्डूतिलालसा कर्णकण्डूयनतत्परा । पल्लवोपमित्या यत्साम्यं तेन सपक्षं सखायम् । अभीष्टे नायके । पर्यकूजि महाशब्दः कृतः । शब्दोपयोगित्वं दर्शयति—**तारेति** । तारमतिशयं लोलं चपलं वलयं कङ्कणं यत्र तेन । सख्युर्दंशने व्यथा भवतीति भावः । **त्वरयेति** । हर्षादिजन्यत्वरयेत्यर्थः । तत्र प्रथमेनादिपदेन उत्सवादेः, द्वितीयादिपदेन दयिताभिसरणादेः, तृतीयेन लाक्षादेर्ग्रहणम् । असमाप्तविभू-

---

१. 'चित्तवर्तिन्यपि नृपे तत्त्वावेशेन चेतसि । व्रीडार्धवलितं चक्रे मुखेन्दुमवशैव सा ॥' इति **ग.** २. भरतः—'केशस्तनाधरादिग्रहणे रतहर्षसंभ्रमोपेतम् । कुट्टमितं विज्ञेयं सुखं च दुःखोपचारेण ॥' इति. **ग.** ३. ग-पुस्तके तु, 'पल्लव–' इति श्लोकस्य स्थाने 'दासीभवामि तव निर्दय निःसहास्मि मुञ्च क्षणं स्वपिमि देहि ममावकाशम् । इत्यादिकुट्टमितमाकुलमारचन्ती भूयो नवानि कुरुते रमणी रतानि ॥' इत्युदाहरणं दृश्यते, ततश्च भोजराजस्तु सरस्वतीकण्ठाभरणे विपरीतमेव लक्षणमाह—'केशस्तनाधरादीनां ग्रहाद्दुःखेऽपि यत्पुनः । सुखाविष्करणं तन्व्यास्तच्च कुट्टमितं मतम् ॥' यथा–'ह्रीभरादवनतं परिरम्भे रागवानवदुजेष्ववकृष्य । आर्पितोष्टदलमाननपद्मं योषितो मुकुलिताक्षमधासीत् ॥' इति. ४. 'विभ्रमस्त्वरया काले भूषास्थानविपर्ययः ।' यथाह शाक्यभिक्षुः—'क्रोधः स्मितं च कुसुमाभरणादियाच्ञा तत्तर्जनं च सहसैव विडम्बनं च । आक्षिप्य कान्तवचनं लपनं सखीनां निष्कारणेच्छितगतं खलु विभ्रमः स्यात् ॥' शिणिरपि—'साङ्गभङ्गं विकारेण सकटाक्षविलोकनैः । केशसंयमनव्याजाद्बाहुमूलप्रदर्शनैः ॥ मेखला···प्रकटनैः स्तननाभिप्रदर्शनैः । अभिलाषप्रकटनैर्विभ्रमः परिकीर्तितः ॥' इति **ग.** ५. ग-पुस्तके तु 'श्रुत्वा–' इति श्लोकस्य स्थाने 'अ[ङ्गा]गते शशिनि पेशलकान्तिदूतीसंलापसंचलितलोचनमानसाभिः । अग्राहि[मण्डन]विधिर्विपरीतभूषाविन्यासहासितसखीजनमङ्गनाभिः ॥' इति दृश्यते.

अथ ललितम्—

[1]सुकुमारतयाङ्गानां विन्यासो ललितं भवेत् ।

यथा—

'[2]गुरुतरकलनूपुरानुनादं सललितनर्तितवामपादपद्मा ।
इतरदनतिलोलमादधाना पदमथ मन्मथमन्थरं जगाम ॥'

अथ मदः—

[3]मदो विकारः सौभाग्ययौवनाद्यवलेपजः ॥ १०५ ॥

यथा—

'[4]मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति ।
[1]अन्यापि किं न खलु भाजनमीदृशीनां
वैरी न चेद्भवति वेपथुरन्तरायः ॥'

अथ विहृतम्—

[5]वक्तव्यकालेऽप्यवचो व्रीडया विहृतं मतम् ।

षया कान्तया । विन्यासोऽप्रचण्डविक्षेपः । **गुरुतरेति** । प्रथमपादः क्रियाविशेषणार्थकः । इतरत् दक्षिणम् । अनतिलोलमनतिचञ्चलम् । यौवनादीत्यादिपदेनालंकारादेर्ग्रहणम् । **मा गर्वमिति** । 'मम कपोलतले' इत्यन्वयः । ईदृशीनां मञ्जरीणाम् । वैरी शत्रुरिव तव तावत्कपोलतले एकैव मञ्जरी यदक्षयापि भवितुमर्हति, तेन सौभाग्यातिशयो न नियमतः प्रतीयत इति गर्वो नोचित एव । ईदृशीनामिति बहुव-

---

1. **अन्येति** । चेद्यदि वेपथुः स्पर्शसंजातसात्त्विकभावविशेषः वैरी मञ्जरीरचनाविघटकत्वेन सपत्न इव अन्तरायो विघ्नो न भवति, तदा अन्यापि ईदृशीनां त्वत्कपोलतललिखितया मञ्जर्या सदृशीनामनेकासां मञ्जरीणां भाजनं पात्रं किं न खलु भवति । भवत्येवेत्यर्थः ॥

---

१. 'सुकुमाराङ्गविन्यासो मसृणो ललितं भवेत् ।' इति ग. २. 'सभ्रूभङ्गं करकिसलयावर्तनैराललपन्ती सा पश्यन्ती ललितललितं लोचनस्याञ्चलेन । विन्यस्यन्ती चरणकमले लीलया स्वैरपातैर्निःसंगीतं प्रथमवयसा नर्तिता पङ्कजाक्षी ॥' यद्वा, 'सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी गत्वा जवान्त्रिचतुराणि पदानि सीता । गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा रामाश्रुणः कृतवती प्रथमावतारम् ॥' इत्युदाहरणान्तरे ग-पुस्तके. ३. 'मधुपानमदप्रायस्तारुण्यातिशयोद्भवः । विकारो यौवने स्त्रीणां त वदन्ति मदं बुधाः ॥' इति ग. ४. 'आलापः स्खलितकौमुदीसहचरो दृष्टिः प्रहर्षोल्लसद्भ्रूनृत्याध्वरदीक्षिता चरणयोर्न्यासः समे भङ्गुरः । वेषेषु क्षणिकाः स्पृहा मदविधावद्वैतवादाश्च ते त्वद्ध्यानैकविकारसूर्मधुमदप्रायो मदः स्फूर्जति ॥' इत्युदाहरणान्तरं ग-पुस्तके. ५. 'विकृतम्' घ. ६. 'प्रातकालं न यद्भूयाद्व्रीडया विहृतं हि तत् । इति ग. ७. 'विकृतम्' घ.

यथा—

'[1]दूरागतेन कुशलं पृष्टा नोवाच सा मया किंचित् ।
पर्यश्रुणी तु नयने तस्याः कथयांबभूवतुः सर्वम् ॥'

[2]अथ तपनम्—

तपनं प्रियविच्छेदे स्मरावेगोत्थचेष्टितम् ॥ १०६ ॥

यथा मम—

'श्वासान्मुञ्चति, भूतले विलुठति, त्वन्मार्गमालोकते,
दीर्घं रोदिति, विक्षिपत्यंत[1] इतः क्षामां भुजावल्लरीम् ।
किंच, प्राणसमान, काङ्क्षितवती स्वप्नेऽपि ते संगमं
निद्रां वाञ्छति, न प्रयच्छति पुनर्दग्धो विधिं[2]स्तामपि ॥'

अथ मौग्ध्यम्—

**[3]अज्ञानादिव या पृच्छा प्रतीतस्यापि वस्तुनः ।
वल्लभस्य पुरः प्रोक्तं मौग्ध्यं तत्तत्त्ववेदिभिः ॥ १०७ ॥**

यथा—

'के[4] द्रुमास्ते क्व वा ग्रामे सन्ति केन प्ररोपिताः ।
नाथ मत्कङ्कणन्यस्तं येषां मुक्ताफलं फलम् ॥'

चनेन सौभाग्यातिशयः सूचितः । **सर्वमिति** । मम प्रवासे दुःखातिशयमागमने हर्षातिशयं चेत्यर्थः । **स्मरवेगोत्थेति** । कामोद्वेगजनितेत्यर्थः । **श्वासानिति** । प्रवासिनं प्रति सख्युक्तिरियम् । हे प्राणसमान, दग्धो निर्दयः । तां निद्राम् । तेषां द्रुमाणां फलमित्यन्वयः । वृथा निष्कारणम् । विष्वक् सर्वतः । रहस्याख्यानं गुह्य-

---

1. **अत इति** । अत इतः । इतस्तत इत्यर्थः ॥

2. **तामपीति** । विधिः तस्यै निद्रामपि न प्रयच्छति, यत्र तव समागमः स्यात् ॥

---

१. ग-पुस्तके तु 'दूरागतेन-'इत्यस्य स्थाने 'पादाङ्गुष्ठेन भूमि किसलयरुचिना सापदेशं लिखन्ती भूयो भूयः क्षिपन्ती मयि सितशबले लोचने लोलतारे । वक्त्रं ह्रीनम्रमीषत्स्फुरदधरपुटं वाक्यगर्भं दधाना यन्मां नोवाच किंचित्स्थितमपि पुरतो मानसं तद्नुनोति ॥' इति श्लोकोऽस्ति. २. 'अथ-' इत्यादिः '-तामपि ॥' इत्यन्तः पाठो नास्ति ग पुस्तके. ३. 'बाल्ये गते वचोभङ्गी रामाणां कान्तसंनिधौ । हारमौक्तिकमालेव तन्मौग्ध्यं परिकीर्तितम् ॥' इति ग. ४. ग-पुस्तके तु 'यदि चूतस्य मञ्जर्यां सख्यः संनिहितः स्मरः । मन्नायां तत्कथं सौख्यं मनागपि न दृश्यते ॥' 'सत्यं किमन्यदेशेऽपि विद्यते मृगलाञ्छनः । एवमादिवचो बाल्ये व्यतीते मौग्ध्यमुच्यते ॥' 'यतः प्रभृत्यहं सख्यः शिरीषकुसुमैर्हता । ततः प्रभृति मे शूलं हृदि तन्मौग्ध्यमीरितम् ॥' आचार्यस्तु—'स्त्रीणां स्वभावमेव मौग्ध्यं मन्यते ।' इति.

अथ विक्षेपः—

[1]भूषणामर्धरचना मिथ्या विष्वगवेक्षणम् ।
रहस्याख्यानमीषच्च विक्षेपो दयितान्तिके ॥ १०८ ॥

यथा—

'[2]धम्मिल्लमर्धमुक्तं कलयति तिलकं तथासकलम् ।
किंचिद्वदति रहस्यं चकितं विष्वग्विलोकते तन्वी ॥'

अथ कुतूहलम्—

[3]रम्यवस्तुसमालोके लोलता स्यात्कुतूहलम् ।

यथा—

'[4]प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान ॥'

अथ हसितम्—

[5]हसितं तु वृथाहासो यौवनोद्भेदसंभवः ॥ १०९ ॥

यथा—

'अकस्मादेव तन्वङ्गी जहास यदियं पुनः ।
नूनं प्रसनवाणोऽस्यां स्वाराज्यमधितिष्ठति ॥'

अथ चकितम्—

[6]कुतोऽपि दयितस्याग्रे चकितं भयसंभ्रमः ।

भाषणम् । धम्मिल्लं बद्धकेशसमूहम् । असकलं खण्डितम् । लोलता सतृष्णत्वम् । प्रसाधिका मण्डनकर्त्री, तया आलम्बितं धारितम् । द्रवरागमशुष्कलाक्षारसम् । अलक्तकाङ्कां लाक्षाचिह्नाम् । पदवीं पन्थानम् । अत्र हृदर्शनाय कस्याश्चिद्रागातिशयः कुतूहलम् । यौवनोद्भेदो यौवनोत्पत्तिः । अकस्मात्कारणं विना । स्वाराज्यं स्वर्गवदधिकारम् । अधितिष्ठति कुरुते । कुतोऽपीति । अलक्षितकारणादित्यर्थः । भयसंभ्रमः

---

१. 'अन्यथा वेषविन्यासो विकाराद्यो भवेत्स्त्रियाम् । तमामनन्ति विक्षेपं श्रीशाल्यकपिलादय ॥' इति ग. २. 'चकार काचित्स्खलितचन्दनाङ्के काञ्चीकलापं स्तनभारपृष्ठे । प्रियं प्रति प्रेषितचित्तवृत्तिर्निस्तम्बबिम्बे चपलं च हारम् ॥' इति ग. ३. 'अनुरागकाल एव प्रियतमोपसर्पणं कुतूहलम् ॥ यथाह भरतः—'कुतूहलं रम्यदृष्टौ चापलं परिकीर्तितम् ।" इति ग. ४. ग-पुस्तके तु 'पारावत इवानङ्गमोहिते कूजति प्रिये । पश्य कौतुकिनी जाया समीपमुपसर्पति ॥' इत्युदाहरणम्. ५. 'आकस्मिकं तु हसितं यौवनादिविकारजम् ॥' इति ग. ६. 'अधिगच्छति' ग. ७. 'त्रासेन लज्जया वापि निजवल्लभसंनिधौ । संभ्रमान्निशयो यस्तच्चकितं सूत्रकृन्मतम् ॥' इति ग.

[1]यथा—

'त्रस्यन्ती चलशफरीविघट्टितोरू-
वीमोरूरतिशयमाप विभ्रमस्य ।
क्षुभ्यन्ति प्रसभमहो विनापि हेतो-
र्लीलाभिः किमु सति कारणे तरुण्यः ॥'

अथ केलिः—

[2]विहारे सह कान्तेन क्रीडितं केलिरुच्यते ॥ ११० ॥

यथा—

'[3]व्यपोहितुं लोचनतो मुखानिलैरपारयन्तं किल[1] पुष्पज रजः ।
पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी ॥'

अथ मुग्धाकन्ययोरनुरागेङ्गितानि—

**दृष्ट्वा दर्शयति व्रीडां संमुखं नैव पश्यति ।
प्रच्छन्नं वा भ्रमन्तं वातिक्रान्तं पश्यति प्रियम् ॥ १११ ॥
[2]बहुधा पृच्छ्यमानापि मन्दमन्दमधोमुखी ।
सगद्गदस्वरं किंचित्प्रियं प्रायेण भाषते ॥ ११२ ॥
अन्यैः प्रवर्तितां शश्वत्सावधाना च तत्कथाम् ।
शृणोत्यन्यत्र दत्ताक्षी प्रिये बालानुरागिणि ॥ ११३ ॥**

भयेनातिचाञ्चल्यम् । विभ्रमस्य भ्रमणविशेषस्य । क्षुभ्यन्ति भयव्याकुला भवन्ति । किमु सुतरामित्यर्थः । **विहारे इति** । कान्तेन सह क्रियमाणे विहारे सति यन्नायिकायाः क्रीडितं सा केलिरित्यर्थः । व्यपोहितुं निरसितुम् । अपारयन्तमशक्नुवन्तम् । अनुरागेङ्गितानि अनुरागसूचकचेष्टितानि । प्रच्छन्नं भित्त्यादिव्यवहितम् । अतिक्रान्तं

---

1. किलेति । किलेत्यलीके । वस्तुतस्तदास्यस्पर्शलोभादपारयन्तमित्यर्थः ॥

2. बहुधेति । कामसूत्रेऽप्युक्तम्—'पृष्टा च किंचित्सस्मितमव्यक्ताक्षरमनवसितार्थं च मन्दं मन्दमधोमुखी कथयति ।' इति ॥

---

१. ग-पुस्तके तु 'तत्र त्रासेन यथा–'परिस्फुरन्मीनविघट्टितोरवः स्खरङ्गनास्रासविलोलदृष्टयः । उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् ॥' लज्जया यथा—'अभिमुनि सहसा हृते परस्या घनमरुता जघनांशुकैकदेशे । चकितमवसनोरु सत्रपायाः प्रतियुवतीरपि विस्मयं निनाय ॥' इत्युदाहरणे. २. 'वल्लभेन सहैकान्ते कान्तायाः क्रीडितेषु यः । चुम्बनालिङ्गनादीनां विशेषः केलिरुच्यते ॥' इति ग. ३. 'मदनशरहतस्योपांशु कान्ता समन्तादुपरि निरवलम्बा प्रेयसो निष्पपात । सपदि स पतिरेनामालिलिङ्गे चुचुम्बे सरशरविनिपात केवलं पुण्यभाजाम् ॥' इति ग.

अथ सकलानामपि नायिकानामनुरागेङ्गितानि—

चिराय सविधे स्थानं प्रियस्य बहु मन्यते ।
विलोचनपथं चास्य न गच्छत्यनलंकृता ॥ ११४ ॥
क्वापि [1]कुन्तलसंव्यानसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत्स्फुटम् ॥ ११५ ॥
[2]आच्छादयति वागाद्यैः प्रियस्य परिचारकान् ।
विश्वसित्यस्य मित्रेषु बहु मानं करोति च ॥ ११६ ॥
सखीमध्ये गुणान्ब्रूते स्वधनं प्रददाति च ।
सुप्ते स्वपिति दुःखेऽस्य दुःखं धत्ते सुखे सुखम् ॥ ११७ ॥
[3]स्थिता दृष्टिपथे शश्वत्प्रिये पश्यति दूरतः ।
आभाषते परिजनं संमुखं स्मरविक्रियम् ॥ ११८ ॥
[4]यत्किंचिदपि संवीक्ष्य कुरुते हसितं मुधा ।
कर्णकण्डूयनं तद्वत्कबरीमोक्षसंयमौ ॥ ११९ ॥
जृम्भते स्फोटयत्यङ्गं [5]बालमाश्लिष्य चुम्बति ।
[6]भाले तथा वयस्याया रचयेत्तिलकक्रियाम् ॥ १२० ॥
अङ्गुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते ।
दशति स्वाधरं चापि ब्रूते प्रियमधोमुखी ॥ १२१ ॥
न मुञ्चति च तं देशं नायको यत्र दृश्यते ।

दूरे गच्छन्तम् । तत्कथां प्रियकथाम् । कुन्तलेति । केशसमूहबन्धनच्छलेनेत्यर्थः । आच्छादयति वशीकरोति । वाक् प्रियवचनम् । आद्यपदादन्नवस्त्रादिदानानां ग्रह-

---

1. कुन्तलेति । कुन्तलः केशपाशः । संवीयतेऽनेनेति संव्यानम् । 'व्येञ् संवरणे' । ल्युट् । 'संव्यानमुत्तरीयं च' इत्यमरः । तयोर्यः संयमो यथोचितन्यासस्तद्व्यपदेशतस्तद्व्याजादिति वास्तवार्थः ॥

2. आच्छादयतीति । कामसूत्रेऽप्युक्तम्—'परिजनानवष्टभ्य तास्ताश्च लीला दर्शयति, तन्मित्रेषु विश्वसिति, वचनं चैषां बहु मन्यते करोति च, तत्परिचारकैः सह प्रीतिं संकथां द्यूतमिति च करोति ।' इत्यादि ॥

3. स्थितेति । कामसूत्रेऽप्युक्तम्—'दूरे स्थिता, पश्यतु मामिति मन्यमाना परिजनं समदनविकारमाभाषते ।' इति ॥

4. यदिति । कामसूत्रेऽप्युक्तम्—'यत्किंचिद्दृष्ट्वा विहसितं करोति ।' इति ॥

5. बालमिति । कामसूत्रेऽप्युक्तम्—'बालस्याङ्गगतस्यालिङ्गनं चुम्बनं च करोति ।' इति॥

6. भाल इति । कामसूत्रेऽप्युक्तम्—'परिचारिकायाश्च तिलकं रचयेत् ।' इति ॥

आगच्छति गृहं तस्य कार्यव्याजेन केनचित् ॥ १२२ ॥
दत्तं किमपि कान्तेन धृत्वाङ्के मुहुरीक्षते ।
नित्यं हृष्यति तद्योगे वियोगे मलिना कृशा ॥ १२३ ॥
मन्यते बहु तच्छीलं तत्प्रियं मन्यते प्रियम् ।
प्रार्थयत्यल्पमूल्यानि सुप्ता न परिवर्तते ॥ १२४ ॥
विकारान्सात्त्विकानस्य संमुखी-ह्याधिगच्छति ।
भाषते मृनृतं स्निग्धामनुरक्ता नितम्बिनी ॥ १२५ ॥
एतेष्वधिकलज्जानि चेष्टितानि नवस्त्रियाः ।
मध्यव्रीडानि मध्यायाः स्रंसमानत्रपाणि तु ॥ १२६ ॥
अन्यस्त्रियाः प्रगल्भायास्तथा स्युर्वारयोषितः ।

दिङ्मात्रं यथा मम—

'अन्तिकगतमपि मामियमनलोकयतीव हन्त दृष्ट्वापि ।
सरसनखक्षतलक्षितमाविष्कुरुते भुजामूलम् ॥'

तथा[2]—

लेखाप्रस्थापनैः स्निग्धैर्वीक्षितैर्मृदुभाषितैः ॥ १२७ ॥
दूतीसंप्रेषणैर्नार्या भावाभिव्यक्तिरिष्यते ।

दूत्यश्च—

दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी ॥ १२८ ॥
बाला प्रव्रजिता[1] कारूः शिल्पिन्याद्याः स्वयं तथा ।

णम् । अस्य प्रियस्य । संमुखमिति परिजनस्य विशेषणम् । तद्योगे प्रियसंगमे । तच्छीलं प्रियचरित्रम् । तत्प्रियं प्रियाभीष्टं वस्तु । प्रार्थयतीति परस्मैपदम्, आत्मनेपदस्य प्रायिकत्वात् । अधिगच्छति प्रकाशयति । सूनृतं प्रियसत्यवचनम् । स्निग्धां वयस्याम् । 'स्निग्धम्' इति पाठे स्नेहव्यञ्जकं यथा स्यात्तथा भाषत इत्यर्थः । सरसनखक्षतेन आर्द्रनखाघातेन लक्षितं चिह्नितम् । लेख्यप्रस्थापनं यथा—'विज्ञप्तिरेषा मम

---

1. **प्रव्रजितेति** । इह प्रव्रजिताशब्देन श्रमणाक्षपणारक्तपट्टिकादयस्तद्विशेषा अपि ग्राह्याः । कारूस्तक्षादीनां योषित् । 'तक्षा च तन्तुवायश्च नापितो रजकस्तथा । पञ्चमश्चर्मकारश्च कारवः शिल्पिनो मताः ॥' इति ॥

---

१. ग-पुस्तके तु 'अथ मुग्धाकन्ययोः—' इत्यारभ्य —'भुजामूलम् ।' इत्यन्तो ग्रन्थो न दृश्यते. २. 'तथा' म-पुस्तके नास्ति. ३. 'लेख—' ग. ४. 'चैव तथा संदेशभाषणैः' ग. ५. 'दूत्यः सप्तविधाः प्रायो धात्रेयी प्रतिवेशिनी' इति ग.

कारू रजकीप्रभृतिः । शिल्पिनी[1] चित्रकारादिस्त्री । आदिशब्दात्ता-म्बूलिकगान्धिकस्त्रीप्रभृतयः ।

तत्र सखी यथा—'श्वासान्मुञ्चति–' इत्यादि ।

स्वयंदूती यथा मम—

'पन्थिअ पिआसिओ विअ लच्छिअसि जासि ता किमण्णत्तो ।
ण मणापि वारओ इध अत्थि घरे घणरसं पिअन्ताणम् ॥'

एताश्च[2] नायिकाविषये नायकानामपि दूत्यो भवन्ति ।

दूतीगुणानाह[3]—

कलाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः ॥ १२९ ॥
माधुर्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः ।
एता अपि यथौचित्यादुत्तमाधममध्यमाः ॥ १३० ॥

एता दूत्यः ।

जीववन्धो तत्रैव नेया दिवसाः कियन्तः । संप्रत्ययोग्यस्थितिरेष देशः करा यदिन्दो-रुपतापयन्ति ॥' **पन्थिअ इति** । 'पान्थ पिपासित इव लक्ष्यसे यासि तत्किम-न्यत्र । न मनागपि वारक इहास्ति गेहे घनरसं पिबताम् ॥' इति संस्कृतम् । पिपासा जलतृष्णा । पक्षे—संभोगेच्छा । घनरसं जलम् । पक्षे—संभोगसुखम् । पिबतामनुभवताम् । यद्वा घनो निविडो रसो रागो यत्र सोऽधरस्तम् । एता अनन्तरोक्ताः सख्यादयः । तद्गुणाः दूतीगुणाः । व्यसनं द्विविधम्—कामजं कोपजं च ।

---

1. **ताम्बूलिकेनि** । ताम्बूलं शिल्पमस्येति ताम्बूलिकः, एवं गान्धिकः । एतदादीना स्त्रियो हि प्रगल्भा निष्णाता अप्रतिषिद्धगमनाश्च भवन्ति । वात्स्यायनोऽप्याह—'विध-वेक्षणिका दासी भिक्षुकी शिल्पकारिका । प्रविशत्याशु विश्वासं दूतीकार्यं च विन्दति ॥' गृहमिति शेषः ॥

2. **पन्थीति** । गीतिरियम् । तदुक्तम्—'गाथाद्वितीयतुर्यावष्टादशमात्रकौ यदा भवतः । मात्राषष्टिशरीरा प्रोक्ता सा गीतिरिह फणिपतिना ॥' इति ॥

3. **एता इति** । वात्स्यायनो दूतीकर्माण्यप्याह—'विद्वेषं ग्राहयेत्पत्यौ रमणीयानि वर्णयेत् । चित्रान्सुरतसंभोगानन्यासामपि दर्शयेत् ॥ नायकस्यानुरागं च पुनश्च रतिकौ-शलम् । प्रार्थनां चाधिकस्त्रीभिरवष्टम्भं च वर्णयेत् ॥' श्लाघनीयया चास्य प्रच्छन्नं संयोगं भूतमभूतपूर्वं वा वर्णयेत् । अवष्टम्भं नायिकाविषयं निश्चयम् ॥

---

१. 'शिल्पिनी–' इत्यारभ्य 'इत्यादि' इत्यन्तः पाठो ग-पुस्तके नास्ति. २. 'एताश्च–'इति फक्किका नास्ति ग-पुस्तके. ३. 'दूती–' इत्यारभ्य '–दूत्यः' इत्यन्तः पाठो ग-पुस्तके नास्ति.

अथ प्रतिनायकः—

धीरोद्धतः पापकारी व्यसनी प्रतिनायकः ।

यथा—रामस्य रावणः ।

अथोद्दीपनविभावाः—

उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ॥ १३१ ॥

ते च—

आलम्बनस्य चेष्टाद्या देशकालादयस्तथा ।

चेष्टाद्या इत्याद्यशब्दाद्रूपभूषणादयः । कालादीत्यादिशब्दाच्चन्द्रचन्दनकोकिलालापभ्रमरझंकारादयः ।

तत्र चन्द्रोदयो यथा मम—

'करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य ।
विकसितकुमुदेक्षणं विचुम्बत्ययममरेशदिशो मुखं सुधांशुः ॥'

यो यस्य रसस्योद्दीपनभावः स तत्स्वरूपवर्णने वक्ष्यते ।

तद्योगाद् व्यसनी । व्यसनान्याह मनुः—'कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः । विषुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ॥ मृगयाक्षो दिवा स्वप्नः परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥ पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् । वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥' अक्षो द्यूतक्रीडा । तौर्यत्रिकं नृत्यगीतवाद्यानि त्रीणीति दश । पैशुन्यं अविज्ञातपरदोषाविष्करणम् । साहसं साधोर्बन्धनादिना निग्रहः । द्रोहो जिघांसा । ईर्ष्या परगुणासहिष्णुता । असूया परगुणेषु दोषाविष्करणम् । अर्थदूषणं अर्थानामपहरणम्, देयानामदानं च । उद्दीपयन्ति परिपोषातिशयं नयन्ति । आलम्बनस्य नायिकादेः । चेष्टा नेत्रविक्षेपादिः ।

---

1. **करमिति** । अयं सुधांशुः शशी (नायकश्च) गलितं च्युतं तमःपटलं तिमिरवितानमेव (तद्वच्च) अंशुकं वसनं यस्य तथाभूते उदयमहीधर उदयाचल एव (तद्वच्च) स्तनः पयोधरस्तदग्रे करं किरणं (पाणिं च) निवेश्य । करेण स्तनाग्रमवलम्ब्येति तत्त्वम् । अमरेशदिशः पूर्वाशायाः (नायिकायाश्च) विकसितानि प्रफुल्लानि कुमुदानि कैरवाण्येव (तद्वच्च) ईक्षणे नयने यथा तथा मुखं प्राचीनारम्भलक्षणं (वदनं च) चुम्बति । चुम्बनं संबन्धः वदनसंयोगविशेषश्चेति ॥

---

१. 'ते चोद्यानभः—कालचन्द्रभृङ्गरुतादयः । यथा—'वियदलि—' इत्यादि ।' इत्यधिकं ग. पुस्तके. २. 'आलम्बनस्य—' इत्यादिः —'अनुभावाः' इत्यन्तः पाठो ग-पुस्तके नास्ति. ३. 'चेष्टादि' क-ख. ४. 'इत्यादि' क. ५. 'आलाप' इति क-पुस्तके नास्ति. ६. 'अत्र' क.

अथानुभावाः—

उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ॥ १३२ ॥
लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ।

यः[1] खलु[2] लोके सीतादिचन्द्रादिभिः स्वैः स्वैरालम्बनोद्दीपनकारणै रामादेरन्तरुद्बुद्धं[3] रत्यादिकं बहिः प्रकाशयन्कार्यमित्युच्यते, स काव्यनाट्ययोः पुनरनुभावः ।

कः पुनरसावित्याह—

उक्ताः स्त्रीणामलंकारा अङ्गजाश्च स्वभावजाः ॥ १३३ ॥
तद्रूपाः सात्त्विका भावास्तथा चेष्टाः परा अपि ।

तद्रूपा[4] अनुभावस्वरूपाः । तत्र यो यस्य रसस्यानुभावः स तत्स्वरूपवर्णने वक्ष्यते ।

तत्र[5] सात्त्विकाः—

विकाराः[6] सत्त्वसंभूताः सात्त्विकाः परिकीर्तिताः ॥१३४॥

सत्त्वं नाम स्वात्मविश्रामप्रकाशकारी कश्चनान्तरो धर्मः ।

सत्त्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः ।

'गोबलीवर्दन्यायेन' इति शेषः ।

के त इत्याह—

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ॥ १३५ ॥

करं किरणं पाणिं च । अमरेशादिशः प्राच्याः । उद्बुद्धमिति विवृणोति—**यः खलिवति** । बहिः प्रकाशयन् अनुभापयन् । अङ्गजा भावादयस्त्रयः । स्वभावजा लीलादयोऽष्टादश । शोभाकान्त्यादीनां रत्यादिप्रकाशकत्वाभावान्नानुभावरूपता । चेष्टा नायकस्य नेत्रविक्षेपादयः । पराः सात्त्विकविकारभिन्नाः । **सत्त्विमिति** । स्वात्मनि एव विश्रामो यस्य स रसादिः, तस्य प्रकाश उद्बोधस्तत्कारी । प्रागुक्तमपि सत्त्वलक्षणं शिष्याणां विविधव्युत्पत्त्यै प्रकारान्तरेण पुनरुक्तम् । ते सात्त्विका विकाराः । **भिन्ना अपीति** । अपिना अभिन्ना इत्यस्य लाभः । ननु भेदाभेदयोर्विरोध इत्यत आह—**गोबलीवर्देति** । तथा चानुभावत्वावच्छिन्नप्रतियोगिताकभेदाभावेन सहानुभावत्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकभेदस्य समावेशः ।

---

१. 'वागङ्गसत्त्वाभिनयैर्यस्मादर्थो विभाव्यते । वागङ्गोपाङ्गसंयुक्तः सोऽनुभाव इति स्मृतः ॥' इति ग. २. 'यः खलु—' इत्यादिः '—आह' इत्यन्तः पाठो ग-पुस्तके नास्ति. ३. 'अन्तः' इति क-पुस्तके नास्ति. ४. 'तद्रूपाः—' इत्यादिः '—सात्त्विकाः' इत्यन्तः पाठो ग-पुस्तके नास्ति. ५. 'अत्र' क. ६. 'सत्त्वमात्रोद्भवा भावाः' इति ग.

वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ।

[1]तत्र

[3]स्तम्भश्चेष्टाप्रतीघातो भयहर्षामयादिभिः ॥ १३६ ॥
वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः ।
[3]हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया ॥ १३७ ॥
[4]मदसंमदपीडाद्यैर्वैस्वर्यं गद्गदं विदुः ।
[5]रागद्वेषश्रमादिभ्यः कम्पो गात्रस्य वेपथुः ॥ १३८ ॥
विषादमदरोषाद्यैर्वर्णान्यत्वं विवर्णता[6] ।
अश्रु नेत्रोद्भवं वारि क्रोधदुःखप्रहर्षजम् ।
[7]प्रलयः सुखदुःखाभ्यां चेष्टाज्ञानानेराकृतिः ॥[8] १३९ ॥

यथा बलीवर्दे गोत्वावच्छिन्नप्रतियोगिताकभेदाभावेन सह गोत्वसमानाधिकरणधेनुत्वादिधर्मावच्छिन्नप्रतियोगिताकभेदस्येति भावः । 'विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः ।' इत्यादौ सात्त्विकभावस्य पृथगुपन्यासेनानुभावातिरिक्तत्वशङ्कानिरासार्थमिह पृथगुपादानम् । प्रतीघातः प्रतिबन्धः । वपुषो जलोद्गमः । रोम्णो विक्रिया उद्गमः । वैस्वर्यं स्वरविकारः । **सुखदुःखाभ्यामिति** । सुखेन दुःखेन वेत्यर्थः ।

---

१. 'अत्र' क. २. 'भयहर्षानुरागतः । यथा—अधीराक्ष्याः कटाक्षा वः श्रेयसे सन्तु जिष्णवः । युवानस्तत्र तत्रैव यत्पातैर्लिखिता इव ॥ स्वेदो यथा—वपुर्जलोद्गमः स्वेदो रतितापश्रमादिभिः । यथा—कान्तानां कृतपुलकाः स्तनान्तराले वक्त्रेषु च्युततिलकेषु मौक्तिकाभाः । आपेदे श्रमसलिलोद्गमो विभूषां रम्याणां विकृतिरपि श्रियं तनोति ॥' इति ग. ३. 'अथ रोमाञ्चः—रोमाञ्चः प्रोद्गमो रोम्णां रोमहर्षादिभिस्तनौ । यथा—प्रेयःकरतलस्पर्शा·····पुलकोत्कराः । प्रियागण्डस्थले भान्ति हर्षवीजाङ्कुरा इव ॥ अत्राचार्यास्तु—यत्र यत्र रसोत्कर्षः श्रूयते दृश्यतेऽपि वा । स्वप्रीत्यभिगमेनासौ रोमाञ्चः सर्वभावजः ॥' इति ग. ४. 'स्वरभङ्गो यथा—गद्गदो विस्वरत्वं च वैस्वर्यं प्रमदादिभिः । यथा—उन्मादिकोकिलकुक्कणनोज्ज्वलानि संवाद्यमानकुररीगणकूजितानि । संभ्रान्तगद्गदविभिन्नमृदुस्वराणि चेतो हरन्ति वचनानि सरोरुहाक्ष्याः ॥' इति ग. ५. 'वेपथुर्यथा—रागरोषभयादिभ्यः कम्पो गात्रस्य वेपथुः । यथा—मा गर्वमुद्वह कपोलतले चकास्ति कान्तस्वहस्तलिखिता मम मञ्जरीति । अन्यापि किं सखि न भाजनमीदृशीनां वैरी न चेद्वपुषि वेपथुरन्तरायः ॥ रागाद्यथा—वारंवारं तिरयति दृशोरुद्गमं बाष्पपूरस्तत्संकल्पोपहितजडिमस्तम्भमभ्येति गात्रम् । सद्यः स्विद्यत्प्रमदविरतोत्कम्पलोलाङ्गुलीकः पाणिर्लेखाविधिषु नितरां कम्पते किं करोमि ॥ एवं रोषादिभिरूह्यम् ।' इति ग. ६. ग-पुस्तके तु 'विवर्णता' इत्यस्मादग्रे 'परिमृदित–' इति श्लोको दृश्यते. ७ ग-पुस्तके तु 'प्रहर्षजम्' इत्यस्मादग्रे 'यथा—शशाम वृष्ट्या मेघानामुत्सङ्के तस्य भूभृतः । विरराम न रामस्य धारासंततिरश्रुणः ॥' इति श्लोको वर्तते. ८. 'प्रलयो यथा—प्रलयो रागदुःखादेरिन्द्रियास्तमयो मतः । यथा—प्रेमार्द्राः प्रणयस्पृशः इत्यादि ।' इति ग.

यथा मम—

'[1]तनुस्पर्शादस्या दरमुकुलिते हन्त नयने
उदञ्चद्रोमाञ्चं व्रजति जडतामङ्गमखिलम् ।
कपोलौ घर्मार्द्रौ ध्रुवमुपरताशेषविषयं
मनः सान्द्रानन्दं स्पृशति झटिति ब्रह्म परमम् ॥'

एवमन्यत् ।

अथ व्यभिचारिणः—

विशेषादाभिमुख्येन चरणाद्व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्भिदाः ॥ १४० ॥

स्थिरतया वर्तमाने हि रत्यादौ निर्वेदादयः प्रादुर्भावतिरोभावाभ्यामाभिमुख्येन चरणाद् व्यभिचारिणः कथ्यन्ते ।

ब्रह्म परमिति । ब्रह्मनिविष्टचेतसो यथा चेष्टावाह्यज्ञाननिरासो भवति तथा नायिकानिविष्टचेतसोऽपीति भावः । अत्र स्तम्भस्वेदरोमाञ्चप्रलयाः । **एवमन्यदिति** । 'बाले नाथ विमुञ्च मानिनि रुषम्–' इत्यत्र स्वरभङ्गः । 'मा गर्वमुद्वह–' इत्यत्र वेपथुः । 'शोणं वीक्ष्य–' इत्यत्र वैवर्ण्यमश्रु च । **विशेषादिति** । विभावानुभावापेक्षया आभिमुख्येन रसानुगुण्येन रत्यादौ रसरूपतया संगच्छमानाः । उन्मग्ना बुद्बुदवत् झटिति प्रतीयमानत्वेन प्रादुर्भूताः । निर्मग्ना विलम्बप्रतीतिकत्वेन तिरोभूताः । त्रयस्त्रिंशदिति न्यूनसंख्याया व्यवच्छेदकम्, न त्वधिकसंख्यायाः । अत एवोक्तम्—'हासक्रोधादयः शृङ्गारादौ व्यभिचारिणः' इति । एतदर्थमत्र चकार उपन्यस्तः । तद्भिदा व्यभिचारिभावप्रकाराः । चरणात् मेलकात् । निर्वेदादीनां ज्ञा-

---

1. **तन्वि**ति । अस्याः तनुस्पर्शात् गात्रसंपर्कात् नयने अक्षिणी दरमुकुलिते किंचिन्मुकुलीभावमधिगते हन्त । अखिलं सकलमङ्गम् उदञ्चन्तः प्रादुर्भवन्त रोमाञ्चा रोमविकारा यस्मिंस्तथाभूतं सत् जडतां जडत्वं व्रजति गच्छति । अत्र 'नयने उदञ्चत्–' इति 'ईदूदेद्विवचनं प्रगृह्यम्' इति सूत्रेण द्विवचनस्य प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्' इति सूत्रेण प्रकृतिभावे प्रगृह्यहेतुकानुशासनिको विश्लेषः सत्वसकृदेव दोषावहः । 'समुद्यद्रोमाञ्चम्' इति पाठस्तु ज्यायान् । कपोलौ घर्मार्द्रौ स्वेदसलिलपिच्छिलौ भवतः । उपरतो विरतः अशेषविषयः सकलबाह्येन्द्रियव्यापारो यस्य तथाभूतं मनः झटिति सान्द्रानन्दं निबिडानन्दरूपं परमं सर्वोत्कृष्टं ब्रह्म स्पृशति साक्षात्करोति ध्रुवं नूनम् । ब्रह्मानन्दमनुभवतीवेति भावः ॥

---

१. 'यथा–' इत्यादिः 'एवमन्यत्' इत्यन्तः पाठो ग-पुस्तके नास्ति. २. 'निर्वेदा(द) यस्य त्रिंशद्यथासंभवं रत्यादिस्थायिषु आविर्भावतिरोभावाभ्यामाभिमुख्येन चरणाद् व्यभिचारिण उच्यन्ते' इति ग.

के त इत्याह—

निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः
स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्थाः ।
औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसंत्रासलज्जा
हर्षासूयाविषादाः सधृतिचपलता ग्लानिचिन्तावितर्काः १४१

तत्र निर्वेदः[1]—

तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम् ।
दैन्यचिन्ताश्रुनिःश्वासवैवर्ण्योच्छ्वसितादिकृत् ॥ १४२ ॥

तत्त्वज्ञानान्निर्वेदो[2] यथा—

'मृत्कुम्भवालकारन्ध्रपिधानरचनार्थिना ।
दक्षिणावर्तशङ्खोऽयं हन्त चूर्णीकृतो मया ॥'

अथावेगः[3]—

आवेगः संभ्रमस्तत्र हर्षजे पिण्डिताङ्गता[4] ।
उत्पातजे स्रस्तताङ्गे, धूमाद्याकुलताग्निजे ॥ १४३ ॥

नाय कार्यकारणकथनपुरःसरं तल्लक्षणमाह—**तत्त्वेति** । तत्त्वज्ञानमिह देहविषयादावनुपादेयत्वज्ञानमेव, न तु जीवात्मपरमात्मनोरभेदज्ञानम् । तस्मिन्सति मोक्ष एव न तु स्वावमाननम् । तत्कारणे वैराग्यादौ लक्षणा । प्रथमादिपदात् पुराणश्रवणादीनां द्वितीयादिपदात् स्वस्य कुकर्मोद्भावनादीनां ग्रहणम् । **मृदिति** । चूर्णीकृतः चूर्णाख्यद्रव्यविशेषीकृतः । विरक्तस्य दक्षिणावर्तशङ्खचूर्णनकथनमसंगतमित्युपमाकल्पनयायं निदर्शनालंकारः । तथा च मृत्कुम्भवालुकारन्ध्रपिधानवत्तुच्छं वैषयिकसुखम् तस्य रचना अनुकूलव्यापारः तदर्थिना तत्कामेन । परमपुरुषार्थसाधनतया दक्षिणावर्तशङ्खवदुपादेयो मनुष्यदेहः चूर्णीकृतः । जरया जर्जरीकृत इत्यर्थः । यद्वा रावणशक्त्या पतिते लक्ष्मणे श्रीरामस्य परिदेवनमिदम् । अयं लक्ष्मण एव दक्षिणावर्तशङ्खः मया चूर्णीकृतो विनाशितः, चूर्णाख्यद्रव्यविशेषीकृतश्च । कीदृशेन मया । रावणवधादिरेव मृत्कुम्भवालुकारन्ध्रपिधानं तद्रचनाकामेन । अतिशयोक्त्यलंकारोऽयं रूपकोपपादकः । अत्र पक्षे आपज्जन्यं निर्वेदस्वावमाननं वेद्यम् । एवमन्यदपि । तत्रावेगे पिण्डिताङ्गता संकुचितशरीरत्वम् । 'पीडिताङ्गता' इति पाठे स्पष्ट एवार्थः । उत्पातजे दिव्यनाभस-

---

1. **निर्वेद इति** । 'चित्तस्य खेदो निर्वेदस्तत्त्वज्ञानोदयादिभिः ।' इति केचित् ॥
2. **आवेग इति** । अनर्थातिशयजनिता चित्तस्य संभ्रमाख्या वृत्तिरावेग इति ॥

---

१. 'निर्वेदः' इति नास्ति ग-पुस्तके. २. 'तत्र' इत्यधिकं ग-पुस्तके. ३. 'अथावेगः' इति ग-पुस्तके नास्ति. ४. 'पिहिताङ्गता' ग. ५. निर्वेद' इति पुस्तकान्तरे नास्ति.

राजविद्रवजादेस्तु शस्त्रनागादियोजनम्[1] ।
गजादेः स्तम्भकम्पादि, पांस्वाद्याकुलतानिलात् ॥१४४॥
इष्टाद्धर्षाः शुचोऽनिष्टाज्ज्ञेयाश्चान्ये यथायथम् ।

तत्र[2] शत्रुजो यथा—

'अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनपेक्ष्य भरताग्रजो यतः ।
क्षत्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकाम् ॥'

एवमन्यदूह्यम् ।

अथ दैन्यम्—

दौर्गत्याद्यैरनौजस्यं दैन्यं[1] मलिनतादिकृत् ॥ १४५ ॥

यथा—

'वृद्धोऽन्धः पतिरेष मञ्चकगतः, स्थूणावशेषं गृहं,
कालोऽभ्यर्णजलागमः, कुशलिनी वत्सस्य[2] वार्तापि नो ।
यत्नात्संचिततैलबिन्दुघटिका भग्नेति पर्याकुला
दृष्ट्वा गर्भभरालसां निजवधूं[3] श्वश्रूश्चिरं रोदिति ॥'

अथ श्रमः—

खेदो रत्यध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमः[4] ।

भूमिजरूपत्रिविधोत्पातजन्ये । राजविद्रवजादेरित्यादिना शत्रुजादिग्रहणम् । नागादीत्यादिना अश्वादिपरिग्रहः । गजादेर्जायमाने आवेगे । एवमग्रेऽपि नृपं दशरथम् । स भार्गवः । क्षत्रेषु यः कोपः स एव दहनः तस्य शिखाम् । ततः तस्मिन् । अत्रार्घ्यमर्घ्यमिति मुहुर्वदतो दशरथस्य भार्गवदर्शने संभ्रमः । दौर्गत्यं दारिद्र्यम् । आदिना श्रमादेर्ग्रहणम् । अनौजस्यं निस्तेजस्त्वम् । स्थूणा स्तम्भः । अभ्यर्णजला-

---

1. **दैन्यमिति** । दुःखदारिद्र्यापराधादिजनितः स्वापकर्षभाषणादिहेतुश्चित्तवृत्तिविशेषो दैन्यमिति । 'चिन्तौत्सुक्यान्मनस्तापाद्दौर्गत्याच्च विभावतः । अनुभावात्तु शिरसोऽप्यावृत्तेर्गात्रगौरवात् । देहोपस्करणत्यागाद्दैन्यं भावं विभावयेत् ॥' इति च ॥

2. **वत्सस्येति** । वत्सस्य पुत्रस्य ॥

3. **निजवधूमिति** । निजवधूं आत्मस्नुषाम् ॥

4. **श्रम इति** । बहुतरशारीरव्यापारजन्मा निःश्वासाङ्गसंमर्दनिद्रादिकारणीभूतः खेद-

---

१. 'नागाभियोजनम्' क-ग. २. इतोऽग्रे 'नष्टे वर्षवरैः—' इति श्लोको दृश्यते घ-पुस्तके, ततश्च 'अत्र परिमुक्तवानरभयादेषां संभ्रमः ।' इति. ३. 'तत्र—' इत्यादिः '—ऊह्यम्' इत्यन्तः पाठो नास्ति ग-पुस्तके. ४. '—श्रमः खेदादिकारकः. रतान्मार्गगमनादेश्च यः खेदः स श्रमः खेदमर्दनाद्यनुभावजनकः ।' इति ग.

[1]यथा—

'[2]सद्यः पुरीपरिसरेऽपि [3]शिरीषमृद्वी
सीता जवात्त्रिचतुराणि पदानि गत्वा ।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः कृतवती [4]प्रथमावतारम् ॥'

अथ मदः—

[5]संमोहानन्दसंभेदो [6]मदो मद्योपयोगजः ॥ १४६ ॥
अमुना चोत्तमः शेते, मध्यो हसति गायति ।
अधमप्रकृतिश्चापि परुषं वक्ति रोदिति ॥ १४७ ॥

यथा—

'[7]प्रातिभं त्रिसरकेण गतानां वक्रवाक्यरचनारमणीयः ।
गूढसूचितरहस्यसहासः सुभ्रुवां प्रवृते परिहासः ॥'

गमो निकटस्थवर्षासमयः । तैलबिन्दूनां घटिका क्षुद्रभाजनम् । **सद्य इति** । वारंवारं गन्तव्याध्वपरिमाणजिज्ञासया सीतायाः स्वल्पपथलङ्घनश्रममवधार्य श्रीरामस्य रोदनम् । संमोहानन्दयोः संभेदो मेलकः । मद्यस्यासवस्य उपयोगाद् भक्षणाज्जातः । अमुना मदेन । प्रातिभं प्रागल्भ्यम् । त्रिसरकेण मद्येन । गूढं सूचितं रहस्यं यत्र स

विशेषः श्रम इति । यदाहुः—'अध्वव्यायामसेवाद्यैर्विभावैरनुभावकैः । गात्रसंवाहनैरास्यसंक्षोचैरङ्गमोटनैः ॥ निःश्वासैर्जृम्भितैर्मन्दैः पादोत्क्षेपैः श्रमो मतः ॥' इति । अयं च सत्यपि बले जायते, शारीरव्यापारादेव च जायते न तु ग्लानिः । अतो ग्लानिः श्रमस्य भेदः ॥

1. **प्रथमेति** । प्रथमावतारं पूर्वाविष्करणम् ॥

2. **मद इति** । मद्याद्युपयोगजन्मा उल्लासाख्यः शयनहसितादिहेतुश्चित्तवृत्तिविशेषो मद इति । तत्रोत्तमे पुरुषे स्वापोऽनुभावः । मध्यमे हसितगाने । अधमे तु रोदनपरुषोक्त्यादि । अयं च मदस्त्रिविधः । तरुणमध्यमाधमभेदात् । अव्यक्तासंगतवाक्यैः सुकुमारस्खलद्गत्या च योऽभिनीयते स आद्यः । भुजाक्षेपस्खलितघूर्णितादिभिर्मध्यमः । गतिभङ्गस्मृतिनाशहिक्काछर्यादिभिरधमः । प्रदीपे तु 'उत्तमसत्त्वः प्रहसति गायति तद्वच्च मध्यमप्रकृतिः । परुषवचनाभिधायी शेते रोदित्यधमसत्त्वः ॥' इति व्यत्यासोऽस्ति ॥

3. **प्रातिभमिति** । मदानुभाववर्णनमिदम् । त्रयाणां सरकाणां समाहारस्त्रिसरकं

---

१. 'यथा' ग-पुस्तके नास्ति. २. ग-पुस्तके तु 'सद्यः' इति श्लोकस्य स्थाने 'अइ पिहुलं जलकुम्भं घेत्तूण समागदम्हि सहि तुरिअम् । समसेअसलिलणीसामणीसहा वीसमामि खणम् ॥' इति दृश्यते. ३. 'च' घ. ४. 'हर्षोत्कर्षो मदः पानात्स्खलदङ्गवचो गतिः । मद्यादिपानाद्यो हर्षोत्कर्षः स मदोऽङ्गवचनगत्यादिस्खलनानुभावकः ।' इति ग.

[3]अथ जडता—

अप्रतिपत्तिर्[1]जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः ।
अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र ॥ १४८ ॥

[2]यथा मम कुवलयाश्वचरिते प्राकृतकाव्ये—

[4]णवरिअ तं जुअजुअलं अण्णोण्णं णिहिदसजलमन्थरदिट्ठिम् ।
आलेक्खओपिअं विअ खणमेत्तं तत्थ संट्ठिअं मुअसण्णम् ॥'

[3]अथोग्रता—

शौर्यापराधादिभवं भवेच्चण्डत्वमु[3]ग्रता ।
तत्र स्वेदशिरःकम्पतर्जनाताडनादयः ॥ १४९ ॥

चासौ हासश्चेति । अप्रतिपत्तिः कर्तव्यानिश्चयः । तूष्णींभावो मौनम् । तत्र जडतायाम् । **णवरिअ इति** । 'केवलं तद्युवयुगलमन्योन्यं निहितसजलमन्थरदृष्टि । आलेख्यार्पितमिव क्षणमात्रं तत्र संस्थितं मुक्तसङ्गम् ॥' इति संस्कृतम् । णवरि-

---

त्रिवारमधुपानम् । 'सरकं शीधुपात्रे स्याच्छीधुपाने च शीधुनि ।' इति विश्वः । तेन त्रिसरकेण । 'त्रिपानं मदातिभूमिः' इति पानप्रसिद्धिः । प्रतिभैव प्रातिभं प्रतिभाविशेषः । तत्प्रातिभं गतानां त्रिवारसुरापाणोत्कटमदोद्बुद्धप्रागल्भ्यभाजां सुभ्रुवां वक्रवाक्यरचनारमणीयः वक्रोक्तिशोभनः । गूढानि पूर्वं लज्जया संवृतानि, सूचितानि संप्रति मदेन प्रकाशितानि रहस्यानि ग्राम्यावयवचेष्टाप्रलपितानि यस्मिन् स गूढसूचितरहस्यः, स चासौ हासश्चेति विशेषणसमासः । प्रवर्तते प्रवृत्तः ॥

1. **जडतेति** । चिन्तोत्कण्ठाभयविरहेष्टानिष्टदर्शनश्रवणादिजन्यावश्यकर्तव्यार्थप्रतिसंधानविकला चित्तवृत्तिर्जडता । इयं च मोहात्पूर्वतः परतश्च जायते । यदाहुः—'कार्याविवेको जडता पश्यतः शृण्वतोऽपि वा । तद्भावाः प्रियानिष्टदर्शनश्रवणे रुजा ॥ अनुभावास्त्वमी तूष्णीभावविस्मरणादयः । सा पूर्वं परतो वा स्यान्मोहादिति विदां मतम् ॥' इति ॥

2. **णवेति** । स्कन्धकमिदम् । तल्लक्षणमुक्तम्—'स्कन्धकमिति तत्कथितं यत्र चतुष्कलगणाष्टकेनार्धं स्यात् । तत्तुल्यमग्रिमदलं भवति चतुःषष्टिमात्रकशरीरमिदम् ॥' इति ॥

3. **उग्रतेति** । अधिक्षेपापमानादिप्रभवा किमस्य करोमीत्याद्याकारा चित्तवृत्तिरुग्रता । यदाहुः—'नृपापराधोऽसद्घोषकीर्तनं चोरधारणम् । विभावाः स्युरथो बन्धो वधस्ताडनभर्त्सने ॥ एते यत्रानुभावास्तदौद्ध्यं निर्दयतात्मकम् ॥'

---

१. 'अथ जडता' इति नास्ति ग-पुस्तके. २. 'यथा–' इत्यादिफक्किका नास्ति ग-पुस्तके.
३. 'अथोग्रता' इति नास्ति ग-पुस्तके. ४. इतोऽग्रे 'शौर्यादिना यच्चण्डत्वमुग्रता । तत्र स्वेदशिरःकम्पाद्यनुभावा भवन्ति ।' इत्यधिकं ग-पुस्तके.

यथा—

'प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरिव ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥'

अथ मोहः—

मोहो विचित्ततामीतिदुःखावेगानुचिन्तनैः ।
मूर्च्छनाज्ञानपतनभ्रमणादर्शनादिकृत् ॥ १५० ॥

यथा—

'तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव

अथ विबोधः—

निद्रापगमहेतुभ्यो विबोधश्चेतनागमः ।
जृम्भाङ्गभङ्गनयनमीलनाङ्गावलोककृत् ॥ १५१ ॥

अशब्दः केवलार्थे देशी । चण्डत्वमत्यन्तासहिष्णुत्वम् । प्रणयिनी या सखी तस्याः परिहासरसेनाधिगतैः प्राप्तैः । **अकाण्डयमदण्ड इति** । अकालयमदण्ड इत्यर्थः । अत्र मालतीशरीरे शरप्रहारं कुर्वतोऽघोरघण्टस्यापराधेन माधवस्य चण्डत्वमेतादृशोक्त्या व्यज्यते । चित्तस्य निमीलनत्वं विचित्तता । सुषुप्तिवारणायाह—**भीतीति** । आवेगः संभ्रमः । अनुचिन्तनमत्यन्तचिन्ता । अदर्शनमज्ञानम् । अभिषङ्गः शोकः । वृत्ति विषयसंबन्धम् । संस्तम्भयता प्रतिबध्नता । एतेनाज्ञानकरत्वं मोहस्य सूचितम् । व्य-

---

1. **मोह इति** । भयवियोगादिप्रयोज्या वस्तुतत्त्वानवधारिणी चित्तवृत्तिर्मोहः । 'अवस्थान्तरशबलिता चित्तवृत्तिः' इति तु नव्याः ॥

2. **विबोध इति** । निद्रानाशोत्तरं जायमानो बोधो विबोधः । निद्रानाशश्च तत्पूर्तिस्वप्नान्तबलवच्छब्दस्पर्शादिभिर्जायत इति त एवात्र विभावाः । अक्षिगात्रमर्दनादयोऽनुभावाः । केचिदविद्याध्वंसजन्यमप्यमुमामनन्ति । तेषां मते 'नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत । स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव' ॥ इति गीताश्लोक उदाहार्यः ॥

---

१. 'देहेन्द्रियगतिस्तम्भशून्यताद्यनुभावकृत् । शोकादिना चित्तविक्षेपो मोह इन्द्रियस्तम्भाद्यनुभावकृत् ।' इति **ग.** २. 'विबोधः परिणामादेस्तत्र जृम्भाक्षिमर्दने । आहारपरिणामादेश्चेतनाभावो विबोधो जृम्भाद्यनुभावकः ।' इति **ग.**

यथा—

'[1]चिर[2]रतिपरिखेदप्राप्तनिद्रासुखानां
चरममपि शयित्वा पूर्वमेव प्रबुद्धाः ।
अपरिचलितगात्राः कुर्वते न प्रियाणा-
मशिथिलभुजचक्राश्लेषभेदं तरुण्यः ॥'

अथ स्वप्नः—

स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः ।
[3]कोपावेगभयग्लानिसुखदुःखादिकारकः ॥ १५२ ॥

यथा—

'[4]मां[5]माकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेन ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥'

सनं विपत् । निद्रापगमहेतवो गीतवादित्रादयः तेभ्यश्चेतनागमो ज्ञानलाभः । नयनमीलनं नेत्रप्रकाशः । चरमं नायकनिद्रायाः पश्चात् । पूर्वं नायकप्रबोधात्प्राक् । अशिथिलेन दृढनिक्षिप्तेन भुजेन यः कण्ठस्याश्लेषः तस्य भङ्गम् । 'प्रशिथिल–'इति पाठे निद्रावशाद् भुजशैथिल्यं प्रियः प्रबुध्य भुजाक्षेपं कर्तुमर्हतीति । अस्य निद्राभङ्गो नोचित इति भावः । **मामिति** । यक्षस्य मेघं प्रति प्रियायै वाचनिकार्पणमिदम् ।

---

1. **चिरेति** । चरममपि शयित्वा पश्चात्सुप्तापि पूर्वमेव प्रबुद्धाः । 'सुप्ते पश्चाच्च या शेते पूर्वमेव प्रबुध्यते । नान्यं कामयते चित्ते सा स्त्री ज्ञेया पतिव्रता ॥' इति स्मरणादिति भावः । तथापि तरुण्योऽपरिचलितगात्रा अस्पन्दवपुष्काः सत्यः चिररतिपरिखेदेन प्राप्तनिद्रासुखानां प्रियाणाम् । अशिथिलो गाढो यो भुजचक्रेण परस्परभुजवलयेन आश्लेषः तस्य भेदं विश्लेषं न कुर्वते किं त्वाश्लिष्यैव स्थिताः । अन्यथा तन्निद्राभङ्गः स्यात् । 'शयानं न प्रबोधयेत्' इति निषेधास्कन्दनभयादिति भावः । इह 'कण्ठाश्लेषभङ्गम्' इति टीकाकारसंमतः पाठः । स तु सांप्रतिकपुस्तकेषु न दृश्यते ॥

2. **मामिति** । मया कथमपि स्वप्नसंदर्शनेन लब्धायाः ते तव निर्दयाश्लेषहेतोः गाढालिङ्गनार्थम् आकाशप्रणिहितभुजं शून्यार्पितबाहुं मां पश्यन्तीनां स्थलीदेवतानां वनदेवतानां मुक्तास्थूला अश्रुलेशा नयनोदबिन्दवः तरुकिसलयेषु बहुशः न खलु न पतन्ति । अपि तु पतन्त्येव । एवंविधं मामवलोक्य वनदेवता अपि रुदन्तीति भावः ॥

---

१. 'चिररति–' इति श्लोकस्य स्थाने 'एकेन नेत्रकमलं मलयन्करेण पाणिं परं च कलयन्नवनीतभाण्डे । निद्राविरामकमनीयमुखाम्बुजश्रीर्मां पातु पादरजसा वत नन्दबालः ॥' इति दृश्यते ग-पुस्तके; २. 'मात्सर्यभयकोपादेरनुभावस्य कारणम् । निद्राणस्यापि विषयज्ञानं स्वप्न । मात्सर्यानुभावहेतुः । इति ग. ३. 'भूयश्चाशि त्वमसि शयने कण्ठलग्ना पुरा मे–' इत्युदाहरणान्तरं ग-पुस्तके.

अथापस्मारः—

[1]मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः ।
भूपातकम्पप्रस्वेदफेनलालादिकारकः ॥ १५३ ॥

'आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरङ्गम् ।
फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के ॥'

अथ गर्वः—

गर्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः ।
[3]अवज्ञासविलासाङ्गदर्शनाविनयादिकृत् ॥ १५४ ॥

[4]तत्र शौर्यगर्वो यथा—

'धृतायुधो यावदहं तावदन्यैः किमायुधैः ।
यद्वा न सिद्धमस्त्रेण मम तत्केन साध्यताम् ॥'

[5]अथ मरणम्—

[6]शरा[7]द्यैर्मरणं जीवत्यागोऽङ्गपतनादिकृत् ।

मां यक्षम् । कथमपि महता कष्टेन । मुक्ता इव स्थूलाः । **मनःक्षेप इति** । मनसो नाडीविशेषनिवेशेन घूर्णनमित्यर्थः । ग्रहादीत्यादिना भूतादिपरिग्रहः । मध्यमादिपदेन धातुवैषम्यादिपरिग्रहः । फेनायमानं फेनमुद्गमन्तम् । असौ श्रीकृष्णः आशशङ्के ज्ञातवान् । मदश्चित्तविकारविशेषः । राज्ञः कोशदण्डादिजन्यः प्रतापः प्रभावः । श्रीस्त्रि-

---

1. **शरेति** । अत्र विशेषमाहू रसगङ्गाधरकाराः 'रोगादिजन्या मूर्छारूपा मरणप्रागवस्था मरणम् । न चात्र प्राणवियोगात्मकं मुख्यं मरणमुचितं ग्रहीतुम् । चित्तवृत्त्यात्मकेषु भावेषु तस्याप्रसक्तेः । भावेषु च सर्वेषु कार्यसहवर्तितया शरीरप्राणयोगस्य हेतुत्वात् । उदाहरणम्—'दयितस्य गुणाननुसरन्ती शयने संप्रति या विलोकितासीत् । अधुना खलु हन्त सा कृशाङ्गी गिरमङ्गीकुरुते न भाषितापि ॥' प्रियविरहोऽत्र विभावः । वचनविरामोऽनुभावः । हन्तपदस्यात्रात्यन्तमुपकारकत्वाद्वाक्यव्यङ्ग्योऽप्ययं भावः पदव्यङ्ग्यतामावहति । दयितस्य गुणाननुसरन्तीत्यनेन व्यज्यमानं चरमावस्थायामपि तस्या दयितगुणविसरणं नाभूदिति विप्रलम्भस्य शोकस्य वा चरममभिव्यक्तस्य पोषकम् । अयं च भावः स्वव्यञ्जकवाक्योत्तरवर्तिना वाक्यान्तरेण संदर्भघटकेन नायिकादेः प्रत्युज्जीवनवर्णने विप्रलम्भस्य, अन्यथा तु करुणस्य पोषक इति विवेकः । कवयः पुनरमुं प्राधान्येन न

---

१. 'आवेशो ग्रहदुःखाद्यैरपस्मारः स्मृतो बुधैः । बुर्धुरध्वनिभूपातफेनाङ्गान्दोलनादिकृत् ॥' इति **ग.** २. 'ललद्' **क-घ.** ३. 'औद्धत्यसदृशावज्ञासहेलालोकनादिकृत् । प्रभावादिजन्यो मदो गर्वः । आदिशब्दाल्लावण्यसौभाग्यादिः । स चाविनयाद्यनुभावहेतुः ।' इति **ग.** ४. 'यथा' **क-घ.** ५. असादग्रे 'एवमन्यदप्यूह्यम्' इत्यधिकं **ग-पुस्तके.** ६. 'अथ मरणम्' इति नास्ति **ग-पुस्तके.** ७. 'मरणं सुप्रसिद्धत्वादनर्थत्वाच्च नोच्यते ।' इति **ग.**

[3]यथा—

'राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥'

अथालस्यम्—

[1]आलस्यं श्रमगर्भाद्यैर्[2]जाड्यं जृम्भासितादिकृत्[3] ॥ १५५ ॥

यथा—

'[4]न तथा भूषयत्यङ्गं न तथा भाषते सखीम् ।
जृम्भते मुहुरासीना बाला गर्भभरालसा ॥'

अथामर्षः—

[5]निन्दाक्षेपापमानादेरमर्षोऽभिनिविष्टता[6] ।
नेत्ररागशिरःकम्पभ्रूभङ्गोत्तर्जनादिकृत् ॥ १५६ ॥

वर्गसंपत्तिः । अवज्ञा परस्मिन् । अन्यैर्मद्भृतायुधभिन्नैः । **रामेति** । सा निशाचरी ताडका राक्षसी, सैव निशाचरी अभिसारिका नायिका । राम एव मन्मथः तस्य शरेण हृदये वक्षसि मनसि च ताडिता सती जीवितेशो यम एव जीवितेशः प्रियः तस्य वसतिं जगाम । कीदृशी । गन्धवद्रुधिरमेव चन्दनं तेनोक्षिता लिप्ता । 'जाड्यम्' इत्यत्र क्वापि 'जैह्यम्' इति पाठः । स न सम्यक् । असंगतार्थापत्तेः । आसितमुपवेशनम् । दोषोद्भावनं निन्दा । भर्त्सनमाक्षेपः । अपमानः पराभवः । आदिना वित्तादिग्रहणादेर्ग्रहणम् । अभिनिविष्टता निन्दादिकर्तुर्यातननिर्णयः । क्रोध-

---

वर्णयन्ति । अमङ्गलप्रायत्वात् ।' इति । प्रदीपेप्युक्तम्—'जीवस्योद्गमनारम्भो मरणं परिकीर्तितम् । संमोहेन्द्रियसंग्लानिगात्रविक्षेपणादिकृत् ॥' इति ॥

1. **आलस्यमिति** । अतितृप्तिगर्भव्याधिश्रमादिजन्या चेतसः क्रियानुन्मुखतालस्यम् । अत्र च नासामर्थ्यम् । नापि कार्याकार्यशून्यत्वम् । तेन कार्याकरणरूपस्यानुभावस्य तुल्यत्वेऽपि ग्लानेर्जडतायाश्चास्य भेदः ॥

2. **अमर्ष इति** । परकृतावज्ञादिनानापराधजन्यो मौनवाक्पारुष्यादिकारणीभूतश्चित्तवृत्तिविशेषोऽमर्षः ॥

---

१. 'यथा—राम' इत्युदाहरणं नास्ति ग-पुस्तके. २. 'जैह्यं' क-ग. ३. इतोऽग्रे 'श्रमादिना प-जैह्यं प्रवृत्तिसंकोचः, तदालस्यम् । जृम्भणस्थित्याद्यनुभावहेतुः ।' इत्यधिकं ग-पुस्तके. ४. 'न तथा—' इत्यस्य स्थाने 'सुरेन्द्रमात्राश्रितगर्भगौरवात्—' इत्युदाहरणं ग. पुस्तके. ५. 'अधिक्षेप' ग. ६. 'उच्छास-प्रतिकारेच्छा मनःक्षोभादिकारकः ।'इति ग.

यथा—

'[1]प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात् ।
न त्वेव दूषयिष्यामि शस्त्रग्रहमहाव्रतम् ॥'

अथ निद्रा—

[2]चेतःसंमीलनं निद्रा [3]श्रमक्लममदादिजा ।
[4]जृम्भाक्षिमीलनोच्छ्वासगात्रभङ्गादिकारणम् ॥ २५७ ॥

यथा—

'[5]सार्थकानर्थकपदं ब्रुवती मन्थराक्षरम् ।
निद्रार्धमीलिताक्षी सा लिखितेवास्ति मे हृदि ॥'

अथावहित्था—

भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था ।
व्यापारान्तरसक्त्यन्यथावभाषणविलोकनादिकरी ॥ १५८ ॥

यथा—

'एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥'

स्तूत्कटापचिकीर्षा । इत्यनयोर्भेदः । **प्रायश्चित्तमिति** । द्रोणादीन्प्रति अर्जुनस्योक्तिरियम् । व्यतिक्रमात् हननात् चेतसः संमीलनं मेध्यानाडीप्रवेशेन निश्चलत्वम् । सार्थकानि अनर्थकानि च पदानि यत्र तद्यथा स्यात्तथा । मन्थराणि गम्भीराणि अनासन्नानि असंपूर्णानि वा अक्षराणि यत्र तद्यथा स्यात्तथा । **लिखितेवेति** । धारावाहिकस्मरणस्फोरणाय । हर्षादेराकारस्य सूचकस्य मुखरागादेर्गुप्तिः संवरणम् । सक्तिरासङ्गः । **अन्यथेति** । अप्रकान्तस्य भाषणं विलोकनं च । आदिना क्रिया-

---

1. **अवहित्थेति** । व्रीडादिभिर्निमित्तैर्हर्षाद्यनुभावानां गोपनाय जनितो भावविशेषोऽवहित्था । अवहिःस्थितिरवहित्था, 'सुपि स्थः' इत्यत्र 'स्थः' इति योगविभागात्कः । पृषोदरादि । तदुक्तम्—'अनुभावपिधानार्थेऽवहित्थं भाव उच्यते । तद्विभाव्यं भयव्रीडाधार्ष्टर्यकौटिल्यगौरवैः ॥' इति ॥

---

१. ग-पुस्तके तु 'लाक्षागृहानलविषान्नसभाप्रवेशैः प्राणेषु वित्तनिचयेषु च नः प्रहृत्य । आकृष्य पाण्डववधूपरिधानकेशान्स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः ॥' इत्युदाहरणम्. २ 'मन-' ग. ३. 'चिन्तालस्यश्रमादिभिः' ग. ४. 'चेष्टाप्रतिहतिस्वप्नघूर्णनाद्यनुभावकः । चिन्तादिभिर्मनसो निरिन्द्रियप्रदेशावस्थानं निद्रा चेष्टानाशाद्यनुभावहेतुः ।' इति ग. ५. ग-पुस्तके तु 'निमीलितादक्षियुगाच्च निद्रया हृदोऽपि बाह्येन्द्रियमौनमुद्रितात् । अदर्शि संगोप्य कदाप्यवीक्षितो रहस्यमस्याः स महन्महीपतिः' इत्युदाहरणम्.

अथौत्सुक्यम्—

[1]इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता ।
चित्ततापत्वरास्वेददीर्घनिःश्वसितादिकृत् ॥ १५९ ॥

यथा—'यः कौमारहरः स एव हि वरः—' इत्यादि ।

अत्र यत् काव्यप्रकाशकारेण रसस्य प्राधान्यमित्युक्तं तद्रसनधर्मयोगित्वाद्व्यभिचारिभावस्यापि [2]रसशब्दवाच्यत्वेन [3]गतार्थं मन्तव्यम् ।

अथोन्मादः—

[4]चित्तसंमोह [5]उन्मादः कामशोकभयादिभिः ।
अस्थानहासरुदितगीतप्रलपनादिकृत् ॥ १६० ॥

यथा [6]मम—

'[7]आर्तद्विरेफ भवता भ्रमता समन्ता-
त्प्राणाधिका प्रियतमा मम वीक्षिता किम् ।

मात्रस्य ग्रहः । देवर्षौ नारदे । पितुर्हिमालयस्य । **व्यभिचारिभावस्येति** । तत्रानुभावादिकृतपरिपोषराहित्येन रतेः संपूर्णरसत्वं न संभवति । वर्णनीयत्वेन चमत्कारित्वेनौत्सुक्यस्यैव प्राधान्यमिति भावः । अत एव काव्यप्रकाशटीकाकारचण्डीदासेनोक्तम्—'रसपदं चात्र संभोगव्यभिचार्यौत्सुक्यमाह 'रस्यते आस्वाद्यते' इति व्युत्पत्त्या । न तु संभोगनामा रसः । स्वाधीनपतिकायाः क्रीडास्थानं प्रत्युत्सुकताया वर्णनीयत्वात्' इति । गतार्थं प्राप्तविषयम् । चित्तस्य संमोहश्चेतनाचेतनादिविशेषज्ञानजननाक्षमत्वम् । **भ्रातरिति** । व्यवस्यति कर्तुमीहते । अत्र कामेन

---

1. **औत्सुक्यमिति** । अधुनैवास्य लाभो ममास्त्वितीच्छा औत्सुक्यम् । इष्टविरहादिरत्र विभावः । त्वराचिन्तादयोऽनुभावः । यदाहुः—'संजातमिष्टविरहादुद्दीप्तं प्रियसंस्मृतेः । निद्रया तन्द्रया गात्रगौरवेण च चिन्तया ॥ अनुभावितमाख्यातमौत्सुक्यं भावकोविदैः ॥' इति ॥

2. **उन्माद इति** । विप्रलम्भमहापत्तिपरमानन्दादिजन्मान्यसिन्नन्यावभास उन्मादः । शुक्तिरजतादिज्ञानव्यावृत्तये जन्मान्तम् । उन्मादस्य व्याधावन्तर्भावे संभवत्यपि पृथगुपादानं व्याध्यन्तरापेक्षया वैचित्र्यविशेषस्फोरणाय ॥

---

१. 'औत्सुक्यं वाञ्छितार्थस्य लाभे कालासहिष्णुता । उपायान्वेषणास्थैर्यचिन्तनाद्यनुभावकृत । इष्टार्थस्य प्राप्तौ कालाप्रतीक्षा, औत्सुक्यम् ।' इति ग. २. 'रसशब्देन' क. ३. 'गतार्थत्वं' क. ४. अतोऽत्र 'तथोक्तम्—रसभावौ तदाभासौ भावस्य प्रशमोदयौ । संधिः शबलता चेति सर्वेऽपि रसनाद्रसाः ॥ इत्यधिकं ग-पुस्तके. ५. 'अप्रेक्षाकारितोन्मादः संनिपातग्रहादिभिः । तत्र प्रलापचापल्यकृतविस्मरणादयः ॥' इति ग. ६. 'मम' नास्ति ग-पुस्तके. ७. 'हंस प्रयच्छ मे कान्तां गतिस्तस्यास्त्वया हृता विभावितैकदेशेन देयं यदभियुज्यते ॥' इति ग.

(झंकारमनुभूय सानन्दम् ।)

[1]ब्रूषे किमोमिति सखे कथयाशु तन्मे
किं किं व्यवस्यति कुतोऽस्ति च कीदृशीयम् ॥'

अथ शङ्का—

[2]परक्रौर्यात्मदोषाद्यैः शङ्कानर्थस्य तर्कणम् ।
वैवर्ण्यकम्पवैस्वर्यपार्श्वालोकास्यशोषकृत् ॥ १६१ ॥

यथा मम—

'प्राणेशेन प्रहितनखरेष्वङ्गकेषु क्षपान्ते
जातातङ्का रचयति चिरं चन्दनालेपनानि ।
धत्ते लाक्षामसकृदधरे दत्तदन्तावघाते
क्षामाङ्गीयं चकितमभितश्चक्षुषी विक्षिपन्ती ॥'

अथ स्मृतिः—

सदृशज्ञानचिन्ताद्यैर्भ्रूसमुन्नयनादिकृत् ।
स्मृतिः पूर्वानुभूतार्थविषयज्ञानमुच्यते ॥ १६२ ॥

[3]यथा मम—

'मयि सकपटं किंचित्क्वापि प्रणीतविलोचने
किमपि नयनं प्राप्ते तिर्यग्विजृम्भिततारकम् ।

अमरः प्रत्युत्तराक्षम इति विशेषनिर्धारणाक्षमत्वम् । तर्कणं संभावना प्रहितनखरेषु कृतनखाघातेषु । जात आतङ्कः सख्याद्युपहासरूपा शङ्का यस्याः सा । अत्र संभोगचिह्नगोपन एव विश्रान्तिरिति शङ्काया एव प्राधान्यम् । **सदृशेति** । चिन्ता भावनाख्यसंस्कारः । आद्यपदेन संबन्धिज्ञानादेर्ग्रहणम् । अत्र सदृशज्ञानादेः संस्कारोद्बोधनद्वारा संस्कारस्य तु स्मृतिं प्रति साक्षादेव कारणत्वमिति बोध्यम् । **मयीति** । सकपटं यथा स्यात्तथा क्वापि अजिज्ञासितपदार्थे किंचित्प्रणीतलोचने मयि तिर्यक्कुटिलं यथा स्यात्तथा विजृम्भिता व्यापारिता प्रकाशिता वा तारका यस्य तादृशं नयनं प्राप्ते

---

1. **ब्रूषे इति** । 'किं ब्रूषे' इति प्रश्ने 'ओम्' इत्युत्तरम् । ओमिति स्वीकारार्थेऽव्ययम् ॥

2. **शङ्केति** । किमनिष्टं मम भविष्यतीत्याकारश्चित्तवृत्तिविशेषः शङ्का । इयं तु भयाद्युत्पादनेन कम्पादिकारिणी, नतु चिन्ता ॥

---

१. 'अनर्थमतिभाशङ्का परक्रौर्यात्स्वदुर्नयात् । चिह्नापह्नुतिभूयोदिक्प्रेक्षणाद्यानुभाविकी ॥' इति. ग. २. 'यथा मम' इति ग-पुस्तके नास्ति.

स्मितमुपगतामालीं दृष्ट्वा सलज्जमवाञ्चितं
कुवलयदृशः सेरं सेरं स्मरामि तदाननम् ॥'

अथ मतिः—

नीतिमार्गानुसृत्यादेरर्थनिर्धारणं [1]मतिः ।
स्मरता धृतिसंतोषौ बहुमानश्च [2]तद्भवाः ॥ १६३ ॥

यथा—

'असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥'

अथ व्याधिः—

[2]व्याधिर्ज्वरादिर्वाताद्यैर्भूमीच्छोत्कम्पनादिकृत् ।

तत्र दाहमयत्वे भूमीच्छादयः । शैत्यमयत्वे उत्कम्पनादयः । [3]स्पष्टमुदाहरणम् ।

अथ त्रासः—

[3]निर्घातविद्युदुल्काद्यैस्त्रासः कम्पादिकारकः ॥ १६४ ॥

सति स्मितमुपगतां सखीं दृष्ट्वा सलज्जं यथा स्यात्तथा अवाञ्चितमानमितं सेरं पुनः पुनः स्मितयुक्तं वदनं स्मरामीत्यर्थः । नीतिमार्गो नीतिशास्त्रं तस्यानुसृतिरवगमः । आदिना अनुमानादेर्ग्रहणम् । निर्धारणं निश्चयः । **असंशयमिति ।** शकुन्तलामालोक्य दुष्यन्तस्यानुमानमिदम् । क्षत्रपरिग्रहक्षमा क्षत्रियविवाहोचिता । 'इयम्' इति शेषः । अस्यां शकुन्तलायाम् । समर्थयति—**सतामिति** । प्रमाणं निश्चयवीजम् । अन्तःकरणस्य मनसः प्रवृत्तयः संकल्पादयः । **वाताद्यैरिति** । आद्यपदेन पित्तश्लेष्मणोर्ग्रहणम् । भूमीच्छा भूमिपतनेच्छा । तत्र व्याधावुदाहरणं यथा मम—'प्रियजनपरिषज्ञाद्वेषमानां कृशाङ्गीं विकृतवचनवर्णां स्वेदसंसिक्तगात्रीम् । विपुलपुलकलेखामाकलय्य ज्वरार्तां कुमतिरमितचिन्तासागरे निर्ममज्ज ॥' **निर्घात इति ।**

---

1. **मतिरिति** । शास्त्रादिविचारजन्यमर्थनिर्धारणं मतिरिति परमार्थः । तत्र निःशङ्कतदर्थानुष्ठानसंशयोच्छेदादयोऽनुभावाः ॥

2. **व्याधिरिति** । रोगविरहादिप्रभवो मनस्तापो व्याधिः । गात्रशैथिल्यश्वासादयोऽत्रानुभावाः । यदाहुः—'एकैकशो द्वन्द्वशो वा त्रयाणां वा प्रकोपतः । वातपित्तकफानां स्युर्व्याधयो ये ज्वरादयः ॥ इह तत्प्रभवो भावो व्याधिरित्यभिधीयते ॥' इति ॥

3. **त्रास इति** । भीरोर्घोरसत्त्वदर्शनस्फूर्जथुश्रवणादिजन्मा चित्तवृत्तिविशेषस्त्रासः ।

---

१. 'तथात्मनि' इति क्वाचित्कः पाठः. २. 'अमङ्गलत्वान्नोदाहियते' इति ग. ३. 'गर्जितादेर्मनःक्षोभस्त्रासो··· कम्पनादयः । मेघादिगर्जनान्मनसो वैयग्र्यं त्रासः । अत्रोत्कम्पनालिङ्गनाद्यनुभाव' इति ग.

यथा—

'[1]परि[1]स्फुरन्मीनविघट्टितोरवः सुराङ्गनात्रासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् ॥'

अथ व्रीडा—

[2]धार्ष्ट्याभावो [2]व्रीडा वदनानमनादिकृद्दुराचारात् ।

यथा—'[3]मयि सकपटं—' इत्यादि ।

अथ हर्षः—

[3]हर्षस्त्विष्टावाप्तेर्मनःप्रसादोऽश्रुगद्गदादिकरः ॥ १६५ ॥

'यदान्तरिक्षे बलवान्मारुतो मरुता हतः । पतत्यधः स निर्घातो जायते वायुसंभवः ॥' इत्युक्तलक्षणो निर्घातः । 'बृहच्छिखा च सूक्ष्माग्रा रक्तनीलशिखोज्ज्वला । पौरुषी च प्रमाणेन उल्का नानाविधा स्मृता ॥' इत्युक्तलक्षणा चोल्का । आद्यपदेन भूकम्पादेर्ग्रहणम् । अत्र 'मनःक्षोभः' इति पूरणीयम् । **परिस्फुरदिति** । जलविहारवर्णनमिदम् । अपिना नायकस्य विलोकनीयतां रमणीयताम् । धार्ष्ट्याभावः प्रागल्भ्य-

---

अनुभावाश्चास्य रोमाञ्चकम्पस्तम्भभ्रमादयः । अयं भयाद्भिद्यते । तदुक्तम्—'पूर्वापरविचारोत्थं भयं त्रासात्पृथग्भवेत् ।' इति ॥

1. **परीति** । परितः स्फुरद्भिर्विवर्तमानैर्मीनैर्विघट्टिता ऊरवो यासां ताः अत एव त्रासविलोलदृष्टयः कम्पितपाणिपल्लवाश्च सुराङ्गनाः सखीजनस्यापि विलोकनीयतामुपाययुः । किमुत प्रियजनस्येति भावः ॥

2. **व्रीडेति** । स्त्रीणां पुरुषमुखावलोकनादेः पुंसां च प्रतिज्ञाभङ्गपराभवादेरुत्पन्नो वैवर्ण्याधोमुखत्वादिकारणीभूतश्चित्तवृत्तिविशेषो व्रीडा । केचित्तु—'चेतोनिमीलनं व्रीडा व्यङ्गरागस्तवादिभिः ।' इत्याहुः । व्यङ्गं वैकृतम् ॥

3. **हर्ष इति** । इष्टप्राप्त्यादिजन्मा सुखविशेषो हर्षः । तदुक्तं—'देवभर्तृगुरुस्वामिप्रसादः प्रियसंगमः । मनोरथादिरप्राप्यमनोहरधनागमः ॥ तथोत्पत्तिश्च पुत्रादेर्विभावो यत्र जायते । नेत्रवक्त्रप्रसादश्च प्रियोक्तिः पुलकोद्गमः ॥ अश्रुस्वेदादयश्चानुभावा हर्षे तमादिशेत् ॥' इति ॥

---

१. ग-पुस्तके तु 'समुत्क्षिपन्त्यः पृथिवीभृता वरम्—' इति माघपद्यमुदाहृतम्. २. 'दुराचारादिभिर्व्रीडा धार्ष्ट्याभावस्तमुन्नयेत् । मौनितावाक्सुखीभावनेत्रसंमीलनादिभिः ॥ दुराचारादिभिः प्रागल्भ्यप्रतिरोधो लज्जा । मौनादिभिरनुभावैस्तामुन्नयेत् ।' इति ग. ३ ग-पुस्तके तु 'पटालग्ने पत्यौ नमयितुमुखं जातविनया हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम् । न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना ह्रिया तात्पर्यान्तः प्रथमपरिहासे नववधूः ॥' इत्युदाहरणम्. ४. 'उत्सवादिकृतश्चेतःप्रसादो हर्ष उच्यते । शीताश्रुगद्गदस्वेदरोमाञ्चाद्यैर्नरूप्यते ॥' इति ग.

यथा—

'[1]समीक्ष्य पुत्रस्य चिरात्पिता मुखं निधानकुम्भस्य यथैव दुर्गतः ।
मुदा शरीरे प्रबभूव नात्मनः पयोधिरिन्दूदयमूर्च्छितो यथा ॥'

अथासूया—

[2]असूयान्यगुणर्धीनामौद्धत्यादसहिष्णुता ।
दोषोद्घोषभ्रूविभेदावज्ञाक्रोधेङ्गितादिकृत् ॥ १६६ ॥

यथा—

'[3]अर्थं तत्र पाण्डुतनयेन सदसि विहितं मधुद्विषः ।
मानमसहत न चेदिपतिः परवृद्धिमत्सरि मनो हि मानिनाम् ॥'

अथ विषादः—

[4]उपायाभावजन्मा तु विषादः सत्त्वसंक्षयः ।
निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत् ॥ १६७ ॥

राहित्यम् । निधानकुम्भस्य । निधिपूर्णकलशस्य । पिता दिलीपः । शरीरे शरीरचेष्टायाम् । प्रबभूव समर्थो बभूव । इन्दूदयेन मूर्च्छितः प्रवृद्धः । अतिवृद्धस्य समुद्रस्य स्तम्भितत्वं भवतीत्यभिप्रायेणेयमुपमा । अथ वा यथा पयोधिरिन्दूदयेन तरलो भवति तथा पुत्रोत्पत्त्या हर्षतरलो बभूवेत्युपमा । क्रोधेङ्गितं मुखरागादि । मानं

---

1. **समीक्ष्येति** । 'निवातपद्मस्तिमितेन चक्षुषा नृपस्य कान्तं पिबतः सुताननम् । महोदधेः पूर इवेन्दुदर्शनाद्बुधः प्रहर्षः प्रबभूव नात्मनि ॥' इति रघुवंशश्लोक एवार्य पाठान्तरमहिम्ना रूपान्तरं नीतः ॥

2. **असूयेति** । परोत्कर्षदर्शनादिजन्यः परनिन्दादिकारणीभूतश्चित्तवृत्तिविशेषोऽसूया । इमामेवासहनादिशब्दैर्व्यवहरन्ति ॥

3. **अर्थेति** । अथ कृष्णपूजानन्तरं चेदिपतिः शिशुपालः तत्र सदसि सभायां पाण्डुसुतेन युधिष्ठिरेण विहितं मुरद्विषः कृष्णस्य मानं पूजां नासहत । ईर्ष्यामकरोदित्यर्थः । तथाहि मानिनामहंकारिणां मनः परवृद्धौ मत्सरि हि । परशुभद्वेषि खल्विलर्थः ॥

4. **विषाद इति** । इष्टासिद्धिराजगुर्वाद्यपराधजन्योऽनुतापो विषादः । तत्र संस्कृतमुदाहरणम्—'व्यर्थं यत्र हरीन्द्रसख्यमपि मे, वीर्यं हरीणां वृथा, प्रज्ञा जाम्बवतो न यत्र, न गतिः पुत्रस्य वायोरपि । मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः, सौमित्रेरपि पत्त्रिणामविषयस्तत्र प्रिया क्वास्ति मे ॥' इति ॥

---

१. ग-पुस्तके. तु 'युगान्तकाल–'इति माघपद्यमुदाहृतम्. २.'परोत्कर्षाक्षमासूया गर्वदौर्जन्यमन्युजा ।' इति ग. ३. ग-पुस्तके तु 'मा गर्वमुद्वह–' इत्युदाहरणम्. ४. घ-पुस्तके तु विषादलक्षणात्प्राग् धृतिलक्षणं तदुदाहरणं च विषादलक्षणादग्रेऽस्ति, विषादोदाहरणं चासूयोदाहरणाग्रे.

यथा मम—

'[1]एसा कुडिलघणेण चिउरकडप्पेण तुह णिबद्धा वेणी ।
मह सहि दारइ डंसइ आअसजट्ठिव्व कालउरइव्व हिअअम् ॥'

अथ धृतिः—

[2]ज्ञानाभीष्टागमाद्यैस्तु संपूर्णस्पृहता [1]धृतिः ।
सौहित्यवचनोल्लाससहासप्रतिभादिकृत् ॥ १६८ ॥

यथा मम—

'[2]कृत्वा दीननिपीडनां निजजने बद्धा वचोविग्रहं
नैवालोच्य गरीयसीरपि चिरादामुष्मिकीर्यातनाः ।
द्रव्यौघाः परिसंचिताः खलु मया यस्याः कृते सांप्रतं
नीवाराञ्जलिनापि केवलमहो सेयं कृतार्था तनुः ॥'

अथ चपलता—

मात्सर्यद्वेषरागादे[3]श्चापल्यं त्वनवस्थितिः ।

पूजाम् । चेदिपतिः शिशुपालः । सत्त्वसंक्षयो बलहानिः । **एसा इति** । 'एषा कुटिलघनेन चिकुरकलापेन तव निबद्धा वेणी । मम सखि दारयति दशत्यायसयष्टिरिव कालोरगीव हृदयम् ॥' इति संस्कृतम् । स्पृहायाः समाप्तिरेव संपूर्णत्वम् । बद्धा कृत्वा । आमुष्मिकीः परलोकभवाः । नीवारस्तृणधान्यम्, कृते निमित्तम् । सांप्रतं वार्धके ।

---

1. **धृतिरिति** । लोभशोकभयादिजनितोपप्लवनिवारणकारणीभूतश्चित्तवृत्तिविशेषो धृतिः॥

2. **कृत्वेति** । निजपूर्ववस्थां निन्दतः कस्यचिज्ज्ञानवतः कथनमेतत् । दीनानां दुर्गतानां निपीडनामुत्प्रोचादिना निष्पीडनं कृत्वा, निजजने बान्धवादिवर्गे वचोविग्रहं वाक्कलहं बद्धा, चिरात् चिरकालिकीः गरीयसीरतितरां गुर्वीः आमुष्मिकीः पारलौकिकीरपि यातना नानाविधनरकभोगान् नैवालोच्य, अपर्यालोच्यैवेत्यर्थः । यस्याः कृते निमित्तम्, उपभोगार्थमित्यर्थः । मया द्रव्यौघा वित्तराशयः परिसंचिताः इतस्ततः परिभ्रम्य एकत्रीकृताः खलु, सेयं मामकीना तनुः सांप्रतं तत्त्वज्ञानदशायां केवलं नीवाराञ्जलिना अञ्जलिपरिमिततृणधान्येनापि कृतार्था कृतकृत्या । अहो आश्चर्यम् ॥

3. **चापल्यमिति** । अमर्षादिजन्यवाक्पारुष्यादिकारणीभूता चित्तवृत्तिश्चापल्यम् । यदाहुः—'अमर्षप्रातिकूल्येर्ष्यारागद्वेषाश्च मत्सरः । इति यत्र विभावाः स्युरनुभावस्तु भर्त्सनम् ॥' वाक्पारुष्यं प्रहारश्च ताडनं वधबन्धने । तच्चापलमनालोच्य कार्यकारित्वमिष्यते ॥ इति ॥

---

१. ग-पुस्तके तु 'वारं वारं तिरयति—' इत्युदाहरणम्. २. 'संतोषाज्ञानशक्त्यादेर्धृतिरव्यग्रभोगकृत्' इत्यर्धमेव ग-पुस्तके.

[1]तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः ॥ १६९ ॥

यथा—

'अन्यासु तावदुपमर्दसहासु भृङ्ग
लोलं विनोदय मनः सुमनोलतासु ।
मुग्धामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं [1]नवमालिकायाः ॥'

अथ ग्लानिः—

[3]रत्यायासमनस्तापक्षुत्पिपासादिसंभवा ।
ग्लानिर्निष्प्राणताकम्पकार्यानुत्साहतादिकृत् ॥ १७० ॥

यथा—

'किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।
ग्लपयति परिपाण्डुक्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥'

अथ चिन्ता—

ध्यानं चिन्ता[2] हितानाप्तेः शून्यताश्वासतापकृत् ।

अत्र तत्त्वज्ञानेन निःस्पृहत्वम् । **अन्यास्विति** । मधुपानकालीनश्चरणप्रहारादिरुपमर्दः । पक्षे संभोगकालीनश्चुम्बनालिङ्गनादिः । लोलं सतृष्णम् । मुग्धां कोमलां सुरतमूढां च । रजः परागः आर्तवं च । अकाले मकरन्दाभावदशायां बाल्ये च । अत्रोपभोक्तरि बालाया अस्थैर्यं परुषवचनेन प्रतीयते । निष्प्राणता असामर्थ्यम् । बन्धनात् उत्पत्तिस्थानात् । निष्प्राणत्वानौजस्यसत्त्वसंक्षयाणां बलहानिरूपत्वेऽपि

---

1 **नवेति** । सप्तलायाः ॥

2. **चिन्तेति** । इष्टाप्राप्त्यनिष्टप्राप्त्यादिजनिता ध्यानापरपर्याया वैवर्ण्यभूलेखनाधोमुखत्वादिहेतुश्चित्तवृत्तिविशेषश्चिन्ता । यदाहुः—'विभावा यत्र दारिद्र्यमैश्वर्यभ्रंशनं तथा । इष्टार्थापहृतिः शश्वच्छ्वासोच्छ्वासावधोमुखम् ॥ संतापः स्मरणं चैव कार्श्यं देहानुपस्कृतिः । अधृतिश्चानुभावाः स्युः सा चिन्ता परिकीर्तिता । वितर्कोऽस्याः क्षणे पूर्वे पाश्चात्येवोपजायते ॥' इति ॥

---

१. 'उद्वेगास्थितिवैरस्यप्रमुखैरवबुध्यते ।' इति ग. २. 'नवमल्लिकायाः' इति क. ३. 'रत्याद्यावासक्षुत्तृड्भिर्ग्लानिर्निष्प्राणता मता । अनुत्साहाङ्गदौर्बल्यखेदादैर्व्यक्तिमेति सा ॥' ग. ४. 'कार्श्यं' घ. ५. 'ललितनयनतारः क्षामवक्त्रेन्दुबिम्बा रजनय इव निद्राक्लान्तनीलोत्पलाक्ष्यः । तिमिरमिव दधानाः स्वंसिनः केशपाशानवनिपतिगृहेभ्यो यान्त्यमूर्वारवध्वः ॥' इति ग.

यथा मम[1]—

'कमलेण विअसिएण संजोएन्ती विरोहिणं ससिबिम्बम् ।
करअलपल्लत्थमुही किं चिन्तसि सुमुहि अन्तराहिअहिअआ ॥'

तर्को विचारः संदेहाद्भ्रूशिरोङ्गुलिनर्तकः ॥ १७१ ॥

यथा—'किं रुद्धः प्रिया–' इत्यादि ।

एते[2] च त्रयस्त्रिंशद्व्यभिचारिभेदा इति यदुक्तं तदुपलक्षणमित्याह[3]—

रत्यादयोऽप्यनियते रसे स्युर्व्यभिचारिणः ।

तथाहि शृङ्गारेऽनुच्छिद्यमानतयावस्थानाद् रतिरेव स्थायिशब्दवाच्या । हासः पुनरुत्पद्यमानो व्यभिचार्येव । व्यभिचारिलक्षणयोगात् । तदुक्तम्—

'रसावस्थः परं भावः स्थायितां प्रतिपद्यते ।' इति ।

विभिन्नकारणत्वेन ग्लानिदैन्यविषादानां भेदः । **कमलेणेति** । 'कमलेन विकसितेन संयोजयन्ती विरोधिनं शशिबिम्बम् । करतलपर्यस्तमुखी किं चिन्तयसि सुमुखि अन्तराहितहृदया ॥' इति संस्कृतम् । अनियते स्वावस्थितनियमरहिते । अनुच्छिद्यमानतया अवश्यंस्थायित्वेन उत्पद्यमानः विशेषानुकूल्येन शृङ्गाररूपतया रतौ

---

1. **तर्क इति** । संदेहाद्यनन्तरं जायमान ऊहो वितर्कः ॥

2. **एते चेति** । ननु कथमेषां भावानां संख्यानियमः, मात्सर्योद्वेगदम्भेर्ष्याविवेकनिर्णयक्लैब्यक्षमाकुतुकोत्कण्ठाविनयसंशयधार्ष्ट्यादीनामपि तत्र तत्र लक्ष्येषु दर्शनात् इति चेत्, न । उक्तेष्वेवैषामन्तर्भावेण संख्यान्तरानुपपत्तेः । असूयातो मात्सर्यस्य, त्रासादुद्वेगस्य, अवहित्थातो दम्भस्य, अमर्षादीर्ष्यायाः, मतेर्विवेकनिर्णययोः, दैन्यात्क्लैब्यस्य, धृतेः क्षमायाः, औत्सुक्यात्कुतुकोत्कण्ठयोः, लज्जातो विनयस्य, तर्कात्संशयस्य, चापलाद् धार्ष्ट्यस्य च वस्तुतः सूक्ष्मे भेदेऽपि नान्तरीयकतया तदनतिरिक्तस्यैवाध्यवसायात् । मुनिवचनानुपालनस्य संभवे उच्छृङ्खलताया अनौचित्यात् । एषु संचारिभावेषु मध्ये केचन केषांचन विभावा अनुभावाश्च भवन्ति । तथाहि—ईर्ष्याया निर्वेदं प्रति विभावत्वम्, असूयां प्रति चानुभावत्वम् । चिन्ताया निद्रां प्रति विभावत्वम्, औत्सुक्यं प्रति चानुभावत्वम् । एवमग्रेऽप्यूह्यम् ॥

---

१ 'मम' इति नास्ति ग-पुस्तके २. ग-पुस्तके तु 'खेदोज्झितामपि तनूमवसादयन्ती विश्वं निरावरणमेव तिरोदधाना । निद्रां विनापि नयने विनिमीलयन्ती चिन्ता पदं कृतवती हृदये ततोऽस्याः ॥' इत्युदाहरणम्. ३. 'एते च–' इत्यादिः '–भावितबुद्धिभिः ॥' इत्यन्तो ग्रन्थो ग-पुस्तके न दृश्यते.

तत्कस्य स्थायिनः कस्मिन्रसे संचारित्वमित्याह—

शृङ्गारवीरयोर्हासो वीरे क्रोधस्तथा मतः ॥ १७२ ॥
शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः ।
इत्याद्यन्यत्समुन्नेयं तथा भावितबुद्धिभिः ॥ १७३ ॥

अथ स्थायिभावः—

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः ।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायी[1]ति संमतः ॥ १७४ ॥

यदुक्तम्—

'सक्सूत्रवृत्त्या भावानामन्येषामनुगामकः ।
न तिरोधीयते स्थायी तैरसौ पुष्यते परम् ॥' इति ।

तद्भेदानाह—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च ॥ १७५ ॥

संगच्छमानः । **परमिति** । अवश्यमित्यर्थः । **अक्षमा इति** । 'भावाः' इति शेषः । कन्दो मूलम् । सक्सूत्रवृत्त्या सक्सूत्रन्यायेन । अनुगामकः व्यङ्ग्यत्वेन संबन्धी । तैर्भावैः पुष्यते रसरूपतां नीत्वा प्रवृद्धः क्रियते । तद्भेदान् स्थायिभावान् ।

---

1. **स्थायीति** । अन्तःकरणवृत्तिरूपस्य रत्यादेराशुविनाशित्वेऽपि संस्कारात्मना चिरकालमवस्थायित्वाद्यावद्रसप्रतीतिकालमनुसंधानाच्च स्थायित्वम् । तदुक्तम्—'विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः । आत्मभावं नयत्यन्यान्स स्थायी लवणाकरः ॥ चिरं चित्तेऽवतिष्ठन्ते संबध्यन्तेऽनुबन्धिभिः । रसत्वं ये प्रपद्यन्ते प्रसिद्धाः स्थायिनोऽत्र ते ॥' चिरमिति व्यभिचारिवारणाय । अनुबन्धिभिर्विभावादिभिः । तथा—'सजातीयविजातीयैरतिरस्कृतमूर्तिमान् । यावद्रसं वर्तमानः स्थायिभाव उदाहृतः ॥' इति । नाट्यशास्त्रेऽप्युक्तम्—'यथा नराणां नृपतिः शिष्याणां च यथा गुरुः । एवं हि सर्वभावानां भावः स्थायी महानिह ॥' इति । तत्रायं निष्कर्षः—'यथा समानलक्षणाः समानाङ्गप्रत्यङ्गाः कुलविद्याकर्मशिल्पविचक्षणत्वाद्राजत्वमाप्नुवन्ति तत्रैव चान्येऽल्पबुद्धयस्तेषामेवानुचरा भवन्ति तथा विभावानुभावव्यभिचारिणः स्थायिभावानुपाश्रिता भवन्ति । तत्र बह्वाश्रयत्वात्स्वामिभूताः स्थायिनो भावाः । तत्स्थानीयपुरुषगुणभूता अन्ये भावास्तान्गुणतयाश्रयन्ते । परिजनभूता व्यभिचारिणो भावाः । यथा राजा बहुजनपरिवारोऽपि स एव नाम लभते नान्यः सुमहानपि पुरुषस्तथा विभावानुभावव्यभिचारिपरिष्कृतः स्थायिभावो रसतां लभते' इति ॥

तत्र

[1]रतिर्मनोनुकूलेऽर्थे मनसः प्रवणायितम् ।
वागादिवैकृतैश्चेतोविकासो हास इष्यते ॥ १७६ ॥
इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभाक् ।
[2]प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते ॥ १७७ ॥
[3]कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते ।
रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम् ॥ १७८ ॥
[4]दोषेक्षणादिभिर्गर्हा जुगुप्सा विप्लवोद्भवा ।
विविधेषु पदार्थेषु लोकसीमातिवर्तिषु ॥ १७९ ॥

भावाः स्थायिभावाः । शमोऽपि च । स्थायिभाव इत्यर्थः । **रतिरिति** । मनसोऽनुकूले प्रिये वस्तुनि प्रवणायितम् । प्रेमार्द्रं मनो रतिरित्यर्थः । तच्चोत्कटावेश एव पर्यवस्यति । स चानुराग एव सोऽपि प्रकृते सुतेच्छारूप एव । केचित्तु—'स चानुराग एव सोऽपीष्टसाधनताज्ञानधारारूपः, अभिलाषहेतुत्वेनोक्तत्वात्' इत्याहुः । तन्न । सुरतेच्छाया आलम्बनप्राप्त्यभिलाषं प्रति हेतुत्वसंभवेन लक्षणाया अयोगात् । चेतोविकास उपहसनीयत्वेन ज्ञानमुखविकासरूपहास्यहेतुः । चेतोवैक्लव्यं दुःखम् । तैक्ष्ण्यस्य अपचिकीर्षाया अवबोध उत्कटत्वम् । कार्यारम्भेषु संनिकृष्टकार्येषु संरम्भ उत्कट आवेशः । केचित्तु—'संरम्भः सहर्षप्रवृत्तिः' इत्याहुः । तन्न । आद्यप्रवृत्तिरूपस्यारम्भस्य प्रवृत्त्यसंभवात्, वीररसे उत्कटावेशस्यैव स्थायित्वेनास्वाद्यमानत्वाच्च । **रौद्रशक्त्येति** । शात्रवादेरनिष्टदर्शनसामर्थ्येन जनितं यच्चेतसो वैक्लव्यमस्थिरत्वं

---

1. **रतिरिति** । रत्यादीनां विशदतरं लक्षणमभिहितं रसगङ्गाधरे—'स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यश्चित्तवृत्तिविशेषो रतिः । गुरुदेवतापुत्राद्यालम्बनस्तु व्यभिचारी । वागङ्गादिविकारदर्शनजन्मा विकासाख्यो हासः । पुत्रादिवियोगमरणादिजन्मा वैक्लव्याख्यश्चित्तवृत्तिविशेषः शोकः । गुरुबन्धुवधादिपरमापराधजन्मा प्रज्वलनाख्यः क्रोधः । अयं च परविनाशादिहेतुः । क्षुद्रापराधजन्मा तु परुषवचनासंभाषणादिहेतुः । अयमेवामर्षाख्यो व्यभिचारीति विवेकः । परपराक्रमदानादिस्मृतिजन्मा औन्नत्याख्य उत्साहः । व्याघ्रदर्शनादिजन्मा परमानर्थविषयको वैक्लव्याख्यः स भयम् । परमानर्थविषयकत्वाभावे तु स एव त्रासो व्यभिचारी । अपरे तु—औत्पातिकप्रभवस्त्रासः, स्वापराधोत्थं भयमिति भेदमाहुः । कदर्थ्य ुवेलोकनजन्मा विचिकित्साख्यश्चित्तवृत्तिविशेषो जुगुप्सा । अलौकिकवस्तुदर्शनादिजन्मा आश्चर्याख्यो विस्मयः ॥

---

१. '–वैकृतात्' घ. २. 'प्रातिकूल्यागमाच्चित्तविक्षोभः क्रोध उच्यते ।' इति ग. ३. 'अवधानात्मिका कर्तुरुत्साहोऽध्यवसायिता । अरिष्टदर्शनं भीतिररिसंदर्शनादिभिः ॥' इति ग. ४. 'जुगुप्सा गर्हणार्हाणां दोषसंदर्शनादिभिः ।' इत्यर्धमेव ग. पुस्तके.

[1]विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः ।
[1]शमो निरीहावस्थायां [2]स्वात्मविश्रामजं सुखम् ॥ १८० ॥

[3]यथा मालतीमाधवे रतिः । लटकमेलके हासः । रामायणे

जनयति तत्स्वानिष्टतर्कणम् । भयमित्यर्थः । केचित्तु—'वैक्लव्यं मनसो भयम्' इति पठित्वा रौद्रः क्रुद्धः तस्य क्रोधरूपया शक्त्या वैक्लव्यमिह भाविदुःखे द्वेषः । तस्य च परक्रोधजन्यत्वम्, तज्जन्यसुखविषयत्वात् । न तु तज्जन्यं दुःखमेव वैक्लव्यम्, तदनुत्पत्तिदशायामपि भीत्युपलम्भात् । एवं च मनःक्षोभरूपात्रासाख्यव्यभिचारिभावादस्य भेदः' इति व्याकुर्वन्ति । तन्न । व्याघ्रादीनां क्रोधाभावेऽपि तेभ्यो भयोत्पत्तिसंभवात् । मनःक्षोभरूपत्रासाख्यव्यभिचारिभावस्य भयंकरशात्रवाद्यनिष्टजननसामर्थ्यजन्यत्वेनैव भेदसंभवाच्च । लोकसीमातिवर्तिषु लोकव्यवहारातिक्रान्तेषु । विस्फारो विस्तारः । स च दृष्टहेतुभ्योऽसंभवित्वज्ञानेन हेत्वनुसंधाने मनोव्यापाररूपः निरीहावस्थायां निस्पृहदशायां स्वस्य जीवस्य आत्मनि परमात्मरूपे विश्रामोऽवस्थानम् । तज्जन्यमित्यर्थः । 'शान्तरसस्य निर्वेदः स्थायी' इति काव्यप्रकाशकृत् । तन्न । निर्वेदस्य व्यभिचारिरूपत्वेन स्थायित्वायोगात् । 'अविरुद्धाः' इति कारिकां विवृणोति—

---

1. **शम इति** । शमो निरीहावस्थायामित्यादेरयमाशयः—शान्तो नाम नवमो रसोऽनुभवसिद्धतया दुरपलापः । नामुष्य स्थायी निर्वेदो भवितुमर्हति । विषयेष्वलंप्रत्ययरूपत्वात्, आत्मावहेलनरूपत्वाद्वा । शान्तेश्च निखिलविषयपरिहारजनिरात्ममात्रविश्रामः सूचित[1]भावमयत्वानुभवात् । तदुक्तम्—'यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् । तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥' इति । अत एव 'सर्ववृत्तिविरामो[2] सिद्धः । [3]रास्तम् । अभावस्य स्थायित्वायोगात् । तस्माच्छमोऽस्य स्थायी । निर्वेदादयस्तु व्यभिचारिणः । स च शम उक्तलक्षणः । एतेन 'निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।' इति वदन्तः काव्यप्रकाशकाराः प्रत्युक्ता इति । तन्न पेशलम् । विषयेष्वलंप्रत्ययरूपस्य आत्मावहेलनरूपस्य वा निर्वेदस्य शोकवत्समाधेयत्वात् । वस्तुतस्तु रत्यादिकमुपजीव्य हर्षादेरिव तत्त्वज्ञानोत्पन्नं निर्वेदमुपजीव्य शमादेः प्रवृत्तिर्जायते । स एव स्थायी, न तु शमः । न च 'क्वचिच्छमः' इति मुनिवचनविरोध इति वाच्यम् । शम्यते यस्मादिति व्युत्पत्त्या तस्य निर्वेदपरत्वात् । तृष्णायाः क्षयो यस्मादिति व्युत्पत्त्या तृष्णाक्षयोऽपि निर्वेद एव । अत एव 'एकोनपञ्चाशद्भावाः' इति मुनिवचनं संगच्छते । अष्टौ स्थायिनः अष्टौ सात्त्विकाः त्रयस्त्रिंशद्व्यभिचारिण इति संकलनेन एकोनपञ्चाशत्त्वम् । अन्यत्रापि निर्वेदस्य शान्ते स्थायित्वमाम्नातम् । तदुक्तम्—'रतिः शोकश्च निर्वेदक्रोधोत्साहाश्च विस्मयः । हासो भयं जुगुप्सा च स्थायिभावाः क्रमादमी ॥' इति प्रकाशोन्मीलितमतयः ॥

---

१. 'विस्मयश्चित्तविस्तारः पूर्वादृष्टविलोकनात् ।' इति ग. २. 'आत्म' घ. ३. 'यथा—' इत्यादिः इति सिद्धाः ।' इत्यन्तः पाठो ग-पुस्तके नास्ति.

शोकः । महाभारते शमः । एवमन्यत्रापि । एते ह्येतेष्वन्तरा उत्पद्यमानैस्तैस्तैर्विरुद्धैरविरुद्धैश्च भावैरनुच्छिन्नाः प्रत्युत परिपुष्टा एव सहृदयानुभवसिद्धाः ।

किं च ।

नानाभिनयसंबन्धान्भावयन्ति रसान्यतः ।
तस्माद्भावा अमी प्रोक्ताः स्थायिसंचारिसात्त्विकाः १८१

यदुक्तम्[2]—

'सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम् ।'

अथ रसस्य भेदानाह—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्सोऽद्भुत इत्यष्टौ रसाः[1] शान्तस्तथा मतः ॥ १८२ ॥

एते हीति । रत्यादयो हीत्यर्थः । एषु रसेषु भावानां विशेषलक्षणान्युक्त्वा सामान्यलक्षणमाह—**किं चेति** । वेषचेष्टादिभिर्नायकसदृशीकरणमभिनयः तत्संबन्धान् तद्वचङ्गान् । **अभिनयेति** । काव्यमात्रपरम् । **सात्त्विका इति** । अनुभावमात्रोपलक्षणम् । बहुवचनाद्विभावपरिग्रहः । **सुखदुःखादिभिरिति** । सुखं शमः । दुःखं शोकः । आदिना रत्यादिपरिग्रहः । सुखादिभिः स्थायिभावैस्तद्भावनं रसत्वप्रापणं यस्मात्स भाव इत्यर्थः । अष्टाविति नाट्याभिप्रायेण । शान्तस्य तादृ-

---

1. **रसा इति** । शृङ्गारादयः शान्तान्ता नवरसा इत्यर्थः । यत्तु तस्य शमसाध्यत्वान्नटे च तदसंभवात् । अष्टावेव रसा नाट्ये न शान्तस्तन्मुनयः इति व्यवस्थापयन्ति, तच्चापरे न क्षमन्ते । तथाहि—नटे शमाभावादिति हेतुरसंगतः । तत्र रसाभिव्यक्तेरस्वीकरात् । सामाजिकानां शमवत्त्वेन तत्र रसोद्बोधे बाधकाभावात् । न च नटस्य शमाभावात्तदभिनयप्रकाशकत्वानुपपत्तिरिति वाच्यम् । तस्य भयक्रोधादेरप्यभावेन तदभिनयप्रकाशकताया अप्यसंगत्यापत्तेः । यदि च नटस्य क्रोधादेरभावेन वास्तवतत्कार्याणां वधबन्धादीनामुत्पत्त्यसंभवेऽपि कृत्रिमतत्कार्याणां शिक्षाभ्यासादित उत्पत्तौ नास्ति बाधकमिति निरीक्ष्यते तदा प्रकृतेऽपि तुल्यम् । अथ नाट्ये गीतवाद्यादीनां विरोधिनां सत्त्वात्सामाजिकेष्वपि विषयवैमुख्यात्मनः शान्तस्य कथमुद्रेक इति चेत्, नाट्ये शान्तरसमभ्युपगच्छद्भिः फलबलात्तद्गीतवाद्यादेस्तस्मिन्विरोधितायाः अकल्पनात् । विषयचिन्तासामान्यस्य तत्र विरोधित्वस्वीकारे तदीयालम्बनस्य संसारानित्यत्वस्य तद्दीपनस्य पुराणश्रवणसत्सङ्गपुण्यवनतीर्थावलोकनादेरपि विषयत्वेन विरोधित्वापत्तेः । अत एव चरमाध्याये संगीतरत्नाकरे—'अष्टावेव रसा नाट्येष्विति केचिदचूचुदन् ।

---

१. 'एतेषां भावशब्दार्थमाह' इति ग. २. 'यदुक्तम्—' इत्यादिः 'भावनम् ।' इत्यन्तः पाठो ग-पुस्तके नास्ति.

[1]विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः ।
[1]शमो निरीहावस्थायां [2]स्वात्मविश्रामजं सुखम् ॥ १८० ॥

[3]यथा मालतीमाधवे रतिः । लटकमेलके हासः । रामायणे

जनयति तत्स्वानिष्टतर्कणम् । भयमित्यर्थः । केचित्तु—'वैक्लव्यं मनसो भयम्' इति पठित्वा रौद्रः क्रुद्धः तस्य क्रोधरूपया शक्त्या वैक्लव्यमिह भाविदुःखे द्वेषः । तस्य च परक्रोधजन्यत्वम्, तज्जन्यसुखविषयत्वात् । न तु तज्जन्यं दुःखमेव वैक्लव्यम्, तदनुत्पत्तिदशायामपि भीत्युपलम्भात् । एवं च मनःक्षोभरूपात्रासाख्यव्यभिचारिभावादस्य भेदः' इति व्याकुर्वन्ति । तन्न । व्याघ्रादीनां क्रोधाभावेऽपि तेभ्यो भयोत्पत्तिसंभवात् । मनःक्षोभरूपत्रासाख्यव्यभिचारिभावस्य भयंकरशात्रवाद्यनिष्टजननसामर्थ्यजन्यत्वेनैव भेदसंभवाच्च । लोकसीमातिवर्तिषु लोकव्यवहारातिक्रान्तेषु । विस्फारो विस्तारः । स च दृष्टहेतुभ्योऽसंभवित्वज्ञानेन हेत्वनुसंधाने मनोव्यापाररूपः निरीहावस्थायां निस्पृहदशायां स्वस्य जीवस्य आत्मनि परमात्मरूपे विश्रामोऽवस्थानम् । तज्जन्यमित्यर्थः । 'शान्तरसस्य निर्वेदः स्थायी' इति काव्यप्रकाशकृत् । तन्न । निर्वेदस्य व्यभिचारिरूपत्वेन स्थायित्वायोगात् । 'अविरुद्धाः' इति कारिकां विवृणोति—

---

1. **शम इति** । शमो निरीहावस्थायामित्यादेरयमाशयः—शान्तो नाम नवमो रसोऽनुभवसिद्धतया दुरपलापः । नामुष्य स्थायी निर्वेदो भवितुमर्हति । विषयेष्वलंप्रत्ययरूपत्वात्, आत्मावहेलनरूपत्वाद्वा । शान्तेश्च निखिलविषयपरिहारजनिरात्ममात्रविश्रामः सूचित[1]भावमयत्वानुभवात् । तदुक्तम्—'यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् । तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥' इति । अत एव 'सर्ववृत्तिविरामो[2] सिद्धम् । [3]रास्तम् । अभावस्य स्थायित्वायोगात् । तस्माच्छमोऽस्य स्थायी । निर्वेदादयस्तु व्यभिचारिणः । स च शम उक्तलक्षणः । एतेन 'निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।' इति वदन्तः काव्यप्रकाशकाराः प्रत्युक्ता इति । तन्न पेशलम् । विषयेष्वलंप्रत्ययरूपस्य आत्मावहेलनरूपस्य वा निर्वेदस्य शोकवत्समाधेयत्वात् । वस्तुतस्तु रत्यादिकमुपजीव्य हर्षादेरिव तत्त्वज्ञानोत्पन्नं निर्वेदमुपजीव्य शमादेः प्रवृत्तिर्जायते । स एव स्थायी, न तु शमः । न च 'क्वचिच्छमः' इति मुनिवचनविरोध इति वाच्यम् । शम्यते यस्मादिति व्युत्पत्त्या तस्य निर्वेदपरत्वात् । तृष्णायाः क्षयो यस्मादिति व्युत्पत्त्या तृष्णाक्षयोऽपि निर्वेद एव । अत एव 'एकोनपञ्चाशद्भावाः' इति मुनिवचनं संगच्छते । अष्टौ स्थायिनः अष्टौ सात्त्विकाः त्रयस्त्रिंशद्व्यभिचारिण इति संकलनेन एकोनपञ्चाशत्त्वम् । अन्यत्रापि निर्वेदस्य शान्ते स्थायित्वमाम्नातम् । तदुक्तम्—'रतिः शोकश्च निर्वेदक्रोधोत्साहाश्च विस्मयः । हासो भयं जुगुप्सा च स्थायिभावाः क्रमादमी ॥' इति प्रकाशोन्मीलितमतयः ॥

---

१. 'विस्मयश्चित्तविस्तारः पूर्वादृष्टविलोकनात् ।' इति ग. २. 'आत्म' घ. ३. 'यथा—' इत्यादिः इति[3]सिद्धाः ।' इत्यन्तः पाठो ग-पुस्तके नास्ति.

तद्भेदानाह—

विप्रलम्भोऽथ संभोग इत्येष द्विविधो मतः ॥ १८६ ॥

[1]तत्र

[2]यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ ।

[3]अभीष्टं नायकं नायिकां वा ।

[4]सैं च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्धा स्यात् ॥१८७॥

राभासत्वादिति भावः । रोलम्बो भ्रमरः । आदिना देशकालादिग्रहणम् । तद्भेदौ शृङ्गारभेदौ । तत्र तयोर्मध्ये विप्रलम्भमाह—**यत्र त्विति** । तुशब्दश्चार्थः । तत्र रसे प्रकृष्टा प्रकरणादिना प्रधानत्वं प्राप्ता रतिरस्ति । नायिका नायको वा अभीष्टं नायकं नायिकां वा नोपैति नोपभुङ्क्ते असौ विप्रलम्भ इत्यर्थः । तथा चोपभोगाभावसंवलितप्रकृष्टरतिविषयो रसो विप्रलम्भ इत्यर्थः । करुणादौ शोकोद्दीपनतया रतिसत्त्वेन तत्रातिव्याप्तिवारणाय प्रकृष्टेति । संभोगेऽतिव्याप्तिवारणाय उपभोगाभावेति । विप्रलम्भसमानविषयके ज्ञानान्तरे संस्कारे वा अतिव्याप्तिवारणाय रस इति । अन्ये तु—'यत्र दुःखसंवलितत्वाद्रतिर्न प्रकृष्टा अभीष्टमुपैति विषयीकरोति स विप्रलम्भः' इति व्याकुर्वन्ति । तन्न । करुणेऽतिव्याप्तेः । यदि च 'यत्र' इत्यस्य 'शृङ्गारे' इति व्याकारात्करणे नातिव्याप्तिरित्युच्यते तदा 'अभीष्टमुपैति' इत्यस्यानर्थक्यम् । अभीष्टविषयरतेरेव शृङ्गारत्वेन परिणामात् । अपरे तु—'नायिकादिभिरभीष्टं नोपैति न संगच्छते । तथा चाभीष्टविच्छेदसंवलिता रतिर्यत्र स विप्रलम्भः' इत्याहुः । तन्न । प्रणयमानादावभीष्टविच्छेदाभावेनाव्याप्तेः । केचित्तु—'संयोगः सुखसंभिन्नो विप्रलम्भस्तु दुःखयुक् । रतिस्तयोः प्रकर्षः स्यादाधिक्यात्सुखदुःखयोः ॥' इति दर्शनाद् दुःखसंवलितरतिस्थायिभावको रसो विप्रलम्भः' इत्याहुः । तन्न । प्रणयमाने दुःखायोगादव्याप्तेः । स च विप्रलम्भः चतुर्धा इतीदमुपलक्षणम् । विरहोऽपि वेदितव्यः । स च गुर्वादिपरतन्त्रत्वात् । संगमप्रतिरोधो यथा—

---

1. **विप्रेति** । शृङ्गारो द्विविधः—संयोगो विप्रलम्भश्च । रतेः संयोगकालावच्छिन्नत्वे प्रथमः । वियोगकालावच्छिन्नत्वे द्वितीयः । संयोगश्च न दंपत्योः सामानाधिकरण्यम् । एकतल्पशयनेऽपीर्ष्यादिसद्भावे विप्रलम्भस्यैव वर्णनात् । एवं वियोगोऽपि न वैयधिकरण्यम् । दोषस्योक्तत्वात् । तस्माद्भावितौ संयोगवियोगाख्यावन्तःकरणवृत्तिविशेषौ । यत्संयुक्तो वियुक्तश्चास्मीति धीः । तत्राद्यो यथा—'शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान् । दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते ॥' इति । द्वितीयो यथा—'वाचो माङ्गलिकीः प्रयाणसमये जल्पत्यनल्पं जने केलीमन्दिरमारुतायनमुखे विन्यस्तवक्त्राम्बुजा । निःश्वासस्खलिताधरोपरिपतद्बाष्पार्द्रवक्षोरुहा बाला लोलविलोचना शिव शिव प्राणेशमालोकते ॥' इति विशेषो रसगङ्गाधरे ॥

---

१. 'तत्र' इति नास्ति ग. पुस्तके. २. 'तत्रापि विप्रलम्भो यूनोरन्योन्यरक्तयोर्विरहः' इति ग. ३. 'अभीष्टम्' इति नास्ति ग-पुस्तके. ४. 'स तु' ग.

तत्र

श्रवणाद्दर्शनाद्वापि मिथः संरूढरागयोः ।
दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते ॥ १८८ ॥
श्रवणं तु भवेत्तत्र दूतबन्दीसखीमुखात् ।
इन्द्रजाले च चित्रे च साक्षात्स्वप्ने च दर्शनम् ॥ १८९ ॥
अभिलाषश्चिन्तास्मृति[1]गुणकथनोद्वेगसंप्रलापाश्च ।
उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशाः १९०
[3]अभिलाषः स्पृहा चिन्ता प्राप्त्युपायादिचिन्तनम् ।
उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि ॥ १९१ ॥
अलक्ष्यवाक्प्रलापः स्याच्चेतसो भ्रमणाद्भ्रमः ।
व्याधिस्तु दीर्घनिःश्वासपाण्डुताकृशतादयः ॥ १९२ ॥
जडता हीनचेष्टत्वमज्ञानं मनसस्तथा ।
शेषं स्पष्टम् ।
क्रमेणोदाहरणानि—

'प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।

'किं रुद्धः प्रियया—' इत्यादि । अन्यथा तस्य निरुक्तप्रकारचतुष्टयानन्तर्भावाल्लक्ष्यलाभावेन तत्र सामान्यलक्षणस्यातिव्याप्तिप्रसङ्गात् । तत्र पूर्वरागादिषु । **मिथ इति** । अन्योन्यमित्यर्थः । दशाविशेषोऽवस्थाभेदः । अप्राप्तौ परस्परासंगमे । बन्दिनः स्तुतिपाठकाः । दशाविशेषानाह—**अभिलाष इति** । दश प्रकाराः । अत्र पूर्वरागे । कामकृता रतिजन्या दशाः कामदशाः । स्पृहा अभीष्टप्राप्तीच्छा । अपरिच्छेदो विशेषनिर्धारणाभावः । अलक्ष्यवाक् निर्विषयं वचः । शेषं स्मृत्यादिकम् । **प्रेमार्द्रा इति** । प्रेम्णा आर्द्रा निबिडसंपृक्ताः । प्रेमाभिव्यञ्जिका इति यावत् । प्रणयं द्रष्टुः स्नेहं स्पृशन्ति जनयन्ति । परिचयान्मुहुर्मुहुर्दर्शनात् । उद्गाढ उत्कटो यो रागः सुरतेच्छा तस्योदयो याभ्यस्ताः । मुग्धदृशो मालत्याः । चेष्टा नेत्रविक्षेपादिरूपाः

---

1. **स्मृतीत्यादि** । 'द्वेषो यत्रान्यकार्येषु तदेकाग्रं च मानसम् । श्वासैर्मनोरथैश्चापि चेष्टास्ताः स्मृतिरुच्यते ॥', 'सौन्दर्यहसितालापैर्नास्त्यन्यस्तत्समो युवा । इति वाणी भवेद्यत्र तदुक्तं गुणकीर्तनम् ॥', 'यस्मिन्नभ्यमरम्यं वा न च हर्षाय जायते । प्रद्वेषः प्राणितव्येऽपि स उद्वेगोऽभिधीयते ॥', 'श्वासप्ररोदनोत्कम्पवसुधोल्लेखनैरपि । व्यापारो जायते यत्र स उन्मादो निरूप्यते ॥'

---

१. 'स कीर्तितः' ग. २. 'अथ' नास्ति क-पुस्तके. ३. 'अभिलाषः—' इत्यादिः '-स्पष्टम् ।' इत्यन्तः पाठो ग. पुस्तके नास्ति.

यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः ॥'

अत्र मालतीसाक्षाद्दर्शनप्ररूढरागस्य माधवस्याभिलाषः ।

'कथमीक्षे कुरङ्गाक्षीं साक्षाल्लक्ष्मीं मनोभुवः ।
इति चिन्ताकुलः कान्तो निद्रां नैति निशीथिनीम् ॥'

अत्र कस्याश्चिन्नायिकाया इन्द्रजालदर्शनप्ररूढरागस्य नायकस्य चिन्ता । इदं[1] मम । 'मयि सकपटम्–' इत्यादौ नायकस्य स्मृतिः । 'नेत्रे खञ्जनगञ्जने–' इत्यादौ गुणकथनम् । 'श्वासान्मुञ्चति–' इत्यादौ उद्वेगः ।

'त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा व्यबुध्यत ।
क्व नीलकण्ठ व्रजसीत्यलक्ष्यवागसत्यकण्ठार्पितबाहुबन्धना ॥'

अत्र प्रलापः ।

'भ्रातर्द्विरेफ–' इत्यादावुन्मादः ।

'पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ॥'

अत्र व्याधिः ।

'भिसिणीअलसअणीए निहिअं सव्वं सुणिच्चलं अङ्गम् ।
दीहो णीसासहरो एसो साहेइ जीअइत्ति परम् ॥'

क्रियाः । बाह्यकरणव्यापाररोधी बाह्येन्द्रियसंबन्धप्रतिबन्धकः । आशंसापरिकल्पितासु संकल्पविषयीभूतासु । अन्तःकरणस्य लयो निबिडाभिनिवेशो भवतीत्यन्वयः । 'निशीथिनीम्' इत्यविच्छेदे द्वितीया । **इन्द्रजालेति** । इन्द्रजालस्य कुहकस्य क्रीडा । 'मयि सकपटं–' इति स्मृतिसंचारिभावोदाहरणम् । 'नेत्रे खञ्जनगञ्जने–' इति प्ररूढयौवनाया मध्यमनायिकाया उदाहरणम् । त्रिभागशेषासु तृतीयभागावशिष्टासु । अलक्ष्यवाक अविषयवचः । असत्यं मिथ्या शिवस्य कण्ठेऽर्पितं बाहुबन्धनं यया । यद्वा असत्यस्य अलीकदृष्टस्य शिवस्य कण्ठेऽर्पितं बाहुबन्धनं यया । 'भ्रातर्द्विरेफ–' इत्युन्मादसंचारिभावोदाहरणम् । क्षामं कृशम् । सरसं सानुरागम् । तव मालत्याः । **क्षेत्रियेति** । एतच्छरीराचिकित्स्येत्यर्थः । हृदन्तः हृदयमध्ये । **भिसिणीति** । 'बिसिनीदलशयनीये निहितं सर्वं सुनिश्चलमङ्गम् । दीर्घो निःश्वासभर एष

१, 'इदं मम–' इत्यादिः '–जडता । इदं मम ।' इत्यन्तः पाठो ग-पुस्तके नास्ति. २. 'एव' इति पुस्तकान्तरे.

अत्र जडता । इदं मम ।

रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते ॥ १९३ ॥
जातप्रायं तु तद्वाच्यं चेतसाकाङ्क्षितं तथा ।
वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरतः ॥ १९४ ॥

तत्राद्यं यथा—

'शेफालिकां विदलितामवलोक्य तन्वी
प्राणान्कथंचिदपि धारयितुं प्रभूता ।
आकर्ण्य संप्रति रुतं चरणायुधानां
किं वा भविष्यति न वेद्मि तपस्विनी सा ॥'

द्वितीयं यथा—

'रोलम्बाः [1]परिपूरयन्तु हरितो झंकारकोलाहलै-
र्मन्दंमन्दमुपैतु [1]चन्दनवनीजातो नभस्वानपि ।
माद्यन्तः [2]कलयन्तु चूतशिखरे केलीपिकाः पञ्चमं
प्राणाः सत्वरमश्मसारकठिना गच्छन्तु गच्छन्त्वमी ॥'

ममैतौ ।

तृतीयं यथा—कादम्बर्यां महाश्वेतापुण्डरीकवृत्तान्ते । [3]एष च प्रकारः करुणविप्रलम्भविषय इति वक्ष्यामः ।

साधयति जीवतीति परम् ॥' इति [संस्कृतम् ।] रसस्य रतेर्विच्छेदहेतुत्वाद् विनाशहेतुत्वात् । रत्याश्रयस्य मरणाद्रतेर्नाश इति मरणरूपानुभावेन रतेर्मिलनाभावाद्रसत्वं नोपपद्यत इति भावः । तन्मरणं मरणात्परं जीवनं प्रत्युज्जीवनम् । प्रभूता समर्था । संप्रति रात्रिशेषयामार्धे । चरणायुधानां कुक्कुटानाम् । किं कीदृगवस्था । तपस्विनी ब्रह्मचारिणी । मैथुनरहितत्वात् । अथवा तुच्छा अर्धरात्रे शेफालिका विकसति, तदानीमेव त्वामप्राप्य कथंचित्प्राणान्धारयति, रात्रिशेषयामार्धे कुक्कुटा नदन्ति, इदानीमपि त्वामप्राप्य सा मृतप्रायेति भावः । द्वितीयं चेतसः काङ्क्षितं मरणम् । नभस्वान् वायुः । पञ्चमं स्वरविशेषम् । अश्मसारकठिनाः लोह-

---

1. **चन्दनेति** । दाक्षिणात्यो वायुरित्यर्थः ॥

---

१. 'प्रति' ग. २. 'फलयन्तु' ग. ३. 'एष च–' इत्यादिः –'हृदयंगमं भवति ।' इत्यन्तः पाठो ग-पुस्तके न दृश्यते.

[1]केचित्तु—

'[2]नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ संकल्पः ।
निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः ॥
उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युः ॥' इत्याहुः ।

तत्र च

आदौ वाच्यः स्त्रिया रागः पुंसः पश्चात्तदिङ्गितैः ।

इङ्गितान्युक्तानि यथा रत्नावल्यां सागरिकावत्सराजयोः । आदौ पुरुषानुरागे संभवत्यप्येवमधिकं हृदयंगमं भवति ।

नीली कुसुम्भं मञ्जिष्ठा पूर्वरागोऽपि च त्रिधा ॥ १९५ ॥

तत्र

न चातिशोभते यन्नापैति प्रेम मनोगतम् ।
तन्नीलीरागमाख्यातं यथा श्रीरामसीतयोः ॥ १९६ ॥
कुसुम्भरागं तत्प्राहुर्यदपैति च शोभते ।
मञ्जिष्ठारागमाहुस्तं यन्नापैत्यतिशोभते ॥ १९७ ॥

अथ मानः—

मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः ।

कठिनाः । तृतीयं प्रत्युज्जीवनं संनिकृष्टस्मरणम् । एष तृतीयः । नयनप्रीतिर्दर्शनेच्छा । चित्तासङ्गः मनसः संगतिः । नायकप्राप्तीच्छासंकल्पः प्राप्त्युपायादिचिन्ता । तत्र च पूर्वरागे च । तदिङ्गितैः स्त्रीचेष्टाविशेषैः । **इङ्गितान्युक्तानीति** । अभिलाषादिरूपाणीत्यर्थः । एवं प्रथमं स्त्रिया रागवर्णनम् । मनोगतं मनोहरम् । 'एवमधिकहृदयंगमता भवति' इति पाठः । एवं प्रथमं स्त्रिया रागवर्णने । [3]कुसुम्भरागमञ्जिष्ठारागयोर्लक्ष्यं दर्शयितव्यमवश्यं यदि श्राव्यम् । मानमाह—**अथेति** । स तु मानस्तु । द्वयोः स्त्रीपुं-

---

1. **केचिदिति** । वात्स्यायनादयः ।

2. **नयनेति** । नायिकामवलोकयतः संयोगेच्छालक्षणात्कामादनन्तरं दृशौ स्निग्धे जायेते । ततो विषयाप्राप्तौ चित्तासङ्गस्तत्र चित्तस्य आसक्तिः । तस्मिन्सक्ते संकल्पः कथं प्राप्स्यामि प्राप्य चैवमनुष्ठातव्यमिति । ततः संकल्पयतो निद्राछेदः । निद्रामलभमानस्य तनुता शरीरकार्श्यम् । ततो विषयेभ्यो निवृत्तिः । सर्वथा तद्गतचित्तत्वादन्यविषयाज्वलज्ज्वलनज्वालाप्रख्यान्नोपयाति । तेभ्यश्च व्यावर्तमानस्य त्रपानाशो लज्जाप्रणाशनम् । गुरुभ्योऽपि निर्लज्जत्वान्न बिभेति । विप्रणष्टलज्जस्य निर्भयस्य चोन्मादः । ततो मूर्च्छा भवत्यस्वास्थ्यसंज्ञिका । ततो मृतिः प्राणत्यागः ॥

---

1. 'कुसुम्भ—' इत्यादिः '—श्राव्यम्' इत्यन्तः पाठः पुस्तकान्तरे नास्ति.

द्वयोः प्रणयमानः स्यात्प्रमोदे[1] सुमहत्यपि ॥ १९८ ॥
प्रेम्णः कुटिलगामित्वात्कोपो यः कारणं विना ।

द्वयोरिति नायकस्य नायिकायाश्च उभयोश्च प्रणयमानो वर्णनीयः । [2]उदाहरणम् । तत्र नायकस्य यथा—

'अलिअपसुत्तअणिमीलिअच्छ देसुँ सुहअ मज्झ ओआसम् ।
गण्डपरिउम्बणपुलइअङ्ग ण उण्णो चिराइस्सम् ॥'

नायिकाया यथा कुमारसंभवे संध्यावर्णनावसरे ।

उभयोर्यथा—

पणअकुविआणँ दोण्णं वि अलिअसुत्ताणँ माणइण्णाणम् ।
णिच्चलणिरुद्धणीसासदिण्णअण्णाणँ को मल्लो ॥'

अनुनयपर्यन्तासहत्वे त्वस्य न विप्रलम्भभेदता, किंतु संभोगसंचार्यौत्सुक्यभावत्वम् ।

यथा—

'[3]भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते ।

सयोः । प्रमोदे प्रेम्णि । ननु प्रमोदे सति कोप एव न भवति, कथं तत्र मानलक्षणसंगतिरित्यत आह—**प्रेम्ण इति** । कुटिलगामित्वात् कुटिलनायकादिवृत्तित्वात् । कारणमपराधादि । कुटिलस्य विनापि कारणं तत्संभावनया कोपो भवतीति भावः । यद्वा कुटिलगामित्वाद् दुरवगमस्वभावत्वात् । **अलिअ इति** । 'अलीकप्रसुप्तकनिमीलिताक्ष देहि सुभग मह्यमवकाशम् । गण्डपरिचुम्बनपुलकिताङ्ग न पुनश्चिरयिष्यामि ॥' इति संस्कृतम् । मम विलम्बे तव क्रोधो जात इति लक्ष्यते । पुनरेवं विलम्बं न करिष्यामीति भावः । अत्रालीकस्वप्ने नायकस्य कौटिल्यम् । **पणअकुवि इति** । 'प्रणयकुपितयोर्द्वयोरप्यलीकसुप्तयोर्मानविज्ञयोः । निश्चलनिरुद्धनिःश्वासदत्तकर्णयोः को मल्लः ॥' इति संस्कृतम् । मल्लो मानभङ्गसमर्थः । प्रियवचनादिरूपमानभङ्गानुकूलव्यापारोऽनुनयः । तत्पर्यन्तासहत्वे । तं विनैव भङ्गुरत्वे चेत्यर्थः । अस्य प्रणयमानस्य ईर्ष्या । अत्रासूया तस्या एव व्यभिचारित्वेन गणितत्वात् । **भ्रूभङ्ग इति** । मानोपदेष्ट्रीं सखीं प्रति नायिकाया उक्तिरियम् । दग्धाननं तुच्छ-

---

१. 'प्रणये' क. २. 'उदा—' इत्यादिः '—भावत्वम् ।' इत्यन्तः पाठः क-ख-ग-पुस्तकेषु नास्ति.
३. 'भ्रूभङ्गे—' इति श्लोकः क-ग. पुस्तकयोर्नास्ति.

संभोगचिह्नेनानुमिते यथा—

'नवनखपदमङ्गं गोपयस्यंशुकेन
स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टम् ।
प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्प-
न्नवपरिमलगन्धः केन शक्यो वरीतुम् ॥'

एवमन्यत्र ।

साम भेदोऽथ दानं च नत्युपेक्षे रसान्तरम् ।
तद्भङ्गाय पतिः कुर्यात्षड्[1]उपायानिति क्रमात् ॥ २०१ ॥
तत्र प्रियवचः साम, भेदस्तत्सख्युपार्जनम् ।
दानं व्याजेन भूषादेः, पादयोः पतनं नतिः ॥ २०२ ॥
सामादौ तु परिक्षीणे स्यादुपेक्षावधीरणम् ।
रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरम् ॥ २०३ ॥

यथा—'नो चाटुश्रवणे कृतम्–' इत्यादि । अत्र सामादयः पञ्च सूचिताः । रसान्तरमूह्यम् ।

अथ प्रवासः—

प्रवासो भिन्नदेशित्वं कार्याच्छापाच्च संभ्रमात् ।

र्नायकापराधजन्यक्रोधप्रभवपरागैः । **नवनखेति** । नायकं प्रति मानिन्या उक्तिरियम् । स्थगयसि आच्छादयसि । परिमलो विमर्दलभ्यकुङ्कुमादिस्तस्य गन्धः । केन उपायेन । वरीतुं गोपयितुम् । प्रसङ्गान्मानभङ्गोपायानाह—**सामेति** । तद्भङ्गाय मानभङ्गाय । तस्या मानिन्याः सख्या उपार्जनं प्रसादनम् । अवधीरणमवज्ञया त्यागः । रभसः संभ्रमः । यतो रभसादेः कोपभ्रंशस्तद्रसान्तरमित्यर्थः । रसान्तरोदाहरणं यथा—'कथं ममोरसि कृतपक्षनिस्खनः शिलीमुखोऽपतदिति जल्पति प्रिये । विवृत्य किं [6]किमिति सजल्पया तया ससाध्वसं कुपिताममोचि कान्तया ॥' अत्र कान्तवक्षसि शरपतनशङ्कया मानभङ्गः । प्रवासमाह—**प्रवास इति** । भिन्नदेशित्वं भिन्नदेशवृत्तित्वम् । अत्रापि यत्रेत्यनुषज्यते । यत्र स्त्रीपुंसयोर्भिन्नदेशित्वं तत्तदनुभावजनकत्वेन स्वाद्यते प्रवास इत्यर्थः । अस्य कारणान्याह—**कार्यादिति** ।

---

1. **उपायानिति** । अत्र विशेषः शृङ्गारतिलके—'यथोत्तरं बलीयांस इत्युपायाः प्रसादने । आद्यास्त्रयो घनं कार्या विदग्धैः पश्चिमाः क्वचित् ॥' इति ॥

---

१. 'चिह्नेन' इति क-पुस्तके नास्ति. २. 'एवमन्यदपि' क. 'ज्ञेयम्' इत्यधिकं ग-पुस्तके. ३. 'सख्युपायनम्' क., 'सख्युपासनम्' ग. ४. 'तूह्यम्' ग. ५. 'भिन्नदेशत्वम्' क-ग. ६. 'किमिदमिति ब्रुवाणया' इति शृङ्गारतिलकस्थः पाठः.

तत्राङ्गचेलमालिन्यमेकवेणीधरं शिरः ॥ २०४ ॥
निःश्वासोच्छ्वासरुदितभूमिपातादि जायते ।

किं च ।

अङ्गेष्वसौष्ठवं तापः पाण्डुता कृशतारुचिः ॥ २०५ ॥
अधृतिः स्यादनालम्बस्तन्मयोन्मादमूर्च्छनाः ।
मृतिश्चेति क्रमाज्ज्ञेया दश स्मरदशा इह ॥ २०६ ॥
असौष्ठवं मलापत्तिस्तापस्तु विरहज्वरः ।
अरुचिर्वस्तुवैराग्यं सर्वत्रारागिताधृतिः ॥ २०७ ॥
अनालम्बनता चापि शून्यता मनसः स्मृता ।
तन्मयं तत्प्रकाशो हि बाह्याभ्यन्तरतस्तथा ।

शेषं स्पष्टम् ।

एकदेशतो यथा मम तातपादानाम्—

'चिन्ताभिः स्तिमितं मनः, करतले लीना कपोलस्थली,
[1]प्रत्यूषक्षणदेशपाण्डु वदनं, श्वासैकखिन्नोऽधरः ।
[2]अम्भःशीकरपद्मिनीकिसलयैर्नीपैति तापः शमं,
कोऽस्याः प्रार्थितदुर्लभोऽस्ति सहते दीनां दशामीदृशीम् ॥'

भावी भवन्भूत इति त्रिधा स्यात्तत्र कार्यजः ॥ २०८ ॥

[3]कार्यस्य बुद्धिपूर्वकत्वात्त्रैविध्यम् ।

अस्यानुभावानाह—**तत्रेति** । प्रवास इत्यर्थः । अङ्गमालिन्यादिकं नायिकायाः । मतान्तरमाह—**किं चेति** । दशेत्यत्र एकादशेति विज्ञेयम् । एवं च 'ज्ञेया' इत्यत्र 'एका' इति पाठः कल्पनीयः । इह प्रवासे । मलापत्तिर्मलसंबन्धः । शून्यता विषयाग्राहित्वम् । तत्प्रकाशः तस्य नायकस्यालीकदर्शनम् । **बाह्याभ्यन्तरत इति** । बहिरिन्द्रियग्राह्ये मनोग्राह्ये चेत्यर्थः । **चिन्ताभिरिति** । विरहिणीसख्याः कंचित्प्रत्युक्तिरियम् । स्तिमितं जडीकृतम् । विषयान्तरसंचयाक्षममिति यावत् । एतेनालम्बनता सूचिता । श्वासैकखिन्नः । न तु कान्तदशनक्षतेन । प्रार्थितः सन् दुर्लभः । यो दीनां दैन्यव्यञ्जिकां दशां सहत इत्यर्थः । बुद्धिपूर्वकत्वात्स्वेच्छया विधीयमान-

---

1. **प्रत्यूषेति** । प्रत्यूषे प्रभाते यः क्षणदेशश्चन्द्रमास्तद्वत्पाण्डु । निष्प्रभमित्यर्थः ॥

2. **अम्भ इति** । अम्भःशीकरैश्चन्दनोदककणिकाभिः, पद्मिनीकिसलयैः पाथोजिनीनवदलैश्च । यद्वा अम्भसां शीकरा येषु तादृशैः पद्मिनीकिसलयैः । सचस्नोटितत्वादित्यर्थः ॥

---

१. ग-पुस्तके तु 'असौष्ठवम्–' इत्यादिः '–ईदृशीम् ॥' इत्यन्तः पाठो नास्ति. २. 'कार्यस्य–' इति फक्किका नास्ति ग-पुस्तके.

तत्र भावी यथा मम—

'यामः[1] सुन्दरि, याहि पान्थ, दयिते शोकं वृथा मा कृथाः,
शोकस्ते गमने कुतो मम, ततो बाष्पं कथं मुञ्चसि ।
शीघ्रं न व्रजसीति, मां गमयितुं कस्मादियं ते त्वरा,
भूयानस्य सह त्वया जिगमिषोर्जीवस्य मे संभ्रमः ॥'

भवन्यथा—

'प्रस्थानं[2] वलयैः कृतं, प्रियसखैरस्रैरजस्रं गतं,
धृत्या न क्षणमासितं, व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वं समं प्रस्थिता
गन्तव्ये सति जीवित प्रियसुहृत्सार्थः किमु त्यज्यते ॥'

लात् । एवं च भिन्नदेशगमनस्य संभावनायां भावित्वम् । निश्चये वर्तमानलम् । निष्पत्तौ भूतत्वम् । अन्ययोस्तु संभावनानिश्चयासंभवादेकविधत्वमेव । **याम इति** । वर्तमानसामीप्ये लट् । गमनसंभावनामात्रेण तत्र यत् 'पान्थ' इति संबोधनं तत्स्वस्मिन्कान्तस्य प्रेमाभावसूचनाय । तदवगत्य झटित्येव 'दयिते' इत्यनेन संबोधनम् । ततः शोकाभावादिति हेतोर्बाष्पं मुञ्चामीत्यर्थः । जीवस्य प्राणानाम् । संभ्रमस्त्वरा । अत्र कान्तासंमतिसापेक्षतया गमनस्य संभावनामात्रम् । **प्रस्थानमिति** । कान्तप्रवासं निश्चित्य स्वजीवितं प्रति नायिकाया उक्तिरियम् । भो जीवित, प्रियतमप्रवासे सति त्वया अवश्यं गन्तव्यम् । तथा च प्रियतमे यातुं निश्चितचेतसि सति त्वया च वलयादिप्रियसुहृत्सार्थः किं कथं त्यज्यते । तेनैव साकं गम्यतामित्यर्थः । प्रियसुहृद्भिः सह गमने कष्टातिशयो न भविष्यतीति । जीवितसत्त्व एव वलयादिधारणं क्रियत इति वलयादीनां जीवितप्रियसुहृत्त्वम् । प्रस्थानमाह—**प्रस्थानमिति** । यात्रेत्यर्थः । बहुदिनव्यापकतद्वार्तया कार्श्येन वलयभ्रंशः । अस्रैरश्रुभिरजस्रं निरवच्छिन्नं गतं गन्तुमारब्धम् । एषु पुनः प्रियसखत्वोपपादनमत्यन्तप्रियत्वसूचनाय । तच्चेदशदुःखे अश्रुप्रतेनैव जीवितबन्धो भवतीति स्वरक्षाकारित्वात् । अन्ये तु—'अश्रुजीवितयोरेकहृदयगामित्वादत्यन्तप्रियत्वम्' इत्याहुः । तेषामयमाशयः—नाडीविशेषेण हृत्कोषादश्रुनिर्गमो भवतीति, न चैवं धृतेरपि प्रियसखत्वापत्तिरिति वाच्यम्, धृतेरात्मधर्मत्वेन मनोधर्मत्वेन वा हृदयवृत्तित्वायोगात् । नासितं गतं पुरो गन्तुमित्यनेन चित्तस्य पुरःसरत्वमेवोपपादितम् । नतु विभिन्नकालीनं गमनम् । तेन समं प्रस्थिता इति नानुपपन्नम् । यद्वा प्रियजीवन एव वलया धार्यन्त इति वलयानां धृतेः प्रीतिजनकत्वाच्चित्तस्य तत्प्रवणत्वात्प्रियस्य सुहृत्त्वम् । अस्राणां तु मानभङ्गव्यञ्जकतया अत्यन्तसखित्वमित्यत्र पृथक् प्रियसखित्वोपादानम् । प्रियतमगमने गन्तुमारब्धा

---

१. ग-पुस्तके तु 'यामः—' इति श्लोको नास्ति, तत्स्थाने 'प्रस्थानं वलयैः—' इति श्लोको वर्तते.
२. 'यामीति प्रेयसोक्तायाः [कान्तायाः] कण्ठसंस्थयोः । वचोजीवितयोरासीत्पुरोनिःसरणे रणः ॥' इति ग.

भूतो यथा—'चिन्ताभिः स्तिमितम्–' इत्यादि । शापाद्यथा—'तां जानीयाः–' इत्यादि । [२]संभ्रमो दिव्यमानुषनिर्घातोत्पातादिजः । यथा—विक्रमोर्वश्यामुर्वशीपुरूरवसोः ।

[३]अत्र पूर्वरागोक्तानामभिलाषादीनामत्रोक्तानां चाङ्गासौष्ठवादीनामपि दशानामुभयेषामप्युभयत्र संभवेऽपि चिरंतनप्रसिद्ध्या उभयसंभवे विविच्य प्रतिपादनम् ।

अथ करुणविप्र[४]लम्भः—

यूनोरेकतरस्मिन्गतवति लोकान्तरं पुनरलभ्ये ।
विमनायते यदैकस्तदा भवेत्करुणविप्रलम्भाख्यः ॥२०९॥

यथा कादम्बर्यां पुण्डरीकमहाश्वेतावृत्तान्ते ।

पुनरलभ्ये शरीरान्तरेण वा लभ्ये तु करुणाख्य एव रसः ।

वलयादयः सख्योचितं कर्म कुर्वन्ति । त्वमपि प्रियस्य सुहृद्भवसीति तवापि गमनं न्याय्यमित्याह—गन्तव्ये सतीति । अत्रेयमुक्तिरनुभावः । अश्रुपातहृत्तापव्यङ्ग्यो विवादो व्यभिचारिभावः । प्रियमत आलम्बनम् । नायिकाया रतिश्चेत्र सामाजिके रसोत्पत्तिः । **तां जानीया इति** । प्रोषितभर्तृकाया नायिकाया उदाहरणमिदम् । दिव्यो विद्युदुल्कादिः । मानुषो मर्त्यलोकभवो भूकम्पादिः । निर्घात इति नाभसोपलक्षणम् । उत्पातोऽनिष्टसूचको देवकृतः प्रकृतिविपर्यासः । आदिना उन्मादादिपरिग्रहः । **उर्वशीपुरूरवसोरिति** । उर्वशी हि पुरा मित्रावरुणशापान्मनुष्यलोकं प्राप्य पुरूरवसो गृहे 'यदि भवन्तं सुरतसमयातिरिक्तसमये नग्नं पश्यामि तदा त्वामहं त्यक्ष्यामि, मम मेषद्वयं भवता रक्षणीयम्' इति नियमं कृत्वा स्थिता । तदनन्तरं देवैरन्धतमसे मेषद्वयमपहृतम् । तच्छ्रुत्वा पुरूरवाः ससंभ्रमेण वस्त्रमपरिधायैव खड्गपाणिर्मेषापहर्तुः पश्चाद्धावितः । एतस्मिन्नन्तरे विद्युद्भिस्तं नग्नमवलोक्योर्वशी स्वर्गं गतेति ग्रन्थस्य वर्तुलार्थः । अत्र देवकृतमेषापहरणरूपदिव्योत्पातेन पुरूरवसः संभ्रमः, तेनोर्वश्या भिन्नदेशवृत्तित्वम् । उभयत्र पूर्वरागे प्रवासे च । करुणविप्रलम्भमाह—**यूनोरिति** । विमनायते शोकव्याकुलचित्ततया विलापं कुरुते । **पुनरलभ्य इति** । रतेर्नाशाद् उत्कटशोकसंभवाच्च करुणाख्यो रसः, न पुनर्विप्रलम्भ इति भावः ।

---

१. ग-पुस्तके तु 'किं गतेन यदि सा न जीवति प्राणिति प्रियतमा तथापि किम् । इत्युदीक्ष्य नवमेघमालिकां न प्रयाति पथिकः स्वमन्दिरम् ॥' इत्युदाहरणम् . २. 'संभ्रमः–' इत्यादिः '–वसोः ।' इत्यन्तः पाठो नास्ति ग-पुस्तके. ३. 'अत्र–' इत्यादि फक्किका ग-पुस्तके '–सरदशा इह ॥ २०६ ॥' इति श्लोकादग्रे दृश्यते. ४. 'विप्रलम्भः' इति क-ग-पुस्तकयोर्नास्ति.

किंचात्राकाशसरस्वतीभाषानन्तरमेव[1] शृङ्गारः, संगमप्रत्याशया[2] रतेरुद्बुद्धत्वात् । प्रथमं तु 'करुण एव' इत्यभियुक्ता मन्यन्ते । यच्चात्र 'संगमप्रत्याशानन्तरमपि भवतो विप्रलम्भशृङ्गारस्य प्रवासाख्यो भेद एव' इति केचिदाहुः, तदन्ये[3] 'मरणरूपविशेषसंभवात्तद्भिन्नमेव' इति[4] मन्यन्ते ।

अथ संभोगः—

दर्शनस्पर्शनादीनि निषेवेते विलासिनौ[5] ।
यत्रानुरक्तावन्योन्यं संभोगोऽयमुदाहृतः ॥ २१० ॥

आदिशब्दादन्योन्याधरपानचुम्बनादयः । यथा—'शून्यं वासगृहम्—' इत्यादि ।

संख्यातुमशक्यतया[6] चुम्बनपरिरम्भणादिबहुभेदात् ।
अयमेक एव धीरैः कथितः संभोगशृङ्गारः ॥ २११ ॥
तत्र स्याद्दुतपट्टं चन्द्रादित्यौ तथोदयास्तमयः ।
जलकेलिवनविहारप्रभातमधुपानयामिनीप्रभृतिः ॥२१२॥
अनुलेपनभूषाद्या वाच्यं शुचि मेध्यमन्यच्च ।

तथा च भरतः—'यत्किंचिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं वा तत्सर्वं शृङ्गारेणोपमीयते (उपयुज्यते च)' इति ।

अत्र विशेषमाह—**किं चेति** । निषेवेते कुरुतः । एकतरस्यानुरागाभावे शृङ्गाराभास इति तद्वारणाय—**अन्योन्यमिति । शून्यमिति** । व्याख्यातमेतत्प्राक् । एक एकप्रकारः । संभोगोद्दीपनविभावानाह—**तत्रेति** । संभोग इत्यर्थः । स्याद् उपयुक्तं भवेति । वाच्यं संभोगोद्दीपकतया वर्णनीयम् । शुचिमेध्यमित्यन्तं निर्मलम् । अन्यद्-

---

1. **अत्रेति** । अत्र कादम्बर्यां चन्द्रापीडं प्रति स्वप्रेयसः पुण्डरीकस्येतिवृत्तं वर्णयन्त्या महाश्वेतायाः वाक्येष्वित्यर्थः । स्त्रीपुंसयोर्वियोगे जीवित्वज्ञानदशायां वैकुव्यपोषिताया रतेरेव प्राधान्याद्विप्रलम्भः । वैकुव्यं तु संचारिमात्रम् । मृतत्वज्ञानदशायां तु रतिपोषितस्य वैकुव्यस्यैव प्राधान्यमिति करुण एव । यदा तु सत्यपि मृतत्वज्ञाने देवताप्रसादादिना पुनरुज्जीवनज्ञानं कथंचित्स्यात्तदालम्बनस्यात्यन्तिकनिरासाभावाच्चिरप्रवास इव विप्रलम्भ एव । न स करुण इति नव्याः ॥

2. **विलासिनाविति** । विलासिनी च विलासी च विलासिनावित्येकशेषः ॥

---

१. '—आशायां' **ग-घ.** २. 'एतदन्ये' **क.** ३. '—अपि मन्यन्ते' **क-घ.** ४. 'स संभोगो मुदान्वितः' **ग.** ५. 'आदि—' इत्यादि फक्किका नास्ति **ग**-पुस्तके. ६. 'वचित्र्याच्च विभावानुभावसंचारिणामनन्तत्वात् ।' इति **ग.**

किं च ।

कथितश्चतुर्विधोऽसावानन्तर्यात्तु पूर्वरागादेः ॥ २१३ ॥

यदुक्तम्—

'न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते ।
कषायिते हि वस्त्रादौ भूयान्रागो विवर्धते ॥' इति ।

तत्र पूर्वरागानन्तरं संभोगो यथा कुमारसंभवे पार्वतीपरमेश्वरयोः । प्रवासानन्तरं संभोगो यथा मम तातपादानाम्—

'क्षेमं ते ननु पक्ष्मलाक्षि–किसअं खेमं महङ्गं दिढं,
एताद्दक्कृशता कुतः–तुह पुणो पुट्ठं सरीरं जदो ।
केनाहं पृथुलः प्रिये–पणइणीदेहस्स संमीलणात्,
त्वत्तः सुभ्रु न कापि मे–जइ इदं खेमं कुदो पुच्छसि ॥'

एवमन्यत्राप्यूह्यम् ।

र्म्यादि । संख्यातुं शक्या ये संभोगभेदास्तानाह—**किं चेति** । एतदभेदवादिमतापेक्षया पक्षान्तरसूचनम् । आदिना मानप्रवासकरुणविप्रलम्भानां ग्रहणम् । अश्नुते आप्नोति । एतेन पूर्वरागादिकं विनापि संभोगः संभवतीति सूचितम् । तथा च प्रकृष्टाप्रकृष्टभेदेन संभोगो द्विविधः । विप्रलम्भानन्तरः संभोगः प्रकृष्टः । स च विप्रलम्भस्तु भेदेन चतुर्विधः । तद्विपरीतोऽपकृष्ट इति फलितम् । **क्षेमं ते इति** । संस्कृतेन नायकस्य प्रश्नः, प्राकृतेन नायिकाया उत्तरम् । किसअं कृशकम् । क्षेमं ममाङ्गं दृढम् । अतिशयितं कृशं यन्ममाङ्गं तदेव क्षेममित्यर्थः । तव पुनः पुष्टं शरीरं यतः । प्रणयिनीदेहस्य संमीलनात् । यदीदं क्षेमं कुतः पृच्छसि । अपरो यथा मम—'पादप्रणतमालोक्य कान्तमेकान्तकातरम् । मुञ्चन्ती बाष्पसंतानं सुमुखी तेन चुम्बिता ॥', 'कान्ते घोरकृतान्तवक्त्रकुहरात्त्वं पुण्यपुञ्जेन मे मुक्ता क्रन्त तदर्जनश्रमभरं प्रत्यङ्गमालिङ्ग्य माम् । इत्याकर्ण्य निमीलितार्धनयनं स्मेरं शनैरानतं

---

१. ग-पुस्तके तु 'कथितः–' इत्यादेः 'ऊह्यम् ।' इत्यन्तस्य ग्रन्थस्य स्थाने 'यद्यप्येक एवायमुक्तरतथापि तत्र विप्रलम्भानन्तर्याच्चतुर्विधः । पूर्वरागानुत्तरसंभोगो यथा–'पाणिपीडनविधेरनन्तरं शैलराजदुहितुर्हरं प्रति । भावसाध्वसपरिग्रहादभूत्कामदोहदमनोहरं वपुः ॥' मानानन्तरसंभोगो यथा—'संदष्टेऽधरपल्लवे सचकितं हस्ताग्रमाधुन्वती मा मा मुञ्च शठेति कोपवचनैरानर्तितभ्रूलता । सीत्काराञ्चितलोचना सरभसं वैश्वम्बिता मानिनी प्रातं तैरमृतं श्रमाय मथितो मूढैः सुरैः सागरः ॥' प्रवासानन्तरसंभोगो यथा—'गुरुजन·····त्वरितमहा·····पद्मबन्धो । इति वदति मनोभवाभिभूता चिरसमयागतवल्लभा मृगाक्षी ॥' करुणानन्तरसंभोगो यथा उत्तरकादम्बर्याम् । उक्तं च वात्स्यायनेन—'नवो नव इवोदेति संभोगोऽनन्तरो हि सः । स चेतःप्रीतये चन्द्रः परिमुक्तो घनैरिव ॥' इति पाठान्तरमुपलभ्यते.

अथ हास्यः—

विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत् ।
[1]हास्यो हासस्थायिभावः श्वेतः प्रमथदैवतः ॥ २१४ ॥
विकृताकारवाक्चेष्टं यमालोक्य हसेज्जनः ।
तदत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम् ॥ २१५ ॥
[2]अनुभावोऽक्षिसंकोचवदनस्मेरतादयः ।
[3]निद्रालस्यावहित्थाद्या अत्र स्युर्व्यभिचारिणः ॥ २१६ ॥
ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च ।
नीचानामपहसितं तथातिहसितं तदेष [4]षड्भेदः ॥ २१७ ॥
[5]ईषद्विकासिनयनं स्मितं स्यात्स्पन्दिताधरम् ।
किंचिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः ॥ २१८ ॥

सोल्लासं वदनाम्बुजं मृगदृशः स्मेरं चुचुम्बे प्रियः ॥' हास्यरसमाह—**विकृतेति** । विकृता आकारादयो यस्य तस्मात्कुहकात् नर्तकात् । एतदुपलक्षणम् । विकृताकारादिविषयकश्रव्यकाव्यादपि । 'कुतुकात्' इति पाठे विकृताकारादिजन्यात्कौतुकादित्यर्थः । अत्र हास्यरसे । तच्चेष्टा विकृताकारादिपुरुषचेष्टा । हास्यरसस्थायिभावस्य हासस्य भेदानाह—**ज्येष्ठानामिति** । उत्तमानामित्यर्थः । **तदिति** । हास्यभेदादित्यर्थः । एष हास्यरसः । स्मितादीनां लक्षणमाह—**ईषदिति** । तत्र हासेषु

---

1. **हास्य इति** । हासस्थायिभावको विकृतकुदालम्बनको वैकृताद्युद्दीपितो गल्लफुल्लानुभावितः श्रमादिसंचारितो हास्य इति निर्गलितार्थः । अत्राहुः—'आत्मस्थः परसंस्थश्चेत्यस्य भेदद्वयं मतम् । आत्मस्थो द्रष्टुरुत्पन्नो विभावेक्षणमात्रतः ॥ हसन्तमपरं दृष्ट्वा विभावश्चोपजायते । योऽसौ हास्यरसस्तज्ज्ञैः परस्थः परिकीर्तितः ॥ उत्तमानां मध्यमानां नीचानामप्यसौ भवेत् । व्यवस्थः कथितस्तस्य षड्भेदाः सन्ति चापरे ॥ स्मितं च हसितं प्रोक्तमुत्तमे पुरुषे बुधैः । भवेद्विहसितं चोपहसितं मध्यमे नरे ॥ नीचेऽपहसितं चातिहसितं परिकीर्तितम् । ईषत्फुल्लकपोलाभ्यां कटाक्षैरप्यनुल्बणैः ॥ अदृश्यदशनो हासो मधुरः स्मितमुच्यते । वक्त्रनेत्रकपोलैश्चेदुत्फुल्लैरुपलक्षितः ॥ किंचिल्लक्षितदन्तश्च तदा हसितमिष्यते । सशब्दं मधुरं कालगतं वदनरागवत् ॥ आकुञ्चिताक्षि मन्दं च विदुर्विहसितं बुधाः । निकुञ्चितांसशीर्षश्च जिह्मदृष्टिविलोकनः ॥ उत्फुल्लनासिको हासो नात्रोपहसितं मतम् । अस्थानजः साश्रुदृष्टिराकम्पस्कन्धमूर्धजः । शार्ङ्गदेवेन गदितो हासोऽपहसिताह्वयः ॥ स्थूलकर्णकटुध्वानो बाष्पपूरप्लुतेक्षणः । करोपगूढपार्श्वश्च हासोऽतिहसितं मतम् ॥' इति ॥

---

१. 'हासः' क. २. 'अनुभावाः फुल्लगल्ल' ग. ३. 'हर्षावहित्थप्रमुखास्तथा' ग. ४. 'च षड्भेदाः' घ. ५. पादोनः श्लोकोऽयं क-पुस्तके त्रुटितः.

मधुरस्वरं विहसितं सांसशिरःकम्पमवहसितम् ।
अपहसितं सास्राक्षं विक्षिप्ताङ्गं [च] भवत्यतिहसितम् ॥२१९

[1]यथा—

'[1]गुरोर्गिरः पञ्च दिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयं च ।
अमी समाघ्राय च तर्कवादान्समागताः कुक्कुटमिश्रपादाः ॥'

[3]अस्य लटकमेलकप्रभृतिषु परिपोषो द्रष्टव्यः ।

अत्र च—

यस्य हासः स चेत्कापि साक्षान्नैव निबध्यते ।
तथाप्येष विभावादिसामर्थ्यादुपलभ्यते ॥ २२० ॥
अभेदेन विभावादिसाधारण्यात्प्रतीयते ।
सामाजिकैस्ततो हास्यरसोऽयमनुभूयते ॥ २२१ ॥

[3]एवमन्येष्वपि रसेषु बोद्धव्यम् ।

अथ करुणः—

[2]इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् ।
[4]धीरैः कपोतवर्णोऽयं कथितो यमदैवतः ॥ २२२ ॥
[5]शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम् ।
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः ॥ २२३ ॥

मध्ये । गुरोः प्रभाकरस्य । ननु रसे नायकस्याभेदः सामाजिके भासते स चात्र श्लोकेन निबद्धः कथं तस्याभेदारोपो जायतामित्यत आह—**अत्र चेति** । चकारादन्यत्र । एष नायकः । विभावादेः सामर्थ्यात् । अन्यथानुपपत्तिज्ञानात् । ततः किमित्यत आह—**अभेदेनेति** । स्वपरसाधारणत्वेनेत्यर्थः । साधारण्यात् साधारणीकरणव्यापारात् । ततः साधारण्यज्ञानात् । करुणरसमाह—**इष्टेति** । इष्टनाशश्च

---

1. **गुरोरिति** । गुरोर्भट्टप्रभाकरस्य गिरो मीमांसाशास्त्ररूपा इत्यर्थः । 'श्रीतातपादैर्विहिते निबन्धे निरूपिता नूतनयुक्तिरेषा । अङ्गं गवां पूर्वमहो पवित्रं न वा कथं रासभधर्मपत्न्याः ॥' इत्युदाहरणान्तरम् ॥

2. **करुणेति** । शोकस्थायिभावको मृताद्यालम्बनकस्तद्गुणाद्युद्दीपितो रोदनाद्यनुभावितो दैन्यादिसंचारितः करुण इति ॥

---

१. 'यथा मम' घ. २. 'अस्य—' इत्यादि फक्किका ग-पुस्तके नास्ति. ३. 'एवम्—' इति फक्किका नास्ति ग-पुस्तके. ४. 'शोकस्थायी कपोताभवर्णोऽयम्' ग. ५. 'अभीष्टं वस्तु यन्नष्टं तदत्रालम्बनं मतम् । तदीयगुणदोषाद्यास्तस्योद्दीपनरूपिणः ॥' इति ग.

[1]अनुभावा दैवनिन्दाभूपातक्रन्दितादयः ।
वैवर्ण्योच्छ्वासनिःश्वासस्तम्भप्रलयनानि च ॥ २२४ ॥
निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः ।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥ २२५ ॥

[2]शोच्यं विनष्टबन्धुप्रभृति ।

[1]यथा मम राघवविलासे[3]—

'विपिने क्व जटानिबन्धनं तव चेदं क्व मनोहरं वपुः ।
अनयोर्घटनाविधेः स्फुटं ननु खड्गेन शिरीषकर्तनम् ॥'

अत्र हि रामवनवासजनितशोकार्तस्य दशरथस्य दैवनिन्दा । एवं बन्धुवियोगविभवनाशादावप्युदाहार्यम् । परिपोषस्तु महाभारते स्त्रीपर्वणि द्रष्टव्यः ।

अस्य करुणविप्रलम्भाद्भेदमाह—

शोकस्थायितया भिन्नो विप्रलम्भादयं रसः ।
विप्रलम्भे रतिः स्थायी पुनः संभोगहेतुकः ॥ २२६ ॥

पुत्रादेर्विच्छेदो मरणं च वित्तादेर्नाशश्च । अनयोर्जटाधारणश्रीरामशरीरयोः । घटना योजना । खड्गेन शिरीषकर्तनमिवेत्यर्थः । अत्र प्रकरणाद्दशरथो नायको लभ्यत इति विवृणोति—**अत्रेति** । अनुचिताचरणमेव दैवस्य निन्दा सैवानुभावः । बन्धुवियोगो बन्धुमरणम् । तत्र यथा—'गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ । करुणाविमुर्केन मृत्युना हरता त्वां वद किं न मे हृतम् ॥' अत्रेन्दुमतीमरणजनितशोकार्तस्याजस्य मृत्युनिन्दा । वित्तनाशो यथा—'प्रातर्भवामि वसुधाधिपचक्रवर्ती सोऽहं व्रजामि विपिने जटिलस्तपस्वी । यच्चिन्तितं तदिह दूरतरं प्रयाति यच्चेतसा न गणितं तदिहाभ्युपैति ॥' अत्र नष्टराज्यस्य रामस्य परिदेवनम् । स्थायिभाव इति शेषः । पुनः संभोगो हेतुर्ज्ञापको यस्य सः । रौद्ररसमाह—

---

1. **यथेति** । यथा वा मम—'धाराबन्धममी पतन्ति सततं दृग्भ्यां पयोबिन्दवः कीलालीढमिवान्तरं स्फुटति हा गात्रं मुहुः सीदति । जायन्ते पुरतस्तमांसि धिषणा वैकल्यमालम्बते हित्वास्मान्क गतोऽसि शीघ्रमहहा प्रत्युत्तरं दीयताम् ॥' इति ॥

---

१. 'अनुभावोऽश्रु ..... लम्बनादयः । विषादग्लानिनिर्वेदमोहाद्या व्यभिचारिणः ॥' इति पाठान्तरं ग-पुस्तके. २. 'शोच्यं–' इत्यादेः '–द्रष्टव्यः ।' इत्यन्तस्य पाठस्य स्थाने ग-पुस्तके 'नवपल्लवसंस्तरेऽपि ते मृदु दूयेत यदङ्गमर्पितम् । तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणम् ॥' इत्येव दृश्यते. ३. '–विलापे' घ.

अथ रौद्रः—

[1]रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः ।
[2]आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम् ॥ २२७ ॥
मुष्टिप्रहारपातनविकृतच्छेदावदारणैश्चैव ।
संग्रामसंभ्रमाद्यैरस्योद्दीप्तिर्भवेत्प्रौढा ॥ २२८ ॥
भ्रूविभङ्गौष्ठनिर्दशबाहुस्फोटनतर्जनाः ।
आत्मावदानकथनमायुधोत्क्षेपणानि च ॥ २२९ ॥
उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः ।
अनुभावास्तथाक्षेपक्रूरसंदर्शनादयः ॥ २३० ॥
मोहामर्षादयस्तत्र भावाः स्युर्व्यभिचारिणः ।

यथा—

'[2]कृतमनुकृतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥'

रौद्र इति । तच्चेष्टा रिपुचेष्टा । तां विशिष्याह—**मुष्टीति** । विकृतं विरुद्धाचरणम् । छेदः खड्गादिना । अवदारणं शूलादिना । अस्य रौद्रस्य । 'अवदानं कर्मवृत्तम्' इत्यमरः । **कृतमिति** । द्रोणशिरश्छेदेन क्रुद्धस्याश्वत्थाम्नोऽर्जुनं प्रति संबोध्योक्तिरियम् । इदं मत्पितृशिरश्छेदरूपं गुरुपातकं तत्कारणं कर्म यैरुद्यतायुधैर्मर्यादाशून्यैरत एव मनुजपशुभिर्भवद्भिः कृतमनुमतं दृष्टं वा, नरकरिपुणा कृष्णेन सार्धं भीमकिरीटिसहितानां तेषां मेदोमांसैरयमहं दिशां दिगवस्थितभूतानां बलिं करोमीत्यर्थः । अयमेतत्क्षणवर्त्येव । अत्राश्वत्थाम्नः क्रोधस्यार्जुनादिरालम्बनम् । तदाकार्यमुद्दीपनम् । तादृशगर्जनमनुभावः । ननु रौद्रयुद्धवीरयो रिपुरालम्बनं विभाव इत्य-

---

1. **रौद्र इति** । क्रोधस्थायिभावको द्विषदालम्बनकस्तदपकाराद्युद्दीपितो विकत्थनाद्यनुभावितो गर्वादिसंचारितो रौद्र इति ॥

2. **कृतमिति** । इह रौद्ररसव्यञ्जनक्षमा वृत्तिर्नास्ति, अतः 'नवोच्छलितयौवनस्फुरदखर्वगर्वज्वरे मदीयगुरुकार्मुकं गलितसाध्वसं वृश्चति । अयं पततु निर्दयं दलितदृप्तभूभृद्बलस्खलद्रुधिरघस्मरो मम परश्वधो भैरवः ॥' इदमुदाहार्यम् । एषा च रामभद्रं प्रति परशुरामस्योक्तिः । अत्र महोद्धता वृत्ती रौद्रस्य परमौजस्वितां परिपुष्णाति ॥

---

१. 'आलम्बन विरोधी स्यात्' ग. २. 'हस्तनिष्पेषपारुष्यरक्ताक्षाद्यनुभावभूः । मोहामर्षाग्रतासूया-वेगादिव्यभिचारिमान् ॥' इति ग.

अस्य युद्धवीराद्भेदमाह—

रक्तास्यनेत्रता चात्र भेदिनी युद्धवीरतः ॥ २३१ ॥

अथ वीरः—

उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः ।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः ॥ २३२ ॥
[1]आलम्बनविभावास्तु विजेतव्यादयो मताः ।
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः ।
अनुभावास्तु तत्र स्युः सहायान्वेषणादयः ॥ २३३ ॥
संचारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः ।
[1]स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात् ॥ २३४ ॥

[2]स च वीरो दानवीरो धर्मवीरो युद्धवीरो दयावीरश्चेति चतुर्विधः । तत्र [2]दानवीरो यथा परशुरामः—

नयोरभेद एवापतित इति तयोर्भेदं दर्शयितुमाह—**अस्येति** । रौद्रस्येत्यर्थः । रक्तास्यनेत्रताव्यङ्ग्यः क्रोध एव भेदः । तथा चोभयत्र रिपोरालम्बनत्वेऽपि क्रोधाविर्भावे रौद्रः, उत्साहाविर्भावे वीर इत्यनयोर्भेद इति भावः । वीररसमाह—**उत्तमप्रकृतिरिति** । उत्तमा धीरोदात्तरूपा प्रकृतिर्नायको यत्रेत्यर्थः । यद्वा उत्तमा चमत्कारातिशयाधायकतया रसान्तरादुत्कृष्टा प्रकृतिः स्वभावो यस्येत्यर्थः । विजेतव्यादिचेष्टाद्येत्यादिना दाने सत्त्वाध्यवसायादेर्धर्मे धर्मशास्त्राध्ययनादेर्दयायां दीनस्य कातरोक्त्यादेर्ग्रहणम् । सहायः सहकारी । स च युद्धे सैन्यं दाने वित्तं धर्मे द्रव्यमन्त्रादि दयायां त्यागादि । रोमाञ्चस्य संचारिभावत्वाभावात्तज्जनकहर्षे लक्षणा—**स चेति** ।

---

1. **स चेति** । स च चतुर्धेति प्रायोवादः । 'राज्यं च—' इत्यत्रैव 'ते प्रकामं विघ्नवन्तां मा भूत्सत्यस्य विघ्नवः' इत्युत्तरार्धव्यत्यासेन श्लोकान्तरतानयने सत्यवीरस्यापि संभवात् । न च सत्यस्यापि धर्मान्तर्भावेन धर्मवीररसे एव तद्वीरस्याप्यन्तर्भाव इति वक्तुं युज्यते । दानदययोरपि धर्मान्तर्भावतया तद्वीरयोरपि धर्मवीरात्पृथग्गणनानौचित्यात् । एवं पाण्डित्यवीरबलवीरादयोऽपि संभवन्ति । तत्राद्यो यथा—'अपि वक्ति गिरांपतिः स्वयं यदि तासामधिदेवतापि वा । अयमस्मि पुरो हयाननस्मरणोल्लङ्घितवाङ्मयाम्बुधिः ॥' अत्र गीर्पत्याद्यालम्बनः सभादर्शनोद्दीपितो निखिलविद्वत्तिरस्कारानुभावितो गर्वेण संचारिणा परिपोषितो वक्तरुत्साहः प्रतीयते ॥

2. **दानवीर इति** । अत्रेदमुदाहार्यम्—'कियदिदमधिकं मे यद्विजायार्थयित्रे कव-

---

१. 'आलम्बन—' इत्यादेः '—रोमाञ्चाः ।' इत्यन्तस्य पाठस्य स्थाने 'प्रतिनेतृनदुत्कर्षालम्बनोद्दीपनान्वितः । चातुर्थामत्रणस्थैर्यप्रसादाद्यनुभावभूः ॥ क्रोधाभिमानहासप्रमुखव्यभिचारिपरिपुष्टः ।' इति. पाठो ग-पुस्तके. २. 'स—' इत्यादिः '—रामः ।' इत्यन्तः पाठो नास्ति ग पुस्तके.

'त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः' इति ।

[1]अत्र परशुरामस्य त्यागे उत्साहः स्थायिभावः संप्रदानभूतब्राह्मणैरालम्बनविभावैः [2]सत्त्वाध्यवसायादिभिश्चोद्दीपनविभावैर्विभावितः सर्वस्वत्यागादिभिरनुभावैरनुभावितो हर्षधृत्यादिभिः संचारिभिः पुष्टिं नीतो दानवीरतां भजते ।

वीरश्चेत्यर्थः । दानादावुत्साहसंभवादिति भावः । **त्याग इति** । सप्तभिः समुद्रैर्मुद्रिता वेष्टिता या मही तस्या निर्व्याजं निरुपाधि यद्दानं तदेवावधिर्यस्य सः । सत्त्वस्य गुणविशेषस्य अध्यवसाय उद्रेकः । आदिना प्ररोचनादेर्ग्रहणम् ।

चमरमणीयं कुण्डले चार्पयामि । अकरुणमवकृत्य द्राक्कृपाणेन निर्यद्बहलरुधिरधारं मौलिमावेदयामि ॥' इति । एषा द्विजवेषाय शक्राय कवचकुण्डलदानोद्यतस्य कर्णस्य तद्दानविस्मितान्सभ्यान्प्रत्युक्तिः । अत्र याचमान आलम्बनम् । तदुदीरिता स्तुतिरुद्दीपिका । कवचादिवितरणं तत्र लघुत्ववुद्ध्यादिकं चानुभावः । मे इत्यर्थान्तरसंक्रमितवाच्यध्वन्युत्थापितो गर्वः स्वकीयलोकोत्तरपितृजन्यत्वादिस्मृतिश्च संचारिणौ । वृत्तिरप्यत्र तत्तदर्थानुरूपोद्भमविरामशालितया सहृदयैकचमत्कारिणी । तथाहि—उत्साहपोषकं कवचकुण्डलार्पणयोर्लघुत्वनिरूपणं विधातुं पूर्वार्धे तदनुकूलशिथिलबन्धात्मिका । उत्तरार्धे तु मौलितः प्राग्वक्तृगतगर्वोत्साहपरिपोषणायोद्धता । ततः परं ब्राह्मणे सविनयत्वं प्रकाशयितुं तन्मूलीभूतं गर्वराहित्यं ध्वनयितुं पुनः शिथिलैव । अत एव 'आवेदयामि' इत्युक्तम् । न तु ददामि वितरामीति वा । इदं तु नोदाहरणीयम्—'यस्योद्दामदिवानिशार्थिविलसद्दानप्रवाहप्रथामाकर्ण्यावनिमण्डलागतविपद्बन्दीन्द्रवृन्दाननात् । ईर्ष्यानिर्भरफुल्लरोमनिकरव्यावल्गदूधःस्रवत्पीयूषप्रकरैः सुरेन्द्रसुरभिः प्रावृट्पयोदायते ॥' अत्रेन्द्रसभामध्यगतसकलनिरीक्षकालम्बनः, अवनिमण्डलागतविपद्बन्दीन्द्रवदनविनिर्गतराजदानवर्णनोद्दीपितः, ऊधःप्रस्रुतपीयूषप्रकरैरनुभावितः, असूयादिसंचारिभिः परिपोषितोऽपि कामगवीगत उत्साहो राजस्तुतिगुणीभूत इति न रसव्यपदेशहेतुः । अत एवेदमपि नोदाहरणम्—'साब्धिद्वीपकुलाचलां वसुमतीमाक्रम्य सप्तान्तरां सर्वां वामपि सस्मितेन हरिणा मन्दं समालोकितः । प्रादुर्भूतपरप्रमोदविदलद्रोमाञ्चितस्तत्क्षणं व्यानम्रीकृतकंधरोऽसुरवरो मौलिं पुरो न्यस्तवान् ॥' इह च भगवद्दामनालम्बनः, तत्कर्तृकमन्दनिरीक्षणोद्दीपितः, रोमाञ्चादिभिरनुभावितः, हर्षादिभिः पोषितः, उत्साहो व्यज्यमानोऽपि गुणः । प्रागन्यगतस्येव प्रकृते राजगतस्यापि तस्य राजस्तुत्युत्कर्षकत्वात् । एतेन 'त्यागः सप्तसमुद्र–' इति प्रकृतोदाहरणं न युक्तम् । तस्य गुणीभूतव्यङ्ग्यत्वेन रसध्वनिप्रसङ्गेऽनुदाहरणीयत्वात् । 'उत्पत्तिर्जमदग्नितः स भगवान्देवः पिनाकी गुरुर्वीर्यं तत्र न मद्गिरामनुपमं व्यक्तं हि तत्कर्मभिः । त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः सत्यश्लाघ्यतपोनिधेर्भगवतः किं किं न लोकोत्तरम् ॥' इति तु पूर्णः श्लोकः ॥

---

१. 'अत्र–' इत्यादिः '–भजते ।' इत्यन्तः पाठो ग-पुस्तके नास्ति. २. 'पात्रप्राप्तिसाम्राज्यादिभिः' क.

धर्मवीरो यथा युधिष्ठिरः—

'राज्यं च वसु देहश्च भार्या भ्रातृसुताश्च ये ।
यच्च लोके ममायत्तं तद्धर्माय सदोद्यतम् ॥'

युद्धवीरो यथा श्रीरामचन्द्रः—

'भो लङ्केश्वर दीयतां जनकजा रामः स्वयं याचते
कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किंचिद्गतम् ।
नैवं चेत्खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः
पत्री नैष सहिष्यते मम धनुर्ज्यावन्धवन्धूकृतः ॥'

दयावीरो यथा जीमूतवाहनः—

'शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवापि तावत्किं भक्षणात्त्वं विरतो गरुत्मन् ॥'

[1]एष्वपि विभावादयः पूर्वोदाहरणवदूह्याः ।

अथ भयानकः—

[1]भयानको भयस्थायिभावः [2]कालाधिदैवतः ।
स्त्रीनीचप्रकृतिः [3]कृष्णो मतस्तत्त्वविशारदैः ॥ २३५ ॥

राज्यं चेति । उद्यतमुपयुक्तम् । अत्र युधिष्ठिरस्य वैदिककर्मण्युत्साह एतादृशोक्त्यानुभावेनास्वाद्यमानः सामाजिकानां रसतामापद्यते । **भो इति** । रावणं प्रति श्रीरामस्योक्तिरियम् । नयं नीतिम् । गतं नष्टम् । एवं जनकजादानम् । पत्री शरः । [4]आत्मनोऽसहनं पत्रिण्यारोपितम्, रिपुहनने तस्य प्रधानोपायत्वसूचनाय । ज्यावन्धवन्धूकृतः गुणयोजितः । अत्र श्रीरामस्य युद्धोत्साह एतादृशोक्त्यानुभावेनास्वाद्यमानः सामाजिकानां रसतामापद्यते । **शिरामुखैरिति** । नाडीछिद्रैरित्यर्थः । मम जीमूतवाहनस्य । गरुत्मन्निति श्येनरूपधारिणः शक्रस्य संबोधनम् । अत्र जीमूतवाहनस्य कपोतरूपधारिधर्मात्मकपरदुःखप्रहरणोत्साहः स्वदेहमांसत्यागानुभावेनास्वाद्यमानः सामाजिकानां रसतामापद्यते । भयानकरसमाह—**भयानक इति । स्त्रीनीचप्रकृतिरिति** । स्त्रीनीचनायक इत्यर्थः । 'बालस्त्री नीचनायकः' इति [3]रुद्र-

---

1. **भयानक इति** । भयस्थायिभावको विकटाद्यालम्बनकस्तद्विकटकर्माद्युद्दीपितः पलायनाद्यनुभावितो जडतादिसंचारितो भयानक इति ॥

2. **कालेति** । 'कामदेवो भयानकः' इति भरतोक्त्या 'कामाधिदैवतः' इति पाठ इति प्रतिभाति । तथा सति भयानकबीभत्सयोर्भिन्नाधिदैवत्वमपि जायते ॥

3. **रुद्रेति** । शृङ्गारतिलककर्तुः रुद्रभट्टस्य कथनादित्यर्थः ॥

---

१. 'एषु–' इति फक्किका नास्ति ग-पुस्तके. २. 'भूताधि–' ग. ३. 'कृष्णवर्णोऽयं समुदाहृतः' ग. ४. 'आत्म–' इत्यादि 'सूचनाय' इत्यन्तं पुस्तकान्तरे नास्ति.

[1]यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।
चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः ॥ २३६ ॥
अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणम् ।
प्रलयस्वेदरोमाञ्चकम्पादिक्प्रेक्षणादयः ॥ २३७ ॥
जुगुप्सावेगसंमोहसंत्रासग्लानिदीनताः ।
शङ्कापस्मारसंभ्रान्तिमृत्यवाद्या व्यभिचारिणः ॥ २३८ ॥

यथा—[3]'नेष्टं वर्षवरैः–' इत्यादि ।

अथ बीभत्सः—

[1]जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः ॥ २३९ ॥
दुर्गन्धमांस[3]रुधिरमेदांस्यालम्बनं मतम् ।
तत्रैव [4]कृमिपाताद्यमुद्दीपनमुदाहृतम् ॥ २४० ॥
[5]निष्ठीवनास्यवलननेत्रसंकोचनादयः ।
अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः ॥ २४१ ॥
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः ।

यथा—

'उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोथभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।

पाठोक्तेर्बालनायकत्वमपि बोध्यम् । तस्यालम्बनस्य । संभ्रान्तिरुन्मादः । **नष्टमिति** । अत्र वर्षवरादीनां नीचानां वानरवेषेणान्तःपुरप्रविष्टं विदूषकमालोक्य जायमानं भयं नाशाद्यनुभावेनाक्षाद्यमानं सामाजिकानां रसतामापद्यते । स्त्रीनायको यथा—'इदं मघोनः कुलिशं धारासंनिहितानन्म् । स्मरणं यस्य दैत्यस्त्रीगर्भपाताय कल्पते ॥' बालनायको यथा—'घोरमम्भोधरध्वानं निशम्य व्रजबालकाः । मातुरङ्के निलीयन्ते सकम्पविकृतस्वराः ॥' बीभत्सरसमाह—**जुगुप्सेति** । निष्ठीवनं थूत्कप्रक्षेपः । आस्यवलनं मुखसंवरणम् । **उत्कृत्योत्कृत्येति** । श्मशाने शवं भुञ्जानं प्रेतं दृष्ट्वा

---

1. **बीभत्स इति** । जुगुप्सास्थायिभावको विण्मूत्राद्यालम्बनको दुर्गन्धाद्युद्दीपितो निष्ठीवनाद्यनुभावितो ग्लान्यादिसंचारितो बीभत्स इति ॥

---

१. ग-पुस्तके तु 'यस्मात्–' इत्यादेः '–चारिणः ॥' इत्यन्तस्य स्थाने 'व्याघ्राद्यालम्बनस्तत्तद्भैक्तोद्दीपनो मतः । कम्पप्रस्वेदरोमाञ्चमीलनाद्यनुभाववान् ॥ जडतादीनतात्रासमोहादिव्यभिचारयुक् ॥' इति पाठः. २. ग-पुस्तके तु 'ग्रीवाभङ्गाभिरामम्–' इति शाकुन्तलपद्यमुदाहृतम्. ३. 'पिशित' क-घ. ४. 'कृमिपानाद्यास्तस्योद्दीपनरूपिणः' ग. ५. 'निष्ठीवनास्य–' इत्यादेः '–मरणादयः ।' इत्यन्तस्य स्थाने, निष्ठ्यूताद्यनुभावोऽत्र मोहाद्या व्यभिचारिणः' इति पाठो ग-पुस्तके.

आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥'

अथाद्भुतः—

[1]अद्भुतो विस्मयस्थायिभावो [2]गन्धर्वदैवतः ॥ २४२ ॥
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ।
[3]गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ॥ २४३ ॥
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसंभ्रमाः ।
तथा नेत्रविकासाद्या अनुभावाः प्रकीर्तिताः ॥ २४४ ॥
वितर्कावेगसंभ्रान्तिहर्षाद्या व्यभिचारिणः ।

यथा—

'दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
ष्टंकारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः ।

माधवस्योक्तिरियम् । अयं प्रेतरङ्कः प्रेतदरिद्रः अङ्कस्थात् क्रोडस्थात् करङ्कात् मृतशरीरात् अस्थिसंस्थं स्थपुटगतं ग्रन्थिसंस्थमपि क्रव्यं मांसम्, अव्यग्रमव्याकुलं यथा स्यात्तथा अत्तीत्यन्वयः । क्रमेण भक्षणादव्यग्रता । भक्षणक्रममाह—उत्कृत्येति । प्रथमं कृत्तिं चर्म उत्कृत्योत्कृत्य पुनः पुनश्छित्त्वा अत्तीत्यनेनान्वयः । अथानन्तरम् । पृथूच्छोथेन महोत्फुल्लतया भूयांसि बहुलानि । अंसः स्कन्धः । स्फिक् नितम्बः । आदिना ऊरुपरिग्रहः । अंसाद्यवयवेषु सुलभानि उग्रपूतीनि उत्कटदुर्गन्धीनि जघ्वा भुक्त्वेत्यन्वयः । स्थपुटगतस्याकर्षणादार्तत्वं तदाकर्षणार्थं च दशनप्रकटनम् । कश्चिदाच्छिद्य नेष्यतीति भयात्पर्यस्तनेत्रत्वम् । 'कंरङ्कोऽस्थिशेषं शिरः स्थपुटो विकटगभीरभागः' इति चण्डीदासः । अत्र माधवस्य जुगुप्सा शवप्रेताभ्यामालम्बनाभ्यां पूतिगन्धाद्युद्दीपनेन तादृगुत्तया आक्षेपलभ्येन निष्ठीवनादिना चानुभावेन तथैव मोहादिव्यभिचारिणा च संवलितो बीभत्सो रसः । अद्भुतरसमाह—**अद्भुत इति** । लोकातिगं लोकातिवर्ति । **दोर्दण्डेति** । दीर्घकालव्यापकेन हरधनुष्टंकारेण विस्मितस्य लक्ष्मणस्योक्तिरियम् । दोर्दण्डाभ्यामञ्चित आकुञ्चितो यश्चन्द्रशेखरस्य हरस्य धनुर्दण्ड-

---

1. **अद्भुत इति** । विस्मयस्थायिभावको विस्मयजनककर्मकर्त्रालम्बनको विस्मयकर्माद्युद्दीपितश्चकितादयनुभावितो हर्षादिसंचारितोऽद्भुत इति ॥

2. **गन्धर्वेति** । नाट्यशास्त्रे तु 'अद्भुतो ब्रह्मदैवतः' इति दृश्यते ॥

3. **करङ्क इति** । 'करङ्को मस्तके' इति मेदिनी । 'करङ्कः प्रेतशरीरम्' इति केचित् ॥

---

१. 'तस्यैव च गुणोत्कर्ष उद्दीपनमुदीरितम् । रोमाञ्चाद्यनुभावोऽयं जाड्यादिव्यभिचारकः ॥' इति ग.

द्राक्पर्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति ॥'

अथ शान्तः—

शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः ॥ २४५ ॥
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ।
अनित्यत्वादिनाशेषवस्तुनिःसारता तु या ॥ २४६ ॥
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ।
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ॥ २४७ ॥
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ।
रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः ॥ २४८ ॥
निर्वेदहर्षस्मरणमतिभूतदयादयः ।

यथा—

'रथ्यान्तश्चरतस्तथा धृतजरत्कन्थालवस्याध्वगैः
सत्रासं च सकौतुकं च सदयं दृष्टस्य तैर्नागरैः ।
निर्व्याजीकृतचित्सुधारसमुदा निद्रायमाणस्य मे
निःशङ्कः करटः कदा करपुटीभिक्षां विलुण्ठिष्यति ॥'

स्तस्यावभङ्गाय उद्यत उद्गतः । आर्यस्य श्रीरामस्य बालचरितानां प्रस्तावनायां गाने डिण्डिमो वाद्यभेदः । पर्यस्त उत्क्षिप्तः कपालसंपुटः पिधानपात्राकारब्रह्माण्डोपरिभागः तेन द्राग् झटिति मिलत्संगच्छमानं ब्रह्माण्ड एव भाण्डं क्षुद्रस्थाली तस्योदरे भ्राम्यन् अतएव पिण्डितो बहुलीकृतश्चण्डिमा महत्त्वं यस्य । अद्यापि इदानीमपि । शरावाच्छन्नमुखस्थालीमध्ये जायमानः शब्दो बहुलो भवतीत्यभिप्रायेणेदम् । अत्र लक्ष्मणस्य विस्मयो धनुष्टंकारालम्बनेन तस्यातिदीर्घत्वगुणोद्दीपनेन एतादृगुक्त्या अनुभावनेन व्यक्त आश्चर्यरसतामापद्यते । शान्तरसमाह—**शान्त इति** । अत्र निर्वेदः स्थायिभावः । एतत्पक्षे अवमाननीयत्वमेवालम्बनम् । निर्वेदस्य व्यभिचारित्वेन स्थायित्वायोगात्, शमस्य स्थायित्वेनानुभूयमानत्वाच्च ग्रन्थकृता तदुपेक्षितम्[1] । रोमाञ्चाद्या इत्याद्यपदेन दयादीनामपि ग्रहणम् । **रथ्यान्तरिति** । कस्यचिज्जातनिर्वेदस्योक्तिरियम् । रथ्या गृहसमीपदेशः, तन्मध्ये चरतो भिक्षार्थं भ्रमतः । अध्वगैर्नागरैश्च बीभत्सवेषदर्शनेन त्रासः, अनुपादेयकन्थावधारणेन कौतुकम्, दीनत्वेन दया । निर्व्याजीकृतः कामादिनाशेन निष्प्रतिबन्धकीकृतो यश्चित्सुधाया ज्ञानामृतस्य रस आस्वादस्तस्य मुदा तज्जन्यानन्देन निद्रायमाणस्य मुद्रितनेत्रस्य । 'निर्बीजीकृत-' इति पाठेऽपि बीजं

---

1. उपेक्षितमिति । अत्र यद्वक्तव्यं तत् 'शमो निरीहावस्थायाम्' इत्यत्राभिहितम् ॥

पुष्टिस्तु महाभारतादौ द्रष्टव्या ।

निरहंकाररूपत्वाद्दयावीरादिरेष नो ॥ २४९ ॥

दयावीरादौ हि नागानन्दादौ जीमूतवाहनादेरन्तरा मलयवत्यादि-नुरागादेरन्ते च विद्याधरचक्रवर्तित्वाद्याप्तेर्दर्शनादहंकारोपशमो न दृश्यते । शान्तस्तु सर्वाकारेणाहंकारप्रशमैकरूपत्वान्न तत्रान्तर्भावमर्हति । अतश्च नागानन्दादेः शान्तरसप्रधानत्वमपास्तम् । ननु

'न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा ।
रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु समप्रमाणः ॥'

इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिलक्षणायां प्रादुर्भावात्तत्र संचार्यादीनामभावात्कथं रसत्वमित्युच्यते—

**युक्तवियुक्तदशायामवस्थितो यः शमः स एव यतः ।
रसतामेति तदस्मिन्संचार्यादेः स्थितिश्च न विरुद्धा ॥**

वासना तच्छून्यीकृतेत्यर्थः । करटः काकः । ननु शान्ते दयाद्यतिशयसंभवेन दयावीरादिरेवायमित्यत आह—**निरहंकाररूपत्वादिति** । आदिना धर्मवीरदेवताविषयरतिप्रभृतीनां ग्रहणम् । एष शान्तरसः । तथा चाहंकारसंवलितो दयादिरेव दयावीरादेर्घटकः । तदितरः शान्तरस इति विशेषः । ततश्चेदृशविशेषावधारणाच्च । नागानन्दे दयावीरादिप्रधाने ग्रन्थविशेषे । **न यत्रेति** । द्वेषो रिपूणामपचिकीर्षा । रागः सुहृदामुपचिकीर्षा । इच्छा वैषयिकसुखतदुपायेच्छा । भावेषु पदार्थेषु लोष्टकाञ्चनादिविभावादिषु सत्सु रागद्वेषराहित्येन सममविषमं प्रमाणं प्रतीतिर्येन । 'शमप्रधानः' इति पाठस्तु न मनोरमः, अर्थासंगतेः । तादृशदशायां व्यभिचारिभावादीनामसंभवात् । शम एव स्थायितया प्रधानं यत्र सः । आत्मस्वरूपापत्तिलक्षणायां परमात्मस्वरूपत्वप्राप्तिरूपायाम् । **युक्तवियुक्तेति** । विषयेभ्यः प्रत्याहृत्य साक्षात्कर्तव्ये वस्तुनि मनो निधाय वर्तमानश्चिन्तासंतानवान् युक्तः । यस्य योगजधर्मसहकृतेन मनसा जिज्ञासितवस्तुसाक्षात्कारो जायते । यश्च भूतेन्द्रियजयी अणिमाद्याः कामसिद्धीर्दूरश्रवणाद्याश्चेन्द्रियसिद्धीरासादितवान् समाधन्वितो वियुक्तः । यस्य च योगजधर्मसहकृतानि बाह्येन्द्रियाणि स्वे स्वे विषये महत्त्वसंनिकर्षादिसहकारिनिरपेक्षाणि

---

1. **स एवेति** । तादृशशम एव स्थायिभावो रसतां लभत इत्यर्थः ।

---

१. 'पुष्टिः—' इति फक्किका नास्ति ग-पुस्तके. २. 'अस्य दयावीरादेः सकाशाच्चेदमाह' इत्यधिकं ग-पुस्तके. ३. 'नागानन्दादौ' इति नास्ति क-घ-पुस्तकयोः. ४. '—वाहनादौ' क-घ. ५. आदिशब्दो नास्ति क-घ-पुस्तकयोः. ६. 'सर्वथापि' ग. ७. 'तत्र स संभवितुमर्हति' ग. ८. '—नन्दे' क-घ. ९. '—शमप्रधानः' क-ख-घ. १०. 'पदार्थेषु' नास्ति पुस्तकान्तरे. ११. 'लोष्टकाञ्चनादि' नास्ति पुस्तकान्तरे. १२. 'राग—' इत्यादिः '—असंभवात्' इत्यन्तः पाठो नास्ति पुस्तकान्तरे.

[1]यश्चास्मिन्सुखाभावोऽप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः ।

[2]उक्तं हि—

'यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
[1]तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्[3] ॥'

'सर्वाकारमहंकाररहितत्वं व्रजन्ति चेत् ।
अत्रान्तर्भावमर्हन्ति दयावीरादयस्तथा ॥'

आदिशब्दाद्धर्मवीरदानवीरदेवताविषयरतिप्रभृतयः[4] ।

तत्र देवताविषया रतिर्यथा—

'कदा वाराणस्यामिह सुरधुनीरोधसि वस-
न्वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ त्रिपुरहर शंभो त्रिनयन
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान् ॥'

अथ मुनीन्द्रसंमतो वत्सलः—

स्फुटं चमत्कारितया वत्सलं च रसं विदुः ।
स्थायी वत्सलतास्नेहः पुत्राद्यालम्बनं मतम् ॥ २५१ ॥

वर्तन्ते स एव युक्तवियुक्तः । तद्दशायामित्यर्थः । अस्मिञ्शान्तरसे । नन्वत्र शम-रूपसुखसत्त्वेन न सुखमित्यसंगतमत आह—**यच्चेति** । तृष्णाक्षयसुखस्य शम-सुखस्य । एते कामसुखदिव्यसुखे । सर्वाकारं सर्वप्रकारम् । एतेनाहंकारसामान्याभावः प्रतीयते । **सर्वेति** । सर्वं देहेन्द्रियादि आकार आश्रयो यस्य तत्तथा । अहंकारो-ऽभिमानः, तद्रहितत्वं तद्भावं व्रजन्ति । दयावीरादिनायका इति शेषः । यदि दयावीरादिनायका देहेन्द्रियादिविषयकाभिमानशून्या भवन्ति, तदा दयावीरादयो रसाः शान्तरसस्वरूपा भवन्तीति तदर्थः । अभिमानश्च देहेन्द्रिययोरहमित्यारोपः । देहादिसंबन्धिनि पुत्रादौ ममेत्यारोपश्च । अत्र शान्तरसे । **तत्रेति** । शान्तर-सान्तर्भूतेषु दयावीरादिषु मध्ये । शान्तरसस्यान्तर्भूतदेवताविषयरतिरित्यर्थः । **कदेति** । कस्यचिच्छैवस्योक्तिरियम् । अत्र कौपीनपरिधानेच्छया अहंकारनिवृत्तिः प्रतीयते । केषांचिन्मतं वत्सलरसमाह—**स्फुटमिति** । उत्कटमित्यर्थः । **विदु-**

---

1. **तृष्णेति** । तृष्णानां विषयाणां क्षयः सर्वतो निवृत्तिरूपो निरोधस्तदेव सुखं तस्य ॥

---

१. 'किं च तस्यामवस्थाया सुखमप्यस्ति' इति ग. २. 'तथा चोक्तम्' ग. ३. 'इति' इत्यधिकं ग-पुस्तके. ४. 'दानवीर' इति नास्ति ग-पुस्तके. ५. 'रतिभावादयः' ग. ६. 'निरहंकारधर्मवीरो यथा जनकादिः' इत्यधिकं ग-पुस्तके. ७. 'देवताविषयपरिभावादयः' ग. ८. 'तत्र स्थायी वत्स-लता' इति ग. ९. 'सर्वेति—' इत्यारभ्य 'ममेत्यारोपश्च' इत्यन्तः पाठः पुस्तकान्तरे नास्ति.

[1]उद्दीपनानि तच्चेष्टा विद्याशौर्यदयादयः ।
आलिङ्गनाङ्गसंस्पर्शशिरश्चुम्बनमीक्षणम् ॥ २५२ ॥
पुलकानन्दबाष्पाद्या अनुभावाः प्रकीर्तिताः ।
संचारिणोऽनिष्टशङ्काहर्षगर्वादयो मताः ॥ २५३ ॥
पद्मगर्भच्छविर्वर्णो दैवतं लोकमातरः ।

यथा—

'[2]यदाह धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलीम् ।
अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः ॥'

[3]एतेषां च रसानां परस्परविरोधमाह—

आद्यः करुणबीभत्सरौद्रवीरभयानकैः ॥ २५४ ॥

रिति । केचित् इति शेषः । [1]अन्ये पुनरस्य भावकाव्यत्वमेवेच्छन्ति । तन्न । चमत्कारातिशययोगेन रसत्वस्यैव युक्तत्वात् । वत्सलता प्रेम, तत्सहितः स्नेहो रतिः । सा च लालनपालनादीच्छा । पुत्रादीत्यादिना भ्रात्रादिग्रहणम् । भ्रात्रालम्बनो यथा—'देशे देशे कलत्राणि देशे देशे च बान्धवाः । तं तु देशं न पश्यामि यत्र भ्राता सहोदरः ॥' इति । अत्र श्रीरामस्य भ्रातृस्नेहस्तादृशोक्त्या अनुभावेनास्वाद्यमानो रसतामेति । केचित्तु 'सहोदरः इति सहः संग्रामसहः, अदरो निर्भयश्च' इति व्याकुर्वन्ति, तन्मते तदुभयमुद्दीपनविभावः । **यदाहेति** । पितुर्दिलीपस्य । स रघुः । अत्र दिलीपस्नेहस्य रघुरालम्बनम् । पादत्रयोक्ता तच्चेष्टा उद्दीपनम् । अन्येषामाक्षेपाल्लाभः । अत्र रसानां तत्तद्वर्णकथनं तत्तद्देवताभिप्रायेण । **आद्य इति** । शृङ्गार इत्यर्थः ।

---

1. **अन्ये इति** । काव्यप्रकाशानुयायिनः । तेषामयमभिप्रायः—'यदाह धात्र्या—' इत्यादिषु वात्सल्यलक्षणा रतिरेव जागर्ति । न तेन वत्सलो रसोऽङ्गीकरणीयः । भावत्वेनैव गतार्थत्वात् । यदि स च रसत्वव्यपदेशमर्हति तदा भगवदालम्बनो रोमाञ्चाद्यनुभावितो हर्षादिसंचारितो भागवतादिश्रवणसमये भगवद्भक्तैः स्फुटमनुभूयमानो भक्तिरसः कुतो न स्यात् । भगवदनुरागरूपा भक्तिश्चात्र स्थायिभावः । न चायं शान्तेऽन्तर्भवति । अनुरागस्य वैराग्यविरुद्धत्वात् । नन्वसावपि रसत्वव्यपदेशं लभतां का क्षतिरिति चेत्, न । अन्यथैवोपपत्तौ मुनिशासनातिक्रमेण रसानां नवत्वाधिककल्पने मानाभावादिति संक्षेपः ॥

---

१. 'तच्चेष्टोद्दीपनं प्रोक्तमनुभावास्तथा पुनः । अश्रुपातसरोमाञ्चचुम्बनालिङ्गनादयः ॥ औत्सुक्यधृतिहर्षाद्याः कथिता व्यभिचारिणः । हरिद्वर्णोपमस्तस्य दैवतं लोकमातरः ॥' इति ग. २. क-पुस्तके तु 'यदाह—' इत्यन्तः प्राक् 'पद्मेहि वत्स रघुनन्दन पूर्णचन्द्र चुम्बामि मूर्धनि चिरं च परिष्वजे त्वाम् । आरोप्य वा हृदि दिवानिशमुद्वहामि वन्देऽथवा चरणपुष्करकद्वयं ते ॥' इति श्लोको दृश्यते. ३. ए-तेषां च—' इत्यादिः 'उन्मादः' इत्यन्तः पाठो ग-पुस्तके नास्ति.

भयानकेन करुणेनापि हास्यो विरोधभाक्
करुणो हास्यशृङ्गाररसाभ्यामपि तादृशः ॥ २५५ ॥
रौद्रस्तु हास्यशृङ्गारभयानकरसैरपि ।
भयानकेन शान्तेन तथा वीररसः स्मृतः ॥ २५६ ॥
शृङ्गारवीररौद्राख्यहास्यशान्तैर्भयानकः ।
शान्तस्तु वीरशृङ्गाररौद्रहास्यभयानकैः ॥ २५७ ॥
शृङ्गारेण तु बीभत्स इत्याख्याता विरोधिता ।

आद्यः शृङ्गारः । एषां च समावेशप्रकारा वक्ष्यन्ते ।

कुतोऽपि कारणात्क्वापि स्थिरतामुपयन्नपि ॥ २५८ ॥
उन्मादादिर्न तु स्थायी न पात्रे स्थैर्यमेति यत् ।

यथा विक्रमोर्वश्यां चतुर्थेऽङ्के पुरूरवस उन्मादः ।

[1]रसभावौ तदाभासौ भावस्य प्रशमोदयौ ।
संधिः शबलता चेति सर्वेऽपि रसनाद्रसाः ।

[2]रसनधर्मयोगित्वाद्भावादिष्वपि रसत्वमुपचारादित्यभिप्रायः ।

[3]भावादय उच्यन्ते—

संचारिणः प्रधानानि देवादिविषया रतिः ॥ २६० ॥
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ।

विरोधभाक् इत्यग्रेणान्वयः । शोकजुगुप्साभयसत्त्वेन रतेरसंभवादिति भावः । एवमग्रेऽपि । तादृश इति विरोधभाक् । स्थानत्रये 'विरोधभाक्' इत्यनेनान्वयः । ननु शृङ्गारादावुन्मादादेरपि संभवात्कथं रत्यादिस्थायिभावत्वं नियतमित्यत आह—**कुतोऽपीति** । क्वापि तद्रसविशेषे । पात्रे तद्रसत्वावच्छिन्ने । इदानीं रसपदस्य मुख्यलाक्षणिकार्थभेदज्ञापनार्थमाह—**रसभावाविति** । रसनादानन्दसंवलितज्ञानसंबन्धाद् रसा रसपदप्रतिपाद्याः । **उपचारादिति** । रत्यादिस्थायिभावानामभावेन मुख्यलक्षणायोगादिति भावः । न चात्र देवादिविषयरतिसत्त्वात्कथं स्थायिभावाभाव इति वाच्यम् । कान्तादिविषयरतेरेव स्थायित्वोपपादनात् । **संचारिण इति** । यथा विभावादिरभिव्यक्तो रत्यादिश्चिदानन्दचमत्काररूपत्वेन परिणतो रसतामापद्यते, तथा स्वकार्यकारणाभ्यामभिव्यक्तो देवादिविषयरत्यादिश्चिदानन्दरूपतां प्राप्तो भावत्वं प्राप्नोति । चमत्कारसत्त्वासत्त्वाभ्यामनयोर्भेद इति भावः । संचारिभावानां प्रधानत्व-

---

१. 'रस–' इत्यतः प्राक् 'अथ भावादीनामपि रसरूपत्वमाह–' इत्यधिकं ग-पुस्तके. २. 'तत्र रसस्वरूपमुक्तम्' इति ग. ३. 'भावादीनां स्वरूपमाह' इति ग.

'[1]न भावहीनोऽस्ति रसो न भावो रसवर्जितः ।
परस्परकृता सिद्धिरनयो रसभावयोः ॥'

इत्युक्तदिशा परमालोचनया परमविश्रान्तिस्थानेन रसेन सहैव वर्तमाना अपि राजानुगतविवाहप्रवृत्तभृत्यवदापाततो यत्र प्राधान्येनाभिव्यक्ता व्यभिचारिणो देवमुनिगुरुनृपादिविषया च रतिरुद्बुद्धमात्रा विभावादिभिरपरिपुष्टतया रसरूपतामनापद्यमानाश्च स्थायिनो भावा भावशब्दवाच्याः । तत्र व्यभिचारी यथा—'एवंवादिनि देवर्षौ—' इत्यादि । अत्रावहित्था ।

मुपपादयति—**न भावहीन इति । एवंवादिनीति** । देवर्षौ नारदे । अत्र शिवप्रसङ्गजातहर्षसूचकस्य मुखरागादेर्लज्जया गोपनमवहित्था । सा चाधोमुखत्वव्यङ्ग्यलज्जया कारणेन लीलाकमलपत्रगणनरूपव्यापारान्तरासङ्गेन च झटिति प्रतीयत इति तस्याः प्रधानत्वम् । विभावादीनामत्यन्ततिरस्कृतत्वेन शृङ्गारस्याप्रधानत्वम् ।

---

1. **न भावेति** । भावहीनो भावासंवलितो रसो नास्ति । न भवतीत्यर्थः । यतो भावेभ्य एव सामान्यगुणयोगेन रसा निष्पद्यन्ते । तथा रसवर्जितो भावोऽपि नास्ति । तदुक्तम्—'योऽर्थो हृदयसंवादी तस्य भावो रसोद्भवः । शरीरं व्याप्यते तेन शुष्ककाष्ठमिवाग्निना ॥' इति ॥

---

१. ग-पुस्तके तु "न भाव-" इत्यस्य स्थाने 'यथा मरिच-' इति श्लोकोऽस्ति, ततः 'इत्युक्तदिशोद्रेकं प्राप्य रसस्य प्राधान्येऽपि राजानुगतविवाहप्रवृत्तभृत्यादापाततो यत्र प्राधान्येनाभिव्यक्ता व्यभिचारिणः स भावः । यथा—'जाने कोपपराङ्मुखी प्रियतमा—' (इत्यादि) । अत्र विधि प्रत्यनूद्यैव प्राधान्येनाभिव्यक्ता चमत्कारभूमित्वात् । देवमुनिगुरुनृपादिविषया रतिर्भाव एव । कान्ताविषया रतिः परिपुष्टदशाया शृङ्गारः । अपरिपुष्टे तु भावः । 'निरुपादानसंभारमभित्तावेव-' (इत्यादि) । उद्बुद्धमात्रस्थायी यथा—'सरत्यगस्तिं पथिकः प्रपापालाञ्जलिं स्पृशन् । सापि स्मरति वामाक्षी भजते सप्तवारिधीन् ॥' अत्र परस्परानुरागलक्षणाया रतेरुद्बोधमात्रम् । नन्वनुभावादिभिः परिपोषः । अनौचित्यप्रवृत्तत्व आभासो रसभावयोः । तदुक्त ध्वनिकृता—'अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् । प्रसिद्धौचित्यबाधस्तु रसस्योपनिषत्परा ॥' अनौचित्यं तु 'उपनायकनिष्ठत्वं तथा तूभयनिष्ठता । नीचपात्रगतत्वं च (तथा) नायकनिष्ठता ॥ प्रतिनायकनिष्ठत्वं तिर्यग्विषयतादिकम् ॥ एवं रतेरनौचित्यं गुर्वादौ हास्यरौद्रयोः । भयस्योत्तमपात्रत्वं धीरस्याधमपात्रता ॥ दैन्यादिकं चोत्तमस्य राज्ञो राजान्तरस्तुतिः । एवमादिष्वनौचित्यं चिन्तनीयं विचक्षणैः ॥' प्रथमं यथा—'अत्ता एत्थ-' इत्यादि । द्वितीयं यथा—रावणस्य सीताङ्गरागवर्णनम् । तृतीयं यथा—भिल्लीरतवर्णनम् । चतुर्थं यथा—'स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे-' (इत्यादि) । पञ्चमं यथा—हयग्रीववधे हयग्रीवस्य जलक्रीडादिवर्णनम् । तिर्यग्विषयत्वं यथा—'मधु द्विरेफः-' (इत्यादि) । एवमन्यदप्यूह्यम् । भावाभासो यथा—राकासुधाकरमुखी तरलायताक्षी-' (इत्यादि) । 'भावस्य शान्तिरुदयः संधिः शवलता तथा' । क्रमेणोदाहरणम्—'तस्याः सान्द्र-' इति । अत्र कोपस्य प्रशमः । 'एकस्मिञ्शयने विपक्षरमणी-' (इत्यादि) । अत्रौत्सुक्याभावसोदयः । 'उत्सिक्तस्य तपः पराक्रमनिधेरभ्यागमादेकतः-' (इत्यादि) । अत्रावेगहर्षयोः संधिः ।' इति पाठभेदः.

देवविषया रतिर्यथा मुकुन्दमालायाम्—

'दिवि वा भुवि वा ममास्तु वासो नरके वा नरकान्तक प्रकामम् ।
अवधीरितशारदारविन्दौ चरणौ ते मरणेऽपि चिन्तयामि ॥'

मुनिविषया रतिर्यथा—

'विलोकनेनैव तवामुना मुने कृतः कृतार्थोऽस्मि निबर्हितांहसा ।
तथापि शुश्रूषुरहं गरीयसीर्गिरोऽथवा श्रेयसि केन तृप्यते ॥'

राजविषया रतिर्यथा मम—

'त्वद्वाजिराजिनिर्धूतधूलीपटलपङ्किलाम् ।
न धत्ते शिरसा गङ्गां भूरिभारभिया हरः ॥'

एवमन्यत् ।

उद्बुद्धमात्रस्थायिभावो यथा—

'हरस्तु किंचित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥'

अत्र पार्वतीविषया भगवतो रतिः ।

ननूक्तं प्रपाणकरसवद्भिभावादीनामेकोऽत्राभासो रस इति तत्र संचारिणः पार्थक्याभावात्कथं प्राधान्येनाभिव्यक्तिरित्युच्यते—

यथा मरिचखण्डादेरेकीभावे प्रपाणके ॥ २६१ ॥

दिवि वेति । हे नरकान्तक श्रीकृष्ण । मरणेऽपीत्यपिना इदानीम् । अत्र वक्तुः श्रीकृष्णभक्तीच्छा रतिः । **विलोकनेनेति** । नारदं प्रति श्रीकृष्णस्योक्तिरियम् । निबर्हितांहसा विनाशितपापेन । **त्वद्वाजीति** । राजानं प्रति कस्यचिदुक्तिरियम् । गुरुविषया रतिर्यथा—'अस्मद्गोत्रमहत्तरः क्रतुभुजामद्यायमाद्यो रविर्यज्वानो वयमद्य ते भगवती भूरद्य राजन्वती । अद्य स्वं बहु मन्यते सहचरैरस्माभिराखण्डलो येनैतावदरुन्धतीपतिरपि स्वेनानुगृह्णाति नः ॥' अत्र दशरथस्य वसिष्ठे गुरौ रतिः । पित्रोरपि गुरुत्वात्तद्विषया रतिर्यथा—'जीवत्सु तातपादेषु नवे दारपरिग्रहे । मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥' अत्र श्रीरामस्य पित्रो रतिः । नृपादीत्यादिपदेन मित्रादेर्ग्रहणम् । तत्र यथा—'अद्य राज्यं मया प्राप्तमद्य वाली हतो मया । हरीणामद्य पूज्योऽस्मि यद्भवान्मित्रतां गतः ॥' अत्र सुग्रीवस्य श्रीरामे मित्रे रतिः । 'आदिपदात्पुत्रादेरपि ग्रहणम्' इत्यन्ये । तन्न । तद्विषयकरतेर्वत्सलरसत्वेनैव ग्रन्थकृता दर्शितत्वात् । **हरस्त्विति** । परिवृत्तेति छेदेत्यर्थः । **अत्रेति** । उमामुखावलो-

उद्रेकः कस्यचित्कापि तथा संचारिणो रसे ।

अथ रसाभासभावाभासौ—

अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः ॥ २६२ ॥

अनौचित्यं चात्र रसानां भरतादिप्रणीतलक्षणानां सामग्रीरहितत्वे त्वेकदेशयोगित्वोपलक्षणपरं बोध्यम् । तच्च बालव्युत्पत्तये एकदेशतो दर्श्यते—

उपनायकसंस्थायां मुनिगुरुपत्नीगतायां च ।
बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम् ॥ २६३ ॥
प्रतिनायकनिष्ठत्वे तद्वधमपात्रतिर्यगादिगते ।
शृङ्गारेऽनौचित्यं, रौद्रे गुर्वादिगतकोपे ॥ २६४ ॥

कनरूपानुभावमात्रेण व्यक्ता रतिरुद्दीपनविभावादिकृतपरिपोषराहित्येन रसतां नापद्यत इति भावव्यपदेश एवास्योचि॰ इति भावः । **अनौचित्येति** । रसभावयोरनौचित्येन प्रवृत्तत्वे वर्तमानत्वे सति रसाभासो भावाभासश्चेत्यर्थः । अत्र रसानामौचित्यमाह—**अनौचित्यमिति** । अनौचित्यपदमित्यर्थः । सामग्रीरहितत्वे विभावादिरूपयावत्कारणासत्वे । एकदेशयोगित्वं यत्किंचिल्लक्षणसंबन्धः, तदुपलक्षणपरं तद्बोधतात्पर्यकम् । तच्च अनौचित्यं च । **उपनायकेति** । शृङ्गारे 'शृङ्गारे दक्षिणाद्याश्च नायकाः—' इत्युक्तम् । नायकलक्षणे 'कुलीनः' इत्यनेन सत्कुलजातत्वम् । 'शीलवान्' इत्यनेन सद्वृत्तत्वं च नायकस्य लभ्यते । 'नायकसामान्यगुणैर्भवति यथासंभवैर्युक्ता' इत्यनेन नायिकायाश्च सद्वृत्तत्वं लभ्यते । नायकस्य निषिद्धयोषित्संगमे नायिकायाश्च निषिद्धपुरुषसंगमे सद्वृत्तत्वं न भवतीति तद्विषयशृङ्गारस्य यथोक्तनायकाभावादेकदेशयोगित्वम् । निषिद्धयोषित उक्ताः शृङ्गारतिलके—'संबन्धिमित्रद्विजराजहीनवर्णाधिकानां प्रमदा न गम्याः । व्यङ्गास्तथा प्रव्रजिता विभिन्नमन्त्राश्च धर्मार्थमनोभवज्ञैः ॥' इति । एवं योषितामपि संबन्ध्यादयः पुरुषा निषिद्धाः । एवं च मुनिगुरुपत्नीगतायां चेति चकारेण संबन्ध्यादिपत्न्यो बोध्याः । उपनायकसंस्थायामित्यत्र संबन्ध्याद्यन्यतम उपनायको बोध्यः । अन्यथा 'बहुनायकविषयायाम्' इति प्रतिनायकनिष्ठत्वे' इत्यनयोरुपादानं व्यर्थं स्यात् । **बहुनायकेति** । संबन्ध्यादिभिन्ना अपि बहुनायका निषिद्धा इति भावः । **अनुभयनिष्ठायामिति** । 'विभिन्नमन्त्राश्च' इत्यनेनान्यतरस्यां मतौ निषिद्धत्वादिति भावः । नायकस्य प्रतिपक्षः प्रतिनायकः । अस्य संबन्ध्यादिभिन्नत्वेनानिषिद्धेऽपि भर्तुरनभिमताचरणेनासद्वृत्तत्वं नायिकाया इति भावः । **अधमपात्रेति** । असत्कुलजातनायक इत्यर्थः । **तिर्यगादीति** । तिर्यगादीनां नायकलक्षणाभावादिति भावः । रौद्र इत्यादौ 'अनौचित्यम्' इत्यन्वेति । 'क्रोधात्मको भवेद्रौद्रः प्रतिशत्रुरैरमर्षितः । रूक्षप्रायो भवेदत्र नायकोऽत्युग्रविग्रहः ॥'

शान्ते च हीननिष्ठे गुर्वाद्यालम्बने हास्ये ।
ब्रह्मवधाद्युत्साहेऽधमपात्रगते तथा वीरे ॥ २६५ ॥
उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र ।[1]

तत्र रतेरुपनायकनिष्ठत्वे यथा मम—

'स्वामी मुग्धतरो वनं घनमिदं बालाहमेकाकिनी
क्षोणीमावृणुते तमालमलिनच्छाया[2] तमःसंततिः ।
तन्मे सुन्दर मुञ्च कृष्ण सहसा वर्त्मेति गोप्या गिरः
श्रुत्वा तां परिरभ्य मन्मथकलासक्तो हरिः पातु वः ॥'

बहुनायकनिष्ठत्वे यथा—

'कान्तास्त एव भुवनत्रितयेऽपि मन्ये
येषां कृते सुतनु पाण्डुरयं[3] कपोलः ।'

इत्यनेन रौद्रे प्रतिशूरजनितक्रोधः । न तु गुर्वादिजनितक्रोधो नायक इति भावः । हीननिष्ठे रागादिहीनविषये । 'गतेच्छो नायकस्तत्र तमोरागपरिक्षयात्' इत्युक्तनायकवैपरीत्यादनौचित्यमिति भावः । **ब्रह्मवधादीति** । ब्रह्मवधादीनां वेदविरुद्धानामाचरणतया नायकत्वं न संभवतीत्यर्थः । **अधमपात्रगत इति** । 'उत्साहात्मा भवेद्वीरो दयादानादिपूर्वकः । त्रिविधो नायकस्तत्र जायते सत्त्वसंकुलः ॥ गाम्भीर्यौदार्यशौटीर्यधैर्यवीर्यादिभूषितः । आवर्जितजनो यश्च विरूढप्रौढविक्रमः ॥' इत्युक्तगुणहीननायकगत इत्यर्थः । **उत्तमेति** । 'बालस्त्रीनीचनायकः' इत्यनेन बालादिनायकत्वमेव भयानकस्योचितम् । **एवमन्यत्रेति** । अदैवहतपात्रगते करुणे, तत्त्वज्ञानपात्रगते बीभत्से, विशेषदर्शितपात्रगते आश्चर्ये, अपकार्यालम्बने वत्सलेऽनौचित्यं बोध्यमित्यर्थः । **स्वामीति** । मुग्धतरोऽतिमूढः विलम्बे प्रहारादिकं करोति, अथ चात्यन्तसुरतानभिज्ञः । घनमित्यनेन भयदत्वम्, निबिडतया जनदर्शनाभावेन सुरतयोग्यस्थानत्वं च सूचितम् । एकाकिनीत्यादिना गमने भयम्, स्वच्छन्दं रमस्वेति च सूचितम् । सुन्दरेति पथि परित्यागाय स्तवः, अथ च स्वप्रियत्वं सूचितम् । अत्र श्रीकृष्णस्य संबन्धित्वेन गोप्यास्तदनुरागोऽनुचित इति भावः । 'स्वामी निःश्वसितेऽप्यसूयति—' इत्यादि परनायिकोदाहरणं तु न शृङ्गाराभासः । तथात्वे

---

1. **एवमिति** । एवं जातिदेशकालवर्णाश्रमवयोवस्थाप्रकृतिव्यवहारादेरप्यनौचित्यं परिहरणीयम् ॥

2. **तमालेति** । तमालवन्मलिना कृष्णा छाया कान्तिर्यस्याः सा ॥

3. **पाण्डुरिति** । इह कपोलपाण्डिमवर्णनेनानुरागो दर्शितः । स च बहुनायकविषयत्वादनुचितः ॥

अनुभयनिष्ठत्वे यथा—मालतीमाधवे नन्दनस्य मालत्याम् ।

'पश्चादुभयनिष्ठत्वेऽपि प्रथममेकनिष्ठत्वे रतेराभासत्वम्' इति श्रीमल्लोचनकाराः ।

तत्रोदाहरणं यथा—रत्नावल्यां सागरिकाया अन्योन्यसंदर्शनात्प्राग्वत्सराजे रतिः ।

प्रतिनायकनिष्ठत्वे यथा—[1]हयग्रीववधे हयग्रीवस्य जलक्रीडावर्णने ।

अधमपात्रगतत्वे यथा—

'जघनस्थलनद्धपत्रवल्ली गिरिमल्लीकुसुमानि कापि भिल्ली ।
अवचित्य गिरौ पुरो निषण्णा स्वकचानुत्कचयांचकार भर्त्रा ॥'

तिर्यगादिगतत्वे यथा—

'[2]मल्लीमतल्लीषु वनान्तरेषु वल्ह्यन्तरे वल्लभमाह्वयन्ती ।
चञ्चद्विपञ्चीकलनादभङ्गीसंगीतमङ्गीकुरुते स्म भृङ्गी ॥'

आदिशब्दात्तापसादयः ।

रौद्राभासो यथा—

'रक्तोत्फुल्लविशाललोलनयनः कम्पोत्तराङ्गो मुहु-
र्मुक्त्वा कर्णमपेतभीर्धृतधनुर्बाणो हरेः पश्यतः ।
आध्मातः कटुकोक्तिभिः स्वमसकृद्दोर्विक्रमं कीर्तय-
न्नंसास्फोटपटुर्युधिष्ठिरमसौ हन्तुं प्रविष्टोऽर्जुनः ॥'

भृङ्गारे परनायकोदाहरणमनर्थकं स्यादिति ध्येयम् । **जघनेति** । गिरिमल्लीकुसुमानि कुटजपुष्पाणि । उत्कचयांचकार बन्धयामास । **मल्लीति** । मल्लीभिः प्रशस्तेषु वनान्तरेषु वनमध्येषु । वल्ह्यन्तरे स्वाधिष्ठितलतायां वर्तमानम् । सुरतार्थमाह्वयन्ती । चञ्चत् । प्रवाहवन्निरवच्छिन्नं विपञ्चीकलनादभङ्ग्या वीणासूक्ष्ममधुरनादसादृश्येन विशिष्टं यत्संगीतं तदङ्गीकुरुते स्म स्मरोद्दीपनोपकरणं कुरुते स्म । आदिशब्दात् 'तिर्यगादिगतत्वे' इत्यत्रादिपदात् । **रक्तोत्फुल्लेति** । कर्णं सूतपुत्रं प्रतिशूरम् । 'हरेः' इत्यनादरे षष्ठी । पश्यन्तं कृष्णमनादृत्येत्यर्थः । आध्मातो दग्धः । 'कटुकोक्तिभिः' इत्यत्र 'अनलैः' इति रूपकं व्यङ्ग्यम् । स्वं स्वकीयं स्कन्धस्य करेणाघातोऽसास्फोटस्तत्र पटुः । तत्कारीत्यर्थः । अत्र ज्येष्ठभ्रातरि गुरौ क्रोधोऽनुचितः ।

---

1. **हयग्रीवेति** । हयग्रीवाख्यो दैत्यो विष्णुना हत इति कथाश्रिते काश्मीरकभर्तृमेण्ठप्रणीते महाकाव्ये ॥

2. **मल्लीति** । वनान्तरेषु मल्लीमतल्लीषु । प्रशस्तमल्लीष्वित्यर्थः । विद्यमाना भृङ्गी वल्ह्यन्तरे विद्यमानं वल्लभं भृङ्गमाह्वयन्ती सतीति योजना रमणीया ॥

भयानकाभासो यथा—

'अशक्नुवन्सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनम् ।
प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय बिभ्यद्दिवसानि कौशिकः ॥'

स्त्रीनीचविषयमेव हि भयं रसप्रकृतिः । एवमन्यत्र ।

भावाभासो लज्जादिके तु वेश्यादिविषये स्यात् ॥ २२६ ॥

स्पष्टम् ।

भावस्य शान्तावुदये संधिमिश्रितयोः क्रमात् ।
[1]भावस्य शान्तिरुदयः संधिः शबलता मता ॥ २२७ ॥

अशक्नुवन्निति । यस्य रावणस्य । कौशिक इन्द्रः पेचकश्च । अत्रानौचित्यं दर्शयति—**स्त्रीति** । भावाभास इति प्रथमादिपदेन चिन्तादीनां द्वितीयादिपदेनानुरागिण्यादीनां ग्रहणम् । यथा—'[2]राकासुधाकरमुखी तरलायताक्षी सा स्मेरयौवनतरङ्गितविभ्रमाङ्गी । तत्किं करोमि विदधे कथमत्र मैत्रीं तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः ॥' अत्र नायिकायाः स्वीकारोपायचिन्तयानुरागाभावो व्यज्यते । अत्र चिन्ता अनुचिता । एवं नृपादिविषयरतेः शात्रवादिविषयत्वेऽप्यनौचित्यम् । भावशान्त्यादिमाह—**भावस्येति** । एतत्सप्तम्यन्तपदेनान्वेति । भावस्य व्यभिचारिणः । शान्त्यादावास्वाद्ये सति भावशान्त्यादिनामकाव्यात्मा भवतीत्यर्थः । शान्तिर्विरुद्धसामग्रीबलात्प्रशमावस्था । उदयः स्वसामग्रीमाहात्म्येनोद्गमावस्था । संधिरुभयसामग्रीयोगेन परस्परविमर्दः । स च परस्परविमर्दयोरेकनाशे चान्योत्पत्तिरित्येवंरूपः । केचित्तु—'विरुद्धयोरेकस्मिन्नेकदैवावच्छेदकभेदेन स्थितिः संधिः' इत्याहुः । तन्न । वक्ष्यमाणोदाहरणासंगतिप्रसङ्गात्तत्रावच्छेदकानुपपत्तेः । अनुपस्थितस्यापि लक्षणादेरवच्छेदकत्वं कल्प्यमिति चेत्, एकदेश्यसंगतेः । मिश्रितं मिश्रणं तच्च पूर्वपूर्वस्य बाध्यत्वेन उत्तरोत्तरस्य बाधकत्वेनैकत्र काव्ये निबन्धनम् । बाध्यत्वं च विरोधि-

---

1. **भावस्येति** । भावस्य शान्तिर्नाशः । स चोत्पत्तिकालावच्छिन्न एव । उदय उत्पत्तिः । संधिरन्योन्यानभिभूतयोरन्योन्याभिभावनयोग्ययोः सामानाधिकरण्यम्, तच्च एकदेशवृत्तित्वविशिष्टैककालवृत्तित्वरूपम् । शबलता बाध्यबाधकभावापन्नानामुदासीनानां वा भावानां व्यामिश्रणम् । एकचमत्कृतिजनकज्ञानगोचरत्वमिति यावत् । इति रसगङ्गाधरकृतः ॥

2. **राकेति** । सीतामुद्दिश्य रावणस्योक्तिः । सा सीता 'अस्ति' इति शेषः । तत्तस्माद् अनुपेक्षणीयगुणत्वात् किं करोमि तल्लाभाय किमाचरामि । तया सह मैत्री क्रियतां तत्राह—विदधे कथमिति । अत्र सीताविषये मैत्रीं कथं केनोपायेन विदधे करोमि । मैत्रीकरणे न कश्चिदुपाय इत्यर्थः । एवं सति तया मम स्वीकृतिर्मयमिति बुद्धिविषयीकरणं तस्य व्यतिकरे संबन्धे अभ्युपायो हेतुः क इव । अत्र इवशब्दः संभावनायाम् । इह चिन्तास्यव्यभिचारिभावस्यानुरक्तनायिकाविषयतया आभासत्वमिति भावाभासोदाहरणत्वम् ॥

क्रमेण यथा—

'सुतनु जहिहि कोपं पश्य पादानतं मां
न खलु तव कदाचित्कोप एवंविधोऽभूत् ।
इति निगदति नाथे तिर्यगामीलिताक्ष्या[1]
नयनजलमनल्पं मुक्तमुक्तं न किंचित् ॥'

अत्र बाष्पमोचनेनेर्ष्याख्यसंचारिभावस्य शमः ।

'चरणपतनप्रत्याख्यानात्प्रसादपराङ्मुखे
निभृतकितवाचारेत्युक्त्वा[2] रुषा परुषीकृते ।
व्रजति रमणे निःश्वस्योच्चैः स्तनस्थितहस्तया
नयनसलिलच्छन्ना दृष्टिः सखीषु निवेशिता ॥

अत्र विषादस्योदयः ।

'नयनयुगासेचनकं मानसवृत्त्यापि दुष्प्रापम् ।
रूपमिदं मदिराक्ष्या[3] मदयति हृदयं दुनोति च मे ॥'

सामग्रीस्थगितपरिपुष्टिकत्वम् । बाधकत्वं च विरोधि । अस्मिन्मते दन्त्यवान् सबलशब्दः । बलपरिपुष्टिप्रतिबन्धकत्वम् । भावशान्तावेकस्यैव नाशः । उदये एकस्यैवोत्पत्तिः । संधौ द्वयोरेव मुहुर्विनाशोत्पत्ती । शबलतायां बहूनां विनाशोत्पत्ती । **इति विशेषः** । केचित्तु—'भावानामुत्तरोत्तरबलवत्त्वं शबलता, बलवत्तत्समूहो वा' इत्याहुः । तन्न । वक्ष्यमाणोदाहरणे हि द्वयोर्द्वयोर्भावयोरुत्तरस्यैव बलवत्त्वं न तु यावतामुत्तरेषाम् । भावशान्तिमुदाहरति—**सुतन्विति** । अनल्पं बहुतरम् । 'प्रशम इति व्यज्यते' इति शेषः । अत्र पादपतनरूपप्रसादसामग्र्या ईर्ष्यायाः प्रशमः स्वदते । भावोदयमाह—**चरणपतनेति** । चरणपतनस्य प्रत्याख्यानाच्चरणक्षेपादिना निराकरणात् । पराङ्मुखे प्रसादरूपफलविमुखे । परुषीकृते स्नेहहीने कृते । **स्तनस्थितहस्तयेति** । स्तनमध्ये हस्तनिवेशनेन हृदय मा स्फुटेति हृदयाश्वास इति भावः । अत्र नायकप्रत्याख्यानरूपसामग्र्या विषादः स्वदते । भावसंधिमाह—**नयनेति** । नयनयुगस्यासेचनकमतितृप्तिजनकम् । 'तदासेचनकं तृप्तेर्नास्यन्तो यस्य दर्शनात्' इत्यमरः । मदिरः खञ्जनः । मदयति आनन्दयति । दुनोति संतापयति । अत्रैकस्यैव कामिनीरूपस्यात्युत्कृष्टत्वेन आनन्दस्योपभोगाप्रयोजकत्वेन विषादस्य ज-

---

1. **तिर्यगिति** । तिर्यक् यथा स्यात्तथा आमीलिते अक्षिणी यया तथाभूतया ॥

2. **निभृतेति** । निभृतकितवाचार सहसानुपलक्षितविटाचरणेति तदर्थः ॥

3. **मदिर इति** । मदिरा दृष्टिविशेष इत्युचितम् । तदुक्तं संगीतकलिकायाम्—'सौष्ठवेन परित्यक्ता स्नेरापाङ्गमनोहरा । वेपमानान्तरा दृष्टिर्मदिरा परिकीर्तिता ॥' इति । हरविजयटीकायामप्युक्तम्—'आघूर्णमानमध्या या क्षामा चाञ्चिततारका । दृष्टिर्विकसि-

अत्र हर्षविषादयोः संधिः ।

'[1]काकार्यं, शशलक्ष्मणः क च कुलं, भूयोऽपि[2] द्रक्ष्येत सा,
दोषाणां प्रशमाय मे[3] श्रुतमहो, कोपेऽपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः [4]कृतधियः, स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि, कः खलु युवा धन्योऽधरं पास्यति ॥'

अत्र वितर्कौत्सुक्यमतिविस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता ॥

इति साहित्यदर्पणे रसादिरूपणो नाम तृतीयः परिच्छेदः ।

नकत्वम् । अत्युत्कृष्टत्वज्ञानकाले आनन्द उपभोगाप्रयोजकत्वज्ञानकाले विषादः । विरुद्धयोरपि तयोरेकस्मिन्समावेशः काललाघवेन संसर्गप्रतिभासः । भावशबलतामाह—**काकार्यमिति** । उर्वशीविरहात्स्वमरणमुपक्रम्य पश्चान्निवर्तमानस्य पुरूरवस उक्तिरियम् । अकार्यं स्त्रिया सह मरणम् । शशलक्ष्मणश्चन्द्रस्य । सा उर्वशी । मे मम श्रुतमधीतम् । मुखमिति तस्या इति शेषः । धास्यति पास्यति । कुलमित्यन्तेन चन्द्रकुले स्त्रीविरहादात्महननमकार्यमित्येवंरूपविचाररूपो वितर्कः । सेत्यन्तेनौत्सुक्यम् । श्रुतमित्यन्तेन सर्वथा तदनुरागो दोषायैवेत्यर्थनिर्धारणरूपा मतिः । मुखमित्यन्तेन मुखस्य कमनीयत्वस्मरणम् । कृतधिय इत्यन्तेन शङ्का । दुर्लभेत्यन्तेन स्वानौजस्यरूपं दैन्यम् । उपैहीत्यन्तेन धृतिः । धास्यतीत्यन्तेन चिन्ता व्यङ्ग्या । अत्र द्वयोर्द्वयोर्भावस्य पूर्वस्य प्रशमाङ्गस्य बाध्यत्वम् । उत्तरस्य विप्रलम्भाङ्गस्य बाधकत्वम् । चिन्तायां विश्रान्तेस्तदङ्गकस्य विप्रलम्भशृङ्गारस्य शान्तापेक्षया परिपोषः तस्याप्यन्तरान्तरा प्रशमोदयादेकान्तमभिलाषस्य नास्वाद्यत्वमिति खण्डरसत्वमित्यवधेयम् । उभयाङ्गस्य भावसमूहस्य बाध्यबाधकभावो मुख्यत्वेनास्वाद्यत इति भावशबलताया एव प्रधानत्वमिति ॥

इति श्रीरामचरणतर्कवागीशभट्टाचार्यविरचितायां साहित्यदर्पणविवृतौ
तृतीयः प्रकाशः ।

तापाङ्गा मदिरा तरुणे मदे ॥' इति । तद्युक्ते अक्षिणी यस्यास्तस्या इत्येवं व्याख्येयम् एतेन 'मदिराक्षि मदाननार्पितम्—' इति रघुवंशश्लोकव्याख्याने माद्यत्यनयेति मदिरा लोकप्रसिद्धा । तथापि 'नार्यो मदिरलोचनाः' इत्यादि प्रयोगदर्शनान्माद्यत्याभ्यामिति मदिरे अक्षिणी यस्या इति वदन्मल्लिनाथः प्रत्युक्तः ॥

1. **काकार्यमिति** । इह कद्वयेन सहानवस्थानप्रतिपादनेनात्यन्तानौचित्यं प्रकाश्यते ॥

2. **अपीति** । अपिना संभावनोत्कटता द्योत्यते ॥

3. **मे इति** । आकरे 'नः' इत्येव पाठो दृश्यते, स एव ज्यायान् । बहुवचनेन स्वोत्कर्षलाभात् ॥

4 **कृतधिय इति** । कृते सदाचारे, अथवा कृते महात्मभिराचरिते पुण्यकर्मणि धीर्येषां ते ॥

चतुर्थः परिच्छेदः ।

अथ काव्यभेदमाह—

काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यं चेति द्विधा मतम् ।

तत्र

[1]वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम् ॥ १ ॥

काव्यस्वरूपं निरूप्य विभागमाह—**काव्यमिति** । व्यङ्ग्य इति सतीत्यर्थः । ध्वन्यते व्यज्यतेऽस्मिन्वाक्यार्थसमुदाये । गुणीभूतव्यङ्ग्येऽप्युक्तव्युत्पत्तिसंभवेऽपि ध्वनिपदस्य निरुक्तरूढिसापेक्षत्वान्न तत्र व्यवहारः । वस्तुतस्तु ध्वन्यत इति ध्वनी रसादिः । ध्वनतीति ध्वनिः शब्दादिगता शक्तिः । ध्वननं ध्वनी रसादिप्रतीतिः ।

---

1. **वाच्येति** । वाच्याद् अभिधावृत्तिप्रतिपाद्याद् अर्थाद् व्यङ्ग्ये व्यञ्जनावृत्तिप्रतिपाद्येऽर्थे अतिशयिनि अधिकचमत्कारजनके सति उत्तमं काव्यम् । तद् ध्वनिः । 'उच्यते' इति शेषः । तदुक्तं राजानकानन्दवर्धनाचार्यैः—'प्रथमे हि विद्वांसो वैयाकरणाः । व्याकरणमूलत्वात्सर्वविद्यानाम् । तेच श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति' इति । 'श्रोत्रशष्कुली संतानेनागताः अन्त्याः शब्दाः श्रूयन्त' इति प्रक्रियायां शब्दाः श्रूयमाणा इत्युक्तम् । तेषां घण्टानुरणनरूपत्वं तावदस्ति । ते च ध्वनिशब्देनोक्ताः । यदाह भगवान्भर्तृहरिः—'यः संयोगवियोगाभ्यां करणैरुपजायते । स स्फोटः शब्दजः शब्दो ध्वनिरित्युच्यते बुधैः ॥' एवं घण्टादिनिर्ह्रादस्थानीयोऽनुरणनात्मोपलक्षितो व्यङ्ग्योऽप्यर्थो ध्वनिरिति व्यवहृतः । इत्येष प्रकारोऽव्यक्तशब्दानामेव वर्तते । व्यक्तशब्दानां तथा श्रूयमाणा ये वर्णा नादशब्दवाच्या अन्त्यबुद्धिनिर्ग्राह्याः स्फोटाभिव्यञ्जकास्ते ध्वनिशब्देनोक्ताः । यदाह भगवान्स एव—'प्रत्यये[2]रनुपाख्येयैर्ग्रहणानुग्रहैस्तथा । ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥' इति । तेन व्यञ्जकौ शब्दार्थावपीह ध्वनिशब्देनोक्तौ । किंच वर्णेषु तावन्मात्रपरिमाणेष्वपि सत्सु । यथोक्तम्—'अल्पीयसापि यत्नेन शब्दमुच्चारितं मतिः । यदि या नैव गृह्णाति वर्णं वा सकलं स्फुटम् ॥' इति । तेषु तावत्स्वेषु श्रूयमाणेषु वक्तुर्योऽन्यो द्रुतविलम्बितादिवृत्तिभेदात्मा प्रसिद्धादुच्चारणादिव्यापारादभिव्यक्तः स ध्वनिरुक्तः । यदाह स एव—'शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदास्तु वैकृताः । ध्वनयः समुपोहन्ते स्फोटात्मा नैव भिद्यते ॥' इति व्याचख्युराचार्याभिनवगुप्तपादाः । अयं निष्कर्षः—पटादिभिर्वर्ण-

---

१. 'ध्वन्यतेऽस्मिन्निति शब्दार्थसमुदाय इत्यर्थः । अत्र सप्तम्यर्थो वृत्तित्वम् । तच्च व्यञ्जनाजन्यबोधरूपस्य ध्वननपदार्थस्यैकदेशे व्यञ्जनायामन्वेति । तथा च यद्वृत्तिव्यञ्जनाजन्यबोधविषयो रसादिः ॥ ध्वनिरित्यर्थः । वस्तुतस्तु—ध्वनति व्यञ्जनया रसादीन्प्रत्याययतीति ध्वनिः शब्दार्थसमुदाय इत्यर्थः । एवं ध्वन्यतेऽसाविति व्युत्पत्त्या रसादिरपि । एवं ध्वननं ध्वनिरिति व्यञ्जनाजन्यबोधोऽपि । एवं ध्वन्यतेऽनयेति व्युत्पत्त्या व्यञ्जनापि ध्वनिरित्यवधेयम् । वस्त्वलंकारध्वन्योः काव्यघटकत्वाभावेऽपि काव्योत्कर्षतया तद्व्यञ्जकशब्दार्थयोर्ध्वनित्वमवगन्तव्यम् । अन्यथा वक्ष्यमाणध्वनिकाव्यप्रकारसंख्यानुपपत्तेः । गुणीभूतव्यङ्ग्येऽप्युक्तव्युत्पत्तिसंभवेऽपि ध्वनिपदस्य निरुक्तरूढिसापेक्षत्वान्न तत्र व्यवहारः ।' इति क्वचित्कः पाठः.

[1]वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम् ।

भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ ।
[1]अविवक्षितवाच्योऽन्यो [2]विवक्षितान्यपरवाच्यश्च ॥ २ ॥

[3]तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः । लक्षणामूलत्वादेवात्र वाच्यमविवक्षितं बाधितस्वरूपम् । विवक्षितान्यपरवाच्यस्त्वभिधामूलः । अत एवात्र वाच्यं विवक्षितम् । अन्यपरं व्यङ्ग्यनिष्ठम् ।

अत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यङ्ग्यार्थस्य प्रकाशकः । यथा—प्रदीपो घटस्य । अभिधामूलस्य बहुविषयतया पश्चान्निर्देशः ।

इति व्युत्पत्तिभेदाद् ध्वनिपदार्थभेदो बोध्यः । [3]काव्यात्मभूतस्य ध्वनेर्भेदैनैव ध्वनिकाव्यप्रभेदानाह—**भेदाविति** । इह यद्यपि वस्त्वलंकारध्वनीनां काव्यात्मत्वं नाङ्गीकृतं तथापि रसादिप्रकर्षकत्वेनैव तेषां काव्यात्मत्वमित्यभिप्रायेण तत्साधारणं ध्वनिप्रभेदनिरूपणं प्रक्रमत इति भावः । **लक्षणाभिधामूलाविति** । लक्षणामूलोऽभिधामूलश्चेत्यर्थः । तयोः परिचायकावाह—**अविवक्षितेति** । 'आद्यः' इति शेषः । अन्योऽभिधामूलः । अभिधामूल इति ध्वनिरित्यनुषज्यते । अत एव अभिधामूलत्वादेव । वाच्यार्थस्य व्यङ्ग्यपरत्वमुपपादयति—**अत्र हीति** । वाच्यार्थस्य स्वोपस्थितिद्वारा शाब्दबोधं प्रति कारणत्वमित्यभिप्रायेणेदम् । **पश्चान्निर्देश इति** । तथा च लक्षणामूलध्वनेरल्पविषयत्वात्सूचीकटाहन्यायेन प्रथमं निर्देश इति भावः ।

समुदायरूपैः क्षणिकैः पदैः स्फोटरूपो नित्यः शब्दो व्यज्यते, तेन चाभिव्यक्तेनार्थः प्रतीयत इति तादृशस्य प्रधानीभूतस्फोटव्यञ्जकस्य वर्णसमुदायरूपस्य पटादिशब्दस्य ध्वनिरिति संज्ञेति वैयाकरणानां सिद्धान्तसरणिः । ततस्तन्मतानुसारिभिरन्यैः प्रधानीभूतव्यङ्ग्यव्यञ्जकत्वसाधर्म्याद्गुणीभूतवाच्यं यद्व्यङ्ग्यं तद्व्यञ्जनक्षमस्य शब्दार्थयुगलरूपस्योत्तमकाव्यस्य ध्वनिरिति संज्ञा विहिता । तदुक्तं ध्वनिकारैः—'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ । व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥' इति ॥

1. **अविवक्षितेति** । अविवक्षितमनुपयुक्तमन्वयायोग्यं वा वाच्यं वाच्योऽर्थो यस्मिन् सः ॥

2. **विवक्षितेति** । विवक्षितं वाच्यतावच्छेदकरूपेणान्वयबोधविषयः । अन्यपरं व्यङ्ग्योपसर्जनीभूतं च वाच्यं वाच्योऽर्थो यत्र तादृशः ॥

---

१. 'वाच्यात्–' इति फक्किका नास्ति ग-पुस्तके. २. 'तत्र–' इत्यादिः '–पश्चान्निर्देशः ।' इत्यन्तः पाठो ग-पुस्तके नास्ति. ३. 'काव्य–' इत्यादिः 'इति भावः' इत्यन्तः पाठः पुस्तकान्तरे नास्ति.

अविवक्षितवाच्यस्य भेदावाह—

अर्थान्तरं संक्रमिते वाच्येऽत्यन्तं तिरस्कृते ।
अविवक्षितवाच्योऽपि ध्वनिर्द्वैविध्यमृच्छति ॥ ३ ॥

[3]अविवक्षितवाच्यो नाम ध्वनिः[1]अर्थान्तरसंक्रमितवाच्योऽ[2]त्यन्ततिरस्कृतवाच्यश्चेति द्विविधः । यत्र स्वयमनुपयुज्यमानो मुख्योऽर्थः स्वविशेषरूपेऽर्थान्तरे परिणमति तत्र मुख्यार्थस्य स्वविशेषरूपार्थान्तरसंक्रमितत्वादर्थान्तरसंक्रमितवाच्यत्वम् ।

यथा—

'कदली कदली करभः करभः करिराजकरः करिराजकरः ।
भुवनत्रितयेऽपि बिभर्ति तुलामिदमूरुयुगं न चमूरुदृशः ॥'

अत्र द्वितीयकदल्यादिशब्दाः पौनरुक्त्यभिया सामान्यकदल्यादिरूपे मुख्यार्थे बाधिता जाड्यादिगुणविशिष्टकदल्यादिरूपमर्थं बोधयन्ति । जाड्याद्यतिशयश्च व्यङ्ग्यः ।

अविवक्षितवाच्यस्येति ध्वनेरिति शेषः । **यत्रेति** । 'प्रकृतान्वये' इति शेषः । स्वयं मुख्यतावच्छेदकरूपेण स्वविशेषरूपे स्वकीयमुख्यतावच्छेदकरूपेण स्वविशेषरूपे स्वकीयमुख्यतावच्छेदकव्याप्यधर्मे परिणमति विशेष्यतया भासते । अर्थान्तरे संक्रमितत्वाद् विशेष्यतया भासमानत्वात् । एतेन मुख्यार्थस्य मुख्यतावच्छेदकरूपेण प्रकृतान्वयानुपयोगित्वं बाधस्तस्यैव विशेषणान्तररूपेण बोध इतीयमुपादानलक्षणेति सूचितम् । **कदलीति** । 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इत्यमरः । चमूरुर्मृगविशेषः । **जाड्यादीति** । जाड्यं शैत्यम् । यद्यपि शैत्यं पयस्येव तथापि तस्य परम्परया कदलीवृत्तित्वमवगन्तव्यम् । आदिना ह्रस्वत्वकर्कशत्वयोर्ग्रहणम् । नच शैत्यादीनामन्यत्रापि सत्त्वात्कथं कदलीत्यादिव्याप्यत्वमिति वाच्यम् । 'शैत्यादिविशेषस्यैवात्र विवक्षितत्वात् । **जाड्याद्यतिशयश्चेति** । व्यङ्ग्यो लक्षणप्रयोजनबोधविषयः । सर्वत्रैव मुख्यार्थस्याभेदः संबन्धः । एवं च कदल्यतिशीता करभोऽतिह्रस्वः करिराजकरोऽतिकर्कश इति हेतोश्चमूरदृश इदमीदृशमूरुयुगं भुवनत्रितयेऽपि तुलां सादृश्यं न बिभर्तीत्यर्थः । घटादौ सर्वथा सादृश्यं न संभवति । यत्र तु कदल्यादौ सादृश्यं संभाव्यते तदतिशैत्यादिनापकृष्टत्वमिति सुतरां भुवनत्रितये तुला

---

1. **अर्थान्तरेति** । अर्थान्तरे उपयोगिनि लक्ष्यतावच्छेदके संक्रमितमाश्रयत्वेन परिणतं वाच्यं यत्र तादृशः ॥

2. **अत्यन्तेति** । अत्यन्ततिरस्कृतं न केनापि रूपेणान्वयप्रविष्टं वाच्यं यत्र तादृशः ॥

---

१. 'अविवक्षित—' इत्यादिः '—तिरस्कृतत्वाज्जहत्स्वार्था ।' इत्यन्तः पाठो ग-पुस्तके नास्ति.

यत्र पुनः स्वार्थं सर्वथा परित्यजन्नर्थान्तरे परिणमति तत्र मुख्यार्थस्यात्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यत्वम् ।

यथा—

'निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ।'[1]

अत्रान्धशब्दो मुख्यार्थे बाधितेऽप्रकाशरूपमर्थं बोधयति । अप्रकाशातिशयश्च व्यङ्ग्यः । अन्धत्वाप्रकाशत्वयोः सामान्यविशेषभावाभावान्नार्थान्तरसंक्रमितवाच्यत्वम् ।

यथा—

'भम धम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ देण ।
गोलाणइकच्छकुडङ्गवासिणा दरिअसीहेण ॥'

अत्र 'भ्रम धार्मिक—' इत्यतो भ्रमणस्य विधिः प्रकृतेऽनुपयुज्यमानतया भ्रमणनिषेधे पर्यवस्यतीति विपरीतलक्षणाशङ्का न कार्या । यत्र खलु विधिनिषेधावुत्पत्स्यमानावेव निषेधविध्योः पर्यवस्यतस्तत्रैव तद-

---

नास्तीति भावः । अत्र व्यतिरेकालंकारो व्यङ्ग्यः । यत्र पुनरिति शब्द इति शेषः । **सर्वथेति** । मुख्यतावच्छेदकस्यैव त्यागो नतु मुख्यस्य, अत्र तूभयोरिति भावः । अर्थान्तरे मुख्यार्थभिन्ने परिणमति लक्षणया वर्तते । अत्यन्ततिरस्कृतत्वात् सर्वथा बाध्यत्वात् । **निःश्वासान्ध इति** । निःश्वासेनान्धोऽप्रकाश आदर्शो दर्पण इवेत्यर्थः । मुख्यार्थे दृष्टिहीनरूपे प्रकाशश्चाकचक्यं तद्रहितः । अत्र चाक्षुषज्ञानाजनकत्वरूपैकधर्मवत्त्वं मुख्यलक्ष्ययोः संबन्धः । **सामान्यविशेषाभावादिति** । मुख्यार्थतावच्छेदकलक्ष्यतावच्छेदकयोः सामान्यविशेषाभाव एवार्थान्तरसंक्रमितवाच्यत्वं भवति । यथा—'त्वामस्मि वच्मि—' इत्यादौ । नच 'यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा । अनुकम्प्योऽनुकम्प्यश्च स जातः स च जीवति ॥' इत्यादौ काव्यप्रकाशकारदत्तोदाहरणे मित्रत्वादीनां मुख्यतावच्छेदकानां लक्ष्यतावच्छेदकैराश्वस्तत्वनियन्त्रणीयत्वस्नेहपात्रत्वैः सह सामान्यविशेषभावाभावात्कथमुक्तनियम इति वाच्यम् । आश्वस्तत्वादिविशेषस्यैवात्र विवक्षितत्वात् । ननु 'भम धम्मिअ—' इत्यादौ विपरीतलक्षणासत्त्वे नात्यन्ततिरस्कृतवाच्यध्वनेरिदमुदाहरणं भवितुमर्हतीति विप्रतिपद्यमानं प्रत्याह—**भम धम्मिअ इति** । 'भ्रम धार्मिक विश्वस्तः स श्वाद्य मारितस्त्वेन । गोदावरीकच्छकुञ्जवासिना दृप्तसिंहेन ॥' इति संस्कृतम् । आश्रमस्थायाः कुलटाया गोदावरीकुञ्जरूपे संकेतस्थाने प्रत्यहं पुष्पावचयेन कृतसंकेतभङ्गं स्वप्रेरितकुक्कुरोपद्रवेणाप्यनिवृत्तं धार्मिकं प्रति तस्या एव दिनान्तरे उक्तिरियम् । गोदा-

---

1. **निःश्वासेति** । हेमन्तवर्णने पञ्चवट्यां रामस्योक्तिरियम् । एतत्पूर्वार्धस्तु—'रविसंक्रान्तसौभाग्यस्तुषारावृतमण्डलः ।' इति ॥

वसरः । यत्र पुनः प्रकरणादिपर्यालोचनेन विधिनिषेधयोर्निषेधविधी अवगम्येते तत्र ध्वनित्वमेव ।

तदुक्तम्—

'क्वचिद्बाध्यतया ख्यातिः क्वचित्ख्यातस्य बाधनम् ।
पूर्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु ॥'

अत्राद्ये मुख्यार्थस्यार्थान्तरे संक्रमणं प्रवेशः, न तु तिरोभावः । अत एवात्राजहत्स्वार्था लक्षणा । द्वितीये तु स्वार्थस्यान्त्यन्तं तिरस्कृतत्वाज्जहत्स्वार्था ।

विवक्षिताभिधेयोऽपि द्विभेदः प्रथमं मतः ।
असंलक्ष्यक्रमो[1] यत्र व्यङ्ग्यो[2] लक्ष्यक्रमस्तथा ॥ ४ ॥

विवक्षितान्यपरवाच्योऽपि[3] ध्वनिरसंलक्ष्यक्रमव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्यश्चेति द्विविधः ।

तत्राद्यो रसभावादिरेक एवात्र गण्यते ।
एकोऽपि भेदोऽनन्तत्वात्संख्येयस्तस्य नैव यत् ॥ ५ ॥

वरी । यो दिनान्तरे त्वामुद्वेजयति स श्वा गोदावरीतीरनिकुञ्जवासिना दृप्तासिहेन मारित इत्यन्वयः । प्रकृते तात्पर्यविषयीभूतस्वैरविहारे उत्पत्स्यमानौ उत्पत्स्यमानान्वयबोधौ । अन्वयबोधात्प्रागित्यर्थः । तदवसरो विपरीतलक्षणावसरः । एवं चात्र लक्षणामूलध्वनेरवसरो नास्तीत्यर्थः । ध्वनित्वमभिधामूलध्वनित्वम् । बाध्यतया विपरीतार्थे पर्यवसन्नतया ख्यातिरन्वयबोधः । ख्यातस्यान्वयबोधविषयीभूतस्य बाधनं बाधोदयाद्विपरीतार्थपर्यवसानम् । लक्षणा लक्षणामूलो ध्वनिः । अभिधा अभिधामूलो ध्वनिः । अत्र लक्षणामूलध्वनौ आद्येऽर्थान्तरसंक्रमितवाच्ये । द्वितीयेऽत्यन्ततिरस्कृतवाच्ये जहत्स्वार्था लक्षणेत्यनुषज्यते । **प्रथममिति** । पश्चादस्यापरे भेदा वक्तव्या इति भावः । यत्र ध्वनौ । **लक्ष्यक्रम इति** । व्यङ्ग्य इत्यन्वयः । आद्योऽसंलक्ष्यक्रमव्यङ्ग्यः । आदिना रसाभासादिग्रहणम् । एकप्रकारत्वे हेतुमाह—**एकोऽपीति** ।

---

1. **असंलक्ष्येति** । सम्यङ् न लक्षयितुं शक्यः क्रमः पौर्वापर्यं यस्य तादृशो व्यङ्ग्यो यस्मिन्सः । स्फुटे प्रकरणे झटिति प्रतीतेषु विभावानुभावव्यभिचारिषु सहृदयधुरीणेन प्रमात्रा सूक्ष्मेणैव कालेन प्रतीयत इति हेतुहेतुमतोः पौर्वापर्यक्रमस्यासंलक्षणादसंलक्ष्यक्रमो व्यपदिश्यते । यत्र तु विचारवेद्यं प्रकरणम्, उन्नेया वा विभावादयस्तत्र सामग्रीविलम्बाधीनं चमत्कृतेर्मान्थर्यमिति संलक्ष्यक्रमोऽप्येष भवति ॥

---

१. '–क्रमव्यङ्ग्यः' ग. २. 'लक्ष्यव्यङ्ग्यक्रमः परः' ग. ३. ग-पुस्तके तु 'विवक्षित–' इत्यादि 'द्विविधः' इत्यन्तः पाठो नास्ति.

[1]उक्तस्वरूपो भावादिरसंलक्ष्यक्रमव्यङ्ग्यः । अत्र व्यङ्ग्यप्रतीतेर्विभावादिप्रतीतिकारणकत्वात्क्रमोऽवश्यमस्ति, किंतूत्पलपत्रशतव्यतिभेदवल्लाघवान्न संलक्ष्यते । एषु रसादिषु च एकस्यापि भेदस्यानन्तत्वात्संख्यातुमशक्यत्वादसंलक्ष्यक्रमव्यङ्ग्यध्वनिर्नाम काव्यमेकभेदमेवोक्तम् । तथाहि—एकस्यैव शृङ्गारस्यैकोऽपि संभोगरूपो भेदः परस्परालिङ्गनाधरपानचुम्बनादिभेदात्प्रत्येकं च विभावादिवैचित्र्यात्संख्यातुमशक्यः का गणना सर्वेषाम् ।

[1]शब्दार्थोभयशक्त्युत्थे व्यङ्ग्येऽनुस्वानसंनिभे ।
ध्वनिर्लक्ष्यक्रमव्यङ्ग्यस्त्रिविधः कथितो बुधैः ॥ ६ ॥

अनन्तत्वादतिबहुलत्वादसंख्येयः संख्यातुमशक्यः । तस्य रसभावादेर्मेलनेन । भेदनं व्यतिभेदः । लाघवाच्छीघ्रोत्पन्नत्वात् । 'सः' इति शेषः । एषु च रसभावादिषु च । **अनन्तत्वादिति** । संख्यातुमशक्यत्वादित्यत्र हेतुः । उक्तमर्थं विशेषाख्यानेन द्रढयति—**तथाहीति** । विभावादीनां[2] वैचित्र्याद् वैलक्षण्याच्चेत्यन्वयः । लक्ष्यक्रमव्यङ्ग्यध्वनिमाह—**शब्देति** । शब्दस्यार्थस्य तदुभयस्य च शक्तेरुत्तिष्ठति आविर्भ-

---

1. **शब्देति** । ननु शब्दशक्त्या यत्रार्थान्तरं प्रकाशते स यदि ध्वनेः प्रकारस्तर्हि श्लेषस्य विषय एवापहृतः स्यादित्यत्राह ध्वनिकारः—'आक्षिप्त एवालंकारः शब्दशक्त्या प्रकाशते । यस्मिन्नुक्तः शब्देन शब्दशक्त्युद्भवो हि सः ॥' यस्मादलंकारो न वस्तुमात्रं यस्मिन्काव्ये प्रकाशते स एव शब्दशक्त्युद्भवो ध्वनिः । वस्तुद्वये च शब्दशक्त्या प्रकाश्यमाने श्लेषः । यथा—'येन ध्वस्तमनोभवेन–' इत्यादौ । नन्वलंकारान्तरप्रतिभायामपि श्लेषव्यपदेशो भवतीति दर्शितं भट्टोद्भटेन तत्पुनरपि शब्दशक्तिमूलो ध्वनिर्निरवकाश इत्याशङ्क्य 'आक्षिप्तः' इत्युक्तम् । शब्दशक्त्या साक्षादलंकारान्तरप्रतिभा यथा—'तस्या विनापि हारेण निसर्गादेव हारिणौ । जनयामासतुः कस्य विस्मयं न पयोधरौ ॥' अत्र शृङ्गारव्यभिचारी विस्मयाख्यो भावः साक्षाद्विरोधालंकारश्च प्रतिभासत इति विरोधच्छायानुग्राहिणः श्लेषस्यायं विषयः । न त्वनुस्वानोपमव्यङ्ग्यस्य ध्वनेः । यत्र तु सामर्थ्याक्षिप्तं सदलंकारान्तरं शब्दशक्त्या प्रकाशते स सर्व एव ध्वनेर्विषयः । यथा हर्षचरिते—'कदाचित्कुसुमसमययुगमुपसंहरन्नजृम्भत ग्रीष्माभिधानः संफुल्लमल्लिकाधवलाट्टहासो महाकालः । अत्र ऋतुवर्णनप्रस्तावनियन्त्रिता अभिधाशक्तयः । अत एव 'अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी' इति न्यायमपाकुर्वन्तो महाकालप्रभृतयः शब्दा एकमेवार्थमभिधाय कृतकृत्याः । तदनन्तरमर्थावगतिः शब्दशक्तिमूलाद् ध्वननव्यापारादेव । तत्र केचिन्मन्यन्ते—यत एतेषां शब्दानां पूर्वमर्थान्तरेऽभिधान्तरं दृष्टं ततस्तथाविधेऽर्थान्तरे दृष्टतदभिधाशक्तेरेव प्रतिपत्तुर्नियन्त्रिताभिधाशक्तिकेभ्य एतेभ्यः प्रतिपत्तिर्ध्वननव्यापारादेवेति शब्दशक्ति-

---

१. ग-पुस्तके तु 'उक्तस्वरूपः–' इत्यादिः 'सर्वेषाम्–' इत्यन्तः पाठो नास्ति. २. 'विभावादिति' इति पुस्तकान्तरे.

क्रमलक्ष्यत्वादेवानुरणनरूपो यो व्यङ्ग्यस्तस्य शब्दशक्त्युद्भवत्वेन, अर्थशक्त्युद्भवत्वेन शब्दार्थशक्त्युद्भवत्वेन च त्रैविध्यात्संलक्ष्यक्रमव्यङ्ग्यनाम्नो ध्वनेः काव्यस्यापि त्रैविध्यम् ।

तत्र

वस्त्वलंकाररूपत्वाच्छब्दशक्त्युद्भवो द्विधा ।

अलंकारशब्दस्य पृथगुपादानादनलंकारं वस्तुमात्रं गृह्यते । तत्र वस्तुरूपशब्दशक्त्युद्भवो व्यङ्ग्यो यथा—

'पन्थिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उण्णअ पओहरं पेक्खिऊण जइ वससि ता वससु ॥'

वति यत्तस्मिन् । अनुस्वानः प्रतिध्वनिः । तस्य खलु जनकीभूतशब्दोत्तरजायमानत्वरूपक्रमो लक्ष्यते तत्संनिभे तत्तुल्ये व्यङ्ग्ये सतीत्यर्थः । क्रमस्य व्यङ्ग्यप्रतीतिपौर्वापर्यस्य लक्ष्यत्वात् स्फुटप्रतीयमानत्वात् । अनुरणनरूपः प्रतिध्वनितुल्यः । **वस्त्वलंकाररूपत्वादिति** । 'व्यङ्ग्यस्य' इति शेषः । **अनलंकारमिति** । अलंकारशब्दोऽत्र धर्मपरः । तेन न विद्यते अलंकारो यत्रेति बहुव्रीहिः । तत्पुरुषसमासे क्लीबत्वं न स्यात् । 'शेषतत्पुरुषद्वन्द्वावन्त्यस्थपदलिङ्गकौ' इत्यनुशासनेन पुंस्त्वप्रसक्तेः । **पन्थिअ इति** । 'पथिक नात्र स्रस्तरमस्ति मनाक्प्रस्तरस्थले ग्रामे । उन्नतपयोधरं प्रेक्ष्य यदि वससि तद्वस ॥' इति संस्कृतम् । निवासार्थिनं पथिकं प्रति स्वयंदूत्या

मूलत्वं व्यङ्ग्यात्मत्वं चेत्यविरुद्धम् । अन्ये तु—साभिधैव द्वितीयार्थसामर्थ्यं ग्रीष्मस्य भीषणदेवताविशेषसादृश्यात्मकं सहकारित्वेन यतोऽवलम्बते ततो ध्वननव्यापाररूपोच्यते इति । एके तु—शब्दश्लेषे तावद्भेदे सति शब्दार्थश्लेषेऽपि शक्तिभेदाच्छब्दभेद इति दर्शने द्वितीयः शब्दस्तत्रानीयते । स च कदाचिदभिधाव्यापाराद् यथोभयोत्तरदानाय 'श्वेतो धावति—अलम्बुसानां यातां' इति प्रश्नोत्तरादौ । वा तत्र शब्दान्तरबलादपि तदर्थान्तरं प्रतिपन्नं प्रतीयमानमूलत्वात्प्रतीयमानमेव युक्तमिति । इतरे तु—संफुल्लमल्लिका एव धवलाट्टहासोऽस्येति व्याख्यानाश्रयणे यदर्थसामर्थ्यं तेन द्वितीयाभिधैव प्रतिप्रसूयते । ततश्च द्वितीयोऽर्थोऽभिधीयत एव न ध्वन्यते । तदनन्तरं तु तस्य द्वितीयार्थश्च प्रतिपन्नस्य प्रथमार्थेन प्राकरणिकेन सार्कं या रूपणा तावद्व्यङ्ग्येव न चान्यतः शब्दादिति सा ध्वननव्यापारात् । तत्राभिधाशक्तेः कस्याश्चिदप्यनाशङ्कनीयत्वात् । तस्यां च द्वितीया शब्दशक्तिर्मूलम् । तया विना तस्या रूपणाया अनुत्थानात् । अत एवालंकारध्वनिरयमिति युक्तम् । इत्यादिस्थलेषु शब्दशक्त्या प्रकाशमाने सत्यप्राकरणिकेऽर्थान्तरे वाक्यस्यासंबद्धार्थाभिधायित्वं मा प्रसाङ्क्षीदित्यप्राकरणिकप्राकरणिकार्थयोरुपमानोपमेयभावः कल्पयितव्यः सामर्थ्यादित्याक्षिप्तोऽयं श्लेषो न शब्दोपारूढ इति भिन्न एव श्लेषादनुस्वानोपमव्यङ्ग्यस्य ध्वनेर्विषय इत्याहुः ॥

---

१. 'क्रम–' इत्यादिः 'त्रैविध्यम्' इत्यन्तः पाठो ग-पुस्तके नास्ति. २ 'अलंकार–' इत्यादिः 'उपचर्यते' इत्यन्तः पाठो ग-पुस्तके नास्ति. ३. 'समासः' इति पुस्तकान्तरे. ४. 'तत्पुरुषे' इति पुस्तकान्तरे.

[1]अत्र सत्थरादिशब्दशक्त्या यद्युपभोगक्षमोऽसि तदास्वेति वस्तु व्यज्यते ।

अलंकाररूपो यथा—'दुर्गालङ्घितविग्रहः—' इत्यादि ।

अत्र प्राकरणिकस्योमानाममहादेवीवल्लभभानुदेवनामनृपतेर्वर्णने द्वितीयार्थसूचितमप्राकरणिकस्य पार्वतीवल्लभस्य वर्णनमसंबद्धं मा प्रसाङ्क्षीदितीश्वरभानुदेवयोरुपमानोपमेयभावः कल्प्यते । तदत्र 'उमावल्लभ उमावल्लभ' इव इत्युपमालंकारो व्यङ्ग्यः ।

यथा वा—

'अमितः समितः प्राप्तैरुत्कर्षैर्हर्षदं[2] प्रभो ।
अहितः सहितः साधुयशोभिरसतामसि ॥'

उक्तिरियम् । स्रस्तरं शयनीयकटः मनागल्पमपि तन्नास्ति । प्रस्तर एव वयं स्वपिम इति दर्शयति—**प्रस्तरस्थल इति** । पयोधरं मेघम् । तत्तदा निवासोपयुक्तं शयनीयकटादिकमत्र नास्त्येव । मेघप्रतिरुद्धगतिकतया यदि वससि तद्वसेत्यापाततः प्रतीयते । तस्य व्यङ्ग्यमाह—**अत्रेति** । सत्थरादीत्यादिना पत्थरत्थलपओहरशब्दयोर्ग्रहणम् । परदारगमननिषेधकशास्त्रार्थकं सत्थरपदं प्राकृतश्लिष्टम् । प्रस्तरे स्त्रीजनं संभोगार्थं गृह्णातीत्येवमर्थकं प्रस्तरस्थलपदं संस्कृतश्लिष्टम् । स्तनार्थकमपि पओहरपदमुभयोः श्लिष्टम् । एषां शक्त्या सामर्थ्येन । परम्परयापि शब्दशक्त्युद्भवो यथा—'शनिरशनिश्च तमुच्चैर्निहन्ति, कुप्यसि नरेन्द्र यस्मै त्वम् । यत्र प्रसीदसि पुनः, स भात्युदारोऽनुदारश्च ॥' शनिर्ग्रहोऽशनिर्वज्रं च तमुच्चैर्निहन्ति । अनुदारोऽनुमतदारः । तत्राशनिशब्दशक्त्या शनिविरुद्धे व्यञ्जिते तद्द्वारा विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इति वस्तु व्यज्यते । उत्तरार्धे तु विरोधाभास एव । यद्वा सोऽनुदारोऽपि त्वदनुवृत्त्या उदारो भवतीत्यर्थः । **अलंकाररूप इति** । 'शब्दशक्त्युद्भवो व्यङ्ग्यः' इत्यनुषज्यते । **मा प्रसाङ्क्षीदिति** । प्रसक्तं मा भूदित्यर्थः । शब्दशक्तिमूलमलंकारान्तरमाह—**यथा वेति । अमित इति** । हे प्रभो, त्वमसतामहितः । समिद्युद्धं

---

1. **अत्रेति** । प्रस्तराणां तत्त्वेनाध्यवसितानां मूर्खाणां स्थले तन्मयेऽत्र ग्रामे सत्थरं शास्त्रं कामशास्त्रमित्यर्थः । यद्वा सत्थरं शास्त्रं मनाक् किंचिदपि नास्ति, किं पुनः साहित्यम् । तस्मादिङ्गिताभिज्ञविरहान्निःशङ्कमुन्नतमनुपभुक्तं पयोधरं स्तनं तादृशोद्दीपकं मेघं च प्रेक्ष्य यद्युपभोगक्षमोऽसि तदा आस्वेति । प्रस्तरस्थल इत्यनेन शय्यापेक्षापि नास्तीति ध्वन्यते अत्र शब्दशक्तिमूलत्वं परिवृत्त्यसहनानार्थशब्दप्रयोगादवसेयमिति व्यङ्ग्यार्थः ॥

2. **हर्षदेति** । शत्रुमित्रयोर्हर्षं यति ददाति चेति हर्षद शत्रुहर्षखण्डक मित्रहर्षदायकेत्यर्थः । अत्र पदाभङ्गेऽपि विरोधः । अमितः परिमाणवर्जितः, अथ च समितः परिमाणसहितः । यद्वा अमितः मितं मानं तद्रहितः अथ च मानसहितः । अहितः हितरहितः, अथ च सहितः हितसहित इति ॥

अत्रामित इत्यादावपिशब्दाभावाद्विरोधाभासो व्यङ्ग्यः । व्यङ्ग्यस्यालंकार्यत्वेऽपि ब्राह्मणश्रमणन्यायादलंकारत्वमुपचर्यते ।

वस्तु वालंकृतिर्वापि द्विधार्थः [1]संभवी स्वतः ॥ ७ ॥
कवेः [2]प्रौढोक्तिसिद्धो वा तन्निबद्धस्य चेति षट् ।
षड्भिस्तैर्व्यज्यमानस्तु वस्त्वलंकाररूपकः ॥ ८ ॥
अर्थशक्त्युद्भवो व्यङ्ग्यो याति द्वादशभेदताम् ।

[3]स्वतःसंभवी, औचित्याद्बहिरपि संभाव्यमानः । प्रौढोक्त्या सिद्धः, न त्वौचित्येन ।

ततः प्राप्तैरुत्कर्षैरमितोऽपर्याप्तः । साधुयशोभिः सहितः । व्यङ्ग्यमाह—**अमित इति** । अमितो मितशून्यः समितो मितयुक्तश्चेति [3]विरोधः । विरोधाभासस्य वाच्यत्वे पदयोः समानविभक्तिकत्वमपि चकारसत्त्वं चापेक्षितं तदभावादेवात्र व्यङ्ग्यत्वमित्याह—**अपिशब्दाभावादिति** । एतदुपलक्षणम् । समानविभक्तिकत्वाभावाच्चेत्यपि द्रष्टव्यम् । ननु रसस्य प्रकर्षतयोपमादेर्यदा गौणत्वं तदैवालंकारत्वं वक्ष्यते । व्यङ्ग्यत्वेनास्वाद्यतया मुख्यत्वात्कथमलंकारत्वमित्याह—**व्यङ्ग्यस्यालंकार्यत्वेऽपीति** । श्रमणः संन्यासी तस्य तद्दशायां ब्राह्मणत्वाभावेऽपि यथा दशान्तरीयं ब्राह्मणत्वमादाय तथा व्यपदेशस्तथात्रापि वाच्यतादशीयमलंकारत्वमादाय तथा व्यपदेश इति भावः । अर्थशक्त्युद्भवं व्यङ्ग्यमाह—**वस्तु वेति** । द्विविधोऽर्थः पुनस्त्रैविध्येन षट्प्रकारो भवतीत्याह— **संभवीति** । स्वतःसंभवीत्यन्वयः । तन्निबद्धस्य कविवर्णितस्य वक्तुः । 'प्रौढोक्तिसिद्धः' इत्यनुषज्यते । षट् षट्प्रकारः । स्वतःसंभविपदार्थं व्याचष्टे—**स्वत इति** । औचित्याद् याथार्थ्याद् बहिरपि तादृशशब्दातिरिक्तप्रमाणेनापि संभाव्यमानः प्रतीयमानः । रूपकालंकारे रूप्यरूपकयोरभेदस्यालीकत्वेऽपि तयोः सादृश्यस्यापि लोकप्रसिद्धत्वे स्वतःसंभवित्वम् । अत एव 'अधरम्लानकमलदलम्' इति रूपकं स्वतःसंभवितया काव्यप्रकाशे उक्तम् । धर्मिक्ले नवमल्लिकासमुदय इति सादृश्याप्रसिद्ध्या प्रौढोक्तिसिद्धं रूपकमुदाहरिष्यति । प्रौढोक्त्या वर्णनमात्रेण

---

1. **संभवीति** । य औचित्येन बहिरपि संभाव्यमानसद्भावः, न केवलं भणितिवशेनैवाभिनिष्पन्नशरीरः ॥

2. **प्रौढोक्तीति** । प्रौढोक्तिसिद्धः, बहिरसन्नपि वक्तृप्रतिभामात्रेण तथा कल्पितः । 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि' इति न्यायादिति भावः । अयमर्थः—व्यङ्ग्योऽर्थस्त्रिविधः । स्वतःसंभवी, कविप्रौढोक्तिसिद्धः, कविनिबद्धनायकादिवक्तृप्रौढोक्तिसिद्धश्च । स त्रिविधोऽपि वस्तुमात्रमलंकृतिर्वेति षड्विधः । षण्णां व्यङ्ग्यमपि प्रत्येकं वस्तु वा अलंकृतिर्वेति द्वादशभेदाः ॥

---

१. ग-पुस्तके तु 'स्वतःसंभवी—' इत्यादिः '—न तु रूप्यादीनामित्यलंकृतेरेव मुख्यत्वम्' इत्यन्तो ग्रन्थो न दृश्यते. २. 'विरोधः' इति पुस्तकान्तरे नास्ति.

तत्र क्रमेण यथा—

'दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायेणास्य शिशोः पिता[1] न विरसाः कौपीरपः पास्यति ।
एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुलं[2]
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः ॥'

अनेन स्वतःसंभविना वस्तुमात्रेण तत्प्रतिपादिकाया[3] भाविपरपुरुषोपभोगजनखक्षतादिगोपनरूपं वस्तुमात्रं व्यज्यते ।

'दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥'

अनेन स्वतःसंभविना वस्तुना रवितेजसो रघुप्रतापोऽधिक इति व्यतिरेकालंकारो व्यज्यते ।

'आपतन्तममुं दूरादूरीकृतपराक्रमः ।
बलोऽवलोकयामास मातङ्गमिव केसरी ॥'

सिद्धो निष्पन्नवत्प्रतीयमानः । अत्र स्वतःसंभविवस्तुव्यङ्ग्यवस्त्वाह—**दृष्टिमिति** । कस्याश्चित्कुलटाया उक्तिरियम् । इह अस्मद्गृहेऽपीत्यन्वयः । स्वगृहे चेति तदर्थः । कौपीः कूपभवाः । अत उक्तकारणात् । निरन्तरा निरवकाशाः । घना इत्यर्थः । तनुं मम शरीरमालिखन्तु खण्डयन्तु । जरठः कठिनः छेदोऽग्रभागो येषां ते । नलस्य ग्रन्थयः पर्वाणि । व्यङ्ग्यमाह—**अनेनेति** । वाक्यार्थेनेत्यर्थः । तत्प्रतिपादिकायास्तस्य वाक्यार्थस्य वस्त्वयाः । अयं वाक्यार्थो लोकप्रसिद्ध एव । स्वतःसंभविवस्तुव्यङ्ग्यालंकारमाह—**दिशीति** । मन्दायते मृदूभवति । एवकारोऽप्यर्थे । उपमानादुपमेयस्याधिक्यं न्यूनत्वं वा व्यतिरेकस्तस्य व्यङ्ग्यत्वम् । प्रकृतोपयोगिप्रकर्षनिकर्षयोरन्यतरस्य बोधाभिप्रायेण प्रयुक्तधर्मस्य तत्प्रकारत्वासंभवेन तद्बोधानुपपत्त्या निरुक्तधर्मव्यङ्ग्यकारणमुखेन तद्बोधोपपत्तौ भवति दिशीत्यादौ रवितेजसो मार्दवयुक्तो यो निकर्षस्तस्यासह्यत्वप्रयुक्तरघुप्रतापगतप्रकर्षनिरूपकत्वाभावात्प्रकृतानुपयोगितया मार्दवव्यङ्ग्यसह्यत्वेन प्रकृतोपयोगिनिकर्षप्रत्यायनाद् व्यतिरेकस्य व्यङ्ग्यत्वम् । स्वतःसंभव्यलंकारव्यङ्ग्यवस्त्वाह—**आपतन्तमिति** । अभिमुखमायान्तमित्यर्थः । अमुं वेणुदारिणम् । ऊरीकृतपराक्रमः स्वीकृतविक्रमः । कृतयुद्धप्रतिज्ञ इति यावत् ।

---

1. **पितेति** । अस्य शिशोः पिता । मत्स्वामीत्यर्थः ॥

2. **स्रोत इति** । तमालाकुलं तमालवनवेष्टितं स्रोतः स्रतोऽम्बुसरणम् । एतेन कूपसलिलापेक्षया स्रोतःसलिलस्योत्कृष्टता प्रतिपाद्यते ॥

---

१. 'प्रतिपादिकायाः' क-पुस्तके नास्ति. २. 'अत्र' क.

अत्रोपमालंकारेण स्वतःसंभविना [1]व्यङ्ग्यकार्थेन बलदेवः क्षणेनैव वेणुदारिणः क्षयं करिष्यतीति वस्तु व्यज्यते ।

'गाढकान्तदशनक्षतव्यथासंकटादरिवधूजनस्य यः ।
ओष्ठविद्रुमदलान्यमोचयन्निर्दशन्युधि रुषा निजाधरम् ॥'

अत्र स्वतःसंभविना विरोधालंकारेणाधरो निर्दष्टः शत्रवो व्यापादिताश्चेति समुच्चयालंकारो व्यङ्ग्यः ।

'[2]सज्जेहि[2] सुरहिमासो ण [3]दाव अप्पेइ जुअइजणलक्खमुहे[4] ।
अहिणवसहआरमुहे णवपल्लवपत्तले अणङ्गस्स सरे ॥'

अत्र वसन्तः शरकारः, कामो धन्वी, युवतयो लक्ष्यम्, पुष्पाणि

बलो बलदेवः । विपुलविक्रमत्वेन बलस्य केसरिसादृश्यं मदान्धत्वेन वेणुदारिणो मातङ्गसादृश्यं लोकप्रसिद्धमेव । स्वतःसंभव्यलंकारव्यङ्ग्यमलंकारमाह—**गाढेति** । गाढकान्तदशनक्षतजन्यव्यथैव संकटो विपत् तस्मात् । ओष्ठा एव विद्रुमस्य प्रवालस्य दलानि खण्डानि । क्रोधेन निजाधरं निर्दश्य निहते शत्रौ तद्वधूनां कान्तकर्तव्यो रतिकालीनोऽधरदंशो निवर्तत इत्यर्थः । अधरस्य निर्दशनेन व्यथाया उत्पत्तिरेव न तु मोचनमित्यापाततो विरोधः । आश्रयभेदे त्वविरोध एव । व्यापादिता मारिताः । 'धुनोति चासिं तनुते च कीर्तिम्' इत्यादावेकाधिकरणे चैष दृश्यत इति वक्ष्यमाणवदत्र कार्यकारणकालनियमविपर्ययरूपातिशयोक्तिमूलं क्रियायौगपद्यं समुच्चयः । निर्दशन्निति वर्तमाननिर्देशात्तत्कालीनमोचनेन तद्धेतुशत्रुव्यापादनस्यापि तत्कालीनत्वलाभः । कार्यकारणयोः शत्रुव्यापादनाधरदंशनयोः समकालत्वं तु बाधितमप्याहार्यप्रतीतिविषय एव शीघ्रकारिताव्यञ्जनमित्यवधेयम् । अत्र समुच्चयार्थकचकाराद्यभावेन शत्रुव्यापादनक्रियया व्यङ्ग्यत्वेन समुच्चयस्य व्यङ्ग्यत्वम् । कविप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यं वस्त्वाह—**सज्जेहीति** । 'सज्जयति सुरभिमासो न तावदर्पयति युवतिजनलक्ष्यमुखान् । अभिनवसहकारमुखान्नवपल्लवपत्रलाननाङ्गस्य शरान् ॥' इति संस्कृतम् । सुरभिमासश्चैत्रः । अभिनवो नवमुकुलितः सहकारोऽतिसौरभाम्रो मुखमादिर्येषां तान् । नवपल्लव एव पत्रं पक्षस्तल्लान्ति गृह्णन्ति तान् । प्रकाशीभवत् सिद्धवद्भासमा-

---

1. **वेणुदारिण इति** । वेणुदारिसंज्ञको बाणासुरतनयः ॥

2. **सज्जेहीति** । अत्र वसन्तोऽचेतनोऽनङ्गस्य सखा सज्जयति न केवलं तावदर्पयतीत्येवंविधया समर्पयितव्यवस्त्वर्पणकुशलयोक्त्या सहकारोद्भेदिनी वसन्तदशा यत उक्ता अतो ध्वन्यमानं मन्मथोन्माथसारम्भं क्रमेण गाढगाढीभविष्यन्तं व्यनक्ति । अन्यथा वसन्ते सपल्लवसहकारोद्गम इति वस्तुमात्रं न व्यञ्जकं स्यात् ॥

---

१. 'व्यञ्जक' इति नास्ति क-पुस्तके. २. 'इ' क.घ. ३. 'आपणे ई' क-घ. ४. 'सहे' क. घ.

शरा इति कविप्रौढोक्तिसिद्धं वस्तु प्रकाशीभवन्मदनविजृम्भणरूपं वस्तु व्यनक्ति ।

'रजनीषु विमलभानोः करजालेन प्रकाशितं वीर ।
धवलयति भुवनमण्डलमखिलं तव कीर्तिसंततिः सततम् ॥'

अत्र कविप्रौढोक्तिसिद्धेन वस्तुना कीर्तिसंततेश्चन्द्रकरजालादधिक-कालप्रकाशकत्वेन[1] व्यतिरेकालंकारो व्यङ्ग्यः ।

'दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः ।
मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः ॥'

अत्र कविप्रौढोक्तिसिद्धेनापह्नुत्यलंकारेण भविष्यद्राक्षसश्रीविनाशरूपं वस्तु व्यज्यते ।

'धम्मिल्ले नवमल्लिकासमुदयो हस्ते सिताम्भोरुहं[1]
हारः कण्ठतटे पयोधरयुगे श्रीखण्डलेपो घनः ।
एकोऽपि त्रिकलिङ्गभूमितिलक त्वत्कीर्तिराशिर्ययौ[2]
नानामण्डनतां पुरंदरपुरीवामभ्रुवां विभ्रहे ॥'

नम् । विजृम्भणं विशेषेण वर्धनम् । अत्र वसन्तादीनां शरकारत्वादिकमलीकम् । कविप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यमलंकारमाह—**रजनीष्विति** । विमलभानोः शुभ्रकिरणस्य । चन्द्रस्येत्यर्थः । सततं रात्रिंदिवम् । अत्र यशसा निखिलभवनधवलीकरणमलीकमपि कविप्रौढोक्तिसिद्धम् । अखिलमित्यनेनाधिकदेशप्रकाशकत्व च बोध्यम् । रात्रिंदिवप्रकाशस्यापि रात्रिप्रकाशकत्वमस्तीति तस्य निकर्षकारणत्वासंभवात्तद्व्यङ्ग्येन रात्रिमात्रप्रकाशकत्वेन निकर्षप्रत्ययनाद् व्यतिरेकस्य व्यङ्ग्यत्वम् । कविप्रौढोक्तिसिद्धालंकारव्यङ्ग्यं वस्त्वाह—**दशाननेति** । यस्मिन् क्षणे श्रीरामः पृथिव्यामवतीर्णस्तत्क्षणं व्याप्येत्यर्थः । पर्यस्ताः पतिताः । प्रकृतानां मणीनां प्रतिषेधेनाप्रकृतानामश्रुबिन्दूनां स्थापनमपह्नुतिः । अत्र राक्षसश्रियोऽश्रुबिन्दूनामलीकत्वेन कविप्रौढोक्तिमात्रसिद्धत्वम् । कविप्रौढोक्तिसिद्धालंकारव्यङ्ग्यमलंकारमाह—**धम्मिल्ल इति** । 'धम्मिल्लाः संयताः कचाः' इत्यमरः । समुदयः समूहः । श्रीखण्डलेपश्चन्दनप्रलेपः । विभ्रहे देहे । अत्र कीर्तिराशेर्धावल्यरूपसादृश्यमप्रसिद्धमपि[3] कविप्रतिभामात्रसिद्धमिति तन्मूलकरूपकस्यापि तथात्वमिति भावः । स्वर्गस्थानामुपकारे स्थितिरेव कारणं तां विनापि

---

1. **सितेति** । पुण्डरीकम् ॥
2. **त्रिकेति** । तैलङ्गदेशभूषणम् ॥

---

१. 'काल' इति नास्ति क-पुस्तके. २. 'रात्रिंदिव–' इत्यादिः '–व्यङ्ग्यत्वम्' इत्यन्तः पाठः पुस्तकान्तरे नास्ति. ३. 'अपि कविप्रतिभामात्रसिद्धम्' इति पुस्तकान्तरे नास्ति.

अत्र कविप्रौढोक्तिसिद्धेन रूपकालंकारेण भूमिष्ठोऽपि स्वर्गस्थानामुपकारं करोषीति विभावनालंकारो व्यज्यते ।

'शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः ।
सुमुखि येन तवाधरपाटलं [1]दशति बिम्बफलं शुकशावकः ॥'

अत्रानेन कविनिबद्धस्य कस्यचित्कामिनः प्रौढोक्तिसिद्धेन वस्तुना तवाधरः पुण्यातिशयलभ्य इति वस्तु प्रतीयते ।

'सुभगे कोटिसंख्यत्वमुपेत्य मदनाशुगैः ।
वसन्ते पञ्चता त्यक्ता पञ्चतासीद्वियोगिनाम् ॥'

अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन [2]कामशराणां कोटिसंख्यत्वप्राप्त्या निखिलवियोगिमरणेन [3]वस्तुना शराणां पञ्चता शरान्विमुच्य वियोगिनः श्रितेवेत्युत्प्रेक्षालंकारो व्यज्यते ।

'मल्लिकामुकुले चण्डि भाति गुञ्जन्मधुव्रतः ।
प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव ॥'

अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धेनोत्प्रेक्षालंकारेण कामस्यायमुन्मादकः कालः प्राप्तस्तत्कथं मानिनि मानं न मुञ्चसीति वस्तु व्यज्यते ।

'महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअन्ती ।
अणुदिणमणण्णकम्मा अङ्गं तणुअं पि तणुएइ ॥'

भवतीति विभावना । उपकारश्च यज्ञादिद्वारेण । कविनिबद्धप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यं वस्त्वाह—**शिखरिणीति** । अधरवत्पाटलं रक्तं शुकशावकस्य तपश्चरणं प्रौढोक्तिमात्रसिद्धम् । यत्सादृश्येनोत्कृष्टं वस्तु पुण्यं विना न लभ्यते तस्य सुतरामेव पुण्यातिशयलभ्यत्वमिति भावः । कविनिबद्धप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यमलंकारमाह—**सुभगे इति** । पञ्चता पञ्चसंख्योपयोगित्वं मरणं च । कविनिबद्धप्रौढोक्तिसिद्धालंकारव्यङ्ग्यं वस्त्वाह—**मल्लिकेति** । चण्डि अत्यन्तकोपने । कामस्येति सहाय इति शेषः । उन्मादकः प्रोषितपीडातिशयजनकश्च । 'मानस्य' इति पाठे यथाश्रुत एवार्थः । उत्प्रेक्षणीयस्य कामप्रयाणकालीनशङ्खापूरणस्यासंभवित्वात्प्रौढोक्तिसिद्धत्वम् । कविनिबद्धप्रौढोक्तिसिद्धालंकारव्यङ्ग्यमलंकारमाह—**महिलेति** । 'महिलासहस्रभरिते

---

1. **दशतीति** । दशति आस्वादयते । अनवच्छिन्नप्रबन्धतया न त्वौदरिकवत्परं भुङ्क्ते । अपि तु रसज्ञोऽत्र तत्प्राप्तिवदेव रसज्ञताप्यस्य तपःप्रभावादेवेति । शुकशावक इति तारुण्यादुचितकाललाभोपि फलं तपस एवेति सहृदयाः ॥

---

१. 'रूपेण' क. २. 'काम' इति नास्ति क-पुस्तके. ३. 'वस्तुना' इति क-ख-पुस्तकयोर्नास्ति. ४. घ-पुस्तके 'इव' नास्ति. ५. 'मानिनि' इति नास्ति क-पुस्तके.

अत्रामाअन्तीति कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन काव्यलिङ्गालंकारेण तनोस्तनूकरणेऽपि तव हृदये न वर्तत इति विशेषोक्त्यलंकारो व्यज्यते। न खलु कवेः कविनिबद्धस्येव रागाद्याविष्टता अतः कविनिबद्धवक्तृप्रौढोक्तिः कविप्रौढोक्तेरधिकं सहृदयचमत्कारकारिणीति पृथक्प्रतिपादिता[1]।

एषु चालंकृतिव्यञ्जनस्थले रूपणोत्प्रेक्षणव्यतिरेचनादिमात्रस्य प्राधान्यं सहृदयसंवेद्यम्, न तु रूप्यादीनामित्यलंकृतेरेव मुख्यत्वम्।

एकः[1] शब्दार्थशक्त्युत्थे

[2]उभयशक्त्युद्भवे व्यङ्ग्ये एको ध्वनेर्भेदः।

तव हृदये सुभग सा अमान्ती। अनुदिनमनन्यकर्मा अङ्गं तन्वपि तनयति ॥' इति संस्कृतम्। नायकं प्रति सख्या उक्तिरियम्। अमान्ती मानमवकाशमप्राप्नुवती दिवसं प्राप्य तनयति कृशीकरोति। 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति काव्यलिङ्गलक्षणम्। अत्र पदार्थतया हेतुर्निर्दिष्ट इत्याहुः। अत्रामान्तीति मनसोऽणुत्वादनुपलभ्यत्वाच्च तत्र मानमेव न संभवति कुतस्तल्लाभ इति भावः। तनुतनूकरणरूपकारणस्य सत्त्वेऽपि लब्धहृदयवृत्तित्वरूपफलं नास्तीति विशेषोक्तिः। ननु कविनिबद्धप्रौढोक्तिसिद्धस्य कविप्रौढोक्तिसिद्धत्वमस्त्येवेति कथं तस्य पृथगुपादानमित्यत आह—**न खलिवति**। रागादीत्यादिना उत्साहादिपरिग्रहः। प्रौढोक्त्या हि वक्तू रागाद्याविष्टचित्तत्वं प्रतीयते। तत्र कव्यपेक्षया कविनिबद्धस्य वक्तुरधिकरागाद्याविष्टचित्तत्वमिति तद्व्यञ्जिकायाः प्रौढोक्तेरधिकचमत्कारकारित्वमिति भावः। ननु यत्रालंकारस्य व्यञ्जकत्वमुक्तं तत्रालंकार्यस्य वस्तुनोऽपि व्यञ्जकत्वमस्त्येवेति कथमलंकारस्य पृथगुपादानमत आह—**एषु चेति**। प्रागुक्तद्वादशसु भेदेषु मध्ये इत्यर्थः। अलंकृतिव्यञ्जनस्थले अलंकारव्यञ्जनस्थले। रूप्यादीनामित्यादिना उत्प्रेक्षणीयव्यतिरेचनी-

---

1. **शब्दार्थेति**। यद्यपि शब्दशक्तिमूलकत्वमर्थशक्तिमूलकत्वं चेत्युभयमपि सकलव्यङ्ग्यसाधारणम्, शब्दार्थयोरनुसंधानं विना व्यङ्ग्यस्यैवानुल्लासात्, तथापि परिवृत्त्यसहिष्णूनां शब्दानां प्राचुर्ये तत्प्रयुक्तात्प्राधान्यात्सत्या अप्यर्थशक्तेरप्राधान्याच्च व्यङ्ग्यस्य शब्दशक्तिमूलकत्वेनैव व्यपदेशः। परिवृत्तिसहिष्णूनां तु प्राचुर्येऽर्थशक्तेरेव प्राधान्यात्सत्या अपि शब्दशक्तेः प्रधानानुगुण्यार्थतया मुख्यामादिवत्प्रधानेनैव व्यपदेशः। यत्र तु काव्ये परिवृत्तिं सहमानानामसहमानानां च शब्दानां नैकजातीयप्राचुर्यम्, अपि तु साम्यमेव, तत्र शब्दार्थोभयशक्तिमूलकस्य व्यङ्ग्यस्य स्थितिरिति द्युत्थो ध्वनिः। न चायमन्यतरशक्तिमूलकनैव व्यपदेष्टुं शक्यः। विनिगमकाभावात् ॥

---

१. इतोऽग्रे क पुस्तके 'लक्ष्यार्थस्य यथा—'नि:शेषच्युतचन्दनम्—' इत्यादि। व्यङ्ग्यार्थस्य यथा—'उअ णिच्चल णिप्पन्दा—' इति। अनयोः स्वतःसमविनौ लक्ष्यव्यङ्ग्यार्थौ। एवमन्येष्वप्येकादशसु भेदेषूदाहार्यम्।' इत्यधिकः पाठः २. 'उभय—' इत्यादिः '—भेदः' इत्यन्तः पाठो ग-पुस्तके नास्ति.

यथा—

'हिममुक्तचन्द्ररुचिरः सपद्मको
मदयन्द्विजाङ्गनितमीनकेतनः ।
अभवत्प्रसादितसुरो महोत्सवः
प्रमदाजनस्य स चिराय माधवः ॥'

अत्र माधवः कृष्णो माधवो वसन्त इवेत्युपमालंकारो व्यङ्ग्यः[1] । एवं च व्यङ्ग्यभेदादेव व्यञ्जकानां काव्यानां भेदः ।

तदष्टादशधा ध्वनिः ॥ ९ ॥

अविवक्षितवाच्योऽर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः । विवक्षितान्यपरवाच्यस्तु असंलक्ष्यक्रमव्यङ्ग्यत्वेनैकः । संलक्ष्यक्रमव्यङ्ग्यत्वेन च शब्दार्थोभयशक्तिमूलतया पञ्चदशेत्यष्टादशभेदो ध्वनिः । एषु च—

यादीनां ग्रहणम् । **मुख्यत्वमिति** । अत एव तेनैव व्यवहार इत्यर्थः । **हिममुक्तेति** । हिममुक्तो निर्मलो यश्चन्द्रः स इव रुचिरोऽभिलषणीयः । वसन्तपक्षे—हिममुक्तेन चन्द्रेण रुचिरो दीप्यमानः । पद्मा लक्ष्मीस्तत्सहितः । पक्षे—पद्मयुक्तः । द्विजान् विप्रान्, कोकिलांश्च । जनितप्रद्युम्नः । पक्षे—जनितसुरताभिलाषः । प्रसादिताः प्रसन्नचित्तीकृताः सुरा देवा येन । पक्षे—प्रसादिता विमलीकृता सुरा मद्यं येन । माधवः श्रीकृष्णः वसन्तश्च । अत्रोभयशक्तिव्यङ्ग्यस्य वसन्तस्योपमा उभयशक्तिव्यङ्ग्या । तथाहि—प्रमदाजनस्य महोत्सवजनने (यदर्थं यस्य प्रसिद्धिस्तत्रैव तदर्थस्य सामर्थ्यम् । एवमेव काव्यप्रकाशः) वसन्तस्यैव सामर्थ्यमित्यर्थः । प्रतिसंधानसहकृतेन माधवपदेन वसन्त एव व्यज्यते न त्वर्थान्तरम् । तस्य तत्र सामर्थ्याभावात् । न चात्र शब्दार्थोभयश्लेषसत्त्वेनोभयशक्तिव्यङ्ग्योपमेति वाच्यम् । तथा सति 'दुर्गालङ्घित—' इत्यत्राप्युभयश्लेषसत्त्वेनोभयशक्तिव्यङ्ग्यत्वं स्यात् । गृहीतगरिमेत्यर्थश्लेषस्यापि तत्र सत्त्वात् । ननूक्तभेदेषु व्यङ्ग्यस्यैव भेदो दर्शितः । तच्च प्रकृतानुपयुक्तमत आह—**एवं चेति । तदिति** । उक्तक्रमादित्यर्थः । अष्टादशत्वमुपपादयति—

---

1. **उपमेति** । अत्रोपमालंकारश्चन्द्रपद्मादिशब्दानां परिवृत्त्यसहिष्णुतया हिममुक्तादिकानां तत्सहिष्णुतया उभयस्यापि प्राधान्येन व्यञ्जकत्वादुभयशक्तिमूलकः । यथा वा मम—'राजकोटिमनोहारी वृषस्थितिपरायणः । स हि सेव्यो महादेवो विकसत्सर्वमङ्गलः ॥' इत्युदाहार्यम् ॥

---

१. 'अवि—' इत्यादिः 'एषु च' इत्यन्तः पाठो ग-पुस्तके नास्ति. २. 'व्यङ्ग्यवाच्यत्वेन' इति घ-पुस्तके पाठः. ३. कोष्ठकान्तर्गतः पाठः पुस्तकान्तरे नास्ति.

वाक्ये शब्दार्थशक्त्युत्थस्तदन्ये[1] **पदवाक्ययोः ।**

तत्रार्थान्तरसंक्रमितवाच्यो ध्वनिः पदगतो यथा—

'धन्यः स एव तरुणो नयने तस्यैव नयने च ।
युवजनमोहनविद्या भवितेयं यस्य संमुखे सुमुखी ॥'

अत्र द्वितीयनयनशब्दो भाग्यवत्तादिगुणविशिष्टनयनपरः—

वाक्यगतो यथा—

'त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥'

अत्र प्रतिपाद्यस्य संमुखीनत्वादेव लब्धे प्रतिपाद्यत्वे त्वामिति पुनर्वचनमन्यव्यावृत्तिविशिष्टं त्वदर्थं लक्षयति । एवं वच्मीत्यनेनैव कर्तरि लब्धेऽस्मीति पुनर्वचनम्[2] । तथा विदुषां समवाय इत्यनेनैव वक्तुः प्रतिपादने सिद्धे पुनर्वच्मीतिवचनमुपदिशामीति वचनविशेषरूपमर्थं लक्षयति । एतानि चैं[3] स्वातिशयं व्यञ्जयन्ति । एतेन मम वचनं तवात्यन्तं हितं तदवश्यमेवं[4] कर्तव्यमित्यभिप्रायः । तदेवमयं वाक्यगतोऽर्थान्तरसंक्रमितवाच्यो ध्वनिः ।

अविवक्षितेति । वाक्ये वाक्य एव । तदन्ये उभयशक्त्युत्थादन्ये । **धन्य इति** । युवजनमोहनविद्या । विद्येव युवजनमोहिनीत्यर्थः । यद्यपि 'कदली 'कदली–' इत्यादौ पदगतोऽर्थान्तरसंक्रमितवाच्यार्थध्वनिरुदाहृत एव तथाप्युदाहरणान्तरदर्शनमेतदृढप्रतिपत्तये । **त्वामस्मीति** । अस्मि अहम् । समवायः संघः । आत्मीयां आत्मने हिताम् । तत्तस्मात् । लक्षणाबीजमन्वयानुपपत्तियोगित्वं प्रदर्श्य लक्ष्यार्थं व्यङ्ग्यार्थं च दर्शयति—**अत्रेति । अस्मीति पुनर्वचनमिति** । 'हितकारिमदर्थं लक्षयति' इति शेषः । सर्वत्र मुख्यार्थस्याभेदः संबन्धः । एतानि अन्यव्यावृत्तिविशिष्टत्वादिवस्तूनि । **स्वातिशयमिति** । त्वत्पदार्थस्य वादजल्पादिक्षमत्वम् । मत्पदार्थस्यात्यन्तहितैषित्वम् । उपदेशस्यानुपेक्षणीयत्वमतिशयः । प्रत्येकपदव्यङ्ग्यत्वं प्रदर्श्य वाक्यव्यङ्ग्यं दर्शयति—**एतेनेति** । उक्तवाक्येनेत्यर्थः । 'अभिप्रायः प्रतीयते'

---

1. **तदन्ये इति** । अर्थान्तरसंक्रमितवाच्यादयः सप्तदशभेदाः पद वाक्ये च भवन्तीत्यर्थः । अत्रेदं बोध्यम्—यत्रैकस्यैव पदस्य प्राधान्यन व्यङ्ग्यार्थोपस्थितावानुगुण्यं परेषां तु सहकारिमात्रं तत्रैव पदगतत्वम् । नानापदानां तथारूपत्वे तु वाक्यगतत्वमिति ॥

---

१. 'तत्र–' इत्यारभ्य 'प्रवन्धेऽपि मतः'–इति कारिकान्तः प्राग्व्याख्यामागो नास्ति ग-पुस्तके. २. 'समुदायः' घ. ३. 'आदाय' घ. ४. 'अन्यव्यावृत्तिविशिष्टं मदर्थं लक्षयति' इति घ-पुस्तकेऽधिकम्. ५ 'समुदाय' घ. ६. 'अर्पयति' क. ७. 'लक्षितानि' घ. 'लक्ष्यमाणस्य' क. ८. 'अतिशयं' क. ९. 'एतत्' घ.

अत्यन्ततिरस्कृतवाच्यः पदगतो यथा—'निःश्वासान्धः—' इत्यादि । वाक्यगतो यथा—'उपकृतं बहु तत्र—' इत्यादि । अन्येषां वाक्यगतत्वे उदाहृतम् ।

पदगतत्वं यथा—

'लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः ।
तदा सुधास्यन्दमभूदधुना तु ज्वरो महान् ॥'

अत्र लावण्यादीनां तादृगनुभवैकगोचरताव्यञ्जकानां तदादिशब्दानामेव प्राधान्यम् । अन्येषां तु तदुपकारित्वमेवेति [1]तन्मूलक एव ध्वनिव्यपदेशः ।

इति शेषः । **उपकृतमिति** । व्याख्यातमिदं प्राक् । अत्र लाक्षणिकपदानामेकवाक्यस्थत्वाद्वाक्यत्वेनैव व्यञ्जकत्वम् । यद्यप्युपकृतादिलाक्षणिकपदानां प्रत्येकवाक्यस्थत्वं तथापि महावाक्यगतत्वेनैकवाक्यस्थत्वं वेद्यम् । अन्येषामसंलक्ष्यक्रमव्यङ्ग्यादीनाम् । **उदाहृतमिति** । निरुक्तरसाद्युदाहरणमेव तदुदाहरणमित्यर्थः । असंलक्ष्यक्रमव्यङ्ग्यं पदप्रकाश्यमाह—**लावण्यमिति** । कस्यचिद्विप्रलम्भवर्णनमिदम् । सर्वावयवगतो विदग्धनयनोत्सवहेतुः कोऽप्यतिशयो लावण्यम् । प्रत्येकमवयवानां संस्थानसौभाग्यं कान्तिरिति चण्डीदासः । रूपं सौन्दर्यम् । तदा नायिकासंनिधानसमये सुधास्यन्दं सुखातिशयजनकम् । अधुना नायिकाविच्छेददशायां ज्वरः संतापजनकः । विभावादिव्यङ्ग्ये रसे तदादिपदानां व्यञ्जकत्वमुपपादयति—**अत्रेति** । अनुभवैकगोचरताव्यञ्जकानामनिर्वचनीयत्वव्यञ्जकानामत्युत्कृष्टविप्रलम्भव्यञ्जने प्राधान्यम् । अन्येषां विभावादीनां लावण्यादीनां वा तदुपकारित्वं तदादिपदसहकारित्वमिति हेतोस्तन्मूलक एव पदमूलक एव । न तु वाक्यमूलकः । 'प्रधाने हि व्यपदेशा भवन्ति' इति न्यायादित्यर्थः । अत्यन्तसंतोषसंपादकवस्तुस्मरणाद् विरहिणां दुःखातिशयो भवतीति विप्रलम्भातिशयो व्यज्यत इत्येतत्पदगतासलक्ष्यक्रमव्यङ्ग्यध्वनेरुदाहरणमुपपन्नम् । ननु तदादिपदानामनुभवगोचरेऽभिधैव कथं व्यञ्जनेति चेत्, न । अनुभवैकगोचरतेत्यनेनानिर्वचनीयत्वस्य विवक्षणात् । अत एव चण्डीदासः—'अनुभवैकगोचरास्त-

---

1. **तन्मूलक इति** । काव्यानां शरीरिणामिव संस्थानविशेषावच्छिन्नसमुदायसाध्यापि चारुत्वप्रतीतिरन्वयव्यतिरेकाभ्यां भागेषु कल्प्यत इति पदानामपि व्यञ्जकत्वमुखेन व्यवस्थितो ध्वनिव्यवहार इति व्यक्तं ध्वन्यालोके । प्रदीपकृताप्युक्तम्—ननु पदस्य व्यञ्जकत्वे किमायातम् । वाक्यरूपस्य काव्यस्य ध्वनित्वम् । कथं वा पदमात्रस्य व्यञ्जकत्वे वाक्यस्यैव समस्तस्य चारुतेति चेत्, उच्यते—पदप्रकाश्यत्वं न पदमात्रस्य व्यञ्जकतया, किं तु तस्य प्राधान्येन । अविवक्षितवाच्ये पदमात्रस्य व्यञ्जकत्वेऽपि यद्वाक्यवर्तिशब्दस्यार्थस्य वा कस्याप्यतिशयितार्थव्यञ्जकत्वं तद्वाक्यस्यैव ध्वनित्वमित्युपगमान्न कश्चिद्दोषः । एकदेशस्थितेन च तादृशपदेन समस्तमेव वाक्यं चारुतामुपगच्छतीति । कामिनीवैकावयवस्थेन भूषणेन ॥

तदुक्तं ध्वनिकृता—

'[1]एकावयवसंस्थेन भूषणेनेव कामिनी ।
पदद्योत्येन सुकवेर्ध्वनिना भाति [2]भारती ॥'

एवं भावादिष्वप्यूह्यम् ।

'भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।
कस्य [3]नानन्दनिस्यन्दं विदधाति सदागमः ॥'

तत्र सदागमशब्दः संनिहितमुपनायकं प्रति सच्छास्त्रार्थमभिधाय सतः पुरुषस्यागम इति वस्तु व्यनक्ति । ननु सदागमः सदागम इवेति न कथमुपमाध्वनिः । सदागमशब्दयोरुपमानोपमेयभावाविवक्षणात् ।

त्कालचमत्कारिणो निर्वक्तुमशक्याः सर्वस्वव्ययप्राणपणादिभिरपि प्रार्थनीयाः' इति व्याचकार । नन्वितरसाच्यिं विना पदस्य व्यञ्जकत्वं तावन्न संभवति तत्र प्राधान्याप्राधान्यविवेचनमकिंचित्करम् । तथा सति सर्वत्र वाक्यस्यैव व्यञ्जकत्वमुपपन्नं पदगतध्वनिप्रभेदाङ्गीकारस्तु प्राचीनमतानुसारेणैवेत्यभिप्रायेण प्राचीनमतमुपन्यस्यति—**तदुक्तमिति । एकावयवेति** । नासिकास्थगजमुक्तादिनेत्यर्थः । पदद्योत्येन पदव्यङ्ग्येन ध्वनिना अर्थेन । **भावादिष्वपीति** । पदप्रकाश्यभावादिष्वपीत्यर्थः । तेषामप्यसंलक्ष्यक्रमव्यङ्ग्यध्वनित्वेनोदाहर्तुमुचितत्वात् । शब्दशक्तिमूलं पदप्रकाश्यं वस्त्वाह—**भुक्तीति** । जनान्तरसंनिधावुपनायके उपस्थिते पुराणाद्यागमप्रशंसाव्याजेन हर्षं सूचयन्त्या नायिकाया उक्तिरियम् । सदागमः सच्छास्त्रं पुराणादिकं कस्यानन्दनिस्यन्दं न विदधाति । अपि तु सर्वस्यैव । कीदृशः । भुक्तिमुक्त्योः स्वर्गापवर्गयोः कर्ता । एकान्तसमादेशनं तत्त्वोपदेशः तत्परः तत्कारी । व्यङ्ग्यार्थस्तु—सत्पुरुषस्य भवादृशस्यागमनं कस्य मद्विधजनस्य आनन्दनिस्यन्दं न विदधाति । कीदृशः । भुक्तिमुक्त्योः सुरतोपभोगगृहकर्मण्यागयोः कर्ता । एकान्तसमादेशनस्य बहुलीलोपदेशस्य कारकः । ईदृशार्थस्य काव्यव्यङ्ग्यत्वेऽपि तत्र सदागमपदस्य प्रधानत्वादन्येषां सहकारित्वात्पदव्यङ्ग्यव्यपदेश इत्याह—**अत्रेति** । संनिहितं जनान्तरसंनिधावुपस्थितं सच्छास्त्रार्थमभिधाय अभिधया बोधयित्वा । **सदागमशब्दयोरिति** । सदागम इति शब्दः प्रतिपादको ययोस्तयोः । सच्छास्त्रसत्पुरुषागमनयोरित्यर्थः । अविवक्षणे

---

1. **एकेति** । ध्वनिग्रन्थे तु 'विच्छित्तिशोभिनैकेन' इति पाठो दृश्यते ॥

2. **भारतीति** । श्रोत्रग्राह्यवाक्यव्यङ्ग्या स्फोटरूपा भारतीत्यर्थः । यदन्तर्गतेन पदेन बोधोऽतिशयितोऽर्थश्रुतया व्यज्यते तस्यैव ध्वनित्वमिति फलितार्थः ॥

3. **आनन्देति** । आनन्दनिस्यन्दं प्रमोदप्रस्रवणम् । इह 'अनुविपर्यभिनिभ्यः स्यन्देरप्राणिषु' इति सूत्रेण वैकल्पिकषत्वविधानात्पक्षे तदभावः ॥

रहस्यस्य संगोपनार्थमेव हि व्यर्थपदप्रतिपादनं प्रकरणादिपर्यालोचनेन च सच्छास्त्राभिधानस्यासंबन्धत्वात् ।

'अनन्यसाधारणधीर्धृताखिलवसुंधरः ।
राजते कोऽपि जगति स राजा पुरुषोत्तमः ॥'

अत्र पुरुषोत्तमः[1] पुरुषोत्तम इवेत्युपमाध्वनिः । अनयोः शब्दशक्तिमूलौ संलक्ष्यक्रमभेदौ ।

'सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं
यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रागतिः ।

हेतुमाह—**रहस्येति** । उपनायकानुरागस्य गोपनार्थमेव । न तूपमानोपमेयभावबोधनार्थम् । हि यस्माद् व्यर्थशब्दानां प्रतिपादनं प्रयोगः । ननु 'तदर्थं कृतमेतदर्थं भवति' इति न्यायादुपमानोपमेयत्वबोधकः कथं न स्यादित्यत आह—**प्रकरणादीति** । आदिना वयोवस्थादिसंग्रहः । सच्छास्त्राभिधानस्यासंबन्धाच्चेत्यन्वयः । असंबन्धत्वात्प्रकृतानुपयोगित्वात् । तथा च यत्र वाच्यार्थः प्रकृतोपयुक्तो व्यङ्ग्यार्थस्त्वसंबद्धस्तत्रैवागत्या तयोरुपमानोपमेयभावः कल्प्यते । अत्र तु व्यङ्ग्यार्थस्यैव प्रकृतोपयोगित्वं वाच्यार्थस्य तदङ्गत्वमिति न तदवसर इति भावः । शब्दशक्तिमूलं पदप्रकाश्यमलंकारमाह—**अनन्येति** । अनन्यसाधारणा अनन्यतुल्या धीर्यस्य । धृता पालिता धारिता च वसुंधरा येन । पुरुषोत्तम इव विष्णुरिव । नन्वत्र पूर्वार्धेऽपि श्लेषसंभवेन 'दुर्गालङ्घितविग्रह–' इतिवद्वाक्यव्यङ्ग्यमेवोपमानोपमेयत्वमिति चेत्, सत्यम् । अनेकार्थस्य पुरुषोत्तमपदस्य सार्थकत्वाय एकार्थकानामप्यनन्येतिपदानां व्यर्थकत्वं कल्प्यत इति पुरुषोत्तमपदस्यैव प्रधानत्वम् । 'दुर्गालङ्घित–' इत्यादौ तु बहूनामेव पदानां स्वभावत एवानेकार्थकत्वमिति ततोऽस्य भेदः । ननु संज्ञायामेव समासशासनात्कथं पुरुषोत्तमपदस्यानेकार्थत्वम्, न च सप्तमीसमासस्यैव संज्ञायां विधानात्षष्ठीसमासेन पुरुषश्रेष्ठवाचकत्वमिति वाच्यम् । निर्धारणे विहितायाः षष्ठ्याः समासनिषेधात् । उच्यते—पुरुषोत्तमयति संसर्गेण उत्कृष्टं करोतीति व्युत्पत्त्या तस्य पुरुषश्रेष्ठवाचकत्वात् । स्वतःसंभविवस्तुव्यङ्ग्यं वस्तुपदप्रकाश्यमाह—**सायमिति** । उपनायकेन पथ्युपभुक्तां स्नानागतां सखीमुपहसन्त्याः सख्या उक्तिरियम् । उपासितं कृतम् । स्नानमलयजलेपयोः श्रमप्रतिबन्धकत्वं दर्शितम् । सायंपदस्य त्रिमुहूर्तरूपसायाह्नपरत्वे तत्रातपसंभावनया तां वारयति—**पात इति** । अम्बरमणिः सूर्यः । विस्रब्धं स्वच्छन्दं यथा स्यात्तथात्रागतिः । एतेन भयाद्दौत्याद्वा श्रमो नास्तीति दर्शि-

---

1. **समासेति** । 'संज्ञायाम्' इति शास्त्रादित्यर्थः । संज्ञा हि समुदायोपाधिः । तेन नित्यसमास एवायम् । न हि वाक्येन संज्ञा गम्यत इति अकृतसूत्रव्याख्याने वृत्तिकाराः ॥

2. **समासेति** । 'न निर्धारणे' इति सूत्रेण समासप्रतिषेधादित्यर्थः ॥

---

१. 'पुरुषश्रेष्ठः' घ. २. इतोऽग्रे 'श्रेष्ठः' इत्यधिकं क-पुस्तके.

आश्चर्यं तव सौकुमार्यमभितः क्लान्तासि येनाधुना
नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति तेनासितुम् ॥'

[2]अत्र स्वतःसंभविना वस्तुना कृतपरपुरुषपरिचया स्वातासीति वस्तु व्यज्यते। तच्चाधुना क्लान्तासि, न तु पूर्वं कदाचिदपि तवैवंविधः क्लमो दृष्ट इति बोधयतोऽधुनापदस्यैवेतरपदार्थोत्कर्षादधुनापदस्यैव पदान्तरापेक्षया वैशिष्ट्यम्।

'[3]तदप्राप्तिमहादुःखविलीनाशेषपातका।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ॥'

तम्। 'विस्रब्धमन्दा' इत्यपि क्वचित्पाठः। आश्चर्यमदृष्टपूर्वम्, येन सौकुमार्येण अभितो बहिरन्तश्च क्लान्तासि। क्लमज्ञापकमाह—**नेत्रद्वन्द्वमिति**। अमीलनव्यतिकरं मीलनसंपर्करहितम्। आसितुं स्थातुम्। **अत्रेति**। वस्तुना वाक्यार्थेन। ननु तादृशार्थस्य वाक्यार्थव्यङ्ग्यत्वे वाक्यगतध्वनिरेवायं न तु पदगत इत्यत आह—**तच्चेति**। तादृशव्यङ्ग्यं चेत्यर्थः। तद्व्यङ्ग्यमधुनापदस्यैवेत्यन्वयः। अत्र हेतुगर्भं विशेषणमाह—अधुना क्लान्तासीत्यादिबोधयत इति। तथा च तादृशक्लमस्य सौकुमार्यप्रयुक्तत्वे दिनान्तरेऽप्येवं स्यादतोऽधुनापदादाधुनिकक्लमहेतुलाभ इति भावः। ननु तथाप्यधुनापदस्यैवेति नियमः कथमुत्पद्यते। स्वं स्वमर्थं बोधयतां पदान्तराणामपि व्यञ्जनायामुपकारसंभवादित्यत आह—**इतरेति**। अधुनापदस्येतरपदार्थानामुत्कर्षाधानात्तस्यैव पदार्थान्तरापेक्षया वैशिष्ट्यं प्राधान्यम्। अधुनापदार्थप्राधान्येन तावद्वाक्यार्थेन तादृशपदार्थान्तराणामपि परपुरुषपरिचयव्यञ्जकत्वम्। तथाहि—सायमित्यादि। अधुनापदार्थप्रतिसंधानेन सायंतनस्नानस्य निमित्तान्तरानुसंधानप्रतिबन्धादविलम्बितमेव परपुरुषपरिचयं प्रत्याययति। एवं मलयजेनेत्यादि। परपुरुषसंभोगचिह्नगोपनम्, यात इति परपुरुषसंभोगप्रतिबन्धकप्रकाशाभावम्। विस्रब्धमित्यादि। तद्देशे तत्कालिकनायकसत्त्वाभावमधुनापदार्थप्रतिसंधानेनैव प्रत्याययति। अत्रोपहास एव महावाक्यव्यङ्ग्यः। इदं च व्यङ्ग्यं तत्प्रकर्षकमित्यवधेयम्। स्वतःसंभविवस्तुव्यङ्ग्यमलंकारं पदप्रकाश्यमाह—**तदप्राप्तीति**। श्रीकृष्णाप्राप्तीत्यर्थः। **तच्चि-**

---

1. **अमीलनेति**। न विद्यते मीलनस्य मुद्रणस्य व्यतिकरः पौनःपुन्येन प्रवृत्तिः संबन्धो वा यस्मिंस्तथाभूतम् ॥

2. **अत्रेति**। इह शब्दानां परिवृत्तिसहिष्णुत्वादर्थशक्तिमूलत्वमवसेयम्। एवमग्रिमोदाहरणेऽपि ॥

3. **तदिति**। तस्य अप्राप्त्या वियोगेन यन्महादुःखं तेन विलीनानि नष्टानि अशेषाणि पातकानि यस्याः सा। तथा, तस्य चिन्तया ध्यानेन यो विपुलो महानाह्लाद आनन्दस्तेन क्षीणः पुण्यचयः सुकृतसमूहो यस्याः सा। निर्गत उच्छ्वासः प्राणोत्क्रमणं यस्याः सा, तस्या भावस्तत्ता तया। प्राणोत्क्रमणं विनेत्यर्थः। 'न तस्य प्राणा उत्क्रामन्तीहैव समवलीयन्ते' इति श्रुतेः ॥

चिन्तयन्ती जगत्सूतिं परं ब्रह्मस्वरूपिणम् ।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका ॥' (युग्मकम्)

अत्राशेषचयपदप्रभावादनेकजन्मसहस्रभोग्यदुष्कृतसुकृतफलराशितादात्म्याध्यवसिततया भगवद्विरहदुःखचिन्ताह्लादयोः प्रत्यायनमित्यतिशयोक्तिद्वयप्रतीतिरशेषचयपदद्वयद्योत्या । अत्र च व्यञ्जकस्य कविप्रौढोक्तिमन्तरेणापि संभवात्स्वतः संभविता ।

न्तेति । श्रीकृष्णचिन्तेत्यर्थः । जगतः सूतिर्जन्म यस्मात्तं परं सर्वोत्कृष्टं ब्रह्मस्वरूपिणं श्रीकृष्णं निरुच्छ्वासतया निरुद्धप्राणतया अन्या या गुरुजनोपरोधेन श्रीकृष्णसमीपं गन्तुमशक्ता सा श्रीकृष्णवियोगेन मुक्तिं गता । मुक्तेत्यर्थः । समस्तपापपुण्यक्षयादेव मुक्तिरित्युपपादयति—तदप्राप्तीति । तदप्राप्तिजन्येत्यर्थः । तच्चिन्तेति । तच्चिन्ताजन्येत्यर्थः । भोगेन हि पापपुण्यक्षयो भवति । तल्लाभायाह—महादुःखेति, विपुलाह्लादेति च । तयोरुपभोगेनेति बोध्यम् । पापपुण्ययोः सामस्त्यलाभश्च अशेषचयपदाभ्याम् । अशेषचयपदयोः प्रभावात्सामर्थ्यात्कारणसामस्त्येन फलसामस्त्यप्रतीतिरुचितैवेति भावः । हेतुरयं तादात्म्याध्यवसाये । दुष्कृतसुकृतफलराशिर्दुःखाह्लादप्रचयः । तादात्म्याध्यवसितयोरभेदारोपविषययोः प्रत्यायनं प्रकरणवैशिष्ट्येन प्रतिपादनम् । **अतिशयोक्तीति** । 'विषयनिगरणेन विषयितादात्म्यारोपोऽतिशयोक्तिः' इति तल्लक्षणम् । यथा—'कथमुपरि कलापिनां कलापः—' इत्यादि । अत्र प्रकरणवैशिष्ट्याद्विषयस्य केशपाशस्य लाभ इति विषयनिगरणम् । अशेषचयपदद्वयद्योत्या अशेषचयपदव्यञ्जनाजन्या । अयं भावः—प्रकृतेऽभिधेयबोधानन्तरं सुखदुःखभोगविशेषेण कथं यावत्पुण्यपापक्षय इत्यनुपपत्तिं प्रतिसंदधतो व्यञ्जनया यावत्सुखदुःखभोगजन्याशेषपुण्यपापक्षयवतीति प्रतीतिर्जायते । अत्राशेषचयपदाभ्यां विषयिणः सुखदुःखराशेर्वाच्यत्वव्यञ्जनया झटिति प्रतीतिः प्रकरणवैशिष्ट्येन प्रकृतयोर्भगवद्विरहदुःखचिन्ताह्लादयोः प्रतीतिरित्यतिशयोक्तिद्वयस्य व्यङ्ग्यत्वम् । न चाध्यवसायमात्रेण कथमनुपपत्तिनिरास इति वाच्यम् । एककार्यकारित्वरूपसादृश्यपर्यवसायेन तन्निरासात् । तथा च भवच्चिन्ताविरहाभ्यां तथा सुखदुःखे जनिते यदुपभोगेन यावत्सुखदुःखभोगनाश्ययोः सुकृतदुष्कृतपुञ्जयोर्नाशो जनितः । एतत्सूचनाय महत्त्वं विपुलत्वं च दुःखाह्लादयोर्विशेषणमुपन्यस्तम् । केचित्तु—नेदुपयोगित्वेन प्रकृतस्य समस्तपापफलराशेः पापविशेषफलेनप्रकृतेन भगवद्विरहमहादुःखेन, मुक्त्युपयोगित्वेन प्रकृतस्य समस्तपुण्यफलराशेः पुण्यविशेषफलेनाप्रकृतेन तच्चिन्ताविपुलसुखेन सहाभेदप्रतीतिरतिशयोक्तिः । निगीर्णे प्रकृते शब्दोपात्तेनाप्रकृतेन सहाभेदप्रतीतिरतिशयोक्तिरिति तल्लक्षणात्' इत्याहुः । तन्न । विषयिणि प्रसिद्धधर्मस्य विषये प्रतीतिरेवातिशयोक्तिः फलम्, न तु विषये प्रसिद्धस्य विषयिणि प्रतीतिः । एवं स्थितावतिशयोक्तिद्वयस्य निष्फलत्वापातात् विषये प्रसिद्धस्य यावत्पुण्यपापनाशकत्वस्य विषयिणि प्रतीतेरसंभवेनाभिप्रेतानुपपत्तिनिरासस्यायोगाद्विष-

'पश्यन्त्यसंख्यपथगां त्वद्दानजलवाहिनीम् ।
देव त्रिपथगात्मानं गोपयत्युग्रमूर्धनि[1] ॥'

यिणः शब्दोपात्तत्वेन 'कथमुपरि कलापिनां कलापः–' इति तद्वाच्योपपत्तावतिशयोक्तिद्वयस्य व्यङ्ग्यत्वायोगाच्च । नचाशेषचयपदप्रभावेण विषयस्य व्यङ्ग्यत्वेनैव तस्य व्यङ्ग्यत्वमिति वाच्यम् । तथा सति 'कथमुपरि–' इत्यादौ प्रकरणवैशिष्ट्येन विषयस्य व्यङ्ग्यतयातिशयोक्तिर्व्यङ्ग्यत्वापातात् । व्यञ्जकस्य वाक्यार्थस्य । स्वतःसंभव्यलंकारव्यङ्ग्यवस्तुपदप्रकाश्यं वस्तु यथा—'क्षणदासावक्षणदा वनमवनं व्यसनमव्यसनम् । बत वीर तव द्विषतां पराङ्मुखे त्वयि पराङ्मुखं सर्वम् ॥' क्षणदा रात्रिः । अक्षणदा अनुत्सवकरी । व्यसनं दुःखम् । अवीनां मेषाणामिव असनमितस्ततो भ्रमणं च । पराङ्मुखे विपरीते । पराङ्मुखं विपरीतम् । अत्र शब्दशक्तिमूलविरोधिनिर्वाह्येन चतुर्थपादगतेनार्थान्तरन्यासेन विधिरपि त्वामनुवर्तत इति सर्वपदद्योत्यं वस्तु स्वतःसंभव्यलंकारव्यङ्ग्यश्चोऽलंकारः । पदद्योत्यो यथा—'[2]तव पत्यधरस्तन्वि म्लानपद्मदलं प्रगे । इति श्रुत्वा नववधूः करोति मुखमानतम् ॥' अत्र रूपकालंकारेण त्वयास्यास्यन्तचुम्बनं कृतं येन म्लानलमिति काव्यलिङ्गालंकारो म्लानादिपदद्योत्यः । कविप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यं वस्तुपदप्रकाश्यं यथा—'[3]चन्द्रधवलासु रात्रिषु धनुरपि कुसुमं समास्फाल्य । एकच्छत्रमनङ्गस्त्रिभुवनराज्यं करोत्यनिशम् ॥' अत्रानङ्गस्य चापास्फालनपूर्वकत्रिभुवनाधिकारकरणस्यालीकत्वात्कविप्रौढोक्तिसिद्धेन तेन वस्तुना येषां कामिनामसौ राजा तेषां न कोऽपि तदादेशपराङ्मुख इति जाग्रद्भिरुपभोगपरैः केवलं तैर्निशातिवाह्यत इति त्रिभुवनराज्यपदद्योत्यं वस्तु व्यज्यते । कविप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यश्चोऽलंकारः पदप्रकाश्यो यथा—'निशितशरधियार्पयत्यनङ्गो दृशि सुदृशः स्खलं वयस्यराले । दिशि निपतति यत्र सा च तत्र व्यतिकरमेत्य समुन्मिषन्त्यवस्थाः ॥' अवस्थाः प्रागुक्ता विरहकालीना दश कामदशाः । अत्र क्रमिकाणां युगपदुन्मेषणरूपं वस्तु वाक्यार्थः स्वतोऽसंभवित्वात्कविप्रौढोक्तिसिद्धस्तेन व्यतिकरपदद्योत्यो विरोधो व्यज्यते । कविप्रौढोक्तिसिद्धालंकारव्यङ्ग्यं वस्तुपदप्रकाश्यं यथा—'[4]संतापभाजा हृदयेन हारो निवार्यमाणोऽपि मुहुर्भृगाक्ष्याः । वक्षोजमारस्य वयस्यभावाद्विशुद्धजातिर्न चलत्यमुष्मात् ॥' विशुद्धजातिर्विशुद्धमुक्ताजातिघटितः । अत्र विशुद्धजातित्वहेत्वलंकारेणानवरतकल्पमान एवास्त इति न चलतीति पदव्यङ्ग्यं वस्त्वनपगमनहेतुत्वस्यावान्तरत्वेनारोप्यमाणत्वात्कविप्रौढोक्तिसिद्धत्वम् । कविप्रौढोक्ति

---

1. **उग्रेति** । उग्रमूर्धनि शिवशिरसि । अत्रोग्रपदेन मूर्ध्नोऽतिशयितगोपनसमर्थदेशत्वं द्योत्यते ॥

2. **तवेति** । 'तुह वल्लहस्स गोसम्मि–' इति प्रकाशोदाहृतसर्वविपुलायाश्छायाभूतोऽयं श्लोकः ॥

3. **चन्द्रेति** । 'राईसु चन्दधवलासु–'इति प्रकाशोदाहृतसर्वविपुलायाश्छायाभूतोयम् ॥

4. **संतापेति** । 'वारिज्जन्तो वि उणो–' इति प्रकाशोदाहृतगीतेश्छायाभूतमदः पद्यम् ॥

ईदं मम । अत्र पश्यन्तीति कविप्रौढोक्तिसिद्धेन काव्यलिङ्गालंकारेण न केऽप्यन्ये दातारस्तव सदृशा इति व्यतिरेकालंकारोऽसंख्यपद्योत्यः । एवमन्येष्वप्यर्थशक्तिमूलसंलक्ष्यक्रमभेदेषूदाहार्यम् ।

तदेवं ध्वनेः पूर्वोक्तेष्वष्टादशसु भेदेषु मध्ये शब्दार्थशक्त्युत्थो व्यङ्ग्यो वाक्यमात्रे भवन्नेकः । अन्ये पुनः सप्तदश वाक्ये पदे चेति चतुस्त्रिंशदिति पञ्चत्रिंशद्भेदाः ।

प्रबन्धेऽपि मतो धीरैरर्थशक्त्युद्भवो ध्वनिः ॥ १० ॥

प्रबन्धे महावाक्ये । अनन्तरोक्तद्वादशभेदोऽर्थशक्त्युत्थः ।

ङ्कालंकारव्यङ्ग्यमलंकारं पदप्रकाश्यमाह—**पश्यन्तीति** । अत्र दानजलस्य नदीरूपलं स्वतोऽसंभवि कविप्रौढोक्त्या सिद्धम् । अत्रोत्प्रेक्षापि व्यङ्ग्या । **एवमन्येष्वपी-ति** । कविप्रौढोक्तिसिद्धवस्त्वलंकारव्यङ्ग्येषु मयोदाहृतं कविनिबद्धवक्तृप्रौढोक्तिसिद्धवस्त्वलंकारव्यङ्ग्येषु चतुर्षु भेदेषु । यथा मम—'सुतरामक्षमस्तत्र पञ्चभिः पुष्पपत्रिभिः । युवत्यामोघया शक्त्या जगद्विध्यति मन्मथः ॥' अत्र नायिकारूपशक्त्या मन्मथस्य जगद्वेधनमसंभवि कविनिबद्धप्रौढोक्तिसिद्धं वस्तु तेन नायिकायाः सर्वमनोहरस्वरूपं वस्तु जगत्पदद्योत्यं प्रकाश्यते । 'यो व्रजत्यतितरां सहायतां हन्त विश्वविजये मनोभुवः । तं निशम्य मधुरं पिकस्वरं कः प्रयाति धृतिमानतानने ॥' अत्र पिकस्वरसहायस्मरस्य विश्वजयो वस्तु कविनिबद्धप्रौढोक्तिसिद्धं तेन मानभङ्गकारणे पिकस्वरे सत्यपि मानो न भग्न इति विशेषोक्तिरलंकार आनत इतिपदद्योत्यो व्यज्यते । 'संतप्तचामीकरचारुवर्णे कर्णे निबद्धं नवकर्णिकारम् । तदेव शस्त्रं मदनस्य जैत्रं जगत्त्रयं तेन जितं भवत्या ॥' अत्र नायिकाकर्णार्पितं नवकर्णिकारमेव मदनशस्त्रमिति रूपकं कविनिबद्धप्रौढोक्तिसिद्धं कर्णिकारेण तव मुखस्य तादृशी शोभा जाता यया वीतरागा अपि स्मरपराधीना भवन्तीति वस्तु जगत्त्रयपदप्रकाश्यं व्यज्यति । 'यशश्चन्द्र इवाभाति राजंस्ते दानसंभवम् । दैन्यं न हन्यते हन्त तेन दृष्टिविरोधि मे ॥' अत्र यशसः शुक्लासंभवात्तेन चन्द्रोपमानमप्यसंभवि कविनिबद्धप्रौढोक्तिसिद्धं तेन दैन्यमेव तम इति रूपकं दृष्टिपदद्योत्यं व्यज्यते । स्वतःसंभविवस्तु-

---

1. **प्रबन्ध इति** । प्रबन्धश्च संघटितनानावाक्यसमुदायः । स च ग्रन्थरूपस्तदवान्तरप्रकरणरूपश्चेति ॥

---

१. 'इदं मम' इति क-पुस्तके नास्ति. २. क-पुस्तके 'पूर्व' नास्ति. ३. 'अष्टादशभेदेषु' क-४ क-पुस्तके प्रथमान्तः पाठः. ग-पुस्तके तु 'प्रबन्धे–' इत्यादिः प्रकृतकारिकाव्याख्या नास्ति.

यथा महाभारते[1] गृध्रगोमायुसंवादे—

'अलं स्थित्वा श्मशानेऽस्मिन्गृध्रगोमायुसंकुले ।
कङ्कालबहुले[1] घोरे सर्वप्राणिभयंकरे ॥
न चेह जीवितः कश्चित्कालधर्ममुपागतः ।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥'

इति दिवा[2] प्रभवतो गृध्रस्य श्मशाने मृतं बालमुपादाय तिष्ठतां[3] तं परित्यज्य गमनमिष्टम् ।

'आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत सांप्रतम् ।
बहुविघ्नो मुहूर्तोऽयं जीवेदपि कदाचन ॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम् ।
गृध्रवाक्यात्कथं मूढास्त्यजध्वमविशङ्किताः ॥'

इति निशि समर्थस्य गोमायोर्दिवसे परित्यागोऽनभिलषित इति वाक्यसमूहेन द्योत्यते । अत्र स्वतःसंभवी व्यञ्जकः । एवमन्येष्वेकादशभेदेषूदाहार्यम् । एवं वाच्यार्थव्यञ्जकत्वे उदाहृतम् ।

लक्ष्यार्थस्य यथा—'निःशेषच्युतचन्दनम्—' इत्यादि । व्यङ्ग्यार्थस्य यथा—'उअ णिच्चल—' इत्यादि । अनयोः स्वतःसंभविनोर्लक्ष्यव्यङ्ग्यार्थौ व्यञ्जकौ । एवमन्येष्वेकादशभेदेषूदाहार्यम् ।

व्यङ्ग्यवस्तुप्रबन्धप्रकाश्यमाह—**अलं स्थित्वेति** । श्मशाने मृतबालकं त्यजतस्तद्बन्धून्प्रति गृध्रस्य वचनमिदम् । न स्थेयमित्यर्थः । शरीरास्थि कङ्कालस्तेन बहुले व्याप्ते । कालधर्मं मृत्युम् । दिवा प्रभवतो दिने भक्षणक्षमस्य । **गमनमिष्टमिति** । वाक्यसमूहेन द्योत्यत इत्यग्रेणान्वयः । गोमायूक्तप्रबन्धस्य तादृशव्यङ्ग्यमाह—**आदित्योऽयमिति** । आदित्यसत्त्वाद् युष्माकं रात्रिंचरतोऽपि भीतिर्नास्तीति सूचितम् । स्नेहकारणं स्थितिरेव । अयं संध्यासमयासन्नो मुहूर्तो दारुणतया बहुविघ्नः संभावितभूताद्यावेशः । तदवगमान्मुहूर्तान्तरे जीवनस्य संभावना दर्शिता । तत्संभावनायां हेतुमाह—**अमुमिति** । कनकवर्णाभत्वे रूपविपर्यासाभावाज्जीवनसंभावना । मूढाः । 'बालाः' इति पाठे शिशुबुद्ध्य इत्यर्थः । समर्थस्य भक्षणक्षमस्य । **स्वतःसंभवीति** । वाक्यार्थ इति शेषः । एवं निरुक्तध्वनिसमूहः । **लक्ष्यार्थस्येति** । 'व्यञ्जकत्वे' इति शेषः । एवमग्रेऽपि । **एवमन्येष्विति** । एकादशत्वं लक्ष्यव्य-

---

1. **महाभारत इति** । शान्तिपर्वणि आपद्धर्मपर्वणि त्रिपञ्चाशदधिकशततमेऽध्याये ॥

---

१. 'बहुले' घ. २. 'दिवसे शक्तस्य' क-घ. ३. 'दिवसे' इत्यधिकं घ-पुस्तके.

पदांशवर्णरचनाप्रबन्धेष्वस्फुटक्रमः ।

असंलक्ष्यक्रमव्यङ्ग्यो ध्वनिस्तत्र पदांशप्रकृतिप्रत्ययोपसर्गनिपातादिभेदादनेकविधः । यथा—

'चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।
करं व्याधुन्वन्त्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती ॥'

अत्र 'हताः' इति न पुनः 'दुःखं प्राप्तवन्तः' इति हन्प्रकृतेः ।

'मुहुरङ्गुलिसंवृताधरौष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् ।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु ॥'

अत्र 'तु' इति निपातस्यानुतापव्यञ्जकत्वम् ।

ङ्ग्ययोः प्रत्येकापेक्षया । उभयापेक्षया तु द्वात्रिंशतमिति द्रष्टव्यम् । 'अस्फुटक्रमः' इत्यस्य विवरणम् 'असंलक्ष्यक्रमव्यङ्ग्यः' इति । **चलापाङ्गामिति** । भ्रमरं प्रति दुष्यन्तस्योक्तिरियम् । वेपथुमतीमतिचपलाम् । करं व्याधुन्वन्त्याः शकुन्तलायाः । भ्रमरनिराकरणाय करव्याधूनम् । रतेः सुरतेच्छायाः सर्वस्वं प्रधानकारणम् । यद्वा रतौ सर्वस्वमिवादरणीयम् । यद्वा रतेः कामपत्न्याः सर्वस्वं युवजये परमसहायम् । वयं तदृष्टिस्पर्शादिवञ्चिताः । तत्त्वान्वेषात् तत्त्वपरीक्षातः । हता हतप्रायाः । अतिपीडिता इत्यर्थः । कृती धन्यः । यद्वा तत्त्वान्वेषात् तत्तत्कर्माकर्तृत्वस्यान्वेषात् मुहुर्विसंवादीच्छातो वयं हता इत्यर्थः । अत्र विप्रलम्भोत्कर्षो दुःखातिशयेन व्यज्यते । दुःखातिशयश्च हता इत्यनेन व्यज्यते । **अत्रेति** । 'हताः' इति प्रयुक्तम्, न तु 'दुःखं प्राप्तवन्तः' इति प्रयुक्तम् । तथात्वे प्रकृतोपयुक्तस्य दुःखातिशयस्य प्रतीतिर्न स्यात् । **हन्प्रकृतेरिति** । व्यञ्जकत्वमिति शेषः । **मुहुरिति** । गौतम्या शकुन्तलायां नी-

---

1. **चलेति** । हे मधुकर, वयमेवंविधाभिलाषचाटुप्रवणा अपि तत्त्वान्वेषणाद्वस्तुवृत्तेऽन्विष्यमाणे हता आयासमात्रपात्रीभूता जाताः । त्वं खल्विति निपातेनायत्नसिद्धं तवैव चरितार्थत्वमिति । तथाहि—कथमेतदीयकटाक्षगोचरा भूयास्म, कथमेषामसदभिप्रायव्यञ्जकं रहोवचनमाकर्ण्यात्, कथं हठादनिच्छन्त्या अपि परिचुम्बनं विधेयास्मेति यदस्माकं मनोराज्यपदवीमधिशेते तत्तवायत्नसिद्धम् । भ्रमरो हि नीलोत्पलधिया तदाशङ्काकातरां दृष्टिं पुनः पुनः स्पृशति । श्रवणावकाशपर्यन्तत्वाच्च नेत्रयोरुत्पलशङ्कानपगमात्तत्रैव ध्वन्यमान आस्ते । सहजसौकुमार्यत्रासकातरायाश्च रतिनिधानभूतं विकसितारविन्दामोदमधुरमधरं पिबतीति । अत्र हि भ्रमरस्वभावोक्तिरलंकारो रसानुगुणः ॥

---

१. 'असंलक्ष्य–' इत्यादिः 'एवमन्यत्र' इत्यन्तः पाठो ग-पुस्तके नास्ति. २ घ-पुस्तके तु 'पदांश–' इत्यत्र 'पदांशकः' इति पाठं प्रकल्प्य तदन्तं गद्यं श्लोकीकृत्य 'पदांशवर्ण–' इति कारिकायामुत्तरार्धत्वेन न्यस्तम्.

'न्यक्कारो ह्ययमेव मे यदरयः—' इत्यादौ 'अरयः' इति बहुवचनस्य, 'तापसः' इत्येकवचनस्य, 'अत्रैव' इति सर्वनाम्नः, 'निहन्ति' इति 'जीवति' इति च तिङः, 'अहो' इत्यव्ययस्य, 'ग्रामटिका' इति करूपतद्धितस्य, 'विलुण्ठन' इति व्युपसर्गस्य, 'भुजैः' इति बहुवचनस्य व्यञ्जकत्वम् ।

'आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा
नासाग्रे नयनं तदेतदपरं यच्चैकतानं मनः ।
मौनं चेदमिदं च शून्यमधुना यद्विश्वमाभाति ते
तद्भूयाः सखि योगिनी किमसि भोः किंवा वियोगिन्यसि ॥'

तायां दुष्यन्तस्यानुतापवर्णनमिदम् । प्रतिषेधाक्षरेण मैवं कुर्विति प्रतिषेधवचसा विक्लवं व्याकुलमत एवाभिरामम् । तादृशप्रतिषेधस्य विधिपर्यवसन्नतया तत्प्रयोगेण मुखस्य रमणीयत्वमिति भावः । अंसे स्कन्धे विवर्तयितुं परिवृत्य स्थातुं शीलमस्य । कथमपि चक्षुःपरागापसारणच्छलेन उन्नमितमङ्गुलिभ्यामूर्ध्वीकृत्य धृतम् । **न्यक्कार इति** । व्याख्यातमिदं प्राक् । बहुवचनस्येत्यादिषष्ठ्यन्तानां व्यञ्जकत्वमित्यग्रेतनेनान्वयः । अरीणां प्रतीकाराक्षमत्वं तापसादेरेकत्वख्यापनेन । नैकतापसनिग्रहेण सर्वरक्षा भवति सोऽपि सर्वप्राणैः कर्तुमशक्य इति । इदंपदेन रिपुनिग्रहे दूरगमनादिव्यापारो नास्ति तथापि स कर्तुं न शक्यत इति । अपकारस्य वर्तमानत्वख्यापनेन विलम्बासहिष्णौ रिपुनिग्रहे नास्माकमुद्यमः । तथेति जीवनस्य वर्तमानत्वख्यापनेन प्रागेव मरणमुचितं येनैतादृशः पराभवो मा भूदिति । जीवनस्य साश्चर्यत्वख्यापनं मानिनां तादृशपराभवे जीवनमत्यन्तमनुचितमिति । स्वर्गस्य क्षुद्रत्वख्यापनेन यस्य स्वर्गविलुण्ठनेनापि श्लाघा नास्ति स तावदेकतापसेन पराभूयते अहो दुर्दैवविलसितमेतदिति । स्वर्गलुण्ठनस्य विशिष्टत्वख्यापनेन स्वपतेरत्यन्ततिरस्कारिणो रावणस्य एकतापसेन पराभवो दुर्दैवेनोपपद्यत इति भुजानां बहुत्वख्यापनेन रिपुनिग्रहे रावणस्याधिकसाधनसत्त्वेऽपि स कर्तुं न शक्यत इति व्यज्यते । यद्यप्येते संलक्ष्यक्रमव्यङ्ग्यानां वस्तुध्वनय एव तथाप्येतेऽसंलक्ष्यक्रमव्यङ्ग्यस्य निर्वेदाख्यभावस्य परिपोषका इति तेनैव व्यपदेश इति भावः । **आहार इति** । विरहिणीमुपहसन्त्याः सख्या उक्तिरियम् । विरती रागाभावः । एकतानमनन्यवृत्ति । योगिन्या विश्वं शून्यमसद्भूतं प्रतिभाति । वियोगिन्याश्च सदपि विश्वं प्रकृतानुपयोगित्वेनासदिव प्रतिभाति । विशेषणस्येत्यनन्तरं तदेतदिति बुद्धिस्थपरामर्शिनः सर्वनाम्नः अपरमिति विशेषणस्येत्य-

---

1. **ग्रामटिकेति** । अल्पग्रामवाचको हि ग्रामटीशब्दः, गौडभाषायां 'गॉवटी' इति ख्यातः । ततः 'अज्ञाते' इति 'कुत्सिते' इति वा कप्रत्यये 'केऽणः' इति ह्रस्वे निष्पन्नो ग्रामटिकाशब्दः । अत्यन्तक्षुद्रग्राम इति तदर्थः । नागोजिभट्टास्तु—'तद्धिताः' इति बहुवचनबोध्यष्टिकच्प्रत्ययः' इत्याहुः ॥

अत्र तु 'आहारे' इति विषयसप्तम्याः, 'समस्त' इति 'परा' इति च विशेषणस्य, 'मौनं चेदम्' इति प्रत्ययपरामर्शिनः सर्वनाम्नः, 'आभाति' इत्युपसर्गस्य, 'सखि' इति प्रणयस्मारणस्य, 'असि भोः' इति सोपहासोत्प्रासस्य, 'किंवा' इत्युत्तरपक्षदार्ढ्यसूचकस्य वाशब्दस्य, 'असि' इति वर्तमानोपदेशस्य तत्तद्विषयव्यञ्जकत्वं सहृदयसंवेद्यम् ।

वर्णरचनयोरुदाहरिष्यते । प्रबन्धे यथा—महाभारते शान्तः । रामायणे करुणः । मालतीमाधवरत्नावल्यादौ शृङ्गारः । एवमन्यत्र ।

तदेवमेकपञ्चाशद्भेदास्तस्य ध्वनेर्मताः ॥ ११ ॥

वगन्तव्यम् । प्रतीयत इति प्रत्ययः प्रतीतिविषयः, तत्परामर्शिनस्तद्वाचकस्य । क्वचिच्च 'प्रत्यक्षपरामर्षिणः' इत्यपि पाठः । प्रणयस्मारणस्य प्रेमसूचकस्य । सोत्प्रासस्य उपहाससूचकस्य । उत्तरपक्षस्य वियोगिनीति पक्षस्य दार्ढ्यं प्रामाण्यं तत्सूचकस्य वर्तमानोपदेशस्य वर्तमानकालप्रयोगस्य । **तत्तदिति** । सहृदयनिर्वचनीयेत्यर्थः । तथाहि—आहार इति विषयसप्तम्या आहारविषयकरागाभाव एव । न तु योगिनीवदनिष्टसाधनताज्ञानाद्योगप्रतिकूलाहारान्निवृत्तिः । तदुक्तम्—'नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः' इति । एवं च योगिन्याः प्राणधारणार्थमाहारोऽस्त्येव । तव तु सोऽपि नास्तीति भावः । एवं योगिन्या योगसाधने यदृच्छोपपन्ने च विषये प्रवृत्तिरस्ति । तव तु सर्वथैव विषयान्निवृत्तिरिति । समस्तेत्यादि विशेषणद्वयं व्यञ्जयति—योगिन्या ध्यानसमय एव नासाग्रे नयनं चित्तैकाग्र्यं च । तव तु सर्वदैव तदुभयमिति । तदेतदपरमिति व्यञ्जयति—योगिनी मौनसमये इङ्गितादिना अर्थं बोधयति, तव तु तदपि नास्तीतीदंपदेन व्यज्यते । योगिन्यास्तत्त्वेन विश्वमस्फुरति, तव तु तत्त्वं विनैवेतीदंपदद्योत्यम् । योगिन्या जगति शून्यत्वस्फुरणं ब्रह्मस्फूर्तिसंवलितम्, तव तु न तथेत्याङुपसर्गो द्योतयति । योगिन्या रागिणि जने प्रणयो नास्ति, तव तु सोऽस्तीति सखीत्यनेन व्यज्यते । त्वं योगिन्येव, न तु वियोगिनीति किंवाशब्देन द्योत्यते । **वर्णरचनयोरिति** । वर्णो माधुर्यादिगुणव्यञ्जकः। रचना पदविन्यासविशेषः । सापि माधुर्यादिव्यञ्जिका । **उदाहरिष्यत इति** । गुणपरिच्छेदे इति शेषः । **एवमन्यत्रेति** । 'माघे शिशुपालदूतोक्तौ संधौ वाच्ये वस्तुमात्ररूपो विग्रहः शब्दशक्तिमूलः प्रबन्धव्यङ्ग्यो दृश्यते' इति चण्डीदासः । **तदेवमिति** । पूर्वं पञ्चत्रिंशद्भेदा उक्ताः । अर्थशक्तिमूलध्वनेः प्रबन्धप्रकाश्यत्वेन

---

1. **एकपञ्चाशदिति** । अत्र ध्वनेर्लक्षणाभिधामूलत्वेनाविवक्षितवाच्यविवक्षितान्यपरवाच्याख्यौ प्रथमं द्वौ भेदौ । अविवक्षितवाच्यस्यार्थान्तरसंक्रमितात्यन्ततिरस्कृतवाच्यतया

---

१. 'विषय' इति नास्ति क-पुस्तके. २. 'विशेषणद्वयस्य' घ.

पुनर्द्वादशविधत्वम् । असंलक्ष्यक्रमव्यङ्ग्यध्वनेरपि पदांशवर्णरचनाप्रबन्धप्रकाश्यत्वेन चतुर्विधत्वमिति षोडश । मिलित्वा एकपञ्चाशदिति । यद्यप्यर्थानां वाच्यलक्ष्यव्यङ्ग्यभेदेन पदांशानां च प्रकृत्यादिभेदेनातोऽधिका अपि प्रकारा भवन्ति तथापि संप्रदा-

द्विविधस्य वाक्यपदगतत्वेन द्वैविध्ये चातुर्विध्यम् । विवक्षितान्यपरवाच्यस्य संलक्ष्यक्रमव्यङ्ग्यासंलक्ष्यक्रमव्यङ्ग्यतया द्वौ भेदौ । संलक्ष्यक्रमव्यङ्ग्ये शब्दशक्तिमूले वस्त्वलंकाररूपतया द्वैविध्ये वाक्यपदगतत्वेन चातुर्विध्यम् । अर्थशक्तिमूले संलक्ष्यक्रमव्यङ्ग्ये अर्थस्य स्वतःसंभवित्वेन कविप्रौढोक्तिसिद्धत्वेन कविनिबद्धवक्तृप्रौढोक्तिसिद्धत्वेन च त्रैविध्यम् । त्रिविधस्यापि वस्त्वलंकाररूपतया द्वैविध्ये षड्विधत्वम् । षड्विधस्यापि व्यङ्ग्यव्यञ्जकतया द्वैविध्ये द्वादशविधत्वम् । द्वादशविधस्यापि प्रबन्धगतत्वेन वाक्यगतत्वेन पदगतत्वेन त्रैविध्ये षट्त्रिंशत्प्रकारोऽर्थशक्तिमूलोऽनुरणनध्वनिः । उभयशक्तिमूलो वाक्यगतत्वेनैकविधः । एवं संलक्ष्यक्रमव्यङ्ग्यध्वनेरेकचत्वारिंशद्भेदाः । असंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः प्रबन्धवाक्यपदपदैकदेशरचनावर्णगतत्वेन षड्विधः । एवं विवक्षितान्यपरवाच्यध्वनेः सप्तचत्वारिंशद्भेदाः । अविवक्षितवाच्यभेदैश्चतुर्भिः सह ध्वनेः प्रथमं शुद्धा एकपञ्चाशद्भेदाः । तेषां नामानि निर्दिश्यन्ते—(१) पदगतार्थान्तरसंक्रमितावविवक्षितवाच्यध्वनिः, (२) वाक्यगतार्थान्तरसंक्रमितावविवक्षितवाच्यध्वनिः, (३) पदगतात्यन्ततिरस्कृताविवक्षितवाच्यध्वनिः, (४) वाक्यगतात्यन्ततिरस्कृताविवक्षितवाच्यध्वनिः, (५) पदगतशब्दशक्तिमूलसंलक्ष्यक्रमवस्तुध्वनिः, (६) पदगतशब्दशक्तिमूलसंलक्ष्यक्रमालंकारध्वनिः, (७) वाक्यगतशब्दशक्तिमूलसंलक्ष्यक्रमवस्तुध्वनिः, (८) वाक्यगतशब्दशक्तिमूलसंलक्ष्यक्रमालंकारध्वनिः, (९) पदगतस्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, (१०) पदगतस्वतःसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः, (११) पदगतस्वतःसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः, (१२) पदगतस्वतःसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः, (१३) वाक्यगतस्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, (१४) वाक्यगतस्वतःसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः, (१५) वाक्यगतस्वतःसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः, (१६) वाक्यगतस्वतःसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः, (१७) प्रबन्धगतस्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, (१८) प्रबन्धगतस्वतःसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः, (१९) प्रबन्धगतस्वतःसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः, (२०) प्रबन्धगतस्वतःसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः (२१) पदगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, (२२) पदगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः, (२३) पदगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः, (२४) पदगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः, (२५) वाक्यगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, (२६) वाक्यगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः, (२७) वाक्यगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः, (२८) वाक्यगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः, (२९) प्रबन्धगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, (३०) प्रबन्धगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुनालं-

संकरेण त्रिरूपेण संसृष्ट्या चैकरूपया ।
वेदखाग्निशराः(५३०४)शुद्धैरिषुबाणाग्निसायकाः(५३५५)॥१२॥

यानुरोधेनैकपञ्चाशत्त्वमेव दर्शितम् । **संकरेणेति** । अलंकारपरिच्छेदे वक्ष्यमाणरीत्या त्रिरूपेणेत्यर्थः । यथा—'अङ्गाङ्गिभेऽलंकृतीनां तद्वदेकाश्रयस्थितौ । संदिग्धत्वे च भवति संकरस्त्रिविधः पुनः ॥' इत्यलंकारसंकरस्य त्रैविध्यमुक्तं तदनुसारेण संकरत्रैविध्यं बोध्यम् । अत्र 'एकाश्रयस्थितौ' इत्यस्य एकव्यञ्जकानुप्रवेश इत्यर्थः । संदिग्धत्वे 'अयं ध्वनिः स ध्वनिर्वा' इति संशयेऽङ्गाङ्गिभावापन्नोऽनेकव्यञ्जकानुप्रविष्टः । असंदिग्धो ध्वनिसमुदायः संसृष्टिः । अनेकधेति यदुक्तं तदेवाह—**वेदेति** । वेदाश्चत्वारः, खं शून्यम् । अग्नयस्त्रयः, शराः पञ्च । सजातीयानेकसंख्याप्रस्तावे 'अङ्कानां वामतो गतिः' इत्यङ्कविदां नियमेन चतुरुत्तरशतत्रयाधिकपञ्चसहस्राणीत्यर्थः । ननु कथमेतदेकपञ्चाशतश्चतुर्गुणेन चतुरधिकशतद्वयमेव भवतीति चेत्, न । यतः प्रथमस्य सजातीयेनैकेन विजातीयैः पञ्चाशता च संसृष्टावेकपञ्चाशत्त्वम् । एवं द्वितीयस्य सजातीयेनैकेन विजातीयैरूनपञ्चाशता च संसृष्टौ पञ्चाशत्त्वम् । तृतीयस्य सजातीयेनैकेन विजातीयैरष्टचत्वारिंशता च संसृष्टावूनपञ्चाशत्त्वं भवति । चतुर्थस्य सजातीयेनैकेन विजातीयैः सप्तचत्वारिंशता च संसृष्टावष्टचत्वारिंशत्त्वम् । एवमन्येषामेकैकहासेन सप्तचत्वारिंशदादिकम् । चरमस्य सजातीयेनैकेन संसृष्टावेकविषयत्वमेवेति मिलित्वा षड्विंशत्यधिकत्रयोदशशतत्वं ध्वनिसंसृष्टेः । एवं क्रमेण अष्टसप्तत्युत्तरनवशताधिकत्रिसहस्रत्वं त्रिविधध्वनिसंकरस्य । मिलित्वा 'वेदखाग्नि–' इत्यादिसंख्याया

कारध्वनिः, (३१) प्रबन्धगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः, (३२) प्रबन्धगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः, (३३) पदगतकविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, (३४) पदगतकविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः, (३५) पदगतकविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः, (३६) पदगतकविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः, (३७) वाक्यगतकविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, (३८) वाक्यगतकविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः, (३९) वाक्यगतकविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः (४०) वाक्यगतकविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः, (४१) प्रबन्धगतकविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः, (४२) प्रबन्धगतकविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः, (४३) प्रबन्धगतकविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः, (४४) प्रबन्धगतकविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः, (४५) प्रबन्धगतासंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः, (४६) वाक्यगतासंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः, (४७) पदगतासंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः, (४८) पदैकदेशगतासंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः, (४९) रचनागतासंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः, (५०) वर्णगतासंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः, (५१) वाक्यगतोभयशक्तिमूलो ध्वनिरिति ॥

शुद्धैः शुद्धभेदैरेकपञ्चाशता योजनेत्यर्थः ।
दिङ्मात्रं तूदाह्रियते—

'अत्युन्नतस्तनयुगा तरलायताक्षी
द्वारि स्थिता तदुपयानमहोत्सवाय ।
सा पूर्णकुम्भनवनीरजतोरणस्र-
क्सम्भारमङ्गलमयत्नकृतं विधत्ते ॥'

अत्र स्तनावेव पूर्णकुम्भौ, दृष्टय एव नवनीरजस्रज इति रूपकध्वनिरसध्वन्योरेकाश्रयानुप्रवेशः संकरः ।

उपपत्तिः । न चैकपञ्चाशतस्तावता गुणने एकाधिकषड्विंशतिशती संसृष्टौ, तत्रैव तत्रिगुणसंकरयोजने 'वेदखाब्धिवियच्चन्द्राः' इति काव्यप्रकाशोक्तसंख्या भवति कथं 'वेदखाग्नि–' इत्यादिसंख्येति वाच्यम् । संसृष्टिसंकरयोः पूर्वपूर्वसंसर्गस्योत्तरोत्तरगणनायामप्रवेशात्तावत्संख्यत्वानुपपत्तेः । अत एव काव्यप्रकाशटीकाकारचण्डीदासेन '[1]संसृष्टौ संकरयोजने च सिन्धुगगनशिखिशराः, शुद्धयोगे शरबाणाग्निबाणाः' इत्युक्तम् । **शुद्धैरिति** । संसृष्टिसंकररहितैर्योगे इत्यर्थः । इषवः पञ्च, बाणाः पञ्च, अग्नयस्त्रयः, सायकाः पञ्च । पञ्चपञ्चाशदुत्तरशतत्रयाधिकपञ्चसहस्राणीत्यर्थः । **अत्युन्नतेति** । प्रवासादागतं नायकं श्रुत्वा वासगृहद्वारि स्थिताया नायिकाया वर्णनमिदम् । तस्य नायकस्य उपयानमुपगमः । स्वगृहप्रवेश इति यावत् । तत्कालीनमहोत्सवाय । संभारः संघटनमेव मङ्गलम् । प्रवासादागतस्य गृहप्रवेशसमये पूर्णकुम्भ-

---

1. **संसृष्टावित्यादि** । वस्तुतस्तु प्रकाशकारमतमेव ज्यायः । तथा हि—एकपञ्चाशतो भेदानामेकपञ्चाशता भैदैर्योजनमिति तावतां तावद्गुणनेनैकोत्तरषड्विंशतिशतं(२६०१) भवति । संयोजनं च संसृष्ट्यादिचतुःप्रकारैरिति तावतां चतुर्भिर्गुणने 'वेदखाब्धिवियच्चन्द्राः, (१०४०४) इति संख्या संपद्यते । नन्वस्त्वेकपञ्चाशद्भेदेष्वेकतराणां पञ्चाशता योजनम्, स्वस्य तु स्वेन कथं योजनमिति चेत्, न । व्यक्तिभेदमादाय विजातीयवत्सजातीयेनापि संकरादिति राजानकमम्मटाशयः । यत्तु चण्डीदासादिभिः 'सिन्धुगगनशिखिशराः–' (५३०४) इत्यादि सिद्धान्तितं तत्र ब्रूमः—अनुभवसिद्धौ तावत्पुण्ड्रकादीक्षुरसेष्विव ध्वनिष्वपि हृद्यत्वातिशयानतिशयौ । तथा चार्थान्तरसंक्रमितवाच्यस्य यत्रातिशयस्तत्रात्यन्ततिरस्कृतवाच्ये न तद्योजनम् । यत्र तु तद्वैपरीत्यं तत्रात्यन्ततिरस्कृतवाच्यस्येतरेण योजनमिति व्यपदेशः । 'प्राधान्येन व्यपदेशा भवन्ति' इति न्यायात् । एतदेव प्राधान्यमादाय गणना सौत्री । नन्वेवं यत्रोभयोस्तुल्यमेव चारुत्वं तत्र भेदान्तरं स्यादिति । मैवम् । अपकर्षाभावस्यातिशयपदेन विवक्षितत्वात्तत्रोभयभेदसंकरस्वीकारादिति प्रदीपादौ व्यक्तम् ॥

---

१. ग-पुस्तके तु 'दिङ्मात्रं–' इत्यादिः '–संसृष्टिः ।' इत्यन्तः पाठो नास्ति. २. क-पुस्तके तु 'तोरण–' इत्यादिः '–नवनीरजस्रज.' इत्यन्तः पाठस्त्रुटितः.

'धिन्वन्त्यमूनि मदमूर्च्छदलिध्वनीनि
धूताध्वनीनहृदयानि मधोर्दिनानि ।
निस्तन्द्रचन्द्रवदनावदनारविन्द-
सौरभ्यसौहृदसगर्वसमीरणानि ॥'

अत्र निस्तन्द्रेत्यादिलक्षणामूलध्वनीनां संसृष्टिः ।

अथ गुणीभूतव्यङ्ग्यम्—

अपरं तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये ।

अपरं काव्यम् । अनुत्तमत्वं न्यूनतया साम्येन च संभवति ।

तत्र स्यादितराङ्गं काकाक्षिप्तं च वाच्यसिद्ध्यङ्गम् ॥ १३ ॥

स्थापनादिमङ्गलं क्रियत इति लोकाचारः । अत्र स्तनकटाक्षयोर्यथासंभवं पूर्णकुम्भलेन, नवनीरजस्रक्लेन च रूपकत्वम् । तयोरेव नायकरतेरुद्दीपकतया शृङ्गारश्च व्यङ्ग्य इत्येवं व्यञ्जकानुप्रवेशः । **धिन्वन्तीति** । प्रीणयन्तीत्यर्थः । अमूनि अनुभूयमानमहोत्सवानि । मदेन संमूर्च्छन्तो वर्धमाना अलिध्वनयो यत्र । मधोर्वसन्तस्य । निस्तन्द्रोऽतिप्रकाशमानश्चन्द्र इव वदनं यस्यास्तस्या वदनसौरभ्यस्य सौहृदेन सादृश्येन सगर्वा उत्कृष्टाः समीरणा यत्र तादृशानि । लक्षणामूलध्वनीनामत्यन्ततिरस्कृतवाच्यानाम् । तथाहि—निस्तन्द्रपदेन तन्द्रारहित उच्यते । चन्द्रे तत्कथनस्यानुपयोगितया प्रकाशमाने लक्षणा । प्रकाशातिशयबोधः प्रयोजनम् । एवं प्रेमवाचकस्य सौहृदपदस्य सादृश्ये लक्षणा । सादृश्यातिशयबोधः न प्रयोजनम् । गर्वस्याचेतने वायावसंभवात्सगर्वपदस्योत्कृष्टे लक्षणा । सादृश्यातिशयबोधः प्रयोजनम् । एषु वाच्यार्थस्यार्थान्तरसंक्रमितत्वाभावादत्यन्ततिरस्कृतवाच्यत्वम् । अत्रोक्तत्रिविधसंकरासंभवाद् ध्वनीनां संसृष्टिरेव । ध्वनिं निरूप्य गुणीभूतव्यङ्ग्यं निरूपयति—**अथेति** । अपरं ध्वनिभिन्नम् । तत्र गुणीभूतव्यङ्ग्ये । इतरस्य रसादेर्वा वाक्यार्थस्य वा अङ्गम् । रसादि अनु-

---

1. **अध्वनीन इति** । अध्वनीनः पान्थः ॥

2. **गुणीभूतेति** । वाच्यापेक्षया अचमत्कारित्वेनेह व्यङ्ग्यस्य गुणीभावः । ध्वनिकारेणाप्यभिहितम्—'प्रकारोऽन्यो गुणीभूतव्यङ्ग्यः काव्यस्य दृश्यते । यत्र व्यङ्ग्यान्वये वाच्यचारुत्वं स्यात्प्रकर्षवत् ॥' इति । 'प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् । यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥' इत्युक्तरूपो व्यङ्ग्यार्थो यः प्रतिपादितस्तस्य प्राधान्ये ध्वनिरित्याम्नातम् । तस्यैव गुणीभावेन वाच्यार्थचारुत्वप्रकर्षे गुणीभूतव्यङ्ग्यो नामापरः काव्यभेद इति तदाशयः ॥

3. **काकेति** । काका हठेनोपस्थापितमिति वा ॥

---

१. 'अपराङ्गं' ग. २. 'सिद्ध्यङ्गयम्' घ.

[1]संदिग्धप्राधान्यं [2]तुल्यप्राधान्यमस्फुटमगूढम् ।
व्यङ्ग्यमसुन्दरमेवं भेदास्तस्योदिता अष्टौ ॥ १४ ॥
[3]इतरस्य रसादेरङ्गं रसादिव्यङ्ग्यम् ।
यथा—

'अयं स रसनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥'

अत्र शृङ्गारः करुणस्याङ्गम् ।

रणनरूपं वा व्यङ्ग्यमित्यन्वयः । एवमन्यत्रापि । काक्वाक्षिप्तं काकुवशात् झटिति वाच्यवत्प्रतीयमानम् । वाच्यस्यान्वयबोधबीजं वाच्यसिद्ध्यङ्गम्, आपाततः प्रतीतस्य वाच्यस्य प्रतिसंधानानुपपत्तिनिरासकम् । अस्फुटं सहृदयैरपि झटित्यप्रतीयमानम् । अगूढं स्फुटम्, तथा वाच्यायमानम् । असुन्दरं चमत्काराप्रत्यासन्नम् । एवं निरुक्तव्यङ्ग्यभेदेन तस्य गुणीभूतव्यङ्ग्यस्य रसाङ्गं रसरूपव्यङ्ग्यम् । उदाहरति—**अयमिति** । भूरिश्रवसः समरपतितं हस्तं विलोक्य तत्पत्न्या रोदनमिदम् । अयमीदृगवस्थः स तत्तत्कर्मणि मुहुरनुभूतः । तत्तत्कर्माह—**रसनेति** । रसनां मम क्षुद्रघ-

---

1. **संदिग्धेति** । संदिग्धं वाच्यकृतं व्यङ्ग्यकृतं वेत्यनिश्चितं प्राधान्यं यस्य यत्र वा तत् । यद्वा संदिग्धं चमत्कृतिजनने वाच्यव्यङ्ग्ययोः संशयास्पदं प्राधान्यं यत्र तत् ॥

2. **तुल्येति** । तुल्यं वाच्यसमानं प्राधान्यं यत्र तत् । चमत्कारोत्पादने वाच्यव्यङ्ग्ययोरपि क्षमत्वेन तुल्यत्वमवधेयम् ॥

3. **अगूढमिति** । अगूढं चासहृदयैरपि वेद्यम् । तादृशं वाच्यायमानतया न तथा चमत्करोति यथा कामिनीकुचकलशवद्दूढम् । तदुक्तम्—'नान्ध्रीपयोधर इवातितरां प्रकाशो नो गुर्जरीस्तन इवातितरां निगूढः । अर्थो गिरामपिहितः पिहितश्च कश्चित्सौभाग्यमेति मरहट्टवधूकुचाभः ॥' इति । एवं च कामिनीकुचकलशन्यायेन सहृदयैकवेद्यमेव व्यङ्ग्यं ध्वनित्वमुपयाति । सहृदयैरपि दुःखसंवेद्यमसहृदयैरपि वेद्यं वेत्युभयमपि गुणीभूतव्यङ्ग्यमेवेति बोध्यम् । एवमन्येष्वपि भेदेष्वनुभव एव साक्षीति प्रदीपादौ व्यक्तम् ॥

---

१. ग-पुस्तके तु 'इतरस्य—' इत्यादेः '—मार्गो ध्वनेर्मतः॥' इत्यन्तस्य ग्रन्थस्य स्थाने "चतुर्थी तु 'मम धम्मिअ—' इत्यादावुदाहरणे विधिरूपादभिधेयार्थान्निषेधरूपोऽर्थो व्यज्यते । 'उपकृतं बहु तत्र—' इत्यत्रापि विधिरूपं पर्युदस्य निषेधरूपार्थे तात्पर्यम् । तत्कथं पूर्वाभिधामूलत्वमुत्तरत्र लक्षणामूलत्वमिति । उच्यते—'मम धम्मिअ—' इत्यत्र मुख्यार्थो बाधित एव विश्रान्तिमासाद्य निषेधार्थं व्यञ्जयति । 'उपकृतम्—' इत्यत्र तु मुख्यार्थस्य बाधितत्वेन प्रतीतेर्लक्ष्यार्थस्यैव विश्रान्तिधर्मतया व्यञ्जकत्वम् । तथा चोक्तम्—'क्वचिद्वाध्यतया स्वातिः—' (इत्यादि) व्यञ्जिकेत्यर्थः । यद्यप्यर्थशक्त्युद्भवे कविप्रौढोक्तावेव कविनिबद्धवक्तृप्रौढोक्तिरन्तर्भवति तथापि तदपेक्षया तस्या अधिकचमत्कारितया विशिष्य प्रतिपादनम् । ननु वाक्यगता एव ध्वनयश्चमत्कारमावहन्ति कथं तेषां पदादिगतत्वेन भेदकथनम् । सत्यम् । पदपदांशशोभाजनकत्वेन तेषां चमत्कारभूमित्वम् । पदांशास्तु—'प्रकृतिः प्रत्ययः प्रातिपदिक सर्वनाम च । पुरुषव्यत्ययः पूर्वनिपातस्तद्धितं तथा ॥ कर्मभूताधिकरणं विशेषोक्तविभक्तयः । उपसर्गो निपातश्च संबन्धो वचनं तथा । अव्ययीभावकालाद्याः पदांशाः परिकीर्तिताः ।' तथा चोक्तम्—'एकावयवसंस्थेन—' (इत्यादि) इति पाठो दृश्यते.

'मानोन्नतां प्रणयिनीमनुनेतुकाम-
स्त्वत्सैन्यसागररवोद्धतकर्णतापः ।
हा हा कथं नु भवतो रिपुराजधानी-
प्रासादसंततिषु[1] तिष्ठति कामिलोकः ॥'

अत्रौत्सुक्यत्राससंधिसंस्कृतस्य करुणस्य राजविषयरतावङ्गभावः

'जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृता लङ्काभर्तुर्वदनपरिपाटीषुघटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥'

ष्टिकामुत्कर्षयितुं मार्जनादिना उत्कृष्टीकर्तुमाकर्षुं वा शीलमस्य सः । नीव्या वस्त्रबन्धस्य विस्रंसनो मोक्षणकरः । अत्रालम्बनविच्छेदेन रतेररसाश्रयतया स्मर्यमाणानां तदङ्गानां शोकोद्दीपकत्वात्करुणानुकूलतेति शृङ्गारस्य करुणाङ्गत्वम् । अत एव प्राकरणिकत्वेन प्रधानस्य करुणस्य व्यञ्जकं वाक्यार्थमपेक्ष्य तदानीमप्राप्तरसभावस्य शृङ्गारस्य यूनत्वमचमत्कारित्वम् । ननु तदानीं शृङ्गारस्य रसत्वाप्राप्त्या कथमस्य रसाङ्गरसोदाहरणत्वं संगच्छतामिति चेत्, न । तदानीं शृङ्गाररसस्य पूर्णरसत्वाभावेऽपि खण्डरसत्वस्य सत्त्वात् । तच्च दोषपरिच्छेदे निर्णेष्यते । शृङ्गारस्य करुणविरुद्धत्वेऽपि स्मृतिविषयत्वेन गुणत्वमेव, न तु दोषत्वम् । भावाङ्गं रसव्यङ्ग्यमुदाहरति—**मानोन्नतामिति** । राज्ञः स्तुतिरियम् । मानोन्नतामुन्नतमानाम् । त्वत्सैन्यसागररवेण उद्धतकर्णतापो भवति । **अत्रेति** । प्रथमपादेन औत्सुक्यम्, द्वितीयपादेन त्रासो व्यज्यते । औत्सुक्यत्रासयोः संधिना संस्कृतस्य कृतोत्कर्षस्य । एतेन भावसंधेरसाङ्गत्वं दर्शितम् । भावस्यास्वादपात्रत्वेन प्रधानत्वम् । वाच्यार्थो व्यङ्ग्यकरुणनिरपेक्ष एव तस्य व्यञ्जकः । करुणस्तु वाच्यसापेक्षहाहापदार्थव्यङ्ग्य एव तत्प्रकर्षक इति वाक्यार्थापेक्षया व्यङ्ग्यस्य न्यूनचमत्कारित्वम् । एवं भावादीनां भावाद्यङ्गत्वे उदाहरणानि काव्यप्रकाशाद्युक्तानि बोध्यानि । ग्रन्थप्रपञ्चभयादिह नोक्तानि । वाच्यार्थस्याङ्गं शब्दशक्तिमूलमनुरणनरूपव्यङ्ग्यमुदाहरति—**जनस्थान इति** । धनार्थं प्रयतमानस्याप्राप्तधनस्य कस्यचिदुक्तिरियम् । मया रामत्वं प्राप्तमित्यापाततः प्रतीयते । पश्चादन्यस्य धर्मं कथमन्यो लभतामित्यनुपपत्तिं प्रतिसंदधतः स्वरूपशब्दसामर्थ्येन व्यज्यमानं सादृश्यमादाय रामसादृश्यं प्राप्तमिति बोधः पारमार्थिकः । सादृश्यघटकानि स्वरूपशब्दवाच्यत्वरूपसाधर्म्याण्याह—**जनस्थान इति** । कनकमृगस्य तृष्णया प्राप्तीच्छया अन्धितधिया रामेण जनस्थाननाम्नि दण्डकारण्यैकदेशे भ्रान्तम् । मया तु कनकस्य मृगतृष्णाभ्यामन्वेषणप्राप्तीच्छाभ्यामन्धितधिया जनानां स्थाने भ्रान्तम् । केचित्तु—'कनकमेव मृगतृष्णा मरीचिका, कनके मृगतृष्णारोपणं च दुष्प्रा-

---

1. **प्रासादेति** । प्रासादपारम्परीषु ॥

अत्र रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्तेरेव रामत्वमवगम्यते । वचनेन तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कुर्वता तद्गोपनमपाकृतम् । तेन वाच्यं सादृश्यं वाक्यार्थान्वयोपपादकतयाङ्गतां नीतम् ।

काकाक्षिप्तं यथा—

'मश्नामि कौरवशतं समरे न कोपा-
दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।

पजलार्थिनो मृगतृष्णायामिव दुष्प्रापकनकार्थिनः कनकेऽपि प्रवृत्तेस्तादृशप्रवृत्तिविषयत्वरूपसाधर्म्यात्' इत्याहुः । तन्न । स्वरूपसतः कनकस्य बुद्ध्यन्वीकरणासंभवात्तत्प्राप्तीच्छायां लक्षणावश्यमङ्गीकार्या । एवं च तत्र निरुक्तसाधर्म्यासंभवाद्रूपकासंगतेः । 'मृगः पशौ कुरङ्गे च करिनक्षत्रभेदयोः । अन्वेषणे च याच्ञायाम्' इति मेदिनी । रामेण प्रतिपदं पदे पदे 'वैदेहि' इति वचः उदश्रु यथा स्यात्तथा प्रलपितम् । मया तु वै निश्चितं 'देहि' इति वचः प्रतिपदं प्रतिस्थानं प्रलपितम् । रामेण लङ्काभर्तुः रावणस्य वदनानां परिपाट्यां पङ्क्तौ इषुघटना कृता । मया तु भर्तुर्धनस्वामिनो वदनस्य परिपाटीषु संतोषसूचकभङ्गिषु कापि घटना परिचयोऽलमत्यर्थं कृता । कुशलं दारिद्र्यापनायकं वसु यस्य तत्ता मया नाधिगता । रामेण तु कुशलवौ सुतौ यस्याः सा सीता प्राप्तैवेति तुशब्दलभ्योऽर्थः । अस्योपमाध्वनित्वं वारयन्वाक्यार्थाङ्गत्वमुपपादयति—**अत्रेति** । शब्दशक्तेरेव स्वरूपशब्दसामर्थ्यादेव रामत्वं रामसादृश्यम् । वचनेन मयाप्तं रामत्वमिति वाक्येन आविष्कुर्वता व्यञ्जयता तद्गोपनं सादृश्यस्य गूढत्वमपाकृतं खण्डितम् । एतेनाधिकचमत्कारित्वाभावेनास्योपमाध्वनित्वं वारितम् । तेन सादृश्यस्य गोपनापाकरणेन वाच्यं वाच्यवज्झटिति प्रतीयमानं वाक्यार्थस्य रामसादृश्यप्राप्तेरन्वयोपपादकतया अन्वयप्रतियोगित्वेनान्वयस्य निर्वाहकतया । तत्रापाततः प्रतीतस्यार्थस्यानुपपत्तिर्व्यङ्ग्यं निरस्यति स वाच्यसिद्ध्यङ्गस्य विषयः । यत्र त्वापाततः प्रतीतस्य बाधनेन तत्स्थाने आत्मानमर्पयित्वा अन्वयं निर्वाहयति सोऽस्य विषयः, इत्यनयोर्भेदः । अत्र 'उपमानोपमेयभावो व्यङ्ग्यो वाच्याङ्गतां नीतः' इति काव्यप्रकाशवृत्तिं केचिदेवं विवृण्वन्ति—'उपमानोपमेयभाव उपमा रामत्वप्राप्तिव्यङ्ग्या[1] वाच्यस्य कुशलवसुताप्राप्त्याप्राप्ततत्कार्याद्रामाद्व्यतिरेकरूपस्यास्याङ्गतां प्रकर्षकतां नीतः' इति । तन्न । अङ्गतामुपपादकतामित्यस्यैव वक्तुं युक्तत्वात् । उपमानव्यञ्जनाभावे व्यतिरेकप्रतीत्यनुपपत्तेरुपपत्त्यतिशयाधायकस्यैव प्रकर्षत्वसंभवात्[2] । अर्थशक्तिमूलानुरणनरूपस्य वाच्यस्याङ्गत्वं यथा—'आगत्य संप्रति वियोगविसंष्ठुलाङ्गीमम्भोजिनीं क्वचिदपि क्षपितत्रियामः । एतां प्रसादयति पश्य शनैः प्रभाते तन्वङ्गि पादपतनेन सहस्ररश्मिः ॥' अत्र नायकवृत्तान्तोऽर्थशक्तिमूलो वस्तुरूपो रविकमलिनीवृत्तान्ताध्यारोपेण स्थितः । **मश्नामीति** । सहदेवं प्रति संधिकरणासहिष्णो-

---

१. 'मया' इत्यधिकं क-पुस्तके. २. 'अप्राप्तकुशलवसुताकस्य उपमेयस्य दरिद्रस्य प्राप्तकुशलवसुताकाद्रामादाधिक्यस्य नव्या प्रतिपाद्यव्यतिरेकालंकारस्याङ्गताम्' इति क्वाचित्कः पाठः. ३. 'उपपन्न–' इति पुस्तकान्तरे.

संचूर्णयामि गदया न सुयोधनोरू
संधिं करोतु भवतां नृपतिः पणेन ॥'

अत्र मश्नाम्येवेत्यादिव्यङ्ग्यं वाच्यस्य निषेधस्य सहभावेनैव स्थितम् ।

'दीपयन्रोदसीरन्भ्रमेष ज्वलति सर्वतः ।
प्रतापस्तव राजेन्द्र वैरिवंशदवानलः ॥'

अत्रान्वयस्य वेणुत्वारोपणरूपो व्यङ्ग्यः । प्रतापस्य दावानलत्वारोपसिद्ध्यङ्गम् ।

'हरस्तु किंचित्परिवृत्त—' इत्यादौ विलोचनव्यापारचुम्बनाभिलाषयोः प्राधान्ये संदेहः ।

र्भीमस्योक्तिरियम् । सर्वत्र भविष्यत्सामीप्ये लुट् । उरस्तो वक्षःस्थलात् । सुयोधनेति दुर्योधनस्यैव नामान्तरम् । नृपतिर्युधिष्ठिरः । भवतामिति 'अभिमतम्' इति शेषः । यद्वा, भवतां नृपतिरित्यनेन स्वाभीष्टानाचरणात्स्वनृपतित्वाभावसूचनम् । पणेन कुशस्थल्यादिग्रामपञ्चकप्रापणरूपेण । **मश्नाम्येवेति** । प्रबलतरपरिपन्थिसंधिप्रसङ्गसमुज्जृम्भमाणसंरम्भविसंष्ठुलकण्ठतालुसंयोगकृतेन शिरश्चालनसहोत्पन्नेन नञा झटित्ययोगव्यवच्छेदो व्यज्यते । स एवकारेण दर्शितः । **सहभावेनेति** । वाच्यप्रतीतिसमकालमेव दीप्तभावगद्गदसाकाङ्क्षतया काकुरवेण व्यङ्ग्यप्रतीतिरिति वाच्यम् । अतस्तन्मात्रं व्यङ्ग्यमेवेवादिभिराकृष्यमाणं वाच्यायमानम् । अत एवात्र 'मुख्यार्थबाधाद्यनुसरणविलम्बासहत्वाल्लक्षणा' इति प्राचीनाः । 'मुख्यार्थबाधो झटित्यर्थपर्यवसानाय प्रतीयते' इति नवीनाः । वाच्यार्थप्रतीतिसमये व्यञ्जनाया अर्थबोधनासामर्थ्यमेव प्राचीनमतास्वरसः । केचित्तु—'न मथिष्यामीत्यादिरीत्या अपरनञर्थं आक्षिप्यते । तथा च नञर्थद्वयेनैवकारार्थः पर्यवस्यति' इत्याहुः । तन्न । वाच्यार्थस्यैव व्यञ्जनयोपस्थितेरसंभवात्, वाच्यव्यङ्ग्ययोर्युगपदुपस्थित्ययोगाच्च । वाच्यसिद्ध्यङ्गं व्यङ्ग्यमुदाहरति—**दीपयन्निति** । प्रकाशयन्नित्यर्थः । रोदस्योर्द्यावापृथिव्यो रन्ध्रमवकाशं ज्वलति दीप्यते । **अत्रेति** । अन्वयस्य कुलस्य प्राथमिकबोधे दवानलस्य शत्रुगोत्रसंबन्धासंभवोपलम्भादप्रामाण्यग्रहः, ततः प्रतापस्य दवानलत्वोपपत्त्या व्यङ्ग्यं कुलस्य वेणुत्वारोपणमभिसंदधतः श्रोतुर्वैरिकुलवेणुदवानल इति द्वितीयबोधः । आरोप्यमाणस्य वेणोर्दवानलसंबन्धिज्वलमक्षतमित्यनुपपत्तिनिरासेन दवानलत्वारोपणस्याङ्गं व्यङ्ग्यरूपकं प्रतापस्य दाहकत्वेन कविपरम्परासिद्धपिशङ्गत्वेन च दवानलसादृश्यं प्रसिद्धमिति तद्रूपकं वैरिकुलस्य वेणुत्वारोपणकारणमिति श्लिष्टनिबन्धनं परम्परितरूपकमिदम् । क्वचिच्च प्रकरणादिनियमाभावेन रूप्यरूपकयोरुभयोरेव श्लिष्टशब्दवाच्यत्वम् । यथा—'विद्वन्मानसराजहंस—' इत्यादि । प्रकृते तु नियन्त्रणवशाद्रूपकस्य व्यङ्ग्यत्वमेवेत्यवधेयम् । संदिग्धप्राधान्यं व्यङ्ग्यमुदाहरति—**हरस्त्विति** । आकालिकवसं-

'ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते ॥'

अत्र परशुरामो रक्षःकुलक्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम् ।

'संधौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः ।
अल्लावंदीननृपतौ न संधिर्न च विग्रहः ॥'

अत्राल्लावंदीनाख्ये[1] नृपतौ दानसामादिमन्तरेण नान्यः प्रशमोपाय इति व्यङ्ग्यं व्युत्पन्नानामपि झटित्यस्फुटम् ।

न्ते पार्वतीमालोकमानस्य हरस्य धैर्यविपर्ययवर्णनमिदम् । परिवृत्तधैर्यो नष्टधृतिः । **लोचनेति** । मुखमात्रे लोचनव्यापारेण चुम्बनाभिलाषः संभाव्यते । न च द्वयोरेव शृङ्गारव्यञ्जकतया प्राधान्यमिति तुल्यप्राधान्यमेवेदमिति वाच्यम् । उभयोः प्राधान्यसंदेहे तस्यानवकाशात् । प्राधान्यसंदेहश्च दर्शनं रतेरनुभावरूपतया शृङ्गारस्य व्यञ्जने प्रधानमुत चुम्बनाभिलाषव्यञ्जकलेनाङ्गमिति । एवं चुम्बनाभिलाषः संभाव्यमानलेनाप्रधानमुतास्वाद्यलेन शृङ्गारव्यञ्जकतया प्रधानमित्याकारको बोध्यः । प्राधान्यस्य निश्चयाभावादेव वाच्यादनुत्तमत्वं व्यङ्ग्यस्य । तुल्यप्राधान्यव्यङ्ग्यमाह—**ब्राह्मणेति** । दिग्विजये भार्गवजिगीषुं दशग्रीवं प्रति तन्मन्त्रिण उक्तिरियम् । अतिक्रमः पराभवः । भवतामेव भूतये, न तु स्वार्थं ब्रवीमि । मित्रं चेति चकारस्यान्वयः । उभयोरेकशिष्यत्वेन सतीत्यर्थतया मित्रत्वं तस्यातिक्रमो न केवलं ब्राह्मणातिक्रमो मित्रातिक्रमश्च । अन्यथातिक्रमे दुर्मनायते इति भविष्यत्सामीप्ये लट् । तस्यातिक्रमप्रवृत्तावतिक्रमो न सेत्स्यति तस्य दौर्मनस्यमेव भविष्यति । यथा कार्तवीर्येण तद्दौर्मनस्यमाचर्य क्षत्रियकुलं नाशितं तथा भवतापि रक्षःकुलं नाशयितव्यमिति भावः । जामदग्न्यदौर्मनस्यव्यङ्ग्यो रक्षःकुलक्षयः, मित्रब्राह्मणातिक्रमत्यागजन्या विभूतिर्वाच्या, ताभ्यां जामदग्न्यातिक्रमो न कर्तव्य इत्यर्थनिर्धारणरूपमतिर्व्यज्यत इत्युभयोः समं प्राधान्यम् । अत एव वाच्यादनुत्तमत्वमस्य । क्वचित्तु—'वाच्यस्य मित्रब्राह्मणदौर्मनस्यस्य समं प्राधान्यमिति त्रासरूपव्यभिचारिभावव्यञ्जने द्वयोः साम्याच्छापपापोत्पादकत्वेन हि वाच्यात्रासो व्यङ्ग्यात्तु साक्षात्' इत्याहुः । तन्न । दुर्वृत्तस्य पापसंभावनया त्रासासंभवाद्ब्राह्मणदौर्मनस्यजन्यशापसंभावनया त्रासंभवेऽपि वाच्यस्य व्यङ्ग्यापेक्षया व्यवहितत्वात्तुल्यप्राधान्यासंभवाच्च । अस्फुटं व्यङ्ग्यमाह—**संधाविति** । विग्रहे युद्धे । अन्यः संधिर्विग्रहो वा । अत्र दानादिकमेवोचितमित्यर्थनिर्धारणरूपमतेर्व्यभिचारिभावस्य संधिविग्रहानिष्टसाधनत्वरूपवाच्यं व्यङ्ग्यनिरपेक्षमेव व्यञ्जकं वाच्यसं-

---

१. 'प' घ. २. 'प' घ.

'अनेन लोकगुरुणा सतां धर्मोपदेशिना ।
अहं व्रतवती खैरमुक्तेन किमतः परम् ॥'

अत्र प्रतीयमानोऽपि शाक्यमुनेस्तिर्यग्योषिति बलात्कारोपभोगः स्फुटतया वाच्यायमान इत्यगूढम् ।

'वाणीरकुडङ्गुड्डीणसउणिकोलाहणं सुणन्तीए ।
घरकम्मवावडाए वहुए सीअन्ति अङ्गाइं ॥'

अत्र दत्तसंकेतः कश्चिल्लतागृहं प्रविष्ट इति व्यङ्ग्यात् 'सीदन्त्यङ्गानि' इति वाच्यस्य चमत्कारः सहृदयसंवेद्य इत्यसुन्दरम् ।

धिविग्रहाभावसापेक्षमिति वाच्यादनुत्तमत्वमस्य । अगूढव्यङ्ग्यमाह—**अनेनेति** । शाक्यमुनेस्तिर्यग्योषिद्बलात्कारोपभोगमसहमानायास्तत्पत्न्या उक्तिरियम् । व्रतं गृहस्थधर्मानुष्ठानम्, तद्वती । **उक्तेनेति** । अतःपरं न वक्तव्यमित्यर्थः । लोकगुरोः सद्धर्मोपदेशकस्यास्य दुष्कर्माचरणमनुचितमेव । मम तु व्रताचरणसहायस्य तादृशस्य कथनमपि नोचितमिति भावः । आक्षेपालंकारमहिम्ना व्यङ्ग्यरूपो विशेषो झटित्येव प्रतीयत इति वाच्यायमानत्वस्य व्यङ्ग्यनिरपेक्ष एव वाच्य आक्षेपालंकार ईर्ष्यासंचारिभावज्ञापकः प्रतिनायिकायास्तिर्यक्त्वेन व्यङ्ग्यस्य तदुपभोगस्य नेर्ष्योत्कर्षाधायकत्वमिति व्यङ्ग्यादनुत्तमत्वमस्य । असुन्दरं व्यङ्ग्यमाह—**वाणीरेति** । 'वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः । गृहकर्मव्यापृतायाः वध्वाः सीदन्त्यङ्गानि ॥' इति संस्कृतम् । चण्डीदासस्तु—'कुडङ्गो लतागृहम् । वारता व्याकुला' इति व्याचकार । सीदन्ति गृहकर्माक्षमाणि भवन्तीति लक्षणात इति शेषः । गृहकर्मव्यापृताया इति तु तात्पर्यग्राहकम् । व्यङ्ग्यादपि व्यङ्ग्यमपेक्ष्येत्यर्थः । वाच्यादेवाङ्गावसादात् । हर्षावेगसंवलितानुरागोद्रेककृतमदनपरवशताप्रतीतिः । व्यङ्ग्यस्तु तटस्थप्रायम् । एतच्च स्वविषये वाच्यसिद्ध्यङ्गादिसर्वापवादस्वरूपं द्रष्टव्यम् । तेषु व्यङ्ग्यस्यापि चारुत्वसंभवात् इति चण्डीदासः । तटस्थं च व्यवहितोपकारत्वेनोदासीनवदाभासमानम् । तथाहि—शकुनिकोलाहलश्रवणेनोपनायकस्य लतागृहप्रवेशानुमानम्, ततो हर्षावेगौ, ताभ्यामनुरागोद्रेकः ततो मदनपरवशताप्रतीतिः । एवं च व्यङ्ग्यस्य चमत्काराप्रत्यासन्नत्वमेवासुन्दरत्वमिति फलितम् । केचित्तु 'रसादिबोधजनने वाच्यसापेक्षत्वमेवासुन्दरत्वम्' इति । **व्यङ्ग्यादिति** । इत्यादिव्यङ्ग्यादित्यर्थः । तथा च वधूश्च न तत्र गतेत्येतत्पर्यन्तादित्यर्थः । वध्वा अगमनमेव न केवलं तदीयविप्रलम्भव्यञ्जकम् । किंतु शकुनिकोलाहलश्रवणेन सीदन्त्या वध्वा अगमनमिति वाच्याङ्गावसादसहकारेणैव रसव्यञ्जनाया वाच्यमुखनिरीक्षकत्वात्तदपेक्षया न्यूनचमत्कारी' इति वदन्ति । तन्न । अङ्गावसादव्यङ्ग्यविषादसहकृतस्यैव वध्वगमनस्य विप्रलम्भव्यञ्जनसंभवेन वाच्याङ्गावसादमुखनिरीक्षणायोगात्तदानींतनगमनाभावसत्त्वेऽपि गमनसंभावनया विप्रलम्भासंभवात् । न च गृहकर्मव्यापृताया इत्यनेन गमनाभावनिश्चयेन गमनसंभावनैव

किंच । यो दीपकतुल्ययोगितादिषूपमाद्यलंकारो व्यङ्ग्यः स गुणीभूतव्यङ्ग्य एव । काव्यस्य दीपकादिमुखेनैव चमत्कारविधायित्वात् ।

तदुक्तं ध्वनिकृता—

'[1]अलंकारान्तरस्यापि प्रतीतौ यत्र भासते ।
तत्परत्वं न काव्यस्य नासौ मार्गो ध्वनेर्मतः ॥'

यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विपर्यासः ।

यथा—

'दृष्ट्या केशव गोपरागहृतया किंचिन्न दृष्टं मया
तेनात्र स्खलितास्मि नाथ पतितां किं नाम नालम्बसे ।

नास्तीति वाच्यम् । गृहकर्मान्तःपातिजलाहरणादिच्छलेनापि तत्संभवात्, रतेरुपनायकविषयत्वेन विप्रलम्भाभासस्यैव वक्तुमुचितत्वाच्च । विषयविशेषे केषांचिद्भ्रान्तिभ्रमं निरस्य गुणीभूतव्यङ्ग्यं व्यवस्थापयति—**किंचेति** । दीपकादिमुखेनैवेत्येवकारेण व्यङ्ग्योपमादिव्यवच्छेदः । **अलंकारान्तरस्येति** । अलंकारान्तरस्य प्रतीतावपि यत्र वाक्यस्य तत्परत्वं व्यङ्ग्यालंकारान्तरतात्पर्यैकत्वं न भासते । असौ न ध्वनेर्मार्गो विषय इत्यर्थः । वाच्यस्य दीपकादेरेव वैचित्र्यावहत्वम् । व्यङ्ग्यं तूपमादिकमजागलस्तनायमानमेवेति भावः । चारुत्वस्य चमत्कारस्य विपर्यास इति सोऽपि गुणीभूतव्यङ्ग्य इति पूर्वेणान्वयः । **दृष्ट्येति** । हे केशव, हे नाथ, गोपरागैर्गोधूलिभिर्हृतया आच्छन्नया दृष्ट्या चक्षुषा मया किंचिन्मार्गादिकं न दृष्टम्, तेन हेतुना अत्र तवाग्रत एव स्खलितास्मि पतिता भवामि । पतितां मां किं कथं नालम्बसे, न

---

1. **अलंकारेति** । अलंकारान्तरस्य रूपकादेरलंकारप्रतीतौ सत्यामपि यत्र वाच्यस्य व्यङ्ग्यप्रतिपादनौन्मुख्येन चारुत्वं न प्रकाशते नासौ ध्वनेर्मार्गः । तथा च दीपकादावलंकारे उपमाया गम्यमानत्वेऽपि तत्परत्वेन चारुत्वस्याव्यवस्थानान्न ध्वनिव्यपदेशः । यथा मम—'रजनी हिमकरकिरणैर्बिसिनी नलिनैस्तरङ्गिणी सलिलैः । वल्ली कुसुमस्तबकैः काव्यकथा भूष्यते सुजनैः ॥' इत्यादिषूपमागर्भत्वेऽपि वाच्यालंकारमुखेनैव चारुत्वं व्यवतिष्ठते, न व्यङ्ग्यालंकारतात्पर्येण । अतस्तत्र वाच्यालंकारमुखेनैव काव्यव्यपदेशो न्याय्यः । एवं समासोक्त्याक्षेपानुक्तनिमित्तविशेषोक्तिपर्यायोक्तापह्नुतिसंकरालंकारादावपि ज्ञेयम् । समासोक्तौ तावत् 'उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम् । यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाङ्कितं न लक्षितम् ॥' इत्यादौ व्यङ्ग्येनानुगतं वाच्यमेव प्राधान्येन प्रतीयते । समारोपितनायिकानायकव्यवहारयोर्निशाशशिनोरेव वाक्यार्थत्वात् । एवमग्रेऽप्यनुसंधेयम् । तथा चोक्तम्—'व्यङ्ग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः । समासोक्त्यादयस्तत्र वाच्यालंकृतयः स्फुटाः ॥ व्यङ्ग्यस्य प्रतिभामात्रे वाच्यार्थानुगमेऽपि वा । न ध्वनिर्यत्र वा तस्य प्राधान्यं न प्रतीयते ॥' इति ॥

एकस्त्वं विषमेषुखिन्नमनसां सर्वाबलानां गति-
र्गोप्यैवं गदितः सलेशमवताद्वोष्ठे हरिर्विश्वरम् ॥'

अत्र गोपरागादिशब्दानां गोपे राग इत्यादिव्यङ्ग्यार्थानां सलेशमितिपदेन स्फुटतयावभासः । सलेशमिति पदस्य परित्यागे ध्वनिरेव ।

किंच यत्र वस्त्वलंकाररसादिरूपव्यङ्ग्यानां रसाभ्यन्तरे गुणीभावस्तत्र प्रधानकृत एव काव्यव्यवहारः ।

तदुक्तं तेनैव—

'प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम् ।
धत्ते रसादितात्पर्यपर्यालोचनया पुनः ॥' इति ।

यत्र तु—

'यत्रोन्मदानां प्रमदाजनानामभ्रंलिहः शोणमणीमयूखः ।
संध्याभ्रमं प्राप्नुवतामकाण्डेऽप्यनङ्गनेपथ्यविधिं विधत्ते ॥'

धारयसि । धारणे हेतुमाह—**एकस्त्वमिति** । विषमेषु वातवर्षादिसंकटेषु खिन्नमनसां दुःस्थितचेतसां सर्वासामबलानां स्वरक्षणाक्षमाणां गती रक्षकः । सलेशं सश्लेषम् । श्लिष्टार्थो यथा—गोपे निजस्वामिनि यो रागस्तेन हृतया लुप्तया दृष्ट्या ज्ञानेन किंचित्तव रहस्यं मया न दृष्टं नानुभूतम्, तेन हेतुना अत्र आसु गोपीषु मध्येऽहमेव स्खलिता परमसुखाभ्रष्टा । पतितां प्रणतां मां कि नालम्बसे नानुगृह्णासि । ननु परस्त्रियां ममानुग्रहो नोचित इत्यत आह—एकस्त्वमिति । विषमेषुः कामः तेन खिन्नमनसां व्याकुलचेतसां सर्वासामबलानां गतिः स्मरवैक्लव्यनाशकः । 'परागः कौसुमे रेणौ ललानीयादौ रजस्यपि' इत्यमरः । **स्फुटतयावभास इति** । तथा च कामिनीकुचकलशवद्गूढं चमत्करोति । अगूढं तु स्फुटतया वाच्यायमानमिति गुणीभूतमेवेति भावः । इदानीं गुणीभूतव्यङ्ग्यप्रकारेष्वपि यत्र विश्रामधामतया रसादिकं प्रधानमस्ति तत्र तेनैव काव्यव्यपदेश इत्याह—**किंच यत्रेति** । 'प्रधानेन हि व्यपदेशा भवन्ति' इति न्यायादिति भावः । तेनैव ध्वनिकृतैव । **रसादीति** । रसादौ यत्तात्पर्यं तस्य पर्यालोचनया अनुसंधानेन । नन्वेवं यत्र रसादीनामन्यतमतात्पर्यविषयत्वेन प्रधानत्वं तत्रैव काव्यव्यवहार इति फलितम् । एवं च ध्वनिव्यासंकीर्णे गुणीभूतव्यङ्ग्यं क्वापि नास्तीति कुतस्तस्य काव्यविभाजकत्वमत आह—**यत्र त्विति** । यत्र नगर्यां शोणमणी पद्मरागः अनङ्गनेपथ्यविधिं सुरतो-

---

1. **सलेशमिति** । सलेशं ससूचनमित्यर्थः । अल्पीभावनं हि सूचनमेव ॥

2. **शोणेति** । अत्र शास्त्रसिद्धमपि कर्तुरेकवचनं -किमप्यरुचिबीजं सहृदयहृदयेष्वङ्कु-

---

१. ग-पुस्तके तु 'अत्र–' इत्यादिः 'अवभासः' इत्यन्तः पाठो नास्ति. २. 'किंच–' इत्यादिः 'काव्यव्यवहारः' इत्यन्तः पाठो नास्ति ग-पुस्तके. ३. इतोऽग्रे 'तेषां रसादीनाम्' इत्यधिकं पुस्तकद्वये

इत्यादौ रसादीनां नगरीवृत्तान्तादिवस्तुमात्रेऽङ्गत्वम्, तत्र तेषामतात्पर्यविषयत्वेऽपि तैरेव गुणीभूतैः काव्यव्यवहारः । तदुक्तमस्मत्सगोत्रकविपण्डितमुख्यश्रीचण्डीदासपादैः—'[1]काव्यार्थस्याखण्डबुद्धिवेद्यस्य तन्मयीभावेनास्वाददशायां गुणप्रधानभावावभासस्तावन्नानुभूयते, कालान्तरे तु प्रकरणादिपर्यालोचनया भवन्नप्यसौ न काव्यव्यपदेशं व्याहन्तुमीशः, तस्यास्वादमात्रायत्तत्वात्' इति[2] ।

केचिच्चित्रारूयं तृतीयं काव्यभेदमिच्छन्ति । तदाहुः—

'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ।'

इति । तन्न । यदि हि अव्यङ्ग्यत्वेन व्यङ्ग्याभावस्तदा तस्य काव्यत्वमपि नास्तीति प्रागेवोक्तम् । ईषद्व्यङ्ग्यत्वमिति चेत्, किं नामेषद्व्यङ्ग्यत्वम् । आस्वाद्यव्यङ्ग्यत्वम्, अनास्वाद्यव्यङ्ग्यत्वं वा । आद्ये

पयुक्तवेषरचनां विधत्ते संपादयति । तेषां रसादीनामतात्पर्यविषयत्वेऽपि तात्पर्यविषयत्वेनाप्रधानत्वेऽपि तैरेव रसादिभिरेव काव्यव्यवहार इति । तथा च यत्रोभयसंकरस्तत्र व्यवहारसंदेहे तथा निरूपितम् । यत्र तूभयसंकरो नास्ति तत्र रसादीनामन्यतमस्य संबन्धमात्रेणैव काव्यव्यवहारः, न तु प्रधानत्वेऽपीति भावः । वाक्यार्थस्य पदार्थसमूहस्य अखण्डबुद्धिवेद्यतया एकबुद्धिग्राह्यतया । नन्वनेकपदार्थानां कथमेकबुद्धिग्राह्यत्वनियम इत्यत आह—**तन्मयीभावेनेति** । अखण्डबुद्धिस्वरूपीभावेन । कालान्तरे आस्वादविनाशदशायाम् । असौ गुणप्रधानभावावभासः । तस्य काव्यव्यपदेशस्य । तथा चोक्तस्थले वाक्यस्य रसादितात्पर्यकत्वाभावेऽपि प्रासङ्गिकरसादिव्यञ्जकत्वेनापि काव्यत्वमक्षतमेवेति भावः । काव्यप्रकाशादिकारमतं दूषयति—**केचिदिति । व्यङ्ग्याभाव इति** । 'विवक्षितः' इति शेषः । **ईषद्व्यङ्ग्यत्वमिति** । 'विवक्षितम्' इत्यनुषज्यते । प्राचीनभेदयोः प्राचीनोक्तध्वनिगुणीभूतव्य-

---

रयतीति त एवात्र प्रमाणम् । एवं चात्र 'शोणमणिप्रकाशः' इति पठनीयम् । अथवा 'यत्रोन्मदानां प्रमदाजनानामभ्रंलिहा विद्रुमवेश्मभासः । संध्याभ्रमं प्राप्नुवतामकालेऽप्युल्लासयन्ति स्मरवेपलीलाम् ॥' इति । अभ्राणि लिहन्तीत्यभ्रंलिहाः । 'वहाभ्रे लिहः' इति खश् । गगनस्पृश इत्यर्थः ॥

---

१. ग-पुस्तके तु 'तदुक्तम्—' इत्यादेः 'पादैः' इत्यन्तस्य स्थाने 'यच्च केचिदाहुः' इति पाठो वर्तते. २. अतोऽग्रे 'तदतीव हृदयगमम् । तथापि यथा सर्वेषां रसानां चमत्कारसत्त्वेनाद्भुतानतिरेकोऽपि मुनिवचनानुरोधेन बहुभेदत्व तथा काव्यस्यापि ध्वनिगुणीभूतव्यङ्ग्यत्वेन द्विधा व्यपदेशः प्राचीनानाम्' इत्यधिक ग-पुस्तके. ३ 'अपि' इत्यधिक ग-पुस्तके. ४. 'काव्य' इति नास्ति ग-पुस्तके. ५. 'तथाहि' ग. ६. 'विकल्पासहत्वात् । तथाहि—किमिदमव्यङ्ग्यत्वं नाम । सर्वथा व्यङ्ग्यरहितत्वं वा, ईषद्व्यङ्ग्यत्वं वा । नाद्यः । अव्यङ्ग्यत्वे काव्याभावस्य प्रतिपादितत्वात् द्वितीये तु किमिदमीषद्व्यङ्ग्यत्वम् ।' इति पाठभेदो ग-पुस्तके.

प्राचीनभेदयोरेवान्तः पातः । द्वितीये त्वकाव्यत्वम् । यदि[1] चास्वाद्यत्वं तदाऽक्षुद्रत्वमेव । क्षुद्रतायामनास्वाद्यत्वात् ।

तदुक्तं[2] ध्वनिकृता—

'प्रधान[1]गुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते ।
उभे काव्ये ततोऽन्यद्यत्तच्चित्रमभिधीयते ॥' इति[3] ।

इति साहित्यदर्पणे ध्वनिगुणीभूतव्यङ्ग्याख्यकाव्यभेदनिरूपणो नाम चतुर्थः परिच्छेदः ।

ङ्ग्ययोः । आद्येऽनुपपत्त्यन्तरमाह—**यदि चेति** । तदा अक्षुद्रत्वमेवेत्यकारप्रश्लेषः । तथा च व्यङ्ग्यस्य आस्वाद्यत्वे क्षुद्रतायोगादनास्वाद्यत्वे काव्यत्वायोगाच्चेषद्व्यङ्ग्यमिति काव्यमपार्थकमेवेति भावः । चित्रस्य काव्यप्रकारत्वाभावे प्राचीनसंवादमप्याह—**तदुक्तमिति** । ततस्ताभ्यां चित्रं काव्याभासमात्रम्, न तु वास्तवं काव्यम् ॥

इति श्रीरामचरणतर्कवागीशभट्टाचार्यविरचितायां साहित्यदर्पणविवृतौ चतुर्थः प्रकाशः ।

---

1. **प्रधानेति** । व्यङ्ग्यार्थस्य प्राधान्ये ध्वनिः, गुणभावे तु गुणीभूतव्यङ्ग्यता । ततोऽन्यद्रसभावादितात्पर्यरहितं व्यङ्ग्यार्थविशेषप्रकाशनशक्तिशून्यं च काव्यं केवलवाच्यवाचकवैचित्र्यमात्राश्रयेणोपनिबद्धमालेख्यप्रख्यं यदाभासते तच्चित्रम् । तच्च द्विविधमिति ध्वनिकृतैवाग्रिमकारिकया व्यवस्थापितम्—'चित्र शब्दार्थभेदेन द्विविधं च व्यवस्थितम् । तत्र किंचिच्छब्दचित्रं वाच्यचित्रमतः परम् ॥' इति । तत्र किंचिच्छब्दचित्रं यथा दुष्करयमकादि । वाच्यचित्रमतः शब्दचित्रादन्यद्व्यङ्ग्यार्थसंस्पर्शरहितं प्राधान्येन वाक्यार्थतया स्थितं रसादितात्पर्यरहितमुत्प्रेक्षादि । अथ किमिदं चित्रं नाम, यत्र न व्यङ्ग्यार्थसंस्पर्शः । तत्र, यत्र वस्तु अलंकारान्तरं वा व्यङ्ग्यं नास्ति स नाम चित्रस्य कल्प्यता विषयः । यत्र तु रसादीनामविषयत्वं स काव्यप्रकारो न संभवत्येव । यस्मादवस्तुसंस्पर्शिता काव्यस्य नोपपद्यते । वस्तु च सर्वमेव जगद्गतमवश्यं कस्यचिद्रसस्य चाङ्गत्वं प्रतिपद्यते । विभावत्वेन चित्तवृत्तिविशेषा हि रसादयः । न च तदस्ति वस्तु किंचिद्यन्न चित्तवृत्तिविशेषमुपजनयति, तदनुत्पादने वा कविविषयतैव तस्य न स्यात् । कविविषयश्च चित्रतया कश्चिन्निरूप्यते । अत्रोच्यते—सत्यम् । न तादृक्काव्यप्रकारोऽस्ति यत्र रसादीनामविप्रतिपत्तिः । किं तु यदा रसभावादिविवक्षाशून्यः कविः शब्दालंकारमर्थालंकारं वोपनिबध्नाति तदा तद्विवक्षापेक्षया रसादिशून्यतार्थस्य परिकल्प्यते । विवक्षोपारूढ एव हि काव्ये शब्दानामर्थः । वाच्यसामर्थ्यवशेन च कविविवक्षाविरहेऽपि तथाविधे विषये रसादिप्रतीतिर्भवन्ती परिदुर्बला भवतीत्यनेनापि प्रकारेण नीरसत्वं परिकल्प्य चित्रविषयो व्यवस्था-

---

१. 'यदि च—' इत्यादिः 'अनास्वाद्यत्वात्' इत्यन्तः पाठो नास्ति ग-पुस्तके. २. 'तथा चोक्तम्' ग. ३. 'ध्वनि' इति क-पुस्तके नास्ति.

प्यते । तदिदमुच्यते—'रसभावादिविषयविवक्षाविरहे सति । अलंकारनिबन्धो यः स चित्रविषयो मतः ॥ रसादिषु विवक्षा तु स्यात्तात्पर्यवती यदा । तदा नास्त्येव तत्काव्यं ध्वनेर्यत्र न गोचरः ॥' इति । एतेन तृतीयकाव्यभेदं प्रत्याचक्षाणस्य ग्रन्थकृतो मतं न सहृदयहृदयमधिरोहति । इत्थं च 'अव्यङ्ग्यम्' इत्यत्र तात्पर्यविषयीभूतव्यङ्ग्यविकलत्वमेवाव्यङ्ग्यपदेनाभिप्रेतम् । अत्र पक्षे 'अतादृशगुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्' इति मध्यमकाव्यलक्षणे व्यङ्ग्यपदं विवक्षितव्यङ्ग्यपरम् । यद्वा अव्यङ्ग्यम् अस्फुटतरातिरिक्तव्यङ्ग्यरहितम् । तादृशं चास्फुटतरव्यङ्ग्यसद्भावे व्यङ्ग्यमात्राभावे वा । ईषत्त्वस्य नञर्थत्वाद् अव्यङ्ग्यमस्फुटतरव्यङ्ग्यमिति कतिपये । वस्तुतस्त्वत्रार्थचित्रशब्दचित्रयोरविशेषेणाधमत्वं वक्तुमयुक्तम् । तारतम्यस्य स्फुटमुपलब्धेः । को ह्येवं सहृदयः सन् 'विनिर्गतं मानदमात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयापि यम् । ससंभ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियामरावती॥' इति, 'स च्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात्पवनावधूतः । अङ्गारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवावभासे ॥' इत्यादिभिरर्थचित्रकाव्यैः 'स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतरास्रुच्छटामूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः । भिन्द्याद्युद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रमद्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥' इत्यादीनां पामरश्लाघ्यानामविशेषं ब्रूयात् । सत्यपि तारतम्ये यद्येकभेदत्वं कस्तर्हि ध्वनिगुणीभूतव्यङ्ग्ययोरीषदन्तरितयोर्विभिन्नभेदत्वे दुराग्रह इति रसगङ्गाधरकाराः । तत्र प्रकाशोन्मीलितबुद्धयस्तु—अव्यङ्ग्यं स्फुटप्रतीयमानार्थरहितं तु अवरं चरमम् । तृतीयकाव्यमित्यर्थः । चरमत्वं च ध्वनिगुणीभूतव्यङ्ग्यापेक्षया कानिष्ठ्यम् । न त्वधमत्वमेव । तस्य चित्राख्यतृतीयकाव्यावान्तरभेदे विवक्षितत्वात् । तच्चित्रमित्यध्याहार्यम् । चित्रं च गुणालंकारयोगि । तच्च शब्दचित्रं वाच्यचित्रमित्यवान्तरभेदेन द्विविधम् । अत्र कल्पे ध्वनिग्रन्थोऽप्यनुकूल एव । 'तत्तुल्यमेवार्थचित्रं मन्तव्यम्' इत्याचार्याभिनवगुप्तोक्तिस्तु प्रौढिवादमात्रपरा । तत्र शब्दचित्रस्य वाच्यचित्रापेक्षयाकृष्टत्वादधमत्वम्' इत्याहुः । एतेन काव्यस्य चातुर्विध्यमतिरोहितमेव । तथाहि—यत्र शब्दार्थौ गुणीभावितात्मानौ कमप्यर्थमभिव्यङ्क्तस्तदुत्तमम् । 'निःशेषच्युतचन्दनम्—' इत्यादि । इदमेव रसगङ्गाधरे उत्तमोत्तममिति व्यपदिश्यते । यत्र व्यङ्ग्यमप्रधानमेव सच्चमत्कारजनकं तन्मध्यमम् । 'राघवविरहज्वालासंतापितसह्यशैलशिखरेषु । शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय ॥' इति पण्डितराजपद्ये जानकीकुशलावेदनेन राघवः शिशिरीकृत इति व्यङ्ग्यमानकस्मिककपिकर्तृकपवनतनयविषयककोपोपपादकतया गुणीभूतमपि दुर्दैववशतो दास्यमनुभवद्राजकलत्रमिव कामपि कमनीयतामावहति । इदमुत्तमम् । यत्र व्यङ्ग्यचमत्कारासमानाधिकरणो वाच्यचमत्कारस्तद्वाच्यचित्रम् । 'विनिर्गतम्—' इत्यादि । इहामरावतीति स्त्रीप्रत्ययकृतकामिनीत्वाध्यवसानमूलोत्प्रेक्षा वाच्यैव चमत्कारविश्रमभूमिः । वीररसचमत्कारोऽशतया वर्तमानोऽप्युत्प्रेक्षाचमत्कृतिक्रोडनिलीनो नागरेतरनायिकाकल्पितकाश्मीरद्रवाङ्गरागनिगीर्णो निजाङ्गगौरिमेव प्रतीयते । इदं मध्यमम् । यत्रार्थचमत्कारोपस्कृतः शब्दचमत्कारः प्रधानं तच्छब्दचित्रम् । 'स्वच्छन्द—' इत्यादि । अत्र शब्दचमत्कारावलीढोऽर्थचमत्कारः क्षाराकूपारपूरपतितगङ्गाप्रवाहमधुरिमेव न विभाव्यते । इदमधमम् ॥

पञ्चमः परिच्छेदः ।

अथ केयमभिनवा व्यञ्जना नाम वृत्तिरित्युच्यते—

वृत्तीनां[1] विश्रान्तेरभिधातात्पर्यलक्षणाख्यानाम् ।
अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम् ॥ १ ॥

ननु व्यङ्ग्यं तावत्काव्यव्यपदेशबीजम् । तच्च व्यञ्जनया बोध्यं वस्तु । तस्या[2] अप्रामाणिकत्वे सर्वमेतदसिद्धमिति । तत्र प्रमाणमुपन्यसितुमुत्थापयति—**अथ केयमिति** । इयं व्यङ्ग्यबोधसाधनी अभिनवा नवीनैरभ्युपगम्यमाना । प्रामाण्योपन्यासाय[3] प्रथमं तस्याः स्वरूपं निरूपयति—**वृत्तीनामिति** । यद्यपि 'विरँतासु–' इत्यादिना व्यञ्जनायाः स्वरूपं निरूपितमेव । 'व्यञ्जनध्वननावगतप्रत्यायनादिर्व्यपदेशवि-

---

1. **वृत्तीनामिति** । अत्रेदं तत्त्वम्—'गङ्गायां घोषः' इत्यत्र गङ्गाशब्दो घोषशब्दश्च सामान्यात्मके जलप्रवाहे आभीरगृहनिकुरम्बे च संकेतितौ । सामान्य एवोपयोगात् । विशेषस्य हि संकेतकरणे आनन्त्यं व्यभिचारश्च स्यात् ततश्चाभिधया जलप्रवाहमात्रं तद्गृहनिकुरम्बमात्रं च प्रतीतमिति प्रथमा कक्ष्या । एतत्प्रतिपाद्यान्यप्रतिपादनायाप्यभिधा न समर्था । 'विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे' इति नयेन "अभिधा शक्तिः विशेष्यं व्यक्तिरूपं धर्मिणं न गच्छेत् न यायात् । यतः विशेषणे जातिरूपे उपाधौ क्षीणशक्तिः विरतव्यापारा । 'नागृहीतविशेषणा बुद्धिर्विशेष्ये चोपजायते' इति न्यायेन 'विशेषणं प्रत्याय्य विरामात्' इत्यर्थकेन तस्या विरम्य व्यापारासंभवात् । 'सामान्यान्यन्यथासिद्धेर्विशेषं गमयन्ति हि' इति न्यायात्तात्पर्यशक्त्या सामान्यान्याधाराधेयभावेनावस्थितं विशिष्टं गङ्गाघोषाद्यागूरयन्तीति तात्पर्येण परस्परान्वितत्वमात्रमेव प्रतीयत इति द्वितीया । जलप्रवाहस्य च घोषाधिकरणत्वमयुक्तमिति प्रमाणान्तरबाधितः सन्गङ्गाशब्दस्तदधिकरणयोग्यं तीरं लक्षयतीति तृतीया । तत्र तावत् 'मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते । रूढेः प्रयोजनाद्वापि–' इति नील्या लक्षणा त्रितयसंनिधावेव भवति । तत्र मुख्यार्थबाधा तावत्प्रत्यक्षादिप्रमाणान्तरमूला । यश्च सामीप्यादिसंबन्धः स च प्रमाणान्तरावगम्य एव । यत्पुनरिदं तीरस्य शैत्यपावनत्वादिलक्षणं प्रयोजनं प्रतीयते तच्छब्दान्तरानुक्तं प्रमाणान्तराप्रतिपन्नं च कुत आगतम् । न तावत्प्रत्यक्षादेतत्प्रतीतिः । अस्मादेव शब्दादवगमासिद्धेः, शब्दार्थे च तस्याप्रवृत्तेः । नाप्यनुमानात् । सामीप्येऽपि शैत्यपावनत्वादेरसंभवादनैकान्तिकत्वात् । न च स्मृतिः । तदनुभवाभावात् । सत्यामपि तस्यां नियतस्मरणं न स्यात् । अस्मादेव च शब्दादेतदेव बुध्यत इति को हेतुः । तस्मादस्यैव शब्दस्यैष व्यापारोऽभ्युपगन्तव्यः । निर्व्यापारस्यार्थप्रतीतिकारित्वाभावात् । स तावन्नाभिधात्मा । समयाभावात् न तात्पर्यात्मा । तस्यान्वयप्रतीतावेव परिक्षयात् । न लक्षणात्मा । मुख्यार्थबाधाद्यभावात् । तस्मादभिधातात्पर्यलक्षणाव्यतिरिक्तश्चतुर्थकक्ष्यानिक्षिप्तो व्यङ्ग्यनिष्ठो व्यञ्जनाव्यापारो व्यञ्जनद्योतनादिसोदरव्यपदेशनिरूपितोऽभ्युपगन्तव्य इति निष्कर्षः ॥

---

१. 'अस्याः' पुस्तकान्तरे. २. 'उपन्यस्यंस्ताम्' पुस्तकान्तरे. ३. 'प्रमाण' पुस्तकान्तरे. ४. 'निवृत्तासु' इति सर्वत्र. ५. 'व्यपदेश' इति पुस्तकान्तरे नास्ति.

अभिधायाः संकेतितार्थमात्रबोधनविरताया न वस्त्वलंकाररसादिव्यङ्ग्यबोधने क्षमत्वम् । न च संकेतितो रसादिः । नहि विभावाद्यभिधानमेव तदभिधानम्, तस्य तदेकरूप्यानङ्गीकारात् ।[1] यत्र च स्वशब्देनाभिधानं तत्र प्रत्युत दोष एवेति वक्ष्यामः । क्वचिच्च 'शृङ्गाररसोऽयम्' इत्यादौ स्वशब्देनाभिधानेऽपि न तत्प्रतीतिः, तस्य स्वप्रकाशानन्दरूपत्वात् ।

अभिहितान्वयवादिभिरङ्गीकृता तात्पर्याख्या वृत्तिरपि[2] संसर्गमात्रे परिक्षीणा न व्यङ्ग्यबोधिनी ।

षया' इत्यनेन तत्र प्रमाणं चोपन्यस्तम्, तथापि दृढप्रत्ययप्रतिपत्तये प्रमाणान्तरोपन्यासार्थं पुनरारम्भः । विश्रान्तेः स्वार्थबोधनेन विरामाद्वृत्तिः शब्दार्थयोरन्यतरस्य व्यापारः । बोधे बोधनिमित्तम् । रसादीनामिति वस्त्वलंकारयोरप्युपलक्षणम् । नन्वभिधैव रसादिबोधं इत्यत आह—**अभिधाया इति** । मात्रपदेन लक्ष्यादिव्यवच्छेदः । विरतायाः पुनरुत्थानाभावादिति प्रागुक्तो हेतुरत्र द्रष्टव्यः । हेत्वन्तरमप्याह—**न चेति** । स्वव्यञ्जकपदसंकेताभाववानित्यर्थः । तेन रसादीनां रसादिपदसंकेतितत्वेऽपि न क्षतिः । **नहीति** । तदभिधानं रसाद्यभिधानम् । विभावादेरेव रसरूपत्वाङ्गीकारादिति भावः । तस्य विभावाद्यभिधानस्य तदेकरूप्यानङ्गीकारात् आस्वादरूपरसादिप्रतीतितादात्म्यस्वीकारात् । तथा च विभावाद्यभिधानानन्तरं जायमानाया आस्वादरूपरसादिप्रतीतेः कारणतया व्यञ्जनावश्यं स्वीकार्येति भावः । तादृशप्रतीते रसादिपदाजन्यत्वमपि प्रतिपादयति—**यत्र चेति** । 'तामुद्वीक्ष्य कुरङ्गाक्षीं रसो नः कोप्यजायत' इत्यादावित्यर्थः । स्वशब्देन रसशृङ्गारादिपदेन अभिधानं रसस्य प्रतिपादनम् । दोष एवेत्येवकारेणास्वादरूपरसप्रतीतिव्यवच्छेदः । ननु रसस्य स्वशब्दाभिधानं काव्ये एव दोषो न तु लौकिकवाक्ये, एवं च काव्यदोषवशात्तादृशी प्रतीतिर्मास्तु, लौकिकवाक्ये तु स्यादेवेत्यत आह—**क्वचिच्चेति** । लौकिकवाक्ये चेत्यर्थः । तत्प्रतीती रसप्रतीतिः । तस्य रसस्य । तथा चाभिधया जायमानस्य बोधस्य स्वप्रकाशत्वाभावादानन्दरूपत्वाभावाच्च न रसस्वरूपत्वस्वीकार इति भावः । कारिकोक्तक्रमेण तात्पर्याख्यवृत्तेरपि व्यङ्ग्यबोधनाक्षमत्वमुपपादयति—**अभिहितेति** । एतच्च वक्तृतात्पर्यविशेषरूपाया व्यञ्जनाया वारणाय । संसर्गमात्रेऽन्वयबोधमात्रे । परिक्षीणा विरता । शब्दश्रुतेरनन्तरं यावानर्थः प्रतीयते तत्र शब्दस्याभिधैव व्यापार

---

१. 'न च रसादिशब्देन शृङ्गारादिशब्देन चाभिधेयत्वम्, तस्य तदन्वयव्यतिरेकानुविधानात् । किं च' इत्यधिकं ग. पुस्तके. २. 'अपि' ग. ३. 'शक्तिः' ग.

यच्च [1]केचिदाहुः—'[2]सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः' इति, यच्च [3]ध्वनिकेनोक्तम्—

'तात्पर्याव्यतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः ।
यावत्कार्यप्रसारित्वात्तात्पर्यं न तुलाधृतम् ॥' इति,

तयोरुपरि '[3]शब्दबुद्धिकर्मणां विरम्यव्यापाराभावः' [3]इति वादिभिरेव पातनीयो दण्डः ।

एवं च [4]किमिति लक्षणाप्युपास्या । दीर्घदीर्घतराभिधाव्यापारेणापि

इति मतं दूषयितुमुत्थापयति—**सोऽयमिति । इषोरिवेति** । अतिदीर्घ इषुव्यापारो यथैकलक्ष्यं भित्त्वा लक्ष्यान्तरमपि भिनत्ति तथैकैवाभिधा वाच्यार्थं बोधयित्वा व्यङ्ग्यार्थमपि बोधयतीति भावः । **तात्पर्येति** । तात्पर्यभेदाभावात् शब्दादेर्व्यञ्जकत्वस्य व्यञ्जनसामर्थ्यस्य न ध्वनिर्न व्यञ्जना नाम । एवं च तात्पर्यमेव व्यङ्ग्यबोधकम् । नन्विदं संसर्गमात्रबोधकं कथं व्यङ्ग्यं बोधयतीत्याह—**यावदिति** । तात्पर्यं हि संसर्गव्यङ्ग्ययोर्बोधकत्वान्न तुलाधृतं न संसर्गमात्रबोधकत्वेन नियन्त्रितमित्यर्थः । नन्वयं न्यायोऽप्रामाणिक एवेत्यत आह—**एवं चेति** । अभिधयैव व्यङ्ग्यबोधस्वीकारे

---

1. **केचिदिति** । भट्टमतोपजीविनो लोल्लटादयः ॥

2. **सोऽयमिति** । यथा बलवता प्रेरित इषुरेकेनैव वेगाख्येन व्यापारेण वर्मच्छेदमुरोभेदं प्राणहरणं च रिपोर्विधत्ते, तथैक एव शब्द एकेनैवाभिधाख्यव्यापारेण पदार्थस्मृतिं वाक्यार्थानुभवं व्यङ्ग्यप्रतीतिं च विधत्ते । अतो व्यङ्ग्यत्वाभिमतस्यार्थस्य वाच्यत्वमेवेति तेषामाशयः ॥

3. **शब्देति** । वाचकस्य लाक्षणिकस्य वा शब्दस्य अभिधया लक्षणया वा सकृच्छाब्दबोधमुत्पाद्य पुनरभिधया लक्षणया वार्थान्तरबोधने सामर्थ्याभावादित्यर्थः ॥

4. **किमितीति** । यदि भवन्मते तादृशाभिधाव्यापारेणैव व्यङ्ग्यार्थोऽवबुध्यते, तर्हि किमर्थं लक्षणा स्वीक्रियते । लक्ष्यार्थस्यापि भवत्कल्पिताभिधाव्यापारेणैव बोधात् । एवं च किमर्थं मीमांसादर्शने भगवता जैमिनिना 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इति सूत्रेण श्रुत्यादिषु पूर्वपूर्वबलीयस्त्वं निरणायि । श्रुतिस्थल इव लिङ्गादिस्थलेऽपि शब्दश्रवणानन्तरं प्रतीयमानानामर्थानां दीर्घदीर्घतराभिधाव्यापारेणैव प्रतीतौ लिङ्गादीनां दौर्बल्ये बीजाभावात् । निरपेक्षो रवः श्रुतिः । अर्थविशेषप्रकाशनसामर्थ्यं लिङ्गम् । परस्पराकाङ्क्षावशात्कचिदेकस्मिन्नर्थे पर्यवसितानि पदानि वाक्यम् । लब्धवाक्यभावानां कार्यान्तरापेक्षाभावाद्वाक्यान्तरेण संबन्ध आकाङ्क्षापर्यवसन्नं प्रकरणम् । स्थानं क्रमः । स चानेकस्याम्नातस्य संनिधिविशेषादाम्नातम् । समाख्या योगबलम् । श्रुत्यादीनां समवाये एकत्रोपनिपाते तेषां मध्ये यदपेक्षया यत्परं तदपेक्षया तद्दुर्बलम् । कुतः ।

---

१. 'ध्वनिकारेण' क-ख; 'ध्वनिना' ग; 'ध्वनिकेन' घ. २. 'इति' नास्ति घ-पुस्तके. ३. 'विरम्यव्यापाराभाववादिभिः' क.

तदर्थबोधसिद्धेः। किमिति[1] च 'ब्राह्मण, पुत्रस्ते जातः। कन्या ते गर्भिणी' इत्यादावपि हर्षशोकादीनामपि न वाच्यत्वम्।

यत्पुनरुक्तं[2] "पौरुषेयमपौरुषेयं च वाक्यं सर्वमेव कार्यपरम्, अतत्परत्वेऽनुपादेयत्वादुन्मत्तवाक्यवत्, ततश्च काव्यशब्दानां निरतिशयसुखास्वादव्यतिरेकेण प्रतिपाद्यप्रतिपादकयोः प्रवृत्त्यौपयिकप्रयोजनानुपलब्धेर्निरतिशयसुखास्वाद एव कार्यत्वेनावधार्यते। 'यत्परः[3] शब्दः स शब्दार्थ' इति न्यायात्" इति।

चेत्यर्थः। **तदर्थेति**। लक्ष्यार्थेत्यर्थः। लक्षणाजन्यबोधानन्तरमपि व्यङ्ग्यबोधायाभिधासत्त्वस्वीकारे लक्षणासत्त्वस्वीकारस्याकिंचित्करत्वादिति भावः। लक्षणाया अस्वीकारे इष्टापत्तेर्दोषान्तरमाह—**किमिति चेति**। न वाच्यत्वमित्यन्वयः। कन्या अदत्तपुत्री। प्रतिपाद्यस्य मुखप्रसादाप्रसादादिभिरनुमितानामपि हर्षशोकादीनां शब्दानन्तरप्रतीतत्वेन वाच्यत्वापत्तिरिति भावः। रसादीनां तात्पर्यग्राह्यत्वमनुमानेन साधयतां मतमाह—**यत्पुनरिति**। पौरुषेयं पुरुषनिष्पन्नं लौकिकं मन्वादिशास्त्ररूपं च। अपौरुषेयं वेदस्वरूपम्। सर्वमेवेति व्यापकताग्रहाय। यद्यदुपादेयं वाक्यं तत्कार्यपरम्। यथा 'घटमानय' इति लौकिकं वाक्यं जलाहरणरूपकार्यतत्परम्। यथा वा 'विश्वजिता यजेत' इति वैदिकं वाक्यं स्वर्गरूपकार्यतत्परमित्यन्वयव्याप्तिरत्रावधेया। व्यतिरेकव्याप्तिं दर्शयति—**अतत्परत्वे इति**। यद्यन्न कार्यतत्परं तदनुपादेयवाक्यम्, यथा उन्मत्तादिवाक्यम्, इति। अनुमितिं दर्शयति—**ततश्चेति**। प्रतिपाद्यस्य श्रोतुः काव्यश्रवणे प्रवृत्तिः, प्रतिपादकस्य वक्तुः काव्यपाठे प्रवृत्तिः, तयोरौपयिकं कारणीभूतफलेच्छाविषयो यत्प्रयोजनान्तरं चतुर्वर्गादि तस्यानुपलब्धेः शब्देनानुपस्थानात्। अवधार्यते तात्पर्येण प्रतिपद्यते। ननु कार्यान्तरवद्रसादिरपि न प्रतीयेतेत्यत आह—**यत्पर इति**। यद्बोधेच्छया उच्चरित इत्यर्थः। शब्दार्थः शब्दप्रतिपाद्यः। एतेन इतरबाधबलात्तात्पर्येण रसादिप्रतिपादकत्वसिद्धिर्दर्शिता। एवं च 'काव्यं कार्यतत्परम्, उपादेयवाक्यत्वात्' इत्यनुमानमवगन्तव्यम्। अत्र काव्यत्वावच्छेदेन साध्यसिद्धिर-

---

अर्थविप्रकर्षात् पूर्वापेक्षया विलम्बेनार्थप्रत्यायकत्वादिति तदर्थः। अत्र विशेषः शाबरभाष्यादावनुसंधेयः॥

1. **किमिति चेति**। शब्दश्रवणानन्तरं यावानर्थः प्रतीयते तावति शब्दस्याभिधैव व्यापार इति मीमांसकनयेन हर्षशोकादीनां किमिति न वाच्यत्वमेवं पूर्वेणान्वयः। तन्मते दीर्घदीर्घतराभिधाव्यापारेणैव हर्षशोकादीनां वाच्यत्वमिति स्यादिति भावः। वाक्येन तदर्थप्रतीतिद्वारा हर्षशोकादय उत्पद्यन्ते, न तु तत्प्रतीतिः। सा तु हर्षशोकादिलिङ्गैर्मुखप्रसादमालिन्यादिभिरनुमानात्प्रत्याय्यत इति हि सिद्धान्तः॥

2. **यदिति**। 'अन्विताभिधानवादिभिः' इति शेषः॥

3. **यदिति**। यदर्थे यस्य शब्दस्य तात्पर्यं स एव शब्दार्थ इति मीमांसकनियमात्॥

तत्र प्रष्टव्यम्—किमिदं तत्परत्वं नाम, तदर्थत्वं वा, तात्पर्यवृत्त्या तद्बोधकत्वं वा । आद्ये न विवादः । व्यङ्ग्यत्वेऽपि तदर्थतानपायात् । द्वितीये तु—केयं तात्पर्याख्या वृत्तिः । अभिहितान्वयवादिभिरङ्गीकृता, तदन्या वा । आद्ये दत्तमेवोत्तरम् । द्वितीये तु—नाममात्रे विवादः । [1]तन्मतेऽपि तुरीयवृत्तिसिद्धेः ।

नन्वस्तु युगपदेव तात्पर्यशक्त्या विभावादिसंसर्गस्य रसादेश्च प्रकाशनम्—इति चेत्, न तयोर्हेतुफलभावाङ्गीकारात् । यदाह मुनिः—'[2]विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति । सहभावे च कुतः सव्येतरविषाणयोरिव कार्यकारणभावः । पौर्वापर्यविपर्ययात् ।

भिमता, तेन काव्यत्वसामानाधिकरण्येन कार्यान्तरप्रतिपादकत्वसिद्धौ न सिद्धसाधनम् । एतन्मतं दूषयति—**तत्रेति । व्यङ्ग्यत्वेऽपीति ।** व्यञ्जनावादिमते सिद्धसाधनमिति भावः । **द्वितीये त्विति ।** अत्राभिधया 'कार्यं कुरु' इत्यादिवाक्ये जलाहरणार्थं 'घटमानय' इत्यादौ च कार्यप्रतिपादके व्यभिचारोऽपि दोषो द्रष्टव्यः । **दत्तमेवेति ।** संसर्गबोधे परिक्षीणत्वात्कार्यबोधनाक्षमत्वं तात्पर्यस्येत्युत्तरम् । तन्मतेऽपि रसादीनां तात्पर्यग्राह्यत्ववादिमतेऽपि । ननु विभावादिसंसर्गबोध-रसादिबोधयोः क्रमिकत्वाङ्गीकार एव दूषणमुक्तम्, यौगपद्याङ्गीकारे तु नास्यावसर इत्यभिप्रायेणाह—**नन्वस्त्विति ।** तयोर्विभावादिसंसर्गबोधरसादिबोधयोः । संयोगात्संसर्गबोधात् । ननु सहोत्पन्नयोरपि तयोः कार्यकारणभाव आस्तामित्यत आह—**सहभावे चेति ।**

---

1. **तदिति ।** अभिहितान्वयवादिमतेऽपि ॥

2. **विभावेति ।** तत्तन्मतानुसारेण प्राग्व्याख्यातस्याप्यमुष्य भरतसूत्रस्य तत्कृतव्याख्यानं प्रदर्श्यते—"विभाव इति कस्मादुच्यते । विभावो विज्ञानार्थः । विभाव्यन्तेऽनेन वागङ्गसत्त्वाभिनया इत्यतो विभावः । विभावितं विज्ञातमित्यनर्थान्तरम् । अत्र श्लोकः—'बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रयाः । अनेन यस्मात्तेनायं विभाव इति संज्ञितः ॥' अथानुभाव इति कस्मादुच्यते । यदयमनुभावयति वागङ्गसत्त्वकृतमभिनयम्, अत्र श्लोकः—'वागङ्गसत्त्वाभिनयैर्यस्मादर्थो विभाव्यते । वागङ्गोपाङ्गसंयुक्तस्त्वनुभाव इति स्मृतः॥' व्यभिचारिण इति कस्मादुच्यते—'वि'-'अभि' इत्येताबुपसर्गौ । चरतिर्धातुः । विविधमाभिमुख्येन रसेषु चरन्ति नयन्तीति व्यभिचारिणः । कथं नयन्ति । उच्यते—यथा सूर्य इदं नक्षत्रमनुवासरं नयतीति । नच तेन बाहुभ्यां स्कन्धेन वा नीयते । किंतु लोकप्रसिद्धमेतत् इति भरतः । तैः संयोगात्संबन्धात् । अत्र 'संयोगात्' इति पञ्चम्या विभावादीनां हेतुत्वमुक्तम् । व्यञ्जकत्वं च तदर्थः" इत्याचार्याभिनवगुप्तपादानुयायिनः । इह दृष्टान्तमपि भरत एवाह—यथाहि गुडादिभिर्द्रव्यैर्व्यञ्जनैरोषधिभिश्च षाडवादयो रसा निवर्तन्ते तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति ॥

---

१. 'कार्यं–' इत्यादिः 'इत्यादौ च' इत्यन्तः पाठः पुस्तकान्तरे नोपलभ्यते.

'गङ्गायां घोषः' इत्यादौ तटाद्यर्थमात्रबोधविरताया लक्षणायाश्च कुतः शीतत्वपावनत्वादिव्यङ्ग्यबोधकता । तेन तुरीया वृत्तिरुपास्यैवेति निर्विवादमेतत् ।

किंच—

बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम् ।
आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो[1] व्यङ्ग्यः ॥ २ ॥

वाच्यार्थव्यङ्ग्यार्थयोर्हि पदतदर्थमात्रज्ञाननिपुणैर्वैयाकरणैरपि[2] सहृदयैरेव च संवेद्यतया बोद्धृभेदः । 'भम धम्मिअ—' इत्यादौ क्वचिद्वाच्ये विधिरूपे निषेधरूपतया, कचित्[3] 'निःशेषच्युतचन्दनम्—'

युगपदुत्पत्तिस्वीकारे चेत्यर्थः । सव्येतरविषाणयोर्वामदक्षिणशृङ्गयोः । इदानीं लक्षणाया व्यङ्ग्यबोधाक्षमत्वं दर्शयति—**गङ्गायामिति**। तेनाभिधादीनां व्यङ्ग्यबोधनाक्षमत्वेन । वाच्यव्यङ्ग्ययोर्भेदमुपपाद्य तेनैवाभिधातो व्यञ्जनाया भेदमुपपादयति—**किंचेति** । 'आश्रयविषयादीनाम्' इत्यनन्तरं चकारो द्रष्टव्यः । बोद्धृभेदमुपपादयति—**वाच्यार्थेति** । पदेति तदर्थेति । पदाभिधेयेत्यर्थः । मात्रपदेन व्यङ्ग्यव्यवच्छेदः । वैयाकरणैरपीत्यादिना सहृदयपरिग्रहः । सहृदयैरेवेत्येवकारेण वैयाकरणव्यवच्छेदः । स्वरूपभेदमुपपादयति—**'भम धम्मिअ इत्यादि** । विधिरूपे वाच्ये सतीत्यन्वयः ।

---

1. **अभिधेयत इति** । अभिधेयतो वाच्यार्थात् । क्वचित्तु 'अभिधीयते' इति पाठः । तत्र 'वाच्यात्' इत्यनुषज्यते ॥

2. **वैयाकरणैरिति** । ध्वनिकारेणाप्युक्तम्—'शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते । वेद्यते स हि काव्यार्थतत्त्वज्ञैरेव केवलम् ॥' इति । 'यदि च वाच्यरूप एवासावर्थः स्यात्तर्हि वाच्यवाचकरूपपरिज्ञानादेव तत्प्रतीतिः स्यात् । अथ वाच्यवाचकलक्षणमात्रकृतश्रमाणां काव्यतत्त्वार्थभावनाविमुखानां स्वरश्रुत्यादिलक्षणमिव प्रतीतानां गन्धर्वलक्षणविदामगोचर एवासावर्थः' इति व्याख्यातं च ॥

3. **क्वचिदिति** । क्वचिद्वाच्ये विधिरूपेऽनुभयरूपो व्यङ्ग्यः । यथा मम—'याहि ममैवैकस्या भवन्तु निःश्वासरोदितव्यानि । मा भूवन्हृतमनसस्त्वयापि तस्या वियोगेन ॥' इत्यत्र न विध्यभावरूपो निषेधो नापि विध्यन्तरम् । क्वचिद्वाच्ये निषेधरूपेऽनुभयरूपः । यथा मम—'अयि वदनेन्दुविकाशप्रशमितितिमिरोत्करे निवर्तस्व । प्रत्यूहयसि परासामप्यभिसारं हताशे किम् ॥' प्रियतममभिसरन्तीं कांचिन्नायिकां प्रति तद्गृहाभिमुखमागच्छतः प्रियतमस्योक्तिरियं प्रत्यभिज्ञानच्छलेन । अतएवात्मप्रत्यभिज्ञापनार्थं हताशे इति मर्मवचनम् । परासामप्यभिसारं प्रत्यूहयसि, तवाभिमतसिद्धिर्भविष्यतीति का प्रत्याशा । ततश्च मदीयं वा गृहमायाहि त्वदीयं वायामीति तात्पर्यादनुभयरूपो व्यङ्ग्यः ॥

---

१. 'स' घ.

इत्यादौ निषेधरूपे विधिरूपतया च स्वरूपभेदः । 'गतोऽस्तमर्कः' इत्यादौ च वाच्योऽर्थ एक एव प्रतीयते । व्यङ्ग्यस्तु तद्बोद्धादिभेदात् क्वचित् 'कान्तमभिसर' इति 'गावो [2]निरुध्यन्ताम्' इति 'नायकस्याय-मा[3]गमनावसरः' इति 'संतापोऽधुना नास्ति' इत्यादिरूपेणानेक इति संख्याभेदः । वाच्यार्थः शब्दोच्चारणमात्रेण वेद्यः । एष तु तथा-विधप्रतिभानैर्मल्यादिनेति निमित्तभेदः । प्रतीतिमात्रकरणाच्चमत्कार-करणाच्च कार्यभेदः केवलरूपतया चमत्कारितया च प्रतीतिभेदः । पूर्वपश्चाद्भावेन च कालभेदः शब्दाश्रयत्वेन शब्दतदेकदेशतदर्थवर्ण-संघटनाश्रयत्वेन चाश्रयभेदः ।

'[1]कस्स व ण होइ रोसो दट्ठूण पिआएँ सव्वणं अहरम् ।
सभमरपडमग्घाइणिवारिअवामे सहसु एण्हिम् ॥'

निषेधरूपतयेति । व्यङ्ग्यस्येत्यादि । **निषेधरूप इति** । वाच्ये इत्यन्वयः । **स्वरूप-भेद इति** । वाच्यार्थव्यङ्ग्यार्थयोरिति पूर्वेणान्वयः । एवमग्रेऽपि । 'निःशेष–' इत्यत्र लक्षणावादिमतेनेदमुदाहरणमुक्तम् । संख्याभेदमुपपादयति—**गतोऽस्तमिति** । बोद्धा प्रतिपाद्यः । आदिना प्रकरणादीनां ग्रहणम् । भेदाद्वैलक्षण्यात् । निमित्तभेदमु-पपादयति—**वाच्यार्थ इति** । मात्रपदेन प्रतिभानैर्मल्यादिव्यवच्छेदः । शब्दोच्चा-रणं शब्दज्ञानम्, वाच्यार्थबोधे तस्यैव निमित्तत्वात् । एष तु व्यङ्ग्यार्थस्तु । **प्रति-भेति** । गूढार्थग्रहणशक्तिश्च प्रतिभा, तस्या नैर्मल्यं तादृशग्रहणप्रतिबन्धकीभूतदुर-दृष्टासंसर्गः । आदिना वक्त्रादिवैशिष्ट्यज्ञानादिपरिग्रहः । कार्यभेदमुपपादयति–**प्रती-तीति** । मात्रपदेन चमत्कारव्यवच्छेदः । वाच्यस्य प्रतीतिमात्रकरणात् । व्यङ्ग्यस्य तु सुखसंवलितप्रतीतेश्चमत्कारस्य च करणात्तयोः कार्यभेदः । प्रतीतिभेदमुपपाद-यति—**केवलेति** । वाच्यप्रतीतेः सुखचमत्कारहीनतया, व्यङ्ग्यप्रतीतेस्तदुभयव-त्तया भेदः । कालभेदमुपपादयति—**पूर्वेति** । वाच्यार्थव्यङ्ग्यार्थयोः प्रतीतिपौर्वाप-र्येण कालभेदः । आश्रयभेदमुपपादयति—**शब्देति** । वाच्यस्य शब्दमात्राश्रयत्वेन शब्दमात्रसंबन्धित्वेन, व्यङ्ग्यस्य शब्दादिसंबन्धित्वेन तयोराश्रयभेदः । **तदेक-देशेति** । शब्दैकदेशेत्यर्थः । स च प्रकृतिप्रत्ययोपसर्गादिरूपः । **तदर्थेति** । शब्दा-र्थेत्यर्थः । विषयभेदमुपपादयति—**कस्स वेति** । 'कस्य वा न भवति रोषः पश्यतः

---

1. **कस्स वेति** । कस्य वेति अनीर्ष्यालोरपि । सभ्रमरपद्माघ्राणशीले । शीलं हि कथं-चिदपि वारयितुं न शक्यम् । सहस्वेदानीम् । उपालम्भपरम्परामित्यर्थः । अत्रायं भावः— काचिदविनीता कुतश्चित्खण्डिताधरा तत्संविधसंविधाने भर्तरि तमनवलोकयमानयेव कयाचि-द्विदग्धसख्या तद्वाच्यतापरिहारायैवमुच्यते । सहस्वेदानीमिति वाच्यमविनयवतीविषयम् ।

---

१. 'इति' ग. २. 'अव' क. ३. 'अनागमन–' क.

इति सखीतत्कान्तविषयत्वेन विषयभेदः । तस्मान्नाभिधेय एव व्यङ्ग्यः ।

किंच[1] ।

प्रागसत्वाद्रसादेर्नो बोधिके लक्षणाभिधे ।
किंच मुख्यार्थबाधस्य विरहादपि लक्षणा ॥ ३ ॥

'न बोधिका' इति शेषः । नहि[2] कोऽपि रसनात्मकव्यापाराद्भिन्नो रसादिपदप्रतिपाद्यः पदार्थः प्रमाणसिद्धोऽस्ति । यमिमे लक्षणाभिधे बोधयेताम् ।

किंच यत्र 'गङ्गायां घोषः' इत्यादावुपात्तशब्दार्थानां बुभूषन्नेवान्वयोऽनुपपत्त्या बाध्यते तत्रैव हि लक्षणायाः प्रवेशः ।

प्रियायाः सव्रणमधरम् । सभ्रमरपद्माघ्राणनिवारितवामे सहस्वेदानीम् ॥' इति संस्कृतम् । उपनायकदष्टाधरां पत्नीं तर्जयन्तं कान्तं प्रतारयन्त्याः सख्या उक्तिरियम् । **सभ्रमरेति** । सभ्रमरपद्माघ्राणे निवारितापि तत्कारिणी, तत्संबोधने । तथा सहस्व पत्युस्तर्जनां भ्रमरदंशनजन्यव्रणवेदनां च । अत्र वाच्यार्थबोधे सखी उद्देश्या, भ्रमरेणास्या अधरो दष्टो न पुनः पुरुषान्तरेणेति व्यङ्ग्यार्थबोधे कान्त उद्देश्य इति विषयभेदः । सख्या कान्तेन चोभयबोधः संभवतीति न बोद्धृभेदः । उपसंहरति—**तस्मादिति**। नैव व्यङ्ग्य इत्यन्वयः । व्यङ्ग्यान्तरबोधे यथा तथास्तु रसादिबोधस्तु व्यञ्जनावृत्त्यङ्गीकारमन्तरेण सर्वथा न संभवतीत्यभिप्रायेणाह—**प्रागसत्वादिति** । बोधात्पूर्वं प्रमाणान्तरासिद्धत्वादित्यर्थः । प्रमाणान्तरसिद्धमेव वस्तु लक्षणाभिधे बोधयत इति नियमाभिप्रायेणेदम् । रसादिपदं तु व्यञ्जनासिद्धं रसादिमभिधया बोधयतीति न दोषः । लक्षणया रसादिबोधे सामग्र्यन्तरमाह—**किंचेति** । पूर्वार्धं विवृणोति—**नहीति** । व्यापारः कार्यः । द्वितीयार्धं विवृणोति—**किंचेति** । उपात्तशब्दार्थानां वाच्यार्थानां बुभूषन् भवन् । अन्वयोऽन्वयबोधः । अनुपपत्त्या अन्वयानुपपत्तिग्रहेण

भर्तृविषयं तु अपराधो नास्तीत्यावेद्यमानं व्यङ्ग्यम् । तस्यां च प्रियतमेन गाढमुपालभ्यमानायां तद्व्रीडशङ्कितप्रातिवेश्मिकलोकविषयं चाविनयच्छादनेन प्रत्यायनं व्यङ्ग्यम् । तत्सपत्न्यां च तदुपालम्भतदविनयप्रहृष्टायां सौभाग्यातिशयख्यापनं प्रियाया इति शब्दबलादिति सपत्नीविषयं व्यङ्ग्यम् । सपत्नीमध्ये इयत्खलीकृतासीति लाघवमात्मनि ग्रहीतुं न युक्तम्, प्रत्युतायं बहुमानः, सहस्व शोभस्वेदानीमिति सखीविषयं सौभाग्यप्रख्यापनव्यङ्ग्यम् । अद्येयं तव प्रच्छन्नानुरागिणी हृदयवल्लभेत्थं रक्षिता पुनः प्रकटरदनदंशनविधिर्न विधेय इति तच्चौर्यकामुकविषयसंबोधनं व्यङ्ग्यम् । इत्थं मयैतदपह्नुतमिति स्ववैदग्ध्यख्यापनं तटस्थविदग्धलोकविषयं व्यङ्ग्यमिति लोचनकाराः ॥

---

१. 'तथा' क-घ. २. 'नहि—' इत्यादि 'प्रवेशः' इत्यन्तं ग-पुस्तके नास्ति.

यदुक्तं न्यायकुसुमाञ्जलावुदयनाचार्यैः—

'श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति ।
पदार्थान्वयवैधुर्यात्तदाक्षिप्तेन संगतिः ॥'

[5]न पुनः 'शून्यं वासगृहम्—' इत्यादौ मुख्यार्थबाधः । [1]यदि च 'गङ्गायां घोषः' इत्यादौ प्रयोजनं लक्ष्यं स्यात्, तीरस्य मुख्यार्थत्वं [2]बाधितत्वं च स्यात्, [3]तस्यापि च लक्ष्यतया प्रयोजनान्तरं [4]तस्यापि प्रयोजनान्तरमित्यनवस्थापातः ।

बाध्यते प्रतिबध्यते। **श्रुतान्वयादिति**। वाच्यार्थान्वयबोधजननादित्यर्थः। अन्यदर्थान्तरमिच्छति आकाङ्क्षति । पदार्थान्वयवैधुर्यात् मुख्यार्थान्वयानुपपत्तिग्रहात् । तदाक्षिप्तेन मुख्यार्थसंबन्धितया गृहीतेन । संगतिरन्वयबोधः । प्रकृते मुख्यार्थबाधाभावं दर्शयति—**न पुनरिति**। व्यङ्ग्यस्य लक्षणाबोध्यत्वाङ्गीकारे अनवस्थादोषमाह—**यदि चेति**। प्रयोजनं शीतत्वपावनत्वाद्यतिशयः । लक्ष्यं लक्षणाबोध्यम् । 'तदा' इति शेषः । **बाधितत्वं चेति**। चकारेण पावनत्वाद्यतिशयेन लक्षणीयेन संबन्धश्चेत्यपि बोध्यम्। न च तीरे पावनत्वाद्यतिशयस्य संबन्धसत्त्वेन कथं तदापत्तिरिति वाच्यम् । तीरे त्वाहार्यप्रतीतिविषयस्य प्रवाहवृत्तिपावनत्वाद्यतिशयस्य संबन्धाभावात्, परस्परासंबन्धस्याव्यावर्तकत्वेन लक्षणाहेतुत्वाभावात्। तटादिनिष्ठपावनत्वादेस्तु गङ्गापदेनानुपस्थितेरकिंचित्करत्वात्। तस्यापि लक्ष्यमाणप्रयोजनस्यापि । 'लक्ष्यतया' इति विशेषणे तृतीया । लक्ष्यं प्रयोजनान्तरं कल्प्यं स्यादित्यर्थः । एवमग्रेऽपि । अनवस्थायाः प्रकृताप्रतिपत्तिकरत्वं दूषकतावीजम् । विशिष्टलक्षणावादिनां मतं दूषयति—

---

1. **यदि चेति**। अत्रेदं तत्त्वम्—यथा गङ्गाशब्दस्य प्रवाहो मुख्यार्थः, तत्र च बाधः, तीरे च तत्संबन्धः, तीरस्य च लक्षणयोपस्थापनम्, मुख्यशब्देन प्रतिपादयितुमशक्यस्य पावनत्वादेः प्रतीतिश्च प्रयोजनम्, इति गङ्गाशब्देन तीरं लक्ष्यते । एवं यदि तीरमपि गङ्गाशब्दस्य मुख्यं स्यात्, तत्र घोषाधिकरणत्वासंभवरूपो बाधः स्यात्, प्रयोजनस्य च गङ्गादिगतपावनत्वादिविशेषस्य तीरेण साक्षात्संबन्धः स्यात्, लक्षणया प्रयोजनप्रतिपादनस्य च प्रयोजनान्तरं संभवेत्, तर्हि गङ्गाशब्दः प्रयोजनं लक्षयेत् । न चैतत्किमप्यस्ति । यदि चेह तीरगतपावनत्वादिरूपे प्रयोजनेऽपि लक्ष्ये लक्ष्यघोषगतपावनत्वादिरूपं प्रयोजनान्तरमूरीक्रियेत, तदा प्रयोजनपारम्पर्यं लक्षणास्वीकारे प्रयोजनान्वेषणस्यापर्यवसानेन प्रकृतस्य पावनत्वादेस्तीरादेर्वा बोधाभावकृदनवस्था स्यादिति भावः ॥

---

१. 'न–' इत्यादि 'बाधः' इत्यन्तं ग-पुस्तके नास्ति. २. 'बाधितं' क-ग. ३. 'तत्र' ग. ४. 'तत्र'ग; क-पुस्तके तु 'तस्यापि प्रयोजनान्तरम्' इति नास्ति.

न चापि [1]प्रयोजनविशिष्ट एव तीरे लक्षणा। विषयप्रयोजनयोर्युगपत्प्रतीत्यनभ्युपगमात्। [2]नीलादिसंवेदनानन्तरमेव हि ज्ञाततायाः [3]अनुव्यवसायस्य वा संभवः।

नानुमानं रसादीनां व्यङ्ग्यानां बोधनक्षमम्।
आभासत्वेन हेतूनां स्मृतिर्न च रसादिधीः॥ ४॥

न चापीति। प्रयोजनेन पावनत्वाद्यतिशयेन विशिष्टे। तथा च 'अतिपावने तीरे घोषः' इति लक्षणाजन्यो बोधः। तस्य च 'गङ्गातटे घोषः' इत्यभिधाजन्यबोधादधिकार्थप्रतीतिः फलम्। एवं च फलफलिनोरभेद एव पर्यवसन्नः। इममेव दोषमाह—**विषयेति**। विषयः कारणीभूतज्ञानविषयः। प्रयोजनं फलीभूतज्ञानविषयः। **युगपत्प्रतीत्यनभ्युपगमादिति**। एतदभ्युपगमे फलफलिनोरभेदापत्तिरिति भावः। फलफलिनोर्भेदमेव दर्शयति—**नीलादीति**। संवेदनं प्रत्यक्षम्, ज्ञातता प्रकटता, इति। भट्टमते—नीलादौ ज्ञाते हि ज्ञाततारूप एको धर्म उत्पद्यते। **अनुव्यवसाय इति**। नैयायिकमते—नीलादिज्ञाने जाते 'नीलमहं जानामि' इति ज्ञानप्रत्यक्षरूपोऽनुव्यवसायो जायत इत्यादौ फलफलिनोर्भेद एव दृश्यते। भवन्मते तयोरभेदापत्तिः। एतदुपलक्षणम्। गङ्गापदात्प्रतीयमानस्य पावनत्वादेस्तीरे वैशिष्ट्यासंभवोऽपि द्रष्टव्यः। यदि पुनर्दूरतीरापेक्षया समीपतीरे पावनत्वाद्यतिशयः संभवति स एव गङ्गापदेन प्रत्याय्यत इति संभाव्यते तदा नायं दोषः। अत एव 'तीरस्य मुख्यार्थत्वं बाधितत्वं च स्यात्' इत्यत्र ग्रन्थकृता 'पावनत्वाद्यतिशयेन लक्षणीयेन संबन्धश्च' इत्यापत्तिः काव्यप्रकाशोक्तापि नोक्ता। तयोः संबन्धसत्त्वेनापत्त्ययोगात्। नाट्ये रामत्वेनाहार्यज्ञानविषये नटे, काव्ये तु राम एव विभावादिभी रत्याद्यनुमानं ततस्तदनुमानोद्बोधितया सामाजिकानां वासनारूपप्रत्यासत्त्या साक्षात्कृतो रामादिरत्यादी रस इति श्रीशङ्कुमतानुयायिनां व्यक्तिविवेककारादीनां मतं दूषयति—**नानुमानमिति**। अनुमानं व्याप्तिपक्षधर्मताज्ञानम्। आभासत्वेन व्यभिचारादिदोषग्रस्तत्वेन। रसादिबुद्धेः संस्कारजन्यज्ञानत्वेन स्मृतित्वं साधयतां मतं दूषयति—**स्मृतिरिति**। अ-

---

1. **प्रयोजनेति**। प्रयोजनं फलम्। प्रयोजनीभूतज्ञानविषयेण पावनत्वादिना विशिष्टे एव गङ्गातीरे लक्षणा। तथा च कारणत्वेन तीरत्वज्ञानविपर्यात् कार्यत्वेन पावनत्वज्ञानप्रयोजनस्याभेदे जन्यजनकभावानुपपत्तिः। नैतद्युज्यते। अत एवोक्तम्—'प्रयोजनेन सहितं लक्षणीयं न युज्यते। ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्॥' इति॥

2. **नीलेति**। भट्टनये नीलज्ञानानन्तरं ज्ञातो नील इति प्रत्ययात्तज्ज्ञानेन नीले प्रकटतापरपर्याया ज्ञातता जायते। अस्मिन्मते ज्ञानमतीन्द्रियम्, तज्जन्या ज्ञातता प्रत्यक्षा, तया च ज्ञानमनुमीयते। इयं ज्ञातता नीलविशेष्यक-नीलत्वप्रकारकज्ञानजन्या नीलवृत्ति-नीलत्वप्रकारकज्ञाततात्वाद् या यद्वृत्तिर्यत्प्रकारिका ज्ञातता सा तद्विशेष्यकतत्प्रकारकज्ञानसाध्या। यथा पीते पीतत्वप्रकारिका ज्ञाततेत्यनुमितिः॥

3. **अन्विति**। संवित्त्यपरपर्यायस्येत्यर्थः॥

[1]व्यक्तिविवेककारेण हि—"यापि विभावादिभ्यो रसादीनां प्रतीतिः सानुमान एवान्तर्भवितुमर्हति । विभावानुभावव्यभिचारिप्रतीतिर्हि रसादिप्रतीतेः साधनमिष्यते, ते हि रत्यादीनां भावानां कारणकार्यसहकारिभूतास्तानुमापयन्त एव रसादीन्निष्पादयन्ति, त एव प्रतीयमाना आस्वादपदवीं गताः सन्तो रसा उच्यन्त इति, अवश्यंभावी तत्प्रतीतिक्रमः केवलमाशुभावितया न लक्ष्यते, यतोऽयमद्याप्यभिव्यक्तिकः" इति यदुक्तम्, तत्र प्रष्टव्यम्—किं शब्दाभिनयसमर्पितवि-

---

त्रापि प्रागुक्तहेतोरन्वयः । तन्मतं दूषयितुं परिष्करोति—**व्यक्तिविवेककारेण हीति** । 'यदुक्तम्' इत्यग्रेणान्वितम् । **यापीति** । अनुमाने एव अनुमितावेव । एवकारेण परानुमतव्यञ्जनाजन्यबोधव्यवच्छेदः । अत्र कारणमाह—**विभावानुभावेति** । हिशब्दो हेतौ । ननु विभावादिप्रतीतेर्व्याप्तिज्ञानत्वाभावात्कथं तज्जन्यरसादिप्रतीतेरनुमितित्वम्, अतो विभावादीनां व्याप्यत्वमुपपादयति—**ते इति** । विभावादयो हीत्यर्थः । धूमादिकारणमार्द्रेन्धनादि यथा धूमादिव्याप्यम्, वह्न्यादिकार्यं धूमादि वह्न्यादिव्याप्यम्, तथा रत्यादेः कारणं विभावः, कार्यमनुभावश्च रत्यादिव्याप्य इति भावः । तान्रत्यादीन् । **अनुमापयन्त इति** । स्वविषयकव्याप्तिपक्षधर्मताज्ञानेन बोधयन्त इत्यर्थः । रसादि प्रति विभावादीनां कारणत्वमुपपादयति—विभावादय एवेत्यर्थः । आस्वादपदवीं प्रत्यक्षविषयताम् । तथा च पयो यथाम्लयोगेन दधित्वं प्राप्नुवद्भ्रः कारणमुच्यते तथा विभावादयोऽप्यनुमीयमानरत्यादियोगेन रसादिरूपतां प्राप्नुवन्तो रसादेः कारणमुच्यन्त इति भावः । नन्वेतादृशकार्यकारणभावस्वीकारे रसादेरसंलक्ष्यक्रमव्यङ्ग्यत्वं कथमुपपन्नमत आह—**अवश्यंभावीति** । तासां विभावादिप्रतीतीव्याप्तिपक्षधर्मताग्रहरसाद्यनुमित्यास्वादरूपाणां प्रतीतीनां क्रमः पौर्वापर्यम् । आशुभावितया शीघ्रोत्पन्नतया असौ क्रमः । तथा चासां शतपत्रव्यतिभेदवत्क्रमसत्त्वेऽपि सूक्ष्मकालतया स न लक्ष्यत इति भावः । ननु भवतामिदमधिकं कल्पनमत आह—**यत इति** । अयमीदृशः, अद्यापि रसादेर्व्यङ्ग्यत्वस्वीकारेऽपि अभिव्यक्तिर्व्यञ्जनाजन्यबोधः । यथा भवतां बोधः—प्रथमं विभावाद्युपस्थितिः ततो रत्यादिव्यञ्जनम्, ततः साधारण्याभिमानः, ततो रसाद्युत्पत्तिः, इति क्रमसत्त्वेऽपि रसादेरसंलक्ष्यक्रमत्वमुपपन्नं तथास्माकमपीति भावः । **शब्दाभिनयेति** । दृश्यश्रव्यरूपकाव्यद्वयाभिप्रायेण । **समर्पितेति** । जनितेत्यर्थः ।

---

1. **व्यक्तीति** । व्यक्तिविवेककारेण महिमभट्टेनेत्यर्थः । एतेन सपरिकरस्य ध्वनेरनुमितावन्तर्भावं कर्तुं व्यक्तिविवेको निरमायि । तथा चोक्तम्—'अनुमानेऽन्तर्भावं सकलस्यैव ध्वनेः प्रकाशितुम् । व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम् ॥'

---

१. ग-पुस्तके तु 'व्यक्ति-' इत्यादिः '-लिङ्गिनो ज्ञानम्' इत्यन्तः संदर्भो नास्ति.

भावादिप्रत्ययानुमितरामादिगतरागादिज्ञानमेव रसत्वेनाभिमतं भवतः, तद्भावनया भावकैर्भाव्यमानः स्वप्रकाशानन्दो वा। आद्ये न विवादः। किंतु 'रामादिगतरागादिज्ञानं रससंज्ञया नोच्यतेऽस्माभिः' इत्येव विशेषः। द्वितीयस्तु व्याप्तिग्रहणाभावाद्धेतोराभासतयासिद्ध एव। यच्चोक्तं तेनैव—'यत्र यत्रैवंविधानां विभावानुभावसात्त्विकसंचारिणामभिधानमभिनयो वा तत्र तत्र शृङ्गारादिरसाविर्भावः' इति सुग्रहैव व्याप्तिः[1] पक्षधर्मता[2] च।

तथा—

'यार्थान्तराभिव्यक्तौ वः सामग्रीष्टा निबन्धनम्[3]।
सैवानुमितिपक्षे नो गमकत्वेन संमता॥' इति।

इदमपि नो न विरुद्धम्। नह्येवंविधा प्रतीतिरास्वाद्यत्वेनास्माकम-

---

भवतस्तव। तद्भावनया विभावादिबोधेन। भावकैः सामाजिकैः। भाव्यमान आस्वाद्यमानः। स्वेन आत्मना प्रकाशो यस्य सः। 'रसत्वेनाभिमतः' इति लिङ्गव्यत्ययेनान्वयः। असिद्धो नानुमितिविषयः। श्रोत्रियजरन्मीमांसकादीनां विभावादिप्रत्ययसत्त्वेऽपि स्वप्रकाशानन्दानुत्पत्तिदर्शनादयं हेतुर्व्यभिचारीति व्याप्तिग्रहाभावात्तस्यानुमानं न संभवतीति भावः। इदानीं विभावनादिव्यापारभागिनामभिधानं स्वशब्देनोपस्थापनम्, अभिनयो नटचेष्टादिभिरुपस्थापनम्। रसाविर्भावो रसाद्युत्पत्तिः। **सुग्रहैवेति।** विभावनादिव्यापारभागि विभावाद्युपस्थानं रसाद्याविर्भावव्याप्यमिति व्याप्तिग्रहः। श्रोत्रियादीनां तु विभावादेरेवोपस्थितिः, न तु विभावनादिव्यापारभागिनः, तत्र तादृग्व्यापारास्वीकारादिति न व्यभिचारः। पक्षधर्मता पक्षसत्त्वं सुग्रहैवेत्यन्वयः। 'अहं रामाद्याविर्भावव्याप्यतादृग्विभावाद्युपस्थानवान्' इति सामाजिकानां व्याप्तिविशिष्टपक्षधर्मताग्रह इत्यवधेयम्। अर्थान्तराभिव्यक्तौ वाच्यादित्रयभिन्नार्थस्य व्यञ्जनया बोधे। व्यञ्जनावृत्तिं स्वीकुर्वतां युष्माकं सामग्री शाब्दबोधादिरूपः कारणसमूहः निबन्धनं प्रधानम्। अनुमितिपक्षे अनुमितिवादिमते तिष्ठतां नोऽस्माकं गमकत्वेन रसाद्यनुमापकत्वेन। दूषयति—**इदमपीति।** नो व्यञ्जनावादिनामस्माकम्। **न विरुद्धमिति।** अस्माभिरपि तादृशानुमानं स्वीक्रियत एवेति भावः। ननु किमधिकं भवान्ब्रवीतीत्यत आह—**नहीति।** न लित्यर्थः। स्वस्वरूपेण प्रकाशमात्रेणैव विश्रान्तो

---

1. **व्याप्तिरिति।** यत्र यत्र धूमस्तत्र तत्र वह्निरिति साहचर्यनियमः। साध्याभाववदवृत्तित्वमित्यर्थः॥

2. **पक्षेति।** व्याप्यस्य (धूमादेः) पर्वतादिवृत्तित्वम्॥

---

१. 'ज्ञानं—' इत्यादिः 'गतरागादि' इत्यन्तः पाठः क-पुस्तके त्रुटितः. २. 'निबन्धिनी' क. ३. 'इति' नास्ति क-पुस्तके.

भिमता । किं तु—स्वप्रकाशमात्रविश्रान्तः सान्द्रानन्दनिर्भरः । तेनात्र सिषाधयिषितादर्थादर्थान्तरस्य साधनाद्धेतोराभासता ।

यच्च 'भम धम्मिअ—' इत्यादौ प्रतीयमानं वस्तु,

'जलकेलितरलकरतलमुक्तपुनःपिहितराधिकावदनः ।
जगदवतु कोकयूनोर्विघटनसंघटनकौतुकी कृष्णः ॥'

इत्यादौ च रूपकालंकारादयोऽनुमेया[1] एव । तथाहि—अनुमानं नाम पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तत्वविशिष्टाल्लिङ्गाल्लिङ्गिनो ज्ञानम् । ततश्च वाच्यादसंबद्धोऽर्थस्तावन्न प्रतीयते । अन्यथातिप्रसङ्गः स्यात् । इति बोध्यबोधकयोरर्थयोः कश्चित्संबन्धोऽस्त्येव । ततश्च बोधकोऽर्थो

विषयीकृतः । सान्द्रस्य निरन्तरस्य आनन्दस्य निर्भरोऽतिशयः । आस्वाद्यत्वेनास्माकमभिमत इत्यर्थः । तेन तादृशानुमितेरास्वाद्यस्वीकारेण । सिषाधयिषितात् साधयितुमिष्टात् अर्थात् स्वप्रकाशानन्दरूपात् । अर्थान्तरस्य भिन्नार्थस्य रसाद्याविर्भावस्य साधनादनुमापनात् । आभासता दुष्टता । इदानीं वस्त्वलंकारयोरप्यनुमानेनैव बोधो न तु तदर्थमपि व्यञ्जनावृत्तिः स्वीकार्येति व्यक्तिविवेककारस्यैव मतान्तरं दूषयितुमुत्थापयति—यच्चेत्यादिपर्यवस्यतीत्यन्तेन । प्रतीयमानं वस्तु अभ्रमणरूपमनुमेयमेवेत्यन्वयः । **जलकेलीति** । राधिकावदने मुक्ते सति तत्र चन्द्रबुद्ध्या रात्रिज्ञानेन विघटनम्, पिहिते सति चन्द्रानुपलब्ध्या रात्र्यभावज्ञानेन तयोर्घटनम् । तयोर्भ्रान्त्या मुहुर्वियोगसंयोगदर्शनेन कौतुकमिति भावः । राधिकावदने चन्द्रारोपणेन रूपकालंकारः । अनुमेया एव, न तु व्यङ्ग्याः । अनुमानत्वमुपपादयति—**तथाहीति** । संदिग्धसाध्यकः, सिषाधयिषाविरहविशिष्टसिद्ध्यभाववान् वा पक्षः[2] । निश्चितसाध्यवान् सपक्षः[3] । साध्याभाववान् विपक्षः[4] । तद्व्यावृत्तत्वं तदवृत्तित्वम् । इयं व्याप्तिः । लिङ्गात्साधनात् लिङ्गि साध्यम् । वाच्यात्तावद्व्यङ्ग्यं प्रतीयत इति वाच्यार्थस्य लिङ्गत्वमभिप्रेत्य तत्र पक्षसत्त्वादित्रयमुपपादयति—**ततश्चेति** । अन्यथा असंबद्धप्रतीतिस्वीकारेऽतिप्रसङ्गः स्यात् । 'भम धम्मिअ—' इत्यादौ भ्रमणाभावस्येव घटाभा-

---

1. **अनुमेया इति** । 'वाच्यस्तदनुमितो वा यत्रार्थोऽर्थान्तरं प्रकाशयति । संबन्धतः कुतश्चित्सा काव्यानुमितिरित्युक्ता ॥' इत्यादिव्यक्तिविवेककारोक्तमार्गेण ॥

2. **पक्ष इति** । यथा धूमवत्त्वे हेतौ पर्वतः ॥

3. **सपक्ष इति** । यथा तस्मिन्नेव हेतौ महानसम् ॥

4. **विपक्ष इति** । यथा पूर्वोक्त एव हेतौ जलाशयः ॥

---

१. 'मात्र' इति क-पुस्तके नास्ति. २. 'वाच्यादसंबद्धो व्यङ्ग्यार्थो न प्रतीयते । तथात्वेऽतिप्रसङ्गात् । ततश्च व्यङ्ग्यस्यञ्जकभावेन संबन्धेन भवतीति व्याप्तत्वेन नियतधर्मिनिष्ठत्वेन त्रिरूपाल्लिङ्गाल्लिङ्गिनो ज्ञानमनुमानं यत्तद्रूपे पर्यवस्यति' ग. ३. 'रसवादिसमतस्य' इत्यधिकं पुस्तकान्तरे.

लिङ्गम्, बोध्यश्च लिङ्गी, बोधकस्य चार्थस्य पक्षसत्त्वं निबद्धमेव। सपक्षसत्त्वविपक्षव्यावृत्तत्वेऽनिबद्धेऽपि सामर्थ्यादवसेये। तस्मादत्र यद्वाच्यार्थालिङ्गरूपालिङ्गिनो व्यङ्ग्यार्थस्यावगमस्तदनुमान एव पर्यवस्यति" इति, तन्न। तथा ह्यत्र "'भम धम्मिअ–' इत्यादौ गृहे श्वनिवृत्त्या विहितं भ्रमणं गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयति" इति यद्वक्तव्यं तत्रानैकान्तिको हेतुः। भीरोरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागेण वा गमनस्य संभवात्। पुंश्चल्या वचनं प्रामाणिकं न वेति संदिग्धासिद्धश्च।

'जलकेलि–' इत्यत्र 'य आत्मदर्शनादर्शनाभ्यां चक्रवाकविघटनसंघटनकारी स चन्द्र एव' इत्यनुमितिरेवेयमिति न वाच्यम्।

वादेरपि बोधः स्यात्। कश्चित्संबन्ध इव प्रकृते वैपरीत्यरूपः संबन्धः, स एव व्यापकताघटक इति भावः। ततश्च संबन्धस्यावश्यं सत्त्वाच्च पक्षसत्त्वादिज्ञानस्यैवोपयोगित्वात्। तदुपपादयति—**पक्षसत्त्वमिति**। निबद्धं शब्देनोपस्थितम्। सामर्थ्यात्संस्कारबलात्। अवसेये प्रत्येतव्ये। महावाक्यार्थे निरूपयति—**तस्मादिति**। दूषयति—**तन्नेति**। गृहे गृहसमीपे चलरादौ श्वनिवृत्त्या कुक्कुरमरणप्रदर्शनेन विहितं विधिविषयः 'अभ्रमणमनुमापयति' इत्यनेनान्वितम्। अत्र श्वनिवृत्तिविधीयमानगृहसमीपभ्रमणं लिङ्गम्, तच्च भीरुत्वपर्यवसन्नम्। सिंहवद्गोदावरीतीरभ्रमणं साध्यम्। धार्मिकः पक्षः। सामाजिकोऽनुमाता। अनैकान्तिको व्यभिचारी। **भीरोरपीति**। अनेन निरुक्तलिङ्गविशिष्टस्य ग्रहणम्। गमनस्य संभवादिति साध्याभावाप्रदर्शनमसंदिग्धसिद्धं हेतोर्दोषान्तरमाह—**पुंश्चल्या इति**। कुलटाया इत्यर्थः। प्रामाणिकं प्रमाजनकम्। तथा च वचनमिदं किं धार्मिकस्य भयोत्पादकं किंवा कुक्कुरस्पर्शशङ्कासंकुचितभ्रमणस्य तस्य स्वच्छन्दभ्रमणविधायकमिति सामाजिकानां संदेहाद्भीरुत्वसंदेह इति संदिग्धासिद्धो हेतुरिति भावः। अलंकारानुमानं दूषयति—**जलकेलीति**। उत्रासको भयदः।

---

1. **अनुमापयतीति**। 'गोदावरीतीरं भीरुभ्रमणायोग्यं सिंहवत्त्वात्, यन्नैवं तन्नैवम्, यथा गृहम्' इति भ्रमणाभावानुमितिः॥

2. **अनैकान्तिक इति**। एकस्य साध्यस्य तदभावस्य च योऽन्तः सहचारोऽव्यभिचरितसहचारः सोऽन्तः सहचारोऽव्यभिचरितसहचार इत्याशयः। स चात्र व्याप्तिग्राहकः। तथा चैकमात्रव्याप्तिग्राहकसहचारवानैकान्तिकस्तदन्योऽनैकान्तिकः। व्यभिचारी हेतुरित्यर्थः॥

---

१. 'अनुमेये' क. २. 'तत्र' इति नास्ति ग-पुस्तके. ३. 'भ्रमणस्य संभवात्' क. ४. 'पुं–' इत्यादि 'असिद्धश्च' इत्यन्तं ग-पुस्तके नास्ति. ५. ग-पुस्तके 'अनु–' इत्यादेः '–वाच्यम्।' इत्यन्तस्य स्थाने 'तदसत्' इति पाठः.

उत्त्रासकादावनैकान्तिकत्वात्। 'एवंविधोऽर्थ एवंविधार्थबोधक एवंविधार्थत्वात्, यन्नैवं तन्नैवम्' इत्यनुमानेऽप्याभाससमानयोगक्षेमो हेतुः। 'एवंविधार्थत्वात्' इति हेतुना एवंविधानिष्टसाधनस्याप्युपपत्तेः।

तथा 'दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे–' इत्यादौ नलग्रन्थीनां तनूल्लिखनम्, एकाकितया च स्रोतोगमनम्, तस्याः परकामुकोपभोगस्य लिङ्गिनो लिङ्गमित्युच्यते। तच्चात्रैवाभिहितेन स्वकान्तस्नेहेनापि संभवतीत्यनैकान्तिको हेतुः।

आदिना रात्रिसाधर्म्यान्तरस्यापि ग्रहणम्। तादात्म्यसंबन्धेन साध्यस्य चन्द्रस्य वदने बाधाद्बाधोऽपि हेतुदोषोऽत्र द्रष्टव्यः। व्यभिचारभयेन पक्षमात्रवृत्तिहेतुकवस्त्वलंकारानुमानमाह—**एवमिति। एवंविधार्थबोधक इति।** अत्र पक्षीभूतवाक्यार्थेन बोधयितुं योग्या ये येऽर्थास्त एव साध्यकोटिनिविष्टेन एवंविध इत्यनेन धर्तव्याः। अन्यथा वक्तुरभिप्रेतस्यैवार्थविशेषस्य ग्राह्यत्वे 'गतोऽस्तमर्कः' इत्यादौ वक्तुरभिप्रेतार्थमबोधयित्वार्थान्तरबोधके व्यभिचारापातः। हेतोः पक्षमात्रवृत्तित्वेनान्वयदृष्टान्तासंभवादन्वयव्याप्तिग्रहो न संभवतीति व्याप्तिग्रहाय व्यतिरेकोदाहरणमाह—**यन्नैवमिति।** यद्येवंविधार्थबोधकत्वाभाववत्तदेवंविधार्थत्वाभाववदित्यर्थः। 'देवदत्तो भवतीति वाक्यार्थवत्' इति दृष्टान्तोऽत्र द्रष्टव्यः।आभाससमानयोगक्षेमो दुष्टहेतुसमानकार्यकारी। तदेवोपपादयति—**एवमिति।** अनिष्टो वक्तुरनभिमतः। तथा च यथा दुष्टहेतुप्रयोगेण वादिविजयो भवति तथार्थान्तरसाधकहेतुप्रयोगेणापीत्याभासतुल्ययोगक्षेमत्वमिति भावः। अत्रापि व्यभिचारमाह—**तथेति।** एकाकितया चेति चकारो वार्थः। स्रोतोगमनं वेत्यर्थः। लिङ्गं तादात्म्येन साधनम्। तत्प्रागुक्तमर्थद्वयम्। अत्रैव 'दृष्टिं–' इत्यादिश्लोक एव। अभिहितेन द्वितीयपादप्रतिपादितेन। तथा च यत्र स्नेहस्य किं दुष्करमिति जानतां सर्वेषामेव श्रोतॄणां तादृशबोधो न जायते तत्रैव व्यभिचार इति भावः। यदि तु कालान्तरे तादृग्वाक्यप्रयोगेण यस्यकस्यापि श्रोतुस्तादृशार्थबोधाद्व्यभिचारो न भवतीति विभाव्यते, तदात्र 'तद्वाक्यप्रतिपाद्यं तादृशार्थद्वयं परकामुकोपभोगप्रतिपादकं तादृशार्थत्वात्' इत्यनुमाने बाधहेतुदोषो द्रष्टव्यः। यथा—'गन्धप्रागभावकालीनो घटो गन्धवान्' इत्यादौ तत्कालीनसाध्याभावमादाय बाधः। तथात्रापि व्यक्तिविशेषे कालविशेषे वा एवंविधार्थबोधकत्वरूपसाध्याभाव-

---

१. 'दृष्टिं–' इत्यादि 'यच्च' इत्यन्तं ग. पुस्तके नास्ति. २. 'व्यङ्ग्यत्वेनाभिताभिताः' इति पुस्तकान्तरे. ३. 'विपयितासंबन्धेन साध्याः' इति पुस्तकान्तरे. ४. 'अन्यथा' इति पुस्तकान्तरे नास्ति. ५. 'साध्यत्वे' इति पुस्तकान्तरे. ६. 'यथा–' इत्यादिः '–बोध्यः।' इत्यन्तः पाठः पुस्तकान्तरे नास्ति.

[1]यच्च 'निःशेषच्युतचन्दनम्—' इत्यादौ [2]दूत्यास्तत्कामुकोपभोगोऽनुमीयते तत्किं प्रतिपाद्यतया दूत्या, तत्कालसंनिहितैर्वान्यैः, तत्काव्यार्थभावनया वा सहृदयैः । आद्ययोर्न विवादः । तृतीये तु तथाविधाभिप्रायविरहस्थले व्यभिचारः । ननु वक्राद्यवस्थासहकृतत्वेन विशेष्यो हेतुरिति न वाच्यम् । एवंविधव्याप्त्यनुसंधानस्याभावात् ।

किंचैवंविधानां काव्यानां कविप्रतिभामात्रजन्मनां प्रामाण्यानावश्यकत्वेन संदिग्धासिद्धत्वं हेतोः । [2]व्यक्तिवादिना चाधमपदसहायानामेवैषां[3] पदार्थानां व्यञ्जकत्वमुक्तम् । तेन च तत्कान्तस्याधमत्वं प्रामाणिकं न वेति कथमनुमानम् ।

मादाय बाधो बोध्यः । **तत्कामुकेति** । नायिकाकामुकेत्यर्थः । **अनुमीयत इति** । चन्दनच्यवनादिरत्र हेतुः । तत्कालसंनिहितैस्तादृशकथनसमये नायिकासंनिधानवृत्तिभिः । काव्यार्थभावनयेति विशेषणे तृतीया । **न विवाद इति** । चन्दनच्यवनादीनां स्नानादिनापि संभवात् । संभोगव्यभिचारित्वेऽपि तेषां दूतीतत्कालसंनिहितयोः प्रत्यक्षतो वैलक्षण्यसहस्रग्रहसंभवेन व्यभिचारज्ञानानुदयाद् व्याप्तिग्रहः संभवतीति भावः । ननु सामाजिकानामपि निःशेषादिपदाभिप्रायेणैव वैलक्षण्यग्रहो भविष्यतीत्यत आह—**तथाविधेति** । निःशेषादिपदानां संभोगजन्यत्वबोधाभिप्रायविरहस्थल इत्यर्थः । वक्रादीत्यत्रादिगणसंविज्ञानबहुव्रीहिणा प्रतिपाद्यदूतीपरिग्रहः । अवस्था कामुकत्वादिवैशिष्ट्यम् । **एवंविधेति** । प्रतिपाद्यावस्थासहकृतत्वस्य शब्देनानुपस्थानात्प्रमाणान्तरस्य वासंभवादनुपस्थितिरिति कथं तदन्तर्भावेण व्याप्तिग्रह इति

---

1. **यच्चेति** । अयमेवाशयः प्रदीपादौ भङ्ग्यन्तरेण निर्दिष्टः—प्रकृते यानि चन्दनच्यवनादीनि संभोगव्यञ्जकतयोपात्तानि न तानि तद्व्याप्यानि । कारणान्तरादपि संभवात् । अतएवात्र स्नानकार्यत्वेन प्रतिपादितानि । अतोऽनैकान्तिकात्कथमनुमितिः स्यात् । ननु व्यक्तिरपि कथं तैरिति चेत्, अधमपदसाहित्यादिति ब्रूमः । अस्माकमपि तत्साहित्येनानैकान्तिकत्वव्यतिरेक इति चेत्, भवेदप्येवं यद्यधमत्वं प्रमाणादवधारितं भवेत् । नत्वेवमस्ति । व्यक्तिरपि कथं तादृशाद्भवेदिति चेत्, भो देवानांप्रिय, व्यक्तौ न व्याप्तेर्नापि पक्षधर्मताया निर्धारणमङ्गम् । किंतु संभावितादप्येवंविधादेवंविधोऽर्थः प्रतीयत इति तूष्णीं तिष्ठेति प्रदीपादौ व्यक्तम् ॥

2. **व्यक्तिवादिनेति** । व्यक्तिवादिना व्यञ्जनाव्यवस्थापकेनालंकारिकेणेत्यर्थः ॥

3. **एषामिति** । चन्दनच्यवनादीनाम् ॥

---

१. 'यानि चन्दनच्यवनादीनि गमकत्वेनोपात्तानि तानि कारणान्तरादपि भवन्ति । यतः स्नानकार्यत्वेनात्रैवोक्तानि । अतो नोपभोग एव प्रतिबद्धा नीत्यनैकान्तिकानि ।' ग.

एतेनार्थापत्तिवेद्यत्वमपि व्यङ्ग्यानामपास्तम् । अर्थापत्तेरपि पूर्वसिद्ध-व्याप्तीच्छामुपजीव्यैव प्रवृत्तेः । यथा—'यो जीवति स कुत्राप्यवतिष्ठते, जीवति चात्र गोष्ठ्यामविद्यमानश्चैत्रः' इत्यादि ।

किंच वस्त्रविक्रयादौ[1] तर्जनीतोलनेन दशसंख्यादिवत्सूचनबुद्धिवेद्योऽप्ययं न भवति । सूचनबुद्धेरपि संकेतादिलौकिकप्रमाणसापेक्षत्वेनानुमानप्रकारताङ्गीकारात् ।

यच्च 'संस्कारजन्यत्वाद्रसादिबुद्धिः स्मृतिः' इति केचित्, तत्रापि प्रत्यभिज्ञायामनैकान्तिकतया हेतोराभासता ।

भावः । एतेन हेतोराभासत्वेन । नन्वर्थापत्तेर्व्याप्तिग्रहादिनिरपेक्षत्वेन हेतोराभासत्वमकिंचित्करमित्यत आह—**अर्थापत्तेरपीति** । व्याप्तीच्छां व्याप्तिग्रहम् । अर्थापत्तिमाह—**यथेति** । 'चैत्र एतद्गोष्ठीभिन्नस्थानेऽवतिष्ठते' इत्यर्थापत्तिजन्यज्ञानम् । अत्र जीवित्वस्य यत्किंचिदधिकरणावस्थानव्याप्यत्वज्ञानमपेक्षणीयमिति व्याप्तिग्रहप्रदर्शनपुरःसरमर्थापत्तिप्रदर्शनमिदम् । 'जीवति च' इत्यादिकमर्थापत्तिदर्शनम् । तर्जनीतोलनेन तर्जन्युत्क्षेपदर्शनेन । 'सूच्यतेऽनेन' इति सूचनं हस्तचेष्टादिरूपः संकेतस्तद्बुद्धिवेद्यः तद्बुद्धिजन्यबोधविषयः । अयं व्यङ्ग्यपदार्थः । संकेतादीत्यादिपदेन संकेतग्रहवेद्यानां ग्रहणम् । लौकिकप्रमाणसापेक्षत्वेन सहचारग्रहजन्यत्वेन । अनुमानप्रकारताङ्गीकारात् व्याप्तिज्ञानविशेषत्वस्वीकारात् । प्रकृते वक्तुरुक्तिवैचित्र्यविशेषः संकेतः । तद्गोचरव्यङ्ग्यार्थव्याप्तिग्रहेणैव व्यङ्ग्यग्रहः, न तु तदर्थं व्यञ्जना स्वीकार्या । एवं च सति यत्र वक्तुरुक्तिवैचित्र्यविशेषसत्त्वेऽपि सर्वेषामेव श्रोतृणामनभिज्ञतया न व्यङ्ग्यार्थबोधस्तत्रैव व्यभिचार इति, तदपि न सम्यगिति भावः । 'स्मृतिर्न वा' इति कारिकास्थं विवृणोति—**यच्चेति** । संस्कारजन्यत्वात् । अन्यथा संस्कारादौ संस्कारध्वंसादौ तज्जन्यत्वस्य सत्त्वाद् व्यभिचारस्यात्यन्तस्फुटत्वापत्तेः । प्रतिज्ञायां सोऽयमित्याकारकज्ञाने अनैकान्तिकतया साध्यं विना विद्यमानतया हेतोः संस्कारजन्यज्ञानत्वस्य आभासता व्यभिचारिता । एतच्च साधनं रसप्रतीतिकारणीभूतवासनायाः संस्कारविशेषत्ववादिमते । अतिरिक्तत्ववादिमते तु हेतोः पक्षावृत्तित्वेन स्वरूपासिद्धिरपि दोषः न तु व्यभिचारमात्रम् । ये तु प्रत्यभिज्ञायाः स्मृतित्वापत्तिभयेन स्मृतिजन्यत्वमेव मन्यन्ते, न तु संस्कारजन्यत्वम्, तन्मते व्यभिचारो न

---

1. **अर्थापत्तीति** । अर्थापत्तिर्हि जैमिनिशासने प्रमाणत्वेन स्वीक्रियते । सा द्विविधा—दृष्टा, श्रुता च । तत्र दृष्टा—एकस्मिन्पक्षे आत्मभावो गृहीतश्चेदन्यस्मिन्नप्यात्मभावो गृह्यत एव । श्रुता—यथा दिवा देवदत्तो न भुङ्क्ते, अथ च पीनो दृश्यते । अतोऽवगम्यते रात्रौ भुङ्क्त इति ॥

---

१. 'क्रय' घ.

'दुर्गालङ्घित–' इत्यादौ च द्वितीयार्थो नास्त्येव—इति यदुक्तं महिमभट्टेन, तदनुभवसिद्धिमपलपतो गजनिमीलिकैव ।

[1]तदेवमनुभवसिद्धस्य तत्तद्रसादिलक्षणार्थस्याशक्यापलापतया [1]तत्तच्छब्दाद्यन्वयव्यतिरेकानुविधायितया चानुमानादिप्रमाणावेद्यतया चाभिधादिवृत्तित्रयाबोध्यतया च तुरीया वृत्तिरुपास्यैवेति सिद्धम् । इयं च व्याप्त्याद्यनुसंधानं विनापि भवतीत्यखिलं निर्मलम् ।

तत्किंनामिकेयं वृत्तिरित्युच्यते—

सा चेयं व्यञ्जना नाम वृत्तिरित्युच्यते बुधैः ।
रसव्यक्तौ पुनर्वृत्तिं रसनाख्यां परे विदुः ॥ ५ ॥

[2]एतच्च विविच्योक्तं रसनिरूपणप्रस्ताव इति सर्वमवदातम् ॥

इति साहित्यदर्पणे[3] व्यञ्जनाव्यापारनिरूपणो नाम पञ्चमः परिच्छेदः ।

भवतीत्यवधेयम् । अभिधामूलव्यञ्जनामनङ्गीकुर्वतो मतं दूषयति—**दुर्गेत्यादि** । द्वितीयार्थोऽप्राकरणिकार्थबोधः । गजनिमीलिका हस्तिन इव मूर्खत्वम् । उपसंहरति—**तदेवमिति** । तत्तद्रसादिलक्षणार्थस्य तत्तद्रसादिस्वरूपार्थस्य । 'विलक्षणार्थस्य' इति पाठे तत्तद्रसादिरूपस्य । वाच्यादिविलक्षणस्येत्यर्थः । अनुमानादीत्यादिपदेन अर्थापत्त्यादेर्ग्रहणम् । अभिधादीत्यादिपदेन लक्षणातात्पर्ययोर्ग्रहणम् । ननु रसादिग्रहार्थं रसनाख्यावृत्तिः स्वीकृता; कथं तदर्थं व्यञ्जनावृत्तिः स्वीक्रियत इत्यत आह—**रसव्यक्ताविति** । रसप्रतीताविति यावत् । वृत्तिं व्यापारम् । परे नैयायिकाः न त्वालंकारिकाः । तेषामयमाशयः—'वस्त्वलंकारग्रहार्थव्यञ्जनावृत्तिरवश्यं स्वीकार्या, तयैव रसादेरपि ग्रहोऽस्तु । तदर्थमतिरिक्तरसनाख्यवृत्तिस्वीकारेणालम्' इति । न च व्यञ्जनाजन्यबोधस्यास्वादरूपत्वं नास्ति, रसनाख्यव्यापारजन्यबोधस्य तु तदक्षतमिति वाच्यम् । एतादृशनियमस्य शपथनिर्णेयत्वात् । एतद्रसनाख्यवृत्तिस्वरूपम् । अवदातमविरुद्धम् ॥

इति श्रीरामचरणतर्कवागीशभट्टाचार्यविरचितायां साहित्यदर्पणविवृतौ पञ्चमः प्रकाशः ।

---

1. **तत्तदिति** । इहान्वयव्यतिरेकदृष्टान्तेन कश्चिदेव शब्दस्तादृशार्थख्यापनेऽलंकर्मीण इति दर्शितम् । तदुक्तं ध्वनिकारैः—'सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन । यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः ॥' इति । 'व्यङ्ग्यव्यञ्जकाभ्यामेव हि सुप्रयुक्ताभ्यां महाकवित्वलाभो महाकवीनाम्, न वाच्यवाचकरचनामात्रेण' इति व्याख्यातं च ॥

---

१. 'तदेवं–' इत्यादिः '–निर्मलम् ।' इत्यन्तः संदर्भो ग-पुस्तके नास्ति. २. 'एतच्च–' इत्यादि '–अवदातम्' इत्यन्तं ग-पुस्तके नास्ति. ३. 'अलंकारे' इत्यधिकं ग-पुस्तके. ४. 'व्यापार' इति नास्ति क-पुस्तके. ५. 'स्थापनो' घ.

षष्ठः परिच्छेदः ।

एवं ध्वनिगुणीभूतव्यङ्ग्यत्वेन काव्यस्य भेदद्वयमुक्त्वा पुनर्दृश्यश्रव्यत्वेन भेदद्वयमाह—

दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।
दृश्यं तत्राभिनेयं

तस्य रूपकसंज्ञाहेतुमाह—

[1]तद्रूपारोपात्तु रूपकम् ॥ १ ॥

तद्दृश्यं काव्यं नटे रामादिस्वरूपारोपाद्रूपकमित्युच्यते ।

कोऽसावभिनय इत्याह—

[2]भवेदभिनयोऽवस्थानुकारः स चतुर्विधः ।
[3]आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा ॥ २ ॥

नटै रङ्गादिभी रामयुधिष्ठिरादीनामवस्थानुकरणमभिनयः ।

रूपकस्य भेदानाह—

नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः ।

---

[2]अभिनेयं नाट्याद्यभिनीयमानं नायकादिचरितम् । एतच्च 'शब्दबोध्यो व्यनक्त्यर्थः—'इत्युक्तदिशा शब्दोपस्थाप्यमेव । न त्वेवंविधं विभावादिवद्रसाभिव्यञ्जकमपि तत्काव्यम् । काव्यलक्षणायोगात् । यद्वा अभिनेयमत्रास्तीति मत्वर्थीयप्रत्ययेन अभिनेयपदमभिनेयोपस्थापकम् । अनर्घराघवादि रूपकम्, रत्नावल्याद्युपरूपकं च । अवस्था साधर्म्यम्, अनुकारः सदृशीकरणम् । सः अभिनयः । अङ्गेन निष्पन्न आङ्गिकः । एवमग्रेऽपि । वेषरचनादिनिष्पाद्य आहार्यः । सात्त्विकः स्तम्भस्वेदादिरूपः । [र(अ)ङ्गादिभिर्नाट्यादिभिः।] **नाटकमिति**। अङ्क उत्सृष्टाङ्कः। नाटकलक्षण-

---

1. **तदिति** । 'यथा मुखादौ पद्मादेरारोपो रूपकं मतम् । तथैव नायकारोपो नटे रूपकमुच्यते ॥' इति भावः ॥

2. **अभीति** । अयमेवार्थो मन्दारमरन्दे भङ्ग्यन्तरेण प्रतिपादितः—'उत्पादयन्सहृदये रसज्ञानं निरन्तरम् । अनुकर्तृस्थितो योऽर्थोऽभिनयः सोऽभिधीयते ॥' इति । नाट्यशास्त्रे भरतोऽप्याह—'विभावयति यस्माच्च नानार्थान्हि प्रयोगतः । शाखाङ्गोपाङ्गसंयुक्तस्तस्मादभिनयः स्मृतः ॥' इति ॥

3. **आङ्गिक इति** । नाट्यशास्त्रे तु—'त्रिविधस्त्वाङ्गिको ज्ञेयः शारीरो मुखजस्तथा । तथा चेष्टाकृतश्चैव शाखाङ्गोपाङ्गसंयुतः ॥' इत्यनेनाङ्गिकाभिनयस्य त्रैविध्यमुदीरितम् । आङ्गिकोऽभिनयः शाखेति कथ्यते । शिरोहस्तोरःपार्श्वकटीपादलक्षणानि षडङ्गानि । नेत्रभ्रूनासिकाधरकपोलचिबुकरूपाणि षडुपाङ्गानि ॥

---

१. 'वागङ्गादिभिः' ख-ग. २. पुस्तकान्तरे तु 'अभि-' इत्यादिः '-रूपकं च ।' इत्यन्तः पाठो नास्ति, किंतु 'अभिनेयमभिनयः' इत्येव दृश्यते.

ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश ॥ ३ ॥

किंच ।

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥ ४ ॥
संलापकं श्रीगदितं शिल्पकं च विलासिका ।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥ ५ ॥
अष्टादश प्राहुरुपरूपकाणि मनीषिणः ।
विना विशेषणं सर्वेषां लक्ष्म नाटकवन्मतम् ॥ ६ ॥

सर्वेषां प्रकरणादिरूपकाणां नाटिकाद्युपरूपकाणां च ।

[1]तत्र

नाटकं ख्यातवृत्तं स्यात्पञ्चसंधिसमन्वितम् ।
विलासर्द्ध्यादिगुणवद्युक्तं नानाविभूतिभिः ॥ ७ ॥
[1]सुखदुःखसमुद्भूति नानारसनिरन्तरम् ।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः ॥ ८ ॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः ॥ ९ ॥
[2]एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।
अङ्गमन्ये रसाः सर्वे [3]कार्यो [3]निर्वहणेऽद्भुतः ॥ १० ॥

माह—**तत्रेति** । वृत्तं वृत्तान्तः । **विलासेति** । 'धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः' इत्युक्तलक्षणो नायकस्य गुणविशेषो विलासः । ऋद्धिरभ्युदयः । आदिना धैर्यगाम्भीर्यादिग्रहणम् । तत्र नाटके अङ्काः परिच्छेदरूपाः । अङ्गी प्रधा-

---

1. **सुखदुःखेति** । सुखदुःखाभ्यां समुद्भूतिः संभवो यस्य तत् सुखदुःखसमुद्भूति । तदुक्तं मातृगुप्ताचार्यैः—'सुखदुःखोत्पत्तिकृतम्' इति ॥

2. **एक इति** । उत्कर्षाधानाय एक एव रसोऽङ्गित्वेन निवेशयितव्य इत्यर्थः । शृङ्गारो वीरो वेति कथनं तु समुचितरससूचकम् । तेनोत्तररामचरिते करुणस्य, प्रबोधचन्द्रोदये शान्तस्य चाङ्गित्वमभ्याहतम् । अत एवोक्तं ध्वनिकृता—'प्रसिद्धेऽपि प्रबन्धानां नानारसनिबन्धने । एको रसोऽङ्गीकर्तव्यस्तेषामुत्कर्षमिच्छता ॥' इति ॥

3. **निर्वहण इति** । निर्वहणसंधावद्भुतरसस्यावश्यकत्वमुक्तं नाट्यशास्त्रे—'सर्वेषां

---

१. 'तत्र' इति ख-ग-पुस्तकयोर्नास्ति. २. 'कार्यं' क-घ. ३. 'अद्भुतम्' क-घ.

[1]चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः ।
गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तितम् ॥ ११ ॥

[2]ख्यातं रामायणादिप्रसिद्धं वृत्तम् । [3]यथा—रामचरितादि । संधयो वक्ष्यन्ते । नानाविभूतिभिर्युक्तमिति महासहायम् । सुखदुःखसमुद्भूतत्वं रामयुधिष्ठिरादिवृत्तान्तेष्वभिव्यक्तम् । राजर्षयो दुष्यन्तादयः । दिव्याः श्रीकृष्णादयः । दिव्यादिव्यः, यो दिव्योऽप्यात्मनि नराभिमानी । यथा—श्रीरामचन्द्रः । 'गोपुच्छाग्रसमाग्रमिति क्रमेणाङ्काः सूक्ष्माः कर्तव्याः' इति केचित् । अन्ये त्वाहुः—'तथा गोपुच्छे केचिद्बाला ह्रस्वाः केचिद्दीर्घास्तथेह कानिचित्कार्याणि मुखसंधौ समासानि कानिचित्प्रतिमुखे । एवमन्येष्वपि कानिचित्कानिचित् इति ।

प्रत्यक्षनेतृचरितो रसभावसमुज्वलः ।

नम् । निर्वहणे उपसंहाराख्यचरमसंधौ । अद्भुत आश्चर्यरसः । कार्ये नायककर्मणि व्यापृताः सव्यापाराः । बन्धनं गुम्फनम् । तस्य नाटकस्य । रामचरितादीत्यादिना प्रसन्नराघवानर्घराघवादीनां ग्रहणम् । **महासहायमिति** । नानाविधा विभूतिर्नायकाश्रयोदयो येभ्यस्ते 'महान्तः सहाया यत्र' इति व्युत्पत्त्यभिप्रायेण । अदिव्यनायका दुष्यन्तादयः । नराभिमानी नराभेदग्रहवान् । ईश्वरे नरत्वस्य बाधात्तादृशग्रहो भ्रम एव वाच्यः । स चेश्वरे न संभवतीति । तस्य नरचरितावरणं तु लोकशिक्षार्थं मायया एव, न तु नरत्वाभिमानात् । तदुक्तं पाद्मे—'मायामानुषचारित्रो महादेवादिपूजितः' इति । श्रीभागवते च—'भ्रात्रा वने कृपणवत्प्रियया वियुक्तः स्त्रीसङ्गिनां गतिमिति प्रथयंश्चचार' इति । तथा सति दिव्यादिव्यपदार्थ एवं वाच्यः—मानुष्यां देवेनोत्पादितो दिव्यादिव्यो यथा युधिष्ठिरादिः । एवं च श्रीरामचन्द्रोऽपि दिव्यनायक एव । अन्येषु गर्भविमर्शनिर्वहणेषु । अङ्गलक्षणमाह—**प्रत्यक्षेति** । प्रत्यक्षवद्भा-

---

काव्यानां नानारसभावयुक्तियुक्तानाम् । निर्वहणे कर्तव्यो नित्यं हि रसोद्भुतस्तज्ज्ञैः ॥' इति ॥

1. **चत्वार इति** । इह कार्यपुरुषाश्चत्वारः पञ्च वेति यदुक्तम्, तत्प्रायोनियमाभिप्रायेणैव । तथा चाष्टादशाध्याये मुनिराह—'न महाजनपरिवारं कर्तव्यं नाटकं प्रकरणं वा । येनात्र कार्यपुरुषाश्चत्वारः पञ्च वा ते स्युः ॥' इति ॥

2. **गोपुच्छेति** । 'कार्यं गोपुच्छाग्रं कर्तव्यं बन्धमासाद्य' इति भरतसूत्रं व्याचक्षाणानां मतभेदं दर्शयति—गोपुच्छेत्यादिना ॥

---

१. 'ख्यातं' इति नास्ति ख-ग-पुस्तकयोः. २. 'यथा-रामचरितादि' इति नास्ति ख-ग-पुस्तकयोः.

भवेदगूढशब्दार्थः[1] क्षुद्रचूर्णकसंयुतः[2] ॥ १२ ॥
विच्छिन्नावान्तरैकार्थः किंचित्संलग्नबिन्दुकः ।
युक्तो न बहुभिः कार्यैर्बीजसंहृतिमान्न च ॥ १३ ॥
नानाविधानसंयुक्तो नातिप्रचुरपद्यवान्[3] ।
आवश्यकानां कार्याणामविरोधाद्विनिर्मितः ॥ १४ ॥
नानेकदिननिर्वर्त्यकथया संप्रयोजितः[4] ।
आसन्ननायकः पात्रैर्युतास्त्रिचतुरैस्तथा ॥ १५ ॥
दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः ।
विवाहो भोजनं शापोत्सर्गौ[5] मृत्यू रतं तथा ॥ १६ ॥
दन्तच्छेद्यं नखच्छेद्यमन्यद्व्रीडाकरं च यत् ।
शयनाधरपानादि नगराद्यवरोधनम् ॥ १७ ॥
स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः ।
देवीपरिजनादीनाममात्यवणिजामपि ॥ १८ ॥
प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः ।
अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क[6] इति कीर्तितः ॥ १९ ॥

विन्द्वादयो वक्ष्यन्ते । आवश्यकं संध्यावन्दनादि ।

समानं नेतुर्नायकस्य चरितं यत्र । चूर्णकं गद्यप्रभेदः । अवान्तरं महावाक्यार्थैकदेशः। प्रथमार्थप्रकृतिर्बीजम्, निर्वहणाख्यसंधिः संहृतिः, तयोर्नाङ्के विधानम् । किंतु अर्थोपक्षेपके । अत एव 'बीजार्थख्यापकं च तत्' इत्यङ्कमुखलक्षणं वक्ष्यते । विधानं विहितं कर्म । **आवश्यकानामिति** । एषां विरोधो नाङ्के वर्णनीय इति भावः । पात्रैः सहायैः । एभिर्दूराह्वानादिभिः । देवी राजपत्नी । परिजनास्तत्परिचारकाः राजकुमारादयो वा । अन्ते समाप्तौ निष्क्रान्तानि रङ्गान्निर्गतानि निखिलानि पात्राणि

---

1. **अगूढेति** । अगूढः शब्दश्रवणमात्रेणैव झटिति प्रतीयमानः शब्दार्थो यत्र तादृशः । गूढत्वे बोधमान्थर्येणाशु सामाजिकानां हृदयावर्जनायोगादनुपादेयता स्यात् ॥

2. **क्षुद्रेति** । क्षुद्रं स्वल्पम् ॥

3. **नातीति** । एतेन गद्यपद्यानां तारतम्येन निवेशो विधेय इति सूचितम् । तथा चाष्टादशाध्याये महर्षिणा प्रतिपादितम्—'बहुचूर्णपादवृत्तं जनयति खेदं प्रयोगस्य' इति ॥

4. **नानेकेति** । लघुकथाविहित इत्यर्थः ॥

5. **शापोत्सर्गाविति** । उत्सर्गो मलत्यागः ॥

6. **अङ्क इति** । अङ्कपदस्य निरुक्तिरुक्ता नाट्यशास्त्रे—'अङ्क इति रूढिशब्दो भावैश्च रसैश्च रोहयत्यर्थान् । नानाविधानयुक्तो यस्मात्तस्माद्भवेदङ्कः ॥' इति ॥

अङ्कप्रस्तावाद्गर्भाङ्कमाह—

अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान् ।
अङ्कोऽपरः स गर्भाङ्कः [1]सबीजः फलवानपि ॥ २० ॥

यथा बालरामायणे—रावणं प्रति (कञ्चुकी) ।

'श्रवणैः पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभिः ।
भवदर्थमिव निबद्धं नाट्यं सीतास्वयंवरणम् ॥'

इत्यादिना[2] विरचितः सीतास्वयंवरो नाम गर्भाङ्कः ।

तत्र पूर्वं पूर्वरङ्गः सभापूजा ततः परम् ।
कथनं कविसंज्ञादेर्नाटकस्याप्यथा[3]मुखम् ॥ २१ ॥

तत्रेति नाटके ।

यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।
कुशीलवाः प्रकुर्वन्ति [4]पूर्वरङ्गः स उच्यते ॥ २२ ॥
प्रत्याहारादिकान्यङ्गान्यस्य[5] भूयांसि यद्यपि ।

नायकतत्सहायादयो यस्य सः । सूत्रधारक्रियमाणं मङ्गलं रङ्गद्वारम् । आमुखं प्रस्तावना । आदिना सभापूजाकविसंज्ञादीनां ग्रहणम् । फलं नायकनिष्पाद्यप्रधानप्रयोजनम् । **भवदर्थमिति** । भवते प्रयोजनमित्यर्थः । इवोत्प्रेक्षायाम् । भवतो बहूनि श्रवणानि लोचनानि च सन्ति, भवतैव तद्द्रष्टुं श्रोतुं च योग्यमित्यर्थः । नाटकरचनापरिपाटीमाह—**तत्रेति** । पूर्वं प्रथमम् । सामाजिकसमूहः सभा, तस्याः पूजा प्रशंसा । ततः पूर्वरङ्गात् । संज्ञादेरित्यादिपदेन गोत्रमातापितॄणां ग्रहणम् । नाटकस्यापीत्यनेन संज्ञाकथनमित्यनेनान्वितम् । नाट्यमभिनेतव्यं वस्तु वर्णनीयपदार्थः । रङ्गं नृत्यस्थानम्, तत्र जायमाना ये विघ्ना नटादिदुरदृष्टजन्योपद्रवास्तदुपशान्तये । कुशीलवाः सूत्र

---

1. **सबीज इति** । बीजं वक्ष्यमाणलक्षणम् ॥

2. **पूर्वेति** । पूर्वं रज्यतेऽस्मिन्निति पूर्वरङ्गः नाट्यशाला । तत्स्थं कर्मापि पूर्वरङ्गशब्देन व्यपदिश्यते । अतः पूर्वरङ्गो नाम रङ्गविघ्नशामको नान्दीपाठगीतवादित्रादिनानाविधाङ्गविशेषो नाट्यादौ कर्तव्यः कर्मविशेषः । भावप्रकाशिकायामप्युक्तम्—'सभापतिः सभासभ्या गायका वादका अपि । नटी नटश्च मोदन्ते यत्रान्योन्यानुरञ्जनात् ॥ अतो रङ्ग इति ज्ञेयः पूर्वं यत्स प्रकल्पते । तस्मादयं पूर्वरङ्ग इति विद्वद्भिरुच्यते ॥' इति ॥

3. **अस्येति** । अस्य पूर्वरङ्गस्य प्रत्याहारादिकानि द्वाविंशत्यङ्गानि । तानि नाट्यशास्त्रस्य पञ्चमाध्याये द्रष्टव्यानि ॥

---

१. 'अत्र' इत्यधिकं क-पुस्तके. २. 'अथो मुखम्' घ.

तथाप्यवश्यं कर्तव्या [1]नान्दी विघ्नोपशान्तये ॥ २३ ॥

[2]तस्याः स्वरूपमाह—

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥ २४ ॥

धारप्रधाना नटाः । अस्य पूर्वरङ्गस्य । तस्या नान्द्याः। **आशीरिति**। स्तुतिर्गुणकीर्तनम् । प्रयुज्यते क्रियते । 'स्तुतिः' इत्यत्र 'नित्यम्' इति पाठे 'स्तुतिः' इत्यध्याहार्यम् । नृपादीनामित्यादिना गुर्वादिपरिग्रहः । नान्दीपदेन आशीर्मङ्गल्यं वस्तु वोच्यते ।

---

1. **नान्दीति**। नान्दीपदव्युत्पत्तिरुक्ता नाट्यप्रदीपे—'नन्दन्ति काव्यानि कवीन्द्रवर्गाः कुशीलवाः पारिषदाश्च सन्तः । यस्मादलं सज्जनसिन्धुहंसी तस्मादियं सा कथितेह नान्दी॥' इति । तत्र भरतः प्रथमाध्याये—'पूर्वं कृता मया नान्दी आशीर्वचनसंयुता । अष्टाङ्गपदसंयुक्ता प्रशस्ता वेदसंमता ॥' इति । पञ्चमाध्याये च—'सूत्रधारः पठेन्नान्दीं मध्यमं स्वरमाश्रितः । नान्दीं पदैर्द्वादशभिरष्टाभिर्वाप्यलंकृताम्॥' इति च । श्लोकोऽयमभिनवगुप्तपादाचार्यैर्भरतटीकायामभिनवभारत्यां व्याख्यातः—'अनेन त्र्यस्रतालानुगता त्रिपदा षट्पदा द्वादशपदेति चतुरस्रतालानुगता चतुष्पदा अष्टपदा षोडशपदेति पृथक्त्रिविधैव । नातः परमपि भूयस्त्वादाहृतेति । पदानि श्लोकावयवभूतानि तिङन्तानि सुबन्तानि वा श्लोकतुरीयांशरूपाणि वा, अवान्तररूपाणि वा' इति व्याख्याय पुनरुक्तम्—'आचार्यस्वरसात्त्ववान्तरवाक्येष्वेव पदत्वम्' इति । एतदेवाभिप्रेत्य नाट्यप्रदीपे—'श्लोकपादः पदं केचित्सुप्तिङन्तमथापरे । परेऽवान्तरवाक्यैकस्वरूपं पदमूचिरे ॥' इति प्रतिपादितम् । तथा च पञ्चमाध्याये महर्षिणा—'नमोऽस्तु सर्वदेवेभ्यो, द्विजातिभ्यस्ततो नमः । जितं सोमेन वै राज्ञा, शिवं गोब्राह्मणाय च ॥ ब्रह्मोत्तरं तथैवास्तु, हता ब्रह्मद्विषस्तथा । प्रशास्त्विमां महाराजः पृथिवीं च ससागराम् ॥ राष्ट्रं प्रवर्धतां चैव, रङ्गस्याशा समृध्यतु । प्रेक्षाकर्तुर्महान्धर्मो भवतु ब्रह्मभाषितः ॥ काव्यकर्तुर्यशश्चापि धर्मश्चापि प्रवर्धतां । इज्यया चानया नित्यं प्रीयन्तां देवता इति ॥' इत्यवान्तरवाक्यरूपा द्वादशपदा नान्दी प्रदर्शिता । श्लोकतुर्यांशः पदमिति मतेऽष्टपदेयम् । तत्र टीकाकारैरष्टपदोदाहृता यथा विलक्षकुरुपतौ—'आनन्दं विदधातु, पद्मवसतिः शंभुः शिवं यच्छतु, श्रीनाथः श्रियमातनोतु, तनुतां सीतापतिर्वाञ्छितम् । हेरम्बः कुरुतामविघ्नमनघं, वाग्ब्रह्म विद्योततां, व्यासोक्तं तदुदेतु वस्तु, भरतो नाट्येऽस्तु नः कौतुकी॥' इति । श्लोकतुर्यभागः पदमिति मते चतुष्पदेयं नान्दी । किंच 'यस्यां बीजस्य विन्यासो ह्यभिधेयस्य वस्तुनः । श्लेषेण वा समासोक्त्या नान्दी पत्रावली तु सा ॥' इति नाट्यदर्पणे तस्या विशेषसंज्ञाभिहिता, तत्र 'या सृष्टिः—' इति पद्यमुदाहार्यम् । इयं च चतुरस्रतालानुसारिणी नाट्यशास्त्रकारभरत–तट्टीकाकाराभिनवगुप्तपादाचार्यसंमतावान्तरवाक्यरूपाष्टपदा नान्दीति सर्वतन्त्रस्वतन्त्र–राघवभट्टपादाः । अपि च 'नीली शुद्धेति भेदेन सा नान्दी द्विविधा भवेत् । उपादानं वर्णनं वा भवेद्यत्रेन्दुसूर्ययोः । सा नीली स्यात्तदन्या तु शुद्धेति परिगीयते ॥' इति तद्भेदः काव्येन्दुप्रकाशे । तत्र पुष्पवदुपादानेन

---

१. 'अस्याः' क.

मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनि ।
[1]पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥ २५ ॥

अष्टपदा यथा अनर्घराघवे—'[2]निष्प्रत्यूहम्—' इत्यादि । द्वादशपदा यथा मम तातपादानां पुष्पमालायाम्—

'शिरसि धृतसुरापगे स्मरारा-
वरुणमुखेन्दुरुचिर्गिरीन्द्रपुत्री ।
अथ चरणयुगानते स्वकान्ते
स्मितसरसा भवतोऽस्तु भूतिहेतुः ॥

एवमन्यत्र ।

[3]एतन्नान्दीति कस्यचिन्मतानुसारेणोक्तम् । वस्तुतस्तु 'पूर्वरङ्गस्य रङ्गद्वाराभिधानमङ्गम्' इत्यन्ये ।

तदन्यतरयोगाद्देवादीनां स्तुतिरपि नान्दीति भावः । आशीर्वचनयुक्ता, मङ्गल्यशङ्खादिशंसिनी वा । शङ्खेत्यादिमालाद्युपलक्षणम् । तेन 'मध्याह्नार्कमरीचिकास्विव पयःपूरो यदज्ञानतः—' इत्यादौ स्वकशब्दप्रयोगेण नान्दीत्वमक्षतम् । पदैः सुबन्ततिङन्तान्यतरैः । द्वितीयपदशब्देन श्लोकचतुर्थभाग उच्यते । अत एवोभयत्र पदशब्दोपन्यासः केचित्तु रत्नावल्यादौ श्लोकत्रयेण नान्दीदर्शनात्प्रथमपदस्य श्लोकचतुर्थभागपरत्वं वदन्ति । तन्न । 'इदं गुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे । विन्देम देवतां वाचमस्तामात्मनः कलाम् ॥' इत्यादेरुत्तररामचरितादौ प्रणीताया द्वादशपदाया नान्द्या असंग्रहापत्तेः । एवं चाष्टाभिरिति तदधिकोपलक्षणत्वेन श्लोकत्रयेणापि नान्दी संगच्छते । अत एव महानाटके त्र्यधिकैः श्लोकैर्नान्दी कृता । नन्वभिज्ञानशकुन्तलायां 'या सृष्टिः स्रष्टुः—' इत्यादौ द्वादशाधिकपदघटितैकश्लोकप्रणीताया नान्द्याः कथं संग्रह इति चेत्, तस्याः 'कालिदासादिमहाकविप्रबन्धेषु च' इत्यनेन ग्रन्थकृतैव नान्दीत्वाभावस्य वक्ष्यमाणत्वात् । एतत् सूत्रधारादिक्रियमाणं मङ्गलम् । 'कस्यचित्' इत्यनेनास्वरसः सूचितः । तर्हि तस्य किं नामेत्यत आह—**वस्तुतस्त्विति** । रङ्गद्वाराभिधानं रङ्गद्वारनामकम् । 'अन्ये' इति बहुसंमतत्वेनात्र स्वस्या-

---

'या सृष्टिः—' इति नीली । तद्वर्णनेन 'निष्प्रत्यूहमुपास्महे—' इति नीली । 'वेदान्तेषु यमाहुरेकपुरुषं—' इति शुद्धा ॥

1. **पदैरिति** । अत्र विशेषो मन्दारमरन्दे—'अष्टभिर्दशभिः श्रेष्ठा तथा द्वादशभिः पदैः । अष्टादशपदैर्वापि द्वाविंशत्या पदैर्युता ॥' इति संक्षेपः ॥

2. **निष्प्रत्यूहमिति** । 'निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीचक्षमगः कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने । याभ्यामर्धविबोधमुग्धमधुरश्रीरर्धनिद्रायितो नाभीपल्वलपुण्डरीकमुकुलः कम्बोः सपत्नीकृतः ॥' इति ॥

---

१. 'एषा' क. २. 'इत्युच्यते' घ.

यदुक्तम्—

'यस्मादभिनयो ह्यत्र प्राथम्यादवतार्यते ।
रङ्गद्वारमतो ज्ञेयं वागङ्गाभिनयात्मकम् ॥' इति ।

उक्तप्रकारायाश्च नान्द्या रङ्गद्वारात्प्रथमं[1] नटैरेव कर्तव्यतया न महर्षिणा निर्देशः कृतः ।

कालिदासादिमहाकविप्रबन्धेषु[2] च—

'वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥'

एवमादिषु नान्दीलक्षणायोगात् उक्तं च—'रङ्गद्वारमारभ्य कविः कुर्यात्—' इत्यादि । अत एव प्राक्तनपुस्तकेषु 'नान्द्यन्ते सूत्रधारः' इत्यनन्तरमेव 'वेदान्तेषु—' इत्यादि श्लोकलिखनं दृश्यते । यच्च पश्चात्

पि स्वरसः सूचितः । अत्र मुनेरपि स्वरसमाह—**यदुक्तमिति** । अत्र सूत्रधारक्रियमाणे मङ्गले प्राथम्यात् आरम्भं विधाय अवतार्यते क्रियते । रङ्गस्य रङ्गक्रियमाणाभिनयस्य द्वारमारम्भः । तस्य नान्दीत्वे मुनेरस्वरसमाह—**उक्तप्रकारायाश्चेति** । चशब्दो हेतौ । महर्षिणा भरतेन । निर्देशो नियमः । तथा च रङ्गद्वारात्पूर्वमेव नान्दी, सा निर्विघ्नं ग्रन्थसमाप्तये कविनापि क्रियत इति भावः । अव्याप्तिमप्याह—**कालिदासादिमहाकविप्रबन्धेषु चेति** । नान्दीलक्षणायोगाच्चेति चकारस्यान्वयः । **वेदान्तेष्विति** । एकपुरुषमद्वितीयं ब्रह्म । रोदसी द्यावापृथिव्यौ । अनन्यविषयस्तन्मात्रप्रतिपादकः । यथार्थाक्षरो योगार्थः[2] । अन्तर्मनसि । नियमितप्राणाः प्राणायामः । आदिना ध्यानधारणादेर्ग्रहणम् । मृग्यते ज्ञायते । **नान्दीलक्षणायोगादिति** । अष्टपदत्वद्वादशपदत्वान्यतराभावादित्यर्थः । तथा च 'वेदान्तेषु—' इत्यादि रङ्गद्वारमेव, न नान्दीति । तत्र नान्दीलक्षणागमने दोषो नास्तीति भावः । ननु नान्द्याः कविकरणपक्षे नटकर्मत्वाभावात्कथं नाटकारम्भत्वमत आह—**उक्तं चेति** । 'महर्षिणा' इति पूर्वेणान्वयः । एतदनुकूलमाह—**अत एवेति** । तथा च यत्र नान्द्यस्ति, रङ्गद्वारं नास्ति, तत्र तत्त्रेण सैव रङ्गद्वारम् । यत्र रङ्गद्वारमेवास्ति, न नान्दी,

---

1. **प्रथममिति** । 'नान्दी शुष्कावकृष्टा च रङ्गद्वारं तथैव च' इत्यादिना महर्षिणा पूर्वरङ्गाङ्गभूत-रङ्गद्वारात्पूर्वमेव नान्द्या उद्देशो विहितः ॥

2. **योगार्थ इति** । तथा च ईशितुं शीलमस्येति 'ईश्वरः' इति योगलभ्योऽर्थः शिवे एव घटते, नान्यत्र ॥

---

१. 'अवगम्यते' क. २. 'अतएव कालिदास—' क.

'नान्द्यन्ते सूत्रधारः' इति लिखनं तस्यायमभिप्रायः—नान्द्यन्ते सूत्रधार इदं प्रयोजितवान्, इतःप्रभृति मया नाटकमुपादीयत इति कवेरभिप्रायः सूचित इति ।

पूर्वरङ्गं विधायैव [1]सूत्रधारो निवर्तते ।
प्रविश्य स्थापकस्तद्वत्काव्यमास्थापयेत्ततः ॥ २६ ॥
दिव्यमर्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः ।
सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा ॥ २७ ॥

काव्यार्थस्य स्थापनात्स्थापकः । तद्वदिति । सूत्रधारसदृशगुणाकारः । इदानीं पूर्वरङ्गस्य सम्यक्प्रयोगाभावादेक एव सूत्रधारः सर्वं प्रयोजयतीति व्यवहारः स स्थापको दिव्यं वस्तु दिव्यो भूत्वा, मर्त्यं मर्त्यो भूत्वा, मिश्रं च[2] दिव्यमर्त्ययोरन्यतरो भूत्वा सूचयेत् । वस्तु इतिवृत्तम् । यथोदात्तराघवे—

'रामो मूर्ध्नि निधाय काननमगान्मालामिवाज्ञां गुरो-
स्तद्भक्त्या भरतेन राज्यमखिलं मात्रा सहैवोज्झितम् ।
तौ सुग्रीवविभीषणावनुगतौ नीतौ [3]परामुन्नतिं
प्रोत्सिक्ता[4] दशकंधरप्रभृतयो ध्वस्ताः [5]समस्ता द्विषः ॥'

तत्र सा फलबलानुमेया । यत्र त्वारम्भे बहवः श्लोकास्तत्र श्लोकद्वयं नान्दी । अपरे रङ्गद्वारमित्यवधेयम् । नान्द्यनन्तरं कर्तव्यमाह—**पूर्वरङ्गमिति** । काव्यं काव्यार्थम् । आस्थापयेत् सभापूजादिपुरःसरं सूचयेत् । मिश्रं दिव्यादिव्यम् । तयोर्दिव्यादिव्ययोः । वस्तुनः । प्रथमोद्दिष्टत्वेन प्राधान्यात्तदेवादाय विवृणोति—**दिव्यं वस्त्विति । राम इति** । गुरोः पितुः । तद्भक्त्या रामभक्त्या । प्रोत्सिक्ता उद्रिक्त-

---

1. **सूत्रेति** । सूत्रं प्रयोगानुष्ठानं धारयतीति सूत्रधारः । तदुक्तम्—'नाट्योपकरणादीनि सूत्रमित्यभिधीयते । सूत्रं धारयतीत्यर्थं सूत्रधारो निगद्यते ॥' एतल्लक्षणमुक्तं मातृगुप्ताचार्यैः—'चतुरातोद्यनिष्णातोऽनेकभूषासमावृतः । नानाभाषणतत्त्वज्ञो नीतिशास्त्रार्थतत्त्ववित् ॥ नानागतिप्रचारज्ञो रसभावविशारदः । नाट्यप्रयोगनिपुणो नानाशिल्पकलान्वितः ॥ छन्दोविधानतत्त्वज्ञः सर्वशास्त्रविचक्षणः । तत्तद्वीतानुगलयकलातालावधारणः ॥ अवधाय प्रयोक्ता च योक्तृणामुपदेशकः । एवं गुणगणोपेतः सूत्रधारोऽभिधीयते ॥' इति ॥

---

१. 'च' क-पुस्तके नास्ति. २. 'परां संपदम्' ख-ग-घ. ३. 'दुर्वृत्ताः' क; 'प्रोत्खाताः' ख-ग. ४. 'समस्तद्विषः' क.

बीजं यथा रत्नावल्याम्—

'द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥'

अत्र हि समुद्रे प्रवहणभङ्गमग्नोत्थिताया रत्नावल्या अनुकूलदैवलालितो वत्सराजगृहप्रवेशो यौगंधरायणव्यापारमारभ्य रत्नावलीप्राप्तौ बीजम् ।

मुखं श्लेषादिना प्रस्तुतवृत्तान्तप्रतिपादको वाग्विशेषः । यथा—

'आसादितप्रकटनिर्मलचन्द्रहासः
प्राप्तः शरत्समय एष विशुद्धकान्तिः[1] ।
उत्खाय गाढतमसं घनकालमुग्रं[2]
रामो दशास्यमिव संभृतबन्धुजीवः ॥'

पात्रं यथा शाकुन्तले[3]—

'तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥'

दर्पाः । ध्वस्ता विनाशिताः । उत्तरवाक्यद्वये रामेणेति कर्तृपदमूह्यम् । श्लेषादिनेत्यादिपदेन समासोक्त्यप्रस्तुतप्रशंसादेर्ग्रहणम् । **आसादितेति** । चन्द्रहासश्चन्द्रप्रकाशः, खड्गश्च । कान्तिर्नक्षत्रादिज्योतिः, शोभा च । उत्खाय हत्वा । तमो ध्वान्तम्, अज्ञानं च । घनकालं वर्षासमयम् । संभृताः पुष्पपूर्णा बन्धुजीवा बन्धूका यत्र । पक्षे —संभृतो बन्धुषु समरसुहृद्धतवानरेषु जीवो येन । अत्र नायकनामसूचनात्पात्रसूचनमपि संभवति । अस्य पात्रासंकीर्णोदाहरणं यथानर्घराघवे—'यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् । अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥' अत्र वानराणां रामसाहाय्यम्, विभीषणेन रावणत्यागश्च श्लेषेण सूचितः । सारङ्गेण

---

1. **विशुद्धेति** । 'विशुद्धकान्तः' इति पाठो रमणीयः । तथाहि—विशुद्धो निर्मलः कान्त उदकान्तो यत्र तादृक् । शरदि अगस्त्योदयेन जलाशयाः प्रसाद्यन्त इति भावः । रामपक्षे—विशुद्धा कान्ता जानकी यस्येति ॥

2. **उग्रमिति** । रावणपक्षे—उग्रः शिव उपास्यत्वेन यस्यास्तीति उग्रः । मत्वर्थीयोऽच । तम् ॥

3. **तवास्मीति** । अस्मीत्यहमर्थकमव्ययम् ॥

---

१. 'वह्नि' घ. २. '–कान्तः' क-ख-ग-घ. ३. 'अभिज्ञानशाकुन्तले' ख-ग.

रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः ।
रूपकस्य कवेराख्यां गोत्राद्यपि स कीर्तयेत् ॥ २८ ॥
ऋतुं च कंचित्प्रायेण भारतीं वृत्तिमाश्रितः ।

स स्थापकः । प्रायेणेति क्वचिदृतोरकीर्तनमपि । यथा—रत्नावल्याम् ।

भारतीवृत्तिस्तु—

भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः ॥ २९ ॥

संस्कृतबहलो वाक्प्रधानो व्यापारो भारती ।

तस्याः प्ररोचना वीथी तथा प्रहसनामुखे ।
अङ्गान्यत्रोन्मुखीकारः प्रशंसातः प्ररोचना ॥ ३० ॥

प्रस्तुताभिनयेषु प्रशंसातः श्रोतॄणां प्रवृत्त्युन्मुखीकरणं प्ररोचना । यथा रत्नावल्याम्—

'श्रीहर्षो निपुणः कविः, परिषदप्येषा गुणग्राहिणी,
लोके हारि च वत्सराजचरितं, नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं, किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥'

हरिणेन । रङ्गं रङ्गस्थसामाजिकसमूहम् । प्रसाद्य प्रीणयित्वा । श्लोकैरिति बहुवचनमविवक्षितमाद्यार्थं वा, तेन गद्यस्यापि लाभः । रूपकस्य नाटकादेः । प्रसङ्गाद्भारतीवृत्तिमाह—**भारतीति** । तस्या भारत्याः । अभिनयदर्शनादौ प्रवृत्त्युन्मुखीकरणं प्रवृत्त्यौपयिकेच्छाजननम् । **श्रीहर्ष इति** । हारि मनोहरम् । पदं कारणम् । आमुखमाह—

---

1. **रङ्गमिति** । अयमेवार्थो भङ्ग्यन्तरेण भावप्रकाशिकायां प्रतिपाद्यते—'इत्थं रङ्गविधानस्य संबन्धादिप्रसिद्धये । गोत्रं नाम च वक्ष्यीयात्पूजावाक्यं सभासदाम् ॥ वाञ्छाकलापः प्रथमं कलाविधिरनन्तरम् । वाञ्छाशून्या न दृश्यन्ते व्यवहाराः कथंचन ॥ वाञ्छाकलापस्तु कवेरभीष्टार्थप्रकाशनम् । स्वाभिधेयगतत्वेन स द्विधा परिपठ्यते ॥ स्वगतं तु स्वगोत्रादिस्वीयकीर्तिप्रकाशनम् । अभिधेयगतं यत्तत्काव्यनाम्ना प्रकाशनम् ॥' इति ॥

2. **भारतीति** । ऋग्वेदोत्पन्नाया भारतीवृत्तेः स्वरूपं किंचित्परिष्कृत्योक्तं नाट्यशास्त्रे—'या वाक्प्रधाना पुरुषप्रयोज्या स्त्रीवर्जिता संस्कृतवाक्ययुक्ता । स्वनामधेयैर्भरतैः प्रयुक्ता सा भारती नाम भवेत्तु वृत्तिः ॥' इति ॥

3. **प्रशंसात इति** । प्रशंसाया द्वैविध्यमाम्नातं सुधाकरे—'प्रशंसा तु द्विधा ज्ञेया

---

१. 'जनाश्रयः' इति क्वाचित्कः पाठः.

वीथीप्रहसने वक्ष्येते ।

[1]नटी विदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥ ३१ ॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना [2]प्रस्तावनापि सा ॥ ३२ ॥

सूत्रधारसदृशत्वात्स्थापकोऽपि सूत्रधार उच्यते । तस्यानुचरः पारिपार्श्वकः । तस्मात्किंचिदूनो नटः ।

उद्घात्य(त)कः कथोद्घातः प्रयोगातिशयस्तथा ।
प्रवर्तकावलगिते पञ्च प्रस्तावनाभिदाः ॥ ३३ ॥

तत्र

पदानि त्वगतार्थानि तदर्थगतये नराः ।
योजयन्ति पदैरन्यैः स [3]उद्घात्य(त)क उच्यते ॥ ३४ ॥

नटीति । विदूषक उक्तलक्षणकः । संलापं सम्यगभाषणम् । **स्वकार्योत्थैरिति** । स्वकार्य पात्रप्रवेशस्तदुपयुक्तैरित्यर्थः । प्रस्तुताक्षेपिभिः प्रस्तुतसूचकैः । आमुखभेदानाह—**उद्घात्यक इति । पदानीति** । अप्रसिद्धतया अगतोऽप्रतीतोऽभिप्रेतार्थो

चेतनाचेतनाश्रया । चेतनास्तु कथानाथकविसभ्यनटाः स्मृताः । अचेतनौ देशकालौ कालो मधुशरन्मुखः ॥' इति ॥

1. **नटीति** । नट इत्युचितम् । 'तस्मात्किंचिदूनो नटः' इति वृत्तिदर्शनात् । मन्दारमरन्दे तु नट्या अपि ग्रहणम् । तथा च तद्वाक्यम्—'नटी विदूषको वापि नटो वा पारिपार्श्विकः ।' इति ॥

2. **प्रस्तावनेति** । सुधाकरे सदृष्टान्तमुक्तम्—'विधेर्यथैव संकल्पो मुखतां प्रतिपद्यते । प्रधानस्य प्रबन्धस्य तथा प्रस्तावना मता ॥' इति ॥

3. **उद्घात्यक इति** । दशरूपके तु—'गूढार्थपदपर्यायमाला प्रश्नोत्तरस्य वा । यत्रान्योन्यं समालापो द्वेधोद्घात्यं तदुच्यते ॥' इति तल्लक्षणमुक्तम् । गूढार्थं पदं तत्पर्यायश्चेल्येवं माला, प्रश्नोत्तरं चेल्येवं वा माला । द्वयोरुक्तिप्रत्युक्तौ तद् द्विविधमुद्घात्यकम् । तत्राद्यं विक्रमोर्वश्यां यथा—**'विदूषकः**—भो वअस्स, को एसो कामो जेण तुमं पि दूमिज्जसे । सो किं पुरिसो आदु इत्थिअत्ति । **राजा**—सखे, मनोजातिरनाधीना सुखेष्वेव प्रवर्तते । स्नेहस्य ललितो मार्गः काम इत्यभिधीयते ॥ **विदूषकः**—एवं पि ण जाणे । **राजा**—वयस्य, इच्छाप्रभवः सः । **विदूषकः**—किं जो जं इच्छदि सो तं कामेदित्ति । **राजा**—अथ किम् । **विदूषकः**—ता जाणिदं जह अहं सूअआरसालाए भोअणं इच्छामि ।' द्वितीयं यथा पाण्डवानन्दे—'का श्लाघा गुणिनां क्षमा, परिभवः को यः स्वकुल्यैः कृतः, किं दुःखं परसंश्रयो, जगति कः श्लाघ्यो य आश्रीयते । को मृत्युर्व्यसनं, शुचं जहति के यैर्निर्जिताः शत्रवः, कैर्विज्ञातमिदं विराटनगरे छन्नस्थितैः पाण्डवैः ॥'

यथा मुद्राराक्षसे सूत्रधारः—

'[1]क्रूरग्रहः सकेतुश्चन्द्रमसंपूर्णमण्डलमिदानीम् ।
अभिभवितुमिच्छति बलात्—'

इत्यनन्तरम्—'(नेपथ्ये)आः, क एष मयि जीवति[1] चन्द्रगुप्तमभिभवितुमिच्छति ।' इति ।

अत्रान्यार्थवन्त्यपि पदानि हृदयस्थार्थगत्या अर्थान्तरे [2]संक्रमय्य पात्रप्रवेशः ।

सूत्रधारस्य वाक्यं वा समादायार्थमस्य वा ।
भवेत्पात्रप्रवेशश्चेत्[2]कथोद्घातः स उच्यते ॥ ३५ ॥

वाक्यं यथा रत्नावल्याम्—'द्वीपादन्यस्मादपि—'इत्यादि सूत्रधारेण

येभ्यस्तानि । तदर्थगतये अभिप्रेतार्थबोधाय । योजयन्ति अभिप्रेतार्थे संक्रमयन्ति । अन्यैरभिप्रेतार्थमात्रप्रतिपादकैः । क्रूरोऽनिष्टफलदायी । स प्रसिद्धः । अत्र चन्द्रपदस्य चन्द्रगुप्तपदयोगेन क्रूरग्रहादिपदानामभिप्रेतार्थप्रत्ययो भवति । तथाहि—क्रूरो ग्रह आशयो यस्य सः चन्द्रं चन्द्रगुप्तम् । (अ)संपूर्ण मण्डलं राज्यचक्रं यस्य । अर्थवन्त्यपि अभिप्रेतार्थप्रतीतियोग्यान्यपि । हृदयस्थार्थगत्या अभिप्रेतार्थप्रत्ययेन उप-

---

1. **क्रूरेति** । सकेतुः सपातः क्रूरग्रहो राहुः इदानीमसंपूर्णमण्डलम् अपरिपूर्णबिम्बं चन्द्रं बलात् हठात् अभिभवितुमाक्रमितुमिच्छति प्रवणीभवति । श्लिष्टार्थस्तु—सकेतुः मलयकेतुना सह । क्रूरे कर्मणि कूटव्यवहारे ग्रह आसङ्गो यस्य तादृशः । अमात्यराक्षस इत्यर्थः । इदानीमसंपूर्णमण्डलमचिरराज्याभिषिक्ततया अव्याहताज्ञाभावेन अस्वाधीनप्रकृतिमण्डलं चन्द्रं चन्द्रगुप्तं बलाद् बलं सामर्थ्यं मित्रादिसैन्यं वा आश्रित्य अभिभवितुं पराभवितुमिच्छति । 'बलात्' इति त्यब्लोपे पञ्चमी । एतेन चन्द्रगुप्तं प्रति समलयकेतोरमात्यराक्षसाद्भयमाशङ्कमानस्य चाणक्यस्य प्रवेशः । तुरीयपादस्तु 'रक्षत्येनं तु बुधयोगः' इति । 'बुधयोगः बुधेन सह चन्द्रस्य योगः एनं चन्द्रं रक्षति ग्रहाद्वारयति । तथा चोक्तं गर्गेण—'पञ्चग्रहसमायोगं दृष्ट्वा सौम्यविवर्जितम् । ग्रहणं तु वदेत्तत्र सबुधं न ग्रहं वदेत् ॥' इति । वस्तुतस्तु गणितगोलविरुद्धत्वान्मिथ्याभूतमेतत् । श्लिष्टार्थस्तु—बुधश्चाणक्यः, तद्योगः क्रियाकौशलमेनं चन्द्रगुप्तं रक्षतीति तदर्थः ॥

2. **कथोद्घात इति** । काव्येन्दुप्रकाशे तु—'हृदिस्थानामर्थवतां पदानामन्यथाकृतेः । यः पात्रस्य प्रवेशः स्यात्स कथोद्घात इष्यते ॥' इति समाम्नातम् । तत्र पदभङ्गरूपमर्थभङ्गरूपमिति द्विविधमन्यथाकरणम् । आद्यस्य 'द्वीपान्यस्मात्—' इत्युदाहरणम् । द्वितीयस्य तु 'निर्वाणवैरिदहनाः—' इति ॥

---

१. 'सति' इत्यधिकं घ-पुस्तके. २. 'संगमय्य' घ.

पठिते—'(नेपथ्ये।)एवमेतत्। कः संदेहः। द्वीपादन्यस्मादपि-'इत्या दि पठित्वा यौगंधरायणस्य प्रवेशः।

वाक्यार्थो यथा वेण्याम्—

'निर्वाणवैरदहनाः प्रशमादरीणां
नन्दन्तु पाण्डुतनयाः सह माधवेन।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था[1] भवन्तु कुरुराजसुताः सभृत्याः॥'

इति सूत्रधारेण पठितस्य वाक्यस्यार्थं गृहीत्वा—'(नेपथ्ये।) आः दुरात्मन्, वृथा मङ्गलपाठक, कथं स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः।' ततः सूत्रधारनिष्क्रान्तौ[2] भीमसेनस्य प्रवेशः।

यदि प्रयोग एकस्मिन्प्रयोगोऽन्यः प्रयुज्यते।
तेन पात्रप्रवेशश्चेत्प्रयोगातिशयस्तदा[2]॥ ३६॥

यथा कुन्दमालायाम्—'(नेपथ्ये।) इत इतोऽवतरत्वार्या। **सूत्रधारः**—कोऽयं खल्वार्याह्वानेन साहायकमपि[3] मे संपादयति। (विलोक्य।) कष्टमतिकरुणं वर्तते।

लङ्केश्वरस्य भवने सुचिरं स्थितेति
रामेण लोकपरिवादभयाकुलेन।
निर्वासितां जनपदादपि गर्भगुर्वीं
सीतां वनाय परिकर्षति लक्ष्मणोऽयम्॥'

अत्र नृत्यप्रयोगार्थं स्वभार्याह्वानमिच्छता सूत्रधारेण 'सीतां वनाय

लक्षितानि। समादाय कथयित्वा। अस्य सूत्रधारवाक्यस्य। **निर्वाणेति**। अरीणां दुर्योधनादीनाम्। प्रशमात् शान्त्यवलम्बात्। रक्तेन अनुरागेण प्रसाधिता वशीकृता भूयैस्ते। क्षतविग्रहा भग्नकलहाः। कुरुराजसुता धार्तराष्ट्राः। द्वितीयार्थस्तु—अरीणां प्रशमात् मरणात्। रक्तै रुधिरैः प्रसाधिता मण्डिता भूयैः। क्षतविग्रहा विक्षतशरीराः स्वस्थाः पारलौकिकसुखेन तृप्ताः। अत्र सूत्रधारवाक्यस्य कुरुराजसुतपदार्थ-

---

1. **स्वस्था इति**। स्वस्थाः स्वर्गस्था इति पक्षे 'खपरे शरि वा विसर्गलोपो वक्तव्यः' इति वार्तिकेन विसर्गलोपे न वैरूप्यम्॥

2. **प्रयोगेति**। दशरूपकादौ तु—'एषोऽयमित्युपक्षेपात्सूत्रधारप्रयोगतः। पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः॥' इत्युक्तम्। 'एष राजेव दुष्यन्त' इत्युदाहृतं च॥

---

१. 'सूत्रधारो निष्क्रान्तः' घ. २. '–सेनप्रवेशः' क. ३. 'अपि' इति घ-पुस्तके नास्ति.

परिकर्षति लक्ष्मणोऽयम्' इति सीतालक्ष्मणयोः प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयान एव प्रयोगः प्रयोजितः ।

कालं प्रवृत्तमाश्रित्य सूत्रधृग्यत्र वर्णयेत् ।
तदाश्रयश्च पात्रस्य प्रवेशस्तत्प्रवर्तकम् ॥ ३७ ॥

यथा—'आसादितप्रकट—' इत्यादि । '(ततः प्रविशति यथानिर्दिष्टो रामः ।)'

यत्रैकत्र समावेशात्कार्यमन्यत्प्रसाध्यते ।
प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं[1] बुधैः ॥ ३८ ॥

यथा शाकुन्तले—सूत्रधारो नटीं प्रति । 'तवास्मि गीतरागेण—' इत्यादि । ततो राज्ञः प्रवेशः ।

योज्यान्यत्र यथालाभं वीथ्यङ्गानीतराण्यपि ।

अत्र आमुखे । उद्घात्य(त)कावलगितयोरितराणि बीथ्यङ्गानि वक्ष्यमाणानि ।

नखकुट्टस्तु—

नेपथ्योक्तं श्रुतं[2] यत्र त्वाकाशवचनं तथा ॥ ३९ ॥

मादाय पात्रस्य भीमस्य प्रवेशः । आर्याद्वानेन सूत्रधारभार्याद्वानेन । प्रवृत्तं वर्तमानम् । तदाश्रयः प्रवृत्तकालवर्णनासूचितः । यथानिर्दिष्टः प्रकटनिर्मलचन्द्रहासधरः । **एकत्रेति** । प्रयोग इत्यनेनान्वितम् । समावेशात्सादृश्योद्भावनात् । कार्यं पात्रप्रवेशरूपम् । प्रसाध्यते सूच्यते । यथालाभं यथासंभवम् । पञ्चस्वेव वीथ्यङ्गानि ।

---

1. **अवलगितमिति** । दशरूपके तु—'यत्रैकत्र समावेशात्कार्यमन्यत्प्रसाध्यते । प्रस्तुतेऽन्यत्र वान्यस्यात्तच्चावलगितं द्विधा ॥' इत्युक्तम् । तत्राद्यं यथोत्तरचरिते समुत्पन्नवनविहारगर्भदोहदायाः सीतायाः दोहदकार्ये अनुप्रविश्य जनापवादादरण्ये त्यागः । द्वितीयं यथा छलितरामे—**'रामः**—लक्ष्मण, तातवियुक्तामयोध्यां विमानस्थो नाहं प्रवेष्टुं शक्नोमि । तदवतीर्थं गच्छामि । कोऽपि सिंहासनस्थाधः स्थितः पादुकयोः पुरः । जटावानक्षमाली च चामरी च विराजते ॥' इति भरतदर्शनकार्यसिद्धिः । मन्दारमरन्देऽप्युक्तम्—'अन्यकार्यमिषादन्यकार्यस्य करणं तथा । द्विधावलगितं त्वन्यकार्याच्च स्वार्थसाधनम् ॥' इति । काव्येन्दुप्रकाशे तु—'यः पात्रस्य प्रवेशस्तद्वलितं चान्यवर्णनात्' इति विशेषोऽभिहितः अन्यपदार्थवर्णनेन पात्रप्रवेशो वलितमिति तदर्थः । प्रवृत्तकालवर्णनानुरूपपात्रप्रवेशलक्षणात्प्रवर्तकतो यत्किंचिद्वर्णनात्पात्रप्रवेशरूपवलितस्य भेदः स्पष्ट एव ॥

2. **नेपथ्येति** । नेपथ्यं जवनिका तत्रोक्तम् । 'नेपथ्यं स्याज्जवनिका रङ्गभूमिः प्रसाधनम्' इत्यजयः ॥

---

१. 'तत्र' घ.

समाश्रित्यापि कर्तव्यमामुखं नाटकादिषु ।
एषामामुखभेदानामेकं कंचित्प्रयोजयेत् ॥ ४० ॥
तेनार्थमथ पात्रं वा समाक्षिप्यैव सूत्रधृक् ।
प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रयोजयेत् ॥ ४१ ॥

वस्त्विति वृत्तम् ।

इदं पुनर्वस्तु बुधैर्द्विविधं परिकल्प्यते ।
आधिकारिकमेकं स्यात्प्रासङ्गिकमथापरम् ॥ ४२ ॥
अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुः ।
तस्येतिवृत्तं कविभिराधिकारिकमुच्यते ॥ ४३ ॥

फले प्रधानफले । यथा बालरामायणे रामचरितम् ।

अस्योपकरणार्थं तु प्रासङ्गिकमितीष्यते ।[1]

अस्याधिकारिकेतिवृत्तस्य उपकरणनिमित्तं यच्चरितं तत्प्रासङ्गिकम् । यथा सुग्रीवादिचरितम् ।

पताकास्थानकं योज्यं सुविचार्येह वस्तुनि ॥ ४४ ॥

इह नाट्ये ।

यत्रार्थे चिन्तितेऽन्यस्मिंस्तल्लिङ्गोऽन्यः प्रयुज्यते ।
आगन्तुकेन भावेन पताकास्थानकं तु तत् ॥ ४५ ॥

तद्भेदानाह—

सहसैवार्थसंपत्तिर्गुणवत्युपचारतः ।
पताकास्थानकमिदं प्रथमं परिकीर्तितम् ॥ ४६ ॥

यथा रत्नावल्याम्—'वासवदत्तेयम्' इति राजा यदा तत्कण्ठपा-

उद्घात्यावलगितयोरेव तदितराणि । एषामुद्घात्यकादीनाम् । तेन प्रयुक्तामुखभेदेन । अर्थं वस्तु । समाक्षिप्य सूचयित्वा । ततः सूत्रधारगमनानन्तरम् । अधिकारिज्ञानं तावदाधिकारिकज्ञानजनकम् । तच्चाधिकारज्ञानाधीनमित्यधिकारं निरूपयति—**अधिकार इति** । तत्प्रभुः फलस्वाम्यवान् । तस्याधिकारिणः प्रसङ्गेन निर्वृत्तं प्रासङ्गिकम् । पताकास्थानमाह—अर्थे प्रयोजने । तल्लिङ्गस्तत्सधर्मा । प्रयुज्यते क्रियते । आगन्तुकेन अनभिसंहितेन । भावेन पदार्थेन सहसा अतर्कितकारणेन । अर्थसंपत्तिः प्रयोजनान्तरापत्तिः । उपचारतः प्रीत्यनुकूलव्यापारात् । **वासवदत्तेयमितीति** । वासवदत्तारूपधारिणी सागरिका संकेतं प्राप्ता, वासवदत्तया

---

1. **प्रासङ्गिकमिति** । आनुषङ्गिकम् ॥

---

१. 'तस्य' घ.

शं मोचयति तदा तदुक्त्या 'सागरिकेयम्' इति प्रत्यभिज्ञाय 'कथम् । प्रिया मे सागरिका ।

अलमलमतिमात्रं साहसेनामुना[1] ते,
त्वरितमयि विमुञ्च त्वं लतापाशमेतम्[2] ।
चलितमपि[3] निरोद्धुं जीवितं जीवितेशे[4]
क्षणमिह मम कण्ठे बाहुपाशं निधेहि ॥'

इति फलरूपार्थसंपत्तिः पूर्वापेक्षयोपचारातिशयाद्गुणवत्युत्कृष्टा ।

वचः सातिशयक्लिष्टं नानाबन्धसमाश्रयम् ।
पताकास्थानकमिदं द्वितीयं परिकीर्तितम् ॥ ४७ ॥

यथा वेण्याम्—

'रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥'

अत्र रक्तादीनां रुधिरशरीरार्थहेतुकश्लेषवशेन बीजार्थप्रतिपादनान्नेतृमङ्गलप्रतिपत्तौ सत्यां द्वितीयं पताकास्थानम् ।

तद्विज्ञातमिति सागरिका वासवदत्तापरिभवभयेन गले पाशं दत्त्वा तत्रैव मर्तुमारब्धा, इति राज्ञः सागरिकायां वासवदत्ताभ्रमः । तदुक्त्या सागरिकोक्त्या । अत्र वासवदत्ताया अनुनयपूर्वकं सुरतं राज्ञोऽभिप्रेतम् । तदन्यस्य सागरिकाया अनुनयपूर्वकसुरतस्यानुष्ठानम् । वासवदत्ता रुष्टेति विकलचित्तेन राज्ञा सागरिकाप्राप्तिरूपं कारणं तत्तर्कितं फलं सागरिकासुरतम् । पूर्वापेक्षया पूर्वसुरतस्वरूपापेक्षया । नानाबन्धो विविधविशेषणसंबन्धः, तत्समाश्रयं तद्विषयकम् । **रक्तेति** । सूत्रधारवचनमिदं रोपाद्धीमेनानूक्तम् । अत्र सामान्यलक्षणं संगमयति—**अत्रेति** । रक्तादीनां रक्तादिपदानाम् । आदिना प्रसाधितविग्रहपदयोर्ग्रहणम् । **रुधिरशरीरेति** । अनयोर्मध्ये मण्डितेति बोध्यम् । भीमक्रोधोपचितो युधिष्ठिरोत्साहो बीजम्, तस्यार्थः प्रयोजनम् । शत्रुमारणं प्रधानफलमिति यावत् । तस्य प्रतिपादनात्सूचकात् । नेतृमङ्गलप्रतिपत्तौ नायकमङ्गलानुष्ठाने । तथा च प्रतिनायकमङ्गले चिन्तिते अप्रति-

---

1. **साहसेनेति** । साहसेन प्राणत्यागरूपेणेत्यर्थः ॥
2. **लतापाशमिति** । प्राणत्यागार्थं गृहीतमेतं पुरोवर्तिनं लतापाशम् ॥
3. **चलितमपीति** । गन्तुं प्रवृत्तमपि ॥
4. **जीवितेशे इति** । 'जीवितेशे' इत्यामन्त्रणम् । प्राणस्वामिनीति तदर्थः ॥

---

१. 'उत्कण्ठा' क. २. 'अमङ्गलप्रतिपत्तौ' क.

अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत् ।
श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ॥ ४८ ॥

लीनमव्यक्तार्थम्, श्लिष्टेन संबन्धयोग्येनाभिप्रायान्तरप्रयुक्तेन प्रत्युत्तरेणोपेतम्, सविनयं विशेषनिश्चयप्राप्त्या सहितं संपाद्यते यत्तत्तृतीयं पताकास्थानम् ।

यथा वेण्यां द्वितीयेऽङ्के—'**कञ्चुकी**—देव, भग्नम् । **राजा**—केन । **कञ्चुकी**—भीमेन । **राजा**—कस्य । **कञ्चकी**—भवतः । **राजा**—आः, किं प्रलपसि । **कञ्चुकी**—(सभयम्)देव, ननु ब्रवीमि। भग्नं भीमेन भवतः । **राजा**—धिग् वृद्धापसद, कोऽयमद्य ते व्यामोहः **कञ्चकी**—देव, न व्यामोहः । सत्यमेव ।

भग्नं भीमेन भवतो मरुता रथकेतनम् ।
पतितं किङ्किणीक्काणबद्धाक्रन्दमिव क्षितौ ॥'[1]

अत्र दुर्योधनोरुभङ्गरूपप्रस्तुतसंक्रान्तमर्थोपक्षेपणम् ।

द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः ।
प्रधानार्थान्तराक्षेपी पताकास्थानकं परम् ॥ ४९ ॥

यथा रत्नावल्याम्—

'उद्दामोत्कलिकाविपाण्डुररुचं[2] प्रारब्धजृम्भां क्षणा-
दायासं श्वसनोद्वमैरविरलैरातन्वतीमात्मनः ।

पत्तिसंहितेन प्रधानफलसूचनेन नायकमङ्गलानुष्ठानमिति द्वितीयं पताकास्थानकमिदमिति भावः । **अर्थोपक्षेपकमिति** । वक्ष्यमाणविष्कम्भकादिपञ्चकान्यतममित्यर्थः। संबन्धयोग्येन प्रस्तुतान्वयोपयुक्तेन । अभिप्रायान्तरप्रयुक्तेन अप्रस्तुतबोधाभिप्रायेण प्रयुक्तेन भग्नमिति कर्त्रादीनामव्यक्तत्वम् । **भीमेनेति** । भवत इति च प्रस्तुते ऊरुभङ्गेऽप्यन्वययोग्यम् । मरुतेत्यादि विशेषनिश्चयः । अत्र रथकेतनभङ्गनिवेदनमभिमतम्, ऊरुभङ्गनिवेदनमुपपन्नम् । एतदेवोपपादयति—**दुर्योधनेति** । संक्रान्तं पर्यवसन्नम् । सुश्लिष्टः सुसंबद्धः । काव्ययोजितः, न तु सभाभ्यन्तरतया काव्यप्रयोगायोग्यः । प्रधानं फलमेव अर्थान्तरं तदाक्षेपी तत्सूचकः । **उद्दामेति** । उत्कटाभिरुद्गताभिः कलिकाभिर्विपाण्डुररुचम् । पक्षे—उत्कटोत्कण्ठया विपाण्डुर-

---

1. **किङ्किणीति** । किङ्किणी क्षुद्रघण्टिका तस्याः क्काणेन बद्धो जनित आक्रन्दः क्रन्दनं येन तदिव ॥

---

१. 'अर्थोपक्षेपणं' क-ख-ग. २. 'रुचिं' क-ख-ग-घ.

अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन्कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम् ॥'

अत्र भाव्यर्थः सूचितः । एतानि चत्वारि पताकास्थानानि क्वचिन्मङ्गलार्थं क्वचिदमङ्गलार्थं सर्वसंधिषु भवन्ति । काव्यकर्तुरिच्छावशाद्भूयो[2]ऽपि भवन्ति । यत्पुनः केनचिदुक्तम्—'मुखसंधिमारभ्य संधिचतुष्टये क्रमेण भवन्ति' इति, तदन्ये न मन्यन्ते । एषामत्यन्तमुपादेयानामनियमेन सर्वत्रापि सर्वेषामपि भवितुं युक्तत्वात् ।

यत्स्यादनुचितं वस्तु नायकस्य रसस्य वा ।
विरुद्धं तत्परित्याज्यमन्यथा[1] वा प्रकल्पयेत् ॥ ५० ॥

अनुचितमितिवृत्तं यथा—रामस्य च्छद्मना[3] वालिवधः । तच्चोदात्तराघवे नोक्तमेव । [4]वीरचरिते तु वाली रामवधार्थमागतो रामेण हत इत्यन्यथा कृतः ।

अङ्केष्वदर्शनीया या वक्तव्यैव च संमता ।
या च स्याद्वर्षपर्यन्तं कथा दिनद्वयादिजा ॥ ५१ ॥

रुचम् । 'उत्कण्ठोत्कलिके समे' इत्यमरः । प्रारब्धजृम्भां प्राप्तप्रायप्रकाशाम् । पक्षे—विरहक्षीणतया लब्धजृम्भाम् । आयासमितस्ततो विक्षेपः, खेदं च । श्वसनस्य वायोः, निश्वासस्य च । उद्गमैरविरलैः, घनैर्वा । आतन्वतीं कुर्वतीम्, सूचयन्तीं च । मदनेन वृक्षविशेषेण, कामेन च सहिताम् । देव्या वासवदत्तायाः । यथा विरहक्लिष्टसागरिकादर्शनेन तस्यां क्रोधस्तथोद्यान(लता)दर्शनकृतकालविलम्बेनापीति भावः । अत्र भावी विरहक्लिष्टसागरिकासंगमः प्रधानमर्थः सूचितः । द्वितीये श्लेषवशेनैव प्रधानार्थसूचनम् । अत्र तु न तथेति भेदः । अत्र सागरिकाप्रसादे चिन्तिते देव्याः प्रसादोऽनुष्ठेयप्राय इति सामान्यलक्षणगमनम् । अन्यथा उचितं यथा भवति तथा पुराणादिविरुद्धमपि स्वेच्छया कल्पयेत् । अदर्शनीया निषिद्धा । वक्तव्यैव अवश्यं वक्तव्या । अनावश्यकत्वे संमता वक्तुरभीष्टा च । दिनद्वयादिजा दिनद्वयादिनिर्वर्त्या 'नानेकदिननिर्वर्त्यकथया संप्रयोजितः' इत्यनेन तस्य अङ्के निषि-

---

1. **अन्यथा वेति** । अत एव ध्वन्यालोके—'अपारे काव्यसंसारे कविरेव प्रजापतिः । यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥ शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत् । स एव वीतरागश्चेन्नीरसं सर्वमेव तत् ॥ भावानचेतनानपि चेतनवच्चेतनानचेतनवत् । व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया ॥' इत्यादि राजानकानन्दवर्धनाचार्यैः प्रतिपादितम् ॥

---

१. 'विपाण्डुर' क-ख-ग. २.'भूयोऽपि' घ-पुस्तके नास्ति. ३.'छलेन' क. ४. 'सुग्रीववीरचरिते तु'घ

अन्या च विस्तरा सूच्या[1] सार्थोपक्षेपकैर्बुधैः ।
अङ्केषु अदर्शनीया कथा युद्धादिकथा ।
वर्षादूर्ध्वं तु यद्वस्तु तत्स्याद्वर्षादधोभवम् ॥ ५२ ॥

उक्तं हि मुनिना—

'अङ्कच्छेदे कार्यं मासकृतं वर्षसंचितं वापि ।
तत्सर्वं कर्तव्यं वर्षादूर्ध्वं न तु कदाचित् ॥'

एवं च चतुर्दशवर्षव्यापिन्यपि रामवनवासे ये ये विराधवधादयः कथांशास्ते ते वर्षवर्षावयवदिनयुग्मादीनामेकतमेन सूचनीया न विरुद्धाः ।

दिनावसाने कार्यं यद्दिने नैवोपपद्यते ।
अर्थोपक्षेपकैर्वाच्यमङ्कच्छेदं विधाय तत् ॥ ५३ ॥

के तेऽर्थोपक्षेपका[2] इत्याह—

अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ ।
चूलिकाङ्कावतारोऽथ स्यादङ्कमुखमित्यपि ॥ ५४ ॥
वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥ ५५ ॥
मध्येन[2] मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः ।
शुद्धः स्यात्स तु संकीर्णो नीचेन[3]मध्यमकल्पितः ॥ ५६ ॥

द्धस्वेऽपि 'वर्षपर्यन्तम्' इति नियमार्थं पृथगुपादानम् । अन्या एकदिननिर्वर्त्या । विस्तरा अतिबहुला । तस्या अपि 'नातिविस्तरः' इत्यनेनाङ्के निषिद्धत्वात् । अर्थोपक्षेपकैर्वक्ष्यमाणैर्विष्कम्भकादिभिः । वर्षादूर्ध्वं वर्षातिरिक्तकालनिर्वर्त्यं । यद्वस्तु तद्वर्षादधोभवं वर्षाभ्यन्तरनिर्वर्त्यं यथा स्यात्तथा कल्पयेदित्यर्थः । अङ्कच्छेदे विष्कम्भकादौ । एवं च वर्षादूर्ध्वमिति प्रतिप्रसवाभिधाने च । **दिनावसान इति** । एकदिननिर्वर्त्यमपि यद्दिनावसानकार्यं समग्रदिननिर्वर्त्यं तदपि विष्कम्भकादिभिर्वाच्यमित्यर्थः । वृत्तानामतीतानां वर्तिष्यमाणानामागामिनाम् । कथांशानामवान्तरार्थानां निदर्शको ज्ञापकः रूपकांशविशेषः । मध्येन मध्यमेन । कपालकुण्डलादिविलक्षण-

---

1. **सेति** । सा सर्वा सूच्या सूचनीया ।

2. **मध्येनेति** । नात्युचनीचं पात्रं मध्यमित्युच्यते ॥

3. **नीचेति** । अयमत्र निष्कर्षः—शुद्धसंकीर्णभेदेन द्विविधो विष्कम्भकः । तत्रैकद्विमध्यमपात्रप्रयुक्तः संस्कृतात्मकः शुद्धः, मध्यमनीचपात्रप्रयुक्तः संस्कृतप्राकृतात्मकः संकीर्ण इति ॥

---

१. 'विस्तरात्' क-ख-ग. २. 'इत्याकाङ्क्षायामाह' घ. ३. 'यद्-' इत्यादि '-निर्वर्त्यं' इत्यन्तं पुस्तकान्तरे नास्ति. ४. 'विष्कम्भादिवाच्यम्' पुस्तकान्तरे.

तत्र शुद्धो यथा—मालतीमाधवे श्मशाने कपालकुण्डला । संकीर्णो यथा—रामाभिनन्दे क्षपणककापालिकौ ।

अथ प्रवेशकः—

प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः ।
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ॥ ५७ ॥

अङ्कद्वयस्यान्तरिति प्रथमाङ्केऽस्य प्रतिषेधः[1] । यथा—वेण्यामश्वत्थामाङ्के राक्षससिथुनम् ।

अथ चूलिका—

अन्तर्जवनिकासंस्थैः सूचनार्थस्य चूलिका[1] ।

यथा वीरचरिते चतुर्थाङ्कस्यादौ—'(नेपथ्ये[2]) । भो भो वैमानिकाः, प्रवर्तन्तां रङ्गमङ्गलानि ।' इत्यादि । 'रामेण[3] परशुरामो जितः ।' इति नेपथ्ये पात्रैः[4] सूचितम् ।

अथाङ्कावतारः—

अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः ॥ ५८ ॥
यत्राङ्कोऽवतरत्येषोऽङ्कावतार[2] इति स्मृतः ।

यथा—अभिज्ञाने पञ्चमाङ्के पात्रैः सूचितः षष्ठाङ्कस्तदङ्कस्याङ्गविशेष इवावतीर्णः ।

पात्रदर्शनेनैवैतत्प्रयुक्तविष्कम्भकवैलक्षण्यदर्शनं भवतीति भावः । अनुदात्तोक्त्या नीचोक्त्या नीचेनैव नीचाभ्यां वा पात्राभ्यां प्रयोजितः । एवकारेण संकीर्णविष्कम्भकव्युदासः । शेषं 'वृत्तवर्तिष्यमाण–' इत्यादि विशेषणं विष्कम्भकवदत्र ज्ञेयम् । प्रथमाङ्के, कर्तव्ये प्रथमाङ्कादावित्यर्थः । अस्य प्रवेशकस्य । अत्रापि पात्रवैलक्षण्यदर्शनेन विष्कम्भकादस्य वैलक्षण्यं दर्शितम् । जवनिका नटानां वेषस्थानम् ।

---

1. **चूलिकेति** । अत्र विशेषः काव्येन्दुप्रकाशे–'अनिर्गतापविष्टैश्च नेपथ्यान्तर्गतैस्तथा । प्रयोजिता मध्यपात्रैः सूचिका चूलिका भवेत् ॥ कर्तव्याधेतराङ्केषु स्यादादौ मध्य एव वा । सा खण्डाखण्डभेदेन द्विविधा परिकीर्तिता ॥ आद्यान्तः स्याद्द्वितीया तु सप्रवेशविनिर्गमा ॥' यस्यां प्रवेशविनिर्गमौ प्रत्यक्षसिद्धौ साङ्कबहिर्भूता द्वितीया चूलिका ॥

2. **अङ्कावतार इति** । मुनिनाप्येकोनविंशाध्याये उक्तम्—'अङ्कान्तरेऽथवाङ्के निपतति यस्मिन्प्रयोगमासाद्य । बीजार्थयुक्तियुक्तो ज्ञेयो ह्यङ्कावतारोऽसौ ॥' इति ॥

---

१. 'च' इत्यधिकं घ-पुस्तके. २. इतोऽग्रे 'पात्रैः सूचितः, अथाङ्कावतारः' इत्यधिकं क-पुस्तके. ३. 'अनेन' इत्यधिकं क-ख-पुस्तकयोः. ४. 'पात्र' इति नास्ति पुस्तकान्तरे.

अथामुखम्—

यत्र स्यादङ्क एकस्मिन्नङ्कानां सूचनाखिला ॥ ५९ ॥
तदङ्कमुखमित्याहुर्बीजार्थख्यापकं च तत् ।

यथा—मालतीमाधवे प्रथमाङ्कादौ कामन्दक्यवलोकिते भूरिवसुप्रभृतीनां भाविभूमिकानां परिक्षिप्तकथाप्रबन्धस्य च[1] प्रसङ्गात्संनिवेशं सूचितवत्यौ ।

अङ्कान्तपात्रैर्वाङ्कास्यं छिन्नाङ्कस्यार्थसूचनात् ॥ ६० ॥

अङ्कान्तपात्रैरङ्कान्ते प्रविष्टैः पात्रैः । यथा वीरचरिते द्वितीयाङ्कान्ते—'(प्रविश्य) **सुमन्त्रः**—भगवन्तौ वसिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः । **इतरे**—क्व भगवन्तौ । **सुमन्त्रः**—महाराजदशरथस्यान्तिके । **इतरे**—तत्तत्रैव गच्छावः' इत्यङ्कपरिसमाप्तौ । '(ततः प्रविशन्त्युपविष्टा वसिष्ठविश्वामित्रपरशुरामाः।)' इत्यत्र पूर्वाङ्कान्त एव प्रविष्टेन सुमन्त्रपात्रेण शतानन्दजनककथाविच्छेदे उत्तराङ्कमुखसूचनादङ्कास्यम्, इति । एतच्च धनिकमतानुसारेणोक्तम् । अन्ये तु—'अङ्कावतरणेनैवेदं गतार्थम्' इत्याहुः ।

अपेक्षितं परित्यज्य नीरसं वस्तु विस्तरम् ।
यदा संदर्शयेच्छेषमामुखानन्तरं तदा ॥ ६१ ॥
कार्यो विष्कम्भको नाट्य आमुखाक्षिप्तपात्रकः ।

यथा—रत्नावल्यां यौगंधरायणप्रयोजितः ।

यदा तु सरसं वस्तु मूलादेव प्रवर्तते ॥ ६२ ॥
आदावेव तदाङ्के स्यादामुखाक्षेपसंश्रयः ।

यथा—शाकुन्तले ।

अङ्कानामङ्कनिबन्धनीयवस्तूनां यत्केवलं बीजार्थस्य ख्यापनं सूचनं तदप्यङ्कमुखम् । भूमिका वेषरचना । परिक्षिप्तेति आकाङ्क्षित्यर्थः । प्रकारान्तरेणाङ्कमुखमाह—**अङ्कान्तेति** । छिन्नाङ्कस्य भिन्नाङ्कस्य विष्कम्भकस्य । प्रथमाङ्कादावपि कर्तव्यतामाह—**अपेक्षितमिति** । आकाङ्क्षितमित्यर्थः । परित्यज्य विच्छिद्य । शेषं सरसं वस्तु । आमुखानन्तरं प्रस्तावनानन्तरमेव । आमुखाक्षेपसंश्रयः आमुखसूचितः । विष्कम्भ-

---

मुखम्. **अङ्केति** । मुनिरप्याह—'विश्लिष्टमुखमङ्कस्य स्त्रिया वा पुरुषेण वा । यदुपक्षिप्यते पूर्वं तदङ्कमुखमुच्यते ॥' इति ॥

---

१. 'च' क-पुस्तके नास्ति.

विष्कम्भकाद्यैरपि नो वधो वाच्योऽधिकारिणः ॥६३॥
अन्योन्येन तिरोधानं न कुर्याद्रसवस्तुनोः ।

रसः शृङ्गारादिः । यदुक्तं धनिकेन—

'न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत् ।
रसं वा न तिरोदध्याद्वस्त्वलंकारलक्षणैः ॥' इति ।

बीजं बिन्दुः पताका च प्रकरी कार्यमेव च ॥ ६४ ॥
अर्थप्रकृतयः पञ्च ज्ञात्वा योज्याः यथाविधि ।

अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः ।

तत्र बीजम्—

अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति ॥ ६५ ॥
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ।

यथा—रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुर्दैवानुकूल्यलालितो यौगंधरायणव्यापारः । यथा वा—वेण्यां द्रौपदीकेशसंयमनहेतुर्भीमसेनक्रोधोपचितो युधिष्ठिरोत्साहः ।

अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ॥ ६६ ॥

यथा—रत्नावल्यामनङ्गपूजापरिसमाप्तौ कथार्थविच्छेदे सति

काद्यैरपीत्यादिना अङ्कैरपीत्यर्थः । अधिकारिणः प्रधानफलप्रभोः । वस्त्वलंकारलक्षणैः वस्त्वलंकारस्वरूपैः । बहुधा विसर्पति सहकारियोगेनोपचितं सद्विविधावान्तरकार्याणि जनयति । फलस्य प्रधानफलस्य प्रथमः प्रधानम् । दैवानुकूल्यलालितो दैवानुगुण्योपचितः । द्रौपदीकेशसंयमनं प्रधानफलम् । शत्रुवधादीन्यवान्तरफलानि । उद्भे-

---

1. **विष्कम्भकाद्यैरिति** । यदुक्तं महर्षिणाष्टादशाध्याये—'अङ्के प्रवेशके वा प्रकरणमाश्रित्य नाटके ऽपि । न वधः कर्तव्यः स्याद्यस्तत्र स नायकः ख्यातः ॥ अवतरणमेव कार्यं संधिर्वा ग्रहणमेव वा नित्यम् । बहुभिः कार्यविशेषैः प्रवेशकैः सूचयेद्वापि ॥' इति ॥

2. **बीजमिति** । अत्र विशेषो मातृगुप्ताचार्यैरभिहितः—'फले यस्य हि संहारः फलबीजं तु तद्भवेत् । वस्तुबीजं कथा ज्ञेया अर्थबीजं तु नायकः ॥' इति । पूर्वमल्पोद्दिष्टः पश्चाद् बहुधा विस्तारशाली कार्यफलको हेतुविशेषो बीजवद् बीजमित्युच्यते ॥

3. **अवेति** । अवान्तरकथाविच्छेदे तत्संधानकारी बिन्दुः । जले तैलबिन्दुवत्प्रसारित्वाद् बिन्दुरिति व्यपदिश्यते ॥

---

१. 'यथा' इत्यधिकं क-ख-ग पुस्तकेषु.

'[1]उदयनस्येन्दोरिवोद्वीक्षते' इति सागरिका श्रुत्वा '(सहर्षम्) कधं एसो सो उदअणणरिन्दो' इत्यादिरवान्तरार्थहेतुः ।

[2]व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते ।

यथा—रामचरिते सुग्रीवादेः, वेण्यां भीमादेः, शाकुन्तले विदूषकस्य चरितम् ।

पताकानायकस्य स्यान्न स्वकीयफलान्तरम् ॥ ६७ ॥
गर्भे संधौ विमर्शे वा निर्वाहस्तस्य जायते ।

यथा—सुग्रीवादे राज्यप्राप्त्यादि । यत्तु मुनिनोक्तम्—

'[3]आ गर्भादा विमर्शाद्वा पताका विनिवर्तते ।' इति,

दकारणमनन्तरोत्थापनहेतुः । **कथमित्यादि** । 'कथमेषः स उदयननरेन्द्रः' इति संस्कृतम् । व्यापि निर्वहणपर्यन्तं स्थायि [1]पात्रान्तरनिष्पाद्यं प्रधानफलसाधनं प्रासङ्गिकं वृत्तं कर्म । व्यापीत्यस्य व्यावृत्तिमाह—**पताकेति** । पताकाया नायकस्य स्वामिनः स्वकीयं स्वमात्रोपकारि यत्फलान्तरं 'न पताका—' इत्यनुषङ्गेणान्वयः । अस्य व्यापकत्वाभावमुपपादयति—**गर्भे इति** । 'संधौ' इति काकाक्षिन्यायेन उभयत्रान्वेति । निर्वाहः समाप्तिः । तस्य फलान्तरस्य । फलान्तरे मुनेः पताकापदप्रयोगस्याभिनवगुप्तपादाचार्यव्याख्यानेन गौणत्वमुपपाद्य स्वोक्तविरोधं परिहर्तुं-

---

1. **उदयनस्येति** । 'अस्तापास्तसमस्तभासि नभसः पारं प्रयाते रवावास्थानीं समये समं नृपजनः सायंतने संपतन् । संप्रत्येष सरोरुहद्युतिमुषः पादांस्तवासेवितुं प्रीत्युत्कर्षकृतो दृशामुदयनस्येन्दोरिवोद्वीक्षते ॥' इति तु समस्तम् ॥'

2. **व्यापीति** । यदुक्तं भरतेन—'यद्वृत्तं हि परार्थं स्यात्प्रधानस्योपकारकम् । प्रधानवच्च कल्प्येत सा पताकेति कीर्तिता ॥' इति ॥

3. **आ गर्भादिति** । एतदुत्तरार्धं तु 'कस्माद्यस्मान्निबन्धोऽस्याः परार्थः परिकीर्त्यते ॥ इति ॥

---

१. "वृत्तं चरितं फलान्तरम् । पताकेति केषांचिन्मतं दूषयति—पताकानायकस्येति । फलान्तरं प्रकृतप्रयोजनानुपकारि 'न पताका' इत्यन्वयः । तत्र हेतुमाह—गर्भ इति । निर्वाहः समाप्तिः । तस्य फलान्तरस्य पताका निर्वहणपर्यन्तमस्ति । इदं तु गर्भादौ नायकस्य फलान्तरे प्रासङ्गिकत्वेनैव लाक्षणिकपताकापदप्रयोगसत्त्वेऽपि तस्य व्यापकत्वाभावेन पताकालक्षणाव्याप्तिरिति तस्या लक्ष्यत्वमङ्गीकरोति पताका नायकस्येति । लक्ष्यत्वाङ्गीकारे स्वव्याप्तिं दर्शयति—गर्भ इति । निर्वाहः समाप्तिः । तस्य फलान्तरस्य समाप्यत इति नास्य पताकात्वमिति भावः । ननु तत्र मुनेः पताकापदप्रयोगात्तैव पताका । सत्यम् । स च लाक्षणिको न मुख्य इत्याह—यच्चिति । नायकफलं नायकस्य प्रासङ्गिकं फलान्तरं न तु वास्तविकी पताका । तत्र हेतुः—निर्वहणेति । प्रदेशस्थमेकदेशवृत्ति । सुग्रीवराज्यप्राप्त्यादौ प्रासङ्गिकप्रदेशस्थे नायकफलान्तरे प्रकरीव्यवहाराभावात्तत्राव्याप्तिरिति प्रकरीलक्षणे तद्भेदं निवेश्याव्याप्तिमुद्धरति—प्रकरीति" इति पाठभेदः पुस्तकान्तरे.

तत्र 'पताकेति । पताका नायकफलं निर्वहणपर्यन्तमपि पताकायाः वृत्तिदर्शनात्' इति व्याख्यातमभिनवगुप्तपादैः ।

प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी[1] मता ॥ ६८ ॥

यथा—कुलपत्यङ्के रावणजटायुसंवादः ।

प्रकरीनायकस्य स्यान्न स्वकीयं फलान्तरम् ।
अपेक्षितं तु यत्साध्यमारम्भो यन्निबन्धनः ॥ ६९ ॥
समापनं तु यत्सिद्ध्यै तत्कार्यमिति संमतम् ।

यथा—रामचरिते रावणवधः ।

अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः ॥७०॥
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ।

तत्र

भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये ॥ ७१ ॥

यथा—रत्नावल्यां रत्नावल्यन्तःपुरनिवेशार्थं यौगंधरायणस्यौत्सुक्यम् । एवं नायकनायिकादीनामप्यौत्सुक्यमाकरेषु बोद्धव्यम् ।

प्रयत्नस्तु[2] फलावाप्तौ व्यापारोऽतित्वरान्वितः ।

यथा रत्नावल्याम्—'तह वि ण अत्थि अण्णो दंसणउवाओ त्ति जधा

माह—**यत्त्विति** । तत्र मुनिवचने । पताका पताकापदं । गौण्या वृत्त्या नायकफलं पताकानायकस्य फलान्तरम् । गौणत्वे हेतुमाह—**निर्वहणेति** । प्रकरीमाह—**प्रासङ्गिकमिति** । प्रदेशस्थमेकदेशवृत्ति । प्रासङ्गिकपदव्यावृत्तिमाह—**प्रकरीति** । प्रकरीनायकस्य प्रकरीस्वामिनः । स्वकीयं फलान्तरं प्रकृतानुपयोगि । 'न प्रकरी' इत्यनुषङ्गेणान्वयः । यथा जटायोर्मोक्षादिप्राप्त्यादि । कार्यमाह—**अपेक्षितमिति** । आकाङ्क्षितम्, न तु प्रासङ्गिकमित्यर्थः । आरम्भ उपाये प्रथमप्रवृत्तिः । यन्निबन्धनः यदृच्छाप्रयोज्यः । समापनं सामग्रीसमवधानम् । अवस्था अङ्गानि । औत्सुक्यमुत्कटरागः । 'नायकश्च नायिकादयश्च' इति विग्रहः । अतो नैकशेषः । **तह वीति** ।

---

1. **प्रकरीति** । भावप्रकाशिकायां तु विशेषः—'शोभायै वैदिकादीनां यथा पुष्पाक्षतादयः । अथर्तुवर्णनादिस्तु प्रसङ्गे प्रकरी भवेत् ॥' इति । यथा शाकुन्तले षष्ठाङ्के—'ततः प्रविशति चूताङ्कुरमवलोकयन्ती चेटी । अपरा च पृष्ठतस्तस्याः ।' इत्यादिना 'नेपथ्ये' इत्यन्तेन ॥

2. **प्रयत्न इति** । यदुक्तं नाट्यशास्त्रे—'अपश्यतः फलप्राप्तिं यो व्यापारः फलं प्रति । परं चौत्सुक्यगमनं प्रयत्नः परिकीर्तितः ॥ इति ॥

तथा आलिहिअ जधासमीहिदं करइस्सम् ।' इत्यादिना प्रतिपादितो रत्नावल्याश्चित्रलेखनादिर्वत्सराजसंगमोपायः । यथा च—रामचरिते समुद्रबन्धनादिः ।

उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसंभवः ॥ ७२ ॥

यथा—रत्नावल्यां तृतीयेऽङ्के वेषपरिवर्तनाभिसरणादेः संगमोपायाद्वासवदत्तालक्षणापायशङ्कया चानिर्धारितैकान्तसंगमरूपफलप्राप्तिप्रत्याशा । एवमन्यत्र ।

अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता ।

अपायाभावान्निर्धारितैकान्तफलप्राप्तिः ।

यथा रत्नावल्याम्—'राजा—देवीप्रसादनं त्यक्त्वा नान्यमत्रोपायं पश्यामि ।' इति देवीलक्षणापायस्य प्रसादनेन निवारणान्नियतफलप्राप्तिः सूचिता ।

सावस्था फलयोगः स्याद्यः समग्रफलोदयः ॥ ७३ ॥

यथा—रत्नावल्यां रत्नावलीलाभश्चक्रवर्तित्वलक्षणफलान्तरलाभसहितः । एवमन्यत्र ।

यथासंख्यमवस्थाभिरार्भियोगाद्यैः पञ्चभिः ।
पञ्चधैवेतिवृत्तस्य भागाः स्युः, पञ्च संधयः ॥ ७४ ॥

तल्लक्षणमाह—

अन्तरैकार्थसंबन्धः संधिरेकान्वये सति ।

एकेन प्रयोजनेनान्वितानां कथांशानामवान्तरैकप्रयोजनसंबन्धः संधिः ।

'तथापि नास्त्यन्यो दर्शनोपाय इति यथा तथा आलिख्य यथासमीहितं करिष्यामि ।' इति संस्कृतम् । उपायश्च, अपायस्य प्रतिबन्धकस्य शङ्का च ताभ्याम् । प्राप्तेः फलप्राप्तेः संभवः संभावना । संशय इति यावत् । **सावस्थेति** । समग्रस्यानेकफलस्य य उदयः सा फलयोगः फलागमो नामावस्था । अन्यत्र वीरचरितादौ सीतालाभादिसहितो रावणवधादिः । संधिमाह—**यथासंख्यमिति** । आभिरनन्तरो-

---

1. **अन्तरेति** । मन्दारमरन्देऽप्युक्तम्—'मुख्यप्रयोजनवशात्तथाङ्गानां समन्वये अवान्तरार्थसंबन्धः संधिः संधानरूपतः ॥' इति ॥

---

१. 'रूप' इति क-पुस्तके नास्ति. २. 'सङ्ग' इत्यधिकं क-पुस्तके. ३. 'च' क.

तद्भेदानाह—

मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः ॥ ७५ ॥
इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते ।

यथोद्देशं लक्षणमाह—

यत्र बीजसमुत्पत्तिर्नानार्थरससंभवा ॥ ७६ ॥
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्तितम् ।

यथा—रत्नावल्यां प्रथमेऽङ्के ।

फलप्रधानोपायस्य मुखसंधिनिवेशिनः ॥ ७७ ॥
लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत् ।

यथा—रत्नावल्यां द्वितीयेऽङ्के वत्सराजसागरिकासमागमहेतोरनुरागबीजस्य प्रथमाङ्कोपक्षिप्तस्य सुसंगता-विदूषकाभ्यां ज्ञायमानतया किंचिल्लक्ष्यस्य वासवदत्तया चित्रफलकवृत्तान्तेन किंचिदुन्नीयमानस्योद्देशरूप उद्भेदः ।

फलप्रधानोपायस्य[1] प्रागुद्भिन्नस्य किंचन ॥ ७८ ॥
गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान्मुहुः ।

फलस्य गर्भीकरणाद्गर्भः । यथा रत्नावल्यां द्वितीयेऽङ्के—'**सुसंगता**—सहि, अदक्खिणा दाणिं सि तुमं जा एवं भट्टिणा हत्थेण गहिदा वि कोवं ण मुञ्चसि।' इत्यादौ समुद्भेदः। पुनर्वासवदत्ताप्रवेशे ह्रासः। तृतीयेऽङ्के—'तद्वार्तान्वेषणाय गतः कथं चिरयति वसन्तकः ।' इत्यन्वेषणम् । '**विदूषकः**—ही ही भोः, कोसम्बीरज्जलाभेणावि ण तादिसो पिअवअस्सस्स परितोसो जादिसो मम सआसादो पियवअणं सुणिअ

क्ताभिः । अस्य संधेः । क्रमादुद्देशक्रमात् । अर्थो वस्तु, रसः शृङ्गारादिः, तयोः संभवो व्यञ्जनं यत्र । लक्ष्यालक्ष्य इव । किंचिल्लक्ष्य इत्यर्थः । उद्भेद उद्देशः, अनुरागरूपबीजस्य । सुसंगता सागरिकाया वयस्या । प्रागुद्भिन्नस्य प्रतिमुखोद्दिष्टस्य । ह्रासस्तिरोभावः । **सहीति** । 'सखि, अदक्षिणेदानीमसि त्वं या एवं भर्त्रा दृस्तेन गृहीतापि कोपं न मुञ्चसि ।' इति संस्कृतम् । **ही हीति** । 'कौशाम्बीराज्यलाभेनापि न तादृशः प्रियवयस्यस्य (हृदय) परितोषो यादृशो मम सकाशादद्य

1. **फलेति** । नाट्यशास्त्रेऽपि—'उद्भेदस्तस्य बीजस्य प्राप्तिरप्राप्तिरेव वा । पुनश्चान्वेषणं यत्र स गर्भ इति संज्ञितः ॥' इति ॥

---

१. 'विमर्षः' घ.

यथा वा—शाकुन्तले सप्तमाङ्के शकुन्तलाभिज्ञानादुत्तरोऽर्थराशिः ।

एषामङ्गान्याह—

उपक्षेपः परिकरः परिन्यासो विलोभनम् ॥ ८१ ॥
युक्तिः प्राप्तिः समाधानं विधानं परिभावना ।
उद्भेदः करणं भेद एतान्यङ्गानि वै मुखे ॥ ८२ ॥

यथोद्देशं लक्षणमाह—

काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः ।

काव्यार्थ इतिवृत्तलक्षणप्रस्तुताभिधेयः ।

यथा वेण्याम्—'भीमः[1]—

'[1]लाक्षागृहानल-विषान्न-सभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ।
आकृष्य पाण्डववधूपरिधानकेशा-
न्स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः ॥'

समुत्पन्नार्थबाहुल्यं ज्ञेयः परिकरः पुनः ॥ ८३ ॥

यथा तत्रैव—

'प्रवृद्धं यद्वैरं मम खलु शिशोरेव कुरुभि-
र्न तत्रार्यो हेतुर्न भवति किरीटी न च युवाम् ।
[2]जरासंधस्योरःस्थलमिव विरूढं पुनरपि
क्रुधा भीमः संधिं विघटयति यूयं घटयत ॥'

विग्रहः । एषां मुखादीनाम् । द्वादशमुखसंध्यङ्गान्याह—**उपक्षेप इति** । समुत्पत्तिः संक्षेपेण उपक्षेपणम् । क्वचित् 'समुत्क्षिप्तिः' इति पाठः । **लाक्षेत्यादि** । अत्र वैरप्रकाशनेनात्मसंभावनया च वैरोद्धारप्रकारस्येतिवृत्तस्य सूचनम् । बाहुल्यमतिशयेन सूचनम् । मम भीमस्य क्रुधा । शिशुत्वेनात्मनिर्देशः । आर्यो युधिष्ठिरः । युवां नकुलसहदेवौ । विरूढं निश्चितं विशालं च । अत्र संधिविघटनेन वैरोद्धरणप्रकारस्या-

---

1. **लाक्षेति** । लाक्षया निर्मितं गृहं लाक्षागृहं तत्र दत्तोऽनलो वह्निः । विषेण मिश्रितमन्नम् । द्यूतक्रीडार्थं सभायां प्रवेशः । एतैः ॥

2. **जरेति** । जन्मकाले मगधराजस्य शरीरं द्विखण्डमासीत्, तत्पुनर्जरानामिकया राक्षस्या योजितम्, तस्माज्जरासंध इति नाम जातम् ॥

---

१. 'भीमः' इति क-ख-ग-पुस्तकेषु नास्ति. २. 'च खलु' क.

तन्निष्पत्तिः परिन्यासः

यथा तत्रैव—

'चञ्चद्भुजभ्रमितचण्डगदाभिघात-
संचूर्णितोरुयुगलस्य सुयोधनस्य ।
[1]स्त्यानावनद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि भीमः ॥'

अत्रोपक्षेपो नामेतिवृत्तलक्षणस्य काव्याभिधेयस्य संक्षेपेणोपक्षेपणमात्रम् । परिकरस्तस्यैव बहुलीकरणम् । परिन्यासस्ततोऽपि निश्चयापत्तिरूपतया परितो हृदये न्यसनम् । इत्येषां भेदः। एतानि चाङ्गानि उक्तेनैव पौर्वापर्येण भवन्ति । अङ्गान्तराणि त्वन्यथापि ।

गुणाख्यानं विलोभनम् ।

यथा तत्रैव—'द्रौपदी—णाध, किं दुक्करं तए परिकुविदेण ।' यथा वा मम चन्द्रकलायां चन्द्रकलावर्णने—'सेयम्, तारुण्यस्य विलासः—' इत्यादि । यत्तु शाकुन्तलादिषु '[2]ग्रीवाभङ्गाभिरामं—' इत्यादि मृगादिगुणवर्णनं तद्बीजार्थसंबन्धाभावान्न संध्यङ्गम् । एवमङ्गान्तराणामप्यूह्यम् ।

संप्रधारणमर्थानां युक्तिः

यथा—वेण्यां सहदेवो भीमं प्रति—'आर्य, किं महाराजसंदेशोऽयमव्युत्पन्न एवार्येण गृहीतः।' इत्यतः प्रभृति यावद्भीमवचनम् ।

धिकसूचनम् । अस्याधिकसूचितस्य निष्पत्तिर्निश्चयापत्तिः । **स्त्यानेति** । स्त्यानेन समूहेन अवनद्धं संबद्धं यद् घनं निबिडं शोणितं तेन शोणः पाणिर्यस्य सः । उत्तंसयिष्यति विभूषयिष्यति । अत्रात्यन्तसूचितस्य निश्चयोपादानम् । उपक्षेपादीनां त्रयाणां भेदं स्पष्टयति—**तत्रेत्यादिना । किमिति** । 'किं दुष्करं त्वया परिकुपितेन ।' इति संस्कृतम् । हा (विला)सः प्रकाशः । बीजार्थस्य कार्यस्य । **एवमङ्गान्तराणामिति** । बीजार्थसंबन्धेऽङ्गत्वम् । नान्यथेत्यर्थः । युक्तिः कर्तव्यत्वनिश्चयः । अव्यु-

---

1. **स्त्यानेति** । स्त्यानं स्निग्धम् । 'स्त्यानं स्निग्धे प्रतिध्वाने घनत्वालस्ययोरपि' इति मेदिनी । अवनद्धं लग्नं यद् घनं सान्द्रं शोणितं रक्तं तेन शोणौ रक्तवर्णौ पाणी यस्य सः॥

2. **ग्रीवेति** । 'ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् । दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥' इति तु समस्तम् ॥

---

१. क-ख-ग-पुस्तकेषु श्लोकोऽयं संपूर्ण एव लिखितः.

'युष्मान्हेपयति क्रोधाल्लोके शत्रुकुलक्षयः ।
न लज्जयति दाराणां सभायां केशकर्षणम् ॥' इति ।

प्राप्तिः[1] सुखागमः ॥ ८४ ॥

यथा तत्रैव—'मक्षामि कौरवशतं समरे न कोपात्—' इत्यादि। 'द्रौपदी—(श्रुत्वा । सहर्षम् ।) णाध, अस्सुदपुव्वं क्खु एदं वअणम् । ता पुणो पुणो भण ।'

बीजस्यागमनं यत्तु तत्समाधानमुच्यते ।

यथा तत्रैव—'(नेपथ्ये ।) भो भो विराटद्रुपदप्रभृतयः, श्रूयताम्-

यत्सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं
यद्विस्मर्तुमपीहितं शमवता शान्ति कुलस्येच्छता ।
तद्द्यूतारणिसंभृतं नृपसुताकेशाम्बराकर्षणैः
क्रोधज्योतिरिदं महत्कुरुवने यौधिष्ठिरं जृम्भते ॥'

अत्र 'स्वस्था भवन्ति मयि जीवति—'इत्यादिबीजस्य प्रधाननायकाभिमतत्वेन सम्यगाहितत्वात्समाधानम् ।

सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतम् ॥ ८५ ॥

यथा बालचरिते—

'उत्साहातिशयं वत्स तव बाल्यं च पश्यतः ।
मम हर्षविषादाभ्यामाक्रान्तं युगपन्मनः ॥'

यथा वा मम प्रभावत्याम्—'नयनयुगासेचनकम्—' इत्यादि।

कुतूहलोत्तरा वाचः प्रोक्ता तु परिभावना ।

त्पन्नोऽविचार्यः । हेपयति लज्जयति । **णाधेति** । 'नाथ, अश्रुतपूर्वं खल्विदं वचनम् । तत्पुनः पुनर्भण ।' इति संस्कृतम् । आगमनं प्रधाननायकाभिमतत्वेन ज्ञानम् । द्यूतमक्षक्रीडैवारणिर्निर्मन्थनकाष्ठं तेन संभृतमुत्पादितम् । **उत्साहातिशयमिति** । श्रीरामं प्रति भार्गवस्योक्तिरियम् । बाल्यमविचारितं कर्म हरकार्मुकभङ्गरूपम् । यद्वा बाल्यं बालकत्वम् । बालकेन सह समरः कर्तव्य इति दुःखम् । अत्र भार्गवस्य श्रीरामपराभवोद्यमरूपोऽर्थः सुखदुःखाभ्यां विहितः । कुतूहलोत्तराः कौतुकबहुलाः ।

---

1. **प्राप्तिरिति** । नाट्यशास्त्रेऽप्युक्तम्—'सुखार्थस्याभिगमनं प्राप्तिरित्यभिधीयते ॥' इति ॥

2. **महदिति** । नृपसुताकेशाम्बराकर्षणैर्महदिति योजना ॥

---

१. 'कुले' ख-ग; 'बले' घ.

यथा—वेण्यां द्रौपदी युद्धं स्यान्न वेति संशयाना तूर्यशब्दानन्तरम् 'णाध, किं दाणिं एसो पलअजलहरत्थणिदमत्थरो खणेखणे समरदुन्दुभी ताडीअदि।'

बीजार्थस्य प्ररोहः स्यादुद्भेदः

यथा तत्रैव—'द्रौपदी—णाध, पुणो वि तए समासासइदव्वा । भीमः—

भूयः परिभवक्लान्तिलज्जाविधुरितानन्म् ।
अनिःशेषितकौरव्यं न पश्यसि वृकोदरम् ॥'

करणं पुनः ॥ ८६ ॥

प्रकृतार्थसमारम्भः

यथा तत्रैव—'देवि, गच्छामो वयमिदानीं कुरुकुलक्षयाय।' इति।

भेदः[1] संहत[2]भेदनम् ।

यथा तत्रैव—'अत एवाद्य प्रभृति भिन्नोऽहं भवद्भ्यः ।' [2]केचित्तु 'भेदः प्रोत्साहना' इति वदन्ति।

अथ प्रतिमुखाङ्गानि—

विलासः परिसर्पश्च विधूतं[3] ताँपनं[4] तथा ॥ ८७ ॥
नर्म नर्मद्युतिश्चैव तथा प्रगमनं[5] पुनः ।
विरोधः[6] प्रतिमुखे तथा स्यात्पर्युपासनम् ॥ ८८ ॥
पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि ।

तत्र

समीहा रतिभोगार्था विलास इति कथ्यते ॥ ८९ ॥

णाध किमिति। 'नाथ, किमिदानीमेष प्रलयजलधरस्तनितमन्थरः क्षणे क्षणे समरदुन्दुभिस्ताड्यते ।' इति संस्कृतम् । प्ररोहो भवत्प्रायत्वेनोद्भावनम्। **णाधेति**। 'नाथ, पुनरपि त्वया समाश्वासयितव्या ।' इति संस्कृतम् । विधुरितानं नतमुखम् । प्रकृतार्थस्य सम्यगारम्भः। संहतानामविरुद्धकर्मत्वेन मिलितानां भेदनं संघातात्वा-

---

1. **भेद इति** । ऋषिणाप्युक्तम्—'संघातभेदनार्थो यः स भेद इति कीर्तितः ॥'इति॥
2. **केचिदिति** । दशरूपककारादयः ॥

---

१. 'वन्धुरिताननम्' घ. २. संहति' क-ख-ग-घ. ३. 'विधूतं' क. ४. 'तपनम्' क-ख-ग. ५. 'प्रगयणम्' इति नाट्यशास्त्र-दशरूपकस्थः पाठः. ६. 'निरोधः' इति नाट्यशास्त्र-दशरूपकस्थः पाठः.

रतिलक्षणस्य भावस्य यो हेतुभूतो भोगो विषयः प्रमदा पुरुषो वा तदर्था समीहा विलासः । यथा शाकुन्तले—

'कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि ।
[1]अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते ॥'

[2]इष्टनष्टानुसरणं परिसर्पश्च कथ्यते ।

यथा शाकुन्तले—'राजा—भवितव्यमत्र तया । तथा हि ।
[3]अभ्युन्नता पुरस्ताद्वगाढा जघनगौरवात्पश्चात् ।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ॥'

कृतस्यानुनयस्यादौ [3]विधुतं त्वपरिग्रहः ॥ ९० ॥

यथा तत्रैव—'अलं वो अन्तेउरविरहपज्जुस्सुएण राएसिणा उवरुद्धेण ।' केचित्तु 'विधुतं स्यादरतिः' इति वदन्ति ।

उपायादर्शनं यत्तु [4]तापनं नाम तद्भवेत् ।

लनम् । त्रयोदश प्रतिमुखाङ्गान्याह—**विलास इति** । तदर्था तदुपभोगार्था । समीहा स्पृहा । तस्याः प्रियायाः भावः सुरतचेष्टा च दर्शनं च ते आयासति वाञ्छति । रतिं प्रीतिम् । अकृतार्थे अकृतकार्ये । उभयोः प्रियाभावदर्शनयोः प्रार्थना कामना । इष्टस्य अभीष्टस्य नष्टस्य अदृष्टस्य अनुसरणमन्वेषणम् । अवगाढा अतिनिम्ना । पदपङ्क्तिः पदचिह्नश्रेणी । **अलं वो इति** । 'अलं वोऽन्तःपुरविरहपर्युत्सुकेन राजर्षिणा उपरुद्धेन ।' इति संस्कृतम् । सख्या कृतस्य राजावस्थानानुनयस्य

---

1. **अकृतेति** । मनसिजेऽकृतार्थेऽप्युभयप्रार्थना स्वस्वाभिलाषो रतिं रागं यतः कुरुते प्रीतिमुत्पादयति । अहं तत्र गमिष्यामि, तामेव वक्ष्य इत्यात्माभिलाषः । एवं मां प्रति तस्या अप्यभिलाषो मनसिजेऽकृतार्थे संभवति ॥

2. **अभ्युन्नतेति** । पुरस्तात्पादाग्रभागेऽभ्युन्नता । उन्नतत्वं च पश्चाद्भागापेक्षया । पश्चात्पार्ष्णिदेशे ॥

3. **केचिदिति** । दशरूपककारादयः । काव्येन्दुप्रकाशकारा अपि 'इष्टानवाप्तिरचितारतिर्विधुतमुच्यते ।' इति तल्लक्षणं वदन्ति । 'श्यामां श्यामलिमानमानयत भोः सान्द्रैर्मषीकूर्चकैर्मत्रं तन्त्रमथ प्रयुज्य हरत श्वेतोत्पलानां श्रियम् । चन्द्रं चूर्णयत क्षणाच्च कणशः कृत्वा शिलापट्टके येन द्रष्टुमहं क्षमे दश दिशस्तद्वक्त्रमुद्राङ्किताः ॥' इत्युदाहरन्ति च ॥

4. **तापनमिति** । दशरूपके तु तापनस्थले शमो निर्दिष्टः । तथा च तद्वाक्यम्—'तच्छमः शमः' इति । तच्छब्देन पूर्वनिर्दिष्टा अरतिर्गृह्यते तस्या उपशमः शम इति तदर्थः ।

---

१. 'इष्ट' क. २. 'विधृतं' घ.

यथा रत्नावल्याम्—'**सागरिका**—

दुल्लहजणाणुराओ लज्जा गुरुई परअसो अप्पा ।
पियसहि विसमं पेम्मं मरणं सरणं णवरि एक्कम् ॥'

परिहासवचो नर्म[1]

यथा रत्नावल्याम्—'**सुसंगता**—सहि, जस्स किदे तुमं आअदा सो अअ दे पुरदो चिट्ठदि । **सागरिका**—(साभ्यसूयम् ।) कस्स किदे अहं आअदा । **सुसंगता**—अलं अण्णसंकिदेण । णं चित्तफलअस्स ।'

द्युतिस्तु परिहासजा ॥ ९१ ॥

नर्मद्युतिः

यथा तत्रैव—'**सुसंगता**—सहि, अदक्खिणा दाणिं सि तुमं जा एव्वं भट्टिणा हत्थावलम्बिदावि कोवं ण मुञ्चसि । **सागरिका**—(सभ्रूभङ्गमीषद्विहस्य ।) सुसंगदे, दाणिं वि कीलिदं न विरमसि ।' केचित्तु—'दोषस्[2]याच्छादनं हास्यं नर्मद्युतिः' इति वदन्ति ।

राज्ञा अपरिग्रहः । अरतिरवज्ञा । **दुल्लहेति** । 'दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा । प्रियसखि विषमं प्रेम मरणं शरणं केवलमेकम् ॥' इति संस्कृतम् । णवरिअ-शब्दः केवलार्थो देशी । **सहीति** । 'सखि, यस्य कृते त्वमागता सोऽयं ते पुरतस्तिष्ठति ।' इति संस्कृतम् । 'कस्य कृते अहमागता ।' इति संस्कृतम् । 'अलमन्यशङ्कितेन । ननु चित्रफलकस्य ।' इति संस्कृतम् । 'सखि, अदक्षिणेदानीमसि त्वं या एवं भर्त्रा हस्तावलम्बितापि कोपं न मुञ्चसि ।' इति संस्कृतम् । 'सुसंगते, इदानीमपि क्रीडितं न विरमसि ।' इति संस्कृतम् ।

यथा रत्नावल्याम्—'**राजा**—वयस्य, अनया लिखितोऽहमिति यत्सत्यम्, आत्मन्यपि मे बहुमानः । तत्कथं न पश्यामि ।' इति प्रक्रमे '**सागरिका**—(आत्मगतम् ।) हिअअ, समस्सस । मणोरहो वि दे एत्तिअं भूमिं ण गदो ।' इति किंचिदरत्युपशमाच्छम इति तदुदाहरणम् । काव्येन्दुप्रकाशेऽपि 'शमोऽरतिशमो ज्ञेयः' इति तथैव लक्षणम् । "शाकुन्तले शकुन्तलायामनुरक्तस्य राज्ञो ब्राह्मणकन्यात्वेनारतौ पुनः 'असंशयं क्षत्रपरिग्रहक्षमा—' इत्यादिनारतेरुपशमाच्छमः" इत्युदाहरणमात्रे भेदः । मन्दारमरन्देऽप्येवमेव तल्लक्षणं विहितम् ॥

1. **परीति** । नाट्यशास्त्रेऽप्युक्तम्—'क्रीडार्थं विहितं यत्र हास्यं नर्मेति तत्स्मृतम् ।' इति ॥

2. **दोषेति** । तथा च भरतः—'दोषप्रच्छादनार्थं तु नर्मद्युतिरिति स्मृतम् ।' इति । अत एव काव्येन्दुप्रकाशकारोऽपि 'नर्मद्युतिः कोपगुप्तिः' इति तल्लक्षणं चकार ॥

[1]**प्रगमनं वाक्यं स्यादुत्तरोत्तरम् ।**

यथा विक्रमोर्वश्याम्—'**उर्वशी**—जअदु जअदु महाराओ । **राजा**—मया नाम जितं यस्य त्वया जय उदीर्यते ।' इत्यादि ।

विरोधो व्यसनप्राप्तिः

यथा चण्डकौशिके—'**राजा**—नूनमसमीक्ष्यकारिणा मया अन्धेनेव स्फुरच्छिखाकलापो ज्वलनः पद्भ्यां समाक्रान्तः ।'

[2]कृतस्यानुनयः पुनः ॥ ९२ ॥

स्यात्पर्युपासनं

यथा रत्नावल्याम्—'**विदूषकः**—भो, मा कुप्य । एसा हि कदलीघरन्तरं गदा ।' इत्यादि ।

[3]पुष्पं विशेषवचनं मतम् ।

यथा तत्रैव—'(राजा हस्ते गृहीत्वा स्पर्शं नाटयति ।) **विदूषकः**—भो वअस्स, एसा अपुव्वा सिरी तए समासादिदा । **राजा**—वयस्य, सत्यम् ।

श्रीरेषा, पाणिरप्यस्याः पारिजातस्य पल्लवः ।
कुतोऽन्यथा स्रवत्येष स्वेदच्छद्मामृतद्रवः ॥'

[4]प्रत्यक्षनिष्ठुरं वज्रम्

यथा तत्रैव—'**राजा**—कथमिहस्थोऽहं त्वया ज्ञातः । **सुसंगता**—ण केवलं तुमं समं चित्तफलएण । ता जाव गदुअ देवीए णिवेदइस्सम् ।'

उत्तरमुत्कृष्टतरमुत्तरं यस्य तत् । 'जयतु जयतु महाराजः ।' इति संस्कृतम् । व्यसनस्य विपदः प्राप्तिः । 'भोः, मा कुप्य । एषा हि कदलीगृहान्तरं गता ।' इति संस्कृतम् । एषा सागरिका । विशेषस्य प्रकर्षस्य वचनम् । 'भो वयस्य, एषा अपूर्वा श्रीस्त्वया समासादिता ।' इति संस्कृतम् । प्रत्यक्षं साक्षान्निष्ठुरं पुरुषवचनम् । वज्रवद्दुःखदत्वाद् वज्रम् । 'न केवलं त्वं समं चित्रफलकेन । तद्यावद्गत्वा देव्यै निवेदयिष्यामि

---

1. **प्रगमनमिति** । मन्दारमरन्देऽप्युक्तम्—'तस्यानुरागबीजस्य चोत्तरोत्तरभाषणैः । प्रकाशनं प्रगमनमिति नाट्यविदो विदुः ॥' इति ॥

2. **कृतस्येति** । नाट्यशास्त्रेऽपि—'क्रुद्धस्यानुनयो यस्तु भवेत्तत्पर्युपासनम् ।' इति ॥

3. **विशेषेति** । रागजनकमित्यर्थः ॥

4. **प्रत्यक्षेति** । नाट्यशास्त्रे महर्षिणाप्युक्तम्—'विरुक्षवचनप्रायं वज्रमित्यभिधीयते ।' इति ॥

उपन्यासः प्रसादनम् ॥ ९३ ॥

यथा तत्रैव—'**सुसंगता**—भट्टुण, अलं सङ्काए । मए वि भट्टिणीए पसादेण कीलिदं ज्जेव एदिहिं । ता किं कण्णाभरणेण । अदो वि मे गरुअरो पसादो एसो, जं तुए अहं एत्थ आलिहिदत्ति कुविदा मे पिअसही सागरिआ । एसा ज्जेव पसादीअदु ।' केचितु—'[1]उपपत्तिकृतो ह्यर्थ उपन्यासः स कीर्तितः ।' इति वदन्ति । उदाहरन्ति च, तत्रैव—'अदिमुहरा क्खु सा गब्भदासी' इति ।

चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते ।

यथा महावीरचरिते तृतीयेऽङ्के—

'परिषदियमृषीणामेष वीरो [3]युधाजि-
त्सहनृपतिरमात्यैर्लोमपादश्च [4]वृद्धः ।
अयमविरतयज्ञो ब्रह्मवादी पुराणः
प्रभुरपि जनकानामङ्ग भो याचकस्ते ॥'

इत्यत्र ऋषिक्षत्रादीनां वर्णानां मेलनम् ।

अभिनवगुप्तपादास्तु—'वर्णशब्देन पात्राण्युपलक्ष्यन्ते । संहारो मेलनम्' इति व्याचक्षते । उदाहरन्ति च रत्नावल्यां द्वितीयेऽङ्के—'अदो वि मे अअं गुरुअरो पसादो—' इत्यादेरारभ्य 'णं हत्थे गेण्हिअ पसादेहि णम् । **राजा**—कासौ कासौ ।' इत्यादि ।

इति संस्कृतम् । 'भर्तः, अलं शङ्कया । मयापि भर्त्र्याः प्रसादेन क्रीडितमेव एतैः । तत्किं कर्णाभरणेन । अतोऽपि मे गुरुतरः प्रसाद एषः, यत्त्वया अहमत्र आलिखितेति कुपिता मे प्रियसखी सागरिका । एषैव प्रसाद्यताम् ।' इति संस्कृतम् । उपपत्तिर्हेतुः, तया कृतः । 'अतिमुखरा खल्वेषा गर्भदासी ।' इति संस्कृतम् । दासीगर्भाज्जाता दासी गर्भदासी । चत्वारो वर्णाश्चातुर्वर्ण्यम्, तस्योपगमनं मेलनम् । 'अतोऽपि मे अयं गुरुतरः प्रसादः ।' इति संस्कृतम् । 'ननु हस्ते गृहीत्वा प्रसादय एनाम् ।' इति संस्कृतम् । अत्र राज-विदूषक-सागरिका-सुसंगता-पात्राणां

---

1. **उपेति** । नाट्यशास्त्रे त्विदमेवोपन्यासलक्षणमुपलभ्यते ॥

2. **ऋषीणामिति** । ऋषति वेदं पश्यतीति ऋषिः । गत्यर्थकानां ज्ञानार्थकत्वाद् धातूनामनेकार्थकत्वाद्वेह ऋषेर्दर्शने वृत्तिः । यास्कोऽपि ऋषिशब्दस्य प्रवृत्तिनिमित्तं वेदसंबन्धिदर्शनमेव निर्णीतवान् । दर्शनं च प्रत्यक्षीकरणं न चाक्षुषज्ञानमिति ॥

3. **युधाजिदिति** । युधाजित्कैकेयीभ्राता ॥

4. **लोमेति** । अङ्गराजश्च, यस्मै दशरथः शान्ताख्यां कन्यां दत्तवानपत्यकृत्तिकाम् ॥

अथ गर्भाङ्गानि—

अभूताहरणं मार्गो रूपोदाहरणे क्रमः ॥ ९४ ॥
संग्रहश्चानुमानं च प्रार्थना क्षिप्तिरेव च ।
त्रो[1](तो)टकादिबलोद्वेगा गर्भे स्युर्विद्रवस्तथा ॥ ९५ ॥
तत्र[2] व्याजाश्रयं वाक्यमभूताहरणं मतम् ।

यथा अश्वत्थामाङ्के—

'अश्वत्थामा हत इति पृथासूनुना[1] स्पष्टमुक्त्वा
स्वैरं शेषे[2] गज इति पुनर्व्याहृतं सत्यवाचा ।
तच्छ्रुत्वा[3]सौ दयिततनयः प्रत्ययात्तस्य राज्ञः
शस्त्राण्याजौ नयनसलिलं चापि तुल्यं मुमोच ॥'

तत्त्वार्थकथनं मार्गः

यथा चण्डकौशिके—'**राजा**—भगवन्,

गृह्यतामर्जितमिदं[4] भार्यातनयविक्रयात् ।
शेषस्यार्थे करिष्यामि चण्डालेऽप्यात्मविक्रयम् ॥'

रूपं[5] वाक्यं वितर्कवत् ॥ ९६ ॥

यथा रत्नावल्याम्—'**राजा**—

मनः प्रकृत्यैव चलं दुर्लक्ष्यं च तथापि मे ।
कामेनैतत्कथं विद्धं समं सर्वैः शिलीमुखैः ॥'

उदाहरणमुत्कर्षयुक्तं वचनमुच्यते ।

मेलनम् । अत्र त्रयोदशगर्भाङ्गान्याह—**अभूताहरणमिति** । व्याजाश्रयं छलसंबद्धम् । तत्त्वार्थकथनं यथार्थकथनम् । गर्भशय्या जरायुः । जगतामन्तकस्य यमस्य ।

---

1. **पृथासूनुनेति** । पृथासूनुना युधिष्ठिरेण ॥
2. **शेषे इति** । शेषे वाक्यसमाप्तौ ॥
3. **असाविति** । असौ द्रोणः ॥
4. **गृह्यतामिति** । कौशिकं प्रति राज्ञो हरिश्चन्द्रस्योक्तिरेषा ॥
5. **रूपमिति** । नाट्यशास्त्रेऽप्युक्तम्—'चित्रार्थसमवायो यस्तद्रूपमिति कीर्तितम् ।' इति ॥

---

१. 'तोटक' इति नाट्यशास्त्रादिषु पाठः. २. 'अत्र' घ. ३. 'किल' घ. ४. उत्तरार्धं नास्ति घ-पुस्तके.

यथा अश्वत्थामाङ्के—

'यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां,
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।
यो यस्तत्कर्मसाक्षी, चरति मयि रणे यश्च यश्च प्रतीपः[1]
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ॥'

भावतत्त्वोपलब्धिस्तु क्रमः स्यात्

यथा शाकुन्तले—'राजा—स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि । तथाहि ।

उन्नमितैकभ्रूलतमाननमस्याः[2] पदानि रचयन्त्याः ।
पुलकाञ्चितेन कथयति मय्यनुरागं कपोलेन ॥'

संग्रहः पुनः ॥ ९७ ॥

सामदानार्थसंपन्नः

यथा रत्नावल्याम्—**राजा**—साधु वयस्य, इदं ते पारितोषिकम् । (इति कटकं ददाति ।)'

लिङ्गादूहोऽनुमानता[3] ।

'निर्विकारात्मके चित्ते भावः प्रथमविक्रिया' इत्युक्तलक्षणस्य भावस्य तत्त्वोपलब्धिर्यथार्थ्यानुभवः । पदानि व्यवसितानि । अत्र यद्यपि 'भ्रूनेत्रादिविकारैस्तु संभोगेच्छाप्रकाशकः । भाव एवाल्पसंलक्ष्यविकारो हाव इष्यते ॥' इत्युक्तलक्षणो हाव एव, तथापि विशेषतया तत्र स्थितिरिति नानुपपत्तिः । **सामेति** । प्रियवचनं साम, तेन दानेन चार्थस्य संपत्तिरित्यर्थः । **इदमिति** । अत्र सामदानाभ्यां दूतपरितोषद्वारा सागरिकासंघटनादिरूपार्थसंपादनम् । लिङ्गाद् व्याप्तिपक्षधर्मताभ्यां साधनज्ञानात् । ऊहो व्यापकतानुभवः । 'अनुमानता' इति ताप्रत्ययः स्वार्थे ।

---

1. **प्रतीप इति** । मयि रणे चरति सति यो यः प्रतीपः प्रतिकूलो भवेदित्यर्थः ॥

2. **उन्नमितेति** । यैवैका भ्रूलतोन्नमिता तद्विक्त्थकपोलस्यैव पुलकाञ्चिततत्वमित्येकवचनम् । मयीति स्वस्याधिकरणत्वेन धन्यतां सुभगंमन्यतां च ध्वनयति । रतेः षष्ठ्यवस्थानुरागः। उक्तं च सुधाकरे—'अङ्कुरपल्लवकलिकाप्रसूनपरिभोगभागियं क्रमशः । प्रेमा मानः प्रणयः स्नेहो रागोऽनुराग इत्युक्तेः ॥' इति ॥

3. **लिङ्गादिति** । नाट्यशास्त्रेऽप्युक्तम्—'रूपानुरूपगमनमनुमानमिति स्मृतम् ।' इति ॥

यथा जानकीराघवे नाटके–'रामः—

लीलागतैरपि तरङ्गयतो धरित्री-
मालोकनैर्नमयतो जगतां शिरांसि ।
तस्यानुमापयति काञ्चनकान्तिगौर-
कायस्य सूर्यतनयत्वमधृष्यतां च ॥

रतिहर्षोत्सवानां तु प्रार्थनं प्रार्थना भवेत् ॥ ९८ ॥

यथा रत्नावल्याम्—'प्रिये सागरिके,

शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ
रम्भास्तम्भनिभं तथोरुयुगलं बाहू मृणालोपमौ ।
इत्याह्लादकराखिलाङ्गि रभसान्निःशङ्कमालिङ्ग्य मा-
मङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय ॥'

इदं च प्रार्थनाख्यमङ्गम् । यन्मते निर्वहणे भूतावसरत्वौत्पत्तिशस्ति-नामाङ्गं नास्ति तन्मतानुसारेणोक्तम् । अन्यथा पञ्चषष्टिसंख्यत्वप्रसङ्गात् ।

रहस्यार्थस्य तूद्भेदः क्षिप्तिः स्यात्

यथाश्वत्थामाङ्के—

'एकस्यैव विपाकोऽयं दारुणो भुवि वर्तते ।
केशग्रहे द्वितीयेऽस्मिन्नूनं निःशेषिताः प्रजाः ॥'

त्रो(तो)टकं पुनः ।

संरब्धवाक्

तरङ्गयतः कम्पयतः । तस्य लक्ष्मणस्य । अनुमान(प)यति अनुमानविषयीकरोति । अत्र लीलागमनप्रयुक्तपृथ्वीकम्पनादिकं साधनम् । प्रार्थनं भिक्षा । पद्मानुकारौ पद्मतुल्यौ । भूतावसरत्वात् । प्रार्थनायां प्राप्तविषयत्वात् । अन्यथा निर्वहणे प्रशस्तिसत्त्वे पञ्चषष्टिसंख्यत्वे को दोष इति चेत्, संप्रदायविरोध इति । एकस्य द्रौपदीकेशग्रहस्य । द्वितीये द्रोणसंबन्धिनि । संरब्धस्य रुष्टस्य वाक् ।

---

1. **तरङ्गयत इति** । तरङ्गयत इति षष्ठ्यन्तं पदम् । एवं नमयत इत्यपि ॥

2. **इतीति** । चन्द्रादिसादृश्येन अङ्गानां मदनानलतापनिर्वापणक्षमत्वं दर्शितम् ॥

3. **संरब्धेति** । उक्तं च नाट्यशास्त्रे—'संरम्भवचनप्रायं तोटकम्' इति ॥

4. **संप्रदायेति** । संप्रदायस्तु 'चतुःषष्टिर्बुधैर्ज्ञेयान्येतान्यङ्गानि संधिषु' इति महर्षिणा निर्दिष्टः ॥

---

१. 'तव' क-ख. २. 'इह' इत्यधिकं घ-पुस्तके. ३. '–त्वाभावात्' क. ४. 'प्रशस्तिः' इति व्यस्तं क-ख-पुस्तकयोः.

यथा चण्डकौशिके—'**कौशिकः**—आः, पुनः कथमद्यापि न संभूताः स्वर्णदक्षिणाः ।'

अधिबलमभिसंधिश्छलेन यः ॥ ९९ ॥[1]

यथा रत्नावल्याम्—'**काञ्चनमाला**—भट्टिणि, इयं सा चित्तसालिआ । बसन्तअस्स सण्णं करोमि ।' इत्यादि ।

नृपादिजनिता भीतिरुद्वेगः परिकीर्तितः ।[2]

यथा वेण्याम्—

'प्राप्तावेकरथारूढौ पृच्छन्तौ त्वामितस्ततः ।[3]
स कर्णारिः स च क्रूरो वृककर्मा वृकोदरः ॥'

शङ्काभयत्रासकृतः संभ्रमो विद्रवो मतः ॥ १०० ॥

'कालान्तककरालास्यं क्रोधोद्भूतं दशाननम् ।
विलोक्य वानरानीके संभ्रमः कोऽप्यजायत ॥'

अथ विमर्शाङ्गानि—

अपवादोऽथ संफेटो व्यवसायो द्रवो द्युतिः ।
शक्तिः प्रसङ्गः खेदश्च प्रतिषेधो विरोधनम् ॥ १०१ ॥
प्ररोचना विमर्शे स्यादादानं छादनं तथा ।
दोषप्रख्यापवादः स्यात्[4]

यथा वेण्याम्—'**युधिष्ठिरः**—पाञ्चालक, क्वचिदासादिता तस्य

अभिसंधिरभिप्रायानुसंधानम् । **भट्टिणीति** । 'भर्त्रि, इयं सा चित्रशालिका । वसन्तकस्य संज्ञां करोमि ।' इति संस्कृतम् । आदिपदेन 'किं पद्मस्य रुचिं न हन्ति—' इत्यादिश्लोकपर्यन्तस्य परिग्रहः । अत्र काञ्चनमाला-वासवदत्ता-वेषधारिण्योः सुसंगता-सागरिकयोश्छलेन काञ्चनमाला-वासवदत्ताभ्यां राज-विदूषकयोरभिप्रायज्ञानम् । कर्णारिः अर्जुनः । वृकस्य व्याघ्रविशेषस्येव कर्म यस्य सः । अत्र दुर्योधनस्य भीमार्जुनजनिता भीतिः । शङ्का अनिष्टाशंसा । त्रासो भयानुकूलव्यापारः । संभ्रमस्त्वरा । अत्र त्रयोदशविमर्शाङ्गान्याह—**अपवाद इति** । तस्य दुर्योधनस्य पदवी

---

1. **अधिबलमिति** । अत्र विशेषः—'यद्वेष्टजनसंधानं बुधा अधिबलं विदुः । तोटकस्यान्यथाभावं केचिच्चाधिबलं जगुः ॥' इति ॥

2. **नृपादिति** । आदिशब्देन अरिचौरयोर्ग्रहणम् ॥

3. **त्वामिति** । त्वां दुर्योधनम् ॥

4. **दोषेति** । दोषप्रख्या दोषप्रख्यापनम् ॥

दुरात्मनः कौरव्यापसदस्य[1] पदवी । **पाञ्चालकः**—न केवलं पदवी, स एव दुरात्मा देवीकेशपाशस्पर्शपातकप्रधानहेतुरुपलब्धः ।'

संफेटो रोषभाषणम् ॥ १०२ ॥[1]

यथा तत्रैव—'**राजा**—अरे रे मरुत्तनय, वृद्धस्य राज्ञः पुरतो निन्दितमप्यात्मकर्म श्लाघसे । शृणु रे,

कृष्टा केशेषु भार्या तव[2] तव च पशोस्तस्य राज्ञस्तयोर्वा
प्रत्यक्षं भूपतीनां मम भुवनपतेराज्ञया द्यूतदासी ।
तस्मिन्वैरानुबन्धे वद किमपकृतं तैर्हता ये नरेन्द्रा
बाह्वोर्वीर्यातिभार[3]द्रविणगुरुमदं मामजित्वैव दर्पः ॥

भीमः—(सक्रोधम् ।) आः पाप । **राजा**—आः पाप ।' इत्यादि ।

व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतुसंभवः ।

यथा तत्रैव—'**भीमः**—

निहिताशेषकौरव्यः क्षीबो[4] दुःशासनासृजा ।
भङ्क्ता दुर्योधनस्योर्वोर्भीमोऽयं शिरसानतः ॥'

द्रवो गुरुव्यतिक्रान्तिः शोकावेगादिसंभवा ॥ १०३ ॥

यथा तत्रैव—'**युधिष्ठिरः**—भगवन् कृष्णाग्रज सुभद्राभ्रातः,

ज्ञातिप्रीतिर्मनसि न कृता, क्षत्रियाणां न धर्मो
रूढं सख्यं तदपि गणितं नानुजस्यार्जुनेन ।

उपलब्धा । मरुत्तनय भीम । वृद्धस्य राज्ञो धृतराष्ट्रस्य । प्रतिज्ञा कार्यस्य निर्देशः, हेतुः साधननिर्देशः, तयोः संभवो मेलनम् । भङ्क्ता भञ्जनकर्ता । अत्र दुर्योधनोरुभञ्जनं कार्यं भीमत्वं साधनम् । गुरोः पूज्यस्य व्यतिक्रान्तिरादरलङ्घनम् । **ज्ञातिप्रीतिरिति** । बलदेवयुधिष्ठिरयोश्चन्द्रवंशभवत्वाज्ज्ञातित्वम् । धर्मो न गणित इत्यग्रेणान्वयः । युद्धे प्रणयिनि पक्षपातो नास्तीति क्षत्रियाणां धर्मः । रूढं प्रसिद्धम् ।

---

1. **रोषेति** । रोषग्रथितवाक्यमित्यर्थः ॥

2. **तवेति** । तव भीमस्य । तव च पशोरर्जुनस्य । तस्य राज्ञो युधिष्ठिरस्य । तयोर्नकुलसहदेवयोः ॥

3. **वीर्येति** । वीर्यस्यातिभार उद्रेक एव द्रविणं वसु तेन गुरुर्महान्मदो यस्य तादृशम् । पराक्रमातिशयशालिनमिति यावत् ॥

4. **क्षीब इति** । क्षीबत्वसंपादनेन असृजो मधुत्वारोपणं व्यङ्ग्यम् ॥

---

१. 'कौरव्यापसदस्य' इति घ-पुस्तके नास्ति.

तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबन्धः
कोऽयं पन्था यदसि विमुखो मन्दभाग्ये मयि त्वम् ॥'

तर्जनोद्वेजने प्रोक्ता द्युतिः

यथा तत्रैव दुर्योधनं प्रति भीमेनोक्तम्—

'जन्मेन्दोर्विमले कुले व्यपदिशस्यद्यापि धत्से गदां
मां दुःशासनकोष्णशोणितमधुक्षीबं रिपुं मन्यसे ।
दर्पान्धो मधुकैटभद्विषि हरावप्युद्धतं चेष्टसे
त्रासान्मे नृपशो विहाय समरं पङ्केऽधुना लीयसे ॥'

शक्तिः पुनर्भवेत् ।

विरोधस्य प्रशमनं

यथा तत्रैव—

'कुर्वन्त्यासा हतानां रणशिरसि जना वह्निसाद्देहभारा-
नश्रून्मिश्रं कथंचिद्ददतु जलममी बान्धवा बान्धवेभ्यः ।
मार्गन्तां ज्ञातिदेहान्हतनरगहने खण्डितान्गृध्रकङ्कै-
रस्तं भास्वान्प्रयातः सह रिपुभिरयं संह्रियन्तां बलानि ॥'

प्रसङ्गो गुरुकीर्तनम् ॥ १०४ ॥

यथा मृच्छकटिकायाम्—'चाण्डालः—एसो क्खु सागलदत्तस्स

अनुजस्य कृष्णस्य । शिष्ययोर्भीमदुर्योधनयोः । असि भवसि । अत्र शोकाविष्टचित्तेन युधिष्ठिरस्यादरलङ्घनम् । तर्जनं भर्त्सनम् । उद्वेजनं भयोत्पादनम् । व्यपदिशसि अयुक्तं ख्यापयसि । अत्र भर्त्सनम् । उद्वेजनं यथा—'भो लङ्केश्वर दीयताम्-' इत्यादि । आसा बान्धवाः । गुरोः पित्रादेः कीर्तनम् । 'एष खलु सागरदत्तस्य

---

1. **दुःशासनेति** । दुःशासनस्य कोष्णमभिनवत्वात्कदुष्णं शोणितमेव मधु मद्यं तेन क्षीबं मत्तम् ॥

हराविति । कृष्णे ॥

3. **शक्तिरिति** । विरोधप्रशमः शक्तिरित्यर्थः ॥

4. **मार्गन्तामिति** । चौरादिकस्य ' मार्ग अन्वेषणे' इति धातोर्लोटि रूपम् ॥

5. **हतेति** । व्यापादितमनुष्यारण्ये इत्यर्थः ॥

6. **कङ्कैरिति** । कङ्को नाम लोहपृष्ठापरपर्यायः पक्षिविशेषः ॥

7. **प्रसङ्ग इति** । नाट्यशास्त्रे तु 'प्रसङ्गश्चैव विज्ञेयो वाक्यैरामर्षयोजितैः' इत्युक्तम् ॥

---

१. 'कुमारवृक्षोदरेण' घ. २ 'पुनर्नेपथ्ये' इत्यधिकं ख-ग-पुस्तकयोः.

सुओ अज्जविस्सदत्तस्स णत्तिओ चालुदत्तो वावादितुं वज्झट्ठाणं णिज्ज-इ । एदेण किल गणिआ वसन्तसेणा सुअण्णलोहेण वावादिदेत्ति ।

चारुदत्तः—

मखशतपरिपूतं गोत्रमुद्भासितं य-
त्सदसि निबिडचैत्यब्रह्मघोषैः पुरस्तात् ।
मम निधनदशायां वर्तमानस्य पापै-
स्तदसदृशमनुष्यैर्धुष्यते घोषणायाम् ॥'

इत्यनेन चारुदत्तवधाभ्युदयानुकूलप्रसङ्गाद्वुरुकीर्तनमिति प्रसङ्गः ।

मनश्चेष्टासमुत्पन्नः श्रमः खेद इति स्मृतः ।

मनःसमुत्पन्नो यथा मालतीमाधवे—

'दलति हृदयं गाढोद्वेगो, द्विधा न तु भिद्यते
वहति विकलः कायो मोहं, न मुञ्चति चेतनाम् ।
[1]ज्वलयति तनूमन्तर्दाहः, करोति न भस्मसा-
त्प्रहरति विधिर्मर्मच्छेदी, न कृन्तति जीवितम् ॥'

एवं चेष्टासमुत्पन्नोऽपि ।

ईप्सितार्थप्रतीघातः[2] प्रतिषेध इतीष्यते ॥ १०५ ॥

यथा मम प्रभावत्यां विदूषकं प्रति प्रद्युम्नः—'सखे, कथमिह त्वमेकाकी वर्तसे । क्व नु पुनः प्रियसखीजनानुगम्यमाना प्रियतमा मे प्रभावती । **विदूषकः**—असुरवइणा आआरिअ कहिं वि णीदा । **प्रद्युम्नः**—(दीर्घं निश्वस्य ।)

सुत आर्यविश्वदत्तस्य नप्ता चारुदत्तो व्यापादयितुं वध्यस्थानं नीयते । एतेन किल गणिका वसन्तसेना सुवर्णलोभेन व्यापादितेति ।' इति संस्कृतम् । निबिडं सामाजिकैर्व्याप्तं चैत्यमायतनं येषां तैर्ब्रह्मघोषैर्वेदपाठकैः । **असदृशेति** । अयोग्येत्यर्थः । घोषणायामपवादवाद्यध्वनौ । मनसा चेष्टया च समुत्पन्नः । दलति स्फुटति । 'असुरपतिना आकार्य कुत्रापि नीता ।' इति संस्कृतम् । आकार्य आहूय । 'हूतिराका-

---

1. **ज्वलयतीति** । ज्वलयती उद्दीपयति ॥

2. **प्रतीघात इति** । 'प्रतीघातः' इत्यत्र 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति सूत्रेण घञन्ते घातशब्दे परे प्रेतदीर्घः । एवं च 'प्रतिघातः' इति बहुत्रोपलभ्यमानोऽपि पाठो नादरणीयश्छन्दोभङ्गदूषितत्वात् ॥

---

१. 'गाढोत्कण्ठं' क. २. प्रतिघातः' क-घ.

हा पूर्णचन्द्रमुखि मत्तचकोरनेत्रे
मामानताङ्गि परिहाय कुतो गतासि ।
गच्छ त्वमद्य ननु जीवित तूर्णमेव
दैवं कदर्थनपरं कृतकृत्यमस्तु ॥'

कार्यात्ययोपगमनं विरोधनमिति स्मृतम् ।

यथा वेण्याम्—'**युधिष्ठिरः**—
तीर्णे भीष्ममहोदधौ, कथमपि द्रोणानले [1]निर्वृते
[2]कर्णाशीविषभोगिनि प्रशमिते, शल्ये च याते दिवम् ।
भीमेन प्रियसाहसेन रभसादल्पावशेषे जये
सर्वे जीवितसंशयं वयममी वाचा समारोपिताः ॥'

प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी ॥ १०६ ॥

यथा वेण्याम्—'**पाञ्चालकः**—अहं देवेन चक्रपाणिना [3]सहितः । (इत्युपक्रम्य ।) कृतं संदेहेन ।
पूर्यन्तां सलिलेन रत्नकलशा राज्याभिषेकाय ते,
[3]कृष्णात्यन्तचिरोज्झिते तु कबरीबन्धे करोतु [4]क्षणम्
रामे [5]शातकुठारभास्वरकरे क्षत्रद्रुमोच्छेदिनि,
क्रोधान्धे च वृकोदरे परिपतत्याजौ [6]कुतः संशयः ॥'

रणाह्वानम्' इत्यमरः । कार्यात्ययस्य उपगमनं ज्ञापनम् । संहारार्थस्य उपसंहियमाण-प्रयोजनस्य प्रदर्शिनी प्रतिपादिका प्रोत्साहना । प्ररोचनेत्यर्थः । कृतं व्यर्थम् । क्षण

---

1. **निर्वृत इति** । निर्वृते निर्वाणतां प्राप्ते इत्यर्थः ॥

2. **कर्णेति** । कर्णो राधेय एव, आशिषि दंष्ट्रायां विषमस्य तादृशो भोगी भुजगस्त-स्मिन् । 'आशीस्त्वाकुगता दंष्ट्रा तया विद्धो न जीवति' इति । पृषोदरादित्वाद्दीर्घसलोपौ । केचित्त्वीकारान्तमाशीशब्दमाहुः । 'आशीमिव कलामिन्दोः' इति राजशेखरः ॥

3. **कृष्णेति** । कृष्णा द्रुपदात्मजा ॥

4. **क्षणमिति** । अधिवासनमाल्यग्रथनरूपमुत्सवमित्यर्थः ॥

5. **शातेति** । शातः शाणादिना तीक्ष्णीकृतो यः कुठारः परशुस्तेन भास्वरो देदीप्य-मानः करो यस्य तादृशे ॥

6. **परिपततीति** । परिपतति साटोपं भ्रमति । सप्तम्यन्तमेतत् ॥

---

१. 'सहितः' इति क-ख-पुस्तकयोर्नास्ति. २. 'भास्वर' क.

कार्यसंग्रह आदानं[1]

यथा वेण्याम्—'भो भोः स्यमन्तपञ्चकसंचारिणः,

नाहं रक्षो, न भूतो, रिपुरुधिरजलाह्लादिताङ्गः प्रकामं
निस्तीर्णोरुप्रतिज्ञाजलनिधिगहनः क्रोधनः क्षत्रियोऽस्मि ।
भो भो राजन्यवीराः समरशिखिशिखाभुक्तशेषाः, कृतं व-
स्त्रासेनानेन, लीनैर्हतकरितुरगान्तर्हितैरास्यते यत् ॥'

अत्र समस्तरिपुवधकार्यस्य संगृहीतत्वादादानम् ।

तदाहुश्छादनं पुनः ।
कार्यार्थमपमानादेः सहनं खलु यद्भवेत् ॥ १०७ ॥

यथा तत्रैव—'अर्जुनः—आर्य,

अप्रियाणि करोत्वेष वाचा शक्तो न कर्मणा ।
हतभ्रातृशतो दुःखी प्रलापैरस्य का व्यथा ॥'

अथ निर्वहणाङ्गानि—

संधिर्विबोधो ग्रथनं निर्णयः परिभाषणम् ।
कृतिः प्रसाद आनन्दः समयोऽप्युपगूहनम् ॥ १०८ ॥
भाषणं पूर्ववाक्यं च काव्यसंहार एव च ।
प्रशस्तिरिति संहारे ज्ञेयान्यङ्गानि नामतः ॥ १०९ ॥

तत्र

बीजोपगमनं संधिः

यथा वेण्याम्—'भीमः—[2]भवति यज्ञवेदिसंभवे, स्मरति भवती यन्मयोक्तम्—चञ्चद्भुज—' इत्यादि ।

अनेन मुखे क्षिप्त[3]बीजस्य पुनरुपगमनमिति संधिः ।

विबोधः[3] कार्यमार्गणम् ।

मुत्सवम् । यद् यस्मात् त्रासात् । एष दुर्योधनः । अथ चतुर्दशप्रकाराणि निर्वहणाङ्गान्याह—**संधिरिति** । बीजस्योपगमनमुद्भावनम् । मुखे मुखसंधौ । केशहस्तं

---

1. **कार्येति** । महर्षिणाप्युक्तम्—'बीजकार्योपगमनमादानमिति संज्ञितम् ।' इति ॥

2. **भवतीति** । भवतीत्यामन्त्रणम् ॥

3. **विबोध इति** । नाट्यशास्त्रेऽप्युक्तम्—'कार्यस्यान्वेषणं युक्त्या विबोध इति कीर्तितः ।' इति ॥

---

१. 'प्रक्षित' क-ख. २ 'दुर्योधनः' इति नास्ति पुस्तकान्तरे. ३. 'अथ' इति नास्ति पुस्तकान्तरे.

यथा तत्रैव—'**भीमः**—मुञ्चतु मामार्यः क्षणमेकम्। **युधिष्ठिरः**—किमपरमवशिष्टम् । **भीमः**—सुमहदवशिष्टम् । समापयामि तावदनेन सुयोधनशोणितोक्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तम्[1]। **युधिष्ठिरः**—गच्छतु भवान्, अनुभवतु तपस्विनी वेणीसंहारम्[2]।' इति।

अनेन केशसंयमनकार्यस्यान्वेषणाद्विबोधः ।

उपन्यासस्तु कार्याणां ग्रथनं

यथा तत्रैव—'**भीमः**—पाञ्चालि, न खलु मयि जीवति संहर्तव्या दुःशासनविलुलिता वेणिरात्मपाणिभ्याम् । तिष्ठ, स्वयमेवाहं संहरामि।' इति ।

अनेन कार्यस्योपक्षेपाद्ग्रथनम् ।

निर्णयः पुनः ॥ ११० ॥

अनुभूतार्थकथनं

यथा तत्रैव—'**भीमः**—देव अजातशत्रो, अद्यापि दुर्योधनहतकः। मया हि तस्य दुरात्मनः

भूमौ क्षिप्तं शरीरं, निहितमिदमसृक्चन्दनाभं[3] निजाङ्गे,
लक्ष्मीरार्ये निषिक्ता चतुरुदधिपयःसीमया सार्धमुर्व्या ।
भृत्या मित्राणि योधाः कुरुकुलमनुजा दग्धमेतद्रणाग्नौ,
नामैकं यद्ब्रवीषि क्षितिप तदधुना धार्तराष्ट्रस्य शेषम् ॥'

वदन्ति परिभाषणम् ।

परिवादकृतं वाक्यं

यथा शाकुन्तले—'**राजा**—आर्ये, अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी । **तापसी**—को तस्स धम्मदारपरिट्ठाइणो णामं गेण्हिस्सदि ।'

केशसमूहम् । **मया हीति** । तस्य धार्तराष्ट्रस्य । 'कस्तस्य धर्मदारपरित्यागिनो नाम

---

1. **केशहस्तमिति** । केशहस्तं केशपाशम् । 'पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ।' इत्यमरः ॥
2. **वेणीति** । वेणीसंयमनम् ॥
3. **निहितमिति** । निहितमर्पितम् ॥
4. **चन्दनाभमिति** । चन्दनाभं रञ्जनप्रभम् ॥

---

१. 'दुःशासन' क-ख-ग.

लब्धार्थशमनं कृतिः ॥ १११ ॥

यथा वेण्याम्—'**कृष्णः**-एते भगवन्तो व्यासवाल्मीकिप्रभृतयोऽभिषेकं धारयन्तस्तिष्ठन्ति ।' इति ।

अनेन प्राप्तराज्याभिषेकमङ्गलैः स्थिरीकरणं कृतिः ।

शुश्रूषादिः प्रसादः स्याद्[1]

यथा तत्रैव भीमेन द्रौपद्याः केशसंयमनम् ।

आनन्दो वाञ्छितागमः ।

यथा तत्रैव—'**द्रौपदी**—विसुमरिदं एदं वावारं णाधस्स पसादेण पुणो वि सिक्खिस्सम् ।'

समयो दुःखनिर्याणं[2]

यथा रत्नावल्याम्—'**वासवदत्ता**—(रत्नावलीमालिङ्ग्य ।) समस्सस बहिणीए, समस्सस ।'

तद्भवेदुपगूहनम् ॥ ११२ ॥

यत्स्यादद्भुतसंप्राप्तिः

यथा मम प्रभावत्यां नारददर्शनात्प्रद्युम्न ऊर्ध्वमवलोक्य—

दधद्विद्युल्लेखामिव कुसुममालां परिमल-
भ्रमद्भृङ्गश्रेणीध्वनिभिरुपगीतां तत इतः ।
दिगन्तं ज्योतिर्भिस्तुहिनकरगौरैर्धवलय-
न्नितः कैलासाद्रिः पतति वियतः किं पुनरिदम् ।'

सामदानादि भाषणम् ।[3]

यथा चण्डकौशिके—'**धर्मः**—तदेहि । धर्मलोकमधितिष्ठ'

ग्रहीष्यति ।' इति संस्कृतम्। लब्धैरर्थैः शमनं शोकादिनाशनम्। स्थिरीकरणं शोकादिकृतास्थैर्यादिनाशनम् । 'विस्मृतमेनं व्यापारं नाथस्य प्रसादेन पुनरपि शिक्षिष्ये ।' इति संस्कृतम् । एनं व्यापारं केशसंयमनरूपम् । 'समाश्वसितु भगिनी ।' इति

---

1. **शुश्रूषादिरिति** । तदुक्तं भरतेन—'शुश्रूषाद्युपसंपन्ना प्रसादः प्रीतिरुच्यते ।' इति ॥
2. **दुःखेति** । दुःखस्य निर्याणमपगमः ॥
3. **सामेति** । महर्षिणाप्युक्तम्—'सामदानादिसंपन्नं भाषणं समुदाहृतम् ।' इति ॥

---

१. 'अनुगमनं' क-ख-ग; घ-पुस्तके तु 'अर्थगमनम्' इति पाठः.

पूर्ववाक्यं तु विज्ञेयं यथोक्तार्थोपदर्शनम् ॥ ११३ ॥

यथा वेण्याम्—'भीमः—बुद्धिमतिके, क्व सा भानुमती । परिभवतु संप्रति पाण्डवदारान् ।'

वरप्रदानसंप्राप्तिः काव्यसंहार इष्यते ।

यथा सर्वत्र—'किं ते भूयः प्रियमुपकरोमि ।' इति ।

नृपदेशादिशान्तिस्तु प्रशस्तिरभिधीयते ॥ ११४ ॥

यथा प्रभावत्याम्—

'राजानः सुतनिर्विशेषमधुना पश्यन्तु नित्यं प्रजा
जीयासुः सदसद्विवेकपटवः सन्तो गुणग्राहिणः ।
[1]सस्यस्वर्णसमृद्धयः समधिकाः सन्तु क्षमामण्डले
भूयाद[2]व्यभिचारिणी त्रिजगतो भक्तिश्च नारायणे ॥'

अत्र चोपसंहारप्रशस्त्योरन्त एकेन क्रमेणैव स्थितिः । 'इह च मुखसंधौ उपक्षेपपरिकरपरिन्यासयुक्त्युद्भेदसमाधानानां, प्रतिमुखे च परिसर्पणप्रगमनवज्रोपन्यासपुष्पाणां, गर्भेऽभूताहरणमार्गत्रो(तो)टकाधिबलक्षेपाणां, विमर्शेऽपवादशक्तिव्यवसायप्ररोचनादानानां प्राधान्यम् । अन्येषां च यथासंभवं स्थितिः ।' इति केचित् ।

**[3]चतुःषष्टिविधं ह्येतदङ्गं प्रोक्तं मनीषिभिः ।
कुर्यादनियते तस्य संधावपि निवेशनम् ॥ ११५ ॥**

संस्कृतम् । तदेहीति प्रियवाक्यं धर्मलोकस्य दानं च । बुद्धिमतीत्यादि दुर्योधनपत्न्योक्तं भीमेनोपदर्शितम् । सर्वत्र नाटकादौ । नृपदेशादीत्यादिना विद्वद्ब्राह्मणादीनां ग्रहणम् । शान्तिरनिष्टनिवारणमिष्टप्राप्तिश्च । **इह चेति** । निर्वहणे चेत्यर्थः । तयोः काव्यसंहारप्रशस्त्योः 'प्राधान्यम्' इत्यग्रेणान्वयः । एवमग्रेऽपि । प्राधान्यख्यापनं तत्तदङ्गानामावश्यकस्थित्यर्थम् । **अनियत इति** । अन्यसंध्यङ्गस्य प्रकृत-

---

1. **सस्येति** । सस्यानां स्वर्णानां च समृद्धयः संपदः ॥

2. **अव्यभिचारिणीति** । अव्यभिचारिणी निश्चला ॥

3. **चतुरिति** । द्वादश मुखाङ्गानि, त्रयोदश प्रतिमुखाङ्गानि, तावन्ति गर्भाङ्गानि, तावन्ति विमर्शाङ्गानि, तावन्त्येव निर्वहणाङ्गानि, संकलनया चतुःषष्टिरिति निर्वहणाङ्गभूतप्रशस्तिप्रत्याख्यानवादिनः । येषां मते प्रशस्तिसद्भावस्तत्र गर्भाङ्गभूतायाः प्रार्थनाया अस्वीकारः । एवं पक्षद्वयेऽपि चतुःषष्टिसंख्याकान्यङ्गानि ॥

---

१. 'त्रोटकावक्षेपाणां' घ.

रसानुगुणतां वीक्ष्य रसस्यैव हि मुख्यता ।

यथा वेणीसंहारे तृतीयाङ्के दुर्योधनकर्णयोर्महत्संप्रधारणम् । एवमन्यदपि । यत्तु रुद्रटादिभिः 'नियम एव' इत्युक्तं तल्लक्ष्यविरुद्धम् ।

इष्टार्थरचनाश्चर्यलाभो वृत्तान्तविस्तरः ॥ ११६ ॥
रागप्राप्तिः प्रयोगस्य गोप्यानां गोपनं तथा ।
प्रकाशनं प्रकाश्यानामङ्गानां षड्विधं फलम् ॥ ११७ ॥
अङ्गहीनो नरो यद्वन्नैवारम्भक्षमो भवेत् ।
अङ्गहीनं तथा काव्यं न प्रयोगाय युज्यते ॥ ११८ ॥
संपादयेतां संध्यङ्गं नायकप्रतिनायकौ ।
तदभावे पताकाद्यास्तदभावे तथेतरत् ॥ ११९ ॥

प्रायेण प्रधानपुरुषप्रयोज्यानि संध्यङ्गानि भवन्ति । किंतु प्रेक्षेपादित्रयं बीजस्याल्पमात्रसमुद्दिष्टत्वादप्रधानपुरुषप्रयोजितमेव साधु ।

[1]रसव्यक्तिमपेक्ष्यैषामङ्गानां संनिवेशनम् ।
न तु केवलया शास्त्रस्थितिसंपादनेच्छया ॥ १२० ॥

तथा च यद्वेण्यां दुर्योधनस्य भानुमत्या सह विप्रलम्भो दर्शितः, तत्तादृशेऽवसरे[2]त्यन्तमनुचितम् ।

अविरुद्धं तु यद्वृत्तं रसादिव्यक्तयेऽधिकम् ।

रसानुकूलस्यान्यसंधावपि निवेशनम् । तत्र हेतुः—**रसस्यैवेति** । संप्रधारणं युक्तिः । सा[3] च मुखसंध्यङ्गम् । अन्यत्रापि तद्वर्णितमिति भावः । **नियम इति** । तत्संध्यङ्गस्य तत्संधावेव निवेश इत्येवंरूपः । लक्ष्यविरुद्धं महाकविप्रयोगविरुद्धम् । अङ्गानां फलमाह—**इष्टार्थेति** । रागप्राप्तिरनुरागलाभः । प्रयोगस्य प्रेक्षकस्य । अङ्गप्रशंसामाह—**अङ्गहीनमिति** । काव्यं रूपकम् । प्रयोगाय प्रेक्षकानुरागाय । तदभावे संध्यङ्गाभावे । पताकाद्या अर्थप्रकृतीः 'संपादयेताम्' इत्यन्वयः । आद्यपदेन प्रकरीकार्ययोर्ग्रहणम् । इतरद्बीजम् । प्रायेणेत्यस्य व्यावृत्तिमाह—**किंत्विति** । आदिपदेन परिकरपरिन्यासयोर्ग्रहणम् । अधिकमनुपयोगि । रसोपयोगि यथा स्यात्तथा वर्णयेत् ।

---

1. **रसेति** । ध्वनिकृताप्युक्तम्—'संधिसंध्यङ्गघटनं रसादिव्यक्त्यपेक्षया । न तु केवलया शास्त्रस्थितिसंपादनेच्छया ॥' इति ॥

2. **अवसर इति** । अवसरे संग्रामलक्षणे ॥

---

१. 'अन्यत्रापि' घ. २. 'प्रेक्षेपाद्यङ्गत्रयं' क. ३. 'सा च' इति पुस्तकान्तरे नास्ति.

तदप्यन्यथयेद्धीमान्न वदेद्वा कदाचन ॥ १२१ ॥

अनयोरुदाहरणं सत्प्रबन्धेष्वभिव्यक्तमेव ।

अथ वृत्तयः—

शृङ्गारे कैशिकी, वीरे सात्वत्यारभटी पुनः ।
रसे रौद्रे च बीभत्से, वृत्तिः सर्वत्र भारती ॥ १२२ ॥
चतस्रो वृत्तयो ह्येताः सर्वनाट्यस्य मातृकाः ।
स्युर्नायकादिव्यापारविशेषा नाटकादिषु ॥ १२३ ॥

तत्र कैशिकी[1]—

या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसंकुला पुष्कलनृत्यगीता ।
कामोपभोगप्रभवोपचारा सा कैशिकी चारुविलासयुक्ता ॥१२४॥

नर्म च नर्मस्फूर्जो नर्मस्फोटोऽथ नर्मगर्भश्च ।
चत्वार्यङ्गान्यस्या

तत्र

वैदग्ध्यक्रीडितं नर्म ॥ १२५ ॥
इष्टजनावर्जनकृत्तच्चापि त्रिविधं मतम् ।
विहितं शुद्धहास्येन सशृङ्गारभयेन च ॥ १२६ ॥

तत्र केवलहास्येन विहितं यथा रत्नावल्याम्—'वासवदत्ता—

अनयोरन्यथाकरणाकरणयोः । नाटकवृत्तीराह—**अथेति** । वर्तते रसोऽनयेति वृत्तिर्नायकादिचेष्टा । **शृङ्गार इति** । शृङ्गारप्रतिपादिका वृत्तिः कैशिकी । एवमन्यत्रापि । सर्वत्रेति 'रसे' इत्यनुषज्यते । मातृका मातृवदुपजीव्याः । तासां सामान्यस्वरूपमाह—**स्युरिति** । आदिना नायिकादीनां ग्रहणम् । नाटकादिष्वित्यादिपदेन प्रकरणभाणादीनां ग्रहणम् । तत्र प्रसिद्धा इत्यर्थः । तासां विशेषलक्षणान्याह—**तत्रेति** । श्लक्ष्णेन मनोरमेण नेपथ्यविशेषेण नायकादिभूषणविशेषेण चित्रा शोभातिशयशालिनी । पुष्कला संपूर्णेत्यर्थः । कामोपभोगः शृङ्गारस्तस्य प्रभव उपचारा अङ्गानि यस्याः सा । उपचारोऽनुष्ठानं वा अङ्गानि भेदाः । अस्याः कैशिक्याः । वैदग्ध्येन क्रीडितम् । इष्टजनस्य सामाजिकादेरावर्जनकृत् प्रीतिकारकम् । तच्च नर्म च । सशृ-

---

1. **कैशिकीति** । एषा सामवेदोत्पन्ना । तदुक्तं भरतेन—'ऋग्वेदाद्भारती वृत्तिर्यजुर्वेदात्तु सात्वती । कैशिकी सामवेदाच्च शेषा चाथर्वणी तथा ॥' इति ॥

---

१. 'सूक्ष्म' क. २. 'विधान' क-ख-ग. ३. 'प्रचुर' क. ४. 'कौशिकी' इति बहुत्रोपलभ्यमानोऽपि पाठः प्रामादिकः.

(फलकमुद्दिश्य । सहासम् ।) एसा वि अवरा तव समीवे जधालिहिदा एदं किं अज्जवसन्तस्स विण्णाणम् ।'

सशृङ्गारहास्येन यथा शाकुन्तले—राजानं प्रति **'शकुन्तला**—असंतुट्ठो उण किं करिस्सदि । **राजा**—इदम् । (इति व्यवसितः । शकुन्तलावक्त्रं ढौकते ।)'

सभयहास्येन यथा रत्नावल्याम्—आलेख्यदर्शनावसरे **'सुसंगता**—जाणिदो मए एसो वुत्तन्तो समं चित्तफलएण । ता देवीए गदुअ निवेदइस्सम् ।'

एतद्वाक्यसंबन्धि नर्मोदाहृतम् । एवं वेषचेष्टासंबन्ध्यपि ।

[1]नर्मस्फूर्जः सुखारम्भो भयान्तो नवसंगमः ।

यथा मालविकायाम्—संकेतनायकमभिसृतायां **'नायकः**—

विसृज सुन्दरि संगमसाध्वसं
ननु चिरात्प्रभृति प्रणयोन्मुखे ।
[1]परिगृहाण गते [2]सहकारतां
त्व[3]मतिमुक्तलताचरितं मयि ॥

मालविका—'भट्टा, देवीए भएण अप्पणो वि पिअं कउं ण पारेमि ।' इत्यादि ।

ङ्गारभयेनेत्यस्य हास्येनेति समासविश्लेषादन्वयः । 'एषाप्यपरा तव समीपे यथालिखिता इदं किमार्यवसन्तकस्य विज्ञानम् ।' इति संस्कृतम् । 'असंतुष्टः पुनः किं करिष्यति ।' इति संस्कृतम् । असंतुष्टो मधुकर इति पूर्वोक्तेनान्वयः । इदमिति कमलमिति व्यवसितः कृतनिश्चयः ढौकते प्रविशति । 'व्यवसितम्' इति पाठे निश्चितमित्यर्थः । वेषसंबन्धिसभयहास्यकृतं नर्म यथा रत्नावल्याम्—'सुसंगता—(दृष्ट्वा विहस्य ।) अइ कादरे, मा भाआहि । ण होइ एसो वानरो । अज्जवसन्तओ क्खु एसो ।' 'अयि कातरे, मा बिभीहि । न भवत्येष वानरः । आर्यवसन्तकः खल्वेषः ।' इति संस्कृतम् । **नर्मस्फूर्ज इति** । सुखमारम्भो यस्य । भयमन्तो यस्य । 'भर्तः, देव्या भयेनात्मनोऽपि

---

1. **नर्मेति** । मुनिनाप्युक्तं विंशाध्याये—'नवसंगमसंभोगो रतिसमुदयवेषवाक्यसंयुक्तः । ज्ञेयो नर्मस्फूर्जो ह्यवमानभयात्मकश्चैव ॥' इति ॥

2. **सहकारतामिति** । सहकारतामतिसौरभरसालताम् ॥

3. **अतिमुक्तेति** । शौक्ल्यान्मुक्तामतिक्रान्ताऽतिमुक्ता, सा चासौ लता चातिमुक्तलता वासन्ती तस्याश्चरितं वेष्टनरूपम् । स्वच्छन्दं मामालिङ्गेति परमार्थः ॥

---

१. 'प्रति' घ.

अथ नर्मस्फोटः

[1]नर्मस्फोटो भावलेशैः सूचितात्परसो मतः ॥ १२७ ॥

यथा मालतीमाधवे—

'गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं
श्वसितमधिकं[3]किं[1] न्वेतत्स्यात्किमन्यदितोऽथवा ।
भ्रमति भुवने कंदर्पाज्ञा विकारि च यौवनं
ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम् ॥'

अलसगमनादिभिर्भावलेशैर्माधवस्य मालत्यामनुरागः स्तोकः प्रकाशितः ।

[4]नर्मगर्भो व्यवहृतिर्नेतुः प्रच्छन्नवर्तिनः ।

यथा तत्रैव सखीरूपधारिणा माधवेन मालत्या मरणव्यवसायवारणम् ।

अथ सात्त्वती—

[5]सात्त्वती बहुला सत्त्वशौर्यत्यागदयार्जवैः ॥ १२८ ॥

प्रियं कर्तुं न पारयामि ।' इति संस्कृतम् । भावलेशैरीषत्प्रकाशितैर्भावैः । अल्पं सूचितः सूचितात्परः रसः शृङ्गारो यत्र स व्यापारो नर्मस्फोट इत्यर्थः । **गमनमिति** । माधवस्य पूर्वरागविप्रलम्भवर्णनमिदम् । विकारि चित्तविकारकारि । ललितमधुरा अतिरमणीयाः । 'वलितमधुराः' इत्यपि पाठः । भावाः सुरतचेष्टाः । नेतुर्नायकस्य । बहुला । 'वृत्तिः'इति

---

1. **नर्मेति** । मुनिनाप्युक्तम्—'विविधानां भावानां लवैर्लवैर्भूषितो बहुविशेषैः । असमग्राक्षिप्तरसो नर्मस्फोटस्तु विज्ञेयः ॥' इति ॥

2. **शून्येति** । शून्यदृष्टिलक्षणमुक्तं महर्षिणाष्टमाध्याये—'समतारा समपुटा निष्कम्पा शून्यदर्शना । बाह्यार्थग्राहिणी मध्या शून्या दृष्टिः प्रकीर्तिता ॥' इति ॥

3. **किं न्विति** । एतत्किं नु स्यात्, एतदलसगमनत्वादिकं रोगकृतं कामकृतं वेति वितर्कः । अथवा इतः कामात्किमन्यत् । नान्यदित्यर्थः ॥

4. **नर्मगर्भ इति** । एतदुक्तमृषिणा विंशाध्याये—'विज्ञानरूपसंभावनादिभिर्नायको गुणैर्यत्र । प्रच्छन्नैर्व्यवहरते कार्यवशान्नर्मगर्भोऽसौ ॥' इति ॥

5. **सात्त्वतीति** । एषा परिष्कृत्योक्ता नाट्यशास्त्रे—'या सत्त्वजेनेह गुणेन युक्ता न्यायेन वृत्तेन समन्विता च । हर्षोत्कटा संहृतशोकभावा सा सात्त्वती नाम भवेत्तु वृत्तिः ॥ वाग्गात्राभिनयवती सत्त्वोत्थानवचनप्रकरणेषु । सत्त्वाधिकारयुक्ता विज्ञेया सात्त्वती वृत्तिः ॥ वीराद्भुतरौद्ररसा निरस्तशृङ्गारकरुणनिर्वेदा । उद्धतपुरुषप्राया परस्परामर्षणकृता च ॥' इति ॥

---

१. 'किं चैतत्' घ.

सहर्षा क्षुद्रशृङ्गारा विशोका साद्भुता तथा।
उत्थापकोऽथ [1]सांघात्यः संलापः परिवर्तकः॥ १२९॥
विशेषा इति चत्वारः सात्त्वत्याः परिकीर्तिताः।
[1]उत्तेजनकरी शत्रोर्वागुत्थापक उच्यते॥ १३०॥

यथा महावीरचरिते—

'आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा
वैतृष्ण्यं तु कुतोऽद्य संप्रति मम त्वद्दर्शने चक्षुषः।
यन्माङ्गल्यसुखस्य नासि विषयः किं वा बहुव्याहृते-
रस्मिन्विस्मृतजामदग्न्यविजये बाहौ धनुर्जृम्भताम्॥'

[2]मन्त्रार्थदैवशक्त्यादेः [3]सांघात्यः संघभेदनम्।

मन्त्रशक्त्या यथा मुद्राराक्षसे राक्षससहायानां चाणक्येन स्वबुद्ध्या भेदनम्। अर्थशक्त्यापि तत्रैव। दैवशक्त्या यथा रामायणे रावणाद्विभीषणस्य भेदः।

संलापः स्याद्भीरोक्तिर्नानाभावसमाश्रया॥ १३१॥

यथा वीरचरिते—'**रामः**—[4]अयं स यः किल सपरिवारकार्तिकेयविजयावर्जितेन भगवता नीललोहितेन परिवत्सरसहस्रान्तेवासिने तुभ्यं प्रसादीकृतः परशुः। **परशुरामः**—राम दाशरथे, स एवायमार्यपादानां प्रियः परशुः।' इत्यादि।

[3]प्रारब्धादन्यकार्याणां [4]करणं परिवर्तकः।

शेषैः। उत्तेजनमुत्साहातिशयजनकम्। शत्रोः प्रतिनायकस्य। वागिह्यन्वयः। **आनन्दाय चेति**। वालिनं प्रति श्रीरामस्योक्तिरियम्। मन्त्रो मन्त्रणा, अर्थो धनम्, दैवमदृष्टम्, सहभेदनं सहायानां भेदः। रामायणे रामचन्द्रवर्णनानाटकादौ। आवर्जितेन प्रीणि-

---

1. **उत्तेजनेति**। एतदेव विशिष्यात्रातं महर्षिणा—'अहमप्युत्थास्यामि त्वं तावद्दर्शयात्मनः शक्तिम्। इति संघर्षसमाश्रयमुत्थितमुत्थापको ज्ञेयः॥' इति॥

2. **मन्त्रेति**। उक्तं च मुनिना—'मन्त्रार्थवाक्ययुक्त्या दैववशादात्मदोषयोगाद्वा। संघातभेदजननस्तज्ज्ञैः सांघात्यको ज्ञेयः॥' इति॥

3. **प्रारब्धादिति**। उक्तं च भरतेन—'उत्थानसमारब्धानर्थानुत्सृज्य योऽर्थयोगवशात्। अन्यानर्थान्भजते स चापि परिवर्तको ज्ञेयः॥' इति॥

4. **वालिनमिति**। श्रीरामं प्रति वालिन उक्तिरियमित्युचितम्॥

१.–२. 'संहात्यः' घ. ३. 'असंशयं' घ. ४. 'सहसा सहासा' इत्यधिकं पुस्तकान्तरे.

यथा वेण्याम्–'भीमः–सहदेव, गच्छ त्वं गुरुमनुवर्तस्व। अहमप्यस्त्रागारं प्रविश्यायुधसहायो भवामीति यावत्। अथवा आमन्त्रयितव्यैव मया पाञ्चाली।' इति।

अथारभटी–

[1]मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ॥ १३२ ॥
संयुक्ता वधबन्धाद्यैरुद्धतारभटी मता।
वस्तूत्थापनसंफेटौ संक्षिप्तिरवपातनम् ॥ १३३ ॥
इति भेदास्तु चत्वार आरभट्याः प्रकीर्तिताः।
मायाद्युत्थापितं वस्तु वस्तूत्थापनमुच्यते ॥ १३४ ॥

यथोदात्तराघवे—

'जीयन्ते जयिनोऽपि सान्द्रतिमिरव्रातैर्वियद्व्यापिभि-
र्भास्वन्तः सकला रवेरपि कराः कस्मादकस्मादमी।
एते चोग्रकबन्धकण्ठरुधिरैराध्मायमानोदरा
मुञ्चन्त्याननकंदरानलमुचस्तीव्रास्रवान्फेरवाः ॥' इत्यादि।

संफेटस्तु समाघातः क्रुद्धसत्वरयोर्द्वयोः।

यथा मालत्यां माधवाघोरघण्टयोः।

[2]संक्षिप्ता वस्तुरचना शिल्पैरितरैरथापि वा ॥ १३५ ॥

तेन। अत्र देवविषयरतिमतिवीररसानां समाश्रयत्वम्। गुरुं युधिष्ठिरम्। उद्धता। 'वृत्तिः' इति शेषः। मायादीत्यादिना इन्द्रजालग्रहणम्। जीयन्ते परिभूयन्ते आध्मायमानोदरा ईषद्दृश्यमानजठराः। पीयमानरुधिराणां मुखानलेनोष्णत्वाज्जठरदाहः। फेरवाः शृगालाः। अत्र मायोत्थापितं वस्तु। इन्द्रजालोत्थापितं वस्तु यथा—'एष ब्रह्मा सरोजे रजनिकरकलाशेखरः शंकरोऽयं दोर्भिर्दैत्यान्तकोऽसौ सधनुरसिगदाचक्रचिह्नैश्चतुर्भिः। एषोऽप्यैरावतस्थस्त्रिदशपतिरमी देवि देवास्तथान्ये नृत्यन्ति व्योम्नि चैताश्चलचरणरणन्नूपुरा दिव्यनार्यः॥' इन्द्रजालोत्थापितवस्तुकथनमात्रमेवेदं नारभटीभेदः रौद्रबीभत्सान्यतरसूचकत्वाभावात्। इतरथा शिल्पेतरेण।

---

1. **मायेति**। 'असतो वस्तुनो मायासद्भूपोद्भावना तथा। इन्द्रजालः स्थितार्थस्य मन्त्रचूर्णौषधादिभिः। अदर्शनमपारोक्ष्यमन्यथाकृतिरुच्यते॥' इत्युक्तरूपौ मायेन्द्रजालौ। आरभटीलक्षणं भट्टरुद्रेणाप्युक्तम्—'या चित्रयुद्धभ्रमशस्त्रपातमायेन्द्रजालप्लुतिलङ्घिताढ्या। ओजस्विगुर्वक्षरबन्धगाढा ज्ञेया बुधैः सारभटीति वृत्तिः॥' इति॥

2. **इतरथेति**। इतरथा यथा विद्धशालभञ्जिकायां शालभञ्जिकादौ प्रतिफलनम्॥

---

१. 'संक्षिप्तिः' घ.

संक्षिप्तिः स्यान्निवृत्तौ च नेतुर्नेत्रन्तरग्रहः ।

यथोदयनचरिते कलिञ्जहस्तिप्रयोगः । द्वितीयं यथा वालिनिवृत्त्या सुग्रीवः । यथा वा परशुरामस्यौद्धत्यनिवृत्त्या शान्तत्वापादनम्—'पुण्या ब्राह्मणजातिः—' इति ।

प्रवेशत्रासनिष्क्रान्तिहर्षविद्रवसंभवम् ॥ १३६ ॥
अवपातनमित्युक्तं

यथा कृत्यरावणे षष्ठेऽङ्के—'(प्रविश्य खड्गहस्तः पुरुषः ।)' इत्यतः प्रभृति निष्क्रमणपर्यन्तम् ।

पूर्वमुक्तैव भारती ।

अथ नाट्योक्तयः—

अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ॥ १३७ ॥
सर्वश्राव्यं प्रकाशं स्यात्तद्भवेदपवारितम् ।
रहस्यं तु यदन्यस्य परावृत्य प्रकाश्यते ॥ १३८ ॥
त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत्स्यात्तज्जनान्तिकम् ॥ १३९ ॥
किं ब्रवीपीति यन्नाट्ये विना पात्रं प्रयुज्यते ।
श्रुत्वेवानुक्तमप्यर्थं तत्स्यादाकाशभाषितम् ॥ १४० ॥

यः कश्चिदर्थो यस्माद्वोपनीयस्तस्यान्तरत ऊर्ध्वसर्वाङ्गुलिनामिताना-मिकं त्रिपताकलक्षणं करं कृत्वान्येन सह यन्मन्त्र्यते तज्जनान्तिकम् । परावृत्यान्यस्य रहस्यकथनमपवारितम् । शेषं स्पष्टम् ।

नेत्रन्तरत्वं व्यक्तिभेदाद्धर्मभेदाच्च भवति । धर्मभेदान्नेत्रन्तरत्वमाह—यथा परशुरामस्येत्यादि । विद्रवः पलायनम् । प्रवेशादिसंभवं वस्तु अवपातनमित्यर्थः । पूर्वं स्थापककर्तव्यकथनावसरे । अश्राव्यं परस्य श्रवणायोग्यम् । परावृत्य स्थानान्तरं गत्वा । अन्तरा कथां कथामध्ये । अन्योन्यस्य यदामन्त्रणं गुह्यभाषणम् । जनान्ते जनसमीपे । किं ब्रवीपीत्युक्त्वा । पात्रं श्रोतृनटम् । श्रुत्वा श्रवणाभिनयं

---

1. निवृत्ताविति । एकराजनिवृत्तावन्यराजस्थापनं संक्षिप्तिरिति ॥
2. कलिञ्जेति । काष्ठघटितहस्तिप्रयोगः ॥
3. स्वगतमिति । इहात्मवाची स्वशब्दः ॥
4. त्रिपताकेति । मुनिरपि नवमाध्याये चतुःषष्टिकरलक्षणप्रतिपादनावसरे—'प्रसा-

---

१. 'किलिञ्ज' घ. २. 'त्रिपताका' घ. ३. 'अन्यं' क. ४. 'अन्तरे' ख. ५. 'ऊर्ध्वाङ्गुलिनतनामिकं' क. ६. 'भवति' इति पुस्तकान्तरे नास्ति.

[1]दत्तां सिद्धां च सेनां च वेश्यानां नाम दर्शयेत् ।
दत्तप्रायाणि वणिजां चेटचेट्योस्तथा पुनः ॥ १४१ ॥
वसन्तादिषु वर्ण्यस्य वस्तुनो नाम यद्भवेत् ।

वेश्या यथा वसन्तसेनादिः । वणिग्विष्णुदत्तादिः । चेटः कलहंसादिः । चेटी मन्दारिकादिः ।

नाम कार्यं नाटकस्य गर्भितार्थप्रकाशकम् ॥ १४२

यथा रामाभ्युदयादिः ।

[2]नायिकानायकाख्यानात्संज्ञा प्रकरणादिषु ।

यथा मालतीमाधवादिः ।

नाटिकासट्टकादीनां नायिकाभिर्विशेषणम् ॥ १४३ ॥

यथा रत्नावली-कर्पूरमञ्जर्यादिः ।

प्रायेण ण्यन्तकः साधिर्गमेः स्थाने प्रयुज्यते ।

यथा शाकुन्तले—ऋषी 'गच्छावः' इत्यर्थे 'साधयावस्तावत्' ।

कृत्वा ॥ **दत्तामित्यादि** । नाम्नश्चरमाच्चलम् । तेन दत्तान्तादिनाम । दत्तप्रायाणि दत्तान्तबहुलानि । वसन्तादिषु वर्ण्यस्य कलहंसादेर्यन्नाम तच्चेटस्य चेट्याश्च स्यादित्यर्थः । एकशेषाभावश्चिन्त्यः । गर्भितो गर्भसंधिना सूचितो योऽर्थः प्रयोजनं तत्प्रकाशकमित्यर्थः । नायिकया सहितो नायको नायिकानायकः । अन्यथैक(शेष)प्रसङ्गात् । प्रकरणादिष्वित्यादिपदेन भाणादिपरिग्रहः । एतत्प्रायिकं तेन सौगन्धिकाहरणादिसंज्ञापि । **प्रायेणेति** । 'सुहं चिट्ठउ अज्जउतो । अहं गमिस्सम् ।' इत्यु-

---

रिताः समाः सर्वा यस्याङ्गुल्यो भवन्ति हि । कुञ्चितश्च तथाङ्गुष्ठः स पताक इति स्मृतः ॥' इत्युक्त्वा 'पताके तु यदा वक्रानामिका त्वङ्गुलिर्भवेत् । त्रिपताकः स विज्ञेयः' इत्यनेन त्रिपताकलक्षणं दर्शितवान् । संगीतरत्नाकरेऽपि पताकलक्षणमभिधाय 'स एव त्रिपताकः स्याद्वक्रितानामिकाङ्गुलिः' इति त्रिपताकलक्षणमभिहितम् । मन्दारमरन्दे तु किंचिद्विशेषः—'तर्जनीमूलसंलग्नकुञ्चिताङ्गुष्ठकः करः । गण्डगः संहताकारप्रसारिततलाङ्गुलिः ॥ पताकः स्यादथ यदि वक्रितानामिकाङ्गुलिः । स एव श्रोत्रगस्तर्हि त्रिपताक इतीर्यते ॥' इति ॥

1. **दत्तामित्यादि** । अत्र विशेषः—'ब्रह्मक्षत्रस्य नामानि गोत्रकर्मानुरूपतः । काव्ये कार्याणि कविभिः शर्मवर्मकृतानि च ॥ दत्तप्रायाणि नामानि वणिजां तु प्रयोजयेत् । शौर्योदात्तानि नामानि तथा शूद्रेषु योजयेत् ॥ विजयार्थानि नामानि राजस्त्रीणां च कारयेत् । दत्ता मित्राथ सेनेति वेश्यानामानि कारयेत् ॥ नानाकुसुमनामानः प्रेष्याः कार्यास्तु नाटके । मङ्गलार्थानि नामानि चेटानामपि कारयेत् ॥' इति ॥

---

१. क-पुस्तके तु 'नायिका–' इत्यादिः '–द्रविडादिषु' इत्यन्तः पाठो नास्ति. २. 'नायकाख्याना' घ

[1]राजा स्वामीति देवेति भृत्यैर्भट्टेति चाधमैः ॥ १४४ ॥
राजर्षिभिर्वयस्येति तथा विदूषकेण च ।
राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च ॥ १४५ ॥
स्वेच्छया नामभिर्विप्रैर्विप्र आर्येति चेतरैः ।
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः ॥ १४६ ॥
वाच्यौ नटीसूत्रधारावार्यनाम्ना परस्परम् ।
सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः ॥ १४७ ॥
सूत्रधारो मारिषेति [2]हण्डे इत्यधमैः समाः ।
वयस्येत्युत्तमैर्हहो मध्यैरार्येति चाग्रजः ॥ १४८ ॥
[3]भगवन्निति वक्तव्याः सर्वैर्देवर्षिलिङ्गिनः ।
वदेद्राज्ञीं च चेटीं च भवतीति विदूषकः ॥ १४९ ॥
आयुष्मन्ग्रथिनं सूतो वृद्धं तातेति चेतरः ।
वत्सपुत्रकतातेति नाम्ना गोत्रेण वा सुतः ॥ १५० ॥
शिष्योऽनुजश्च वक्तव्योऽमात्य आर्येति चाधमैः ।
विप्रैरयममात्येति सचिवेति च भण्यते ॥ १५१ ॥

त्थाय गच्छतीति रत्नावल्यां गमेः प्रयोगोऽपि । राजा वाच्यः—इत्यन्वयः । स राजा । अपत्यप्रत्ययेन च । अपत्यप्रत्ययान्तपदेन चेत्यर्थः । यथा—दाशरथे, पौरव, पाण्डव इत्यादि । एतच्च पुत्रादिसंबन्धिपदोपलक्षणम् । तेन रघुनन्दन इत्यादिनापि । **स्वेच्छयेति** । अपत्यप्रत्ययेन नामभिर्वा विप्रैर्विप्रो वाच्यः । इतरैः क्षत्रियादिभिरार्येति विप्रो वाच्य इत्यर्थः । तेनानर्घराघवादौ विश्वामित्रेति कौशिकेति कुशिकनन्दनेत्यादिना शतानन्देन विश्वामित्र उक्तः । आर्यनाम्ना आर्यशब्देन नाट्ययोग्यत्वादार्याशब्देनाह्वानम् । तं पारिपार्श्विकम् । समा आत्मतुल्याः उत्तमैः समा वयस्येति वाच्याः मध्यमैर्हहो इति समा वाच्याः । सर्वैरार्येत्यग्रजो वाच्यः इतरो युवा बालश्च ।

---

1. **राजेति** । अत्र विशेषः—'राजपत्न्यस्तु संभाष्याः सर्वाः परिजनेन तु । भट्टिनी स्वामिनी देवी इत्येवं नाटके बुधैः ॥ देवीति महिषी वाच्या राज्ञा परिजनेन तु । भोगिन्य इति शेषास्तु स्वामिन्य इति वा पुनः ॥' इति ॥

2. **हण्डे इति** । हण्डे इत्यामन्त्रणद्योतकमव्ययम् ॥

3. **भगवन्निति** । उक्तं च मुनीन्द्रेण सप्तदशाध्याये—'देवानामपि ये देवा महात्मानो महर्षयः । भगवन्निति ते वाच्या यास्तेषां योषितस्तथा ॥ देवाश्च लिङ्गिनश्चैव नानाश्रुतधराश्च ये । भगवन्निति ते वाच्याः पुरुषैः स्त्रीभिरेव च ॥' इति ॥

साधो इति तपस्वी च प्रशान्तश्चोच्यते बुधैः ।
स्वगृहीताभिधः पूज्यः शिष्याद्यैर्विनिगद्यते ॥ १५२ ॥
उपाध्यायेति चाचार्यो महाराजेति भूपतिः ।
स्वामीति, युवराजस्तु कुमारो भर्तृदारकः ॥ १५३ ॥
भद्रसौम्यमुखेत्येवमधमैस्तु कुमारकः ।
वाच्या प्रकृतिभी राज्ञः कुमारी भर्तृदारिका ॥ १५४ ॥
पतिर्यथा तथा वाच्या ज्येष्ठमध्याधमैः स्त्रियः ।
हलेति सदृशी, प्रेष्या हञ्जे, वेश्याज्जुका तथा ॥ १५५ ॥
कुट्टिन्यम्बेत्यनुगतैः पूज्या च जरती जनैः ।
आमन्त्रणैश्च पाषण्डा वाच्याः स्वसमयागतैः ॥ १५६ ॥
शकादयश्च संभाष्या भद्रदत्तादिनामभिः ।
यस्य यत्कर्म शिल्पं वा विद्या वा जातिरेव वा ॥ १५७ ॥

गोत्रेण अपत्यप्रत्ययान्तेन । अयममात्यः । प्रशान्तो वीतरागः । पूज्यो जनः शिष्याद्यैः स्वगृहीताभिधो विनिगद्यते इत्यन्वयः । स्वगृहीता स्वेच्छया प्रयुक्ता अभिधा पूज्यत्वप्रकाशकनाम भगवन्निति महाभागेत्यादि वा यस्य सः । महाराजेति स्वामीति वा भूपतिर्विनिगद्यते इत्यन्वयः । युवराजः कुमारो भर्तृदारको वा वाच्यः । कुमारको युवराजः । **पतिर्यथेति** । उत्तमेनोत्तमा स्त्री वयस्येति, मध्येन मध्यमा हंहो इति, अधमेन अधमा हण्डे इति वाच्येत्यर्थः । सदृशी आत्मतुल्या । कुट्टिनी तथा अज्जुका वाच्या । अनुगतैः सेवकैः पूज्या अम्बेति वाच्या । जरती वृद्धा जनैरम्बेति वाच्या । आमन्त्रणैः संबोधनपदैः स्वसमयागतैः स्वसंकेतप्राप्तैः कापालिकेत्यादिभिः । शकादयोऽन्तःपुरसहायाः प्रागुक्ताः । कर्म मालाकरणादि । शिल्पं कलादिकर्म । विद्या मीमांसादिः । जातिर्ब्राह्मणत्वादिः । तेनैव तत्कर्मादिप्रकाशकेन

---

1. **हलेति हञ्जे इति च** । हला हञ्जे उभे अव्यये ॥

2. **अज्जुकेति** । जकारद्वयघटितमध्योऽज्जकाशब्दः । नाट्यशास्त्रे तु—'अज्जुकेति भवेद्वाच्या वेश्या परिजनेन तु । या त्वत्र वृद्धा सा त्वम्बा भाष्या परिजनेन तु ॥' इत्युक्तम् ॥

3. **कुट्टिनीति** । परनारी पुंसा संयोजयित्री शंभल्यपरपर्याया योषित् ॥

4. **पाषण्डेति** । पापं सनोति ददातीति पाषण्डः । अमन्ताड्डुः । पृषोदरादिः । कवर्गद्वितीयमध्यस्तु शं खण्डयति । 'खडि भेदने' । अच् । उक्तं च—'पालनाच्च त्रयीधर्मः पाशब्देन निगद्यते । तं खण्डयन्ति ते यस्मात्पाखण्डास्तेन हेतुना ॥' इति ॥

---

१. 'परैः' ख. २. 'अगृहीत' घ.

तेनैव नाम्ना वाच्योऽसौ ज्ञेयाश्चान्ये यथोचितम् ।

अथ[2] भाषाविभागः—

पुरुषाणामनीचानां संस्कृतं स्यात्कृतात्मनाम् ॥ १५८ ॥
सौरसेनी प्रयोक्तव्या तादृशीनां च योषिताम् ।
आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत् ॥ १५९ ॥
अत्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम् ।
चेटानां राजपुत्राणां श्रेष्ठानां[3] चार्धमागधी ॥ १६० ॥
प्राच्या विदूषकादीनां, धूर्तानां स्यादवन्तिजा ।
योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम् ॥ १६१ ॥
शैबराणां[3] शकादीनां शावरीं संप्रयोजयेत् ।
बाह्लीकभाषोदीच्यानां द्राविडी द्रविडादिषु ॥ १६२ ॥
आभीरेषु तथाभीरी चाण्डाली पुक्कसादिषु[3] ।
आभीरी शावरी चापि काष्ठपात्रोपजीविषु ॥ १६३ ॥
तथैवाङ्गारकारादौ[4] पैशाची स्यात्पिशाचवाक् ।
चेटीनामप्यनीचानामपि स्यात्सौरसेनिका ॥ १६४ ॥
बालानां षण्डकानां च नीचग्रहविचारिणाम् ।
उन्मत्तानामातुराणां सैव स्यात्संस्कृतं क्वचित् ॥ १६५ ॥

मालाकारादिपदेन । असौ मालाकारादिः । **ज्ञेयाश्चेति** । अन्ये मित्रादयो मित्रादिपदेन वाच्या इत्यर्थः । अनीचानामुत्तममध्यमानाम् । कृतात्मनां पण्डितानां चेत्यर्थः । तादृशीनां गाथासु श्लोकेषु । अत्र नाटकादौ । राजान्तःपुरचारिणां वामनादीनाम् । चेटानां भृत्यानाम् । प्राच्या गौडीया । धूर्तानामक्षदेविनाम् । दाक्षिणात्या वैदर्भी । पिशाचवाक् चेटानामपीत्यन्वयः । सैव सौरसेनी एव । प्राकृतं

---

1. **अन्ये इति** । शाक्यभिक्षुर्भदन्तेति भगिनीपतिरावुत्तेति जनक आवुकेति राजश्यालो राष्ट्रियेति वाच्य इति यथाशास्त्रमनुसंधेयम् ॥

2. **भाषाविभाग इति** । सामान्यतो भाषा संख्याता रुद्रटेन—'प्राकृतसंस्कृतमागधपिशाचभाषाश्च सूरसेनी च । षष्ठोऽत्र भूरिभेदो देशविशेषादपभ्रंशः ॥' इति । नाट्यशास्त्रे तु विशेषः—'मागध्यवन्तिजा प्राच्या सूरसेन्यर्धमागधी । बाह्लीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः ॥' इति ॥

3. **पुक्कसेति** । पुक्कसश्चाण्डालः ॥

4. **अङ्गारेति** । अङ्गारकारो लोहादिधातुजीवी ॥

---

१. कुत्रचित्सूरसेनशब्दस्तालव्यादिरपि दृश्यते. २. 'श्रेष्ठिनाम्' इति नाट्यशास्त्रस्थः पाठः. ३. 'शवराणां घ.

ऐश्वर्येण प्रमत्तस्य दारिद्र्योपद्रुतस्य च ।
भिक्षुवल्कधरादीनां प्राकृतं संप्रयोजयेत् ॥ १६६ ॥
संस्कृतं संप्रयोक्तव्यं लिङ्गिनीषूत्तमासु च ।
देवीमन्त्रिसुतावेश्यास्वपि कैश्चित्तथोदितम् ॥ १६७ ॥
यद्देश्यं नीचपात्रं तु तद्देश्यं तस्य भाषितम् ।
कार्यतश्चोत्तमादीनां कार्यो भाषाविपर्ययः ॥ १६८ ॥
योषित्सखीबालवेश्याकितवाप्सरसां तथा ।
वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा ॥ १६९ ॥

एषामुदाहरणान्याकरेषु[1] बोद्धव्यानि । भाषालक्षणानि मम तातपादानां भाषार्णवे[2] ।

षट्त्रिंशल्लक्षणान्यत्र, नाट्यालंकृतयस्तथा ।
त्रयस्त्रिंशत्प्रयोज्यानि वीथ्यङ्गानि त्रयोदश ॥ १७० ॥
लास्याङ्गानि दश यथालाभं रसव्यपेक्षया ।

यथालाभं प्रयोज्यानीति संबन्धः । अत्रेति[3] नाटके ।

तत्र लक्षणानि—

भूषणाक्षरसंघातौ शोभोदाहरणं तथा ॥ १७१ ॥
हेतुसंशयदृष्टान्तास्तुल्यतर्कः पदोच्चयः ।
निदर्शनाभिप्रायौ च प्राप्तिर्विचार एव च ॥ १७२ ॥
दिष्टोपदिष्टे च गुणातिपातातिशयौ तथा ।
विशेषणनिरुक्ती च सिद्धिर्भ्रंशविपर्ययौ ॥ १७३ ॥
दाक्षिण्यानुनयौ मालार्थापत्तिर्ग्रहणं[4] तथा ।
पृच्छा प्रसिद्धिः सारूप्यं संक्षेपो गुणकीर्तनम् ॥ १७४ ॥

सौरसेन्यादिद्राविडीपर्यन्तानामन्यतमं महाराष्ट्रीं वा । लिङ्गिनीषु संन्यासादिचिह्नधारिणीषु । **कार्यत इति** । उत्तमस्य राजान्तःपुरचारिणे मागधी, न तु संस्कृतम् । एवमन्यत्रापि । अत एवानर्घराघवादौ राजपुत्रस्यापि रामचन्द्रादेरुत्तमकार्यकारित्वेन संस्कृतेनैव व्यवहारो वर्णितः न त्वर्धमागध्या । वैदग्ध्यार्थं वैदग्ध्यज्ञापनार्थम् । अन्तरा अन्तरा तत्तद्भाषाणां मध्ये । एषां भाषाविशेषाणाम् । आकरेषु नाटकादिषु । भाषार्णवे बोध्यानीति पूर्वेणान्वयः । यथालाभं यथायोग्यम् । रसव्यपेक्षया रसाकाङ्क्षया । यस्मिन्रसे यदाकाङ्क्षितं योग्यं च भवति तत्तस्मिन्वर्णनीयमिति भावः ।

---

१. 'चक्र' ख, 'बन्ध' घ. २. 'नाटके' क. ३. 'इति' नास्ति क-पुस्तके. ४. 'ग्रहणं' क-ख.

लेशो मनोरथोऽनुक्तसिद्धिः प्रियवचस्तथा ।

तत्र—

लक्षणानि गुणैः सालंकारैर्योगस्तु भूषणम् ॥ १७५ ॥

यथा—

'आक्षिपन्त्यरविन्दानि मुग्धे तव मुखश्रियम् ।
कोषदण्डसमग्राणां किमेषामस्ति दुष्करम् ॥'

वर्णनाक्षरसंघातश्चित्रार्थैरक्षरैर्मितैः ।

यथा शाकुन्तले—' राजा—कच्चित्सखीं वो नातिबाधते शरीरसंतापः । प्रियंवदा—संपदं लधोसहो उअसमं गमिस्सदि ।'

सिद्धैरर्थैः समं यत्राप्रसिद्धोऽर्थः प्रकाशते ॥ १७६ ॥
श्लिष्टश्लक्षणचित्रार्था सा शोभेत्यभिधीयते ।

यथा—

'सद्वंशसंभवः शुद्धः कोटिदोऽपि गुणान्वितः ।
कामं धनुरिव क्रूरो वर्जनीयः सतां प्रभुः ॥'

यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात् ॥ १७७ ॥
साध्यतेऽभिमतश्चार्थस्तदुदाहरणं मतम् ।

गुणैर्माधुर्यौजःप्रसादैर्यमकोपमाद्यलंकारसहितैर्योगः परस्परमेलकः । आक्षिपन्ति निन्दन्ति । कोषो बीजकोषो भाण्डागारश्च । दण्डो नालं चतुर्थोपायश्च । अत्रारविन्दानामचेतनतया निन्दा न संभवतीत्युपमा कल्प्यत इति निदर्शना । एवं च निदर्शनार्थान्तरन्यासश्लेषालंकारसहितास्यां माधुर्यप्रसादाभ्यां योगः । चित्रो विदग्धमनोरमोऽर्थो येषां तैरक्षरैः पदैः । वो युष्माकं सखीं शकुन्तलां शरीरसंतापः स्मरज्वाला । 'सांप्रतं लब्धौषधमुपशमं गमिष्यति' इति संस्कृतम् । सिद्धैः साधयितुमारब्धैः । श्लिष्टस्वरूपश्चित्रोऽर्थो यस्याः सा वर्णना । वंशोऽन्ववायो वेणुश्च । कोटिः संख्याविशेषोऽग्रं च । गुणः शौर्यादिः मौर्वी चं । क्रूरः कुटिलः कठिनश्च । अत्र सिद्धैरन्वयादिभिः सममेकदैव प्रसिद्धो वेण्वादिरर्थो भासते । अभिप्रदर्शनाद् वक्तुरभिप्रायात् साध्यते ज्ञाप्यते ।

---

1. **गुणैरिति** । षोडशाध्याये भरतेनाप्युक्तम्—'अलंकारैर्गुणैश्चैव बहुभिः समलंकृतम् । भूषणैरिव विन्यस्तैस्तद्भूषणमिति स्मृतम् ॥' इति ॥

---

१. 'लक्षणानि' क-ख-ग. २. 'तत्र' क-ख-ग. ३. 'लक्षण' क. ४. 'येषां—' इत्यादिः. '—वेणुश्च ।' इत्यन्तः पाठः पुस्तकान्तरे नास्ति.

यथा—

'अनुयान्त्या जनातीतं कान्तं साधु त्वया कृतम् ।
का दिनश्रीर्विनार्केण का निशा शशिना विना ॥'

हेतुर्वाक्यं समासोक्तमिष्टकृद्धेतुदर्शनात् ॥ १७८ ॥

यथा वेण्यां भीमं प्रति 'चेटी—एवं मए भणिदं भाणुमदि, तुह्माणं अमुक्केसु केसेसु कहं देवीए केसा संजमिअन्तित्ति ।'

संशयोऽज्ञाततत्त्वस्य वाक्ये स्याद्यदनिश्चयः ।

यथा ययातिविजये—

'इयं स्वर्गाधिनाथस्य लक्ष्मीः, किं यक्षकन्यका ।
किं चास्य विषयस्यैव देवता, किमु पार्वती ॥'

दृष्टान्तो यस्तु पदार्थसाधनाय निदर्शनम् ॥ १७९ ॥

यथा वेण्याम्—'सहदेवः—आर्य, उचितमेवैतत्तस्या यतो दुर्योधनकलत्रं हि सा' इत्यादि ।

तुल्यतर्को यदर्थेन तर्कः प्रकृतिगामिना ।

अभिमतो बोधयितुमिष्टः । **अनुयान्त्येति** । कान्तमरणेन दुःखमनुभवन्त्या उक्तिरियम् । अत्रार्के विना दिनश्रीरिव शशिनं विना निशेव कान्तं विना योषिदशोभैवेति प्रतीयते । समासेन संक्षेपेण उक्तमिष्टवदभीष्टार्थबोधकरम् । 'एवं मया भणितं भानुमति, युष्माकममुक्तेषु केशेषु कथं देव्याः केशाः संयम्यन्ते' इति संस्कृतम् । अत्र द्रौपदीकेशासंयमनस्य हेतुर्भानुमतीकेशामोक्षणं तद्दर्शनेन दुर्योधनवधे सत्येव देव्याः केशबन्धनं भविष्यतीत्यभिमतार्थबोधः । अज्ञाततत्त्वस्य अज्ञातविशेषस्य । 'यत्' इत्यव्ययं 'यः' इत्यर्थे । विषयस्य देशस्य । **दृष्टान्त इति** । पक्षेऽर्थस्य साध्यस्य साधनाय ज्ञापनाय निदर्शनं हेतुदर्शनम् । तस्या भानुमत्याः । सा भानुमती । अर्थेन वस्तुना तर्को भाव्यर्थसूचनम् । प्रकृतिगामिना प्रकृतेन न तु प्रकृतिविपर्यासरूपेण अद्भुतेन ।

---

1. **हेतुरिति** । नाट्यशास्त्रेऽप्युक्तम्—'बहूनां भाषमाणानामन्यैकार्थविनिर्णयात् । सिद्धौ समानवचनं हेतुरित्यभिसंज्ञितः ॥' इति ॥

2. **संशय इति** । उक्तं च मुनिना—'अपरिज्ञाततत्त्वार्थं यत्र वाक्यं समाप्यते । अनेकत्वाद्विचाराणां संशयः परिकीर्तितः ॥' इति ॥

3. **देवतेति** । एतद्विषयाधिष्ठात्रीत्यर्थः ॥

4. **दृष्टान्त इति** । मुनिनाप्युक्तम्—'सिद्धौ पूर्वोपलब्धौ यः समत्वमुपपादयेत् । निदर्शनकृतस्तज्ज्ञैः स दृष्टान्त इति स्मृतः ॥' इति ॥

यथा तत्रैव—

'प्रायेणैव हि दृश्यन्ते कामं स्वप्नाः शुभाशुभाः ।
शतसंख्या पुनरियं सानुजं स्पृशतीव माम् ॥'

संचयोऽर्थानुरूपो यः पदानां स पदोच्चयः ॥ १८० ॥

यथा शाकुन्तले—

'[1]अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु संनद्धम् ॥'

अत्र पदपदार्थयोः सौकुमार्यं सदृशमेव ।

यत्रार्थानां प्रसिद्धानां क्रियते परिकीर्तनम् ।
परपक्षव्युदासार्थं[2] तन्निदर्शनमुच्यते ॥ १८१ ॥

यथा—

'क्षात्रधर्मोचितैर्धर्मैरलं शत्रुवधे नृपाः ।
किं तु वालिनि रामेण मुक्तो बाणः पराङ्मुखे ॥'

प्रायेणैवेति । स्वप्नदर्शनस्य प्रकृतत्वज्ञापनायेदम् । संचयः समूहः । अर्थानुरूपोऽभिधेयसदृशः । सुकुमारार्थे सुकुमारपदसंचयस्य, उद्भटार्थे उद्भटपदसंचयस्य प्रयोग इत्यर्थः । **अधर इति** । विटपानुकारिणौ शाखासदृशौ । यथा वा 'प्रागप्राप्तनिशुम्भशांभवधनुर्द्वैधाविधाविर्भवत्क्रोधप्रेरितभीमभार्गवभुजस्तम्भापविद्धः क्षणात् । उज्जवालः परशुर्भैवलशिथिलस्त्वत्कण्ठपीठातिथिर्येनानेन जगत्सु [3]खण्डपरशुर्देवो हरः ख्याप्यते ॥' प्रागप्राप्तनिशुम्भेति । प्रागप्राप्तनमनेत्यर्थः । अत्र शब्दार्थयोरुद्भटत्वं सदृशम् । **यत्रार्थानामिति** । पक्षो मतम् । किं त्विति यथेत्यर्थे । पराङ्मुखे अन्यासक्ते । अत्र

---

1. **अधर इति** । अधरोऽधरोष्ठः किसलय इव रागो यस्य सः । बाहू विटपौ स्कन्धोर्ध्वशाखे तदनुकारिणौ तत्सदृशौ । 'स्कन्धादूर्ध्वं तरोः शाखा कटप्रो विटपो मतः' इति काल्यः । कोमलशब्देन तयोरग्रजत्वं व्यज्यते । अङ्गेषु संनद्धं संनाहं प्रापितम् । अत्युत्कटमिति यावत् । अत्राङ्गेष्विति बहुवचनेन वदने कान्तिमत्ता, नेत्रयोस्तरलता, कण्ठे कम्बुत्रिरेखावत्त्वम्, वक्षसि स्तनोज्जृम्भणम्, नाभौ गभीरता, नितम्बे मध्यनिम्नत्वम्, उभयभागे चतुरस्रत्वम्, जघनजङ्घाजानुमण्डलोरुदेशानां मांसलत्वम्, गतौ सविलासत्वमित्यादि ध्वनितम् । संनद्धशब्दः प्रकृते बाधितमुख्यार्थः सन् यः संनद्धो भवत्युत्साहेन प्रकटो भवतीति प्राकट्यसंबन्धेन यौवनं लक्षयंस्तद्गतमतिशयं व्यनक्ति । यौवनं कुसुममिव लोभनीयं चित्तापकर्षकम् । अङ्गेषु संनद्धमित्यत्रापि योजनीयम् । लतासु संनद्धमित्यर्थः ॥

2. **व्युदासार्थमिति** । व्युदासो निरासः ॥

3. **खण्डपरशुरिति** । हरेण स्वपरशोरेकः खण्डः परशुरामाय दत्त इति प्रसिद्धिः ॥

---

१. 'बुधाः' क-ख.

अभिप्रायस्तु सादृश्यादभूतार्थस्य कल्पना ।

यथा शाकुन्तले—

'इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति ॥'
ध्रुवं स नीलोत्पलपत्रधारया [1]समिल्लतां छेत्तमृषिर्व्यवस्यति ॥'

प्राप्तिः केनचिदंशेन किंचिद्यत्रानुमीयते ॥ १८२ ॥

यथा मम प्रभावत्याम्—'अनेन खलु सर्वतश्चरता चञ्चरीकेणावश्यं विदिता भविष्यति प्रियतमा मे प्रभावती ।'

विचारो युक्तिवाक्यैर्यदप्रत्यक्षार्थसाधनम् ।

यथा मम चन्द्रकलायाम्—'राजा—नूनमियमन्तःपिहितमदन[2]विकारा वर्तते । यतः ।

हसति परितोषरहितं निरीक्ष्यमाणापि नेक्षते किंचित् ।
सख्यामुदाहरन्त्यामसमञ्जसमुत्तरं दत्ते ।'

देशकालस्वरूपेण वर्णना दिष्टमुच्यते ॥ १८३ ॥

यथा वेण्याम्—'सहदेवः—

यद्वैद्युतमिव ज्योतिरार्ये क्रुद्धेऽद्य संभृतम् ।
तत्प्रावृडिव कृष्णेयं नूनं संवर्धयिष्यति ॥'

उपदिष्टं मनोहारि वाक्यं शास्त्रानुसारतः ।

यथा शाकुन्तले—

'[2]शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।

क्षत्रधर्मव्युदासार्थं परासक्ते वालिनि श्रीरामस्य बाणमोक्षः प्रसिद्धोऽर्थः कीर्तितः । अभूतार्थस्य असंभविनो वस्तुनः । अव्याजेन स्वभावेन मनोहरम् । ऋषिः कण्वः । व्यवस्यति इच्छति । उत्पलपत्रधारया समिल्लताछेदनमिव शकुन्तलाशरीरेण तपःसाधनमसंभवि—**प्राप्तिरिति** । अंशेन विशेषणेन । चञ्चरीकेण भ्रमरेण । अत्र सर्वतश्चरतेति विशेषणेन भ्रमरस्य स्वप्रियतमाज्ञानं नायकेनानुमीयते । **विचार इति** । युक्तिवाक्यैर्हेतुबोधकवाक्यैः । अप्रत्यक्षस्य साधनं ज्ञापनम् । असमञ्जसमयोग्यम् । **देशकालेति** । देशकालयोः स्वरूपेण साधर्म्येण । प्रावृडिव वर्षाकाल इव । **शुश्रूषस्वेति** ।

1. **समिल्लतामिति** । क्वचित् 'शमीलताम्' इति पाठः । तस्या अतिकाठिन्येनोपमेयेऽत्यन्तासंभावनीयत्वं व्यज्यत इति प्रकृतपद्यव्याख्याने राघवभट्टः ॥

2. **शुश्रूषस्वेति** । अत्र समासेन वात्स्यायनोक्तमेकचारिणीवृत्तं संगृहीतं कविकुलगुरुणा॥

---

१. 'अद्भुत' घ. २. 'शमीतरं' घ. ३. 'प्रमद' इत्यधिकं ख-पुस्तके.

भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥'

गुणातिपातः कार्यं यद्विपरीतं गुणान्प्रति ॥ १८४ ॥

यथा मम चन्द्रकलायां चन्द्रं प्रति—

'जइ संहरिज्जइ तमो घेप्पइ सअलेहि ते पाओ ।
वससि सिरे पसुवइणो तहवि हे इत्थीअ जीअणं हरसि ॥'

यः सामान्यगुणोद्रेकः स गुणातिशयो मतः ।

यथा तत्रैव—'राजा—(चन्द्रकलाया मुखं निर्दिश्य ।)

असावन्तश्चञ्चद्विकचनवनीलाब्जयुगल-
स्तलस्फूर्जत्कम्बुर्विलसदलिसंघात उपरि ।
विना दोषासङ्गं सततपरिपूर्णाखिलकलः
कुतः प्राप्तश्चन्द्रो विगलितकलङ्कः सुमुखि ते ॥'

सिद्धानर्थान्बहूनुक्त्वा विशेषोक्तिर्विशेषणम् ॥ १८५ ॥

यथा—

'तृष्णापहारी विमलो द्विजावासो जनप्रियः ।
ह्रदः पद्माकरः किंतु बुधस्त्वं स जलाशयः ॥'

पूर्वसिद्धार्थकथनं निरुक्तिरिति कीर्त्यते ।

पतिगेहं गच्छन्तीं शकुन्तलां प्रति कण्वस्योपदेशोऽयम् । गुणान् प्रतीति गुणानामित्यर्थः । **जइ इति** । 'यदि संह्रियते तमो ग्रह्यते सकलैस्ते पादः । वससि शिरसि पशुपते-स्तथापि हा स्त्रिया जीवनं हरसि ॥' इति संस्कृतम् । अत्र चन्द्रस्य स्त्रीवधस्तमोहर-णादिगुणविपरीतं कार्यम् । सामान्यगुणेभ्य उपमानोपमेयवृत्तिसाधारणधर्मेभ्य उद्रेक आधिक्यमुपमेयस्य । तले अधोभागे स्फूर्जन् देदीप्यमानः कम्बुः कण्ठरूपो यस्य सः। दोषासङ्गं विना । दोषरहित इत्यर्थः । अथ च दोषा रात्रिस्तस्याः सङ्गं विना । कलाः कलाशास्त्राणि षोडशभागाश्च । अत्राह्लादकत्वादिसाधारणधर्मेभ्यो नीलाब्जयुगलादि-संबन्धाधिक्यं मुखस्य । **अर्थानिति** । सिद्धान् प्रसिद्धान् । विशेषोक्तिर्भेदकथनम् । **तृष्णेति** । ह्रदस्त्वं चैतादृशः । किं तु त्वं बुधः, स ह्रदो जलाशयः सलिलवान् जाड्ययुक्तश्च । तृष्णा धनेच्छा पिपासा च । मलः पापं पङ्कश्च । द्विजा विप्राः पक्षि-णश्च । लक्ष्मीकरः पद्मानामाधारश्च । अत्रान्त्यपादे विशेषकथनम् । व्यतिरेकालंकारो-

---

1. **विलसदिति** । अलिसंघातेन केशपाशोऽभिप्रेतः ॥

---

१. गंद्यीकृतेयमार्या पुस्तके. २. 'ह' इति नास्ति घ-पुस्तके. ३. 'जडाशयः' घ.

यथा वेण्याम्—

'निहताशेषकौरव्यः क्षीबो दुःशासनासृजा ।
भङ्क्ता दुर्योधनस्योर्वोर्भीमोऽयं शिरसानतः ॥'

बहूनां कीर्तनं सिद्धिरभिप्रेतार्थसिद्धये ॥ १८६ ॥

यथा—

'यद्वीर्यं कूर्मराजस्य यश्च शेषस्य विक्रमः ।
पृथिव्या रक्षणे राजन्नेकत्र त्वयि तत्स्थितम् ॥'

दृष्टादीनां भवेद्वृत्तं वाच्यादन्यतरद्वचः ।

वेण्याम्—कञ्चुकिनं प्रति '**दुर्योधनः**—

सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम् ।
स्वबलेन निहन्ति संयुगे नचिरात्पाण्डुसुतः सुयोधनम् ॥'

विचारस्यान्यथाभावः संदेहात्तु विपर्ययः ॥ १८७ ॥

यथा—

'मत्वा लोकमदातारं संतोषे यैः कृता मतिः ।
त्वयि राजनि ते राजन्न तथा व्यवसायिनः ॥'

दाक्षिण्यं चेष्टया वाचा परचित्तानुवर्तनम् ।

वाचा यथा—

'प्रसाधय पुरीं लङ्कां राजा त्वं हि विभीषण ।
आर्येणानुगृहीतस्य न विघ्नः सिद्धिमन्तरा ॥'

एवं चेष्टयापि ।

अर्थ-वाक्यैः स्निग्धैरनुनयो भवेदर्थस्य साधनम् ॥ १८८ ॥

ऽयम् । **पूर्वेति** । क्षीबो मत्तः । भङ्क्ता भञ्जनकर्ता । **बहूनामिति** । एतदनेकोपलक्षणम् । तेन नोक्तोदाहरणासंग्रहः । एकस्मिन्बहूनां गुणकथनमित्यर्थः । **यद्वीर्यमिति** । अत्र राज्ञः पृथिवीपालनभारसहिष्णुतातिशयबोधाय तदुभयकीर्तनम् । दृष्टादीनामित्यादिपदेन हृष्टदुःखितादीनां ग्रहणम् । वाच्याद्वृत्तमिष्टादन्यतरद्विपरीतम् । **न चिरादिति** । चिरान्न हन्तीति वक्तुमिष्टम्, अचिराद्धन्तीत्यन्यथा जातम् । विचारस्य तत्त्वनिश्चयस्यान्यथाभावोऽभावः । संतोषे धनतृष्णागमजन्यसुखे न तथा व्यवसायिनः दातृत्वनिश्चयवन्तः । अत्र भवद्विधे दातरि दातृत्वनिश्चयाभाव एव विचाराभावः । परचित्तस्यानुवर्तनम् । आर्येण श्रीरामेण । अन्तरा मध्ये । चेष्टया यथा शाकुन्तले—'तदहमेनामनृणां करोमि । इत्यङ्गुलीयकं ददाति ।' अत्राङ्गुलीयदानरूपचेष्टया शकुन्तलाचित्तप्रीणनम् । **वाक्यैरिति** । अर्थस्य प्रयोजनस्य । भारद्वाजो द्रोणः ।

---

१. 'सिद्धैः' क-ख.

यथा वेण्याम्—अश्वत्थामानं प्रति 'कृपः—दिव्यास्त्रग्रामकोविदे भारद्वाजतुल्यपराक्रमे किं न संभाव्यते त्वयि ।'

माला स्याद्यदभीष्टार्थं नैकार्थप्रतिपादनम् ।

यथा शाकुन्तले—'राजा—

किं शीकरैः क्लमविमर्दिभिरार्द्रवातं
संचारयामि नलिनीदलतालवृन्तम् ।
अङ्के निवेश्य चरणावुत पद्मताम्रौ
संवाहयामि करभोरु यथासुखं ते ॥'

अर्थापत्तिर्यदन्यार्थोऽर्थान्तरोक्तेः प्रतीयते ॥ १८९ ॥

यथा वेण्याम्—द्रोणोऽश्वत्थामानं राज्येऽभिषेक्तुमिच्छतीति कथयन्तं कर्णं प्रति 'राजा—साधु अङ्गराज, साधु । कथमन्यथा

दत्त्वाभयं सोऽतिरथो वध्यमानं किरीटिना ।
सिन्धुराजमुपेक्षेत नैवं चेत्कथमन्यथा ॥'

दूषणोद्घोषणायां तु भर्त्सना गर्हणं तु तत् ।

यथा तत्रैव—कर्णं प्रति 'अश्वत्थामा—

निर्वीर्यं गुरुशापभाषितवशात्किं मे तवेवायुधं
संप्रत्येव भयाद्विहाय समरं प्राप्तोऽस्मि किं त्वं यथा ।
जातोऽहं [1]स्तुतिवंशकीर्तनविदां किं सारथीनां कुले
क्षुद्रारातिकृताप्रियं प्रतिकरोम्यस्त्रेण [2]नास्त्रेण यत् ॥'

अभ्यर्थनापरैर्वाक्यैः पृच्छार्थान्वेषणं मतम् ॥ १९० ॥

मालेति । अभीष्टार्थं स्वाभीष्टसिद्धये । नैकार्थप्रतिपादनमनेकार्थस्य ज्ञापनम् । शीकरैरम्बुकणैः । आर्द्रः शीतलो वातो यस्य तत् । संचारयामि व्यापारयामि । नलिनीदलमेव तालवृन्तम् । 'वृन्तैः' इति पाठे शीकरैः सह नलिनीदलतालवृन्तैरार्द्रवातं संचारयामि स्मरतप्तशरीरं प्रापयामि । अत्र दुष्यन्तस्य सुरतरूपस्वाभीष्टसिद्ध्यर्थं शकुन्तलायां समीरसंचारपादसंवाहनकार्ययोर्ज्ञापनम् ॥ **अर्थापत्तिरिति** । अङ्गराज इति कर्णसंबोधनम् । **कथमन्यथेति** । भवता वक्तव्यम् । इति शेषः । स द्रोणः । सिन्धुराजं जयद्रथम् । एवं पुत्राभिषेकाभिप्रायः । अन्यथा प्रकारान्तरेण । अत्र सिन्धुराजोपेक्षारूपार्थान्तरोक्त्या द्रोणस्य पुत्राभिषेकाभिप्रायः प्रतीयते । दूषणोद्घोषणायामिति

---

1. **स्तुतिवंशेति** । स्तुतिवंशयोः कीर्तनं विदन्ति ये तेषां सारथीनां सूतानाम् ॥
2. **अस्त्रेणेति** । अस्त्रेण नयनाम्भसा ॥

यथा तत्रैव—'सुन्दरकः—अज्जा, अवि णाम सारधिदुदिओ दिट्ठो तुह्मेहिं महाराओ दुर्योधणो ण वेत्ति ।'

प्रसिद्धिर्लोकसिद्धार्थैरुत्कृष्टैरर्थसाधनम् ।

यथा विक्रमोर्वश्याम्—'राजा—

'सूर्याचन्द्रमसौ यस्य मातामहपितामहौ ।
स्वयं कृतः पतिर्द्वाभ्यामुर्वश्या च भुवा च यः ॥'

सारूप्यमनुरूपस्य सारूप्यात्क्षोभवर्धनम् ॥ १९१ ॥

यथा वेण्याम्—दुर्योधनभ्रान्त्या भीमं प्रति 'युधिष्ठिरः—दुरात्मन्, दुर्योधनहतक—'इत्यादि ।

संक्षेपो यत्तु संक्षेपादात्मान्यार्थे प्रयुज्यते ।

यथा मम चन्द्रकलायाम्—'राजा—प्रिये,

'अज्ञानि खेदयसि किं शिरीषकुसुमपरिपेलवानि मुधा ।
(आत्मानं निर्दिश्य ।)
अयमीहितकुसुमानां संपादयिता तवास्ति दासजनः ॥'

गुणानां कीर्तनं यत्तु तदेव गुणकीर्तनम् ॥ १९२ ॥

यथा तत्रैव—

'नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि—' इत्यादि ।

सश्लेषो भण्यते वाक्यं यत्सादृश्यपुरःसरम् ।

यथा वेण्याम्—'राजा—

हते जरति गाङ्गेये पुरस्कृत्य शिखण्डिनम् ।
या श्लाघा पाण्डुपुत्राणां सैवास्माकं भविष्यति ॥'

कृतायामिति शेषः । अभ्यर्थनापरैः सविनयैः । **अज्जा इति** । 'आर्याः, अपि नाम सारथिद्वितीयो दृष्टो युष्माभिर्महाराजो दुर्योधनो न वेति । इति संस्कृतम् । लोकसिद्धार्थैः लोकख्यातवस्तुभिः । अर्थसाधनं पदार्थपरिचयः। **सूर्याचन्द्रमसाविति**। अत्र सूर्यादिभिः प्रसिद्धार्थैः पुरूरवसः परिचयः । अनुरूपस्य सदृशस्य सारूप्यात् सादृश्यजनितभ्रमात् । 'अनुभूतस्य' इति पाठे सादृश्यादनुभूतस्य भ्रमविषयस्येत्यर्थः । संक्षेपात् अविशेषात् । अन्यार्थे अर्थान्तरस्थाने । प्रयुज्यते निर्दिश्यते । **अयमिति** । अत्रायमित्यनेन आत्मा अन्यो वेति न विशेषकथनम् । अत एवार्थान्तरस्थाने आत्मनः प्रयोगः । सादृश्यपुरःसरं सादृश्यतात्पर्यकम् । गाङ्गेये भीष्मे । सैवेति तत्तुल्यश्लाघायां तात्पर्यम् । यथा वृद्धस्य छलेन श्लाघानुपयुक्ता तथा अस्माकमपि बालक-

---

१ 'अभिभूतस्य' क-ख-ग-घ. २. 'वर्तनं' घ. ३. 'प्रतिसंक्षेपात्' क-ख.

मनोरथस्त्वभिप्रायस्योक्तिर्भङ्ग्यन्तरेण यत् ॥ १९३ ॥

यथा—

'रतिकेलिकलः किंचिदेष मन्मथमन्थरः ।
पश्य सुभ्रु समालम्भात्कादम्बश्चुम्बति प्रियाम् ॥'

विशेषार्थोहविस्तारोऽनुक्तसिद्धिरुदीर्यते ।

यथा—'गृहवृक्षवाटिकायाम्

दृश्येते तन्वि यावेतौ चारुचन्द्रमसं प्रति ।
प्राज्ञे कल्याणनामानावुभौ तिष्यपुनर्वसू ॥'

स्यात्प्रमाणयितुं पूज्यं प्रियोक्तिर्हर्षभाषणम् ॥ १९४ ॥

यथा शाकुन्तले—

'उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक्तदनन्तरं पयः ।
निमित्तनैमित्तिकयोरयं विधिस्तव प्रसादस्य पुरस्तु संपदः ॥'

अथ नाट्यालंकाराः—

**आशीराक्रन्दकपटाक्षमागर्वोद्यमाश्रयाः ।
उत्प्रासनस्पृहाक्षोभपश्चात्तापोपपत्तयः ॥ १९५ ॥
आशंसाध्यवसायौ च विसर्पोल्लेखसंज्ञितौ ।
उत्तेजनं परीवादो नीतिरर्थविशेषणम् ॥ १९६ ॥
प्रोत्साहनं च साहाय्यमभिमानोऽनुवर्तनम् ।
उत्कीर्तनं तथा याच्ञा परिहारो निवेदनम् ॥ १९७ ॥**

स्यैकाकिनोऽभिमन्योर्बहुभिर्हननेन भविष्यतीति भावः । उक्तिर्ज्ञापनम् । भङ्ग्यन्तरेण सदृशदर्शनादिना । रतिकेलिं कलयति सः । यद्वा रत्यै केलिकला यस्य सः । समालम्भादादराधिक्यात् । कादम्बः कलहंसः । अत्र प्रियायै कादम्बस्य प्रियाचुम्बनं दर्शयता नायकेन स्वस्य प्रियाचुम्बनाभिप्रायः सूचितः **विशेषेति** । रूपलावण्यातिशयज्ञापनं विशेषः तस्मै प्रयोजनं विशेषार्थः । ऊहविस्तारस्तर्कातिशयः । **दृश्येते इति** । गृहोपवने विश्वामित्रसमीपे श्रीरामलक्ष्मणौ दृष्ट्वा सीतां संबोध्य तत्सखीनां वितर्कवर्णनमिदम् । अत्र चन्द्रादीनां पृथिव्यामसंभवे वितर्कातिशयः । प्रमाणयितुं प्रमाणं कर्तुम् । हर्षजनकं भाषणं हर्षभाषणम् । निमित्तनैमित्तिकयोर्हेतुफलयोः । अयं पौर्वापर्यरूपो विधिः क्रमः । नाट्यालंकारमाह—**अथेति** ।

---

१. 'समाश्वस्तां' घ. २. 'विशेषार्थोहः प्रस्तावे' क-ख-घ.

प्रवर्तनाख्यानयुक्तिप्रहर्षाश्चोपदेशनम् ।
इति नाट्यालंकृतयो नाट्यभूषणहेतवः ॥ १९८ ॥

आशीरिष्टजनाशंसा

यथा शाकुन्तले—

'ययातेरिव शर्मिष्ठा पत्युर्बहुमता भव ।
पुत्रं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥'

आक्रन्दः प्रलपितं शुचा ।

यथा वेण्याम्—'**कञ्चुकी**—हा देवि कुन्ति, राजभवनपताके—' इत्यादि ।

कपटं मायया यत्र रूपमन्यद्विभाव्यते ॥ १९९ ॥

यथा कुलपत्यङ्के—

'मृगरूपं परित्यज्य विधाय कपटं वपुः ।
नीयते रक्षसा तेन लक्ष्मणो युधि संशयम् ॥'

अक्षमा सा परिभवः स्वल्पोऽपि न विषह्यते ।

यथा शाकुन्तले—'**राजा**—भोः सत्यवादिन्, अभ्युपगतं तावदस्माभिः । किं पुनरिमामतिसंधाय[1] लभ्यते । **शार्ङ्गरवः**—विनिपातः—' इत्यादि ।

गर्वोऽवलेपजं वाक्यं

यथा तत्रैव—'**राजा**—ममापि नाम सत्त्वैरभिभूयन्ते गृहाः ।'

कार्यस्यारम्भ उद्यमः ॥ २०० ॥

यथा कुम्भाङ्के—'**रावणः**—

पश्यामि शोकविवशोऽन्तकमेव तावत्' ।

अलंकृतिपदस्य योगार्थमाह—**नाट्यभूषणहेतव इति** । इष्टजनस्य बन्धोराशंसा अभिमतप्राप्तीच्छा । सम्राजं राजसमूहस्य शास्तारम् । सेव शर्मिष्ठेव । अत्र कण्वस्य शकुन्तलाया अभीष्टलाभेच्छा । विभाव्यते प्रकाश्यते । तेन मारीचेन । **अक्षमेति** । स्वल्पस्यापि परिभवस्यासहनमित्यर्थः । 'भोः—' इत्यादि '—लभ्यते' इत्यन्तं दुष्यन्तवचनम् । शार्ङ्गरवः कण्वशिष्यः । आह इति शेषः । 'विनिपातः' इति 'लभ्यते' इत्यनेनान्वेति । अत्र राजकृतस्याल्पस्यापि परिभवस्य शार्ङ्गरवेणासहनम् । अवलेपजमहंकारजन्यम् । सत्त्वैः प्राणिभिः । **पश्यामीति** । अत्र समरोद्यमः सूचितः ।

---

1 **अतिसंधायेति** । अतिसंधाय वञ्चयित्वा ॥

---

१. 'नाभिप्रसह्यते' क·ख.

ग्रहणं गुणवत्कार्यहेतोराश्रय उच्यते ।

यथा विभीषणनिर्भर्त्सनाङ्के—'**विभीषणः**—राममेवाश्रयामि ।' इति ।

उत्त्रासनं तूपहासो योऽसाधौ साधुमानिनि ॥ २०१ ॥

यथा शाकुन्तले—'**शार्ङ्गरवः**—राजन्, अथ पुनः पूर्ववृत्तान्तमन्यसङ्गाद्विस्मृतो भवान् । तत्कथमधर्मभीरोर्दारपरित्यागः—' इत्यादि ।

आकाङ्क्षा रमणीयत्वाद्वस्तुनो या स्पृहा तु सा ।

यथा तत्रैव—'राजा—

चारुणा स्फुरितेनायमपरिक्षतकोमलः ।
पिपासतो ममानुज्ञां ददातीव प्रियाधरः ॥'

अधिक्षेपवचःकारी क्षोभः प्रोक्तः स एव तु ॥ २०२ ॥

यथा—

'त्वया तपस्विचाण्डाल प्रच्छन्नवधवर्तिना ।
न केवलं हतो वाली स्वात्मा च परलोकतः ॥'

मोहावधीरितार्थस्य[1] पश्चात्तापः स एव तु ।

यथानुतापाङ्के—'**रामः**—

किं देव्या न विचुम्बितोऽस्मि बहुशो मिथ्याभिशस्तस्तदा' इति ।

उपपत्तिर्मता हेतोरुपन्यासोऽर्थसिद्धये ॥ २०३ ॥

गुणवदिति । उत्कृष्टेत्यर्थः । **राममेवेति** । अत्र विभीषणस्य स्वराज्यप्राप्तिरूपोत्कृष्टकार्यस्य हेतुः श्रीरामाश्रयः । आत्मानं साधुं मन्यते साधुं साधुमानी तस्मिन् । अथ पुनरिति वितर्के । पूर्ववृत्तान्तं शकुन्तलाया गान्धर्वविवाहरूपम् । अन्यसङ्गाद्भार्यान्तरसंसर्गात् । **तत्कथमिति** । अन्यथा कथमित्यर्थः । अपरिक्षतो नायकेनादृष्टः । अत एव कोमलः । अधिक्षेपवचो भर्त्सनवाक्यम् । क्षोभश्चित्तव्यथा, स एव क्षोभनामालंकार एव । प्रच्छन्नवधवर्तिना अलक्षितहिंसाकारिणा । मोहेनावधीरितस्यावज्ञातस्य अर्थस्य प्रयोजनस्य । स एव पश्चात्तापालंकार एव । देव्या सीतया । मिथ्याभिशस्तो मिथ्यादत्तपरिवादः । अत्र मोहेनावधीरिते चुम्बनकार्ये पश्चात्तापः ।

---

1. **मोहेति** । नाट्यशास्त्रेऽप्युक्तम्—'अकार्यं सहसा कृत्वा कृत्वा कार्यमथापि वा । संतापो मनसो यस्तु पश्चात्तापः स कीर्तितः ॥' इति ॥

यथा वध्यशिलायाम्—

'म्रियते म्रियमाणे या त्वयि जीवति जीवति ।
तां यदीच्छसि जीवन्तीं रक्षात्मानं ममासुभिः ॥'

आशंसनं स्यादाशंसा

यथा श्मशाने—'माधवः—

[1]तत्पश्येयमनङ्गमङ्गलगृहं भूयोऽपि तस्या मुखम्' इति ।

प्रतिज्ञाध्यवसायकः ।

यथा मम प्रभावत्याम्—'वज्रनाभः—

अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया ।
लीलयोन्मूलयाम्येषं[2] भुवनद्वयमद्य वः ॥'

विसर्पो यत्समारब्धं कर्मानिष्टफलप्रदम् ॥ २०४ ॥

यथा वेण्याम्—

'एकस्य तावत्पाकोऽयम्—' इत्यादि ।

कार्यदर्शनमुल्लेखः

यथा शाकुन्तले—राजानं प्रति 'तापसौ—समिदाहरणाय प्रस्थितावावाम् । इह चासद्गुरोः साधिदैवत इव शकुन्तलयानुमालिनीतीरमाश्रमो दृश्यते । [2]न चेदन्य(था) कार्यातिपातः, प्रविश्य गृह्यतामतिथिसत्कारः' इति ।

म्रियत इति । अत्र तस्या जीवनहेतुत्व शरीररक्षणम् । **आशंसनमिति** । अत्र स्वस्याभीष्टलाभेच्छा । आशीरलंकारे तु बन्धुजनस्येति भेदः । तस्या मालत्याः । कार्यस्य कर्तव्यत्वेन निर्देशः प्रतिज्ञा । एकस्य द्रौपदीकेशग्रहस्य परिपाकः फलमयं राजसमूहक्षयरूपः । द्वितीये द्रोणसंबन्धिनि निःशेषीकर्तुमारब्धा निःशेषिताः । असद्गुरोः कण्वस्य । अनुमालिनीतीरं मालिन्याख्यनदीतीरे । **न चेदिति** । यद्यावां समिदाहरणाय न प्रस्थितौ अन्यथा तदा कार्यस्य होमस्यातिपातोऽनुपपत्तिः ।

---

1. **तदिति** । 'संभूयेव सुखानि चेतसि परं भूमानमातन्वते यत्रालोकपथावतारिणि रतिं प्रस्तौति नेत्रोत्सवः । यद्वालेन्दुकलोच्चयादवचितैः सारैरिवोत्पादितं—' इति तत्पादत्रयी ॥

2. **न चेदिति** । 'न चेदन्यकार्यातिपातः' इति पाठे तु सुखेन ग्रन्थयोजना । स एव पाठः सांप्रतमुपलभ्यते ॥

---

१. 'उत्' क. २. 'एव' घ. ३. 'ग्रहणं' घ.

उत्तेजनमितीष्यते ।

स्वकार्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक् ॥ २०५ ॥

यथा—

'इन्द्रजिच्चण्डवीर्योऽसि नाम्नैव बलवानसि ।
धिग्धिक्प्रच्छन्नरूपेण युध्यसेऽसद्व्याकुलः ॥'

भर्त्सना तु परीवादो

यथा सुन्दराङ्के—'दुर्योधनः—धिग्धिक् सूत, किं कृतवानसि ।

वत्सस्य[1] मे प्रकृतिदुर्ललितस्य पापः
पापं विधास्यति—' इत्यादि ।

नीतिः शास्त्रेण वर्तनम् ।

यथा शाकुन्तले—'दुष्यन्तः—विनीतवेषप्रवेश्यानि तपोवनानि ।' इति ।

उक्तस्यार्थस्य यत्तु स्यादुत्कीर्तनमनेकधा ॥ २०६ ॥
उपालम्भविशेषेण तत्स्यादर्थविशेषणम् ।

यथा शाकुन्तले राजानं प्रति 'शार्ङ्गरवः—आः, कथमिदं नाम । किमुपन्यस्तमिति । ननु भवानेव नितरां लोकवृत्तान्तनिष्णातः ।

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते
प्रियाप्रिया वा प्रमदा स्वबन्धुभिः ॥'

प्रेरणाय प्रवृत्तये । नाम्नैव न तु कर्मणा । अत्र लक्ष्मणेन इन्द्रजिद्वधाय प्रकाशयुद्धे तस्य वर्तनम् । प्रकृत्या स्वभावेन दुर्ललितस्य दुर्विलसितस्य । पापो दुष्कर्मा । पापमनिष्टम् । शास्त्रेण । शास्त्रानुसारेण । वर्तनं कर्मानुष्ठानम् । उत्कीर्तनं सूचनम् । उपालम्भविशेषेण प्रतिकूलोक्तिखण्डनेन । क्वचित् 'उपालम्भस्वरूपेण' इति पाठः । **आः कथमिदं नामेति** । उक्तिः इति शेषः । लोकवृत्तान्तनिष्णातः लोकचरितविज्ञः । ज्ञातिकुलैकसंश्रयां पित्रादिगृहमात्रवर्तिनीम् । अन्यथा भर्तृमतीमुपपतियुक्ताम् । यद्वा सतीमपि अन्यथा असतीं विशङ्कते । अत उक्तदोषात् । परिणेतुः पत्युः । अत्र किमिदमुपन्यस्तमिति राज्ञः प्रतिकूलोक्तिखण्डनेन 'आः कथमिदम्—' इत्यादि-

---

1. वत्सस्येति । अवशिष्टांशस्तु—'समक्षमुदायुधोऽसौ । असित्रिवारयसि किं व्यवसायिनं मां क्रोधो न नाम करुणा न च तेऽस्ति लज्जा ॥' इति । असौ भीमः ॥

प्रोत्साहनं स्यादुत्साहगिरा कस्यापि योजनम् ॥ २०७ ॥

यथा बालरामायणे—

'कालरात्रिकरालेयं स्त्रीति किं विचिकित्ससि ।
तज्जगत्त्रितयं त्रातुं तात ताडय ताडकाम् ॥'

साहाय्यं संकटे यत्स्यात्सानुकूल्यं परस्य च ।

यथा वेण्याम्—कृपं प्रति 'अश्वत्थामा—त्वमपि तावद्राज्ञः पार्श्ववर्ती भव । **कृपः**—वाञ्छाम्यहमद्य प्रतिकर्तुम्—' इत्यादि ।

अभिमानः स एव स्यात्

यथा तत्रैव—'**दुर्योधनः**—

[1]मातः किमप्यसदृशं कृपणं वचस्ते' इत्यादि ।

प्रश्रयादनुवर्तनम् ॥ २०८ ॥

अनुवृत्तिर्

यथा शाकुन्तले—'**राजा**—(शकुन्तलां प्रति ।) अयि, तपो वर्धते । **अनुसूया**—दाणिं अदिधिविसेसलाहेण' इत्यादि ।

भूतकार्याख्यानमुत्कीर्तनं मतम् ।

यथा बालरामायणे—

'[2]अत्रासीत्फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः ।' इत्यादि ।

वाक्यत्रयेण 'तदिदानीमापन्नसत्त्वेयं गृह्यतां सहधर्मचरणाय' इति स्वोक्तोऽर्थः शार्ङ्गरवेण मुहुः सूचितः । विचिकित्ससि वध्या न वेति संदेहाश्रयो भवसि । यद्वा घृणी भवसि । तात इति सप्रेमसंबोधनम् । आनुकूल्यमनुकूलाचरणम् । स एव अभिमानालंकार एव । कृपणं क्षुद्रम् । अत्र मातुराक्षेपेणाहंकारः प्रतीयते । प्रश्रयाद्विनयात् । अनुवृत्तिः प्रत्युत्तरादिना सत्कारः । **दार्णि इति** । 'इदानीमतिथिविशेषलाभेन' इति संस्कृतम् । भवद्देवरे लक्ष्मणे । अत्र सीतां प्रति भूतकार्यं श्रीरामेणाख्यातम् । स्वयं याचनं यथा—'भो लङ्केश्वर दीयतां जनकजां रामः स्वयं याचते'

---

1. **मातरिति** । चरमपादत्रयी तु—'सुक्षत्रिया क्व भवती क्व च दीनतैषा । निर्वैत्सले सुतशतस्य विपत्तिमेतां त्वं नानुचिन्तयसि, रक्षसि मामयोग्यम् ॥' इति ॥

2. **अत्रेति** । उत्तरार्धं तु—'दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं लम्भितः केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्ता च कण्ठाटवी ॥' इति ॥

याञ्चा तु क्वापि याञ्चा या स्वयं दूतमुखेन वा ॥ २०९ ॥

यथा—

'अद्यापि देहि वैदेहीं दयालुस्त्वयि राघवः ।
शिरोभिः कन्दुकक्रीडां किं कारयसि वानरान् ॥'

परिहार इति प्रोक्तः कृतानुचितमार्जनम् ।

यथा—

'प्राणप्रयाणदुःखार्त उक्तवानस्म्यनक्षरम् ।
तत्क्षमस्व विभो, किं च सुग्रीवस्ते समर्पितः ॥'

अवधीरितकर्तव्यकथनं तु निवेदनम् ॥ २१० ॥

यथा राघवाभ्युदये—'**लक्ष्मणः**—आर्य, समुद्राभ्यर्थनया गन्तुमुद्यतोऽसि । तत्किमेतत् ।'

प्रवर्तनं तु कार्यस्य यत्स्यात्साधुप्रवर्तनम् ।

यथा वेण्याम्—'**राजा**—कञ्चुकिन्, देवस्य देवकीनन्दनस्य बहुमानाद्वत्सस्य भीमसेनस्य विजयमङ्गलाय प्रवर्तन्तां तत्रोचिताः समारम्भाः ।'

आख्यानं पूर्ववृत्तोक्तिर्

यथा तत्रैव—

'देशैः[1] सोऽयमरातिशोणितजलैर्यस्मिन्ह्रदाः पूरिताः' इत्यादि ।

युक्तिरर्थावधारणम् ॥ २११ ॥

यथा तत्रैव—

'यदि समरमपास्य नास्ति मृत्यो-
र्भयमिति युक्तमितोऽन्यतः प्रयातुम् ।

इत्यादि । दूतमुखेन याचनमाह—**अद्यापीति** । रावणं प्रत्यङ्गदस्योक्तिरियम् । कृतं यदनुचितं कर्म तस्य मार्जनं तज्जन्यापराधक्षमापनम् । **प्राणेति** । विभो श्रीराम । **अवधीरितेति** । अवज्ञातेत्यर्थः । अर्थस्य प्रयोजनस्य अवधारणं कर्तव्यत्वनिश्चयः ।

---

1. **देश इति** । पादत्रयं तु—'क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः । तान्येवाहितशस्त्रघस्मरगुरूण्यस्त्राणि भास्वन्ति मे यद्रामेण कृतं तदेव कुरुते द्रौणायनिः क्रोधनः ॥' इति ॥

---

१. 'उपचिताः' घ.

अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिनं यशः कुरुध्वम् ।

प्रहर्षः प्रमदाधिक्यं[1]

यथा शाकुन्तले—'राजा—तत्किमिदानीमात्मानं पूर्णमनोरथं नाभिनन्दामि ।'

शिक्षा स्यादुपदेशनम् ।

यथा तत्रैव—'सहि, ण जुत्तं अस्समवासिणो जणस्स अकिदसक्कारं अदिधिविसेसं उज्झिअ सच्छन्ददो गमनम् ।'

एषां च लक्षण नाट्यालंकाराणां सामान्यत एकरूपत्वेऽपि भेदेन व्यपदेशो गड्डुलिकाप्रवाहेण[2] । एषु च केषांचिद्गुणालंकारभावसंध्यङ्गविशेषान्तर्भावेऽपि नाटके प्रयत्नतः कर्तव्यत्वात्तद्विशेषोक्तिः ।

एतानि च—

'पञ्चसंधि चतुर्वृत्ति चतुःषष्ट्यङ्गसंयुतम् ।
षट्त्रिंशल्लक्षणोपेतमलंकारोपशोभितम् ॥
महारसं महाभोगमुदात्तरचनान्वितम्[3] ।
महापुरुषसंत्कारं[4] साध्वाचारं जनप्रियम् ॥

इतः समरात् । अत्र समरः कर्तव्य एवेत्यर्थावधारणम् । **सहि इति** । 'सखि, न युक्तमाश्रमवासिनो जनस्याकृतसत्कारमतिथिविशेषमुज्झित्वा स्वच्छन्दतो गमनम्' इति संस्कृतम् । अत्र शकुन्तलां प्रति तत्सख्या उपदेशोक्तिरियम् । ननु भूषणादीनि यानि लक्षणान्युक्तानि तानि नाट्यभूषणहेतुत्वरूपसामान्यधर्मयोगेन नाट्यालंकारमध्य एवान्तर्भवितुमर्हन्ति, तदेषां भिन्नत्वेनोपादानमनतिप्रयोजनमित्यभिप्रायेणाह—**एषां चेति** । गड्डलिकाप्रवाहेण गतानुगतिकन्यायेन । ननु भूषणस्य यथायथं गुणेऽलंकारे च, शोभायाः श्लेषे, विशेषणस्य विशेषोक्त्यलंकारे, एवमाशीरादिनाट्यालंकाराणामाशीराद्यलंकारेषु, एवं युक्त्यादीनां युक्त्यादिसंध्यङ्गेषु चान्तर्भावे सिद्धे पुनरुपादानमनर्थकमित्यत आह—**एषु चेति** । लक्षणनाट्यालंकारेष्वित्यर्थः । एतानि लक्षणादीनि 'नाटकेऽवश्यंकर्तव्यानि' इत्यग्रेणान्वयः । भोगो भावादिः सहायो वा । रचनाया उदात्तत्वं विलासर्द्ध्यादियुक्तत्वम् । महापुरुषस्य धीरोदात्तनायकस्य सत्कारो

---

1. **प्रमदेति** । प्रमदस्य आनन्दस्य आधिक्यं तारुण्यावस्था ॥

---

१. 'गड्डरिका' इति क्वचित्कः पाठः. २. 'गुणालंकारभूषितम्' इति नाट्यशास्त्रस्थः पाठः. ३. 'वचन' इति नाट्यशास्त्रस्थः पाठः. ४. 'संचारम्' इति नाट्यशास्त्रस्थः पाठः.

सुश्लिष्टसंधियोगं च सुप्रयोगं सुखाश्रयम् ।
मृदुशब्दाभिधानं[1] च कविः कुर्यात्तु नाटकम् ॥'

इति मुनिनोक्तत्वान्नाटकेऽवश्यं कर्तव्यान्येव । वीथ्यङ्गानि वक्ष्यन्ते । लास्याङ्गान्याह—

गेयपदं स्थितपाठ्यमासीनं पुष्पगण्डिका ॥ २१२ ॥
प्रच्छेदकस्त्रिगूढं[2] च सैन्धवाख्यं द्विगूढकम् ।
उत्तमोत्तमकं चान्यदुक्तप्रत्युक्तमेव च ॥ २१३ ॥
लास्ये दशविधं ह्येतदङ्गमुक्तं मनीषिभिः ।

तत्र—

तन्त्रीभाण्डं[3] पुरस्कृत्योपविष्टस्यासने पुरः ॥ २१४ ॥
शुष्कं गानं गेयपदं

यथा—गौरीगृहे वीणां वादयन्ती 'मलयवती—

उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि ।
अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन ॥'

स्थितपाठ्यं तदुच्यते ।
मदनोत्तापिता यत्र पठति प्राकृतं स्थिता ॥ २१५ ॥

अभिनवगुप्तपादास्त्वाहुः—'उपलक्षणं चैतत् । क्रोधोद्भ्रान्तस्यापि प्राकृतपठनं स्थितपाठ्यम्' इति ।

निखिलातोद्यरहितं[4] शोकचिन्तान्विताबला ।

गुणवर्णनं यत्र । साधुरविगीत आचारो वैदिकं कर्म यत्र । तन्त्रीभाण्डं वीणावाद्यं

---

1. **मृद्वि**ति । इदमेवाभिप्रेत्य षोडशाध्यायोपसंहारे मुनिनोक्तम्—'चेक्रीयतेप्रभृतिभिर्विकृतैश्च शब्दैर्युक्ता न भान्ति ललिता भरतप्रयोगाः । यज्ञक्रियेव शरवर्मधरैर्धृताक्षैर्वेश्या द्विजैरिव कमण्डलुदण्डहस्तैः ॥' नाटकस्य वैशिष्ट्यमपि मुनिनैकोनविंशाध्याये प्रतिपादितम्—'न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला । न तत्कर्म न वा योगो नाटके यत्र दृश्यते ॥'

2. **तन्त्री**ति । अष्टादशाध्याये भरतेनाप्युक्तम्—'आसनेषूपविष्टैर्यत्तन्त्रीभाण्डोपबृंहितम् । गायनैर्गीयते शुष्कं तद्गेयपदमुच्यते ॥' इति ॥

3. **निखिले**ति । उक्तं च भरतेन—'आसीनमासनस्थस्य सर्वतोऽप्यविवर्जितम् । अप्रसारितगात्रं च चिन्ताशोकान्वितं च तत् ॥'

---

१. 'अभिपात' क. 'अतिपातं' घ. २. नाट्यशास्त्रे गूढपदस्थाने सर्वत्र मूढपदमुपलभ्यते.

[1]अप्रसाधितगात्रं यदासीनासीनमेव [2]तत् ॥ २१६ ॥
आतोद्यमिश्रितं गेयं छन्दांसि विविधानि च ।
[1]स्त्रीपुंसयोर्वि[3]पर्यासचेष्टितं पुष्पगण्डिका ॥ २१७ ॥
[4]अन्यासक्तं पतिं मत्वा प्रेमविच्छेदमन्युना ।
[2]वीणापुरःसरं गानं स्त्रियाः प्रच्छेदको मतः ॥ २१८ ॥
[3]स्त्रीवेषधारिणां पुंसां नाट्यं श्लक्ष्णं त्रिगूढकम् ।

यथा मालत्याम्—'मकरन्दः—एषोऽस्मि मालती संवृत्तः ।'

कश्चन भ्रष्टसंकेतः सुव्यक्तकरणान्वितः ॥ २१९ ॥
प्राकृतं वचनं वक्ति यत्र तत्सैन्धवं मतम् ।

करणं वीणादिक्रिया ।

चतुरस्रपदं गीतं मुखप्रतिमुखान्वितम् ॥ २२० ॥
[4]द्विगूढं रसभावाढ्यमु[5]त्तमोत्तमकं पुनः ।
कोपप्रसादजमधिक्षेपयुक्तं रसोत्तरम् ॥ २२१ ॥
हावहेलान्वितं चित्रश्लोकबन्धमनोहरम् ।
उक्तिप्रत्युक्तिसंयुक्तं सोपालम्भमलीकवत् ॥ २२२ ॥

पुरस्कृत्य गानोपायोपयोगिलेनाहत्य । आतोद्यं वादित्रम् । अप्रसाधितगात्रमनलंकृतशरीरम् । एतद्वयं क्रियाविशेषणम् । विपर्यासेन वैपरीत्येन चेष्टा अभिनयो यत्र गेये तत् । मन्युः शोकः । संकेतस्थाने अनागमने नायको भ्रष्टसंकेतो भवति । चतुरस्राणि विदग्धमनोहराणि पदानि यत्र । यद्वा चतुरस्रपदं पूर्णसप्तस्वरम् । मुखप्रतिमुखान्वितम् उक्तिप्रत्युक्तिसहितम् । 'कोपप्रसादजम्' इत्यादिविशेषणपञ्चकमनुषक्तस्य

---

1. **स्त्रीति** । उक्तं च भरतेन—'नृत्तं तु द्विविधं यत्र गीतमातोद्यमेव च । स्त्रियः पुंवच्च चेष्टन्ते सा ज्ञेया पुष्पगण्डिका ॥' इति ॥

2. **वीणेति** । नाट्यशास्त्रे तु—'प्रच्छेदकः स विज्ञेयो यत्र चन्द्रातपाहताः । स्त्रियः प्रियेषु सज्जन्ते ह्यपि विप्रियकारिषु ॥' इत्याम्नातम् ॥

3. **स्त्रीवेषेति** । मुनिना तु—'अनिष्ठुरश्लक्ष्णपदं समवृत्तैरलंकृतम् । नाट्यं पुरुषभावाढ्यं त्रिगूढकमुदाहृतम् ॥' इत्युक्तम् ॥

4. **द्विगूढमिति** । चतुरस्रपदादिविशेषणत्रयवद् गीतं द्विगूढम् ॥

5. **उत्तमेति** । कोपप्रसादजादिविशेषणपञ्चकवद् गीतमुत्तमोत्तमकपदवाच्यम् ॥

---

१. 'अप्रसारित' इति नाट्यशास्त्रस्थः पाठः, क.ख-ग-पुस्तकस्थश्च. २, 'तु' घ. ३. 'विपर्यासि' क-ख. ४. 'अन्यासङ्गं' घ.

विलासान्वितगीतार्थमुक्तप्रत्युक्तमुच्यते[1] ।

स्पष्टान्युदाहरणानि ।

एतदेव यदा सर्वैः पताकास्थानकैर्युतम् ॥ २२३ ॥
अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे ।

एतदेव नाटकम् । यथा—बालरामायणम् ।

अथ प्रकरणम्—

भवेत्प्रकरणे[2] वृत्तं लौकिकं कविकल्पितम् ॥ २२४ ॥
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक् ।
सापायधर्मकामार्थपरो धीरप्रशान्तकः ॥ २२५ ॥

विनायकं यथा मृच्छकटिकम् । अमात्यनायकं मालतीमाधवम् । वणिङ्नायकं पुष्पभूषितम् ।

नायिका[3] कुलजा कापि वेश्या कापि द्वयं क्वचित् ।
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः ॥ २२६ ॥
कितवद्यूतकारादिविटचेटकसंकुलः ।

कुलस्त्री पुष्पभूषिते । वेश्या तु रङ्गवृत्ते । द्वे अपि मृच्छकटिके । अस्य नाटकप्रकृतित्वाच्छेषं नाटकवत् ।

गीतस्य विशेषणम् । उक्तिप्रत्युक्तिसंयुक्तमिति गीतमित्यनुषज्यते । सोपालम्भं सभर्त्सनम् । अलीकवत् अप्रियमिव । नाटकमुक्त्वा प्रकरणमाह—अथेति । वृत्तं वर्णनीयं नायकचरितम् । लौकिकं लोकचरितमात्रप्रसिद्धम् । अत एव कविकल्पितम्, न तु पुराणादिप्रसिद्धम् । धर्मस्य स्वर्गसाधनत्वेन, कामस्य पुत्रपश्वादिविषयकत्वेन, अर्थस्य भोगसाधनत्वेन सापायत्वम् । तेन नायिकाभेदेन । तस्य प्रकरणस्य । 'विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्' इति प्रकरणादौ नाटकधर्मातिदेशान्नाटकस्य

---

1. **उक्तेति** । उक्तयादिविशेषणचतुष्टयवद् गीतमुक्तप्रत्युक्तम् ॥

2. **भवेदिति** । भरतेनाप्युक्तम्—'यत्र कविरात्मबुद्ध्या वस्तुशरीरं च नायकं चैव । औत्पत्तिकं प्रकुरुते प्रकरणमिति तद्बुधैर्ज्ञेयम् ॥' इति ॥

3. **नायिकेत्यादि** । काव्येन्दुप्रकाशे त्वयमर्थः किंचित्परिष्कृत्योक्तः—'शुद्धं धूर्तमिश्रमिति भेदात्तत्त्रिविधं पुनः । कुलस्त्रीनायिकं शुद्धं गणिकानायिकं परम् ॥ प्राधान्यमुभयोर्यत्र मिश्रं प्रकरणं विदुः ॥' इति । 'तत्र वेश्या प्राकृतं तु कुलजा संस्कृतं वदेत् ॥' इति कृष्णः ॥

अथ भाणः—

[1]भाणः स्याद्धूर्तचरितो नानावस्थान्तरात्मकः ॥ २२७ ॥
एकाङ्क एक एवात्र निपुणः पण्डितो विटः ।
रङ्गे प्रकाशयेत्स्वेनानुभूतमितरेण वा ॥ २२८ ॥
संबोधनोक्तप्रत्युक्ती कुर्यादाकाशभाषितैः ।
सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यवर्णनैः ॥ २२९ ॥
तत्रेतिवृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती ।
मुखनिर्वहणे संधी लास्याङ्गानि दशापि च ॥ २३० ॥

अत्राकाशभाषितरूपपरवचनमपि स्वयमेवानुवदन्नुत्तरप्रत्युत्तरे कुर्यात् । शृङ्गारवीररसौ च सौभाग्यशौर्यवर्णनया सूचयेत् । प्रायेण भारती । क्वापि कैशिक्यपि वृत्तिर्भवति । लास्याङ्गानि गेयपदादीनि । उदाहरणं लीलामधुकरः ।

अथ व्यायोगः—

[2]ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः ।
हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः ॥ २३१ ॥
[3]एकाङ्कश्च भवेदस्त्रीनिमित्तसमरोदयः ।
कैशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः ॥ २३२ ॥
राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः ।
हास्यशृङ्गारशान्तेभ्य इतरेऽत्राङ्गिनो रसाः ॥ २३३ ॥

यथा सौगन्धिकाहरणम् ।

प्रकृतित्वम् । भाणमाह—**भाणः स्यादिति** । धूर्तस्य नायकस्य चरितं यत्र सः । कार्यसाधर्म्यमवस्था । निरुक्तप्रारम्भादिपञ्चविधावस्थातिरिक्तावस्थालाभायान्तरपदम् । शौर्यवर्णनयात्र वीरं सौभाग्यवर्णनया शृङ्गारं सूचयेदित्यन्वयः । तत्र भाणे । इतिवृत्तं वर्णनीयं वस्तु । उत्पाद्यं कविभिः कल्पनीयम् । न तु पुराणादिप्रसिद्धम् । व्यायोगमाह—**ख्यातेतिवृत्त इति** । ख्यातं पुराणादिप्रसिद्धमितिवृत्तं यत्र । गर्भविमर्शौ

---

1. **भाण इति** । भारतीवृत्तिप्रधानत्वाद् भाण इति धनिकः ॥
2. **व्यायोग इति** । व्यायुज्यन्तेऽस्मिन्बहवः पुरुषा इति व्यायोगः ॥
3. **अस्त्रीति** । अस्त्री निमित्तैश्चात्र संग्रामः । यथा परशुरामेण पितृवधकोपात्सहस्रार्जुनवधः कृत इति धनिकः ॥

अथ समवकारः—

वृत्तं समवकारे तु ख्यातं देवासुराश्रयम् ।
संधयो निर्विमर्शास्तु त्रयोऽङ्कास्तत्र चादिमे ॥ २३४ ॥
संधी द्वावन्त्यतोस्तद्वदेक एको भवेत्पुनः ।
नायका द्वादशोदात्ताः प्रख्याता देवमानवाः ॥ २३५ ॥
फलं[1] पृथक्पृथक्तेषां वीरमुख्योऽखिलो रसः ।
वृत्तयो मन्दकैशिक्यो नात्र विन्दुप्रवेशकौ ॥ २३६ ॥
वीथ्यङ्गानि च तत्र स्युर्यथालाभं त्रयोदश ।
गायत्र्युष्णिङ्मुखान्यत्र च्छन्दांसि विविधानि च ॥ २३७ ॥
त्रिशृङ्गारस्त्रिकपटः कार्यश्चायं त्रिविद्रवः ।
वस्तु द्वादशनालीभिर्निष्पाद्यं प्रथमाङ्कगम् ॥ २३८ ॥
द्वितीयेऽङ्के चतसृभिर्द्वाभ्यामङ्के तृतीयके ।

नालिका घटिकाद्वयमुच्यते । विन्दुप्रवेशकौ च नाटकोक्तावपि नेह विधातव्यौ ।

तत्र—

धर्मार्थकामैस्त्रिविधः शृङ्गारः, कपटः पुनः ॥ २३९ ॥
स्वाभाविकः कृत्रिमश्च दैवजो, विद्रवः पुनः ।
अचेतनैश्चेतनैश्च चेतनाचेतनैः कृतः ॥ २४० ॥

तत्र शास्त्राविरोधेन कृतो धर्मशृङ्गारः । अर्थलाभार्थकल्पितोऽर्थ-शृङ्गारः । प्रहसनशृङ्गारः कामशृङ्गारः । तत्र कामशृङ्गारः प्रथमाङ्क[2]

तृतीयचतुर्थसंधी । स नायकः । अत्र व्यायोगे । समवकारमाह—**वृत्तमिति** । आदिमे प्रथमाङ्के द्वौ मुखप्रतिमुखाख्यौ । अन्त्ययोर्द्वितीयतृतीयाङ्कयोरेक एकः संधिरित्यन्वयः । उदात्ता धीरोदात्ताः । देवमानवाः दिव्यादिव्याः । देवाश्च दानवाश्च 'देवदानवाः' इत्यपि क्वचित्पाठः । तेषां नायकानाम् । मन्दकैशिक्यः कैशिकीहीनाः । अत्र समवकारे । विद्रवो गर्भसंध्यङ्गम्, स च शङ्काभयत्रासकृतः संभ्रमः नाटक-

---

1. **फलमिति** । यथा पयोनिधिमन्थने वासुदेवादीनां लक्ष्म्यादिलाभ इति धनिकः ॥

2. **प्रथमाङ्क इति** । धनिकस्तु—'प्रत्यङ्कं च यथासंख्यं कपटाः । तथा नगरोपरोध-युद्धवार्ताश्यादिविद्रवाणां मध्ये एकैको विद्रवः कार्यः । धर्मार्थकामशृङ्गाराणामेकैकः शृङ्गारः

---

१. 'नाडिका' क. २. 'द्वयोरन्तयोः' इति पुस्तकान्तरे पाठः.

एव । अन्ययोस्तु न नियम इत्याहुः । चेतनाचेतना गजादयः । समवकीर्यन्ते बहवोऽर्था अस्मिन्निति समवकारः । यथा—समुद्रमथनम् ।

अथ डिमः—

मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ।
[1]उपरागैश्च भूयिष्ठो [2]डिमः ख्यातेतिवृत्तकः ॥ २४१ ॥
अङ्गी रौद्ररसस्तत्र सर्वेऽङ्गानि रसाः पुनः ।
चत्वारोऽङ्का मता नेह विष्कम्भकप्रवेशकौ ॥ २४२ ॥
नायका देवगन्धर्वयक्षरक्षोमहोरगाः ।
भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः ॥ २४३ ॥
वृत्तयः कैशिकीहीना निर्विमर्शाश्च संधयः ।
दीप्ताः स्युः षड्रसाः शान्तहास्यशृङ्गारवर्जिताः ॥ २४४ ॥

अत्रोदाहरणं च 'त्रिपुरदाहः' इति [3]महर्षिः ।

अथेहामृगः—

ईहामृगो मिश्रवृत्तश्चतुरङ्कः प्रकीर्तितः ।
मुखप्रतिमुखे संधी तत्र निर्वहणं तथा ॥ २४५ ॥
नरदिव्यावनियमौ[1] नायकप्रतिनायकौ ।

प्रकृतित्वादेव विद्रवप्राप्तौ प्रकारत्रयस्यावश्यकत्वार्थमिदं वचनम् । निषिद्धकाले निषिद्धयोषिति कृतः शृङ्गारः शास्त्रविरुद्धस्तदितरो धर्मः शृङ्गारः । समवकीर्यन्ते निबध्यन्ते । डिममाह—**मायेन्द्रजालेति** । इह डिमे । दीप्ता विभावादिसामग्रीबलेन झटिति प्रतीयमानाः । ईहामृगमाह—**ईहामृग इति** । मिश्रवृत्तः ख्याताख्यातेतिवृत्तः । नरदिव्यौ नायकप्रतिनायकाविति । क्रमनिषेधार्थमाह—**अनियमा-**

प्रत्यङ्कमेव विधातव्यः ।' इति नियममाह । मन्दारमरन्दकृत्तु—'अङ्काश्चयस्तत्र चाद्ये मुखप्रतिमुखौ तथा । वस्तुस्वभावदैवारिकृताः स्युः कपटाश्रयः ॥ कथामपि निबध्नीयात्तथा द्वादशनालिकाम् । द्वितीयेऽङ्केऽपि चतुर्नालिकावधिकां कथाम् ॥ पुररोधरणाद्यादिनिमित्ता विद्रवाश्रयः तृतीयेऽङ्के निबद्धव्या कथा चापि द्विनालिका ॥ धर्मार्थकामानुगुणास्तिस्रः शृङ्गाररीतयः ॥' इत्याह ॥

1. **उपेति** । उपरागैः सूर्यचन्द्रग्रहणैः । चकारेण निर्घातोल्कापातादयो गृह्यन्ते ॥

2. **डिम इति** । 'डिम संघाते' इति नायकसंघातव्यापारात्मकत्वाद्डिम इति धनिकः ॥

3. **महर्षिरिति** । तथाच तद्वाक्यम्—'इदं त्रिपुरदाहे तु लक्षणं ब्रह्मणोदितम् । ततस्त्रिपुरदाहश्च डिमसंज्ञः प्रयोजितः ॥' इति ॥

---

१. 'अनियतौ' क.

ख्यातौ धीरोद्धतावन्यो गूढभावादयुक्तकृत् ॥ २४६ ॥
दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः ।
शृङ्गाराभासमप्यस्य किंचित्किंचित्प्रदर्शयेत् ॥ २४७ ॥
पताकानायका दिव्या मर्त्या वापि दशोद्धताः ।
युद्धमानीय संरम्भं परं व्याजान्निवर्तते ॥ २४८ ॥
महात्मानो वधप्राप्ता अपि वध्याः स्युरत्र नो ।
एकाङ्को देव एवात्र नेतेत्याहुः परे पुनः ॥ २४९ ॥
दिव्यस्त्रीहेतुकं युद्धं नायकाः पडितीतरे ।

मिश्रं ख्याताख्यातम् । अन्यः प्रतिनायकः । पताकानायकास्तु नायकप्रतिनायकयोर्मिलिता दश । नायको मृगवदलभ्यां नायिकामत्र ईहते वाञ्छतीतीहामृगः । यथा—कुसुमशेखरविजयादिः ।

अथाङ्कः—

उत्सृष्टिकाङ्क एकाङ्को नेतारः प्राकृता नराः ॥ २५० ॥
रसोऽत्र करुणः स्थायी बहुस्त्रीपरिदेवितम् ।
प्रख्यातमितिवृत्तं च कविर्बुद्ध्या प्रपञ्चयेत् ॥ २५१ ॥
भाणवत्संधिवृत्त्यङ्गान्यस्मिञ्जयपराजयौ ।
युद्धं च वाचा कर्तव्यं निर्वेदवचनं बहु ॥ २५२ ॥

इमं च केचित् 'नाटकोद्यन्तःपात्यङ्कपरिच्छेदार्थमुत्सृष्टिकाङ्कनामा-

---

विति । यद्वा क्वचिद्दिव्ययोः क्वचिन्नरयोर्वा प्राप्त्यर्थमिदम् । अन्यः प्रतिनायकः । गूढभावाद् गोपनेन । अपहारो बलात्कारः । आदिना छलादिपरिग्रहः । परं प्रतिनायकम् । संरम्भमानीय क्रोधं प्रापय्य । स्मितस्य नायकस्य व्याजात् कार्यान्तरच्छलाद् युद्धं निवर्तत इत्यर्थः । 'निवर्तयेत्' इति पाठे परं युद्धस्थानमानीय संरम्भं निवर्तयेदित्यर्थः । **महात्मान इति** । प्रतिनायकानां वधे पुराणादिप्रसिद्धेऽपि स न वर्णनीय इति भावः । अत्र ईहामृगे । अङ्कमाह—**उत्सृष्टिकाङ्क इति** । अङ्कस्यैव नामान्तरमेतत् । प्राकृताः नातिकोविदाः । स्थायी स्थिरतरः । प्रपञ्चयेद्बहुलीकुर्यात् । **भाणवदिति** । भाणे यथा मुखनिर्वहणे संधी, कैशिकीभारत्यौ वृत्ती, दश लास्याङ्गानि तथात्रापीत्यर्थः । अस्मिन्नङ्के जयपराजयौ वर्णनीयौ । इमं च अङ्कं च ।

---

1. **प्रख्यातमिति** । क्वचिदप्रख्यातमपि । तदुक्तं नाट्यशास्त्रकृता—'प्रख्यातवस्तुविषयस्त्वप्रख्यातः कदाचिदेव स्यात् । दिव्यपुरुषैर्वियुक्तः शेषैरन्यैर्भवेत्पुभिः ॥' इति ॥

नम्' आहुः । अन्ये तु—'उत्क्रान्ता विलोमरूपा सृष्टिर्यत्रेत्युत्सृष्टिकाङ्कः ।' यथा—शर्मिष्ठाययातिः ।

अथ वीथी—

वीथ्यामेको भवेदङ्कः कश्चिदेकोऽत्र कल्प्यते ।
आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रितः ॥ २५३ ॥
सूचयेद्धूरिशृङ्गारं किंचिदन्यात्रसान्प्रति ।
मुखनिर्वहणे संधी अर्थप्रकृतयोऽखिलाः ॥ २५४ ॥

कश्चिदुत्तमो मध्यमोऽधमो वा । शृङ्गारबहुलत्वाच्चास्याः कैशिकीवृत्तिबहुलत्वम् ।

अस्यास्त्रयोदशाङ्गानि निर्दिशन्ति मनीषिणः ।
उद्घात्य(त)कावलगिते प्रपञ्चस्त्रिगतं छलम् ॥ २५५ ॥
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके ।
असत्प्रलापव्याहारमृद(मार्द)वानि च तानि तु ॥ २५६ ॥

तत्रोद्घात्य(त)कावलगिते प्रस्तावनाप्रस्तावे सोदाहरणं लक्षिते ।

मिथो वाक्यमसद्भूतं प्रपञ्चो हास्यकृन्मतः ।

[1]यथा विक्रमोर्वश्याम्—वलभीस्थविदूषकचेट्योरन्योन्यवचनम् ।

त्रिगतं स्यादनेकार्थयोजनं श्रुतिसाम्यतः ॥ २५७ ॥

यथा तत्रैव—'राजा—

सर्वक्षितिभृतां नाथ, दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वनान्तेऽस्मिन्मया विरहिता त्वया ॥

(नेपथ्ये तथैव प्रतिशब्दः ।) **राजा**—कथं दृष्टेत्याह ।'

वीथीमाह—**वीथ्यामिति** । एकोऽद्वितीयः । नायक इति शेषः । कल्प्यते कल्पयित्वा वर्ण्यते । अर्थप्रकृतयो बीजादयः पञ्च । अस्याः वीथ्याः । प्रपञ्चमाह—**मिथ इति** । परस्परमित्यर्थः । असद्भूतं मिथ्यास्वरूपम् । वलभी गृहावस्थितकाष्ठविशेषः । त्रिगतमाह—**त्रिगतमिति** । 'सर्वक्षितिभृतां नाथ' इति प्रश्नपक्षे पर्वतः । उत्तरपक्षे राजा संबोध्यः । राजात्र पुरूरवाः । 'रामा उर्वशी मया विरहिता त्वया दृष्टा' इति

---

1. **यथेति** । यथा वा कर्पूरमञ्जर्यां भैरवानन्दः—'रण्डा चण्डा दिक्खिदा धम्मदारा मज्जं मंसं पिज्जए खज्जए अ । भिक्खा भोज्जं चम्मखण्डं च सेज्जा कोलो धम्मो कस्स णो होइ रम्मो ॥' इति ॥

अत्र प्रश्नवाक्यमेवोत्तरत्वेन योजितम् । 'नटादित्रितयविषयमेवेदम्' इति [1]कश्चित् ।

प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य च्छलना छलम् ।

यथा वेण्याम्—'भीमार्जुनौ—

कर्ता द्यूतच्छलानां, जतुमयशरणोद्दीपनः, सोऽभिमानी
राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रम् ।
कृष्णाकेशोत्तरीयव्यपनयनपटुः, पाण्डवा यस्य दासाः
क्वास्ते दुर्योधनोसौ कथयत, न रुषा द्रष्टुमभ्यागतौ स्वैः ॥'

अन्ये त्वाहुश्छलं किंचित्कार्यमुद्दिश्य कस्यचित् ॥ २५८ ॥
उदीर्यते यद्वचनं वञ्चनाहास्यरोषकृत् ।
वाक्केलिर्हास्यसंबन्धो द्वित्रिप्रत्युक्तितो भवेत् ॥ २५९ ॥

द्वित्रीत्युपलक्षणम् । यथा—

'भिक्षो मांसनिषेवणं प्रकुरुषे, किं तेन मद्यं विना
मद्यं चापि तव प्रियं, प्रियमहो वाराङ्गनाभिः सह ।
वेश्याप्यर्थरुचिः कुतस्तव धनं, द्यूतेन चौर्येण वा
चौर्यद्यूतपरिग्रहोऽपि भवतो, नष्टस्य कान्या गतिः ॥'

केचित्—'प्रक्रान्तवाक्यस्य साकाङ्क्षस्यैव निवृत्तिर्वाक्केलिः' इत्याहुः । अन्ये च 'अनेकस्य प्रश्नस्यैकमुत्तरम् ।

अन्योन्यवाक्याधिक्योक्तिः स्पर्धयाधिबलं मतम् ।

प्रश्नः । 'त्वया विरहिता मया दृष्टा' इत्युत्तरम् । त्रिगतपदव्युत्पत्तिमाह—**नटादीति**। आदिना नटीप्रतिनटयोर्ग्रहणम् । इदं त्रिगतम् । छलमाह—**प्रियाभैरिति**। प्रियतुल्यैरित्यर्थः । छलना वञ्चना । जतुमयशरणोद्दीपनः जतुमयगृहदाहकः । अङ्गराजस्य कर्णस्य । कृष्णा द्रौपदी तस्याः केशोत्तरीययोराकर्षणे पटुः । स्वो भवावः । 'आवाम्' इति शेषः । वाक्केलिमाह—**वाक्केलिरिति** । द्वे वा तिस्रो वा प्रत्युक्तयस्ताभ्यः । समासप्रत्ययानामनित्यत्वादत्र डप्रत्ययाभावः । अनेकवाक्यस्यैकमुत्तरमिति वाक्केलिरित्याहुरित्यन्वयः । अधिबलमाह—**अन्योन्येति** । वाक्याधिक्येन

---

1. **कश्चिदिति** । तथा चाह दशरूपककृत्—'श्रुतिसाम्यादनेकार्थयोजनं त्रिगतं त्विह । नटादित्रितयालापः पूर्वरङ्गे तदिष्यते ॥' इति ॥

2. **स्व इति** । असः कर्तरि लट ॥

यथा मम प्रभावत्याम्—'**वज्रनाभः**—

अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया ।
लीलयोन्मूलयाम्येष भुवनद्वयमद्य वः ॥

प्रद्युम्नः—अरेरे असुरापसद, अलममुना बहुप्रलापेन । मम खलु

अद्य प्रचण्डभुजदण्डसमर्पितोरु-
कोदण्डनिर्गलितकाण्डसमूहपातैः ।
आस्तां समस्तदितिजक्षतजोक्षितेयं
क्षोणिः क्षणेन पिशिताशनलोभनीया ॥'

गण्डं प्रस्तुतसंबन्धि भिन्नार्थं सत्वरं वचः ॥ २६० ॥

यथा वेण्याम्—'**राजा**—

[1]अध्यासितुं तव चिराज्जघनस्थलस्य
पर्याप्तमेव करभोरु ममोरुयुग्मम् ॥'

अनन्तरम् '(प्रविश्य) **कञ्चुकी**—देव, भग्गं भग्गं—' इत्यादि ।

अत्र रथकेतनभङ्गार्थं वचनमूरुभङ्गार्थे संबद्धे संबद्धम् ।

व्याख्यानं स्वरसोक्तस्यान्यथावस्यन्दितं भवेत् ।

यथा छलितरामे—'**सीता**—जाद, कालं क्खु उआज्झाएण गन्तव्वम्, तर्हि सो राआ विणएण पणयिदव्वो । **लवः**—अथ किमावाभ्यां राजोपजीविभ्यां भवितव्यम् । **सीता**—जाद, सो क्खु तुह्माणं पिदा । **लवः**—किमावयो रघुपतिः पिता । **सीता**—(साशङ्कम् ।) मा अण्णधा संकद्धम् । ण क्खु तुह्माणम्, सअलाए ज्जेव पुहवीएत्ति ।'

वाक्यातिशयेनोक्तिः । अस्य प्रद्युम्नस्य । वो देवानाम् । गण्डामाह—प्रस्तुतसंबन्धि प्रस्तुतार्थसंबद्धम् । पर्याप्तं समर्थम् । संबद्धे प्रस्तुते । अवस्यन्दितमाह—**व्याख्यानमिति** । स्वरसोक्तस्य 'वाक्यस्य' इति शेषः । **जाद इति** । 'पुत्र, कल्यं खलु उपाध्यायेन गन्तव्यम्, तत्र स राजा विनयेन पणायितव्यः ।' (इति संस्कृतम् ।) 'पुत्र, स खलु युष्माकं पिता ।' इति संस्कृतम् । 'मा अन्यथा शङ्कध्वम् । न खलु युष्माकम् । सकलाया एव पृथिव्या इति ।' इति संस्कृतम् । अत्र सीतया युवयोर्जनकः श्रीराम इत्यभिप्रायेणोक्तं वाक्यम् । 'पालकः' इत्यन्यथा व्याख्यातम् । नालिकामाह—

---

1. **अध्यासितमिति** । एतत्पूर्वार्धं तु—'लोलांशुकस्य पवनाकुलितांशुकान्तं त्वद्दृष्टि हारि मम लोचनबान्धवस्य ।' इति ।

प्रहेलिकैव हास्येन युक्ता भवति नासिका ॥ २६१ ॥

संवरणकार्युत्तरं प्रहेलिका ।

यथा रत्नावल्याम्—'**सुसंगता**—सहि, जस्स किदे तुमं आअदा सो इध ज्जेव चिट्ठदि । **सागरिका**—कस्स किदे अहं आअदा । **सुसंगता**—णं क्खु चित्तफलअस्स ।'

अत्र त्वं राज्ञः कृते आगतेत्यर्थः संवृत्तः ।

असत्प्रलापो यद्वाक्यमसंबद्धं तथोत्तरम् ।
अगृह्णतोऽपि मूर्खस्य पुरो यच्च हितं वचः ॥ २६२ ॥

तत्राद्यं यथा मम प्रभावत्याम्—'**प्रद्युम्नः**—(सहकारवल्लीमवलोक्य सानन्दम् ।) अहो, कथमिहैव

अलिकुलमञ्जुलकेशी परिमलबहला रसावहा तन्वी ।
किसलयपेशलपाणिः कोकिलकलभाषिणी प्रियतमा मे ॥'

एवमसंबद्धोत्तरेऽपि । तृतीयं यथा वेण्यां दुर्योधनं प्रति गान्धारी-वाक्यम् ।

व्याहारो यत्परस्यार्थे हास्यक्षोभकरं वचः ।

यथा मालविकाग्निमित्रे—'(लास्यप्रयोगावसाने मालविका निर्गन्तुमिच्छति ।) **विदूषकः**—मा दाव उवदेसमुद्धा गमिस्ससि । (इत्युपक्रमेण ।) **दासः**—(विदूषकं प्रति ।) आर्य, उच्यतां यस्त्वया क्रमभेदो लक्षितः । **विदूषकः**—पढमं बम्भणपूआ भोदि । सा इमाए लङ्घिदा । (मालविका स्मयते ।)' इत्यादिना नायकस्य विशुद्धनायिकादर्शनप्रयुक्तेन हासलोभकारिणा वचसा व्याहारः ।

दोषा गुणा गुणा दोषा यत्र स्युर्मृद(मार्द)वं हि तत् २६३

प्रहेलिकैवेति । सहि इति । 'सखि, यस्य कृते त्वमागता स इह एव तिष्ठति ।' इति संस्कृतम् । 'कस्य कृते अहमागता ।' [इति संस्कृतम्] 'ननु खलु चित्रफलकस्य ।' इति संस्कृतम् । इयं हास्ययुक्तेत्वस्यन्दितादस्या भेदः । असत्प्रलापमाह—**असत्प्रलाप इति** । असंबद्धं वाक्यमुत्तरं वेत्यर्थः । **अलिकुलेति** । अत्राम्रलतायां स्वप्रियारोप इति वाक्यमसंबद्धम् । व्याहारमाह—**व्याहार इति** । परस्य नायकादेरर्थे प्रयोजने । **मा दाव इति** । 'मा तावदुपदेशमुग्धा गमिष्यसि ।' इति संस्कृतम् । 'प्रथमं ब्राह्मणपूजा भवति । सा अनया लङ्घिता ।' इति संस्कृतम् । मृदवमाह—**दोषा**

क्रमेण यथा—

'प्रिय, जीविततार्क्यं निःस्नेहत्वं कृतघ्नता ।
भूयस्त्वद्दर्शनादेव ममैते गुणतां गताः ॥'
'तस्यास्तद्रूपसौन्दर्यं भूषितं यौवनश्रिया ।
सुखैकायतनं जातं दुःखायैव ममाधुना ॥'

एतानि चाङ्गानि नाटकादिषु संभवन्त्यपि वीथ्यामवश्यं विधेयानि स्पष्टतया नाटकादिषु विनिविष्टान्यपीहोदाहृतानि वीथीव नानारसानां चात्र मालारूपतया स्थितत्वाद्वीथीयम् । यथा—मालविका ।

अथ प्रहसनम्—

भाणवत्संधिसंध्यङ्गलास्याङ्गाङ्कैर्विनिर्मितम् ।
भवेत्प्रहसनं वृत्तं[1] निन्द्यानां कविकल्पितम् ॥ २६४ ॥

अत्र नारभटी, नापि विष्कम्भकप्रवेशकौ ।

अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा ।

तत्र

तपस्विभगवद्विप्रप्रभृतिष्वत्र नायकः ॥ २६५ ॥
एको यत्र भवेद्धृष्टो हास्यं तच्छुद्धमुच्यते ।

यथा—कंदर्पकेलिः ।

इति । प्रियेति । जीविततार्क्यं जीवनकाठिन्यम् । त्वद्विरहे मम स्नेहसत्त्वे मरणमेव स्यात् । एवं तदा मरणमेव प्रत्युपकारस्तदनाचरणात्कृतघ्नता । एते जीवनकौर्यादयः । यद्वा जीविततां जीवनमेव कौर्यादयः । तद्विरहे मम जीवनेनैव कौर्यादयः सुव्यक्ता इति भावः । **तस्या इति ।** विरहिणो नायकस्योक्तिरियम् । **एतानि चेति ।** वीथ्यङ्गानां नाटकाङ्गतया नाटक एव वक्तुं युक्तत्वम् । तथा सति प्रकरणादौ तल्लाभे सिद्धे यत्तेषामिह कीर्तनं तदत्र तेषामावश्यकत्वमन्यत्रानियतत्वमिति भावः । **प्रहसनमिति । भाणवदिति ।** भाणे यथा मुखनिर्वहणे संधी, नानासंध्यङ्गानि, दश लास्यानि, एकोऽङ्कस्तथात्रापीत्यर्थः । **तपस्वीति ।** अत्र प्रहसने तापसादिषु मध्ये कश्चिन्नायको वाच्यः । भगवान् संन्यासी । प्रहसनस्य शुद्धसंकीर्णविकृतत्वभेदेन त्रैविध्यमाह—**एक इति ।** धृष्टः प्रगल्भः । 'नायकः' इत्यनुषज्यते । हास्यं

---

1. **वृत्तमिति ।** इतिवृत्तनिष्पादने विशेषो नाट्यशास्त्रे—'लोकोपचारयुक्ता या वार्ता यश्च दम्भसंयोगः । तत्प्रहसनेषु योज्यं धूर्तोक्तिविवादसंयुक्तम् ॥' इति ॥

---

१. 'इति' घ.

आश्रित्य कंचन जनं संकीर्णमिति तद्विदुः ॥ २६६ ॥

यथा—धूर्तचरितम् ।

वृत्तं बहूनां धृष्टानां संकीर्णं केचिदूचिरे ।
तत्पुनर्भवति व्यङ्कमथवैकाङ्कनिर्मितम् ॥ २६७ ॥

यथा—लंटकमेलकादिः ।

मुनिस्त्वाह—

'वेश्याचेटनपुंसकविटधूर्ता बन्धकी च यत्र स्युः ।
अविकृतवेषपरिच्छदचेष्टितकरणं तु संकीर्णम् ॥' इति ।

विकृतं तु विदुर्यत्र पण्ढकश्चुकितापसाः ।
भुजंगचारणभटप्रभृतेर्वेषवाग्युताः ॥ २६८ ॥

इदं तु संकीर्णेनैव गतार्थमिति मुनिना पृथङ्नोक्तम् ।

अथोपरूपकाणि । तत्र—

नाटिका कृत्तवृत्ता स्यात्स्त्रीप्राया चतुरङ्किका ।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ॥ २६९ ॥
स्यादन्तःपुरसंबद्धा संगीतव्याप्रृताथवा ।
नवानुरागा कन्यात्र नायिका नृपवंशजा ॥ २७० ॥
संप्रवर्तेत नेतास्यां देव्यास्त्रासेन शङ्कितः ।
देवी भवेत्पुनर्ज्येष्ठा प्रगल्भा नृपवंशजा ॥ २७१ ॥
पदे पदे मानवती तद्वशः संगमो द्वयोः ।
वृत्तिः स्यात्कैशिकी स्वल्पविमर्शाः संधयः पुनः ॥ २७२ ॥

द्वयोर्नायिकानायकयोः । यथा—रत्नावली विद्धशालभञ्जिकादिः ।

प्रहसनम् । कंचन धृष्टभिन्नं नायकमाश्रित्य यत्प्रहसनं क्रियते तत्संकीर्णमित्यर्थः । **वृत्तमिति** । 'यत्र तत्' इति पूरणीयम् । तत्संकीर्णप्रहसनम् । यत्र वेश्यादयो वर्णनीयाः स्युस्तदविकृतवेषादीनां करणमनुकरणं प्रहसनम् । संकीर्णमित्यर्थः । इदं तु विकृतप्रहसनं तु । नाटिकामाह—**नाटिकेति** । कृत्तवृत्ता कविकल्पितनायकचरित्रा । स्त्रीप्राया नटीबहुला । प्रख्यातो लोके प्रसिद्धः । तत्र नाटिकायाम् । अस्यां नाटिकायाम् । स्वल्पविमर्शाः विमर्शहीनाः । 'नायकनायिकयोः,

---

1. **लटकेति** । लटको दुर्जन इत्युणादिसूत्रवृत्तावुज्ज्वलदत्तः । लटकाना मेलको यत्र तादृशो निबन्ध इति ज्ञेयम् ॥

अथ त्रोटकम्—

सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम् ।
त्रोटकं नाम तत्प्राहुः प्रत्यङ्कं सविदूषकम् ॥ २७३ ॥

प्रत्यङ्कसविदूषकत्वादत्र शृङ्गारोऽङ्गी । सप्ताङ्कं यथा—स्तम्भितरम्भम् । पञ्चाङ्कं यथा—विक्रमोर्वशी ।

अथ गोष्ठी—

प्राकृतैर्नवभिः पुंभिर्दशभिर्वाप्यलंकृता ।
नोदात्तवचना गोष्ठी कैशिकीवृत्तिशालिनी ॥ २७४ ॥
हीना गर्भविमर्शाभ्यां पञ्चषड्योषिदन्विता ।
कामशृङ्गारसंयुक्ता स्यादेकाङ्कविनिर्मिता ॥ २७५ ॥

यथा—रैवतमदनिका ।

अथ सट्टकम्—

सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम् ।
न च विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः ॥ २७६ ॥
अङ्का जवनिकाख्याः स्युः स्यादन्यन्नाटिकासमम् ।

यथा—कर्पूरमञ्जरी ।

अथ नाट्यरासकम्—

नाट्यरासकमेकाङ्कं बहुतालल्यस्थिति ॥ २७७ ॥
उदात्तनायकं तद्वत्पीठमर्दोपनायकम् ।
हास्योऽङ्गत्र सशृङ्गारो नारी वासकसज्जिका ॥ २७८ ॥
मुखनिर्वहणे संधी लास्याङ्गानि दशापि च ।
केचित्प्रतिमुखं संधिमिह नेच्छन्ति केवलम् ॥ २७९ ॥

इत्येकशेषाभावश्चिन्त्यः । त्रोटकमाह—**सप्तेति** । सप्तादीनामन्यतमा अङ्का यत्र । दिव्यमानुषसंश्रयं दिव्यादिव्यनायकम् । गोष्ठीमाह—**प्राकृतैरिति** । नातिविदग्धैरित्यर्थः । पञ्चभिः षड्भिर्वा योषिद्भिरन्विता । डप्रत्ययस्यानित्यत्वात्तद्रूपसिद्धिः । कामशृङ्गारः प्रागुक्तः सट्टकमाह—**सट्टकमिति** । प्राकृतं संस्कृते भिन्नमशेषं पाठ्यं श्लोकादिकं यत्र । अन्यदङ्कसंख्यादि । नाट्यरासकमाह—**नाट्यरासकमिति** । तालः कालक्रियामानं लयः साम्यम्' इत्यमरः । पीठमर्दलक्षणं प्रागुक्तम् । नारी

---

१. 'एव' इत्यधिकं घ-पुस्तके.

तत्र संधिद्वयवती यथा—नर्मवती । संधिचतुष्टयवती यथा—विलासवती ।

अथ प्रस्थानकम् ।

प्रस्थाने नायको दासो हीनः स्यादुपनायकः ।
दासी च नायिका वृत्तिः कैशिकी भारती तथा ॥२८०॥
सुरापानसमायोगादुद्दिष्टार्थस्य संहृतिः ।
अङ्कौ द्वौ लयतालादिर्विलासो बहुलस्तथा ॥ २८१ ॥

यथा—शृङ्गारतिलकम् ।

अथोल्लाप्यम्—

उदात्तनायकं दिव्यवृत्तमेकाङ्कभूषितम् ।
शिल्पकाङ्गैर्युतं हास्यशृङ्गारकरुणै रसैः ॥ २८२ ॥
उल्लाप्यं बहुसंग्राममस्रगीतमनोहरम् ।
चतस्रो नायिकास्तत्र त्रयोऽङ्का इति केचन ॥ २८३ ॥

शिल्पकाङ्गानि वक्ष्यमाणानि । यथा—देवी महादेवम् ।

अथ काव्यम्—

काव्यमारभटीहीनमेकाङ्कं हास्यसंकुलम् ।
खण्डमात्राद्विपदिकाभग्नतालैरलंकृतम् ॥ २८४ ॥
वर्णमात्राच्छङ्गलिकायुतं शृङ्गारभाषितम् ।

नायिका । वासकसज्जिका प्रागुक्ता । प्रस्थानकमाह—**प्रस्थान इति** । संहृतिः समापनम् । उल्लाप्यमाह—**उदात्तेति** । दिव्यवृत्तं दिव्यनायकोचितचरित्रं यत्र । अन्यसंमतमुल्लाप्यमाह—**उल्लाप्यमिति** । अस्रगातेन त्रिपदीगीतेन मनोहरम् । काव्यमाह—**काव्यमिति** । खण्डमात्रादयो गीतप्रभेदाः । वर्णमात्राच्छङ्गलिके छ-

---

1. **अस्रेति** । 'उत्तरोत्तररूपं यत्प्रस्तुतार्थपरिष्कृतम् । अन्तर्जवनिकं गीतं अस्रगीतं तदुच्यते ॥' इति ॥

2. **वर्णेति** । 'वर्णमात्राच्छगणिकायुतं' इति पाठः साधीयान् । अत एव काव्येन्दुप्रकाशे—'वर्णमात्रस्वच्छवेश्यायुतं' इत्यादि तल्लक्षणं प्रतिगाद्य 'वर्णमात्रस्वच्छा न तु मनः-स्वच्छा' इति व्याख्यातम् ॥

---

१. 'प्रस्थानकम्' घ. २. 'वर्णमात्राछगणिका-' क-ख-ग. '-छङ्गलिका-' घ.

नेता स्त्री चाप्युदात्तात्र संधी आद्यौ तथान्वितः ॥२८५॥

यथा—यादवोदयः ।

अथ प्रेङ्खणम्—

गर्भावमर्शरहितं प्रेङ्खणं हीननायकम् ।
असूत्रधारमेकाङ्कमविष्कम्भप्रवेशकम् ॥ २८६ ॥
नियुद्धसम्फेटयुतं सर्ववृत्तिसमाश्रितम् ।
नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना ॥ २८७ ॥

यथा—वालिवधः ।

अथ रासकम्—

रासकं पञ्चपात्रं स्यान्मुखनिर्वहणान्वितम् ।
भाषाविभाषाभूयिष्ठं भारतीकैशिकीयुतम् ॥ २८८ ॥
असूत्रधारमेकाङ्कं सवीथ्यङ्गं कलान्वितम् ।
श्लिष्टनान्दीयुतं ख्यातनायिकं मूर्खनायकम् ॥ २८९ ॥
उदात्तभावविन्याससंश्रितं चोत्तरोत्तरम् ।
इह प्रतिमुखं संधिमपि केचित्प्रचक्षते ॥ २९० ॥

यथा—मेनकाहितम्[1] ।

अथ संलापकम्—

संलापकेऽङ्काश्चत्वारस्त्रयो वा नायकः पुनः ।
पाषण्डः स्याद्रसस्तत्र शृङ्गारकरुणेतरः ॥ २९१ ॥
भवेयुः पुरसंरोधच्छलसंग्रामविद्रवाः ।

न्दोविशेषो । शृङ्गारभाषितं शृङ्गारसूचकम् । नेता उदात्तः । नायिकाप्युदात्तेत्यन्वयः । प्रेङ्खणमाह—**गर्भावमर्शेति** । अवमर्शो विमर्शाख्यसंधिः । हीननायकं नीचनायकम् । सम्फेटो रोषभाषणम् । ननु सूत्रधाररहितं चेन्नान्दी केन पाठ्या प्ररोचना वा केन कार्येत्यत आह—**नेपथ्येति** । गीयते पठ्यते । तत्र नेपथ्ये । प्ररोचना च भारत्या वृत्तरङ्गविशेषः । सा कविपरिषदादीनां प्रशंसया सामाजिकानामुन्मुखीकरणम् । तथा चात्र नेपथ्यस्थेन येन केनापि नटेन नान्दी पाठ्या, प्ररोचना च कर्तव्येति भावः । रासकमाह—**रासकमिति** । उदात्तभावस्य नायकमहत्त्वस्य विन्यासेन वर्णनेन संश्रितम् । संलापमाह—**संलापक इति** । 'प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य च्छलना छलम्' इत्युक्तलक्षणं छलम् । 'शङ्काभयत्रासकृतः संभ्रमो विद्रवो मतः'

---

१. 'कलान्वितं' क-ख-ग.

न तत्र वृत्तिर्भवति भारती न च कैशिकी ॥ २९२ ॥

यथा—मायाकापालिकम् ।

अथ श्रीगदितम्—

प्रख्यातवृत्तमेकाङ्कं प्रख्यातोदात्तनायकम् ।
प्रसिद्धनायिकं गर्भविमर्शाभ्यां विवर्जितम् ॥ २९३ ॥
भारतीवृत्तिबहुलं श्रीतिशब्देन संकुलम् ।
मतं श्रीगदितं नाम विद्रद्भिरुपरूपकम् ॥ २९४ ॥

यथा—क्रीडारसातलम् ।

श्रीरासीना श्रीगदिते गायेत्किंचित्पठेदपि ।
एकाङ्को भारतीप्राय इति केचित्प्रचक्षते ॥ २९५ ॥

ऊह्यमुदाहरणम् ।

अथ शिल्पकम्—

चत्वारः शिल्पकेऽङ्काः स्युश्चतस्रो वृत्तयस्तथा ।
अशान्तहास्याश्च रसा नायको ब्राह्मणो मतः ॥ २९६ ॥
वर्णनात्र श्मशानादेर्हीनः स्यादुपनायकः ।
सप्तविंशतिरङ्गानि भवन्त्येतस्य तानि तु ॥ २९७ ॥
आशंसातर्कसंदेहत्रापोद्वेगप्रसक्तयः ।
प्रयत्नप्रथनोत्कण्ठावहित्थाप्रतिपत्तयः ॥ २९८ ॥
विलासालस्यबाष्पाणि प्रहर्षाश्वासमूढताः ।
साधनानुगमोच्छ्वासविस्मयप्राप्तयस्तथा ॥ २९९ ॥

इत्युक्तलक्षणो विद्रवः । श्रीगदितमाह—**प्रख्यातेति** । 'श्री' इति शब्देन संकुलं बहुलम् । श्रीर्लक्ष्मीवेषधारिणी नटी । शिल्पकमाह—**चत्वार इति** । श्मशानादे-

---

1. **प्रसक्तय इति** । प्रसक्तिरासक्तिः ॥
2. **अवहित्थेति** । अवहित्था आकृतिगोपनम् ॥
3. **प्रतिपत्तय इति** । प्रतिपत्तिः क्रियार्थावगमः ॥
4. **साधनेति** । साधनस्य इष्टसाधनस्यानुगमः ॥

---

१. 'संयुतम्' घ. २. 'श्री–' इत्यादिः '–उदाहरणम् ।' इत्यन्तः पाठः क-पुस्तके नास्ति. ३. 'स्पष्टम्' ख-ग. ४. 'प्रशक्तयः' घ. ५. 'वाग्यानि' क. ६. 'अश्लील' घ. ७. '–विस्मयाः' घ.

लाभविस्मृतिसम्फेटा वैशारद्यं[1] प्रबोधनम् ।
चमत्कृतिश्चेत्यमीषां स्पष्टत्वाल्लक्ष्म नोच्यते ॥ ३०० ॥

सम्फेटग्रथनयोः पूर्वमुक्तत्वादेव लक्ष्म सिद्धम् । यथा—कनकावतीमाधवः ।

अथ विलासिका—

शृङ्गारबहुलैकाङ्का दशलास्याङ्गसंयुता ।
विदूषकविटाभ्यां च पीठमर्देन भूषिता ॥ ३०१ ॥
हीना गर्भविमर्शाभ्यां संधिभ्यां हीननायका ।
स्वल्पवृत्ता सुनेपथ्या[2] विख्याता[3] सा विलासिका ॥ ३०२ ॥

केचित्तत्र विलासिकास्थाने विनायिकेति[4] पठन्ति । तस्यास्तु 'दुर्मल्लिकायामन्तर्भावः' इत्यन्ये ।

अथ दुर्मल्लिका—

दुर्मल्ली चतुरङ्का स्यात्कैशिकीभारतीयुता ।
अगर्भा[2] नागरनरा न्यूननायक[4]भूषिता ॥ ३०३ ॥
त्रिनालिः[5] प्रथमोऽङ्को[6]ऽस्यां विटक्रीडामयो भवेत् ।
पञ्चनालिर्द्वितीयोऽङ्को विदूषकविलासवान् ॥ ३०४ ॥
पण्णालिकस्तृतीयस्तु पीठमर्दविलासवान् ।
चतुर्थो दशनालिः स्यादङ्कः क्रीडितनागरः ॥ ३०५ ॥

यथा—बिन्दुमती ।

रित्यादिना शवादेर्ग्रहणम् । एतस्य शिल्पकस्य । 'सम्फेटो रोषभाषणम्', 'उपन्यासस्तु कार्याणां ग्रथनम्' इत्युक्तलक्षणे सम्फेटग्रथने । विलासिकामाह—**शृङ्गारेति**। स्वल्पं वृत्तं श्लोक इतिवृत्तं वा यत्र । तस्यास्तु विलासिकायास्तु । दुर्मल्लिकामाह—**दुर्मल्लीति** । 'नालिका घटिकाद्वयम्' इति प्रागेवोक्तम् । प्रकरणिकामाह—

---

1. **वैशारद्यमिति** । वैशारद्यं नैपुण्यम् ॥
2. **अगर्भेति** । गर्भसंधिहीना ॥
3. **नागरेति** । नागराः पुरोद्भवा नरा यस्यां सा । चातुर्थयोगायेदम् ॥
4. **न्यूनेति** । न्यूनो जात्यापकृष्टः ॥
5. **त्रिनालिरिति** । त्रिनालिर्नालिकात्रयनिष्पाद्येतिवृत्तनिबद्ध इति परमार्थः । एवमग्रेऽपि ॥
6. **अस्यामिति** । अस्यां दुर्मल्लिकायाम् ॥

---

१. 'सनेपथ्या' ख-ग. २. 'वीथ्याभासा' क. ३. 'लासिका' घ. ४. 'तथा' घ. ५. 'नायकः घ. ६. 'च' इति पुस्तकान्तरस्थः पाठः.

अथ प्रकरणिका—

नाटिकैव प्रकरणी [1]सार्थवाहादिनायका ।
समानवंशजा नेतुर्भवेद्यत्र च नायिका ॥ ३०६ ॥

मृग्यमुदाहरणम् ।

अथ हल्लीशः—

हल्लीश [2]एक एवाङ्कः सप्ताष्टौ दश वा स्त्रियः ।
[2]वागुदात्तैकपुरुषः कैशिकीवृत्तिरुज्ज्वला ।
मुखान्तिमौ तथा संधी बहुतालल्यस्थितिः ॥ ३०७ ॥

यथा—केलिरैवतकम् ।

अथ भाणिका—

भाणिका श्लक्ष्णनेपथ्या मुखनिर्वहणान्विता ।
कैशिकीभारतीवृत्तियुक्तैकाङ्कविनिर्मिता ॥ ३०८ ॥
उदात्तनायिका मन्दपुरुषात्राङ्गसप्तकम् ।
उपन्यासोऽथ विन्यासो विबोधः साध्वसं तथा ॥ ३०९ ॥
समर्पणं निवृत्तिश्च संहार इति सप्तमः ।
उपन्यासः प्रसङ्गेन भवेत्कार्यस्य कीर्तनम् ॥ ३१० ॥
निर्वेदवाक्यव्[3]युत्पत्तिर्विन्यास इति स स्मृतः ।
भ्रान्तिनाशो विबोधः स्यान्मिथ्याख्यानं तु साध्वसम् ॥
सोपालम्भवचः [4]कोपं[2]पीडयेह समर्पणम् ।
निदर्शनस्योपन्यासो निवृत्तिरिति कथ्यते ॥ ३१२ ॥
संहार इति च प्राहुर्यत्कार्यस्य समापनम् ।

[5]स्पष्टान्युदाहरणानि । यथा—कामदत्ता ।

नाटिकैवेति । सार्थवाहो वणिक् । हल्लीशमाह—**हल्लीश इति** । एकपुरुष एकनटः । भाणिकामाह—**भाणिकेति** । मन्दपुरुषा हीननायका । एतेषां नाटिकादीनाम् ।

---

1. **सार्थवाहादीति** । आदिशब्देन पुरोहितामात्यौ गृह्येते ॥
2. **वागिति** । उदात्ता वाक् ॥
3. **व्युत्पत्तिरिति** । व्युत्पत्तिः प्रपञ्चनम् ॥
4. **कोपेति** । कोपपीडया अमर्षबाधया ॥
5. **स्पष्टानीति** । उपन्यासाद्यङ्गसप्तकस्येत्यर्थः ॥

---

१. 'एव' घ. २. 'कोपं पीडयेच्च' क.

[1]एतेषां [2]सर्वेषां नाटकप्रकृतित्वेऽपि यथौचित्यं यथालाभं नाटकोक्तविशेषपरिग्रहः । यत्र च नाटकोक्तस्यापि पुनरुपादानं तत्र तत्सद्भावस्य नियमः ।

अथ श्रव्यकाव्यानि—

श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा ॥ ३१३ ॥

तत्र पद्यमयान्याह—

छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम् ।
द्वाभ्यां तु [3]युग्मकं [1]संदानितकं त्रिभिरिष्यते ॥ ३१४ ॥
[2]कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ।

तत्र मुक्तकं यथा मम—

'सान्द्रानन्दमनन्तमव्ययमजं यद्योगिनोऽपि क्षणं
साक्षात्कर्तुमुपासते प्रतिमुहुर्ध्यानैकतानाः परम् ।
धन्यास्ता [3]मधुरापुरीयुवतयस्तद्ब्रह्म याः कौतुका-
दालिङ्गन्ति समालपन्ति शतधाकर्षन्ति चुम्बन्ति च ॥'

युग्मकं यथा मम—

'किं करोषि करोपान्ते कान्ते गण्डस्थलीमिमाम् ।
प्रणयप्रवणे कान्तेऽनैकान्ते नोचिताः क्रुधः ॥

दृश्यकाव्यमुक्त्वा श्रव्यमाह—**श्रव्यमिति** । मात्रपदेन दृश्यव्यवच्छेदः । छन्दो गायत्र्यादि तच्च छन्दःशास्त्रप्रसिद्धलक्षणम् । तेन पद्येन मुक्तेन पद्यान्तरनिरपेक्षेण एकेन । 'तेनैकेन च मुक्तकम्' इति क्वचित्पाठः । द्वाभ्यां परस्परापेक्षाभ्यां पद्याभ्याम् । एवमग्रेऽपि । पञ्चभिरिति न्यूनसंख्याव्यवच्छेदः । तेन माघादौ दशादिभिः श्लोकैः कुलकं संगच्छते । क्षणं क्षणमपि । ध्यानैकतानाः ध्यानैकाग्रचित्ताः । आकर्षन्ति क्रीडार्थमाहरन्ति । अनैकान्तेऽव्यभिचारिणि । त्वन्मात्रपरायणे इत्यर्थः । महाकाव्य-

---

1. **संदानितकमिति** । संदानितकस्यैव विशेषकमिति तिलकमिति च संज्ञा ॥

2. **कलापकमिति** । कलापकमेव काश्मीरकैश्चक्कलकमिति व्यपदिश्यते ॥

3. **मधुरापुरीति** । मधुराशब्दस्य मधुपुरीवाचकत्वे 'काञ्ची ते धृतयोगसंपदभितो जाता विशालाकृतिर्यावन्ती मधुरा ध्वनिं विदधती पश्चादयोध्याभवत् । मायाद्वारवती शिवाधिवसतिः सा काशिका दृश्यते तच्चित्रं न वदामि माधव यतस्त्वां सा सदा संश्रिता ॥' इति मधुसूदनसरस्वतीश्लोकः प्रमाणम् ॥

---

१. 'एषा' क-घ. २. 'अपि' इत्यधिकं घ-पुस्तके. ३. 'च' क. ४. 'मथुरा' ख-घ.

इति यावत्कुरङ्गाक्षीं वक्तमीहामहे वयम् ।
तावदाविरभूच्चूते मधुरो मधुपध्वनिः ॥'

एवमन्यान्यपि ।[1]

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ॥ ३१५ ॥
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ॥ ३१६ ॥
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ।
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसंधयः ॥ ३१७ ॥
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ।
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत् ॥ ३१८ ॥
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम् ॥ ३१९ ॥[2]
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ।
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह ॥ ३२० ॥

माह—**सर्गबन्ध इति** । सर्गैरवान्तरार्थवर्णनैरुपलक्षितः बन्धः । पद्मबन्ध इत्यर्थः । तत्र महाकाव्ये । बहवः । नायका इत्यर्थः । नाटकसंधयो मुखप्रतिमुखगर्भविमर्शनिर्वहणाख्याः । इतिहासोद्भवं भारतादिप्रसिद्धम् । अन्यल्लोकप्रसिद्धम् । चत्वारो वर्गाः धर्मार्थकाममोक्षाः, तेषु चतुर्षु मध्ये एकं चेति चकारो वार्थः । फलं वर्गः । आदौ आरम्भे । वस्तुनो वर्णनीयनायकस्य नाम्ना निर्देशो वस्तुनिर्देशः । एकवृत्तमयैरेकजातीयपद्यैरुपलक्षिताः । अष्टाधिका अष्टान्यूनाः । इह महाकाव्ये । उपयमो विवाहः ।

---

1. **महाकाव्यमिति** । अत्र विशेषः—'शास्त्रं काव्यं शास्त्रकाव्यं काव्यशास्त्रं च भेदतः । चतुष्प्रकारः प्रसरः सतां सारस्वतो मतः ॥ शास्त्रं काव्यविदः प्राहुः सर्वकाव्याङ्गलक्षणम् । काव्यं विशिष्टशब्दार्थसाहित्यसदलंकृति ॥ शास्त्रकाव्यं चतुर्वर्गप्रायं सर्वोपदेशकृत् । भट्टि-भौमक-काव्यादि काव्यशास्त्रं प्रचक्षते ॥ शास्त्रं कुर्यात्प्रयत्नेन प्रसन्नार्थमनुष्टुभा । येन सर्वोपकाराय याति सुस्पष्टसेतुताम् ॥ काव्ये रसानुसारेण वर्णनानुगुणेन च । कुर्वीत सर्ववृत्तानां विनियोगं विभागवित् ॥ शास्त्रकाव्येऽतिदीर्घाणां वृत्तानां न प्रयोजनम् । काव्यशास्त्रेऽपि वृत्तानि रसायत्तानि काव्यवित् ॥ पुराणप्रतिबिम्बेषु प्रसन्नोपायवर्त्मसु । उपदेशप्रधानेषु कुर्यात्सर्वेष्वनुष्टुभम् ॥ नानावृत्तविशेषास्तु कवेः शस्तस्य शासनात् । यान्ति प्रभोरिवात्यन्तमयोग्या अपि योग्यताम् ॥' इति ॥

2. **क्वचिदिति** । यथा धर्मशर्माभ्युदयादौ ॥

---

१. 'एवमन्यत्रापि' घ.

नानावृत्तमयः [1]क्वापि सर्गः कश्चन दृश्यते ।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ॥ ३२१ ॥
संध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ।
प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः ॥ ३२२ ॥
संभोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ।
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ॥ ३२३ ॥
[2]वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ।
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ॥ ३२४ ॥

यथायोगं यथासंभवम् । एतेन येनकेनाप्यङ्गेन हीनमपि काव्यं न दुष्टमिति भावः । वृत्तस्य वर्णनीयचरित्रस्य । अस्य महाकाव्यस्य । कविनामकं महाकाव्यं माघभारविप्रभृति । वृत्तनामकं कुमारसंभवादि । नायकनामकं रघुप्रभृति । इतरनामकं भट्टि-

---

1. **क्वापीति** । यथा शिशुपालवधे चतुर्थः सर्गः, किरातार्जुनीये पञ्चमः ॥

2. **वर्णनीया इति** । केषांचन वर्णनीयानां विशिष्यवर्णनप्रकारा निरूप्यन्ते—'**नृपे** विद्या नयः शक्तिर्बलं तस्करताक्षमः । प्रजाशास्तिः प्रजारागो धर्मकामार्थतुल्यता ॥ प्रयाणरणखड्गादिशास्त्राण्यरिपराजयः । अरिनाशोऽरिशैलादिवासोऽरिपुरशून्यता । महः श्रीदानकीर्त्याद्या गुणौघा रूपवर्णनम् ॥ **महामात्ये** नयः शास्त्रं धैर्यं बुद्धिर्गभीरता । शक्तिः शस्त्रमलोभत्वं जनरागो विवेकिता ॥ **पुरोहिते** स्मृतिर्वेदा निमित्तापत्प्रतिक्रिया । दण्डनीतिज्ञता शुद्धिर्धर्मशीलकुलक्रमाः ॥ **देव्यां** विज्ञानचातुर्यं त्रपाशीलव्रतादयः । रूपलावण्यसौभाग्यप्रेमशृङ्गारमन्मथाः ॥ वेणीधम्मिल्लसीमन्तभालश्रवणनासिकाः । कपोलाधरनेत्रभ्रूकटाक्षदशनोक्तयः ॥ कण्ठबाहुकरोरोजनाभ्यो मध्यं वलित्रयम् । रोमालिश्रोणिजङ्घोरुगतिक्रमनखाः क्रमात् ॥ **कुमारे** शस्त्रशास्त्रश्रीकलाबलगुणोच्छ्रयाः । बाह्याली खुरली राजभक्तिः सुभगतादयः ॥ **सेनापतौ** महोत्साहः स्वामिभक्तिरभीरुता । अभ्यासो वाहने शास्त्रे शस्त्रे च, विजयो रणे ॥ **देशे** बहुखनिद्रव्यपण्यधान्याकरोद्भवाः । दुर्गग्रामजनाधिक्यनदीमातृकतादयः ॥ **ग्रामे** धान्यलतावृक्षसरसीपशुपुष्टयः । क्षेत्रारघट्टकेदारग्रामेयीमुग्धविभ्रमाः ॥ **पुरे**ऽट्टपरिखावप्रप्रतोलीतोरणादयः । प्रासादाध्वप्रपारामवाप्यो वेश्या सतीत्वरी ॥ **सरस्यम्भोलहर्यम्भोगजाद्यम्बुजपट्पदाः । हंसचक्रादयस्तीरोद्यानस्त्रीपान्थकेलयः ॥ **अब्धौ** द्वीपाद्रिरत्नोर्मिपोतयादोजगत्स्रवाः । विष्णुकुल्यागमश्चन्द्राद्बृद्धिरौर्वोऽब्दपूरणम् ॥ **सरित्यम्बुधियायित्वं वीच्यो जलगजादयः । पद्मानि षट्पदा हंसचक्राद्याः कूलशाखिनः ॥ **उद्याने** सरणिः सर्वफलपुष्पलताद्रुमाः । पिकालिकेकिहंसाद्याः क्रीडावाप्यध्वगस्थितिः ॥ **शैले** मेधौषधीधातुवंशकिंनरनिर्झराः । शृङ्गपादगुहारत्नवनजीवाद्युपत्यकाः ॥ **अरण्ये**ऽहिरारिहभयूथसिंहादयो द्रुमाः । काकोलूककपोताद्या भिल्लभल्लदवादयः ॥ **आश्रमे**ऽतिथिपूजैणविश्वासो हिंस्रशान्तता । यज्ञधूमो मुनिसुता द्रुसेको वल्कलद्रुमाः ॥ **मन्त्रे** पञ्चाङ्गताशक्तिषाड्गुण्योपायसिद्धयः । उदयाश्चिन्तनीयाश्च स्थैर्यौन्नत्यादिसूक्तयः ॥ **दूते** स्वस्वामि-

नामास्य सर्गोपादेयकथया [1]सर्गनाम तु ।

संध्यङ्गानि यथालाभमत्र विधेयानि । 'अवसानेऽन्यवृत्तकैः' इति बहुवचनमविवक्षितम् । साङ्गोपाङ्गा इति जलकेलिमधुपानादयः । यथा—रघुवंश-शिशुपालवध नैषधादयः । यथा वा मम—राघवविलासादिः ।

अस्मिन्नार्षे पुनः सर्गा भवन्त्याख्यानसंज्ञकाः ॥ ३२५ ॥

अस्मिन्महाकाव्ये । यथा—महाभारतम् ।

प्रभृति । महाभारतादौ गद्यमत्वेऽपि पद्यप्राचुर्येणैव महाकाव्यत्वव्यवहारः । तस्मिन्म-

---

तेजःश्रीविक्रमौन्नत्यक्रुद्धचः । शत्रुक्षोभकरी चेष्टा धार्ष्ट्यं दाक्ष्यमभीरुता ॥ **युद्धे** तु वर्मबलवीररजासि तूर्यविश्वासनादशरमण्डपरक्तनद्यः । छिन्नातपत्ररथचामरकेतुकुम्भिमुक्तासुरीवृतभटामरपुष्पवर्षाः ॥ **प्रयाणे** भेरिनिस्वानभूकम्पबलधूलयः । करमोक्षध्वजच्छत्रवणिक्कटवेशराः ॥ **मृगयायां** श्वसंचारो वागुरा नीलवेषता । भटढक्कामृगत्रासः सिंहयुद्धं त्वरागतिः ॥ **अश्वे** खरखुरोत्खातरजःसल्लक्षणस्थितिः । तेजो वेगित्वमौन्नत्यं जातिर्धाराप्रपञ्चनम् ॥ **गजे** सहस्रयोधित्वमुच्चत्वं कर्णचापलम् । अरिव्यूहविभेदित्वं कुम्भमुक्तामदालिनः ॥ **सुरभौ** दोलाकोकिलमारुतसूर्यगतितरुदलोद्भेदाः । जातीतरपुष्पचयाम्रमञ्जरीभ्रमरझंकाराः ॥ **ग्रीष्मे** पाटलमल्लीतापसरःपथिकशोषवातास्यः । सक्तुप्रपाप्रपास्त्रीमृगतृष्णाम्रादिफलपाकाः ॥ **वर्षासु** घनशिखिसयहंसगमाः पङ्ककन्दलोद्भेदौ । जातीकदम्बकेतकझंझानिलनिम्नगा हलिप्रीतिः ॥ **शरदीन्दुरविपटुत्वं** जलाच्छतागस्त्यहंसवृषदर्पाः । सप्तच्छदपद्मसिताम्रधान्यशिखिपक्षमदपाताः ॥ **हेमन्ते** दिनलघुता शीतयवस्तम्बमरुवकहिमानि । शिशिरे करीषधूमः कुमुदाम्बुजदाहशिखिरतोत्कर्षाः ॥ **सूर्ये**ऽरुणता रविमणिचक्राम्बुजपथिकलोचनप्रातिः । तारेन्दुदीपकौषधिधूकतमश्चौरकुमुदकुलटार्तिः ॥ **चन्द्रे** कुलटाचक्राम्बुरुहविरहितमोहानिरौज्ज्वल्यम् । जलधिजननेत्रकैरवचकोरचन्द्राश्मदम्पतिप्रीतिः ॥ **विवाहे** स्नानशुभ्राङ्गभूषालूलुत्रयीरवाः । वेदीसीमन्ततारेक्षा लाजामङ्गलवर्तनम् ॥ **विरहे** तापनिःश्वासचिन्ता मौनं कृशाङ्गता । अब्जशय्या निशादैर्घ्यं जागरः शिशिरोष्मता ॥ **स्वयंवरे** शचीरक्षामञ्चमण्डपसज्जता । राजपुत्री नृपाकारान्वयचेष्टाप्रकाशनम् ॥ **सुरापाने** विकलता स्खलनं वचने गतौ । लज्जा मानच्युतिः प्रेमाधिक्यं रक्तेक्षणभ्रमाः ॥ **पुष्पावचये** पुष्पावचयः पुष्पार्पणार्थिने दयिते । मानाधं गोत्रस्खलनेर्ष्यावक्रोक्तिसंभ्रमाश्लेषाः । **जलकेलौ** सरःक्षोभश्चक्रहंसापसर्पणम् । पद्मग्लानिः पथःक्षेपो दृग्रागो भूषणच्युतिः । **सुरते** सात्त्विका भावाः सीत्कारः कुड्मलाक्षता । काञ्चीकङ्कणमञ्जीररवोऽधरनखक्षते ॥ **प्रातः** कोकाम्बुजोत्कर्षो **मध्याह्ने** तापसंप्लवः । **सायं** सूर्यातिलौहित्यं चक्रपद्मादिविप्लवः ॥ **अन्धकारे**ऽतिसान्द्रत्वं विश्वलोपसमर्थता । आकस्मिकसमारम्भो निःशङ्कमभिसारिका ॥ वर्ण्येषु वर्ण्यभावानां दिङ्मात्रमिह दर्शितम् । चिद्रूपैश्चिन्त्यमानानां भवत्येषामनन्तता ॥' इति ॥

1. **सर्गनामेति** । यथा गीतगोविन्दे प्रथम-द्वितीयादिसर्गाणां सामोददामोदर-अक्लेशकेशवादिनाम्ना व्यपदेशः ॥

प्राकृतैर्निर्मिते तस्मिन्सर्गा आश्वाससंज्ञकाः ।
छन्दसा [1]स्कन्धकेनैतैत्कचिद्वलितकैरपि ॥ ३२६ ॥

यथा—सेतुबन्धः । यथा वा मम—कुवलयाश्वचरितम् ।

अपभ्रंशनिबद्धेऽस्मिन्सर्गाः [3]कुडवकाभिधाः ।
तथापभ्रंशयोग्यानि च्छन्दांसि विविधान्यपि ॥ ३२७ ॥

यथा—कर्णपराक्रमः ।

[4]भाषाविभाषानियमात्काव्यं सर्गैसमुत्थितम् ।
[6]एकार्थप्रवणैः पद्यैः संधिसामग्र्यवर्जितम् ॥ ३२८ ॥

यथा—भिक्षाटनम्, आर्याविलासश्च ।

खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च ।

यथा—मेघ[2]दूतादिः ।

[3]कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः ॥ ३२९ ॥
व्रज्याक्रमेण रचितः स एवातिमनोरमः ।

सजातीयानामेकत्र संनिवेशो व्रज्या । यथा—मुक्तावल्यादिः ।

अथ गद्यकाव्यानि । तत्र गद्यम्—

वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च ॥ ३३० ॥

हाकाव्ये । एतत्प्राकृतकृतं महाकाव्यम् । गलितकानि छन्दोविशेषाः । काव्यमाह—**भाषेति** । भाषा सस्कृतादिः, विभाषा अपभ्रंशादिः । एकार्थप्रवणैः एकवाक्यतापन्नैः । यावत्संधिरहितं यत्तत्काव्यमित्यर्थः । खण्डकाव्यमाह—**खण्डेति** । काव्यस्यानन्तर-निरूपितस्य एकदेशानुसारि यत्किंचिल्लक्षणहीनम् । तेनात्र भाषानियमो नास्ति । एकार्थप्रवणैः संस्कृतपद्यैर्निर्मितं खण्डकाव्यमित्यर्थः । कोषमाह—**कोष इति** । स एव कोष एव । वृत्तस्य गन्धेन लवेनापि उज्झितं श्रव्यकाव्यं गद्यम् । आर्यं मुक्तकम् ।

---

1. **भाषेति** । भाषाविभाषानियमाद् एकार्थप्रवणैः पद्यैर्निबद्धम् ॥

2. **मेघदूतादिरिति** । आदिपदेन ऋतुसंहारप्रभृतीनां संग्रहः । अत्रैव भेदे देवद्विजराज-स्तुतिमात्रप्रवणानां यत्किंचिल्लक्षणाक्रान्तानामन्येषामपि काव्यकानामन्तर्भावः ॥

3. **कोष इति** । अत्रेदं तत्त्वम्—व्रज्याघटित एकः प्रकाररस्तद्विन्नो द्वितीय इति द्विविधः कोषः । तत्राद्यस्य आर्यासप्तशत्यादय उदाहरणम् । द्वितीयस्य सुभाषितावलिप्रभृ-तयः । अकारादिहकारान्ताद्यक्षरश्लोकसंघातो व्रज्या ॥

---

१. 'स्कन्दकेन' क. २. 'एव' क-ख. ३. 'निबन्धे' घ. ४. 'कडरकाभिधाः' क; 'काडविका-भिधाः' ख-ग. ५. 'समुज्झितम्' घ. ६. 'एकार्थश्रवणं' क; 'एकार्थभवणं' ख-ग.

भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम् ।
आद्यं समासरहितं वृत्तभागयुतं परम् ॥ ३३१ ॥
अन्यदीर्घसमासाढ्यं तुर्यं चाल्पसमासकम् ।

मुक्तकं यथा—'गुरुर्वचसि पृथुरुरसि—' इत्यादि ।

वृत्तगन्धि यथा मम—'समरकण्डूलनिबिडभुजदण्डकुण्डलीकृत-कोदण्डशिञ्जिनीटंकारोज्जागरितवैरिनगर—' इत्यादि ।

अत्र 'कुण्डलीकृतकोदण्ड—' इत्यनुष्टुब्वृत्तस्य पादः, 'समरक-ण्डूल' इति च प्रथमाक्षरद्वयरहितस्तस्यैव पादः ।

उत्कलिकाप्रायं यथा ममैव—'अणिसविसुमरणिसिदसरविसरविद-लिदसमरपरिगदपवरपरबल—' इत्यादि ।

चूर्णकं यथा मम—'गुणरत्नसागर जगदेकनागर कामिनीमदन जनरञ्जन' इत्यादि ।

कथायां सरसं वस्तु गद्यैरेव विनिर्मितम् ॥ ३३२ ॥
क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापवक्त्रके ।
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम् ॥ ३३३ ॥

यथा—कादम्बर्यादिः ।

आख्यायिका कथावत्स्यात्कवेर्वंशानुकीर्तनम् ।
अस्यामन्यकवीनां च वृत्तं पद्यं क्वचित्क्वचित् ॥ ३३४ ॥
कथांशानां व्यवच्छेद आश्वास इति बध्यते ।
[1]आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित् ॥ ३३५ ॥
अन्यापदेशेनाश्वासमुखे भाव्यार्थसूचनम् ।

यथा—हर्षचरितादिः ।

वृत्तस्य छन्दसो भागः पादः । परं वृत्तगन्धि । अन्यदुत्कलिकाप्रायम् । तुर्यं चूर्णकम् । **अणिस इति** । 'अनिशविसृमरनिशितशरविसरविदलितसमरपरिगतप्रवरपरबल—' इति संस्कृतम् । गद्यकाव्यप्रभेदयोः कथाख्यायिकयोर्विशेषमाह—**कथायामिति** । पद्यानां विशेषमाह—**क्वचिदिति** । वक्त्रापवक्त्रके छन्दोविशेषौ । 'पद्यैः' इत्युभयत्र संबध्यते । आख्यायिकामाह— **आख्यायिकेति । कथावदिति** । यथा कथायां पद्यैर्नमस्कारखलवृत्तकीर्तनसरसवस्तुवर्णनास्तथात्रापीत्यर्थः । विशेषमाह—**कवेरि-**

---

1. **आर्यावक्त्रेति** । आर्यावक्त्रापवक्त्राणां मध्ये ॥

---

१. 'आदि' घ.

'अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात्।' इति दण्डाचार्यवचनात्केचित् 'आख्यायिका नायकेनैव निबद्धव्या' इत्याहुः, तदयुक्तम्। आख्यानादयश्च कथाख्यायिकयोरेवान्तर्भावान्न पृथगुक्ताः। यदुक्तं दण्डिनैव—

'अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः।' इति।

एषामुदाहरणम्—पञ्चतन्त्रादि।

अथ गद्यपद्यमयानि—

गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ॥ ३३६ ॥

यथा—देशराजचरितम्।

गद्यपद्यमयी राजस्तुतिर्बिरुदमुच्यते।

यथा—विरुदमणिमाला।

करम्भकं तु भाषाभिर्विविधाभिर्विनिर्मितम् ॥ ३३७ ॥

यथा मम—षोडशभाषामयी प्रशस्तिरत्नावली।

एवमन्येऽपि भेदा उद्देशमात्रप्रसिद्धत्वादुक्तभेदानतिक्रमाच्च न पृथग्लक्षिताः ॥

इति साहित्यदर्पणे दृश्यश्रव्यकाव्यनिरूपणो नाम षष्ठः परिच्छेदः।

ति। अस्यामाख्यायिकायाम्। वृत्तं चरित्रम्। **दण्डाचार्यवचनादिति**। हेतुः 'तदयुक्तम्' इत्यत्रान्वेति। एषामाख्यायिकादीनाम्। गद्यपद्यमयानि श्रव्यकाव्यानीत्यर्थः। भेदाः श्रव्यकाव्यविशेषाः। उद्देशमात्रप्रसिद्धत्वात् नाममात्रेण ख्यातत्वात्। तथा च तेषां संज्ञयैव भिन्नत्वम्, न तु वस्तुत इति भावः ॥

इति श्रीरामचरणतर्कवागीशभट्टाचार्यविरचितायां साहित्यदर्पणविवृतौ षष्ठः प्रकाशः।

---

1. **गद्येति**। काव्यं चात्र समस्तलक्षणाक्रान्तमवधेयम्। लक्षणसंकोचे तु काव्यभेदवदिहाप्युपादेयतातारतम्यं स्यात्। कथाशविच्छेदास्तूच्छ्वाससंज्ञकाः स्तवकसंज्ञका वा भवन्ति ॥

2. **यथेति**। यथा वा नलचम्पवादि ॥

3. **एवमिति**। 'येन केनापि तालेन गद्यपद्यसमन्वितम्। जयेत्युपक्रमं मालिन्यादिप्रासविचित्रितम् ॥ **तदुदाहरणं** नाम्ना विभक्त्यष्टाङ्कसंयुतम्। संबोधनविभक्त्या यत्प्रचुरं पद्यपूर्वकम् ॥ विमुक्तपुनराकृष्टशब्दः स्या**च्चक्रवालकम्**। आद्यन्तपद्यसंयुक्ता संस्कृतप्राकृतात्मिका ॥ अष्टभिर्वा चतुर्भिर्वा वाक्यैः स्कन्धसमन्विता। प्रतिस्कन्धं भिन्नवाक्यरीतिर्देव-

नृपोचिता ॥ सर्वतो देवशब्दादिरेषा **भोगावली** मता । वर्ण्यनामाङ्कविरुदवर्णनप्रचुरोज्ज्वला ॥ वाक्याडम्बरसंयुक्ता कथिता **बिरुदावली** । ताराणां संख्यया पद्यैर्युक्ता **तारावली** मता ॥ विश्वेषां संख्यया पद्यैर्युक्ता **विश्वावली** मता । रत्नानां संख्यया पद्यैर्युक्ता **रत्नावली** मता ॥ पद्यैश्च पञ्चभिर्युक्ता प्रोक्ता **पञ्चाननावली** ॥' इत्यादयः कविकर्मभेदास्तत्र तत्रोपलभ्यन्ते। ते नातिचमत्काराधायकत्वाद् ग्रन्थकृतोपेक्षिताः। प्रायेण कविकर्मणो द्विविधः परिपाको भवति । तथा चोक्तम्—'अर्थगम्भीरिमा पाकः स द्वेधा कविसंमतः । द्राक्षापाको नारिकेलपाकश्च प्रस्फुटान्तरौ ॥ द्राक्षापाकः स कथितो बहिरन्तःस्फुरद्रसः । स नारिकेलपाकः स्यादन्तर्गूढरसोदयः ॥' इति ॥

सप्तमः परिच्छेदः ।

इह हि[1] प्रथमतः काव्ये दोषगुणरीत्यलंकाराणामवस्थितिक्रमो दर्शितः । संप्रति के त इत्यपेक्षायामुद्देशक्रमप्राप्तानां दोषाणां स्वरूपमाह—

रसापकर्षका दोषाः[1]

अस्यार्थः प्रागेव स्फुटीकृतः ।

काव्यं निरूप्य तदीयदोषादीन्निरूपयंस्तस्य प्रकृतत्वं दोषनिरूपणस्य प्राथमिकत्वं चोपपादयति—**इह हीति** । प्रथमतो दोषादिनिरूपणात्प्राक् काव्ये काव्यलक्षणे रीतेश्छन्दोनुरोधेन पश्चान्निर्देशेऽपि वक्ष्यमाणयुक्त्या अलंकारनिरूपणात्प्रागेव तां निरूपयिष्यतीति तस्या अलंकारात्प्रागिह निर्देशः । ते दोषादयः । 'हेयहानिपूर्वकमुपादेयोपादानमिति सूचयितुं दोषनिरूपणस्य प्राथमिकत्वम्' इत्यपरे । दोषाणां सामान्यलक्षणमाह-**रसापकर्षका इति** । अत्रोक्तयुक्त्या रसपदेन विभावादयोऽप्युच्यन्ते । तदपकर्षकस्यापि दोषत्वेनोदाहरिष्यमाणत्वात् । दूषयति काव्यमिति दोषपदेन दुःश्रवत्वादिरुच्यते । भावसाधनेन तु काव्यापकर्ष एव । काव्यापकर्षश्च त्रिधा—रसादिप्रतीतिप्रतिबन्धः रसादिप्रकर्षप्रतीतिप्रतिबन्धः, रसादिप्रतीतिविलम्बनं च । तच्च दोषविशेषोदाहरणेष्ववधेयम् । नन्वेतल्लक्षणं श्रुतिदुष्टापुष्टार्थत्वादावव्याप्तं तस्य शब्दार्थदोषत्वेन रसापकर्षकत्वाभावादत आह—**अस्यार्थ इति** । प्रागेव प्रथम-

---

1. **दोषा इति** । अत्रेदं तत्त्वम्—उद्देश्यप्रतीतिविघातलक्षणो दोष इति तत्सामान्यलक्षणम् । उद्देश्या च प्रतीती रसवत्यविलम्बितानपकृष्टरसविषया च नीरसे त्वविलम्बिता चमत्कारिणी चार्थविषया । तथा च तादृशप्रतीतिविघातकत्वं सर्वेषामविशिष्टम् । यतो दुष्टेषु क्वचिद्रसस्याप्रतीतिरेव, क्वचिच्च्यमानस्यापकर्षः, क्वचित्तु विलम्बः । एवं नीरसे क्वचिदर्थस्य मुख्यभूतस्याप्रतीतिरेव, क्वचिद्विलम्बेन प्रतीतिः, क्वचिदचमत्कारित्वमित्युद्देश्यप्रतीत्यनुत्पादो व्यक्त एव । तद्विघातकता च कस्यचित्साक्षात् । यथा—रसदोषाणाम् । कस्यचित्परम्परया । यथा—शब्दार्थदोषाणाम् । तेष्वपि कस्यचिदर्थोपस्थितेरभावात् । यथा—असमर्थत्वादेः । कस्यचिद्विलम्बात् । यथा—निहतार्थत्वादेः । कस्यचिद्वाक्यार्थबोधाभावात् । यथा—च्युतसंस्कारत्वादेः । कस्यचित्तत्र विलम्बात् । यथा—क्लिष्टत्वादेः । कस्यचित्सहृदयवैमुख्यव्यग्यप्रताद्यापादनेन । यथा—निरर्थकत्वादेः । कस्यचिद्विरोध्युपस्थापनेन विपरीतोपस्थापनेन वा । यथा—विरुद्धमतिकारित्वादेरित्याद्यूहनीयम् । विघातकत्वं च कस्यचित् ज्ञातस्य । यथा—व्याहतत्वादेः । कस्यचित्स्वरूपमत एव । यथा—निहतार्थत्वादेः । स चायं द्विविधः—नित्योऽनित्यश्च । तत्रानुकरणादन्येन प्रकारेण समाधातुमशक्यो नित्यः । यथा—च्युतसंस्कारत्वादिः । अन्यादृशस्त्वनित्यः । यथा—अप्रयुक्तत्वादिः । यद्वा सर्वदैव हेयो नित्यः । यथा—च्युतसंस्कारत्वादिः । तदन्योऽनित्यः । यथा—शृङ्गारादौ हेयमपि दुःश्रवत्वं रौद्रादावुपादेयमेव ॥

---

१. 'हि' घ-पुस्तके नास्ति.

तद्विशेषानाह—

ते पुनः पञ्चधा मताः ।
पदे तदंशे वाक्येऽर्थे संभवन्ति रसेऽपि यत् ॥ १ ॥

[1]स्पष्टम् ।

तत्र

दुःश्रवत्रिविधाश्लीलानुचितार्थाप्रयुक्तताः ।
ग्राम्याप्रतीतसंदिग्धनेयार्थनिहतार्थताः ॥ २ ॥
अवाचकत्वं क्लिष्टत्वं विरुद्धमतिकारिता ।
अविमृष्टविधेयांशभावश्च पदवाक्ययोः ॥ ३ ॥
दोषाः, केचिद्भवन्त्येषु पदांशेऽपि, पदे परे ।
निरार्थकासमर्थत्वे च्युतसंस्कारता तथा ॥ ४ ॥

परुषवर्णतया श्रुतिदुःखावहत्वं **दुःश्रवत्वम्** ।

यथा—

'कार्तार्थ्यं यातु तन्वङ्गी कदानङ्गवशंवदा ।'

[1]अश्लीलत्वं व्रीडाजुगुप्सामङ्गलव्यञ्जकत्वात्त्रिविधम् ।

परिच्छेद एव । श्रुतिदुष्टत्वादेः । शब्दार्थापकर्षकद्वारेण रसापकर्षत्वमिति नाव्याप्तिरिति भावः । तद्विशेषान् दोषविभागान् । ते दोषाः । तदंशे पदांशे । दोषविशेषान्निर्दिशति—**दुःश्रव इति** । अयं भावप्रधानो निर्देशः । दुःश्रवत्रिविधाश्लीलेति समस्तपाठे भावप्रत्ययस्य सर्वत्रान्वयः । एषूक्तदोषेषु । उद्देशक्रमेण दुःश्रवत्वादिलक्षणं सोदाहरणमाह—**परुषेति** । केषांचित्स्पष्टत्वादुदाहरणस्यैव दर्शनम् । 'श्रुतिपतितमात्रं यद्वैरस्यमावहति तत्पदं सर्वथा न देयमिति प्रथमं तदुपन्यासः' इत्यन्ये । वर्णानां पारुष्यं गुणपरिच्छेदे व्यक्तीभविष्यति । श्रोतृणां श्रोत्रावच्छेदेन दुःखजनकत्वं श्रुतिदुःखावहम् । श्रुतिपतितं सद्दुःखावहं श्रुतिदुःखावहम्, तत्वं वा । **कार्तार्थ्यमिति** । अत्र तथयो रेफयोर्योगेन पारुष्यम् । तत्प्रयुक्तं पदस्य दुःश्रवत्वं स्वाश्रयपदसंबन्धित्वेन प्रत्यासन्नस्य शृङ्गाररसस्य प्रकर्षप्रतीतिं प्रतिबध्नाति । इदमेव 'श्रुतिकटु' इत्यभिधीयते । नन्वेतत्पदांशपारुष्यमेव न तु पदपारुष्यमिति चेत्, न । वाक्यघटकद्वित्रादिपदपारुष्यप्रयुक्तवाक्यदुःश्रवत्वत्पदघटकद्वित्रादिवर्णपारुष्यप्रयुक्तपददुःश्रवत्वस्य स्वीकारात् । [5]असभ्यार्थान्तरव्यञ्जकमश्लीलं तस्य भावस्तथा । पदांशाश्लीलत्वं

---

1. **अश्लीलत्वमिति** । श्रियं सहृदयवशीकरणसंपत्तिं लातीति । 'आतोऽनुपसर्गे—' इति कः । तद्भिन्नम् । कपिलादित्वाल्लत्वम् ॥

---

१. 'स्पष्टम्' घ-पुस्तके नास्ति. २. 'ग्राम्यः' क. ३. 'परम्' क-ख-ग-घ. ४: 'विधा' घ. ५. 'असत्य' इति पुस्तकान्तरे. 'व्याजक' इति नास्ति पुस्तकान्तरे.

क्रमेणोदाहरणम्—

'दृप्तारिविजये राजन्साधनं सुमहत्तव ।'

'प्रससार शनैर्वायुर्विनाशे तन्वि ते तदा ।'

[1]अत्र साधन-वायु-विनाशशब्दा अश्लीलाः ।

'शूरा अमरतां यान्ति पशुभूता रणाध्वरे ।

अत्र [2]पशुपदं कातर्यमभिव्यनक्तीत्यनुचितार्थत्वम् ।

अप्रयुक्तत्वं तथाप्रसिद्धावपि कविभिरनादृतत्वम् । यथा—

'भाति पद्मः सरोवरे ।'

अत्र [3]पद्मशब्दः पुंलिङ्गः ।

तु असभ्यस्मृतिहेतुत्वमेव । जुगुप्सा घृणा । अमङ्गलममङ्गलाशङ्का । व्यञ्जकत्वमिह जनकत्वमेव । **अत्रेति** । सैन्ये प्रयुक्तः साधनशब्दो मेढ्रव्यञ्जकतया श्रोतुर्लज्जाजननेन राजविषयरतिभावस्य, समीरणे प्रयुक्तो वायुशब्दः पायुवायुव्यञ्जकतया श्रोतुर्जुगुप्साजननेन, अदर्शने प्रयुक्तो विनाशशब्दश्च मृत्युव्यञ्जकतया अमङ्गलाशङ्काजननेन शृङ्गारस्य प्रकर्षप्रतिबन्धकः । अनुचितार्थत्वं क्वचिद्वाच्यार्थदोषप्रतिपादकत्वेन, क्वचिदर्थासंभवेन, क्वचिदसत्समर्थकत्वेन । तत्राद्यमाह—**शूरा इति** । पशुभूताश्छेद्यस्वरूपाः । अत्र वाच्यार्थस्य शूरस्य कातर्यं दोषः । तस्य व्यञ्जकत्वात्पशुपदस्यानुचितार्थत्वम् । द्वितीयं यथा—'प्रज्वलज्जलधारावन्निपतन्ति शरास्तव ।' अत्र प्रज्वलदिति पदमनुचितार्थम् । तृतीयं यथा दिवाकरादरक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् । क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसामतीव ॥' अत्रासद्भूतस्यान्धकारभयस्य समर्थकं द्वितीयार्थमनुचितार्थम् । एवमन्यदपि ज्ञेयम् । तथाप्रसिद्धावपि तेन रूपेण प्रसिद्धिसत्त्वेऽपि । **पुंलिङ्ग इति** । 'अप्रयुक्तः' इति शेषः । हालिकसाधारण-

---

1. **अत्रेति** । अश्लीलार्थोपस्थित्या श्रोतुर्वैमुख्यमिह दूषकताबीजम् । येषां पुनः शिवलिङ्ग-सुभगा-भगिनी-ब्रह्माण्डादिशब्दानां विवक्षितार्थस्य प्रसिद्धतयाश्लीलार्थो नोपतिष्ठते न तेषु दुष्टत्वमित्यतिरोहितं विदाम् ॥

2. **पशुपदमिति** । अत्र शौर्ये प्रतिपाद्ये पदान्तरानपेक्षमेव पशुपदं कातर्यमभिव्यनक्ति, पशुपदार्थे कातर्यस्य दर्शनात् । विरुद्धमतिकृत्तु पदान्तरसापेक्षं तथेति तस्माद्भेदः ॥

3. **पद्मेति** । 'वा पुंसि पद्मम्' इत्यनेनाम्नातोपि पुंलिङ्गः पद्मशब्दः कविभिर्न क्वापि प्रयुक्तः । अत्र दूषकताबीजं तु तादृशकविसमयलङ्घनप्रयोजनानुसंधानव्यग्रतया मुख्यार्थविच्छित्तिः । यमकादिप्रयोजनसत्त्वे तु नायं दोषः, अन्यत्राप्रयुज्यमानस्यापि तदर्थं कविभिः प्रयोगस्य दर्शनेन व्यग्रताभावादिति ॥

ग्राम्यत्वं यथा—

'कटिस्ते हरते मनः ।'

अत्र [1]कटिशब्दो ग्राम्यः ।

अप्रतीतत्वमेकदेशमात्रप्रसिद्धत्वम् । यथा—

'योगेन दलिताशयः ।'

अत्र योग[2]शास्त्र एव वासनार्थ आशयशब्दः ।

'आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु ।'

अत्र [3]वन्द्यामिति किं बन्दीभूतायामुत वन्दनीयायामिति **संदेहः** । **[4]नेयार्थत्वं** रूढिप्रयोजनाभावादशक्तिकृतं लक्ष्यार्थप्रकाशनम् ।

प्रसिद्धार्थकशब्दो ग्राम्यः । **कटिरिति** । अत्र शृङ्गारस्य गूढत्वकृतचारुत्वाभावात्प्रकर्षप्रतीतिप्रतिरोधः । योगेन प्रकृतिपुरुषयोरभेदचिन्तनेन दलितः खण्डित आशयो वासना यस्य सः । आशयशब्दोऽप्रतीत इति शेषः । अत्र योगशास्त्राननुशीलिनामाशयपदार्थानभिज्ञानां योगिविषयभावबोधविलम्बकरत्वमप्रतीतत्वम् । प्रकरणाद्यभावेन श्लेषादिनार्थजनकः शब्दः संदिग्धः । **आशीरिति** । कर्णे कृत्वा श्रुत्वा । **अत्रेति** । वन्द्यामिति पदस्य संदिग्धत्वं शाब्दबोधविलम्बेन राजविषयरतिभावबोधस्य विलम्बकृत् । अशक्तिकृतं कवेरसामर्थ्यप्रयुक्तम् । असामर्थ्यमत्राव्युत्पत्तिः ।

---

1. **कटीति** । अत्रेदं तत्त्वम्—श्रोणीनितम्बादिकमेव विदग्धैः प्रयुज्यते, कटिपदं त्वविदग्धमात्रप्रयोज्यमिति ग्राम्यम् । पदं त्रिविधम्—ग्राम्यं नागरमुपनागरं च । विदग्धमात्रप्रसिद्धं नागरम्, ग्राम्यकक्षातिक्रान्तमप्राप्तनागरभावमुपनागरम्, नागरोपनागरे विहाय ग्राम्यशब्दप्रयोगाद्वक्तुरवैदग्ध्योन्नयनेनात्र दौष्टयम् । अत एव विदूषकादावधमे वक्तरि न दोषत्वम्, तस्य तथैवौचित्येन वैरस्याभावात् ॥

2. **योगशास्त्र इति** । 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' इति पातञ्जलसूत्रे वासनार्थक आशयशब्दः प्रयुक्तः । वासना चात्र संसारनिदानं मिथ्याज्ञानजन्यः संस्कारविशेषः दूषकताबीजं तु तच्छास्त्रानभिज्ञस्य तादृशार्थानुपस्थितिः । अत एव यत्र तच्छास्त्राभिज्ञ एव प्रतिपाद्यः स्वयमेव वा परामर्शस्तत्र न दोषत्वम् ॥

3. **वन्द्यामिति** । संदेहो वक्तृतात्पर्यसंशयः ववयोरभेदबुद्धिमूलकः । वन्द्यामित्यानुपूर्व्या उभयसाधारणतया विनिगमनाभावादर्थद्वयस्मरणे वक्तृतात्पर्यसंदेहः । दूषकताबीजमुद्देश्यनिश्चयाभावः अतो यत्र संदेह एवोद्देश्यस्तत्र यत्र च वाच्यादिमहिम्ना प्रकरणादिवशेन वा निश्चयस्तत्र चादोषत्वमिति गोविन्दठक्कुराः ॥

4. **नेयार्थत्वमिति** । नेयो न्यायराहित्येन स्वेच्छया कल्पनीयोऽर्थो यस्य तत्त्वम् । 'नि रूढा लक्षणाः काश्चित्सामर्थ्यादभिधानवत् । क्रियन्ते सांप्रतं काश्चित्काश्चित्रैव स्वशक्तितः ॥' इति भाट्टनयेन रूढिप्रयोजनाभ्यां विना प्रतिषिद्धा या लक्षणा तद्विषयत्वमित्यर्थः ॥

यथा—

'कमले चरणाघातं मुखं सुमुखि तेऽकरोत् ।'

अत्र चरणाघातेन निर्जितत्वं लक्ष्यम् ।

निहतार्थत्व[1]मुभयार्थस्य शब्दस्याप्रसिद्धेऽर्थे प्रयोगः । यथा—

'यमुनाशम्बरमम्बरं व्यतानीत् ।'

शम्बरशब्दो दैत्ये प्रसिद्धः । इह तु जले निहतार्थः ।

'गीतेषु कर्णमादत्ते'

अत्राङ्-पूर्वो दाञ्-धातुर्दानार्थेऽवाचकः ।

यथा वा—

'दिनं मे त्वयि संप्राप्ते ध्वान्तच्छन्नापि यामिनी ।'

अत्र दिनमिति प्रकाशमयार्थेऽवाचकम् ।

चरणाघातेन चरणाघातपदेन निर्जितत्वं पराभवः । मुखस्य चरणासंभवात्तदाघातस्याप्यसंभव इत्यन्वयानुपपत्तिः । स्वजन्यचरणाघातपराभवः स्वजन्यवृत्तिपराभवत्ववत्वं मुख्यलक्ष्ययोः संबन्धः । अत्र रूढिप्रयोजनव्यतिरेकनिश्चयेन कवेरशक्तिनिश्चयः ततो लक्ष्योपस्थितिः ततः शाब्दबोध इति तद्विलम्बेनैव रसबोधविलम्बनमत्र दूषकताबीजम् । केचित्तु—'निर्जितत्वातिशयस्य प्रयोजनस्यैवोपस्थितेरत्र कथं नेयार्थम्' इति चेत्, न । रूढिप्रयोजनभावपदस्य मुख्यार्थग्रहाभावोपलक्षणपरतया प्रकृते तत एव नेयार्थत्वाभ्युपगमात् । केचित्तु—'पद्मनिर्जितत्वं हि शोभयैव जनितं न तु चरणाघातेनेति तयोर्जन्यजनकभावसंबन्धाभावः' इत्याहुः, तन्न । अत्र हि लक्षणाजन्यबोधानन्तरं सादृश्यप्रतीतिरेवानुभवसिद्धा, न तु निर्जितत्वातिशयप्रतीतिः । तात्पर्याभावात्, मुख्यलक्ष्ययोरुपदर्शितसंबन्धसंभवाच्च । न चात्र सादृश्यप्रतीतिरेव प्रयोजनमिति वाच्यम् । वक्त्रादिवैशिष्ट्यसचिवयार्थव्यञ्जनयैव तस्य जननात् । लक्षणाप्रयोजनस्य तु लक्षणामूलव्यञ्जनाजन्यत्वनियमात्, सादृश्यस्य च लक्ष्यार्थतद्वृत्तिधर्मान्यतरसंबन्धत्वाभावात्, प्रयोजनस्य तदन्यतरवृत्तित्वनियमात् । उभयार्थस्य प्रसिद्धाप्रसिद्धोभयवाचिनः यमुनाशम्बरं यमुनाजलं व्यतानीद् व्याप्तवत् । दैत्ये दैत्यविशेषे । अत्र विलम्बेन पदार्थोपस्थापकत्वं यमुनाविषयरतिभावबोधविलम्बकृत् । **आङ्पूर्व इति** । न च 'दा' धातोर्दानेऽभिधासत्त्वेन कथमवाचकत्वमिति वाच्यम् । धात्वर्थबाधकोपसर्गरहित 'दा' धातोरेव दानेऽभिधाकल्पनात् । एतदङ्गीकारे तूदाहरणान्तरमाह—**यथा वेति** । **दिनमिति** । दिनपदस्य सूर्यावच्छिन्नयामचतुष्टये-

---

1. **निहतार्थत्वमिति** । निहतः प्रसिद्धेनाविवक्षितेनार्थेनाप्रसिद्धतया व्यवहितो विवक्षितोऽर्थो यस्य तत्त्वम् । अविवक्षितप्रसिद्धार्थप्रत्ययव्यवधानेन विवक्षिताप्रसिद्धार्थबोधकत्वमिति भावः ॥

---

१. 'अत्र' घ-पुस्तके नास्ति.

क्लिष्टत्वमर्थप्रतीतेर्व्यवहितत्वम् । यथा—

'क्षीरोदजावसतिजन्मभुवः प्रसन्नाः ।'

अत्र क्षीरोदजा लक्ष्मीस्तस्या वसतिः पद्मं तस्य जन्मभुवो जलानि ।

'भूतयेऽस्तु भवानीशः'

अत्र भवानीशशब्दो भवान्याः पत्यन्तरप्रतीतिकारित्वाद्विरुद्धमतिकृत् अविमृष्टविधेयांशत्वं यथा—

'स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ।'

ऽभिधा । अत्र शृङ्गारप्रतीतिविलम्बनं दूषकतावीजम् । रूढ्यादिसत्त्वे लाक्षणिकपदप्रयोगेऽवाचकत्वं तदसत्त्वे नेयार्थत्वमिति भेदः । निरूढलक्षणादौ शाब्दबोधविलम्बाभावान्न रसादिबोधविलम्बनमिति नास्यावसर इत्यवधेयम् । 'हा धिक् सा किल तामसी शशिमुखी दृष्टा मया यत्र सा तद्विच्छेदरुजान्धकारितमिदं दग्धं दिनं कल्पितम् ।' इत्यादौ प्रकाशमये दिनपदप्रयोगदर्शनाद्रूढिः प्रकाशातिशयप्रतीतिप्रयोजनं वा । एवमन्यत्रापि बोध्यम् । केचित्तु—'भ्रमोन्नायकसत्त्वेऽवाचकत्वं तदसत्त्वे नेयार्थत्वम्' इति वदन्ति, तन्न । दिनमित्यादौ दिनपदस्य प्रकाशमयेऽर्थे अभिधाभ्रमजनकाभावाद्, 'वचोबाणत्वमागता' इत्यादिवक्ष्यमाणनेयार्थोदाहरणे भ्रमोन्नायकसत्त्वेऽप्यवाचकत्वानङ्गीकाराच्च । अर्थप्रतीतेः पदार्थोपस्थितेर्व्यवहितत्वं व्यवधानेन जनकत्वम् । पदक्लिष्टत्वस्य समासगतत्वेनैव दोषत्वं वक्ष्यते । समासेऽन्वितान्वयलभ्यानतिप्रसक्तविशेष्यतावच्छेदककल्पनेन विलम्बो हि व्यवधानम् । वाक्यक्लिष्टत्वस्थले त्वासत्तिकल्पनेन विलम्बः । **क्षीरोदजेति** । अत्रान्वितान्वयलभ्यानां क्षीरोदजात्व-क्षीरोदजावसतित्व-क्षीरोदजावसतिजन्मस्थानत्वानां व्याप्यानि लक्ष्मीत्व-पद्मत्व-जलत्वानि प्रकृतोपयोगित्वप्रतिसंधानेन कल्पनीयानि, ततः शाब्दबोध इति रसादिबोधविलम्बनमत्र दूषकतावीजम् । **भूतय इति** । भवस्य पत्नी भवानी तस्या ईशः पतिः । अत्र देवविषयकरतिभावप्रकर्षबोधप्रतिरोधः । **अविमृष्टेति** ।

---

1. **अर्थेति** । अर्थस्य विवक्षितस्यान्वितविशेषस्य या प्रतीतिः प्रतिपत्तिस्तस्या व्यवहितत्वं विलम्बितत्वम् । निहतार्थत्वादौ तु शक्यतावच्छेदकरूपेण प्रकृतपदार्थोपस्थितिरेव व्यवहितेति ततो भेदः ॥

2. **भवानीशेति** । अत्र भवस्य पत्नीत्वर्थे 'पुंयोगात्—' इत्यादिना व्युत्पादितो भवानीशब्द इति भवानीशशब्दो देवदत्तपत्न्याः पतिरितिवद् भवान्याः पत्यन्तरे प्रतीतिमुत्पादयतीति । केचित्तु भवानीशब्देनापर्णात्वप्रकारक एव बोधः, अन्यथा भवानीशब्देन 'अपर्णा पार्वती दुर्गा—' इत्यादीनां पर्यायत्वं न स्यात् । योगस्तु पङ्कजादिशब्दवत्साधुत्वार्थः । एवं च भवानीशब्दोऽपर्णात्वविशिष्टे रूढ इति नात्र दोष इत्याहुः ॥

---

१. 'यथा' घ-पुस्तके नास्ति. २. 'विरुद्धमवगमयति' घ. ३. 'अवि—' इत्यादि 'यथा' इत्यन्तं क-घ-पुस्तकयोर्नास्ति.

अत्र [1]वृथात्वं विधेयम्, तच्च समासे गुणीभावादनुवाद्यत्वप्रतीतिकृत्। यथा वा—

'रक्षांस्यपि पुरः स्थातुमलं रामानुजस्य मे।'

अत्र रामस्येति [2]वाच्यम्। यथा वा—

'आसमुद्रक्षितीशानाम्'

अत्रासमुद्रमिति वाच्यम्। यथा वा—

'यत्र ते पतति सुभ्रु कटाक्षः षष्ठबाण इव पञ्चशरस्य।'

अत्र षष्ठ इवेत्युत्प्रेक्ष्यम्। यथा वा—

'अमुक्ता भवता नाथ मुहूर्तमपि सा पुरा।'

[3]अत्रामुक्तेत्यत्र नञः प्रसज्यप्रतिषेधत्वमिति विधेयत्वमेवोचितम्। यदाहुः—

'अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्॥'

अविमृष्टः प्राधान्येनानिर्दिष्टो विधेयांशो यत्र तत्त्वम्। पदार्थानां मध्ये विधेयांशस्योपादेयत्वेन प्राधान्यम्। तस्य च प्राधान्येन निर्देश एवोचितः। तद्विपर्ययश्च क्वचित्समासेन क्वचिदुद्देश्यविधेयपदयोः पौर्वापर्यविपर्ययेण। तत्राद्ये पददोषत्वं द्वितीये वाक्यदोषता। अनुवाद्यत्वमुद्देश्यत्वम्। अलं समर्थानि। अत्र काकुस्वरवशादसमर्थत्वं व्यज्यते। राक्षसविनाशे रामसंबन्धित्वस्यैवोपयोगित्वमिति तस्यैवोपादेयत्वमिति भावः। **आसमुद्रेति**। रघुवंशाधिकारस्य समुद्रपर्यन्तत्वमुपादेयम्। उत्प्रेक्ष्यमुत्प्रेक्षितुं योग्यम्। नञ्समासगतमविमृष्टविधेयांशत्वमाह—**अमुक्तेति**। **प्रसज्यप्रतिषेधत्वमिति**। विधेरप्रधानत्वादिति भावः। **विधेयत्वमिति**। 'तदर्थस्य' इति शेषः। **अप्राधान्यमिति**। यत्र वाक्ये विधेः पदार्थान्तरस्य अप्राधान्यमुद्देश्य-

---

1. **वृथात्वमिति**। अयमाशयः—'अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्' इत्यभियुक्तोक्त्या 'उद्देश्यविधेयताशालिबोधे विधेयवाचकप्राग्वर्त्युद्देश्यवाचकपदजन्योपस्थितिः कारणमित्यभिप्रायवत्यानुवाद्यविधेययोः पौर्वापर्यभावस्य नियमितत्वात्प्रकृते उच्छ्रूनत्वमात्रस्यानुवादो योग्यः, न तु वृथात्वविशेषितस्य। एवं च वृथात्वं (समासे गुणीभूतं) विधेयत्वेन विवक्षितं न प्रतीयत इत्यर्थः। किंचोद्देश्यं विधेयं च यदि पृथक्पदाभ्यामुपतिष्ठते तदा प्राप्तमुद्दिश्याप्राप्तं विधीयते 'पर्वतो वह्निमान्' इतिवत्, न तु समासे। अन्यथा वह्निमत्पर्वत इत्यभिधानापत्तेः॥

2. **वाच्यमिति**। वक्तुं योग्यम्॥

3. **अत्रेति**। 'अमुक्ता' इत्यत्र नञः प्रसज्यप्रतिषेधार्थकतया 'न मुक्ता' इत्यसमस्तेन नञा निषेधो विधेयः, न तु समस्तेन॥

यथा—

'नवजलधरः संनद्धोऽयं न दृप्तनिशाचरः ।'

उक्तोदाहरणे तु[1] तत्पुरुषसमासे गुणीभावे नञः पर्युदासतया निषेधस्य विधेयतयानवगमः यदाहुः—

तया अमुख्यत्वम्, प्रतिषेधे नञर्थे प्रधानता विधेयतया मुख्यत्वम् । यत्र यदर्थे क्रियया समभिव्याहृतपदार्थतावच्छेदकेन सह संबन्धस्तत्र वाक्ये असौ नञ् । प्रसज्यप्रतिषेध इत्यर्थः । उदाहरति—**यथेति । नवजलधर इति ।** गन्धर्वेणोर्वश्यां हृतायां पुरूरवसस्तद्विरहे नवजलधरादौ निशाचरत्वादिप्रतीतिवर्णनमिदम् । अयं संनद्धो न नवजलधरः, दृप्तनिशाचर इति । अयं नवजलधरत्वाभाववानित्यर्थः। अत्रेदंपदार्थस्य उद्देश्यत्वम्, नञर्थस्याभावस्य विधेयत्वम्, समभिव्याहृतपदार्थतावच्छेदकेन सह नञर्थस्य संबन्धः । न च विधेर्भावपदार्थस्येति व्याख्येयम् । अभावो न जातिमानित्याद्यसंग्रहापत्तेः । **क्रियेति ।** यथाश्रुतार्थविवक्षणे तु 'अयं न पाकवान्' इत्याद्यसंग्रहेऽप्युक्तोदाहरणाद्यसंग्रहप्रसङ्गः । न च नञर्थस्य क्रियान्वयित्वाभावेनोक्तोदाहरणादौ नञः प्रसज्यप्रतिषेधत्वमेव नास्तीति वाच्यम् । तत्र विधेर्विधेयत्वाभावेन पर्युदासत्वासंभवात्तृतीयप्रकारानभिधानाच्च प्रसज्यप्रतिषेधत्वस्यैवावश्यं वाच्यत्वात् । अत एवाव्ययीभावसमासप्रकरणे गोपीचन्द्रेणोक्तम्—'धर्माभावे प्रसज्यप्रतिषेधो माभूत्', 'ब्राह्मणोऽयं न भवति', 'ब्राह्मणत्वं धर्मोऽत्र निषिध्यते' इति । 'मुनिरधनः' इत्यादौ समासलुप्तविद्यमानादिपदार्थैकदेशे नञर्थस्य संबन्धः । वस्तुतस्तु 'घटो गेहे न चत्वरे', 'धनं चैत्रस्य न मैत्रस्य' इत्यादौ विभक्त्यर्थेन सह नञर्थस्यान्वयेऽपि प्रसज्यप्रतिषेधत्वं वाच्यम् । नञर्थस्य विधेयत्वेनैव तत्स्वीकारात्क्रियान्वयित्वस्यानियतत्वाच्च । एकं च 'घटो न पटः' इत्यादावुत्तरपदार्थेन पटादिना नञर्थस्य भेदस्य संबन्धसत्त्वेऽपि विधेयतामात्रेण प्रसज्यप्रतिषेधत्वम् । न चात्र पटत्वाभाव एव विधेयः, न तु पटभेद इति वाच्यम् । पटभेदस्यापि विधेयत्वेन नञर्थस्य विधेयत्वेनैव तत्स्वीकारात्क्रियान्वयित्वस्यानियत्वाच्च बाधकाभावात् । न च भेदबोधकस्य नञो नित्यसमासविधानमेव बाधकमिति वाच्यम् । यजतिषु 'ये यजामहं करोति (करोति) नानुयाजेषु' इत्यादौ व्यभिचारदर्शनात्कालापानां नित्यसमासविधानस्यायुक्तत्वात् । नित्यसमासवादिमतेऽपि 'अयमब्राह्मणः' इत्यादौ ब्राह्मणभेदस्य विधेयत्वमवश्यं वाच्यम् । न चात्रापि ब्राह्मणत्वाभाववानित्येवार्थ इति वाच्यम् । समस्यमानपदार्थयोरन्वयाभावे तत्पुरुषानङ्गीकारात् । नन्वेवं प्रकृते किमनुपपन्नमित्यत आह—**उक्तोदाहरणे त्विति ।** अमुकेत्यादावित्यर्थः । पर्युदासतया पर्युदासवदनुवाद्यत्वप्रतीतिकारितया । अनवगमो विधेयताया न स्पष्टावगमः । यथाश्रुतार्थत्वेऽत्र नञः प्रसज्यप्रतिषेधत्वमिति प्रागुक्तेन सह विरोधः स्यात् । विधेर्विधेयत्वाभावे पर्युदासासंगतिश्च स्यात् । पर्युदासस्यानुवाद्यत्वमुपपादयति—**यदाहु-**

---

१. 'तु' ध-पुस्तके नास्ति.

'प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो, यत्रोत्तरपदेन नञ् ॥'

तेन

'जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत् ॥'

अत्रात्रस्तताद्यनूद्यात्मगोपनाद्येव विधेयमिति नञः पर्युदासतया गुणीभावो युक्तः ।

ननु '[1]अश्राद्धभोजी ब्राह्मणः' '[2]असूर्यंपश्या राजदाराः' इत्यादिवत् 'अमुक्ता' इत्यत्रापि प्रसज्यप्रतिषेधो भवतीति चेत्, न । अत्रापि यदि भोजनादिरूपक्रियांशेन नञः संबन्धः स्यात्तदैव तत्र प्रसज्यप्रतिषेधत्वं वक्तुं शक्यम् । न च तथा । विशेष्यतया प्रधानेन तद्भोज्यार्थेन कर्त्रंशेनैव नञः संबन्धात् । यदाहुः—

'श्राद्धभोजनशीलो हि यतः कर्ता प्रतीयते ।
न तद्भोजनमात्रं तु कर्तरी[3]नेर्विधानतः ॥' इति ।

रिति । यत्र वाक्ये विधेः पदार्थान्तरस्य प्रधानत्वं विधेयतया मुख्यत्वं प्रतिषेधे नञर्थेऽप्रधानता उद्देश्यतावच्छेदकतया अमुख्यत्वम् । यत्र यदर्थे उत्तरपदेन उत्तरपदार्थेन सह संबन्धस्तत्र वाक्ये स नञः पर्युदासो विज्ञेय इत्यर्थः । 'रात्रौ श्राद्धं न कुर्वीत' इत्यादौ न रात्राविति योजनया रात्रावित्यस्योत्तरपदत्वमुपपन्नम् । उदाहरति—**तेनेति** । जुगोप पालयामास । अगृध्नुस्तृष्णाशून्यः । स दिलीपः । असक्तोऽनासक्तः । अत्रस्तताद्यत्रस्तभिन्नत्वादि । अनूद्य उद्देश्यतावच्छेदकीकृत्य । तत्पुरुषसमासेनात्यन्ताभावानभिधानात् । त्रस्तत्वाभावादेत्र नोद्देश्यतावच्छेदकत्वमित्यवगन्तव्यम् । एवं च नञः प्रसज्यप्रतिषेधत्वं पर्युदासत्वं च विधेयोद्देश्यभावविवक्षाधीनम्, नतु नियतम् । गुणभावो गौणार्थप्रतिपादकत्वम् । **नन्वश्राद्धभोजीति** । समस्तेनापि नञा भोजनाद्यभावविधेयत्वस्य स्पष्टावगमे कथमविमृष्टविधेयांशत्वमिति भावः । तद्भोज्यार्थेन श्राद्धभोज्यादिरूपार्थेन । **कर्त्रंशेनैवेति** । भोजनार्थांशेन तत्संबन्धस्वीकारे णिन्याद्यर्थस्य कर्तुरनन्वयापत्तेः, कृदुपस्थापितस्य कर्तुर्धात्वर्थेनैवान्वयस्य व्युत्पत्तिसिद्धत्वात् । अतः श्राद्धभोजिपदात्तद्भोजनमात्रं श्राद्धभोजनमात्रं

---

1. **अश्राद्धेति** । 'न श्राद्धं भुङ्क्ते' इति वाक्यं कृत्वा नञः श्राद्धशब्देनासमर्थसमासं विधायाश्राद्धशब्द उपपदे णिनिः कर्तव्यः । न तु णिन्यन्तेन समासो विधेयः ॥

2. **असूर्यंमिति** । सूर्यं न पश्यन्तीति विग्रहः । आदिपदेनापुनर्गेयाः श्लोका इति ज्ञेयम् ॥

3. **इनेरिति** । णिनिप्रत्ययविधायकं तु 'व्रते' इति सूत्रम् । व्रते गम्यमाने सुबन्त उपपदे धातोर्णिनिः प्रत्ययो भवतीति तद्वृत्तिः ॥

'अमुक्ता' इत्यत्र तु क्रिययैव सह संबन्ध इति दोष एव । एते च क्लिष्टत्वादयः समासगता एव पददोषाः ।

वाक्ये दुःश्रवत्वं यथा—

'स्मरार्त्यन्धः कदा लप्स्ये कार्ताथ्यं विरहे तव ।'
'कृतप्रवृत्तिरन्यार्थे कविर्वान्तं समश्नुते ॥'

अत्र जुगुप्साव्यञ्जिकाश्लीलता ।

'[1]उद्यत्कमललौहित्यैर्वक्त्राभिर्भूषिता तनुः ।'

अत्र कमललौहित्यं पद्मरागः । वक्त्राभिर्वामाभिः । इति नेयार्थता ।

प्रतीयत इत्यनुषङ्गः । **क्रिययैव सह संबन्ध इति** । भवत्कर्तृकमोचनाभावप्रतीतिबोधस्यानुभवसिद्धत्वादिति भावः । दोष एव अविमृष्टविधेयांशत्वमेव । एतन्मते समस्यमानपदार्थैकदेशे नञर्थान्वयेऽपि समासस्वीकारः । यदि पुनः क्तप्रत्ययार्थस्य कर्मणोऽन्वयापत्त्या क्रियया सह नञर्थस्य संबन्धमनङ्गीकृत्य मोचनकर्मणैव संबन्धः स्वीक्रियते, तदा पुनरयमब्राह्मण इत्यादिवदत्रापि मोचनकर्मपदस्यैव विधेयत्वं बोध्यम् । किं तु नञः समस्ततया यस्य न स्पष्टावगम इत्यविमृष्टविधेयांशत्वमित्यवगन्तव्यम् । अत्रापि रसादिप्रतीतिविलम्बनं दूषकतावीजम् । **एते चेति** । आदिपदाद् विरुद्धमतिकारित्वविधेयाविमर्शयोर्ग्रहणम् । विना समासं तेषामसंभवादिति भावः । संप्रति वाक्यदुःश्रवत्वादीनुदाहरति—**वाक्य इति** । **स्मरार्त्यन्ध इति** । अत्रानेकपदस्य परुषवर्णघटितत्वाद्वाक्यदुःश्रवत्वम् । वाक्यगतं व्रीडाव्यञ्जकम**श्लीलत्वं** यथा—'न साधनोन्नतिर्या स्यात्कलत्रारतिदायिनी।' जुगुप्साव्यञ्जकमश्लीलत्वमुदाहरति—**कृतप्रवृत्तिरिति**। अन्यार्थे अन्यकविवर्णितवाक्यार्थे कृतप्रवृत्तिः कृतकाव्यबन्धः । अत्र वान्तप्रवृत्तिशब्दौ जुगुप्साव्यञ्जकौ । अमङ्गलाश्लीलत्वं वाक्यगतं यथा—'पितृवसतिमहं प्रयामि तां सह परिवारजनेन, यत्र मे । भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकम् ॥' अत्र पितृवसतिपावकशब्दौ जनकवेश्मपवित्रकारिवाचकौ श्मशानतद्वह्निरूपामङ्गलव्यञ्जकौ—**अनुचितार्थत्वं** यथा—'कुविन्दस्त्वं तावत्पटयसि गुणग्राममभितो यशो गायन्त्येते दिशि-दिशि च नग्नास्तव विभो । शरज्योत्स्नागौरस्फुटविकटसर्वाङ्गसुभगा तथापि त्वत्कीर्तिर्भ्रमति विगताच्छादनमिह ॥' नग्नाः स्तुतिपाठकाः, पक्षे दिगम्बराः । अत्र कुविन्दादिशब्दोऽर्थान्तरं प्रतिपादयन्स्तुत्यस्य तिरस्कारं व्यनक्तीत्यनुचितार्थत्वम् । **अप्रयुक्तत्वं** यथा—'स रातु वो दुश्श्यवनो भावुकानां परम्पराम् । अनेडमूकताद्यैश्च द्यतु दोषैरसंमतान् ॥' अत्र 'रा' धातुर्दाने, दुश्श्यवन इन्द्रे, भावुकं मङ्गले, अनेडमूको मूकबधिरे, 'दो' धातुः खण्डने प्रसिद्धा अपि कविभिरनादृतत्वादप्रयुक्ताः । 'अनुत्तमं पश्य' इत्यत्रानुत्तमपदस्योत्तमवाचकत्ववदनेडमूकपदस्यात्रैडमूकवाचकत्वम्। **ग्राम्यत्वं**

---

1. **उद्यदिति** । उद्यत्कमललौहित्यैरिति करणे तृतीया ॥

यथा—'ताम्बूलभृतगल्लोऽयं भल्लं जल्पति मानुषः। करोति खादनं पानं सदैव च यथा तथा ॥' गल्लः कपोलः। भल्लं भद्रम्। अत्र गल्लभल्लमानुषखादनपानशब्दा ग्राम्याः। **अप्रतीतत्वं** यथा—'तस्याधिमात्रोपायस्य तीव्रसंवेगिताजुषः। दृढभूमिः प्रियप्राप्तौ यत्नः स फलितः सखे ॥' अधिमात्रनामा क्रियाविशेषः उपायो यस्य। संवेगिता समाधिविशेषः। दृढभूमिर्दृढाभ्यासदायी। प्रियप्राप्तौ तत्त्वज्ञानलाभे। अत्राधिमात्रादयः शब्दा योगशास्त्रमात्रप्रयुक्तत्वादप्रतीताः। **संदिग्धत्वं** यथा—'सुरालयोल्लासकरः प्राप्तपर्यासकम्पनः। मार्गणप्रवणो भास्वद्भूतिरेष विलोक्यताम् ॥' अत्र सुरकम्पनमार्गणभूशब्दाः, किं देवसेनाशरविभूत्यर्थाः, किं वा मदिराकम्पनपर्यटनभस्मार्था इति संदेहः। **नेयार्थत्वमाह—उद्यदिति**। अत्र हि उत्पूर्वस्येण्धातोरुदयगिरिशिखरारोहणं मुख्यार्थस्य पद्मरागे बाधात्तज्जन्यप्रकाशे लक्षणा। अत्र रूढिसत्त्वेऽपि पद्मरागप्रकाशस्योदयाजन्यत्वान्मुख्यार्थयोगाभावान्नेयार्थत्वमवगन्तव्यम्। अन्यदपि नेयार्थत्वमुपपादयति—**अत्रेति**। पद्मरागपदस्य परिवृत्त्यसहत्वात्कमलपदस्य पद्मशब्दे, लौहित्यपदस्य च रागशब्दे, वक्त्रपदस्य वामाशब्दे लक्षणा। लक्षितैः पद्मादिभिः पदैरभिधया पद्मरागवामानामुपस्थितिः। यथा—द्विरेफपदेन बहुव्रीहिलक्षणयोपस्थापितद्रेफद्वययुक्तभ्रमरपदादभिधयैव भृङ्गोपस्थितिरत्र रूढिरस्ति। प्रकृते तु रूढिप्रयोजनाभावान्नेयार्थत्वम्। इयमेव लक्षितलक्षणेत्युच्यते। न च लक्षणाद्वयाभावात् कथमियं लक्षितलक्षणेति वाच्यम्। यत्र लक्षिताच्छब्दादर्थाभिधानं तत्रैव लक्षितलक्षणायाः परिभाषितत्वात्। ननु द्विरेफपदस्य रेफद्वययुक्तभ्रमरशब्द एवार्थस्तथा सति द्विरेफं पश्येत्यादौ द्वितीयार्थकर्मताया भृङ्गेनान्वयः। तथाहि प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति नियमादिति चेत्, न। प्रकृत्यर्थाभिन्नत्वेनाध्यासितस्यापि प्रकृत्यर्थत्वात्। अत एव मुखचन्द्रं पश्येत्यादौ चन्द्राभिन्नत्वेनाध्यासिते मुखे कर्मताया अन्वयः। तथा हि द्विरेफशब्दाद्भ्रमरशब्दस्य, द्वितीयातश्च कर्मतायाः, लक्षितभ्रमरशब्दाद् भृङ्गस्य चोपस्थितौ भृङ्गे भ्रमरशब्दाभेदं कर्मतां चावगाहमान आंशिकाध्यारोपरूपो बोधो जायते। शब्दतदर्थयोरभेदारोपश्च 'हिरण्यपूर्वं कशिपुं प्रचक्षते' इत्यादौ दृष्टः। नैयायिकास्तु—'द्विरेफपदस्य भ्रमरशब्दे एका लक्षणा, लक्षितभ्रमरशब्दवाच्यत्वसंबन्धेन भृङ्गे चापरा लक्षणा, ततश्च प्रकृत्यर्थे भृङ्गे कर्मतान्वयबोधः' इत्याहुः, तन्न। सकृदुच्चरितशब्दादावृत्तिं विना क्रमिकबोधानुभवात्। अजनितान्वयाबोधस्य शब्दस्यावृत्त्यभावात्। आवृत्तौ च द्वितीयाया अप्यावृत्तौ प्रथमोक्तद्वितीयाया अन्वयानुपपत्तेः। अस्मदुक्तरीतेः मुखचन्द्रं पश्येत्यत्रावश्यमाश्रयणीयत्वाच्चेत्यास्तां विस्तरः। **निहतार्थं** यथा—'सायकसहायबाहोर्मकरध्वजनियमितक्षमाधिपतेः। अब्जरुचिभासुरस्ते भातितरामवनिप श्लोकः ॥' अत्र सायकमकरध्वजक्षमाब्जश्लोकशब्दाः शरकामक्षान्तिपद्मयशःसु प्रसिद्धा अप्रसिद्धेषु खड्गाब्धिभूमिचन्द्रयशःसु प्रयुक्ताः। **अवाचकत्वं** यथा—'नमन्नृपतिमण्डलीमुकुटचन्द्रिकादुर्दिनस्फुरच्चरणपल्लवप्रतिपदोक्तदोःसंपदा। अनेन ससृजेतरां तुरगमेधमुक्तभ्रमत्तुरङ्गखुरचन्द्रकप्रकरदन्तुरा मेदिनी ॥' अत्र चन्द्रिकाशब्दः किरणसामान्ये, दुर्दिनशब्दश्छ-

१. 'शब्द' पुस्तकान्तरे नास्ति.

'धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरङ्गशावाक्ष्याः ।
रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम् ॥ '

अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति संबन्धः क्लिष्टः ।

'न्यक्कारो ह्ययमेव मे यत्' इति । अत्र चायमेव न्यक्कार इति न्यक्कारस्य विधेयत्वं विवक्षितम् । तच्च शब्दरचनावैपरीत्येन गुणीभूतम् । रचना च पदद्वयस्य विपरीतेति वाक्यदोषः ।

'आनन्दयति ते नेत्रे योऽसौ सुभ्रु समागतः ।'

इत्यादिषु 'यत्तदोर्नित्यः संबन्धः' इति न्यायादुपक्रान्तस्य यच्छब्दस्य निराकाङ्क्षत्वप्रतिपत्तये तच्छब्दसमानार्थतया प्रतिपाद्यमाना इदमेतदादयःशब्दा विधेया एव भवितुं युक्ताः । अत्र तु यच्छब्दनिकटस्थतया अनुवाद्यत्वप्रतीतिकृत् । तच्छब्दस्यापि यच्छब्दनिकटस्थितस्य प्रसिद्धपरामर्शित्वमात्रम् । यथा—

त्रमात्रे सम्यक्शब्दश्चरणसमृद्धाववाचकः । **क्लिष्टत्वमाह—धम्मिल्लस्येति** । अपूर्वा बन्धस्य व्युत्पत्तिर्नैपुण्यं यस्याः । **विरुद्धमतिकारित्वं** यथा—'श्रितक्षमा रक्तभुवः शिवालिङ्गितमूर्तयः।विग्रहक्षपणेनाद्य शेरते ते गतासुखाः॥' गतासुखा गतदुःखाः । पक्षे-गतानि असवः खानि इन्द्रियाणि च येषां ते तथा । अत्र क्षमादिगुणयुक्ताः सुखमासते इति विवक्षिते हता इति विरुद्धार्थप्रतीतिः । **अविमृष्टविधेयांशत्वमाह—न्यक्कार इति । तच्चेति** । 'अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्' इति न्यायादिति भावः । उदाहरणान्तरमाह—**आनन्दयतीति । नित्यः संबन्ध इति** । अवश्यमन्योन्यापेक्षितत्वमित्यर्थः । स च संबन्धः शाब्द आर्थश्च भवति । द्वयोरुपादाने शाब्दः, उभयोरनुपादाने आर्थः । क्रमेणोदाहरिष्यति । उपक्रान्तस्य अनुवाद्यत्वबोधकस्य । प्रतिपाद्यमानाः प्रयुज्यमाना विधेयाविधेयत्वबोधकाः । नन्वत्र किं बाधकमत आह—**अत्र त्विति** । उक्तोदाहरणे त्वित्यर्थः । (अदः—शब्द इति विशेषः ।) प्रसिद्धपरा-

---

1. **यत्तदोरिति** । तत्पदप्रतिपाद्यतया वक्तृबुद्धिविषय उद्देश्यो यत्पदार्थः, यत्पदप्रतिपाद्यतया वक्तृबुद्धिविषयो विधेयभूतस्तत्पदार्थ इति वैयाकरणाः ॥

2. **अत्रत्विति** । अयमाशयः—'योऽसौ' इति पदद्वयमुद्देश्यविधेयार्थकतया विवक्षितमपि न चैतत्तत्प्रतिपादकम् । यच्छब्दसांनिध्येन प्रयुज्यमानत्वादसौ यच्छब्दार्थगतप्रसिद्धिबोधकतयोद्देश्यकोटिप्रविष्टार्थकत्वात् । यथा 'यः स ते—' इत्युदाहृतौ तच्छब्दो यच्छब्दसांनिध्याद्यदर्थविशेषणतया प्रसिद्धार्थमभिदधदुद्देश्यवाक्य एव प्रविशति, न तु विधेयवाक्य इति तात्पर्यम् ॥

---

१. 'शाब्दार्थः' इति पुस्तकान्तरे. २. पुस्तकान्तरे नास्ति.

'यः स ते नयनानन्दकरः सुभ्रु स आगतः ।'

यच्छब्दव्यवधानेन स्थितास्तु निराकाङ्क्षत्वमवगमयन्ति । यथा—

'आनन्दयति ते नेत्रे योऽधुनासौ समागतः ॥'

एवमिदमादिशब्दोपादानेऽपि । यत्र च यत्तदोरेकस्यार्थत्वं संभवति, तत्रैकस्योपादानेऽपि निराकाङ्क्षत्वप्रतीतिरिति न क्षतिः । तथाहि यच्छब्दस्योत्तरवाक्यगतत्वे नोपादाने सामर्थ्यात् पूर्ववाक्ये तच्छब्दस्यार्थत्वम् । यथा—

'आत्मा जानाति यत्पापम्'

एवम्—

'यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च—'

इत्यादावपि ।

तच्छब्दस्य [1]प्रक्रान्तप्रसिद्धानुभूतार्थत्वे यच्छब्दस्यार्थत्वम् ।

मर्शित्वमात्रं प्रसिद्धबोधकत्वमेव, न तु विधेयत्वबोधनेन निराकाङ्क्षत्वबोधकप्रतिपादकत्वम् । तदुक्तम्— 'ख्यातार्थमनुभूतार्थं प्रक्रान्तार्थं च तत्पदम् । यत्पदापेक्षया हीनं न विधेयत्वबोधकृत् ॥' इति । यत्र तु प्रसिद्धादिपरामर्शिनोऽपि तच्छब्दस्य यत्पदेन संबन्धः संभवति तत्र विधेयत्वप्रतीतिकारित्वमस्त्येव । क्रमेण यथा—'करवदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः । पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥', 'यदङ्गलावण्यमनङ्गभङ्गदं यदाननं निन्दति बिम्बमैन्दवम् । मम क्षणं मुञ्चति मानसं न या विहाय तां हन्त न शान्तिरस्ति मे ॥', 'रसैः कथा यस्य सुधावधीरिणी नलः स भूजानिरभूद्गुणाद्भुतः ।' **स्थिता इति** । तदादयः शब्दा इत्यनुषज्यन्ते । आर्थत्वमर्थवशलभ्यत्वम् । सामर्थ्यात् परस्पराकाङ्क्षानैयत्यात् । एतेनोत्तरवाक्यस्थं यत्पदं तत्पदनिराकाङ्क्षमिति हेयम् । **आत्मेति** । तदात्मा जानाति यत्पापमस्ति इत्यर्थः । **यमिति** । स हिमालयोऽस्तीति पूर्ववाक्ये तच्छब्दस्यार्थत्वम्, उत्तरवाक्यस्थयत्पदस्य पूर्ववाक्यस्थतत्पदेन शाब्दः संबन्धोऽपि । यथा—'अन्यास्ता गुणरत्नरोहणभुवः' इत्यादि । एवं पूर्ववाक्यस्थयत्पदस्योत्तरवाक्ये प्रतीयमानतत्पदापेक्षा यथा—'यस्त्वां विसृजते मर्त्य आत्मानं प्रियमीश्वरम् । विपर्य-

---

1. **प्रक्रान्तेति** । प्रक्रान्तः पूर्वप्रतीतिविषयः, प्रसिद्धो लोकविख्यातः, अनुभूतोऽनुभवविषयोऽर्थो विषयस्तथाभूते ॥

क्रमेण यथा—

'स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् ॥'[1]
'स वः शशिकलामौलिस्तादात्म्यायोपकल्प्यताम् ।'
'तामिन्दुसुन्दरमुखीं हृदि चिन्तयामि ।'

यत्र च यच्छब्दनिकटस्थितानामपीदमादिशब्दानां भिन्नलिङ्गविभक्तित्वं तत्रापि निराकाङ्क्षत्वमेव । क्रमेण यथा—

'विभाति मृगशावाक्षी येदं भुवनभूषणम् ।'
'इन्दुर्विभाति यस्तेन दग्धाः पथिकयोषितः ।'

क्वचिदनुपात्तयोर्द्वयोरपि सामर्थ्यादवगमः । यथा—

'न मे शमयिता कोऽपि भारस्येत्युर्वि मा शुचः ।
नन्दस्य भवने कोऽपि बालोऽस्त्यद्भुतपौरुषः ॥'

अत्र योऽस्ति, स ते भारस्य शमयितेति बुध्यते ।

'यद्यद्विरहदुःखं मे तत्को वापहरिष्यति ।'

इत्यत्रैको यच्छब्दः साकाङ्क्ष इति न वाच्यम् । तथाहि—[2]यद्यदि-

---

येन्द्रियार्थार्थं विषमत्त्यमृतं त्यजेत् ॥' **स हत्वेति** । यः सुग्रीवप्रियकारीत्यर्थतोऽवगम्यते । **स व इति** । यः शिवो लोके पूज्यते इत्यर्थः । **तामिति** । या रूपलावण्यपूर्णेत्यर्थतोऽवगम्यते । एवमेव चण्डीदासादयः । तेषामयमाशयः—प्रक्रान्तादिपरामर्शकस्य तत्पदस्य यत्पदनिराकाङ्क्षत्वे 'यत्तदोर्नित्यः संबन्धः' इति नियमभङ्गश्च स्यात् । एवं च 'यत्पदापेक्षया हीनम्' इति प्रागुक्तं तूत्थिताकाङ्क्षाविरहपरम्, 'स हत्वा' इत्यादौ स क इत्युत्थाप्याकाङ्क्षयैव संगतिरिति नियमे तु यत्पदसंनिहितत्वेन यत्पदप्रसिद्धार्थकं यत्पदं तद्भेदो निवेशनीय इति । द्वयोर्यत्तत्पदयोः । सामर्थ्यादाकाङ्क्षातः । ननु यत्र पूर्ववाक्ये यत्पदद्वयं तत्र कथमेकतत्पदेन निराकाङ्क्षत्वप्रतीतिः । तत्र तत्पदद्वयस्यैव वक्तुं योग्यत्वात् । यथा—'यं यं कामयते कामं तं तमाप्नोति लीलया' इति । अत आह—**यद्यदिति । एक इति** । उत्तरवाक्ये एकतत्पदप्रयोगादिति भावः ।

---

1. **आदेशमिति** । स्थान्यर्थाभिधानसमर्थमिति भावः ॥

2. **यद्यदिति** । परमार्थस्तु यद्यदिति न पदद्वयम् । किंतु 'नित्यवीप्सयोः' इति सूत्रेण वीप्सायां यदो द्वित्वापन्नोऽयमादेशः । एवं चादेशिनैकेन यत्पदेन तत्पदेन च द्वाभ्यामप्येकेनैव रूपेण दुःखपरामर्शः । आदेशस्तु साकल्येनान्वये तात्पर्यग्राहक इति यत्पदीयेनैव तेन संबन्धभानोपपत्तौ न तत्पदेऽपि वीप्साद्योतको द्वित्वापन्न आदेशः । यत्र तु तत्पदेऽपि वीप्सा तत्र न यत्पदेऽप्यादेशः । किं तूभाभ्यां रूपद्वयेन सर्वोपस्थानमिति तत्त्वम् ॥

त्यनेन केनचिद्रूपेण स्थितं सर्वात्मकं वस्तु विवक्षितम्। तथाभूतस्य तस्य तच्छब्देन परामर्शः। एवमन्येषामपि वाक्यगतत्वेनोदाहरणं बोध्यम्।

पदांशे श्रुतिकटु यथा—

'तद्गच्छ सिध्यै[1] कुरु देवकार्यम्।'

'धातुमत्तां गिरिर्धत्ते।'

अत्र मत्ताशब्दः क्षीवार्थे निहतः।

'वर्ण्यते किं महासेनो विजेयो यस्य तारकः।'

अत्र विजेय[2] इति कृत्यप्रत्ययः क्तप्रत्ययार्थेऽवाचकः।

'पाणिः पल्लवपेलवः।'

पेलव[3]शब्दस्याद्याक्षरे अश्लीले।

'संग्रामे निहताः शूरा वचोवाणत्वमागताः।'

अत्र वचःशब्दस्य गीःशब्दवाचकत्वे नेयार्थत्वम्। तथा तत्रैव बाणस्थाने शरेति पाठे। अत्र पदद्वयमपि न परिवृत्तिसहम्। [4]जलध्यादौ

सर्वात्मकमिति। विरहदुःखत्वेन सामान्येन सर्वं विरहदुःखमित्यर्थः। तथाभूतस्य विरहदुःखत्वावच्छिन्नस्य। तथा च वीप्साया वक्तृतात्पर्यमेव नियामकम्। सामान्यरूपेण उपस्थापने वक्तृतात्पर्ये सति न तत्पदे वीप्सा। तत्तद्व्यक्तित्वेन उपस्थापने तात्पर्ये सति तत्पदे वीप्सा। क्वचित्तु तत्पदे एव वीप्सा, न तु यत्पदे। यथा—'ते ते सत्पुरुषाः परार्थघटकाः स्वार्थस्य बाधेन ये।' **एवमिति**। अन्येषामनुचितार्थत्वादीनाम्। तच्च मया दर्शितमेव। 'दोषाः केचिद्गुणवन्त्येषु पदांशेऽपि पदेऽपि च' इति यदुक्तम्, तदुदाहरणमाह—**तद्गच्छेति**। **अश्लीले इति**। व्रीडाव्यञ्जके। **जुगुप्साव्यञ्जकं** यथा—'पूयते' इति। अत्र पूयशब्दः। **अमङ्गलव्यञ्जकं** यथा—'अभिप्रेतः' इति। अत्र प्रेतशब्दः। वचोवाणत्वं गीर्वाणत्वम्। **गीःशब्दवाचकत्वे इति**। लक्षणया गीःशब्दप्रतिपादकत्वे इत्यर्थः। तथा नेयार्थत्वम्। तत्रैव गीर्वाणशब्द एव। परिवृत्तिसहं श्रुतशब्दपरित्यागेन तत्पर्यायशब्दान्तरदानेऽपि

---

1. **सिध्यै इति**। अत्र 'सिध्यै' इति चतुर्थ्यन्तपदैकदेशः श्रुतिकटुः॥

2. **विजेय इति**। 'अर्हे कृत्यतृचश्च' इति सूत्रेणार्हार्थे 'अचो यत्' इति सूत्रेण विहितः कृत्यसंज्ञो यत्प्रत्ययो भूतत्वरूपे क्तप्रत्ययार्थेऽवाचकः॥

3. **पेलवेति**। 'पेल' इति वर्णद्वयं लाटभाषायां वृषणरूपगुह्याङ्गप्रत्यायकतया व्रीडादायीति प्रकाशव्याख्यातारः॥

4. **जलध्यादाविति**। तथा चोक्तमरिसिंहेन—'जलदादिषु पूर्वपदे सरोजमुख्येषु चोत्तरपदेषु। सुरपतिसमेषु चोभयपदेषु पर्यायपरिवृत्तिः॥ इति परिवृत्तिसहा ये योगात्ते यौगिकाः शब्दाः। परिवृत्त्यसहा ये तु मिश्रा गीर्वाणतुल्यास्ते॥' योगरूढिमन्तो गीर्वाणादिमिश्रशब्दाः परिवृत्तिं न सहन्त इत्यर्थः॥

तूत्तरपदम्, वाडवानलादौ पूर्वपदम् । [1]एवमन्येऽपि यथासंभवं पदांशदोषा ज्ञेयाः । निरर्थकत्वादीनां त्रयाणां च पदमात्रगतत्वेनैव लक्ष्ये संभवः । [1]क्रमतो यथा—

'मुञ्च मानं हि मानिनि ।'

अत्र हिशब्दो वृत्तपूरणमात्रप्रयोजनः ।

'कुञ्जं हन्ति कृशोदरी ।'

अत्र हन्तीति गमनार्थे पठितमपि न तत्र समर्थम् ।

'गाण्डीवी कनकशिलानिभं भुजाभ्या-
माजघ्ने विषमविलोचनस्य वक्षः ।'

'आङो यमहनः', 'स्वाङ्गकर्मकाच्च' इत्यनुशासनबलादाङ्पूर्वस्य हनः स्वाङ्गकर्मकस्यैवात्मनेपदं नियमितम् । इह तु तल्लङ्घितमिति व्याकरणलक्षणहीनत्वात् च्युतसंस्कारत्वम् ।

नन्वत्र 'आजघ्ने' इति पदस्य स्वतो न दुष्टता, अपि तु पदान्तरापेक्षयैव । इत्यस्य वाक्यदोषता । मैवम् । तथाहि गुणदोषालंकाराणां शब्दार्थगतत्वेन व्यवस्थितेस्तदन्वयव्यतिरेकानुविधायित्वं हेतुः । इह तु दोषस्य 'आजघ्ने' इति पदमात्रस्यैवान्वयव्यतिरेकानुविधायित्वम् । पदान्तराणां परिवर्तनेऽपि तस्य तादवस्थ्यादेव इति पददोष एव । तथा यथेहात्मनेपदस्य परिवृत्तावपि न पददोषः, तथा हन्प्रकृतेरपीति न पदांशदोषः ।

तदर्थबोधकम् । **उत्तरपदमिति** । न परिवृत्तिसहमित्यनुषङ्गः । एवमग्रेऽपि । **एवमिति** । 'प्रकटितम्' इत्यादौ कटिशब्दो **ग्राम्यः** । 'संभवन्ति पदे परे' इति यदुक्तं तदुदाहर्तुमाह—**निरर्थकत्वादीनामिति** । आदिना असमर्थत्वच्युतसंस्कारयोर्ग्रहणम् । अत्र गमनार्थेन समर्थं न प्रतिपत्तिक्षमम् । **तल्लङ्घितमिति** ।

---

1. **एवमन्येऽपीति** । 'कस्मिन्कर्मणि सामर्थ्यमस्य नोत्पतेतराम् । अयं साधुचरस्तस्मादञ्जलिर्बध्यतामिह ॥' इत्यादौ पदैकदेशे संदिग्धत्वमनुसंधेयम् । तथाहि—इह साधुचरपदस्य चरेत्येकदेशः पूर्वं साधुरित्यर्थे 'भूतपूर्वे चरट्' इति सूत्रेण व्युत्पादितः । अथवा साधुषु चरतीत्यर्थे 'चरेष्टः' इत्यनेनेति प्रकरणाद्यभावे वक्तृतात्पर्यसंदेहः ॥

---

१. 'क्रमतः' घ-पुस्तके नास्ति.

एवं 'पद्मः' इत्यत्राप्रयुक्तस्य पदगतत्वं बोध्यम् । एवं प्राकृतादि-व्याकरणलक्षणहानावपि च्युतसंस्कारत्वमूह्यम् ।

इह तु शब्दानां सर्वथा प्रयोगाभावेऽसमर्थत्वम् । विरलप्रयोगे निहतार्थत्वम् । निहतार्थत्वमनेकार्थशब्दविषयम् । अप्रतीतत्वं त्वेकार्थस्यापि शब्दस्य सार्वत्रिकप्रयोगविरहः । अप्रयुक्तत्वमेकार्थशब्दविषयम् ।

असमर्थत्वमनेकार्थशब्दविषयम् । असमर्थत्वे हन्त्यादयो[2] गमनार्थे पठिताः । अवाचकत्वे दिनादयः प्रकाशमयाद्यर्थे, न तथेति परस्परभेदः । एवं पददोषसजातीया वाक्यदोषा उक्ताः, संप्रति तद्विजातीया उच्यन्ते ।

वर्णानां प्रतिकूलत्वं, लुप्ताहतविसर्गते ।
अधिकन्यूनकथितपदताहतवृत्तताः ॥ ५ ॥
पतत्प्रकर्षता, संधौ विश्लेषाश्लीलकष्टताः ।
अर्थान्तरैकपदता समाप्तपुनरात्तता ॥ ६ ॥
अभवन्मतसंबन्धाक्रमामतपरार्थताः ।
वाच्यस्यानभिधानं च भग्नप्रक्रमता तथा ॥ ७ ॥
त्यागः प्रसिद्धेरस्थाने न्यासः पदसमासयोः ।
संकीर्णता गर्भितता दोषाः स्युर्वाक्यमात्रगाः ॥ ८ ॥

अनुशासनमन्यथाकृतमित्यर्थः । **एवं पद्म इति** ।-अप्रयुक्तस्य अयुक्तत्वस्य पदगतत्वं न तु पदांशगतत्वम् । इदानीं केषांचिद्दोषाणां परस्परभेदं दर्शयति—**इह त्विति** । **सर्वथेति** । यत्र ज्ञापकं नास्ति तत्रैव प्रयोगाभावः । ज्ञापकसत्वे तु प्रयोगोऽस्त्येव । यथा—हनधातोर्गतौ जङ्घापद्धतिरित्यादिप्रयोगः । अत्र यनलोपपच्छब्दौ ज्ञापकौ । कुटिलं गम्यतेऽनया इति जङ्घा । पद्भ्यां गम्यतेऽनेति पद्धतिः । एतदर्थमेव हनधातोर्गतौ पाठः । केचित्तु—'पुनः पुनः गम्यतेऽनया' इति यनो वाक्यं कुर्वन्ति, तन्न । गत्यर्थधातोरत्यर्थं पौनःपुन्ये च यनप्राप्त्यभावात् । **विरलेति** । श्लेषादौ प्रयोगो न त्वन्यत्र । एतेनासमर्थत्वनिहतार्थयोर्भेदो दर्शितः । निहतार्थत्वाप्रतीतत्वयोर्भेदमाह-**निहतार्थत्वमिति** । अप्रयुक्तत्वासमर्थयोर्भेदमाह-**अप्रयुक्तत्वमिति** । असमर्थत्वावाचकत्वयोर्भेदमाह-**असमर्थत्वे इति** । न तथा पठिताः । तद्विजातीयाः पददोषविजातीया वाक्यदोषा उच्यन्ते इत्यनुषङ्गेणान्वयः । **लुप्तेति** । लुप्तविसर्गता, आहतविसर्गता च । एवमधिकपदता, न्यूनपदता, कथितपदता च । **संधाविति** । संधिविश्लेषः संध्यश्लीलता संधिकष्टता च । रसानुगुण्यविपरीतत्वं च प्रकृत-

---

१. 'भावात्' क. २. 'अपि' इत्यधिकं घ-पुस्तके. ३. 'वाक्ये' घ.

वर्णानां रसानुगुण्यविपरीतत्वं **प्रतिकूलत्वम्** । यथा मम—

'ओवट्टइ उल्लट्टइ, सअणे कहिंपि मोट्टाअइ णो। परिहट्टइ+ (?)
हिअएण, फिट्टइ लज्जाइ खुट्टइ दिहीए सा ॥' (?)

अत्र टकाराः शृङ्गाररसपरिपन्थिनः केवलं शक्तिप्रदर्शनाय निबद्धाः । एषां चैकद्वित्रिचतुःप्रयोगे[1] न तादृग्रसभङ्ग इति न दोषः ।

'गता निशा इमा बाले ।'

अत्र **लुप्तविसर्गाः** । आहता ओत्वं प्राप्ता विसर्गा यत्र । यथा—

'धीरो वरो नरो याति' इति ।
'पल्लवाकृतिरक्तोष्ठी ।'

अत्राकृतिपदमधिकम् । एवम्—

'सदाशिवं नौमि पिनाकपाणिम् ।'

इति विशेषणमधिकम् ।

रसविरोधिरसगतगुणव्यञ्जकत्वेन । **ओवट्टइ इति** । 'उद्वर्तयति उल्लोटयति शयने कर्ह्यपि मोट्टयति नो परिघट्टयति । हृदयेन स्फिटयति लज्जया खुट्टयति धृतेः सा ॥' इति संस्कृतम् । विप्रलम्भवर्णनमिदम् । उद्वर्तयति देहमुत्तानीकरोति । उल्लोटयति पार्श्वपरिवृत्तिं करोति । मोट्टायितभावं न करोति । स्फिटयति भ्रश्यति । खुट्टयति कुण्ठिता भवति । शृङ्गाररसपरिपन्थिनः शृङ्गारविरुद्धवीरबीभत्सरौद्रगतौजोगुणव्यञ्जकत्वेन शृङ्गारप्रकर्षबोधप्रतिबन्धकाः । एषां प्रतिकूलवर्णानाम् । तादृग्वर्णप्रतिकूलत्वनिबन्धनो रसभङ्गः रसप्रकर्षबोधप्रतिबन्धः । दुःश्रवत्वनिबन्धनस्तु वर्तत एव । अत एव 'निर्वर्ण्य पत्युर्मुखम्' इत्यत्र रेफयुक्तस्य वर्णत्रयस्य सत्वेऽपि नायं दोषः । दुःश्रवत्वं तु वर्तत एव । ननूक्तोदाहरणे दुःश्रवत्वमेव दोष इति चेदुदाहरणान्तरं बोध्यम् । यथा—'वृन्दारकप्रकरमद्य करोम्यशङ्कमानन्दयामि मुनिवृन्दममन्दमङ्ग । भङ्गं भुजङ्गमगणस्य भयं नयामि त्वामन्तकातिथिमसन्तमहं विधाय ॥' रावणं प्रति श्रीरामस्योक्तिरियम् । अत्र माधुर्यव्यञ्जकवर्णप्राचुर्यं वीररसस्य परिपन्थि । **गता इति** । द्वयमपि बहुशः पात एव दोषः । विसर्गस्थितिबाहुल्ये दुःश्रवत्वमेव । यथा—'स्मरः खरः खलः कान्तः' इति । अधिकमनुपयुक्तार्थं पदं यत्र तत्त्वम् । **अत्राकृतिपदमिति** । शिलापुत्रस्य शरीरमितिवत् पल्लवाकृतेः पल्लवानतिरिक्तत्वादाकृतिपदमनुपयुक्तार्थमिति भावः । अन्ये तु 'आकृतिः संस्थानं तत्र संयोगस्वरूपमेव तत्र रक्तत्वस्य बाधादधिकपदम्' इत्याहुः, तन्न । बाधे अभवन्मतयोगत्वस्यैव प्रसक्तेः, न त्वधिकपदत्वस्य 'प्रभातवाता इति कम्पिताकृतिः' इत्यादिप्रयोगादाकृतिशब्दस्य शरीरवाचकत्वाच्च ।

---

१. 'प्रयोगेण' घ.

'कुर्यां हरस्यापि पिनाकपाणेः' इति ।

अत्र तु पिनाकपाणिपदं विशेषप्रतिपत्त्यर्थमुपात्तमिति युक्तमेव । यथा वा—

'वाचमुवाच कौत्सः ।'

अत्र वाचमित्यधिकम् । उवाचेत्यनेनैव गतार्थत्वात् ।

क्वचित्तु विशेषणदानार्थं तत्प्रयोगो युज्यते । यथा—

'उवाच मधुरां वाचम्' इति ।

केचित्त्वाहुः—यत्र विशेषणस्यापि क्रियाविशेषणत्वं संभवति तत्रापि तत्प्रयोगो न घटते । यथा—

'उवाच मधुरं धीमान्' इति ।

'यदि मय्यर्पिता दृष्टिः किं ममेन्द्रतया तदा ।'

अत्र प्रथमे त्वयेति पदं **न्यूनम्** ।

'रतिलीलाश्रमं भिन्ते सलीलमनिलो वहन् ।'

लीलाशब्दः **पुनरुक्तः** । एवम्—

'जक्षुर्बिसं धृतविकासिबिसप्रसूनाः ।'

'अन्यथा तत्र संयोगकल्पनानुपपत्तेः' इत्यपरे । **कुर्यामिति** । पिनाकपाणेरपि धैर्यच्युतिकरणेनात्मनः शौर्यातिशयः प्रतिपादितः । **वाचमिति** । यथा—'देवं यजति,' 'गन्धं जिघ्रति' इत्यादौ संभेदेनान्यतरवैयर्थ्यमिति न्यायेन यजादेः पूजाग्रहणमात्रार्थता, तथात्रापि वचधातोरुच्चारणमात्रार्थत्वम्, न तु वचनोच्चारणार्थत्वम् । अन्यथा पौनरुक्त्यं स्यात् । एवं च तादृशकल्पनमेवात्र शाब्दबोधविलम्बनकृदिति दोषत्वमस्य । **गतार्थत्वादिति** । वचधातुनैव वागुच्चारणस्य प्रतिपादनाद्वाचमित्यस्य प्रयोगोऽनुपयुक्त एव प्रत्युतार्थान्तरकल्पनाकर इति भावः । न्यूनमुपादेयमप्यनुपात्तं पदं वाचकपदं यत्र तच्चेत्यर्थः । वाचकेति विशेषणाद्वाच्यानभिधानादस्य भेदो दर्शितः । तस्य द्योतकपदानभिधानस्वरूपत्वात् । केचित्तु—'अध्याहारपूरणीयं पदं न्यूनपदम् । वाच्यानभिधाने त्वध्याहारस्यैवासंभवादनयोर्भेदः । तथाहि—'व्यतिक्रमलवं कं मे वीक्ष्य वामाक्षि कुप्यसि' इत्यत्र व्यतिक्रमलवयोः समासस्तत्वेऽप्यध्याहार्यापिकारेणापि व्यतिक्रमीयस्थूलभागसमुच्चयस्यासंभवात् । किं तु वस्त्वन्तरस्यैव समुच्चयात्' इत्याहुः, तन्न । 'गुणशतमपि दोषः कश्चिदेकोतिवृद्धः क्षपयति यदि नान्यस्तद्विरोधी गुणोऽस्ति' इत्यादौ गुणशतयोः समासत्वेऽप्यधिकारेणैकद्यादिगुणसमुच्चयदर्शनात् । कथितमर्थपौनरुक्त्याभावेऽपि द्विरुपात्तं पदं यत्र तत्त्वम् । एकस्यैवार्थस्यैकशब्देन द्विरुपादाने किमिदं पदं नानार्थत्वेनार्थान्तरबोधकम्, उत तस्यैवार्थस्य

---

१. 'तु' क-पुस्तके नास्ति. २. 'पिनाकपाणिपदं' ख-ग-घ-पुस्तकेषु नास्ति. ३. 'उपात्तत्वात्' घ.

अत्र विसशब्दस्य धृतपरिस्फुटतत्प्रसूना इति सर्वनाम्नैव परामर्शो युक्तः । हतवृत्तं[1] लक्षणानुसरणेऽप्यश्रव्यं[2] रसानुगुणमप्राप्तगुरुभावान्तलघु च । क्रमेण यथा—

'हन्त[3] सततमेतस्या हृदयं भिन्ते मनोभवः कुपितः ।'

प्रतिपादकमिति प्रतिसंधानप्रसङ्गे शाब्दबोधविलम्बनं दूषकताबीजमत्र बोध्यम् । हतवृत्तस्य त्रैविध्यमाह—**हतमिति** । अप्राप्तगुरुभावमन्तलघु यत्र तत् । **हन्तेति** ।

---

1. **अश्रव्यमिति** । इह केषांचन वृत्तानां श्रव्यत्वाश्रव्यत्वज्ञप्तये कतिचन नियमाः प्रदर्श्यन्ते—'समासैर्लघुवृत्तानामसमासैर्महीयसाम् । शोभा भवति भव्यानामुपयोगवशेन वा ॥ अनुष्टुप्छन्दसां भेदे कैश्चित्सामान्यलक्षणम् । यदुक्तं पञ्चमं कुर्यालघु षष्ठं तथा गुरु ॥ तत्राप्यनियमो दृष्टः प्रबन्धे महतामपि । तस्माद्व्यभिचारेण श्रव्यतैव गरीयसी ॥' यथा—'तदन्वये शुद्धिमति' इति कालिदासोक्तौ । 'उपजातिविकल्पानां सिद्धौ यद्यपि संकरः । तथापि प्रथमं कुर्यात्पूर्वपादाक्षरं लघु ॥ गुर्वक्षरेण संरुद्धं ग्रन्थियुक्तमिवाग्रतः । करोति प्रथमं स्थूलं किंचित्कर्णकदर्थनम् ॥' यथा—'अस्त्युत्तरस्याम्' इत्त्र । 'व्यक्षरैरुव्यक्षरैरेव च्छेदैराभाति दोधकम् । अतोऽल्पैरधिकैर्वापि यति तालमिवोज्झति ॥ शत्रन्ताक्षरसंयोगैः किंचित्कार्कश्यकारिभिः । अन्ते विसर्जनीयैश्च शालिनी याति दीप्तताम् ॥ विसर्गयुक्तैः पादान्तैर्विराजति रथोद्धता । कलापरिचयैर्याता लटभेव प्रगल्भताम् ॥ साकाराद्यैर्विसर्गान्तैः सर्वपादैः सविभ्रमा । स्वागता स्वागता भाति कविकर्मविलासिनी ॥ द्रुततालललयैरेव व्यक्तं रूक्षाक्षरैः पदैः । प्रनर्तयति यच्चित्तं तत्तोटकमभीप्सितम् ॥ असमस्तपदैः पादसंधिविच्छेदसुन्दरम् । सर्वपादैर्विसर्गान्तैर्वंशस्थं यात्यनर्घताम् ॥ प्रारम्भे द्रुतविन्यासं पर्यन्तेषु विलम्बितम् । विच्छित्या सर्वपादानां भाति द्रुतविलम्बितम् ॥ आकारमन्थरैः प्रायः पादे पादेऽक्षरैस्त्रिभिः । शेषाक्षरैर्द्रुततरैः प्रहर्षाय प्रहर्षिणी ॥ वसन्ततिलकस्याद्ये साकारे प्रथमाक्षरे । ओजसा जायते कान्तिः सविकासविलासिनी ॥' यथा रत्नाकरस्य—'कण्ठश्रियं कुवलयस्तवकाभिरामदामानुकारिविकटच्छविकालकूटम् । विभ्रत्सुखानि दिशतादुपहारपीतधूपोत्थधूममलिनामिव धूर्जटिर्वः ॥' 'आकारेऽपि कृते पूर्वे वन्धेऽल्पपदपेशले । वसन्ततिलकं धत्ते निर्ग्रन्थि रमणीयताम् ॥ विसर्गहीनपर्यन्ता मालिनी न विराजते । चमरी छिन्नपुच्छेव वल्लीवालूनपल्लवा ॥ द्वितीयार्धे समस्ताभ्यां पादाभ्यां मालिनी वरा । प्रथमार्धे समस्ताभ्यां पादाभ्यामवरा मता ॥ प्रथमं व्यक्षरैश्छेदैस्ततश्चिचतुरक्षरैः । पञ्चाक्षरैश्च पर्यन्ते नर्कुटं याति चारुताम् ॥' यथा वीरदेवस्य—'तव शतपत्रपत्रमृदुताम्रजलश्चरणश्चलकलहंसनूपुरवरध्वनिना मुखरः । महिषमहासुरस्य शिरसि प्रसभं निहितः कनकमहीधरेन्द्रगुरुतां कथमम्ब गतः ॥' 'असमासैः पदैर्भाति पृथ्वी पृथ्वी पृथक्स्थितैः । समासग्रन्थिभिः सैव याति संकोचखर्वताम् ॥' पृथक्पदा यथा मम—'दवीयसि मनोहरा व्यतिकरे तु दुःखप्रदा मनागपि निषेविता हृदयकम्पलीलावहाः । अनन्तपदरो-

---

१. 'हतं' घ. २. 'वत' क. ३. 'संतत' क. ४. 'भावं' इति पुस्तकान्तरे नास्ति.

'अयि मयि मानिनि मा कुरु मानम्।'

इदं वृत्तं हास्यरसस्यैवानुकूलम्।

'विकसितसहकारभारहारिपरिमल एष समागतो वसन्तः।'

यत्पादान्ते लघोरपि गुरुभाव उक्तस्तत्सर्वत्र द्वितीयचतुर्थपाद-

---

अत्र प्रथमद्वितीयगणौ भकारसकारौ, अनयोः सांनिध्यमश्रव्यं तच्च सभ्यानामनुभवसिद्धम्। **गुरुभाव उक्त इति**। 'सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत्। वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा॥' 'इत्यादिना' इति शेषः। **द्वितीयचतुर्थ-**

धिकासुहिनवृष्टयः केवलं कदाचन करालतां दधति यत्र कायस्थवत्॥' यत्र बदरिकाश्रमे। 'पृथ्वी साकारगम्भीरैरोजःसर्जिभिरक्षरैः। समासग्रन्थियुक्तापि याति प्रत्युत दीर्घताम्॥' यथा—'महाप्रलयमारुत—' इत्यादि। 'त्वरातरलविच्छेदैर्विभाति हरिणी पदैः। मन्थरैर्ग्रन्थिबद्धेव याति निःस्पन्दसंगताम्॥ त्रिषु पादेषु विश्रान्तविलासैर्ललिता पदैः। अन्ते तरङ्गितगतिर्हरिणी हारिणी तराम्॥ शिखरिण्याः समारोहात्सहजैवौजसः स्थितिः। सैव लुप्तविसर्गान्तैः प्रयात्यत्यन्तमुन्नतिम्॥ शिखरिण्याः पदैश्छिन्नैः स्वरूपं परिहीयते। मुक्तालताया निःसूत्रमुक्तैर्मुक्ताफलैरिव॥ मन्थराक्रान्तविस्रब्धैश्चतुर्भिः प्रथमाक्षरैः। मध्यषट्केऽतिचतुरे मन्दाक्रान्ता विराजते॥' यथा—'ब्रह्मावर्तं जनपदमधः—' इत्यादि। 'साकाराद्यक्षरैः पादपर्यन्तैः सविसर्गकैः। शार्दूलक्रीडितं धत्ते तेजोजीवितमूर्जितम्॥ विसर्जनीयस्रोत्वेन पदैर्निस्रोत्नतैरिव। शार्दूलक्रीडितं याति पाठे सायासतामिव॥ विच्छिन्नपादं पूर्वार्धे द्वितीयार्धे समासवत्। शार्दूलक्रीडितं भाति विपरीतमतोऽधमम्॥ आद्यन्तयोर्गुणोत्कर्षकान्त्या सर्वातिशायिनोः। शार्दूलक्रीडितं धत्ते मध्ये तद्गौरवोन्नतिम्॥' यथा—'गाहन्तां महिषाः—' इत्यादि। 'आद्यन्ताकारविरहात्पर्यन्ते चाविसर्गतः। शार्दूलक्रीडितं स्वस्य रूपं नैवोपलभ्यते॥' यथा—'यत्त्वन्नेत्रसमानकान्ति—' इत्यादि। 'सुकुमाररसस्यात्र रक्षार्थे वृत्तमुद्धतम्। वात्रपाकेनैव गलितं कविना नीतमल्पताम्॥ आकारगुरुयुक्तादिपर्यन्तान्तविसर्गिणी। असंस्यूतविरामा च राजते स्रग्धरा तराम्॥ आद्यन्ताकारविरहाद्बन्धदोषः स्फुटोऽपि यः। अविलुप्तैर्विसर्गान्तैः स्रग्धरायां समीहते॥' इति॥

2. **रसानुगुणमिति**। केषांचन वृत्तानां रसानुगुण्यं प्रदर्श्यते—'आरम्भे सर्गबन्धस्य कथाविस्तरसंग्रहे। शमोपदेशवृत्तान्ते सन्तः शंसन्त्यनुष्टुभम्॥ शृङ्गारालम्बनोदारनायिकारूपवर्णनम्। वसन्तादि तदङ्गं च सच्छायमुपजातिभिः॥ रथोद्धता विभावेषु भव्या चन्द्रोदयादिषु। पाञ्चुण्यप्रगुणा नीतिर्वंशस्थेन विराजते॥ वसन्ततिलकं भाति संकरे वीररौद्रयोः। कुर्यात्सर्गस्य पर्यन्ते मालिनी द्रुततालवत्॥ उपपन्नपरिच्छेदकाले शिखरिणी वरा। औदार्यरुचिरौचित्यविचारे हरिणी मता॥ साक्षेपक्रोधधिक्कारे परं पृथ्वी भरक्षमा। प्रावृट्प्रवासव्यसने मन्दाक्रान्ता विराजते॥ शौर्यस्तवे नृपादीनां शार्दूलक्रीडितं मतम्। सावेगपवनादीनां वर्णने स्रग्धरा वरा॥ दोधकतोटकनर्कुटयुक्तं मुक्तकमेव विराजति सूक्तम्। निर्विषयस्तु रसादिषु तेषां निर्नियमश्च सदा विनियोगः॥' इति॥

विषयम् । प्रथमतृतीयपादविषयं तु वसन्ततिलकादेरेव[1] । अत्र 'प्रमुदितसौरभ आगतो वसन्तः' इति पाठो युक्तः । यथा वा—

'अन्यास्ता गुणरत्नरोहणभुवो धन्या मृदन्यैव सा
संभाराः खलु तेऽन्य एव विधिना यैरेष सृष्टो युवा ।
श्रीमत्कान्तिजुषां द्विषां करतलात्स्त्रीणां नितम्बस्थला-
दृष्टे यत्र पतन्ति मूढमनसामस्त्राणि वस्त्राणि च ॥'

अत्र वस्त्राणि चेति बन्धस्य श्लथत्वश्रुतिः । 'वस्त्राण्यपि' इति पाठे तु दार्ढ्यमिति न दोषः । 'इदमप्राप्तगुरुभावान्तलघु' इति काव्यप्रकाशकारः । वस्तुतस्तु 'लक्षणानुसरणेऽप्यश्रव्यम्' इत्यन्ये ।

'प्रोज्ज्वलज्ज्वलनज्वालाविकटोरुसटाच्छटः ।
श्वासक्षिप्तकुलक्ष्माभृत्पातु वो नरकेसरी ॥'

अत्र **क्रमेणानुप्रासप्रकर्षः पतितः** ।

'दलिते उत्पले एते अक्षिणी अमलाङ्गि ते ।'

पादमिति । इह प्रथमपादान्तस्य गुरुत्वाप्राप्तेर्दोष इति भावः । पतत्प्रकर्षत्वं च द्विविधम्, बन्धस्य पूर्वापेक्षया उत्तरोत्तरत्र शैथिल्यादनुप्रासपाताच्च निकर्षविशेषः । तदुक्तम्—'पतत्प्रकर्षं बन्धस्य शैथिल्यादुत्तरोत्तरम् । पूर्वानुसारतः कोऽपि निकर्षो यत्र जायते ॥' इति क्रमेणोदाहरति—**अन्यास्ता इति** । गुणरत्नस्य रोहणभुवो जन्मस्थानानि । मृच्छरीरारम्भकपृथिवीसंभारा उपकरणानि । अन्ये विलक्षणाः । यैरिति प्रागुक्तत्रितयपरामर्शः । 'क्वचिल्लिङ्गविभक्तयोः' इत्यनुशासनाद् यत्पदस्य परलिङ्गवचनग्राहित्वम् । अन्यथा तत्पदत्रयाकाङ्क्षापूरणं न स्यात् । यत्र यूनि दृष्टे सति द्विषां करतलादस्त्राणि, स्त्रीणां नितम्बस्थलाद्वस्त्राणि च पतन्तीत्यर्थः । श्रीमदित्यादि मूढेत्यादि च विशेषणमुभयेषाम् । मोहश्चैकत्र भयेन, अन्यत्र कामेन । **लक्षणानुसरणेऽपि** चतुर्थपादान्तस्य लघोर्गुरुत्वप्रापकशासनत्वेऽपि । सिंहशिरोरुहः । छटा समूहः । **क्रमेणेति** । प्रथमपादे संयुक्तवर्णत्रयेण चानुप्रास इत्यन्तमुत्कृष्टः । द्वितीयपादे टकारत्रयेणैवेति तदपेक्षयापकृष्टः । तृतीयपादे तु क्षकारद्वयेनैवेति ततोऽप्यपकृष्टः । चतुर्थपादे मृदुवर्णद्वयेनैवेति सर्वापकृष्ट इत्यर्थः । अत्र चतुर्थपादस्य शैथिल्येनापि निकर्षो बोध्यः । विसंधिकमुदाहरति—**दलिते इति** । विकसिते इत्यर्थः

---

1. **वसन्ततिलकादेरिति** । आदिपदेनेन्द्रवज्रोपेन्द्रवज्रयोः संग्रहः । एवंप्रायेषु वृत्तेषु प्रथमतृतीयपादावसाने लघुवर्णसद्भावेऽपि श्रव्यता नापचीयते । अत एवोक्तम्—'न पादान्तलघोर्गुरुत्वं च सर्वत्र ।' इति । पादान्तलघोर्गुरुत्वं प्रयोक्तव्यं न सर्वत्र न सर्वसिन्वृत्त इति तदर्थः ॥

१. 'तिलकादौ' क-ख.

[1]एवंविधसंधिविश्लेषस्यासकृत्प्रयोग एव दोषः । अनुशासनमुल्लङ्घ्य वृत्तभङ्गमात्रेण संधिविश्लेषस्य तु सकृदपि । यथा—

'वासवाशामुखे भाति इन्दुश्चन्दनबिन्दुवत् ।'
'चलण्डामरचेष्टितः' इति ।

अत्र संधौ जुगुप्साव्यञ्जकमश्लीलत्वम् ।

'उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः ।'

अत्र संधौ कष्टत्वम् ।

'इन्दुर्विभाति कर्पूरगौरैर्धवलयन्करैः ।
जगन्मा कुरु तन्वङ्गि मानं पादानते प्रिये ॥'

अत्र जगदिति प्रथमार्धे पठितुमुचितम् ।

एवंविधेति । अनुशासनसिद्धेत्यर्थः । **सकृदपीति** । सकृत्प्रयोगेऽपि दोष इत्यन्वयः । वासवाशामुखे पूर्वदिशि । अत्र 'नित्यं संहितैकपदवत् पादेष्वर्धान्तवर्जम्' इत्यनुशासनात् पद्ये संधेर्नित्यत्वमिति तल्लङ्घनाद्दोष इत्यर्थः । **चलमिति** । 'वेगादुड्डीय गगने चलण्डामरचेष्टितः । अयमुड्डीयते पक्षी ततोऽत्रैव रुचिं कुरु ॥' चलन् यथा स्यात्तथेत्यर्थः । डामरमुद्भटं चेष्टितं यस्य सः । **अत्रेति** । चलण्डामरेत्यर्थः । संधावुत्पन्नलण्डाशब्दस्यापभ्रंशविधया पुरीषव्यञ्जकत्वाज्जुगुप्सा । 'रुचिं कुरु' इत्यत्र स्त्रीगुह्याङ्गव्यञ्जकचिह्नशब्दोत्पत्त्या व्रीडा । अमङ्गलाश्लीलसंधिस्तु 'भजते ध्रुवमृतम्' इत्यत्र बोध्यः । ऋतं सत्यं भजत इति संधिवशादमङ्गलम् । **उर्व्यसाविति** । उर्वी महती तर्वाली वृक्षश्रेणी मर्वन्ते निर्जलभूम्यन्ते । चारुरवस्थितिर्यस्याः सा । अर्धान्तरे भिन्नवाक्यघटितपद्यार्धे एवमेव पदं यस्य । अत्र षष्ठ्यर्थो घटकत्वम्, तथा च यद्घटकमेकमेव पदं भिन्नवाक्यघटितपद्यार्धे वर्तते तत्त्वम् । तच्चोत्तरार्धादौ पूर्वार्धान्ते च संभवति । तत्राद्यमुदाहरति—**इन्दुरिति** । अन्त्यं यथा—'जगत्प्रकाशयन्निन्दुः करैः शुभ्रैर्विभाति मा । मानमायतनेत्रान्ते कुरु पादानते प्रिये ॥' अत्र मेतिपदमुत्तरार्धे पठितुमुचितम् । अत्रार्धान्तरोक्तपदस्य यथायथमुत्तरत्र पूर्वत्र वा वाक्ये निराकाङ्क्षत्वप्रतिसंधानेन शाब्दबोधविलम्बनमेव दूषकताबीजम् । समाप्तमन्वयबोधजननान्नि-

---

1. **एवंविधेति** । प्रगृह्यादिहेतुकस्येत्यर्थः । तत्र प्रगृह्यहेतुको विश्लेषः 'दलिते उत्पले—' इत्यत्र दर्शित एव । असिद्धिहेतुकः 'तत उदित उदारहारहारिद्युतिरुच्चैरुदयाच्चलादिवेन्दुः । निजवंश उदात्तकान्तकान्तिर्वत मुक्तामणिवच्चकास्त्यनर्घः ॥' इत्यादौ द्रष्टव्यः । अत्र हि 'लोपः शाकल्यस्य' इति सूत्रेण विहितस्यापि लोपस्य 'आद्गुणः' इत्यनेन प्राप्तं गुणं प्रति 'पूर्वत्रासिद्धम्' इत्यनेनासिद्धिविधानादसिद्धिहेतुकोऽयं विश्लेषः । इह बन्धशैथिल्यमेव दुष्टिबीजम् ॥

'नाशयन्तो घनध्वान्तं तापयन्तो वियोगिनः ।
पतन्ति शशिनः पादा भासयन्तः क्षमातलम् ॥'

अत्र चतुर्थपादो वाक्यसमाप्तावपि पुनरात्तः ।

अभवन्मतसंबन्धो यथा—

'या जयश्रीर्मनोजस्य यया जगदलंकृतम् ।
यामेणाक्षीं विना प्राणा विफला मे कुतोऽद्य सा ॥'

अत्र यच्छब्दनिर्दिष्टानां वाक्यानां परस्परनिरपेक्षत्वात्तदेकान्तःपातिनैणाक्षीशब्देनान्येषां संबन्धः कवेरभिमतो नोपपद्यत एव ।

'यां विनामी वृथा प्राणा एणाक्षी सा कुतोऽद्य मे ।'

इति तच्छब्दनिर्दिष्टवाक्यान्तःपातित्वे तु सर्वैरपि यच्छब्दनिर्दिष्टवाक्यैः संबन्धो घटते । यथा वा—

'ईक्षसे यत्कटाक्षेण तदा धन्वी मनोभवः ।'

अत्र यदित्यस्य तदेत्यनेन संबन्धो न घटते । 'ईक्षसे चेत्' इति तु युक्तः पाठः । यथा वा—

'ज्योत्स्नाचयः पयःपूरस्तारकाः कैरवाणि च ।
राजति[1] व्योमकासारे राजहंसः सुधाकरः ॥'

अत्र[3] व्योमकासारशब्दस्य समासे गुणीभावात्तदर्थस्य न[4] सर्वैः[5] संयोगः।

राकाङ्क्षमपि विशेष्यं पुनर्विशेषणान्तराकाङ्क्षया उक्तं यत्र तत्त्वम् । तदुदाहरति—**नाशयन्त इति** । अत्राकाङ्क्षान्तरकल्पनेन शाब्दबोधविलम्बनं दूषकतावीजम् । अभवन्न संभवन्मत इष्टः संबन्धो यत्र तत्त्वम् । विवक्षितान्वयासंभव इति यावत् । स च क्वचिन्निराकाङ्क्षतया क्वचिद्योग्यतया । **या जयश्रीरिति** । कुतः कुत्र । अन्येषां यत्पदानाम् । **नोपपद्यते इति** । भिन्नविभक्तिकत्वादित्यर्थः । अत्र यामेणाक्षीमित्यन्वयो निराकाङ्क्षत्वादसंभवः । विभक्तिविपरिणामेनात्रान्वयः संभवतीत्यसंतोषादाह— **यथा वेति । अत्रेति** । यदिति पदं न कालार्थकं तदेति तु कालार्थकम्, तयोरभेदान्वयो योग्यताविरहान्न संभवतीति भावः । ननु यदित्यव्ययं यद्यर्थकमप्यस्ति, तथापि तदेत्यस्यान्वयः संभवतीत्यरुचेराह—**यथा वेति** । कासारः सरः । अत्र वाक्यत्रय एव कासारशब्दस्य योगः कवेरभिमतः स तावत् समभिव्याहारविशेषरूपाकाङ्क्षाविरहान्न घटते इत्याह—**अत्रेति** । गुणीभावाद्विशेषणत्वेनान्विततया विश्ले-

---

१. 'राजते' क-ख. २. 'कासारराजहसः' क-ख. ३. 'राजति' ब. ४. 'न' नास्ति. क-घ. पुस्तकयोः. ५. 'सर्वैः क' :क; 'कः' इति नास्ति घ-पुस्तके.

विधेयाविमर्शे[1] यदेवाविमृष्टं तदेव दुष्टम्। इह तु प्रधानस्य कासार-पदार्थस्य प्राधान्येनाप्रतीतेः सर्वोऽपि पयःपूरादिपदार्थस्तदङ्गतया न प्रतीयते, इति सर्ववाक्यार्थविरोधावभासः। इत्युभयोर्भेदः।

'अनेन च्छिन्दता मातुः कण्ठं परशुना तव।
बद्धस्पर्द्धः कृपाणोऽयं लज्जते मम भार्गव॥'

अत्र भार्गवनिन्दायां प्रयुक्तस्य मातृकण्ठच्छेदनस्य[2] परशुना सह संबन्धो न युक्त इति प्राच्याः। परशुनिन्दामुखेन भार्गवनिन्दाधिक्यमेव वैदग्ध्यं द्योतयतीत्याधुनिकाः।

अक्रमता यथा—

'समय एव करोति बलाबलं प्रणिगदन्त इतीव शरीरिणाम्।
शरदि हंसरवाः परुषीकृतस्वरमयूरमयू रमणीयताम्॥'

अत्र परामृश्यमानवाक्यानन्तरमेवेतिशब्दोपयोगो युज्यते, न तु प्रणिगदन्त इत्यनन्तरम्। एवम्—

'द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी॥'

अत्र त्वमित्यनन्तरमेव चकारो युक्तः।

षाभावात्। तदर्थस्य कासारशब्दस्य सर्वैः पयःपूरादिभिः। व्यो(न्नि सरसि) इति तु युक्तः पाठः। विधेयाविमर्शस्य भेदं दर्शयति—**विधेयेति**। भार्गवनिन्दायामिति प्रतिपाद्यायामित्यर्थः। मातृकण्ठच्छेदनस्य मातृकण्ठच्छेदनकर्तृत्वस्य। परशौ छेदनस्य करणत्वमेव न तु कर्तृत्वम्। यद्वा परशौ मातुरित्यस्य संबन्धाभावादवशिष्टस्य संबन्धो न संभवति। प्राच्याः प्राचीनाः। **आधुनिका इति**। अथमाशयः—तवेत्यनुषक्तेन मातुरित्यस्य संबन्धः स्थाली पचैतीतिवत् करणस्यापि कर्तृत्वारोपः। परशोरारोपितेनापि स्त्रीवधकर्तृत्वेन पातकं संभाव्यते, तव तु मुख्येनैव मातृवधकर्तृत्वेन सुतरामतिपातकमिति। अस्य शाब्दबोधविघटकत्वं दूषकताबीजम्। **अक्रमतेति**। अविद्यमानं स्वार्थान्वितार्थकपदप्रत्यासत्तिरूपं क्रमो यत्र तत्त्वमित्यर्थः। वाचकपदस्योक्तक्रमाभावेऽस्थलस्थपदत्वम्, इदं तु तदितरपदस्यैवेति ततोऽस्य भेदः। **समय इति**। परुषीकृतस्वरमयूरं यथा स्यात्तथा रमणीयतां ययुः। प्राप्तवन्त इत्यर्थः। **द्वयमिति**। शिव प्राप्त्यर्थं तपस्यन्तीं पार्वतीं प्रति ब्रह्मचारिरूपधारिणः शिवस्योक्तिरियम। पिनाकिनः शिवस्य कलावतश्चन्द्रस्य नेत्रकौमुदी नयनानन्दजनिका। अस्य प्रत्यासत्तिकल्पनेन शाब्दबोधविलम्बनं दूषकताबीजम्। अमतः प्रकृतविरुद्धः प्रकृतरसविरोधिरस-

---

१. '–मर्शे तु' क-ख. २. 'छेदनकर्तृत्वस्य' घ. ३. 'इत्यादिवत्' पुस्तकान्तरे.

अमतपरार्थता यथा—

'राममन्मथशरेण ताडिता–' इत्यादि ।

अत्र शृङ्गाररसस्य व्यञ्जको द्वितीयोऽर्थः प्रकृतरसविरोधित्वादनिष्टः ।

वाच्यस्यानभिधानं यथा—

'व्यतिक्रमलवं कं मे वीक्ष्य वामाक्षि कुप्यसि ।'

अत्र व्यतिक्रमलवमपीत्यपिरवश्यं वक्तव्यो नोक्तः । न्यूनपदत्वे वाचकपदस्यैव न्यूनता विवक्षिता । अपेस्तु न तथात्वमित्यनयोर्भेदः । एवमन्यत्रापि । यथा वा—

'चरणानतकान्तायास्तन्वि कोपस्तथापि ते ।'

अत्र चरणानतकान्तासीति वाच्यम् ।

भग्नप्रक्रमता यथा—

'एवमुक्तो मन्त्रिमुख्यै रावणः प्रत्यभाषत ।'

अत्र वचधातुना प्रक्रान्तं प्रतिवचनमपि तेनैव वक्तुमुचितम् । तेन 'रावणः प्रत्यवोचत' इति पाठो युक्तः । एवं च सति न कथितपदत्व-

व्यञ्जकः परः श्लेषादिना प्रतीयमानो द्वितीयोऽर्थो यत्र तत्तम् । **रामेति** । व्याख्यातमिदं प्राक् । **प्रकृतेति** । प्रकृतो बीभत्सरसस्तद्विरोधित्वात्तद्विरोधिशृङ्गारव्यञ्जकत्वात् । अस्य प्रकृतरसापकर्षकत्वं दूषकताबीजम् । वाच्यस्यावश्यं वक्तव्यस्यानभिधानम् । न्यूनपदत्वादस्य भेदं दर्शयति—**न्यूनेति** । न तथात्वं न च वाचकत्वम् । पदान्तरप्रत्यासत्तिं विना स्वार्थबोधनासामर्थ्यादित्यर्थः । न्यूनपदत्वे वाचकत्वाविवक्षायां पुनरुक्तोदाहरणं तस्यैवेत्युदाहरणान्तरमाह—**यथा वेति । अत्र चरणेति ।** तथापीत्यस्य भिन्नवाक्यार्थसापेक्षत्वादिति भावः । पूर्वत्रापेरध्याहारेण शाब्दबोधविलम्बनम्, उत्तरत्र तथापीत्यन्वयेन शाब्दबोधविलम्बनं दूषकताबीजम् । **भग्नप्रक्रमतेति** । भग्नो विच्छिन्नः प्रक्रमः प्रस्तावो यस्य तत्तम् । प्रस्तावश्चात्राकाङ्क्षितप्रकारकोऽर्थः । यत्तेन प्रकारेण प्राङ्निर्दिष्टं तस्य तत्प्रकारेणानुक्तिरेव भङ्गः । तथा च प्रत्युत्थिताकाङ्क्षाविषयीकृतेन प्रकारेण पश्चादनुक्तिः क्रमभङ्ग इति फलितम् । **एवमुक्त इति** । अत्रैवमुक्तमिति साकाङ्क्षवाक्येनोत्थापिता प्रतिवचनस्याकाङ्क्षा, सा च पूर्वोक्तशब्दविशिष्टमेव प्रतिवचनं विषयीकरोति । अत्र आकाङ्क्षिताया वचधातुरूपप्रकृतेः प्रकारस्य भाषधातुनिर्देशाद्भङ्गः । **तेनैव वक्तुमुचितमिति** । तथा सति प्रथमोत्थापिताकाङ्क्षापूरणं भवतीति भावः । ननु 'प्रत्यवोचत' इति पाठे कथितपदत्वदोषप्रसङ्ग इत्यत आह—**एवं च सतीति** । एवं सतीत्यर्थः । तस्य कथितपदत्वस्य । उद्देश्यप्रतिनिर्देश्यभावे तु कथितपदत्वं गुण एव । तदुक्तम्—'प्रक्रमस्यान्यथाभावे

दोषः। तस्योद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयकत्वात्। इह हि वचनप्रतिवचनयोरुद्देश्यप्रतिनिर्देशत्वम्। यथा—

'उदेति सविता ताम्रस्ताम्र एवास्तमेति च।'

इत्यत्र हि यदि पदान्तरेण स एवार्थः प्रतिपाद्यते तदान्योऽर्थ इव प्रतिभासमानः प्रतीतिं स्थगयति।

स एव तु महान्गुणः' इति। स एव कथितपदत्वदोष एव। उद्देश्यप्रतिनिर्देश्यभावश्च त्रिविधः। एकविधेयार्थमुद्दिष्टस्य विधेयान्तरे प्रतिनिर्देश इत्येकः। यथा—**उदेतीति**। अत्रोदयकालीनताम्रत्वविधावुद्दिष्टस्य सवितुरस्तमयकालीनताम्रत्वविधावुद्दिश्यतया प्रतिनिर्देशः। एकोद्देशेन विहितस्योद्देश्यान्तरे विधेयतया पतिर्निदश इत्यपरः। यथा—**एवमुक्त इति**। अत्र मन्त्रिमुख्योद्देशेन विहितस्य वचनस्य रावणोद्देशेन विधेयतया प्रतिनिर्देशः। प्रतिवचनेऽपि वचनत्वसत्वादेकत्वम्। एतदेव दर्शयति—**इह हीति**। एकोद्देशेन विहितस्य विधेयान्तरे उद्देश्यतया प्रतिनिर्देश इति तृतीयः। यथा–'मिता भूः पत्न्यापां स च पतिरपां योजनशतम्' इति। अत्र पृथिव्युद्देशेन विहितस्यापां पत्युर्योजनशतविधावुद्देश्यतया प्रतिनिर्देशः। चण्डीदासास्तु—'उद्देश्योऽनूद्यः स एव प्रतिनिर्देश्यः प्रतीतिमान्थर्यपरिहारार्थं पुनरभिधेयो यत्र स तथोक्तः' इत्याहुः। तेषामयमाशयः—उद्देश्यपदं प्राङ्निर्दिष्टोद्देश्यविधेयान्यतरपरम्, प्रतिनिर्देश्यपदं च चरमनिर्दिष्टोद्देश्यविधेयान्यतरपरम्। तथा सति सर्वं समञ्जसम्। उद्देश्यप्रतिनिर्देश्यभावे एकशब्दस्य पुनः प्रयोगे दोषाभावमुदाहरणदर्शनेन प्रमाणयति—**उदेतीति**। अत्र ताम्रपर्यायरक्तशब्ददाने भग्नप्रक्रमत्वं प्रदर्श्य तस्य दूषकतावीजं प्रदर्शयति–**अत्र हीति। अन्योऽर्थ इवेति**। 'न सोऽस्ति प्रत्ययो लोके यत्र शब्दो न भासते' इति नियमात्ताम्ररक्तशब्दरूपविशेषणभेदान्न्यार्थवद्भासमानत्वम्। तथा सति 'संपत्तौ च विपत्तौ च महतामेकरूपता' इत्युत्तरार्धस्य

---

1. **उद्देश्येति**। उद्देश्यः प्राक्प्रत्यायित एव प्रतिनिर्देश्यः पुनः प्रत्याय्यो यत्र तस्माद् व्यतिरिक्तो विषयो यस्य तथा। पूर्वापरयोरेकरूपत्वप्रतिपत्तये यत्र प्राङ्निर्दिष्टस्यार्थस्य तेन शब्देन तेन च रूपेण पुनर्निर्देश्यावश्यकत्वं तदतिरिक्तस्थले कथितपदत्वदोषः। इह त्वभेदबोधनार्थं पुनरुक्तिरुत्कर्षावहा। अयमेवार्थः 'उदेति सविता–' इति दृष्टान्तभूतोदाहरणेन विशदीकृतः॥

2. **पदान्तरेणेति**। 'रक्त एवास्तमेति च' इत्याकारेण॥

---

१. '–विषयत्वम्' घ. २. 'इह हि–' इत्यादिः '–निर्देशत्वम्।' इत्यन्तः पाठो घ-पुस्तके नास्ति. ३. 'हि' घ-पुस्तके नास्ति. ४. इतोग्रे 'न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते' इत्यधिकं पुस्तकान्तरे.

यथा वा—

'ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥'

अत्र 'अस्मै' इतादमा प्रक्रान्तस्य तेनैव तत्समानाभ्यामेतदद:शब्दाभ्यां वा परामर्शो युक्तो न तच्छब्देन । यथा वा—

'उदन्वच्छिन्ना भूः स च पतिरपां योजनशतम् ।'

अत्र 'मिता भूः पत्यापां स च पतिरपाम्' इति युक्तः पाठः । एवम्—

'यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥'

अत्र 'सुखमीहितुम्' इत्युचितम् । अत्राद्ययोः प्रकृतिविषयः प्रक्रमभेदः । तृतीये पर्यायविषयः, चतुर्थे प्रत्ययविषयः । एवमन्यत्रापि ।

शाब्दबोधविलम्बनमिति भावः । सर्वनामपदस्य प्रक्रमभङ्गं दर्शयति—**ते हिमालयमामन्त्र्येति** । यद्यपि सर्वनाम्ना प्रतिनिर्देशे दोषो नास्तीति प्रसिद्धम्, तथाप्यनुभवबलेनासर्वनामनिर्दिष्टस्य सर्वनाम्ना प्रतिनिर्देशे तद्बोध्यम्, सर्वनामनिर्दिष्टस्य नेति बोध्यम् । इदमा इदंशब्देन । तेनैव इदमैव । समानाभ्यां समानार्थाभ्याम् । एतदादिशब्दत्रयस्य समानार्थकत्वं सुप्रसिद्धमिति शब्दभेदेऽपि, न तु तद्दूषणावकाश इति भावः । उद्देश्यप्रतिनिर्देश्यभावस्य तृतीयं प्रकारं दर्शयति—**उदन्वदिति** । उदन्वच्छिन्ना समुद्रपरिच्छिन्ना । मनुष्यसंख्यां सामान्यमनुष्येषु गणनाम् । अतिवर्तितुमतिक्रमितुम् । निरुत्सुकानामनुत्कण्ठितचित्तानाम् । अभियोगः उद्योगः । अत्रेच्छार्थकतुमङ्प्रत्ययेनोप्रक्रमस्य तत्समानार्थकसन्प्रत्ययेन भङ्गः । यशोऽधिगमनोद्देशेन विहिताया इच्छायाः सुखलोभोद्देशेनापि विधेयतया निर्देशः । दर्शितोदाहरणानां विशेषमाह—**अत्राद्ययोरिति** । एषूदाहरणेषु आद्ययोः 'एवमुक्तः' इति 'ते हिमालयम्' इत्येतयोः । तृतीये 'उदन्वच्छिन्ना' इत्यादौ । चतुर्थे 'यशोऽधिगन्तुम्' इत्यादौ । **एवमन्यत्रेति** । कारकोपसर्गादावपि प्रक्रमभङ्गो बोद्धव्य इत्यर्थः । तत्र कारकविषयो यथा—'गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु । विश्रब्धैः क्रियतां वराहपतिभिर्मुस्तक्षतिः पल्वले विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥' अत्र प्रत्ययोक्तकर्तृकारकोपक्रमस्य क्रियतामित्यत्र भङ्गः । कर्मकारकस्योक्तत्वात् । परे तु कर्तृकारकाणां प्रथमोपक्रमस्य वराहपतिभिरिति तृतीयायां भेदः । 'विश्रब्धा रचयन्तु शूकरवरा मुस्तक्षतिं पल्वले' इति युक्तः पाठः । उपसर्गविषयो यथा—'चपलाचपलास्वेव नापत्सु विकलो भवेत् । विपत्सु धीरता यस्य भाजनं स हि संपदः ॥' चपलाचपलासु विद्युच्चञ्चलासु ।

प्रसिद्धित्यागो यथा—

'घोरो वारिमुचां रवः ।'

अत्र मेघानां गर्जितमेव प्रसिद्धम् ।

यदाहुः—

'मञ्जीरादिषु रणितप्रायं पक्षिषु तु कूजितप्रभृति ।
स्तनितमणितादिसुरते मेघादिषु गर्जितप्रमुखम् ॥' इत्यादि ।

अस्थानस्थपदता यथा—

'तीर्थे तदीये गजसेतुबन्धात्प्रतीपगामुत्तरतोऽस्य गङ्गाम् ।
अयत्नबालव्यजनीबभूवुर्हंसा नभोलङ्घनलोलपक्षाः ॥'

अत्र तदीयपदात्पूर्वं गङ्गामित्यस्य पाठो युक्तः । एवम्—

'हितान्न यः संशृणुते स किंप्रभुः ।'

अत्र संशृणुत इत्यतः पूर्वं नञः स्थितिरुचिता ।

अत्र च पदमात्रस्यास्थाने निवेशेऽपि सर्वमेव वाक्यं विवक्षितार्थप्रत्यायने मन्थरमिति वाक्यदोषता । एवमन्यत्रापि । इह केऽप्याहुः—'पदशब्देन वाचकमेव प्रायो निगद्यते, न च नञो वाचकता निर्विवादात्स्वातन्त्र्येणार्थबोधनविरहात्' इति । यथा—'द्वयं गतम्—' इत्यादौ त्वमित्यनन्तरं चकारानुपादानादक्रमता तथात्रापीति ।

अत्रापत्स्विलत्र आङुपसर्गोपक्रमस्य विपत्स्विलत्र वेरुपादानाद्भ्रंशः । **मेघानामिति** । मेघानां शब्दे गर्जितमेव गर्जितादिशब्द एव, तत्परित्यागाद्रसादिप्रकर्षबोधप्रतिरोधः । प्रसिद्धमाह—**मञ्जीरादिष्विति** । आदिना रसादीनां ग्रहणम् । **रणितप्रायमिति** । प्रायशब्द आद्यर्थः । तेन शिञ्जितादीनां ग्रहणम् । मञ्जीरादिशब्देषु रणितादिशब्दः प्रयोक्तव्यः । एवमग्रेऽपि । मेघादिष्विलादिना हस्त्यादिपरिग्रहः । प्रमुखमित्यनेन रसादिग्रहणम् । एवं भ्रमरादिषु गुञ्जितादि, मण्डूकादिषु रवादि, हयेषु हेषितादि, हस्तिषु बृंहितादि । एवमन्यदपि बोद्धव्यम् । तदीये गङ्गासंबन्धिनि । ननु पदमात्रस्यास्थानस्थितिः पददोष एव कथमस्य वाक्यदोषत्वमत आह—**अत्र पदमात्रस्येति** । सर्वा औदुम्बरी ताम्रप्रतिमा(?)वेष्टयितव्येतिवत् सर्वपदमत्राक्यवयवसमुदायपरम् । मन्थरं विलम्बसहम् । स्वातन्त्र्येण पदान्तरसमभिव्याहारविरहेण (तद्गुण) **विरहादिति** । इतिशब्दो हेतौ । अत्र स्वगुणव्यञ्जकस्य समासस्य तद्र-

---

१. 'वाचक एव प्रयोगः' घ. २. 'तद्गुण' इति पुस्तकान्तरे नास्ति. ३. 'अत्र स्वगुण-' इति पुस्तकान्तरे नास्ति.

अस्थानस्थसमासता यथा—

'अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं वाञ्छति मान एष धिगिति क्रोधादिवालोहितः ।
प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणा-
त्फुल्लत्कैरवकोषनिःसरदलिश्रेणीकृपाणं शशी ॥'

अत्र कोपिन उक्तौ समासो न कृतः । कवेरुक्तौ कृतः ।

वाक्यान्तरपदानां वाक्यान्तरेऽनुप्रवेशः **संकीर्णत्वम्** । यथा—

'चन्द्रं मुञ्च कुरङ्गाक्षि पश्य मानं नभोङ्गने ।

अत्र नभोङ्गने चन्द्रं पश्य मानं मुञ्चेति युक्तम् ।

'क्लिष्टत्वमेकवाक्यविषयम्' इत्यस्माद्भिन्नम् ।

वाक्यान्तरे वाक्यान्तरानुप्रवेशो **गर्भितता** । यथा—

'रमणे चरणप्रान्ते प्रणतिप्रवणेऽधुना ।
वदामि सखि ते तत्त्वं कदाचिन्नोचिताः क्रुधः ॥'

अर्थदोषानाह—

अपुष्टदुष्क्रमग्राम्यव्याहताश्लीलकष्टताः ।
अनवीकृतनिर्हेतुप्रकाशितविरुद्धताः ॥ ९ ॥
संदिग्धपुनरुक्तत्वे ख्यातिविद्याविरुद्धते ।
साकाङ्क्षता सहचरभिन्नतास्थानयुक्तता ॥ १० ॥
अविशेषे विशेषश्चानियमे नियमस्तथा ।

साव्यञ्जकस्थानपातोऽस्थानस्थसमासत्वम् । **अद्यापीति** । संध्याकाले स्फुटतः कैरवकोरकान्निःसरतामलीनां श्रेणीरूपं कृपाणं शशी कर्षति । कोषपदश्लेषात् कुड्मलस्य खड्गापिधानत्वं व्यङ्ग्यम् । कीदृशः । दूरे प्रसारितः करो रश्मिरेव करो हस्तो यस्य सः । किमर्थं कृपाणकर्षणमित्यत्राह—**अद्यापीति** । ममोदयकालेऽपीत्यर्थः । अन्यदा खिदमाश्रित्य तिष्ठतु, ममोदये सत्यपि स्थातुं वाञ्छति, तन्मां धिगिति क्रोधादिवालोहितः । कोपिन उत्प्रेक्षितक्रोधस्य शशिनो दीर्घसमासो हि रौद्ररसव्यञ्जकस्तद्वर्णनस्थानं क्रुद्धस्योक्तिर्न तु कवेरुक्तिरिति भावः । अत्र नभोङ्गन इति । नन्वत्र व्यवहितान्वयत्वाक्लिष्टत्वमेवेदमित्यत आह—**क्लिष्टत्वमिति** । संकीर्णत्वं तु वाक्यद्वयविषयमिति, अस्मात् संकीर्णात् तस्य भेद इत्यर्थः । प्रणतिप्रवणे प्रणामपरायणे कान्ते कदाचिदपि क्रुधो नोचिताः । अधुना प्रणतिसमये पुनः सुतरां नोचिता इति । तत्त्वं हितं सारं तेऽहं वदामीत्यन्वयः । अनयोः प्रत्यासत्त्यभावेन शाब्दबोधो न जायत इति शाब्दबोधविघटकत्वं दूषकताबीजम् । उद्देशक्रमप्राप्तानर्थदोषान्निरूपयति—**अपुष्टेति** । ख्यातिविरुद्धता, विद्याविरुद्धता च । तयोरविशेषविशेषानियमानियमयोः ।

तयोर्विपर्ययौ विध्यनुवादायुक्तते तथा ॥ ११ ॥
निर्मुक्तपुनरुक्तत्वमर्थदोषाः प्रकीर्तिताः ।

तद्विपर्ययो विशेषेऽविशेषो नियमेऽनियमः । **अत्रापुष्टत्वं** मुख्यानुपकारित्वम् । यथा—

'विलोक्य विततते व्योम्नि विधुं मुञ्च रुषं प्रिये ।'

अत्र विततशब्दो मानत्यागं प्रति न किंचिदुपकुरुते । अधिकपदत्वेऽपदार्थान्वयप्रतीतेः समकालमेव बाधप्रतिभासः, इह तु पश्चादिति विशेषः ।

दुष्क्रमता यथा—

'देहि मे वाजिनं राजन्गजेन्द्रं वा मदालसम् ।'

अत्र गजेन्द्रस्य प्रथमं याचनमुचितम् ।

'स्वपिहि त्वं समीपे मे स्वपिम्येवाधुना प्रिये ।'

अत्रार्थो **ग्राम्यः** ।

कस्यचित्प्रागुत्कर्षमपकर्षं वाभिधाय पश्चात्तदन्यप्रतिपादनं **व्याहततत्वम्** । यथा—

विपर्ययौ विशेषाविशेषनियमानियमौ । विध्ययुक्तता, अनुवादायुक्तता च । मुख्यार्थतेति विशेषणादीनां पर्यवसितार्थादुत्कर्षकत्वमित्यर्थः । **विततशब्द इति** । स्वार्थबोधद्वारेति शेषः । एतदुपलक्षणम् । व्योमवृत्तित्वमपि विशेषणमपुष्टम् । स्मरोद्दीपकत्वेन प्रसिद्धस्य चन्द्रस्य दर्शनमेव मानत्यागस्य मुख्यार्थस्य उपकारि, न तु तस्य व्योमवृत्तित्वं व्योम्नो विततत्वं वा । नन्वेवं पदद्वयमत्राधिकमित्यधिकपदत्वमेवात्र दोषः किमपुष्टत्वस्य दोषत्वस्वीकारेणेत्यतोऽस्य भेदं दर्शयति—**अधिकेति**। बाधप्रतिभासः मुख्यार्थोपकारविरहप्रत्ययः । **दुष्क्रमतेति** । 'प्राग्वाच्य उच्यते पश्चात्पश्चाद्वाच्योऽथवाग्रतः । कविना शक्तिवैकल्याद्योऽर्थस्तं दुष्क्रमं विदुः ॥' इत्युक्तलक्षणा दुष्क्रमता । **अत्रेति** । बहुमूल्यं वस्तु प्रथमं याच्यते तदप्राप्तिसंभावनायामल्पमूल्यं वस्तु याच्यते इति याचनक्रमः । तदभावादत्र दुष्क्रमत्वम् । अनयोरर्थस्यापुष्टत्वदुष्क्रमत्वप्रतिसंधानेन रसादिप्रतीतिविलम्बनमेव दूषकताबीजम् । एवमग्रेऽपि यथायथं ज्ञेयम् । ग्राम्यत्वमुदाहरति—**स्वपिहीति** । 'स ग्राम्यः स्त्रिरिरंसायां पामरैर्यत्र कथ्यते । वैदग्धविक्रमलयं हित्वैव वनितादिषु ॥' लयः संबन्धः । इत्युक्तलक्षणा ग्राम्यता । **कस्यचिदिति** । प्रतिपादितोत्कर्षस्यापकर्षप्रतिपादनं प्रतिपादितापकर्षस्योत्कर्षप्रतिपादनं व्याहतत्वम् । तत्र प्रथमं यथा—'कान्ते तव मुखाम्भोजं सुतरां हृदयंगमम् । जितानि येन पद्मानि वसन्ति सलिले सदा ॥' अत्र मुखे पद्मत्वारोपणेनोत्कर्षकथनम्, पश्चान्मुखेन पराभवादपकर्षकथनम् । द्वितीयमाह—

'हरन्ति हृदयं यूनां न नवेन्दुकलादयः ।
वीक्ष्यते यैरियं तन्वी लोकलोचनचन्द्रिका ॥'

अत्र येषामिन्दुकला नानन्दहेतुस्तेषामेवानन्दाय तन्व्याश्चन्द्रिकात्वारोपः ।

'हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः ।
यथाशु जायते पातो न यथा पुनरुन्नतिः ॥'

अत्रार्थोऽश्लीलः ।

'वर्षत्येतदहर्पतिर्न तु घनो धामस्थमच्छं पयः
सत्यं सा सवितुः सुता सुरसरित्पूरो यथा प्लावितः ।
व्यासस्योक्तिषु विश्वसित्यपि न कः श्रद्धा न कस्य श्रुतौ
न प्रत्येति तथापि मुग्धहरिणी भास्वन्मरीचिष्वपः ॥'

हरन्तीति । अत्रेन्दुकलायाः प्रागपकर्षाभिधानं पश्चान्नायिकाया उत्कर्षार्थं चन्द्रकलाकिरणरूपचन्द्रिकात्वमारोपितम्। अश्लीलत्वमाह—**हन्तुमेवेति**। हन्तुं शत्रुं मारयितुम्। स्तब्धस्य अस्त्रक्षेपकुण्ठस्य विवेकरहितस्य वा। विवरैषिणः परच्छिद्राभिलाषिणः। पातोऽभिभवः। उन्नतिर्जयः। अर्थान्तरं तु—हननं वात्स्यायनादिप्रसिद्धं निर्घातादि। स्तब्धस्याद्दलिङ्गस्य। विवरं योनिच्छिद्रं तद्गामिनः। पातो रत्युत्तरं नम्रता। उन्नतिः पुनरुद्गमः। अत्र प्रकरणाद्बोधविशेषो लक्ष्यते। अद्दलिङ्गरूपद्वितीयार्थस्त्वर्थवशादेवेत्यर्थदोषत्वमस्य। **अश्लील इति**। पुंव्यञ्जकप्रकाशकत्वादिति शेषः। इदं व्रीडाव्यञ्जकं जुगुप्सामङ्गलव्यञ्जकयोरुदाहरणमूह्यम्। कष्टत्वमाह—**वर्षत्येतदिति**। आसत्त्यादिसत्त्वेऽपि विलम्बबोध्यत्वं कष्टत्वम्। विलम्बबीजं तु तात्पर्यग्राहकाभावः। अहर्पतिः सूर्यः। घनानां जलाधारत्वमात्रम्, न तु वृष्टिकर्तृत्वम्। धामस्थं चन्द्रमण्डलस्थम्। सुरसरिद्गङ्गा तस्याः पूरो जलप्रवाहः। प्लावितो वर्धितः। उक्तमर्थं प्रमाणयति—**व्यासस्येति**। व्यासस्योक्तिषु पुराणेषु। तथापि सूर्यकिरणानां जलप्रत्ययहेतुत्वस्योचितत्वेऽपि। मुग्धेति जलप्रत्ययाभावे हेतुः। भास्वन्मरीचिषु सूर्यकिरणेषु। तथा च विष्णुपुराणम्—'विवस्वानष्टभिर्मासैरादायापो रसात्मिकाः। वर्षत्यम्बु ततस्तस्मादन्नाद्यखिलं जगत् ॥ विवस्वानंशुभिस्तीक्ष्णैरादाय जगतो जलम्। सोमं पुष्यत्यथेन्दुश्च वायुनाडीमयैर्दिवि ॥ नालैर्विक्षिपतेऽभ्रेषु धूमाभ्यनिलमूर्तिषु। न भ्रश्यन्ति ततस्तेभ्यो जलान्यभ्राणि तान्यतः ॥ अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः। संस्कारं कालजनितं मैत्रमासाद्य निर्मलाः ॥' इति। 'आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' इति श्रुतिरपि। 'सूर्यस्य पत्नी संज्ञाभूत्तनया विश्वकर्मणः। मनुर्यमो यमी चैव तदपत्यानि वै

अत्र यस्मात्सूर्याद्वृष्टेर्यमुनायाश्च प्रभवस्तस्मात्तयोर्जलमपि सूर्यप्रभवम् । ततश्च सूर्यमरीचीनां जलप्रत्ययहेतुत्वमुचितम् । तथापि मृगी भ्रान्तत्वात्तत्र जलप्रत्ययं न करोति । अयमप्रस्तुतोऽप्यर्थो दुर्बोधः दूरे चास्मत्प्रस्तुतार्थबोध इति **कष्टार्थत्वम्** ।

'सदा चरति खे भानुः सदा वहति मारुतः ।
सदा धत्ते भुवं शेषः सदा धीरोऽविकत्थनः ॥'

अत्र सदेत्यनवीकृतत्वम् । अत्रास्य पदस्य पर्यायान्तरेणोपादानेऽपि यदि नान्यद्विच्छित्त्यन्तरं तदास्य दोषस्य सद्भाव इति कथितपदत्वाद्भेदः ।

नवीकृतत्वं यथा—

'भानुः सकृद्युक्ततुरङ्ग एव रात्रिंदिवं गन्धवहः प्रयाति ।
विभर्ति शेषः सततं धरित्रीं षष्ठांशवृत्तेरपि धर्म एषः ॥'

'गृहीतं येनासीः परिभवभयान्नोचितमपि
प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः ।
परित्यक्तं तेन त्वमपि सुतशोकान्न तु भया-
द्विमोक्ष्ये शस्त्रं त्वामहमपि यतः स्वस्ति भवते ॥'

अत्र द्वितीयशस्त्रमोचने हेतुर्नोक्त इति **निर्हेतुत्वम्** ।

पुने ॥' इति विष्णुपुराणम् । यमी यमुना । कष्टत्वमुपपादयति—**अत्रेति** । तयोर्वृष्टियमुनयोः वाक्येन सूर्यस्य वृष्टियमुनाहेतुत्वमेव प्रतिपाद्यते । तस्मादित्याद्यर्थस्तु तात्पर्यवशात्प्रतीयते । तस्य तात्पर्यस्य ग्राहकाभावाद्विलम्ब इति भावः । अस्मत्प्रस्तुतार्थबोधः मद्विधानां प्रस्तुतार्थबोधः । 'तस्मात्' इति पाठे व्यक्त एवार्थः । मुग्धनायिकाया नायकात्स्वाभीष्टलाभाप्रत्ययः प्रस्तुतः । अत्र तात्पर्यप्रतिसंधानविलम्बेन शब्दबोधविलम्बनं दूषकताबीजम् । अनवीकृतत्वमाह—**सदेति** । बहुशः प्रतिपादितोऽर्थस्य भङ्गीपरावृत्तिं विना एकयैव भङ्ग्या प्रतिपाद्यत्वं तत्त्वम् । अविकत्थनोऽनाश्लाघाकरः । अत्रैकशब्देन बहुशः प्रतिपादनीयोऽर्थः पुरातनवद्भासमानो रसादेरुत्कर्षकः । ननु कथितपदत्वादस्य को भेद इत्यत आह—**अत्रास्येति** । अस्यानवीकृतार्थबोधकस्य । उपादानेऽपीत्यपिना तच्छब्दोपादाने च । अन्यत् पूर्वपदविभक्तिसमासादिप्रतिपादितभिन्नं विच्छित्त्यन्तरं विभक्तिसमासादिप्रतिपादितार्थविशेषः । स्य अनवीकृतत्वस्य । तथा चोक्तविच्छित्तिविशेषसद्भाव एव कथितपदत्वदोषः । वीकृतत्वग्रहं विना अनवीकृतत्वप्रतीतिर्न जायते इति नवीकृतत्वमाह—**नवीकृतमिति** । भङ्ग्यन्तरेण प्रतिपादने नूतनवद्भासमानमित्यर्थः । षष्ठांशवृत्ते राज्ञः । एष युक्ततुरङ्गत्वादिरूपः । निर्हेतुत्वमुदाहरति—**गृहीतमिति** । हेत्वाकाङ्क्षासत्त्वे तद-

'कुमारस्ते नराधीश श्रियं समधिगच्छतु ।'

अत्र 'त्वं श्रियस्व' इति विरुद्धार्थप्रकाशनात्**प्रकाशितविरुद्धत्वम्** ।

'अचला अबला वा स्युः सेव्या ब्रूत मनीषिणः ।'

अत्र प्रकरणाभावाच्छान्तशृङ्गारिणोः [1]को वक्तेति निश्चयाभावात्**संदिग्धत्वम्** ।

'सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥'

अत्र द्वितीयार्धव्यतिरेकेण द्वितीयपादस्यैवार्थ इति **पुनरुक्तता** । **प्रसिद्धिविरुद्धता** यथा—

'ततश्चचार समरे शितशूलधरो हरिः ।'

अत्र हरेः शूलं लोकेऽप्रसिद्धम् । यथा वा—

'पादाघातादशोकस्ते संजाताङ्कुरकण्टकः ।'

अत्र पादाघातादशोकेषु पुष्पमेव जायत इति प्रसिद्धं न त्वङ्कुर इति कविसमयख्यातिविरुद्धता ।

नभिधानं तत्वम् । कर्ण प्रति क्रोधात्त्यज्यमानमस्त्रं संबुध्य अश्वत्थान्न उक्तिरियम् । हे शस्त्र, येन मम पित्रा द्रुपदरूपशत्रुपरिभवभयान्नोचितमपि ब्राह्मणजात्यनुचितमपि त्वं गृहीतमासीः । यस्य मम पितुः प्रभावात्तव विषयः कश्चिन्न नाभूत्, अपि तु सर्व एव । तेन मम पित्रा सुतशोकान्मृतत्वेन मिथ्याश्रुतस्य मम शोकात् त्वं परित्यक्तमसि, भयात्तु न । अहमपि त्वां विमोक्ष्ये त्यक्ष्यामि । यतो मोक्षणाद्भवते स्वस्तीत्यर्थः । अत्र हेतोरप्रसिद्धत्वेनाकाङ्क्षा । प्रकाशितविरुद्धत्वमाह—**कुमार इति** । प्रकाशितं परिलोचनया व्यञ्जितं विरुद्धं प्रकृतविरुद्धं येन तत्वम् । **अत्रेति** । राज्ञो मङ्गलं प्रकृतं मरणं तु तद्विरुद्धम् । अत्रार्थेन विरुद्धार्थव्यञ्जनमनुचितार्थत्वे पदेनेति ततो भेदः । संदिग्धत्वमुदाहरति—**अचला इति** । वक्त्रभिप्रेतव्यङ्ग्यार्थस्य तत्तात्पर्यविषयत्वसंदेहात्संदेहविषयत्वं तत्त्वम् । मनीषिण इति संबोधनम् । अचलसेवाया वक्तुरभिमतत्वे शान्तः अबलासेवायास्तु शृङ्गारो व्यङ्ग्यः । अनयोरेकतरस्मिंस्तात्पर्यनिश्चयाभावाद्रसनिश्चयप्रतिबन्धः । शान्तशृङ्गारिणोरिति निर्धारणे षष्ठी सप्तमी वा । पुनरुक्तत्वमुदाहरति—**सहसेति** । पदं कारणम् । वृणते प्राप्नुवन्ति । विमृश्यकारिणं विचार्यकर्तारम् । द्वितीयार्धार्थः । व्यतिरेकेण वैपरीत्येन । यथा—अधर्मो दुःखसाधनमित्युक्ते धर्मस्य सुखसाधनत्वमुपलभ्यते तथात्रापीति भावः । ख्यातिविरुद्धतामुदाहरति—**प्रसिद्धीति** । लोककविसंप्रदायवैपरीत्यं तत्वम् । **शितेति** । शाणितेत्यर्थः । ते कामिन्याः । अङ्कुर एव कण्टको रोमोद्गमः । कविसमयः कविसंप्रदायसिद्धान्तः ।

---

१. 'एकोक्तिनिश्चयाभावात्' क.

'अधरे करजक्षतं मृगाक्ष्याः ।'

अत्र शृङ्गारशास्त्रविरुद्धत्वाद्विद्याविरुद्धता । एवमन्यशास्त्रविरुद्धत्वमपि ।

'ऐशस्य धनुषो भङ्गं क्षत्रस्य च समुन्नतिम् ।
स्त्रीरत्नं च कथं नाम मृष्यते भार्गवोऽधुना ॥'

अत्र स्त्रीरत्नमुपेक्षितुमित्याकाङ्क्षता ।

'सज्जनो दुर्गतौ मग्नः कामिनी गलितस्तनी ।
खलः पूज्यः समज्यायां तापाय मम चेतसः ॥'

अत्र सज्जनः कामिनी च शोभनौ तत्सहचरः खलोऽशोभन इति **सहचरभिन्नत्वम्** ।

'आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी ।

विद्याविरुद्धतामाह—**अधर इति** । करजक्षतं नखघातः । साकाङ्क्षतामाह—**ऐशस्येति** । शिवसंबन्धिन इत्यर्थः । मृष्यते न द्वेष्टि । **अत्रेति** । द्वेषयोग्य एवमुक्तिरुपपद्यते, स्त्रीरत्नं च न द्वेषयोग्यम्, इत्यतस्तदुपेक्षायां द्वेषयोग्यतायामाकाङ्क्षेत्यत आह—**उपेक्षितुमितीति** । ननु न्यूनपदत्वादस्य को विशेष इति चेत्तत्र शब्दाध्याहारः, इह त्वर्थाध्याहार इति विशेषः । वस्तुतस्तु—अनन्वयित्वभ्रमेण प्रयुक्तस्य पदार्थस्यानुपपत्तिपदार्थसाकाङ्क्षत्वं तत्वम् । न्यूनपदे तु नेदृशो भ्रमः । सहचरभिन्नतामाह—**सज्जन इति** । उत्कृष्टैः सह निकृष्टस्य निकृष्टैः सह उत्कृष्टस्य चैकान्वयित्वेन निर्देशस्तत्त्वम् । तत्राद्यं यथा—**सज्जन इति** । समज्यायां सभायाम् । द्वितीयं यथा—'दुष्टसङ्गेन दौःशील्यं व्यसनेन तथा विपत् । अपथ्यचर्यया व्याधिर्विद्याभ्यासेन वर्धते ॥' तत्र दौःशील्यविपद्व्याधयो हेयत्वान्निकृष्टाः । विद्योपादेयत्वादुत्कृष्टा । अस्थानयुक्ततामाह—**आज्ञेति** । अनुपयुक्तस्थाने । समापितवाक्यार्थत्वमस्थानयुक्तता । तच्च द्विविधम्—वाक्यार्थस्याधिकोपयोगे समापनम्, समापनोपयोगे चाधिक्यम् । तदुक्तम्—'युक्ताधिक्ये विसर्गः स्यादाधिक्यं च समापने । अर्थे प्रकल्पिते यत्र सोऽस्थाने स्यात्समुज्झितः॥' इति । तत्राद्यं यथा—'मातुलो माधवो यस्य पिता यस्य धनंजयः । स शेते समरे श्रीमानभिमन्युर्महाबलः ॥' अत्र 'नियतिः केन बाध्यते' इत्यधिकं वक्तुं योग्यम् । द्वितीयमुदाहरति—**आज्ञेति** । रावणपुरोहितेन रावणार्थं सीताप्रार्थने कृते जनकपुरोहितस्य शतानन्दस्य रावणस्य प्रशंसापूर्वकमुपेक्षाबीजप्रदर्शनमिदम् । पञ्चसु वाक्येषु यस्येति बोध्यम् । प्रणयिनी सहचरी । शक्रेण शिरोमणिरिव रावणाज्ञा धार्यत इत्यन्वयः । एतेनास्य वीरत्वं सूचितम् । तच्च स्त्रीणाम[न]भिमतम् । शास्त्राण्येव नवमधिकं चक्षुः । शास्त्रदृष्ट्या कर्मकरणात् । एतेन धीमत्वं सूचितम् । 'युवा धीमाञ्जन-

उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ॥'

अत्र न रावण इत्येतावतैव समाप्यम् ।

'हीरकाणां निधेरस्य सिन्धोः किं वर्णयामहे ।'

अत्र रत्नानां निधेरित्यविशेष एव वाच्यः ।

'आवर्त एव नाभिस्ते नेत्रे नीलसरोरुहे ।
भङ्गाश्च वलयस्तेन त्वं लावण्याम्बुवापिका ॥'

अत्रावर्त एवेति नियमो न वाच्यः ।

'यान्ति नीलनिचोलिन्यो रजनीष्वभिसारिकाः ।'

अत्र तमिस्रास्विति रजनीविशेषो वाच्यः ।

'आपातसुरसे भोगे निमग्नाः किं न कुर्वते ।'

अत्र आपात एवेति नियमो वाच्यः ।

प्रियः' इत्यनेन वरगुणत्वेनास्योक्तत्वात् । भूतानामीश्वरे पिनाकिनि शिवे । एतेन संपदैश्वर्यप्रजाभोगित्वं सूचितम् । संपदादीनां शिवसेवाफलत्वेनोक्तत्वात् । तेन धनवत्त्वमपि वरगुणो लभ्यते । 'माता वरयते वित्तं पिता वरयते कुलम् । कन्या वरयते रूपं सौभाग्यमितरे जनाः ॥' इति । सौभाग्यं जनप्रियत्वम् । पदं स्थानम् । द्रुहिणस्य ब्रह्मणोऽन्वये कुले । एतेन मत्कुलजातत्वं वरगुणः सूचितः । उपेक्षाबीजमाह—**स्याच्चेदेषेति** । रावयति पीडनेन लोकान् आतुरान् करोतीति रावणः । एष यदि दुर्वृत्तत्वेन ख्यातनामा न स्यात्तदेदृग्वरो न लभ्यत इति । एतेन जनप्रियत्वस्य वरगुणस्य वैकल्यं दर्शितम् । वरगुणवत्त्वं कुत्रापि नास्तीति आह—**क्व न्विति** । कुत्र जगति सर्वत्र पुरुषे सर्वे वरगुणाः सन्ति । न कुत्रापीत्यर्थः । अत्र पुंसां प्रातिस्विकरूपेण सर्वगुणाभाववत्त्वं यावत्त्वेन तु सर्वगुणसद्भाव एव । यद्वा सर्वेषु पुरुषेषु मध्ये कुत्र पुरुषे सर्वे वरगुणाः । न कुत्रापीत्यर्थः । एतच्च न रावणोपेक्षाबीजमित्येतत्पर्यन्तमस्थानं तत्र वाक्यार्थसमापनमयुक्तमित्याह—**अत्रेति** । सामान्येन वक्तव्ये विशेषाभिधानमविशेषे विशेषस्तमुदाहरति—**हीरकाणामिति** । अनियमेन वक्तव्ये नियमाभिधानमनियमे नियमः । तमुदाहरति—**आवर्त एवेति** । भङ्गास्तरङ्गाः । वलयस्त्रिवल्यः । विशेषवक्तव्ये सामान्येनाभिधानं विशेषेऽविशेषः । तमुदाहरति—**यान्तीति** । नीलनिचोलिन्यो नीलप्रच्छदपटावृताः । तमिस्रासु तमोयुक्तरात्रिषु । ज्योत्स्नीष्वभिसारिकाणां शुक्लपटावरणमेवोचितम् । नियमो निर्धारणं तेन वक्तव्ये अनियमेनाभिधानं नियमानियमः । तमुदाहरति—**आपातेति** । भोगे विषयोपभोगे निमग्ना एका-

---

१. 'तरङ्गा' घ.

ननु वाच्यस्यानभिधाने 'व्यतिक्रमलवम्' इत्यादावपेरभावः, इह चैवकारस्येति कोऽनयोर्भेदः । अत्राह—'नियमस्य वचनमेव पृथग्भूतं नियमपरिवृत्तेर्विषयः' इति, तन्न । तथा सत्यपि द्वयोः शब्दार्थदोषतायां नियामकाभावात् । तत्का गतिरिति चेत्, 'व्यतिक्रमलवम्' इत्यादौ शब्दोच्चारणानन्तरमेव दोषप्रतिभासः । इह त्वर्थप्रत्ययानन्तरमिति भेदः । एवं च शब्दपरिवृत्तिसहत्वासहत्वाभ्यां पूर्वैराद्दतोऽपि शब्दार्थदोषविभाग एवं पर्यवस्यति—यो दोषः शब्दपरिवृत्त्यसहः स शब्ददोष एव । यश्च पदार्थान्वयप्रतीतिपूर्वबोध्यः सोऽपि शब्ददोषः । यश्चार्थप्रतीत्यनन्तरं बोध्यः सोऽर्थाश्रय इति । एवं चानियमपरिवृत्तित्वादेरप्यधिकपदत्वादेर्भेदो बोद्धव्यः । अमतपरार्थत्वे तु 'राममन्मथशरेण—' इत्यादौ नियमेन वाक्यव्यापित्वाभिप्रायाद्वाक्यदोषता । अश्लीलत्वादौ तु न नियमेन वाक्यव्यापित्वम् ।

'आनन्दितस्वपक्षोऽसौ परपक्षान्हनिष्यति ।'

अत्र परपक्षं हत्वा स्वपक्षमानन्दयिष्यतीति विधेयम् ।

'चण्डीशचूडाभरण चन्द्र लोकतमोपह ।
विरहिप्राणहरण कदर्थय न मां वृथा ॥'

अत्र विरहिण उक्तौ तृतीयपादस्यार्थो नानुवाद्यः ।

न्तमासक्ताः । वाच्यानभिधानान्नियमपरिवृत्तेर्भेदं निरूपयितुमाह—**नन्विति**। पृथग्भूतं विशेषः । एवं च नियमद्योतकपदानभिधानं नियमपरिवृत्तिस्तदितरद्योतकपदानभिधानं तु वाच्यानभिधानस्य विषय इति भेदः । गतिः सिद्धान्तः । निरुक्तभेदे प्राचीनस्वरसमप्याह—**एवं चेति। पर्यवस्यतीति।** परिवृत्तिः पर्यायशब्दान्तरदानं स्वार्थबोधेन निवृत्तिश्चेति भावः । नन्वेवममतपरार्थत्वादौ पदार्थबोधानन्तरमेव दोषप्रतिभासादर्थदोषत्वमेव, कथं वाक्यदोषत्वमत आह—**अमतेति** । नियमेन वाक्यव्यापित्वात् वाक्यान्वयव्यतिरेकानुविधायित्वात् । **अश्लीलत्वादौ त्विति** । 'हन्तुम्' इत्यादावर्थाश्लीलत्वे हनधात्वादेः पारिभाषिकनिर्घातादिबोधकत्वं नियमतो नोपपद्यते परं तु समभिव्याहारवशात्तात्पर्यपर्यालोचनया तदर्थकत्वकल्पनेनेति भावः । विधेयतापर्यायस्यायोग्ये तात्पर्यारोपणं विध्ययुक्तता । तामुदाहरति—**आनन्दितेति। अत्रेति** । परपक्षहननस्वपक्षानन्दनयोर्द्वयोरपि विधेयत्वेऽपि परपक्षहननानन्तरमेव स्वपक्षानन्दनविधावेव विधेयतापर्याप्तिरुचिता, परपक्षहननविधौ तत्करणाद्दोषः । नन्वत्र विधेयाविमर्श एव दोष इति चेत् 'आनन्दयति पक्षं स्वं परपक्षं हनिष्यति' इति पाठपरिवर्तनेनास्योदाहरणं वेदितव्यम् । अनुवाद्यविशेषणस्य विधिविरोधिस्मनुवादायुक्तता । तामुदाहरति—**चण्डीशेति** । नानुवाद्यः अनुवाद्यविशेषणत्वेन

'लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्यारिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती ।
तत्सक्तोऽयं न किंचिद्गणयति विदितं तेऽस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद्गदितुमिति गतेवाम्बुधिं यस्य कीर्तिः ॥'

अत्र विदितं तेऽस्त्वित्यनेन समापितमपि वचनं तेनेत्यादि पुनरुपात्तम् ।

अथ रसदोषानाह—

रसस्योक्तिः स्वशब्देन स्थायिसंचारिणोरपि ॥ १२ ॥
परिपन्थिरसाङ्गस्य विभावादेः परिग्रहः ।
आक्षेपः कल्पितः कृच्छ्रादनुभावविभावयोः ॥ १३ ॥
अकाण्डे प्रथनच्छेदौ तथा दीप्तिः पुनः पुनः ।
अङ्गिनोऽननुसंधानमनङ्गस्य च कीर्तनम् ॥ १४ ॥
अतिविस्तृतिरङ्गस्य प्रकृतीनां विपर्ययः ।
अर्थानौचित्यमन्यच्च दोषा रसगता मताः ।

रसस्य स्वशब्दो रसशब्दः शृङ्गारादिशब्दश्च । क्रमेण यथा—

'तामुद्वीक्ष्य कुरङ्गाक्षीं रसो नः कोऽप्यजायत ।
चन्द्रमण्डलमालोक्य शृङ्गारे मग्नमन्तरम् ॥'

स्थायिभावस्य स्वशब्दवाच्यं यथा—

'अजायत रतिस्तस्यास्त्वयि लोचनगोचरे ।'

नोपादेयः । विरहिणा स्वकदर्थनस्य वृथात्वे विधीयमाने विरहिप्राणहरस्य अनुवाद्यचन्द्रविशेषणस्य तद्विधिविरोधित्वादिति भावः । आकाङ्क्षितस्य कारकस्य क्रियान्वयेन समाप्तावपि पुनस्तत्कारकोपादानं निर्मुक्तपुनरुक्तत्वम् । समाप्तपुनरुक्तत्वं तु विशेष्यानुषङ्ग एव इत्यनयोर्भेदः । उदाहरति—**लग्नमिति** । रागेण रक्तेन आवृतं लिप्तमङ्गं यस्यास्तया, अथ च रागेण सुरतेच्छया आवृतं स्तब्धं शरीरं यस्यास्तया । मातङ्गानां हस्तिनाम्, अथ च कामशास्त्रोक्तपुरुषविशेषाणाम् । परपुरुषैः शत्रुभिः, स्वामिभिश्च । तत्सक्तस्तादृशासिलतासक्तः । **अत्रेति** । गणयतीति पर्यन्तस्य कर्मकारकस्य विदितक्रियान्वयेन समाप्तावपि तेनास्मीत्यादेः पुनरुपादानादिति भावः । स्थायिसंचारिणोरिति स्वशब्देनोक्तिरित्यनुषक्तेनान्वेति । अकाण्डे अकाले । प्रथनादित्रयं रसस्यैव । प्रकृतीनां नायकोचितधर्माणां विपर्ययोऽन्यथावर्णनम् । इदमेकमनौचित्यम् ।

व्यभिचारिणः स्वशब्दवाच्यत्वं यथा—

'जाता लज्जावती मुग्धा प्रियस्य परिचुम्बने ।'

अत्र प्रथमे पादे 'आसीन्मुकुलिताक्षी सा' इति लज्जाया अनुभावमुखेन कथने युक्तः पाठः ।

'मानं मा कुरु तन्वङ्गि ज्ञात्वा यौवनमस्थिरम् ।'

अत्र यौवनास्थैर्यनिवेदनं शृङ्गाररसस्य परिपन्थिनः शान्तरसस्याङ्गं शान्तस्यैव च विभाव इति शृङ्गारे तत्परिग्रहो न युक्तः ।

'धवलयति शिशिररोचिषि भुवनतलं लोकलोचनानन्दे ।
ईषत्क्षिप्तकटाक्षा सेरमुखी सा निरीक्ष्यतां तन्वी ॥'

अत्र रसस्योद्दीपनालम्बनविभावावनुभावपर्यवसायिनौ स्थिताविति कष्टकल्पना ।

'परिहरति रतिं मतिं लुनीते स्खलतितरां परिवर्तते च भूयः ।
इति बत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः ॥'

अत्र रतिपरिहारादीनां करुणादावपि संभवात्कामिनीरूपो विभावः कृच्छ्रादाक्षेप्यः । अकाण्डे प्रथनं यथा—वेणीसंहारे द्वितीयेऽङ्के प्रवर्तमानानेकवीरसंक्षये काले दुर्योधनस्य भानुमत्या सह शृङ्गारप्रथनम् ।

अन्यत्प्रकृतिविपर्ययभिन्नम् । कोऽप्यनिर्वचनीयस्वभावः । व्यभिचारिणां स्वातन्त्र्येणोपादान एव स्वशब्दवाच्यत्वं दोषः, रसव्यञ्जनार्थमुपादाने तु न दोषः । यथा लज्जानम्रमुखीति, श्रमविवृतमुखेति च । स्वशब्दवाच्यत्वं रसादिप्रकर्षबोधप्रतिबन्धकम् । विरोधिरसाङ्गपरिग्रहमुदाहरति—**मानमिति । शान्तस्यैव चेति** । चशब्दो हेतौ । विभाव उद्दीपनविभावः । तत्परिग्रहो यौवनस्थैर्यनिवेदनवर्णनम् । अनुभावस्य कष्टाक्षेपमाह—**धवलयतीति** । शिशिररोचिषि चन्द्रे यातिप्रयत्नेनाप्यभग्नमाना सेत्यर्थः । **अत्रेति** । आलम्बनं नायिका । उद्दीपनविभावाश्चन्द्रकटाक्षमोक्षमन्दहासाः । एषां बहुत्वेऽप्युद्दीपनविभावत्वेनैकत्वमिति द्विवचनोपपत्तिः । अनुभावपर्यवसायिनौ प्रणिधानेनानुभावस्य नायकचक्षुःप्रसारणस्य बोधकौ । नायकस्य शृङ्गारित्वनिश्चायकाभावाद्दत्यनुभावस्य नायिकायां चक्षुःप्रसारणस्य कष्टकल्पनया आक्षेपः । नायकस्याशृङ्गारित्वे दर्शनाभावस्यापि संभवात् तादृशसमये तादृशनायिकायां मुनेरपि प्रायो मनःक्षोभो भवतीत्यौत्सर्गिकमेव चक्षुःप्रसारणमिति कष्टकल्पना । विभावस्य कष्टकल्पनामाह—**परिहरतीति** । अत्रायमिति कर्तृपदमूह्यम् । रतिं वस्त्वन्तराभिलाषम् । स्खलतितरां भूमौ भृशं पतति । परिवर्तते पार्श्वपरिवृत्तिं करोति । विषमा दुष्प्रतीकारा । दशा अवस्था । **कृच्छ्रादाक्षेप्य इति** । प्रकरणादिप्रतिसंधानमेवात्र कृच्छ्रम् ।

---

१. 'मोक्ष' इति पुस्तकान्तरे नास्ति.

छेदो यथा—वीरचरिते राघवभार्गवयोर्धाराधिरूढेऽन्योन्यसंरम्भे[1] कङ्कणमोचनाय गच्छामीति राघवस्योक्तिः ।

पुनः पुनर्दीप्तिर्यथा—कुमारसंभवे रतिविलापे ।

अङ्गिनोऽननुसंधानं यथा—रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमने[2] सागरिकाया विस्मृतिः ।

अनङ्गस्य कीर्तनं यथा—कर्पूरमञ्जर्यां राजनायिकयोः स्वयं कृतं वसन्तस्य वर्णनमनादृत्य बन्दिवर्णितस्य प्रशंसनम्[3] ।

अङ्गस्यातिविस्तृतिर्यथा—किराते सुराङ्गनाविलासादिः ।

प्रकृतयो दिव्या अदिव्या दिव्यादिव्याश्चेति[1] । तेषां धीरोदात्तादिता[2] । तेषामप्युत्तमाधममध्यमत्वम् । तेषु च यो यथाभूतस्तस्यायथावर्णने प्रकृतिविपर्ययो दोषः । यथा—धीरोदात्तस्य रामस्य धीरोद्धतवच्छद्मना वालिवधः । यथा वा—कुमारसंभवे उत्तमदेवतयोः पार्वती-

---

प्रवर्तमानः स्वपुत्रादिरूपानेकवीराणां संक्षयो यत्र तस्मिन् । धाराधिरूढे आरब्धे । **रतिविलाप इति** । 'विललाप विकीर्णमूर्धजा' इत्युपक्रम्य धारावाहिककरुणरसे प्रवर्तिते पुनर्मधोरागमने 'तमवेक्ष्य रुरोद सा भृशं स्तनसंबाधमुरो जघान सा' इत्यादिना तदुद्दीपनं कृतम् । अङ्गिनः प्रधानस्य । **बाभ्रव्यागमन इति** । सागरिकायाः पितृगृहादागतः कञ्चुकी बाभ्रव्यः । अनङ्गस्य रसानुपकारकस्य । अङ्गस्याप्रधानस्य । प्रकृतिविपर्ययमुदाहर्तुं प्रकृतीराह—**प्रकृतय इति** । नायका इत्यर्थः । दिव्या देवासुरयक्षगन्धर्वराक्षसादयः । अदिव्यास्तदितरे मानुषादयः । दिव्यादिव्याः प्रागेवोक्ताः । तेषां दिव्यादिनायकानां धीरोदात्तादिता । उत्तममध्यमाधमत्वमपि प्रकृतिरित्यर्थः । दिव्यादीनामनुचितवर्णनं प्रकृतिविपर्ययस्तज्ज्ञापनाय तेषामनुचितं वर्णनीयं वर्णयामि । यथा—'रतिस्तथैव हासश्च शोक आश्चर्यमेव च । दिव्यानामुचितं वर्ण्यमदिव्योत्तमनेतृवत् ॥ किं तु संभोगशृङ्गारो वर्ण्यो नोत्तमदेवयोः । सद्यः फलप्रदः क्रोधो

---

1. **कङ्कणमोचनायेति** । कङ्कणमोचनं विवाहदशमदिनोत्सवः । अकाण्डे तथाकथनं व्याजनिर्गमनप्रत्यायकत्वाद् रामभद्रस्यावीरत्वपर्यवसायीति ।

2. **बाभ्रव्यागमन इति** । बाभ्रव्यागमने विजयवर्मवृत्ताकर्णनाहितमनसा राज्ञा सागरिकाया नाममात्रस्याप्यग्रहणाद्विस्मृतिः । तेन नाटिकाप्रतिपाद्यः शृङ्गाररसो विच्छिन्नप्राय इति दोषः ॥

3. **प्रशंसनमिति** । 'जह किल णिवेदिदं वन्दीहि' इत्यादिना विदूषकोक्तिपर्यन्तेन संदर्भेण बन्दिवर्णितस्य वसन्तस्य वर्णनं प्रकृतरसानुपयोगित्वादनुचितम् ॥

---

१. 'संग्रामे' घ. २. 'श्च' क. ३. 'धीरोदात्तादिभावः' क.

परमेश्वरयोः संभोगशृङ्गारवर्णनम्। 'इदं पित्रोः संभोगवर्णनमिवात्यन्तमनुचितम्' इत्याहुः।

अन्यदनौचित्यं देशकालादीनामन्यथा यद्वर्णनम्। तथा सति हि काव्यस्यासत्यताप्रतिभासेन विनेयानामुन्मुखीकारासंभवः।

एभ्यः पृथगलंकारदोषाणां नैव संभवः ॥ १५ ॥

एभ्य उक्तदोषेभ्यः। तथा हि—उपमायामसादृश्यासंभवयोरुपमानस्य जातिप्रमाणगतन्यूनत्वाधिकत्वयोरर्थान्तरन्यासे उत्प्रेक्षितार्थसमर्थने चानुचितार्थत्वम्। क्रमेण यथा—

'ग्रश्नामि काव्यशशिनं विततार्थरश्मिम्'

भ्रुकुट्यादिविवर्जितः ॥ उत्साहः स्वर्गपातालगत्यध्वलङ्घनादिषु। दिव्यानामेव नेतॄणां वर्ण्यते उचितो बुधैः ॥ ख्यातं लोकपुराणादौ यच्चान्यत्स्यादबाधितम्। वर्णनीयमदिव्यानामन्येषां तूभयं बुधैः ॥ पूज्यादौ तु तत्रभवन्भगवन्निति चोच्यते। भट्टारकेति राजादौ परमेशेति चोच्यते ॥ इत्याद्युचितमेतेषां विरुद्धं दूषणं भवेत् ॥' अन्येषां दिव्यादिव्यानामुभयं दिव्यसाधर्म्यमदिव्यासाधर्म्यं चोचितमित्यर्थः। यथा—अर्जुनस्य स्वःपातालादिलङ्घनोत्साहः भ्रूकुट्यादिरहितः क्रोधश्च। **देशकालादीनामिति**। देशोऽद्रिवनराष्ट्रादिः, कालो रात्रिदिनर्तवः, तदनौचित्यम्। क्रमेण यथा—'कर्पूरपादपामर्शी सुरभिर्मलयानिलः। कलिङ्गवनसंभूता मृगप्राया मतङ्गजाः ॥ चोलाः कालागुरुश्यामाः कावेरीतीरभूमयः ॥' अत्र मलये कर्पूरवृक्षस्य कलिङ्गवने हस्त्युत्पत्तेश्चोलेषु कालागुरूणामसंभवादनौचित्यम्। 'पद्मिनी नक्तमुन्निद्रा स्फुटत्यह्नि कुमुद्वती। मधुरुत्फुल्लनिचुलो निदाघो मेघदुर्दिनः ॥ श्रव्यहंसगिरो वर्षा शरदो मत्तबर्हिणः। हेमन्तो निर्मलादित्यः शिशिरः श्लाघ्यचन्दनः ॥' आदिपदेन लोकजातिवयःप्रभृतीनां ग्रहणम्। 'चराचराणां भूतानां प्रवृत्तिर्लोकसंज्ञिता'। तदनौचित्यं यथा—'आधूतकेसरो हस्ती तिग्मशृङ्गस्तुरङ्गमः। गुरुसारोऽयमेरण्डो निःसारः खदिरद्रुमः ॥' इत्याद्यनौचित्यस्य न केवलं रसापकर्षकत्वं दूषकताबीजम्, काव्यस्य प्रवृत्तिनिवृत्त्युपदेशपरत्वव्याघातकत्वमपीत्याह—**तथा सतीति**। अयथावर्णने सतीत्यर्थः। असत्यताप्रतिभासेन अप्रामाण्यप्रतिपत्त्या। विनेयानां धर्मादिजिज्ञासूनाम्। काव्याध्ययने प्रवृत्तिरुन्मुखीकारः। नन्वसादृश्यादीनामलंकारदोषाणां परम्परया रसापकर्षकत्वेन काव्यदोषत्वसंभवात्काव्यदोषाणां पञ्चविधत्वमनुपपन्नम्, अतस्तानुक्तदोषेषु यथायथमन्तर्भावयति—**एभ्य इति**। निरुक्तकाव्यदोषेभ्य इत्यर्थः। पृथग्भिन्नानाम्। तथा चोक्तदोषेष्वेवासादृश्यादीनामन्तर्भाव इति भावः। अन्तर्भावप्रकारमाह—**तथा इति**। उपमायामसादृश्यासंभवयोरनुचितार्थत्वं पर्यवस्यतीत्यध्याहृतेनान्वयः। एवमग्रेऽपि। साधारणधर्मप्रसिद्धिरसादृश्यम्। उपमानाप्रसिद्धिरसंभवः। **ग्रश्नामीति**। आनुपूर्व्या निवेशयामीत्यर्थः। काव्यं शशीवेत्युपमाने समासः। एवमग्रेपि। न चात्र रूपकसंभवोऽपीति

'प्रज्वलज्जलधारावन्निपतन्ति शरास्तव ।'
'चण्डाल इव राजासौ संग्रामेऽधिकसाहसः ।'
'कर्पूरखण्ड इव राजति चन्द्रबिम्बम् ।'
'हरवन्नीलकण्ठोऽयं विराजति शिखावलः ।'
'स्तनावद्रिसमानौ ते'
'दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
'क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसामतीव ॥'

एवमादिषूत्प्रेक्षितार्थस्यासंभूततयैव प्रतिभासनं स्वरूपमित्यनुचितमेव तत्समर्थनम् । यमकस्य पादत्रयगतस्याप्रयुक्तत्वं दोषः । यथा—

'सहसाभिजनैः स्निग्धैः सह सा कुञ्जमन्दिरम् ।
उदिते रजनीनाथे सहसा याति सुन्दरी ॥'

उत्प्रेक्षायां यथाशब्दस्योत्प्रेक्षाद्योतकत्वेऽवाचकत्वम् । यथा—

'एष मूर्तो यथा धर्मः क्षितिपो रक्षति क्षितिम् ।

एवमनुप्रासे वृत्तिविरुद्धस्य प्रतिकूलवर्णत्वम् । यथा—

'ओवट्टइ उल्लट्टइ—' इत्यादौ ।

वाच्यम् । तस्यापि सादृश्यमूलकत्वेन तत्रापि तद्दोषतादवस्थ्यात् । अत्र काव्यशशिनोरर्थरश्म्योश्च कश्चित्साधारणो धर्मो न प्रसिद्धः । काव्यशशिनोराह्लादकत्वरूपैकधर्मसंभवेऽप्यर्थरश्म्योर्न तादृशधर्मः संभवतीत्यवधेयम् । उपमानासंभवमुदाहरति—**प्रज्वलदिति** । तत्र वह्निकर्मणो ज्वलनस्य जले बाधात्तद्विशिष्टानां तासामसंभवः । उपमानस्य जातिन्यूनत्वमुदाहरति—**चण्डाल इवेति** । अत्र चण्डालपदमुपमेयस्यातिनीचत्वं व्यञ्जयतीत्यनुचितार्थत्वम् । उपमानस्य प्रमाणन्यूनत्वमुदाहरति—**कर्पूरेति** । अत्रोपमेयस्य चन्द्रबिम्बस्यातिक्षुद्रत्वव्यञ्जकं कर्पूरखण्डपदम् । उपमानस्य जात्यधिकत्वमुदाहरति—**हरवदिति** । शिखावलो मयूरः । उपमानस्य प्रमाणाधिकत्वमुदाहरति—**स्तनाविति** । अत्र स्तनयोरतिमहत्त्वव्यञ्जकमद्रिपदमनुचितार्थम् । उत्प्रेक्षितार्थसमर्थनमुदाहरति—**दिवाकरादिति** । उत्प्रेक्षितार्थस्याचेतनान्धकारत्रासस्यासंभूततया संभावनाविषये वस्तुन्यवृत्तितया प्रतिभासनस्वरूपमारोपणमात्रमनुचितमेवेति समर्थनं न मिथ्येत्युपपादनं तच्चासंभूते वस्तुनि न संभवतीति भावः । पादत्रयगतस्य पादत्रयमात्रवृत्तित्वस्य अप्रयुक्तत्वं नाम दोषः स्वरूपमिति पूर्वेणान्वयः । सहसा अविचारेण । सह सार्धम् । सा प्रसिद्धा । सहसा हासयुक्ता । वृत्तिविरुद्धत्वस्य प्रकृतरसविरोधिरसानुगुणवर्णघटितत्वस्य । **ओवट्टइ इति** । अत्र शृङ्गारविरोधि-

---

१. 'कुञ्जमन्दिरे' क.

उपमायां च साधारणधर्मस्याधिकन्यूनत्वयोरधिकपदत्वं न्यूनपदत्वं च। क्रमेणोदाहरणम्—

'नयनज्योतिषा भाति शंभुर्भूतिसितद्युतिः।
विद्युतेव शरन्मेघो नीलवारिदखण्डधृक्॥'

अत्र भगवतो नीलकण्ठत्वस्याप्रतिपादनाच्चतुर्थपादोऽधिकः।

'कमलालिङ्गितस्तारहारहारी मुरं द्विषन्।
विद्युद्विभूषितो नीलजीमूत इव राजते॥'

अत्रोपमानस्य सबलाकत्वं वाच्यम्।

अस्यामेवोपमानोपमेययोर्लिङ्गवचनभेदस्य कालपुरुषविध्यादिभेदस्य च भग्नप्रक्रमत्वम्। क्रमेणोदाहरणम्—

'सुधेव विमलश्चन्द्रः।'
'ज्योत्स्नाःइव सिता कीर्तिः।'
'काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेशयोः।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव॥'

अत्र तथाभूतचित्राचन्द्रमसोः शोभा न खल्वासीत्। अपि तु सर्वदापि भवति।

'लतेव राजसे तन्वि।'

अत्र लता राजते, त्वं तु राजसे।

चिरं जीवतु ते सूनुर्मार्कण्डेयमुनिर्यथा।'

अत्र मार्कण्डेयमुनिर्जीवत्येव न खल्वेतदस्य जीवित्यनेन विधेयम्।

वीरायनुगुणटकारघटितत्वमनुप्रासस्य। भगवतः शंभोः। अप्रतिपादनात् अप्रतियोगात्। तत्प्रयोगे तु तदुपयोगसंभवान्नाधिकत्वम्। तारहारहारी शुद्धहारहारी। मुरं द्विषन् श्रीकृष्णः। वाच्यं वक्तुं योग्यम्। तदकथनान्न्यूनपदत्वमित्यर्थः। अस्यामेव उपमायामेव। **सुधेव विमल इति।** अत्र पुंलिङ्गस्य विमलसुधायामन्वयासंभवाल्लिङ्गव्यत्ययेनान्वयः। एवं च प्रक्रान्तलिङ्गभङ्गः। वचनभेदमाह—**ज्योत्स्ना इवेति।** अत्र वचनव्यत्ययेन प्रक्रान्तवचनभङ्गः। कालभेदमुदाहरति—**कापीति।** अभिख्या शोभा। तयोः सुदक्षिणादिलीपयोः। अत्रोपमानेऽतीतकालस्य बाधाद्वर्तमानोहेनान्वय इति प्रक्रान्तकालभङ्गः। पुरुषभेदमुदाहरति—**लतेवेति।** अत्रोपमाने मध्यमपुरुषान्वयस्य बाधात्प्रथमपुरुषोहेनान्वयमुपपादयति—**लता राजत इति।** अत्र प्रक्रान्तपुरुषभङ्गः। विधिभेदमाह—**चिरमिति।** एतज्जीवनम्। अस्य मार्कण्डेयस्य। विधेयं विधिविषयः। अत्रादिपदग्राह्याया अभीष्टाशंसनरूपाया आशिष एव भेदः,

इह तु यत्र लिङ्गवचनभेदेऽपि न साधारणधर्मस्यान्यथाभावस्तत्र न दोषः । क्रमेणोदाहरणम्—

'मुखं चन्द्र इवाभाति ।'

'तद्वेशोऽसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः ।
दधते स्म परां शोभां तदीया विभ्रमा इव ॥'

पूर्वोदाहरणेषूपमानोपमेययोरेकस्यैव साधारणधर्मेणान्वयसिद्धेः प्रक्रान्तस्यार्थस्य स्फुटोऽनिर्वाहः । एवमनुप्रासे वैकल्यस्यार्थत्वम् । यथा—

'अनणुरणन्मणिमेखलमविरलशिञ्जानमञ्जुमञ्जीरम् ।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते ॥'

न तु 'प्रेष्यादिर्वाथ संकल्पभेदोऽथेष्टाभ्युपायता । शब्दव्यापारभेदो वा कार्यभेदोऽथवा विधिः ॥ ' इत्युक्तपञ्चविधस्य विधेः असंभवात् । विधिभेदस्योदाहरणमेवं बोध्यम् । 'चमूरियं दूरविमुक्तभङ्गा गङ्गेव मे योधमनुप्रयातु । ययारिसञ्जा विभटाः प्रकामं नश्यन्त्यधर्मा इव खेदसाध्याः ॥' अत्र गङ्गा प्रयाति, चमूः प्रयातु, इति प्रक्रान्तविधिभङ्गः । साधारणधर्मस्य निर्दिश्यमानसामान्यस्य । अन्यथाभाव उपमानान्वयानुपयोगित्वम् । न दोषो नोपमादोषः । भग्नप्रक्रमत्वस्य तु प्रसक्त्यभावेन तन्निषेधस्यात्र न संभवः । **मुखमिति** । अत्राभीतीति उपमानेनाप्यन्वेति । वचनभेदेनापि दोषाभावमाह—**तद्वेश इति** । तस्याः वेशः परां शोभां दधते स्म धारयति स्म । 'दध धारणे' आत्मनेपदी एकवचनान्तः । वेशः कीदृशः । अन्याभिः स्त्रीभिरसदृशोऽसाधारणः । मधुरत्या सौन्दर्येण भृतः पूरितः । विभ्रमाः स्मरविलासाः । अपि च परां शोभां दधते धारयन्ति । 'डुधाञ् धारणपोषणयोः' बहुवचनान्तः । ते कीदृशाः । अन्याभिः स्त्रीभिरसदृशोऽसाधारणः । अत्र क्विबन्तः सदृशशब्दो जसन्तः । तथा मधुरतां बिभ्रतीति मधुरताभृतः । क्विबन्तस्य जसि रूपम् । अत्रासदृश इत्यादिपदानां श्लेषेणोपमानान्वययोगित्वम् । एतदुदाहरणानां पूर्वोदाहरणापेक्षया वैलक्षण्यं दर्शयितुं पूर्वोदाहरणेषु भग्नप्रक्रमत्वं दर्शयति—**पूर्व इति** । एकस्यैव उपमेयस्यैव । **साधारणधर्मेणान्वयसिद्धेरिति** । योग्यत्वादिति शेषः । प्रक्रान्तार्थस्य आकाङ्क्षितसाधारणधर्मस्य । अनिर्वाहः उपमानेनान्वयस्यानुपपत्तिः । अयोग्यत्वादिति शेषः । लिङ्गव्यत्ययादिना योग्यसामान्याधिकरण्योपपादने[1] प्रथमोत्थापिताकाङ्क्षाविषयीकृतेन प्रकारेण पश्चादनुक्तिरिति भग्नप्रक्रमत्वमिति भावः । 'अत्रोभयान्वयाभिप्रायेण प्रयुक्तस्यैकतरान्वयसंभवेऽभवन्मतयोगत्वम्' इत्यपरे । अनुप्रासस्य वैकल्यं रसाद्युत्कर्षानाधायकत्वम् । तच्च मुख्यार्थानुपकारित्वरूपापुष्टार्थत्वे पर्यवस्यति । तदुदाहरति—**अनणिवति** । वेश्याविरक्तस्य वचनमिदम् । हे अरु-

---

१. 'सामानाधिकरण्य–' इति पुस्तकान्तरे नास्ति.

एवं समासोक्तौ साधारणविशेषणवशात्परार्थस्य प्रतीतावपि पुनस्तस्य शब्देनोपादानस्याप्रस्तुतप्रशंसायां व्यञ्जनयैव प्रस्तुतार्थावगतेः शब्देन तदभिधानस्य च पुनरुक्तत्वम्। क्रमेणोदाहरणम्—

'अनुरागवन्तमपि लोचनयोर्दधतं वपुः सुखमतापकरम्।
निरकासयद्द्रविमपेतवसुं वियदालयादपरदिग्गणिका॥'

अत्रापरदिगित्येतावतैव तस्या गणिकात्वं प्रतीयते।

'आहूतेषु विहङ्गमेषु मशको नायान्पुरो वार्यते
मध्ये वा धुरि वा वसंस्तृणमणिर्धत्ते मणीनां धुरम्।
खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
धिक्सामान्यमचेतसं प्रभुमिवानाकृष्टतत्त्वान्तरम्॥'

अत्राचेतसः प्रभोरभिधानमनुचितम्।

णचरणे, तव परिसरणं सर्वतो गमनं पुंसां रणरणकं कामचिन्तामकारणं कुरुते। 'चिन्तारणरणं च तत्' इति कोषः। कीदृशम्। अनणु अनल्पं यथा स्यात्तथा रणन्ती मणिमेखला यत्र। अविरलं घनं शिञ्जानं शब्दायमानं मञ्जु मञ्जीरं यत्र तादृशम्। लघुरेफलकारादिघटितानुप्रासस्य माधुर्यातिशयव्यञ्जनेन शृङ्गारादेरेवोपकारित्वमत्र, पुनः पर्यवसितार्थस्य वेश्याविरागस्य न किंचिदुपकारित्वमित्यपुष्टार्थत्वम्। परार्थस्य रूपकस्य उपमानस्य वा। **अनुरागवन्तमपीति**। अनुरागो रक्तिमा, प्रेम च। निरकासयद्द्वीपान्तरं प्रापयामास, अथ च दूरीचकार। अपेतवसुं निष्क्रिरणम्, निर्धनं च। अपरदिक् पश्चिमदिक्। **अत्रेति**। यथा रविमित्येतावतैव तस्य भुजङ्गत्वं प्रतीयते तथैवेति भावः। **आहूतेष्विति**। अत्र यत्तदर्थयोराकाङ्क्षया लाभः। तमचेतसं सदसद्विवेचनारूपचेतनारहितं सामान्यं जनं धिक्। अनाकृष्टमनाकलितं तत्त्वान्तरं वस्तूनां विशेषो येन तादृशं प्रभुमिवेति। सदसद्विवेचनरहितत्वं दर्शयति—**आहूतेष्विति**। विहङ्गमशब्देनाहूतेषु हंसकोकिलादिषु अहमपि विहायोगमनाद्विहङ्गम इति मत्वा पुर आयान् आगच्छन् मशको येन न वार्यते। यस्य धुरि यानमुखे वध्ये वा अर्थादुपस्थितस्य यानस्यैव मध्ये वा वसंस्तृणमणिस्तृणाकर्षको मणिरल्पमणिर्यानशोभाजनकमहामणीनां धुरं साम्यं धत्ते। यानस्य पश्चाद्भागस्तावत्तृणमणेः स्थानं तद्विज्ञे मध्यादौ तद्विन्यासात्तत्स्वामिनोऽविवेचकत्वमिति भावः। 'धूः स्त्री क्लीबे यानमुखम्' इति कोषः। 'मध्ये वा धुरि वा वसन्' इति पाठो न रमणीयः। अनन्वयात्। **खद्योतोऽपीति**। पुर इत्यनुषज्यते। यस्य पुरः खद्योतोऽपि तेजस्विनामपि मध्ये प्रचलितुं गन्तुं न कम्पते। न बिभेतीत्यर्थः। अत्राप्रस्तुतेन तादृशासामान्येनैव विशेषस्याचेतनस्य प्रभोरभिव्यक्तिरिति तदभिधानमनुचितमित्यभिप्रायेणाह—अ-

एवमनुप्रासे प्रसिद्ध्यभावस्य ख्यातविरुद्धत्वम् । यथा—

'चक्राधिष्ठिततां चक्री गोत्रं गोत्रभिदुच्छ्रितम् ।
वृषं वृषभकेतुश्च प्रायच्छन्नस्य भूभुजः ॥'

उक्तदोषाणां च क्वचिददोषत्वं क्वचिद्गुणत्वमित्याह—

वक्तरि क्रोधसंयुक्ते तथा वाच्ये समुद्धते ।
रौद्रादौ तु रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत् ॥ १६ ॥

एषु चास्वादस्वरूपविशेषात्मकतया मुख्यगुणप्रकर्षोपकारित्वाद्गुण इति व्यपदेशो भाक्तः[1] । क्रमेण यथा—

'तद्विच्छेदकृशस्य कण्ठलुठितप्राणस्य मे निर्दयं
क्रूरः पञ्चशरः शरैरतिशितैर्भिन्दन्मनो निर्भरम् ।
शंभोर्भूतकृपाविधेयमनसः प्रोद्दामनेत्रानल-
ज्वालाजालकरालितः पुनरसावास्तां समस्तात्मना ॥'

त्रेति । **एवमिति** । प्रसिद्ध्यभावस्य अनुप्रासितपदार्थयोर्विवक्षितेऽन्वये लोकतः शास्त्रतो वा प्रसिद्धिविरहस्य । **चक्राधिष्ठिततामिति** । मण्डलाधिकारित्वमित्यर्थः । चक्री विष्णुः । गोत्रं वंशम् । गोत्रभिदिन्द्रः । उच्छ्रितम् उन्नतम् । वृषं पुण्यम् । वृषभकेतुः शिवः । प्रायच्छद्दत्तवान् । अत्र कर्तृकर्मनियमेन स्तुतिरनुप्रासानुबोधेनैव प्रतिपादिता, न पुनः पुराणेतिहासादिषु तथा प्रतीतिरिति प्रसिद्धविरहः । संप्रति दोषाणां नित्यत्वानित्यत्वप्रतिपत्त्यर्थमनित्यदोषानाह—**उक्तदोषाणामिति** । **क्वचिदिति** । यत्र रसादीनामपकर्षकत्वं प्रकर्षकत्वं च नास्ति तत्रेत्यर्थः । यत्र तु रसादीनामपकर्षकत्वं नास्ति, प्रत्युत प्रकर्षकत्वमेव, तत्र गुणत्वम् । तत्र दोषोद्देशक्रमेण यथासंभवं तान्दर्शयति—**वक्तरीति** । क्रोधसंयुक्ते वक्तरि उद्धते प्रतिपाद्ये च सति दुःश्रवत्वं गुणः । रौद्रादिरसे पुनरत्यन्तं गुण इत्यर्थः । आदिशब्दाद् वीरबीभत्सयोर्ग्रहणम् । ननु गुणानां रसधर्मत्वं त्रिविधत्वं च वक्ष्यति, दुःश्रवत्वादीनां तदुभयाभावात्कथं गुणत्वमित्यत आह—**एषु चेति** । दुःश्रवत्वादिष्वित्यर्थः । आस्वादानां रसानां स्वरूपविशेषात्मकाः साधर्म्यविशेषरूपा ये मुख्यगुणा माधुर्यादयः तत्कृतो यः प्रकर्षो रसाद्युत्कर्षस्तस्योपकारित्वात् अनुकूलत्वात् । व्यपदेशो गौणव्यवहारः । **तद्विच्छेदेति** । भूतेषु जन्तुषु या कृपा तदायत्तमनसा । करालितो दग्धः । असौ पञ्चशरः । समस्तात्मना शर्वशरीरेण । पूर्वं भौतिकं शरीरं दग्धम्, इदानीं तस्य लिङ्गशरीरमपि दह्यतामिति भावः । अत्र क्रोधस्यास्वाद्यमानत्वेऽपि प्राकरणिकतया प्रधानत्वेन रतेरास्वाद्यमानत्वाच्छृङ्गारत्वमेव, न तु रौद्रत्वम् । अत एवाह—

---

१. 'युक्त' क-ख-ग.

अत्र शृङ्गारे कुपितो वक्ता ।

'मूर्धव्याधूयमानध्वनदमरधुनीलोलकल्लोलजालो-
द्भूताम्भः क्षोददम्भात्प्रसभमभिनभःक्षिप्तनक्षत्रलक्षम् ।
ऊर्ध्वन्यस्ताङ्घ्रिदण्डभ्रमिभररभसोद्यन्नभस्वत्प्रवेग-
भ्रान्तब्रह्माण्डखण्डं प्रवितरतु शिवं शांभवं ताण्डवं वः ॥'

अत्रोद्धतताण्डवं वाच्यम् । इमे पद्ये मम । रौद्रादिरसत्वे तद्वितयापेक्षयापि दुःश्रवत्वमत्यन्तं गुणः । यथा—

'उत्कृत्योत्कृत्य कृत्तिम्—' इत्यादि ।

अत्र बीभत्सो रसः ।

सुरतारम्भगोष्ठ्यादावश्लीलत्वं तथा पुनः ।

तथा पुनरिति गुण एव । यथा—

'करिहस्तेन संबाधे प्रविश्यान्तर्विलोडिते ।
उपसर्पन्ध्वजः पुंसः साधनान्तर्विराजते ॥'

अत्र शृङ्गार इति । वाच्यस्योद्भटत्वे दुःश्रवत्वं गुणमुदाहरति—**मूर्धेति** । मूर्ध्नि व्याधूयमाना कम्पमाना ध्वनन्ती शब्दायमाना या अमरधुनी गङ्गा तस्या लोलं चञ्चलं यत् कल्लोलजालं महातरङ्गसमूहस्तस्मादुद्भूता उत्क्षिप्ता ये अम्भःक्षोदा जलबिन्दवः तेषां दम्भाच्छलात् । अभिनभो नभसि क्षिप्तं नक्षत्रलक्षं तारासमूहो यत्र तत् । ऊर्ध्वं न्यस्तोऽङ्घ्रिदण्डस्तस्य भ्रमिभरेण भ्रमणातिशयेन यो रभसो वेगस्तस्मादुद्यन् जायमानो यो नभस्वान् वायुस्तस्य प्रवेगेन भ्रान्तं कुलालचक्रवत् भ्रमिमापन्नं ब्रह्माण्डखण्डं यत्र तत् । अत्र ताण्डवस्य लोकसंहारकारित्वादुद्भटत्वम् । एतद्वितयापेक्षया कुद्धवक्तृसमुद्धतवाच्यापेक्षया । रौद्रे दुःश्रवत्वं यथा मम—'क्षिप्तोग्रक्षत्रपक्षे मयि सति सुतरां क्षत्रडिम्भेन शंभोश्चापाचार्यस्य चण्डध्वनि धनुरधुना ध्वंसितं धिक् तितिक्षाम् । संघट्याकुण्ठधारं कठिनमतितरां तस्य कण्ठे कुठारं व्रीडापीडाम्बुराशेः परिभवसरितश्चाद्य पारं प्रपद्ये ॥' अत्र क्रोधस्यास्वाद्यमानतया भार्गवस्य वक्तुः क्रुद्धतया च सुतरां दुःश्रवत्वस्य गुणत्वम् । सर्वथा आस्वादरहिते काव्याभ्यासे दुःश्रवत्वादीनां न दोषत्वम्, न वा गुणत्वम् । काव्यधर्माणां दोषगुणानां तत्राप्रवेशात् । अश्लीलत्वस्य गुणत्वमाह—**सुरतेति** । सुरतस्यारम्भश्चेष्टा यस्यास्तादृशगोष्ठी आदिर्यस्य तत्र । **करिहस्तेनेति** । साधनस्य सेनाया अन्तर्मध्ये प्रविश्योपसर्पन् गच्छन् पुंसो ध्वजः केतुर्विराजते । कीदृशे । संबाधे नराश्वादिनैबिड्येन दुष्प्रवेशे । प्रवेशोपायमाह—**करिहस्तेनेति** । करिणां हस्तेन शुण्डया विलोडिते विस्फारिते । अत्र पुंलिङ्गस्य व्यञ्जनस्यापि प्रतीत्याश्लीलत्वम् । तथाहि—साधनस्य भगस्यान्तर्मध्ये प्रविश्य उपसर्पन् गतागतं कुर्वन् पुंसो ध्वजो मेहनं विराजते । कीदृशे । संबाधे संकुचिते । तत्प्रवेशोपायमाह—**करीति** । करिहस्तेन कामशास्त्रोक्तकृत्रिम-

अत्र हि सुरतारम्भगोष्ठ्यां 'द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु' इति कामशास्त्रस्थितिः । आदिशब्दाच्छमकथाप्रभृतिषु बोद्धव्यम् ।

स्यातामदोषौ श्लेषादौ निहतार्थाप्रयुक्तते ॥ १७ ॥

यथा—

'पर्वतभेदि पवित्रं जैत्रं नरकस्य बहुमतं गहनम् ।
हरिमिव हरिमिव हरिमिव सुरसरिदम्भः पतन्नमत ॥'

अत्रेन्द्रपक्षे पवित्रशब्दो निहतार्थः । सिंहपक्षे मतङ्गशब्दो मातङ्गार्थेऽप्रयुक्तः[1] ।

गुणः स्यादप्रतीतत्वं ज्ञत्वं चेद्वक्तृवाच्ययोः ।

लिङ्गेन विलोडिते । तच्च संसक्ताग्रतर्जन्यनामिकापृष्ठारूढमध्यमारूपम् । तदुक्तम्—'तर्जन्यनामिकायुक्ते मध्यमा पृष्ठतो यदि । करिहस्त इति प्रोक्तः कामशास्त्रविशारदैः ॥' इदं व्रीडाव्यञ्जकमश्लीलत्वम् । गुणत्वमुपपादयति—**अत्रहीति** । पिशुनयेत् सूचयेत् । रहस्यं गोप्यम् । कामशास्त्रस्य स्थितिर्नियमः । रहस्यव्यञ्जनस्य सुरतोद्रेकानुकूलत्वाद्गुणत्वमिति भावः । **शमकथाप्रभृतिष्विति** । प्रभृतिशब्दाद्वैराग्योत्पादककथाग्रहणम् । तत्र यथा—'उत्तानोच्छूनमण्डूकपाटितोदरसन्निभे । क्लेदिनि स्त्रीव्रणे सक्तिरकृमेः कस्य जायते ॥' अत्र जुगुप्साश्लीलत्वस्य गुणत्वम् । प्रभृतिशब्दात् छद्मकथादीनां ग्रहणम् । छद्मकथा छलोक्तिः । अमङ्गलाश्लीलत्वस्य गुणवत्त्वं छद्मकथाया यथा—'निर्वाणवैरदहनाः' इति । कुरूणाममङ्गलसूचनं नटस्य वचनमिदम् । अत्र प्रशमादयः शब्दा मरणरूपामङ्गलसूचका अपि छद्मोक्तौ गुणा एव । **पर्वतेति** । हे जनाः, पृथिव्यां पतत्सुरसरिदम्भो गङ्गाजलं यूयं नमत । कीदृशम् । पर्वतभेदि हिमालयभेदकरम् । पवित्रं पावनम् । नरकस्य पारलौकिकदुःखस्य जैत्रं विनाशकम् । बहुभिर्मतं पूजितम् । गहनं महावेगित्वात् दुरवगाहम् । हरिमिव विष्णुमिव । पर्वतभेदी गोवर्धनोद्धारी स चासौ पवित्रश्चेति तम् । नरकस्य नरकनाम्नोऽसुरस्य जैत्रं विनाशकं पराजयकरम् । गहनं दुर्बोधतत्त्वम् । हरिमिव इन्द्रमिव । पर्वतानां पक्षच्छेदकत्वात् पर्वतभेदी । पवि वज्रं त्रायते धारयति पवित्रः । स चासौ स चेति तम् । जैत्रं जयशीलम् । नरकस्य मनुष्यस्य बहुमतं भृशं पूजितम् । गहनं दुर्जयम् । हरिमिव सिंहमिव । 'मृगाणां च मृगेन्द्रोऽहम्' इति स्मरणात् सिंहस्य वन्दनीयत्वम् । पर्वतभेदी गिरिगह्वरमाश्रयत्वेन सोऽस्यास्तीति । पवित्रो देवरूपत्वात् । नरकस्य मनुष्यस्य जैत्रम् । बहून् मतङ्गान् हन्तीति तम् । ज्ञत्वं संकेताभिज्ञत्वम् ।

---

1. **अप्रयुक्त इति** । यथा वा मदीये दशकण्ठवधे—'वापीषु स्फुटितारविन्दततयो गजासु शौण्डव्रजाः प्रासादेषु महीमहेन्द्रललना वेशेषु वेश्याङ्गनाः । उद्देशेषु सरोवराद्रववनीकुञ्जेषु शृङ्गारिणो रागं कन्दलयन्ति यत्र नितरां कान्तालिविभ्राजिताः ॥' अत्रालिशब्दं मद्यार्थेऽप्रयुक्तम् ॥

यथा—

'त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम् ।
त्वद्दर्शनमुदासीनं त्वामेव पुरुषं विदुः ॥'

स्वयं वापि परामर्शे

अप्रतीतत्वं गुण इत्यनुषज्यते । यथा—

'युक्तः कलाभिस्तमसां विवृद्ध्यै क्षीणश्च ताभिः क्षतये य एषाम् ।
शुद्धं निरालम्बपदावलम्बं तमात्मचन्द्रं परिशीलयामि ॥'

कथितं च पदं पुनः ॥ १८ ॥

**विहितस्यानुवाद्यत्वे विषादे विस्मये क्रुधि ।
दैन्येऽथ लाटानुप्रासेऽनुकम्पायां प्रसादने ॥ १९ ॥
अर्थान्तरसंक्रमितवाच्ये हर्षेऽवधारणे ।**

गुण इत्येव । यथा—

'उदेति सविता ताम्रः—' इत्यादि ।

अत्र विहितानुवादः ।

'हन्त हन्त गतः कान्तो वसन्ते सखि नागतः ।'

अत्र विषादः ।

'चित्रं चित्रमनाकाशे कथं सुमुखि चन्द्रमाः ।'

अत्र विस्मयः ।

'सुनयने नयने निधेहि—' इति ।

अत्र लाटानुप्रासः ।

त्वामिति । अत्र प्रकृतिपदं प्रधानवाचकं योगशास्त्र एव प्रयोगप्राचुर्येण प्रसिद्धम् । 'प्रधानं प्रकृतिः स्त्रियाम्' इति संकेताभिज्ञत्वे तु गुण एव । एवं पुरुषपदं परमात्मवाचकं योगशास्त्र एव प्रसिद्धम् । 'क्षेत्रज्ञ आत्मा पुरुषः' इति संकेताभिज्ञत्वे तु गुण एव । **युक्त इति** । कलाभिः पृथिव्यादितत्त्वैः । तमसामज्ञानानाम् । ताभिः कलाभिः । एषां तमसाम् । शुद्धं कामादिदोषरहितम् । निरालम्बपदं शिरःस्थाधोमुखकमलकर्णिकामध्यं तदवलम्बं तदाश्रयम् । चन्द्रपक्षे—कलाभिः षोडशभागैः क्षीणो हीनः । तमसां तिमिराणां विवृद्ध्यै यो भवति । यश्च ताभिर्युक्तः । एषां तमसां क्षतये भवति । तं शुद्धं शुभ्रप्रकाशम् । निरालम्बपदमाकाशमवलम्बो यस्य तम् । अत्र कलानिरालम्बपदात्मपदानां तत्त्वादिवाचकत्वं योगशास्त्र एव प्रसिद्धम् । आत्ममात्रप्रतीतेरुद्देश्यत्वादस्य गुणवत्त्वम् । **विहितस्येति** । उद्देश्यप्रतिनिर्देश्यस्थले उक्तपदप्रयोगादर्थान्तरप्रतीत्यभावेन झटित्येव शाब्दबोधः, ततो रसादिधीरविलम्बेनैवेत्यत्र कथितपदत्वस्य गुणवत्त्वम् । विषाद इत्याद्युपलक्षणम् । यत्र यत्र द्विरुक्तं पदं लक्ष-

'नयने तस्यैव नयने च ।'

इत्यादावर्थान्तरसंक्रमितवाच्यो ध्वनिः । एवमन्यत्र ।

संदिग्धत्वं तथा व्याजस्तुतिपर्यवसायि चेत् ॥ २० ॥

गुण इत्येव । यथा—

'पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं संप्रति सममावयोः सदनम् ॥'

णयार्थान्तरबोधकं तत्रापि कथितपदत्वं गुणः । अत एव वक्ष्यति—**एवमन्यत्रापीति** । तेन 'गृहे गृहे व्यग्रपुरन्ध्रिवर्गम्' इत्यत्र द्विरुक्तं गृहपदं सकले लाक्षणिकं पार्वत्यां सर्वजनानुरागं व्यञ्जयति । 'पीत्वा पीत्वा सुरभिमदिरामादरात्कान्तदत्तां कण्ठं तस्य प्रसिनु रभसाद्बाहुपाशद्वयेन । वक्त्रं दन्तव्रणकिणकलङ्काकुलं कारयेन्दुं मत्तानां तु व्रजति गुणतां दातुरापत्प्रदत्वम् ॥' अत्र द्विरुक्तं पीत्वेति पदं पौनःपुन्यलक्षकमत्र रूढिरेव । 'रक्ष रक्ष रघुव्याघ्र भवन्नाथमनाथवत् । घोरदंष्ट्राकरालास्यं रक्षो भक्षति मामिदम् ॥' अत्र रक्षेति द्रुते लाक्षणिकं भयातिशयं व्यञ्जयति । 'याहि याहि सुमुखि प्रियधाम त्राहि कान्तमशरीरशराधेः । बन्धुरेव विपदः प्रतिकारे संदधाति सुतरामुपयोगम् ॥' अत्र याहि याहीति पदं द्रुते लाक्षणिकं त्वरातिशयं व्यञ्जयतीत्यादावपि कथितपदत्वं गुणः। पदानुप्रास एव लाटानुप्रासो वक्ष्यते । तस्य शब्दवैचित्र्यद्वारा रसाद्युपकारकत्वमिति गुणत्वमेव । अर्थान्तरसंक्रमितवाच्यो ध्वनिप्रभेदस्तत्रार्थविशेषव्यञ्जकत्वमिति गुणकत्वम् । **हन्त हन्तेति** । अत्र द्विरुक्तं पदं वाच्यस्य विषादस्यातिशयं व्यञ्जयति । एवं चित्रचित्रमित्यत्र वाच्यस्य विस्मयातिशयम् । मुखवर्णनमिदम् । क्रुधि यथा—'यातु यातु किमनेन तिष्ठता मुञ्च मुञ्च सखि सादरं वचः । पामरीव वनलोलुपो युवा नैष वेत्ति कुलजाधरासवम् ॥' अत्र द्विरुक्तं पदं समभिव्याहृतपदार्थस्यायोगव्यवच्छेदं लक्षयति क्रोधातिशयं व्यञ्जयति । क्रोधेनोक्तावप्यर्थान्तराव्यञ्जकत्वात्कथितपदत्वं दोष एव । यथा—'तद्विच्छेदकृशस्य—' इत्यादौ मनःपदम् । दैन्ये यथा—'देहि देहि नृपमेव तु चित्तम् ।' अत्र द्विरुक्तं पदं दानप्रयुक्तिपौनःपुन्यं लक्षयद्दैन्यातिशयं व्यञ्जयति । अनुकम्पायां यथा—'दीन रे वसु गृहाण गृहाण ।' अत्र द्विरुक्तं पदं ग्रहणप्रयुक्तिपौनःपुन्यं लक्षयदनुकम्पातिशयं व्यञ्जयति । प्रसादने यथा—'मुञ्च मुञ्च सखि नेत्रमुद्रणं न क्षमा मयि पदानते क्षमा ।' **नयने इति**। अत्र द्वितीयनयनपदं भाग्यवत्त्वादिगुणविशिष्टनयनबोधकत्वाद्गुणः । हर्षे यथा—'कथय कथय दूत क्वागतो रामभद्रः ।' यद्वा 'हन्त हन्तागतः कान्तः श्रीमानद्य मदाश्रयम् ।' अवधारणमयोगव्यवच्छेदोऽन्ययोगव्यवच्छेदश्च । तत्रायोगव्यवच्छेदे—'हन्ति हन्ति रिपुं वीरः ।' अन्ययोगव्यवच्छेदे यथा—'तद्व्रजनाहितमतिर्बहुचाटुगर्भं कार्योन्मुखः खलु जनः कृतकं ब्रवीति । तत्साधवो ननु विदन्ति विदन्ति किंतु कर्तुं वृथा प्रणयमस्य न पारयन्ति ॥' अत्र 'विदन्ति' इति द्वितीयं पदं साधव एव विदन्तीत्यन्ययोगव्यवच्छेदपरम् । अयोगव्यवच्छेदस्तु नञद्वयेनैव प्रतीयते । **पृथु-**

---

१. 'मुखासवम्' इति पुस्तकान्तरे.

वैयाकरणमुख्ये तु प्रतिपाद्येऽथ वक्तरि ।
कष्टत्वं दुःश्रवत्वं वा

गुण इत्येव । यथा—

'[1]दीधीवेवीड्[2]समः कश्चिद्गुणवृद्ध्योरभाजनम् ।
क्विप्प्रत्ययनिभः कश्चिद्यत्र संनिहिते न ते ॥'

अत्रार्थः कष्टः । वैयाकरणश्च वक्ता । एवमस्य प्रतिपाद्यत्वेऽपि ।

'अत्रास्मार्षमुपाध्याय त्वामहं न कदाचन ।'

अत्र दुःश्रवत्वम् । वैयाकरणो वाच्यः । एवमस्य वक्तृत्वेऽपि ।

कार्तेति । राज्ञि दरिद्रस्योक्तिरियम् । हे देव, संप्रत्यावयोः सदनं गृहं समम् । त्वत्तो धनलाभे तु मद्गृहमनेवंभावात्पश्चात्समं न भविष्यतीत्यर्थः । पृथूनि कार्तस्वरस्य सुवर्णस्य पात्राणि यत्र । भूषिताः रत्नाद्यलंकारमण्डिताः निःशेषपरिजना यत्र । विलसन्तीभिः करेणुभिर्गहनं दुर्गमं राजसदनमीदृशम् । दरिद्रसदनं तु—पृथुकानां शिशूनां क्षुधया आर्तस्वरस्य पात्रम् । भुवि उषिताः सुप्ताः निःशेषपरिजना यत्र । शयनास्तरणाभावात् । तथा बिले गर्ते कुत्सितसतां मूषिकपिपीलिकादीनां रेणुभिर्गहनं व्याप्तम् । कुत्सायां कः । अत्र विशेषणपदानां संदेहयोग्यत्वेऽपि व्याजस्तुतिपर्यवसानात् गुणवत्त्वम् । वैयाकरणमुख्ये वैयाकरणादौ । आदिपदाच्छुष्कतर्कादिपरिग्रहः । वैयाकरणे कर्तरि कष्टत्वं गुणमुदाहरति—**दीधीवेवीडिति** । कश्चिज्जनो गुणवृद्ध्योः शौर्याभ्युदययोरभाजनमनाश्रयः । दीधीवेवीधातुभ्यामिडागमेन च समः । तेषां व्याकरणे गुणवृद्धिनिषेधात् । कश्चिज्जनः । क्विप्प्रत्ययनिभो विनष्ट एव । अत्र ते गुणवृद्धी न संनिहिते न स्तः । अत्र दीधीवेवीडं गुणवृद्धिनिषेधानभिज्ञानां क्विप्प्रत्ययस्य सर्वलोपिज्ञानभिज्ञानां च झटिति प्रतीतिर्न भवतीत्यर्थस्य कष्टत्वम् । एतदेवाह—**अत्रेति । एवमिति** । अस्य वैयाकरणस्य । यथा—'आत्मनेपदसंयोगियजिकर्ता गुरो भवान् ।' आत्मनः स्वर्गार्थं यागं करोषीत्यर्थः कष्टः । वैयाकरणे वाच्ये दुःश्रवत्वं गुणमुदाहरति—**अत्रास्मार्षमिति** । 'अत्रातार्ष्सम्' इति क्वचित् पाठः । अस्य वैयाकरणस्य दुःश्रवत्वं गुण इत्यनुषज्यते । यथा—'सोऽध्यैष्ट वेदांश्चिदशानयष्ट' इति । शुष्कतार्किकवक्तृत्वे कष्टत्वं गुणो यथा—'न्यायानुमानविगुणं कुयशस्ते महीपते । हेत्वाभासवदुद्भाव्यं विदुषो याति निग्रहम् ॥' अत्र पञ्चावयवन्यायप्रयोगे दुष्टहेतुप्रयोगे वादिनिग्रहकर इत्यर्थः । एतदनभिज्ञानां कष्टः । एवम-

---

1. **दीधीति** । धातुपक्षे—'अदेङ् गुणः,' 'वृद्धिरादैच्' इति सूत्राभ्यां परिभाषिते गुणवृद्धी । तयोरभाजनम् । 'दीधीवेवीटाम्' इत्यनेन गुणवृद्धिनिषेधविधानात् । प्रत्ययपक्षे—क्विप्प्रत्ययः 'वेरपृक्तस्य' इत्यनेन लुप्यते । यस्मिन्संनिहिते पुरोवर्तिनि 'ङिति च' इति निषेधाद् गुणवृद्धी न स्याताम् ॥

---

१. 'दीधीडवेवीड्समः' क.

ग्राम्यत्वमधमोक्तिषु ॥ २१ ॥

गुण इत्येव । यथा मम—

'एसो ससहरबिम्बो दीसइ हेअङ्गवीणपिण्डो व्व ।
एदे अस्ससमोहा पडन्ति आसासु दुद्धधार व्व ॥'

इयं विदूषकोक्तिः ।

निर्हेतुता तु ख्यातेऽर्थे दोषतां नैव गच्छति ।

यथा—

'संप्रति संध्यासमयश्चक्रद्वन्द्वानि विघटयति ।'

कवीनां समये[1] ख्याते गुणः ख्यातविरुद्धता ॥ २२ ॥

न्यस्य बोध्यत्वे बोध्यम् । अधमोक्तिषु अविदग्धवाक्येषु । **एसो ससेति** । 'एष शशधरबिम्बो दृश्यते हैयंगवीनपिण्ड इव । एते चांशुसमूहाः पतन्त्याशासु दुग्धधारा इव ॥' इति संस्कृतम् । अत्र दुग्धपदं ग्राम्यमपि वक्तुरधमत्वप्रतीतिकरत्वाद्गुण एव । 'मुग्धा मुग्धधिया—' इत्यादावनुप्रासविशेषादौ ग्राम्यत्वस्यादोषत्वं बोध्यम् । **संप्रतीति** । संध्यायां चक्रवाकद्वन्द्वस्य विघटनं सुप्रसिद्धमिति न तत्र हेत्वपेक्षा ।

---

1. **समय इति** । समयः संप्रदायः । स च त्रिविधः । तथा चोक्तम्—'असतोऽपि निबन्धेन सतामप्यनिबन्धनात् । नियमस्य पुरस्कारात्संप्रदायस्त्रिधा कवेः ॥' असतो निबन्धनं यथा—'रत्नानि यत्र तत्रादौ हंसाद्यल्पजलाशये । जलेभाद्यं नभोनद्याम्भोजाद्यं नदीष्वपि ॥ तिमिरस्य तथा मुष्टिग्राह्यत्वं सूचिभेद्यता । शुक्लत्वं कीर्तिपुण्यादौ कार्ष्ण्यं चाकीर्त्यघादिषु ॥ प्रतापे रक्ततोष्णत्वे रक्तत्वं क्रोधरागयोः । ज्योत्स्नापानं चकोराणां शैवालं सर्ववारिषु ॥ केसराशोकयोः स्त्रीणां गण्डूषात्पादवाततः । मासान्तरेऽपि पुष्पाणि रोमालिस्त्रिवलिः स्त्रियाम् ॥' सतामप्यनिबन्धनं यथा—'वसन्ते मालतीपुष्पं फलपुष्पे च चन्दने । कामिदन्तेषु कुन्दानां कुड्मलेषु च रक्तता । नारीणां श्यामता पातः स्तनयोर्यच्च वा हिये ॥' नियमाख्यानं यथा—'हिमवत्येव भूर्जत्वक् चन्दनं मलये परम् । हेमन्तशिशिरौ त्यक्त्वा सर्वदा कमलस्थितिः ॥ सामान्यग्रहणे शौक्ल्यं पुष्पाम्भश्छत्रवाससाम् । ध्वजचामरहंसानां हारस्य बकभसनोः ॥ कृष्णत्वं शैलवृक्षादिमेघवारिधिवीरुधाम् । भिल्लानामसुराणां च धूपपङ्कशिरोरुहाम् ॥ लौहित्यं धातुमाणिक्यजपारत्नविवस्वताम् । पद्मपल्लववन्धूकदाडिमीकरजादिषु ॥ पीतत्वं शालिमण्डूकवल्कलेषु परागके । वर्षास्वेव शिखिप्रौढिर्मधावेव पिकध्वनिः ॥' अन्यच्च—'कमलासंपदोः कृष्णहरितोर्नागसर्पयोः । पीतलोहितयोः स्वर्णपरागाग्निशिखादिषु ॥ चन्द्रे शशैणयोः कामध्वजे मकरमत्स्ययोः । दानवासुरदैत्यानामैक्यमेवाभिसंहितम् ॥' अपि च—'चिरंतनस्यापि तथा शिवचन्द्रस्य बालता । मानवा मौलितो वर्ण्या देवाश्चरणतः पुनः ॥ भुवनानि निबध्नीयात्त्रीणि सप्त चतुर्दश । चतस्रोऽष्टौ दशदिशश्चतुरः सप्त चाम्बुधीन् ॥ अष्टादश स्मृता विद्याश्चतस्रश्च चतुर्दश । ये स्थले ते जले जीवा भिन्दन्त्यर्कं रणे मृताः ॥ महत्त्वमादौ सर्गान्ते सूक्ष्मता जगता-

कविसमयख्यातानि च—

मालिन्यं व्योम्नि पापे, यशसि धवलता वर्ण्यते हासकीर्त्यो
रक्तौ च क्रोधरागौ, सरिदुदधिगतं पङ्कजेन्दीवरादि ।
तोयाधारेऽखिलेऽपि प्रसरति च मरालादिकः पक्षिसङ्घो
ज्योत्स्ना पेया चकोरैर्जलधरसमये मानसं यान्ति हंसाः ॥२३॥
पादाघातादशोकं विकसति बकुलं योषितामास्यमद्यै-
र्यूनामङ्गेषु हाराः, स्फुटति च हृदयं विप्रयोगस्य तापैः ।
मौर्वी रोलम्बमाला धनुरथ विशिखाः कौसुमाः पुष्पकेतो-
र्भिन्नं स्यादस्य बाणैर्युवजनहृदयं स्त्रीकटाक्षेण तद्वत् ॥२४॥

कवीनामिति । समये सिद्धान्ते । **मालिन्यमिति** । तेऽप्याकाशमषीश्यामम् । 'कलङ्कमालिन्यमिषेण चन्द्रमा दधात्यघं पान्थवधूवधोद्भवम् ।' दुर्यशसि च मालिन्यं ज्ञेयम् । यथा—'अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरःस्थितम् ।' इति । एवमादीन्येषामुदाहरणानि बोध्यानि । यशःकीर्त्योर्भेदः 'खड्गादिप्रभवा कीर्तिर्विद्यादिप्रभवं यशः ।' इति केषांचिद्दर्शनादुपपत्तेः । **पादाघातादिति** । योषितामित्यनेन संबन्धः 'पादेन नापैक्षत सुन्दरीणाम्' इत्यादिदर्शनात् । स्फुटति विदीर्णं भवति । रोलम्बमाला भ्रमरश्रेणी । 'अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता' इत्यादिदर्शनात् । धनुरथेत्यथशब्दश्चार्थः । तेन पुष्पकेतोः कामस्य धनुः कौसुमं विशिखाश्च

मपि । शैलादिर्भिद्यते शब्दान्नभः शतधनूपरि (?) ॥ नाम तत्तदुपाधौ स्याच्छंकरो वृषवाहनः । चिह्नत्वे च वृषाङ्कोऽयं ध्वजे सत्त्वाद्वृषध्वजः ॥ शूली न सर्पी गिरिशः शशी न हरिणी विधुः । इन्दुमौलिर्महादेवो गङ्गामौलिर्न तु क्वचिद् ॥' अन्यच्च—'श्वेतानि चन्द्र—शक्राश्व—शंभु—भार्गव—नारदाः । हली शेषाहि—शक्रेभौ सिंहसौधशरद्घनाः ॥ सूर्येन्दुकान्त—निर्मोक—मन्दार—द्रु—हिमाद्रयः । हिमहासमृणालानि स्वर्गङ्गभरदाभ्रकम् ॥ सिकतामृतलोध्राणि गुणकैरवशर्कराः । नीलानि कृष्ण—चन्द्राङ्क—व्यास—राम—धनंजयाः ॥ शनिर्द्रुपदजा काली राजपट्टविदूरजम् । विषाकाशकुहूशस्त्रायुरुपापतमोनिशाः ॥ रसावद्भुतशृङ्गारौ मदतापिच्छराहवः । सीरिचीरं यमो रक्षः कण्ठः खञ्जनकेकिनोः ॥ कृत्या छाया गजाङ्गारखलान्तःकरणादयः । शोणानि च्छत्रधर्मश्च त्रेता रौद्ररसस्तथा ॥ चकोरकोकिलापारावतनेत्रं कपेर्मुखम् । तेजःसारसमस्तं च भौमकुङ्कुमतक्षकाः ॥ जिह्वेन्द्रगोपखद्योतविद्युत्कुञ्जरबिन्दवः । पीतानि दीपजीवेन्द्रगरुडेश्वरदृग्जटाः ॥ ब्रह्मावीररसस्वर्णकपिद्वापररोचनाः । किञ्जल्कचक्रवाक्याद्या हरितालमनःशिलाः ॥ धूसराणि रजो लूता करभो गृहगोधिका । कपोतमूषकौ दुर्गा काककण्ठखरादयः ॥' इदमुपलक्षणम् । 'हरिताः सूर्यतुरगा बुधो मरकतादयः ।' इत्यपि बोध्यम् । 'वैरूप्ये चाप्रसिद्धौ च नियमोऽयमुदाहृतः । अन्यद्वस्तु यथा यत्स्यात्तत्तथैवोपवर्ण्यते ॥' इति ॥

अह्नयम्भोजं, निशायां विकसति कुमुदं, चन्द्रिका शुक्लपक्षे
मेघध्वानेषु नृत्यं भवति च शिखिनां नाप्यशोके फलं स्यात् ।
न स्याज्जाती वसन्ते, न च कुसुमफले गन्धसारद्रुमाणा-
मित्याद्युन्नेयमन्यत्कविसमयगतं सत्कवीनां प्रबन्धे ॥ २५ ॥

एषामुदाहरणान्याकरेषु स्पष्टानि ।

धनुर्ज्यादिषु शब्देषु शब्दास्तु धनुरादयः ।
आरूढत्वादिबोधाय

यथा—

'पूरिते रोदसी ध्वानैर्धनुर्ज्यास्फालनोद्भवैः ।'

अत्र ज्याशब्देनापि गतार्थत्वे धनुःशब्देन ज्याया धनुष्यायत्तीकरणं बोध्यते । आदिशब्दात् 'भाति कर्णावतंसस्ते ।' अत्र कर्णस्थितत्वबोधनाय कर्णशब्दः । एवं श्रवणकुण्डलशिरःशेखरप्रभृतिः ।

एवं निरुपपदो मालाशब्दः पुष्पस्रजमेवाभिधत्त इति स्थितावपि 'पुष्पमाला विभाति ते ।' अत्र पुष्पशब्द उत्कृष्टपुष्पवृच्यै । एवं मुक्ताहार इत्यत्र मुक्ताशब्देनान्यरत्नामिश्रितत्वम् ।

प्रयोक्तव्याः स्थिता अमी ॥ २६ ॥

धनुर्ज्यादयः सत्काव्यस्थिता एव निबद्धव्याः न त्वस्थिता जघनकाञ्चीकरकङ्कणादयः ।

उक्तावानन्दमग्नादेः स्यान्यूनपदता गुणः ।

यथा—

'गाढालिङ्गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा ।

कौसुमा इत्यर्थः । अस्य पुष्पकेतोः । **अह्नयम्भोजमिति** । दिनादौ पद्माद्यसत्त्वेऽपि तत्र तत्प्रकाशो वर्णनीयः । **चन्द्रिकेति** । यत्र रात्रिभागे चन्द्रिका नास्ति तत्रापि वर्णनीयेति भावः । गन्धसारद्रुमाणां चन्दनवृक्षाणाम् । **इत्यादीति** । तेन सौधादेर्मेघाद्युपरिपर्यन्तगामिलमत्युच्चत्वव्यञ्जनाय वर्ण्यते । पुनरुक्तस्य गुणत्वमाह—**धनुरिति** । ज्याशब्देनैव धनुर्गुणबोधाद्धनुःशब्दो निरर्थकोऽपि आरूढत्वबोधनाद्गुणः । शेखरपदं शिरोभूषणं किरीटं वक्ति । काव्यस्थिता महाकविप्रयोगेषु स्थिताः । **जघनेति** । निबन्धव्या इति शेषः । आनन्दमग्नादेरित्यादिना दुःखमग्नादेर्ग्रहणम् । **गाढेति** । संख्यो रात्रिवृत्तान्तकथनमिदम् । गाढालिङ्गनेन वामनीकृतकुचा चासौ प्रो-

मा मा मानद माति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम् ॥'

अत्र पीडयेति न्यूनम् ।

क्वचिन्न दोषो न गुणः

न्यूनपदत्वमित्येव । यथा—

'तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः ।
तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमगोचरं नयनयोर्जातेति कोऽयं विधिः ॥'

अत्र प्रभावपिहितेति भवेदिति चेत्यनन्तरं नैतद्यत इति पदानि न्यूनानि । एषां पदानां न्यूनतायामप्येतद्वाक्यव्यङ्ग्यस्य वितर्काख्य-व्यभिचारिभावस्योत्कर्षाकरणान्न गुणः । दीर्घं न सेत्यादिवाक्यजन्य-या च प्रतिपत्त्या तिष्ठेदित्यादिवाक्यप्रतिपत्तेर्बोधः स्फुटमेवावभासत इति न दोषः ।

गुणः क्वाप्यधिकं पदम् ॥ २७ ॥

द्विन्नरोमोद्गमा चेति समासः । गाढालिङ्गनवामनीकृतकुचयोः प्रोद्भिन्नो रोमोद्गमो यस्या इति समासो न युक्तः । कुचे रोमोद्गमस्यासंभवात् । सान्द्रस्नेहरसातिरेकेण विगलत् श्रीमतो नितम्बादम्बरं यस्याः सा । हे मानद, मा मां मा पीडय मां मातिपीडय अलं बहुव्यापारेणेति क्षामस्याल्पस्याक्षरस्योल्लापिनी । पीडयेत्यादेरनुक्तत्वादल्पत्वमक्ष-रस्य । मानदस्य पीडाकरत्वमनुपपन्नमित्यवगमाय तत्पदेन संबोधनम् । एते तावन्नि-षेधाभासा विधिषु पर्यवसन्नाः । निष्पन्दत्वेन किं सुप्तेति वितर्कचतुष्टयम् । सुप्ता निद्रायिता, अतिनिष्पन्दत्वेन मृतेति, अत्यन्तत्वे लयः, अबहिर्भावे विशेषलयश्च बोध्यः । अत्र पीडयेत्यादियोग्यस्य पदस्य न्यूनता हर्षग्लानिसंमोहप्रकर्षबोधनद्वारा रसं पुष्णातीति गुणवत्त्वम् । **तिष्ठेदिति** । पुरूरवस उक्तिरियम् । सा उर्वशी प्र-भावेन पिहिता सती तिष्ठेत् । अथवा प्रभौ मयि कोपवशादपिहिता तिष्ठेत् । नै-तत् । यतो दीर्घं न कुप्यति । उत्पतिता उद्गता । मयि भावार्द्रं मद्गोचरप्रेमस्ति-मितम् । अस्या उर्वश्याः । विबुधद्विषोऽसुराः । इत्थमदृश्यत्वे हेतुर्नास्त्येव किमदृ-श्येति विस्मयादाह—**सा चेति** । अगोचरमगोचरत्वम् । विधिर्नियतिः प्रकारो वा । अगुणत्वमदोषत्वं चोपपादयति—**एषामिति** । वाक्यप्रतिपत्तेर्वाक्यजन्यबोधस्य ।

यथा—

'आचरति दुर्जनो यत्सहसा मनसोऽप्यगोचरानर्थान् ।
तन्न न जाने जाने स्पृशति मनः किं तु नैव निष्ठुरताम् ॥'

अत्र न न जाने इत्यन्ययोगव्यवच्छेदाद्विच्छित्तिविशेषः ।

समाप्तपुनरात्तत्वं न दोषो न गुणः क्वचित् ।

यथा—'अन्यास्ता गुणरत्न—' इत्यादि ।

अत्र प्रथमार्धेन वाक्यसमाप्तावपि द्वितीयार्धवाक्यं पुनरुपात्तम् । एवं च विशेषणमात्रस्य पुनरुपादाने समाप्तपुनरात्तत्वं न वाक्यान्तरस्येति विज्ञेयम् ।

गर्भितत्वं गुणः क्वापि

यथा—

'दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सापि वदन्त एव हि वयं रोमाञ्चिताः पश्यत ।

ननु द्वितीयजाने इत्यनेनायोगव्यवच्छेद एव प्रतीयते इत्यत आह—**अत्रेति** । इत्यनेन इत्यनेनैवेत्यर्थः । गुणत्वमुपपादयति—**द्वितीय इति** । विच्छित्तिविशेषोऽर्थवैचित्र्यविशेषः प्रतीयत इति । गुणत्वमिति शेषः । अत्र कथितपदत्वस्यावधारणबोधकत्वाद् 'यद्वच्चनेन—' इत्यादिप्राक्प्रदर्शितवद् गुणत्वमस्ति । अस्य शुद्धोदाहरणं तु—'याहि माधव याहि केशव मा वद कैतववादम् । तामनुसर सरसीरुहलोचन या तव हरति विषादम् ॥' अत्र माधवकेशवसरसीरुहलोचनपदानामन्यतमेनैवान्वयोपपत्तौ सर्वेषामुपपादनमर्थान्तरबोधकत्वाद् गुण एव । तथाहि—माधवपदेन लक्ष्मीपतित्वेऽपि तव वैदग्ध्यं नास्तीति, केशवपदेन वीरत्वेऽपि तव रतिसामर्थ्यं नास्तीति, सरसीरुहलोचनपदेन विलक्षणचक्षुःसत्त्वेऽपि मम रूपलावण्यातिशयं न पश्यसीति व्यज्यते । यथा वा—'कुर्या हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये ।' अत्र पिनाकपाणेरपीत्यनेनैव प्रकृतान्वयोपपत्तौ हरस्येत्यधिकमपि हरस्यैव पिनाकसंबन्धेन दुर्जयत्वमिति व्यञ्जकत्वाद् गुणत्वम् । 'नायं भिक्षुर्वरयुवतिमात्रो तितिक्षुर्धनुष्मान्राज्ञः पुत्रो नहि नहि जटाजूटभारं दधानः । नायं व्याधो नवगुणधरः पश्य कस्मादकस्मात्पुण्येऽरण्ये नवजलधरश्यामलः कोऽयमेति ॥' अत्र द्वितीयस्य नहीति निपातसमुदायस्य वाचकत्वाभावेन कथितपदस्य न विषयः, किं त्वधिकोपि राजपुत्रस्य जटाधारणमत्यन्तासंभवीति व्यञ्जकत्वाद् गुण एव । **न वाक्यान्तरस्येति** । पुनरुपादाने समाप्तपुनरात्तत्वं न दोष इत्यर्थः । **दिङ्मातङ्गेति** । दिङ्मातङ्गसमूहेन विभक्ताः परिच्छिन्नाश्चत्वार आघाटाः सीमा यस्याः सा ।

विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मात्प्रादुरभूत्कथाद्भुतमिदं यत्रैव चास्तं गतम् ॥'

अत्र वदन्त एवेत्यादि वाक्यं वाक्यान्तरप्रवेशात् चमत्कारातिशयं पुष्णाति।

पतत्प्रकर्षता तथा ॥ २८ ॥

तथेति क्वचित् गुणः। यथा—'चञ्चद्भुज—' इत्यादि।

अत्र चतुर्थपादे सुकुमारार्थतया शब्दाडम्बरत्यागो गुणः।

क्वचिदुक्तौ स्वशब्देन न दोषो व्यभिचारिणः।
अनुभावविभावाभ्यां रचना यत्र नोचिता ॥ २९ ॥

यत्रानुभावविभावमुखेन प्रतिपादने विशदप्रतीतिर्नास्ति, यत्र च विभावानुभावकृतपुष्टिराहित्यमेवानुगुणं तत्र व्यभिचारिणः स्वशब्देनोक्तौ न दोषः। यथा—

'औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः।
दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे
संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः ॥'

अत्रौत्सुक्यस्य त्वरारूपानुभावमुखेन प्रतिपादने संगमे[1] न झटिति प्रतीतिः। त्वराया भयादिनापि संभवात्[2]। ह्रियोऽनुभावस्य च व्याव-

---

साध्यते स्ववशीक्रियते। सिद्धा साधितापि सा मही। विप्राय प्रतिपाद्यत इत्युत्तरेणान्वयः। किमपरमिति वाच्यमिति शेषः। कथैवाद्भुतमाश्चर्यम्। **यत्रैवेति**। तथा च तत्तुल्यो न भूतो न वर्तमानो न भविष्यन्निति भावः। **चमत्कारातिशयमिति**। तेन युद्धवीरदानवीरयोः परिपोषः। **क्वचिदिति**। यत्र पद्यांशे सुकुमारार्थत्वं तत्रेत्यर्थः। इदानीं रसदोषाणां विषयविशेषे यथायथमदोषत्वं गुणत्वं चाह—**क्वचिदिति**। रचना व्यञ्जनम्। विभावादिकृतरचनानौचित्यम्। विकल्पयति—**यत्रेति। औत्सुक्येनेति**। नवे संगमे प्रथमदिवससमागमे। हसता हरेण श्लिष्टा गौरी युष्माकं शिवायास्तु। कीदृशी। तद्गृहगमने प्रथमौत्सुक्येन कृतत्वरा, ततश्च सहभुवा सहजया ह्रिया लज्जया व्यावर्तमाना, ततश्च तैस्तैरित्यादि। ततश्चाग्रे वरं स्वामिनं दृष्ट्वा आत्तेत्यादि। साध्वसस्य विभावादिभिः परिपोषे सति रसत्वप्राप्त्या शृङ्गारविरोधित्वं स्यात्। हासस्य तथात्वे प्रधानत्वेन प्रतिपत्तिः स्यात्। न शृङ्गारत्वेनेति भावः। परिपन्थि-

---

१. 'संगमे' घ-पुस्तके नास्ति. २. 'संभवः' घ.

तमानस्य कोपादिनापि संभवात्। साध्वसहासयोस्तु विभावादिपरिपोषस्य प्रकृतरसप्रतिकूलप्रायत्वादित्येषां स्वशब्दाभिधानमेव न्याय्यम्।

संचार्यादेर्विरुद्धस्य बाध्यत्वेन वचो गुणः।

यथा—'काकार्यं शशलक्ष्मणः क च कुलं—' इत्यादि।

अत्र प्रशमाज्ञानां वितर्कमतिशङ्काधृतीनामभिलाषाङ्गौत्सुक्यस्मृतिदैन्यचिन्ताभिस्तिरस्कारः पर्यन्ते चिन्ताप्रधानमास्वादप्रकर्षमाविर्भावयति।

विरोधिनोऽपि स्मरणे साम्येन वचनेऽपि वा ॥ ३० ॥
भवेद्विरोधो नान्योन्यमङ्गिन्यङ्गत्वमाप्तयोः।

क्रमेण यथा—'अयं स रसनोत्कर्षी—' इत्यादि।

अत्रालम्बनविच्छेदे[1] रतेररसात्मतया स्मर्यमाणानां तदज्ञानां शोकोद्दीपकतया करुणानुकूलता।

रसविभावादिसंग्रहस्य गुणत्वमाह—**संचार्यादेरिति**। व्यभिचारिभावाभावादेरित्यर्थः। आदिना विभावानुभावग्रहणम्। विरुद्धस्य प्रतिकूलरसाङ्गस्य बाध्यत्वेन प्रतिरुद्धस्वजन्यरसपरिपुष्टिकत्वेन वचोज्ञापनम्। **काकार्यमिति**। भावशबलत्वोदाहरणमिदम्। गुणत्वमुपपादयति—**अत्रेति**। प्रशमाज्ञानां शान्तरसानुकूलानाम्। अभिलाषाङ्गैः शृङ्गाररसानुकूलैः। तिरस्कारः स्वजन्यरसपरिपोषस्थगनम्। ननु वितर्कादीनामिव औत्सुक्यादीनामपि बाध्यत्वमस्तीति कथं विप्रलम्भस्य परिपुष्टिरित्यत आह—**पर्यन्त इति**। चिन्तायाम्। विश्रान्तौ सत्यामित्यर्थः। चिन्ताप्रधानमबाधितत्वेन मुख्यं कारणं यस्य तादृशमास्वादप्रकर्षं विप्रलम्भशृङ्गारपरिपोषम्। आविर्भावयति करोतीति। तज्ज्ञापनं गुण इति शेषः। विरुद्धरसयोः संपर्को दोष एव। तदुक्तम्—'प्रत्यनीकौ रसौ द्वौ द्वौ तत्संपर्कं विवर्जयेत्' इति। तयोर्विषयविशेषे समावेशमाह—**विरोधिनोऽपीति**। स्मरणे पूर्वानुभूतस्यातीतस्य व्यञ्जनया ज्ञाने। वचने ज्ञापने। अङ्गिनि मुख्यविशेष्ये। एतच्चाङ्गिनीत्युपादानाल्लभ्यते। अन्यथा 'अङ्गत्वमाप्तयोः' इत्यनेनैवाङ्गलाभे तदुपादानमनर्थकं स्यात्। द्विवचनं बहूनामुपलक्षणम्। **अयमिति**। व्याख्यातमिदं गुणीभूतव्यङ्ग्योदाहरणे। अत्र विरुद्धस्यापि शृङ्गारस्य स्मर्यमाणतया करुणेन संपर्को न दोषः। ननु तदानीमपि रतिरस्ति तस्या रसत्वप्राप्तिरविहतैवेति कथं शृङ्गारस्य स्मर्यमाणत्वमत आह—**अत्रेति**। आलम्बनस्य नायकस्य विच्छेदे मरणे अरसात्मतया तदानींतनानुभावाद्यभावेन रसरूपतानापन्नतया स्मर्यमाणानामिति। एतेन शृङ्गारस्यापि स्मरणं दर्शितम्। तदज्ञानां रत्यज्ञानाम्। मृतस्योपकारस्मरणं बन्धूनामत्यन्तशोकजनकमिति भावः। साम्येनोक्तौ। विरुद्धयोः

---

१. '–विच्छेदेन' क-ख-ग.

'सुरागया स्रुतघनघर्मतोयया
कराहतिध्वनितपृथूरुपीठया ।
मुहुर्मुहुर्दशनविलङ्घितोष्ठया
रुषा नृपाः प्रियतमयेव भेजिरे ॥'

अत्र संभोगशृङ्गारो वर्णनीयवीरव्यभिचारिणः क्रोधस्यानुभावसाम्येन विवक्षितः ।

'एकं ध्याननिमीलनान्मुकुलितप्रायं द्वितीयं पुनः
पार्वत्या वदनाम्बुजस्तनभरे संभोगभावालसम् ।
अन्यद्दूरविकृष्टचापमदनक्रोधानलोद्दीपितं
शंभोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥'

अत्र शान्तशृङ्गाररौद्ररसपरिपुष्टा भगवद्विषया रतिः । यथा वा—

'क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन्योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः ॥'

समावेशमुदाहरति—**सरागयेति**। मुखलौहित्यजनकत्वेन 'रक्तौ च क्रोधरागौ' इति दर्शनाद्वा रुषः सरागत्वोपपत्तिः । पक्षे—सानुरागया । कराघातेन ध्वनितं पृथूरुपीठं यत्र । क्रोधे सति वीरैरूरुः पीठं वा आहन्यते । पक्षे—कराघातेन ध्वनितं पृथूरुरेव पीठं यया । अतिप्रौढकामाभिर्नायिकाभिः करेणोरुराहन्यत इति कामशास्त्रप्रसिद्धम् । दशनैर्विलङ्घितो निपीडित ओष्ठो यत्र । पक्षे—कान्तदशनेन निपीडित ओष्ठो यस्याः । अत्र शृङ्गारवीरयोः समावेशः । उक्तानुभावानामन्यत्रापि संभवाज्झटिति रुषः प्रतीतिर्न भवतीति तस्याः स्वशब्देनोपादानं न दोषः । प्रकरणादुत्साहस्यास्वाद्यमानत्वेन वीरत्वं स्थायिनः क्रोधस्य स्वशब्देनोपादानादास्वाद्याभावेन न रौद्रत्वमिति भावः । एकस्मिन्नङ्गत्वमापन्नानां रसानां समावेशमुदाहरति—**एकमिति** । नेत्रमित्यर्थः । मुकुलितप्रायं मुद्रितपद्माकारम् । वदनाम्बुजे संभोगशृम्बनम्, स्तनभरे संभोग आलिङ्गनादिः, तस्य भावेन अभिप्रायेण अलसं निष्पन्दम् । अन्यल्ललाटनेत्रम् । दूरमत्यन्तं विकृष्टश्चापो येन । यद्वा । दूरे विकृष्टश्चापो येन । तस्मिन्मदने यः क्रोधः स एवानलः तेनोद्दीपितमुज्वलितं भिन्नरसम् । विरुद्धबहुरसव्यञ्जकम् । शृङ्गारिणोऽपि न समाधिभङ्ग इति शृङ्गारस्य परम्परया क्रोधस्य समाधिविघ्ननिवारकत्वेन तत्परिणामिनो रौद्रस्य साक्षादेव देवविषयकरतिपोषकत्वम् । परम्परयाप्यङ्गत्वमापन्नयो रसयोः समावेशमुदाहरति—**क्षिप्त इति** । त्रिपुरदाहे स प्रसिद्धः शंभुसंबन्धी शराग्निः वो

अत्र कविगता भगवद्विषया रतिः प्रधानम् । तस्याः परिपोषकतया भगवतस्त्रिपुरध्वंसं प्रत्युत्साहस्यापरिपुष्टतया रसपदवीमप्राप्ततया भावमात्रस्य करुणोऽङ्गम् । तस्य च कामीवेति साम्यबलादायातः शृङ्गारः ।

एवं चाविश्रान्तिधामतया करुणस्याप्यङ्गतैवेति द्वयोरपि करुणशृङ्गारयोर्भगवदुत्साहपरिपुष्टतद्विषयरतिभावास्वादप्रकर्षकतया यौगपद्यसद्भावादङ्गत्वेन न विरोधः ।

युष्माकं दुरितं दहतु । कीदृशः । आसन्नापराधः कामीव । साश्रुनेत्रोत्पलाभिः युवतिभिर्हस्तावलग्नः सन् क्षिप्तः । शोकात् क्रोधाच्च तासासु । एवमुत्तरोत्तरक्रियास्वपि कामीति दृष्टान्तः । अंशुकस्यान्तमाददानोऽपि प्रसभं सहसा अभिहतः । केशेषु गृह्णन् अपास्तः । चुम्बनार्थं कामिनः केशग्रहणम् । ससंभ्रमेण भयजन्यत्वरया ईक्षणाभावः । पक्षे–आदरजन्यत्वरया नेक्षितः, किंत्वनादरेणेक्षितः । अङ्गाङ्गिभावमुपपादयति—**अत्रेति । प्रधानमिति** । निराकाङ्क्षवाक्यप्रतिपाद्यत्वादिति भावः । तस्या भगवद्विषयरतेः । **परिपोषकतयेति** । 'अङ्गस्य' इति शेषः । **अपरिपुष्टतयेति** । विभावानुभावयोरनुपादानादिति भावः । रसपदवीं रसत्वम् । भावमात्रस्य उद्बुद्धमात्रस्थायी चेति भावलक्षणाक्रान्तस्य । **करुणोऽङ्गमिति** । दुष्टनिग्रहं प्रति भगवदुत्साहस्यानुभावेन करुणस्थायिभावेन स्त्रीणां शोकेन व्यञ्जनमिति करुणस्याङ्गत्वम् । **कामीवेति** । प्राग्यथा कामुक आचरति स्म तथाद्य शरारिरिति साम्यबलात्सादृश्यानुभवादायातः स्मृतिविषयतां प्राप्तः । शृङ्गार ईर्ष्यामानाख्यविप्रलम्भः । अङ्गमित्यनुषङ्गेणान्वयः । स्मर्यमाणपूर्वावस्थाया रतेः करुणस्थायिभावः स्त्रीशोकोद्दीपकतयाङ्गत्वमिति भावः । नन्वत्र स्त्रीशोकस्य वाच्येनानुभावेनाश्रुणा व्यङ्ग्येनोद्दीपनविभावेन झटित्याक्षेपलभ्येन म्रियमाणपत्यालम्बनविभावेन परिपुष्टिरिति करुणस्य प्रधानत्वमेव कथमङ्गत्वमत आह—**एवं चेति** । अविश्रान्तिधामतया साकाङ्क्षवाक्यव्यङ्ग्यतया । एवं पदैः सकलपदार्थोपस्थितौ खलेकपोतन्यायेन विशेष्यविशेषणं तत्रापि विशेषणान्तरमितिरीत्या शाब्दबोधे सति व्यङ्ग्यबोधेऽपीयं रीतिरिति भावः । भगवदुत्साहस्तत्र करुणस्तत्रापि शृङ्गारो व्यञ्जनया एकदैवाङ्गितयावगम्यत इत्युक्त्या अवान्तरवाक्यार्थबोधक्रमेण शाब्दबोधपक्षे व्यङ्ग्यार्थबोधस्यापि तद्रीतित्वेन विशिष्टवैशिष्ट्यमिति रीत्या शृङ्गारविशिष्टकरुणबोधे सति करुणविशिष्टभगवदुत्साहबोधः तदनन्तरं भगवदुत्साहविशिष्टभावबोधः क्रमाज्जायत इति मतेन परम्परया प्रधानोपकारमुपपादयति–**द्वयोरपीति** । करुणशृङ्गारयोरिति । अपरिपुष्टतयेति प्रधानस्य भूयस्युपकारे वर्तत इति प्रथममते स्वपरिपोषकं परिपोषणमात्रं प्रधानस्योपकारः । द्वितीये तु निरुक्तक्रमेण आस्वादातिशयजननमपीति विशेषः । स्थायिभावानामङ्गाङ्गिभावेनैव रसानामङ्गाङ्गिभाव इति काव्यप्रकाशकारः । यद्वा यासां पूर्वं प्राणेश्वरा हस्तधारणादिना प्रसादनपरा आसंस्तासामेवेदानीं शंभुशरस्तत्कर्मणैव तादृशीं दुर्दशां जनयतीति शृङ्गारेण परिपोषितः कविकरुण एव स्वजन्यभगवद्दुष्ट-

ननु [1]समूहालम्बनात्मकपूर्णघनानन्दरूपस्य रसस्य तादृशेनेतररसेन कथं विरोधः संभावनीयः । एकवाक्ये निवेशप्रादुर्भावयौगपद्यविरहेण परस्परोपमर्दकत्वानुपपत्तेः । नाप्यङ्गाङ्गिभावः । द्वयोरपि पूर्णतया स्वातन्त्र्येण विश्रान्तेः । सत्यमुक्तम् । अत एवात्र प्रधानेतरेषु रसेषु स्वातन्त्र्यविश्रमराहित्यात्पूर्णरसभावमात्राच्च विलक्षणतया संचारिरसनाम्ना व्यपदेशः प्राच्यानाम् । अस्मत्पितामहानुजकविपण्डितमुख्यश्रीचण्डीदासपादानां तु खण्डरसनाम्ना । यदाहुः—

'अङ्गं वाध्योऽथ संसर्गी यद्यङ्गी स्याद्रसान्तरे ।
नास्वाद्यते समग्रं तत्ततः खण्डरसः स्मृतः ॥' इति ।

निग्रहोत्साहोद्बोधेन कविगतां भगवद्विषयां रतिं जनयित्वा तामेव सामाजिकानामास्वादकन्दतामुपनयतीति रसयोरेवाङ्गत्वम् । एतन्मते प्रद्वेषमाह—**नन्विति** । **समूहालम्बनात्मकेति** । विभावादिपदार्थसमूहविषयकज्ञानरूपेत्यर्थः । पूर्णः समधिकः । घनः सुखान्तरतिरोधायकः । अपेरङ्गत्वेनापीत्यत्रेणान्वयेन मतवैलक्षण्यावगमः । **आस्वादप्रकर्षकतयेति** । 'गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते । उपकारे प्रधानस्य तथा भूयसि वर्तते ॥' इति न्यायेनेति भावः । अस्यार्थः—गुणो विशेषणं कृतात्मसंस्कारः स्वविशेषणेन कृतोपकारः प्रधानं पार्यन्तिकविशेष्यं प्रतिपद्यते अन्वेति । तादृशः सन्नेव हि तिरोधायको य आनन्दस्तत्स्वरूपस्येत्यर्थः । एतादृशेन समूहालम्बनात्मकपूर्णघनानन्दरूपेण । **एकवाक्येति** । एकस्मिन्वाक्ये यो निवेशो व्यञ्जकतासंबन्धेन वृत्तिः स च प्रादुर्भावयौगपद्यं च तयोर्विरहेणेत्यर्थः । यद्वा एकवाक्यार्थग्रहेण यौ प्रादुर्भावावुत्पत्ती तयोर्यौगपद्यविरहेण एककालीनत्वविरहेण उपमर्दकत्वाभावात् परस्परपरिपोषकप्रतिबन्धकत्वाभावात् । 'राममन्मथ—' इत्यादौ बीभत्सशृङ्गारयोर्न युगपदुत्पत्ती, किं त्वभिधेयबोधानन्तरं बीभत्सस्य व्यङ्ग्यबोधानन्तरं शृङ्गारस्येति क्रमेणैवेति नानुपपत्तिः । **नापीति** । रसयोरपीति शेषः । अत एव उक्तानिर्वाहादेव । प्रधानेतरेषु अङ्गेषु स्वतन्त्रेत्यादि विलक्षणतयेत्यत्र हेतुः । **भावमात्राच्चेति** । अपरिपुष्टस्थायिभावत्वेन भावत्वमभिप्रेत्य प्रधानत्वाभावाद्विलक्षणभावप्रदर्शनं खण्डरसनाम्नेति व्यपदेश इत्यन्वयः । एवं च पूर्णरसयोर्विरोधाद्यसंभवेऽपि खण्डरसपूर्वरसयोस्तद्विरोधादिसंभवः । **अङ्गमिति** । अङ्गी रसो रसान्तरे यद्यङ्गम् । अथवा बाध्यो विरुद्धोऽपि स्मरणादिबलाल्लब्धसमावेशः स्यात् । यदि वा संसर्गी अविरोधी प्रधानानुपकारितया स्वातन्त्र्येण मिलितः स्यात्तदा समग्रास्वादाभावात्खण्डरसः स्मृत इत्यर्थः । ननु स्मरणादावेव विरुद्धयोः समावेशः प्रतिप्रसूतस्तदभावात् कथं 'कपोले—' इत्यादौ विरुद्धयोर्वीरशृङ्गारयोः समावेश इत्य-

---

1. **समूहेति** । नानाप्रकारतानिरूपितनानामुख्यविशेष्यताशालिज्ञानं समूहालम्बनम् ॥

---

१. 'अपेः' इत्यादि 'सन्नेव हि' इत्यन्तः पाठः -पुस्तकान्तरे नोपलभ्यते.

ननु 'आद्यः करुणबीभत्सरौद्रवीरभयानकैः' इत्युक्तनयेन विरोधिनोर्वीरशृङ्गारयोः कथमेकत्र

'कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरस्फारोडुमरपुलकं वक्त्रकमलम् ।
मुहुः पश्यञ्शृण्वन्रजनिचरसेनाकलकलं
जटाजूटग्रन्थिं द्रढयति रघूणां परिवृढः ॥'

इत्यादौ समावेशः । अत्रोच्यते—इह खलु रसानां विरोधितायाः अविरोधितायाश्च त्रिधा व्यवस्था । कयोश्चिदालम्बनैक्येन, कयोश्चिदाश्रयैक्येन, कयोश्चिन्नैरन्तर्येणेति । तत्र वीरशृङ्गारयोरालम्बनैक्येन विरोधः । तथा हास्यरौद्रबीभत्सैः संभोगस्य । वीरकरुणरौद्रादिभिर्विप्रलम्भस्य । (आलम्बनैक्येन) आश्रयैक्येन च वीरभयानकयोः । नैरन्तर्यविभावैक्याभ्यां शान्तशृङ्गारयोः । त्रिधाप्यविरोधो वीरस्याद्भुतरौद्राभ्याम् । शृङ्गारस्याद्भुतेन । भयानकस्य बीभत्सेनेति । तेनात्र वीरशृङ्गारयोर्भिन्नालम्बनत्वान्न विरोधः ।

एवं च वीरस्य नायकनिष्ठत्वेन भयानकस्य प्रतिनायकनिष्ठत्वेन निबन्धे भिन्नाश्रयत्वेन विरोधः । यश्च नागानन्दे प्रशमाश्रयस्यापि

भिप्रायेणाह—**नन्वाद्य इति** । **एकत्रेति** । समावेश इत्यग्रेणान्वयः । **कपोल इति** । वक्त्रकमलं कीदृशम् । कपोलावच्छेदे स्मरेण कामोद्रेकेण स्मेरः प्रकाशमानः स्फारोडुमरोऽत्युत्कटः पुलको यत्र । कपोलस्य किंचित्पाण्डुत्वेन विमलत्वेन वा करिकलभदन्तोपमा । अत्र शृङ्गारस्य जानक्यालम्बनविभावः, तदीयतादृक्कपोल उद्दीपनविभावः, तन्मुखकमलावलोकनमनुभावः । वीरस्य तु रजनीचरसेना आलम्बनम्, तदीयकलकलविधानमुद्दीपनविभावः, जटाजूटग्रन्थिदृढीकरणमनुभावः । वीरस्य निराकाङ्क्षवाक्यव्यङ्ग्यतया प्रधानत्वम् । स्मरणादावालम्बनाश्रयभेदनैरन्तर्याभावेऽपि विरोधिनोरेकस्मिन्समावेश इति सिद्धान्तमाह—**इह खलिवति** । आश्रयैक्येन नायकैक्येन । नैरन्तर्येण अव्यवधानेन । विशिष्य दर्शयति—**तत्रेति** । वीरशृङ्गारयोर्वीरसंभोगयोः । तथा आलम्बनैक्येन संभोगस्येति विरोध इत्यन्वयः । एवमग्रेऽपि । **आश्रयैक्येन चेति** । चकारेण आलम्बनैक्येनेत्यस्य समुच्चयः । वीरस्याद्भुतरौद्राभ्यां सहाविरोधः । आलम्बनैक्येन आश्रयैक्येन नैरन्तर्येण च भवति । एवं शृङ्गारस्याद्भुतत्वेन । भयानकस्य बीभत्सेन तु नैरन्तर्यमात्रेणाविरोधो ज्ञेयः । वीरशृङ्गारयोरालम्बनभेदेनाविरोधं दर्शयति—**तेनेति** । उक्तनियमेनेत्यर्थः । अत्र 'कपोले—' इत्यत्र । **भिन्नाश्रयत्वेनेति** । उत्साहस्य प्रतिनायकविषयत्वेन

जीमूतवाहनस्य मलयवत्यनुरागो दर्शितः, तत्र[1] 'अहो गीतमहो वादित्रम्' इत्यद्भुतस्यान्तरा निवेशनान्नैरन्तर्याभावान्न शान्तशृङ्गारयोर्विरोधः। एवमन्यदपि ज्ञेयम्। 'पाण्डुक्षामं वदनं—' इत्यादौ च पाण्डुतादीनामङ्गभावः करुणविप्रलम्भेऽपीति न विरोधः।

अनुकारे च सर्वेषां दोषाणां नैव दोषता ॥ ३१ ॥

सर्वेषां दुःश्रवत्वप्रभृतीनाम्। यथा—

'एष दुश्यवनं नौमीत्यादि जल्पति कश्चन।'

अत्र दुश्यवनशब्दोऽप्रयुक्तः।

अन्येषामपि दोषाणामित्यौचित्यान्मनीषिभिः।
अदोषता च गुणता ज्ञेया चानुभयात्मता ॥ ३२ ॥

अनुभयता अदोषगुणता ॥

इति साहित्यदर्पणे दोषनिरूपणो नाम सप्तमः परिच्छेदः।

नायकैक्येन निबन्धे भिन्नालम्बनत्वेनाविरोधो ज्ञेयः। इदानीं विरुद्धरसीयविभावादिपरिग्रहस्यादोषत्वं दर्शयति—**पाण्डुक्षाममित्यादि**। तथा च विरुद्धरसीयासाधारणाङ्गपरिग्रह एव दोषो न तु साधारणाङ्गपरिग्रह इति भावः। **अनुकारे चेति**। परोक्तशब्दवाक्ययोः कर्मादित्वेनोपादाने चेत्यर्थः। अनुकरणे दुःश्रवस्यादोषत्वं यथा—'मृगचक्षुषमद्राक्षीदित्यादि कथयत्ययम्।' शब्दस्यानुकरणे च्युतसंस्कारस्यादोषत्वं यथा—'पश्यैष च गवित्याह सुत्रामाणं यजेति च।' अत्र प्रथमपादे गोशब्दस्य निर्विभक्तिकतया च्युतसंस्कारत्वम्। द्वितीयपादे सुत्रामशब्दोऽप्रयुक्तो न दोषः। दुश्यवनशब्दोऽप्रयुक्तो न दोष इति शेषः। अदोषगुणता अदोषत्वं गुणत्वं च रसादेर्निकर्षप्रकर्षबीजत्वाभावादुभयरूपम्॥

इति श्रीरामचरणतर्कवागीशभट्टाचार्यविरचितायां साहित्यदर्पणविवृतौ सप्तमः प्रकाशः।

---

1. **तत्रेत्यादि**। तथा चोक्तं ध्वनिकृता—'एकाश्रयत्वे नियमो नैरन्तर्ये विरोधवान्। रसान्तरव्यवधिना रसो न्यस्यः सुमेधसा॥' इति॥

अष्टमः परिच्छेदः ।

गुणानाह—

रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा ।
गुणाः

यथा खल्वङ्गित्वमाप्तस्यात्मन उत्कर्षहेतुत्वाच्छौर्यादयो गुणशब्दवाच्याः, तथा काव्येऽङ्गित्वमाप्तस्य रसस्य धर्माः स्वरूपविशेषा माधुर्यादयोऽपि स्वसमर्पकपदसंदर्भस्य काव्यव्यपदेशस्यौपयिकानुगुण्यभाज इत्यर्थः । यथा चैषां रसमात्रस्य धर्मत्वं तथा दर्शितमेव ।

---

*काव्यलक्षणकारिकोद्देशक्रमप्राप्तान्गुणान्निरूपयति—**गुणानिति** । रसस्येत्यनेन काव्यशरीरस्य शब्दार्थयोर्व्यवच्छेदः । **अङ्गित्वमाप्तस्येति** । श्लिष्टं यद् यथासंभवं दृष्टान्तदार्ष्टान्तयोर्व्याख्यायते—**यथा खल्विति** । लोके इति पूरणीयम् । आत्मन इति अङ्गित्वमाप्तस्येत्यस्य विशेष्यम् । काव्ये कविभणितौ । अङ्गित्वं विभावाद्यङ्गसमुदाययोगेन पूर्णत्वम् । एतेन खण्डरसे माधुर्यादीनामन्यतमस्य काव्यत्वव्यापकतया उत्कर्षहेतुत्वाद् गुणव्यवहारौपयिकं धर्मान्तरमाह—**स्वसमर्पकेति** । स्वं रसस्तस्य समर्पको व्यञ्जको यः पदसंदर्भो वाक्यं तस्य काव्यव्यपदेशस्य काव्यव्यवहारस्य औपयिकमुपयोगि यदानुगुण्यमानुकूल्यं तद्भाजः गुणशब्दवाच्या इत्यन्वयः । एतच्च गुणालंकारसंस्कृतयोः शब्दार्थयोः काव्यशब्दोऽयं वर्तत इति प्राचीनमतानुसारेणोक्तम् । स्वमते तु रसवत्त्वमेव काव्यव्यवहारौपयिकम्, न तु गुणत्वम् । यद्वा रसवत्त्वं काव्यलक्षणम् । व्यवहारबीजं तु गुणालंकारसंस्कृतशब्दार्थत्वमेवेति स्वमतेनैवेदमुक्तम् । एवं च काव्यव्यवहारप्रयोजकत्वे सति रसधर्मवत्त्वं गुणलक्षणम् । रसत्वादिव्यावृत्त्यर्थं सत्यन्तम्, अलंकारव्यावृत्त्यर्थं विशेष्यम् । ननु गुणानां शब्दार्थधर्मत्वं प्राचीनैरुक्तम्, भवता तु कथं रसधर्मत्वमुच्यत इत्यत आह—**यथा चेति** । एषां गुणानाम् । मात्रपदेन शब्दार्थयोर्व्यवच्छेदः । दर्शितं दर्शयितुमारब्धम् । माधुर्यादिस्वरूपनिरूप-

---

* मुद्रितपुस्तके इत आरभ्य परिच्छेदान्तपर्यन्तं व्याख्यान्तरायमाणो महीयान्ग्रन्थभेद उपलभ्यते । स चावश्यकत्वादिहाप्युपन्यस्यते—"दोषान्निरूप्य गुणान्निरूपयति—**गुणानिति** । काव्यलक्षणोद्देशक्रमेणेति शेषः । रसस्य अङ्गित्वं मुख्यत्वम् । एतच्च शब्दार्थयोः काव्यव्यवहारोपयोगित्वात् । शौर्यादय इत्यादिपदाद्विद्याविनयादीना ग्रहणम् । स्वरूपविशेषाविलक्षणविशेषणानि माधुर्यादयोऽपि गुणशब्दवाच्या इत्यन्वयः । गुणपदस्य व्युत्पत्तिमाह—**स्वेति** । स्वं स्वकीयो रसः तस्य समर्पको व्यञ्जको यः पदसंदर्भः पदकदम्बविशेषो वाक्यमिति यावत् । तत्काव्यव्यपदेशः काव्यव्यहारः तस्यौपयिकमुपयोगि यदानुगुण्यमानुकूल्यं तद्भाजः । रसस्यैव काव्यव्यवहारोपयोगित्वं तदुत्कर्षद्वारा गुणानामपि तदित्यवधेयम् । ननु गुणानां वामनादिभिः शब्दार्थधर्मत्वमुक्तम्, किमिति भवता रसमात्रधर्मत्वमुच्यत इत्यत आह—**यथा चैषामिति** । एषा गुणानाम् । **तथेति** । काव्यप्रकाशोक्तकाव्य-

माधुर्यमोजोऽथ प्रसाद इति ते[1] त्रिधा ॥ १ ॥

ते गुणाः । तत्र—

चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते ।

णेनैवामीषां रसधर्मत्वं व्यक्तीभविष्यतीति भावः । गुणान्विभजते—**माधुर्यमिति**। चित्तद्रवीभावमय इति स्वार्थे मयट्। ह्लादः सुखसंवलितप्रतीतिः । 'आह्लादकत्वं माधुर्यं

लक्षणदूषणप्रकरणेति 'किंच शब्दार्थयोः सगुणत्वविशेषणमनुपपन्नम्—' इत्यादिना । गुणान्विभजति—**माधुर्यमिति** । माधुर्यमाह—**चित्तेति** । स्वार्थे मयट् । ह्लाद आनन्दविशेषः ।

---

1. **ते त्रिधेति** । वामनादयस्त्वोजआदीन्दश गुणानाहुः । ते यथा—'पदन्यासस्य गाढत्वं वदन्त्योजः कवीश्वराः । अनेनाधिष्ठिताः प्रायः शब्दाः श्रोत्ररसायनम् ॥ श्लथत्वमोजसा मिश्रं **प्रसादं** च प्रचक्षते । अनेन न विना सत्यं स्वदते काव्यपद्धतिः ॥ यत्रैकपदवद्भावः पदानां भूयसामपि । अनालक्षितसंधीनां स **श्लेषः** परमो गुणः ॥ प्रतिपादं प्रतिश्लोकमेकमार्गपरिग्रहः । दुर्बन्धो दुर्विभावश्च **समते**ति मतो गुणः ॥ आरोहन्त्यवरोहन्ति क्रमेण यतयो हि यत्। **समाधि**र्नाम स गुणस्तेन पूता सरस्वती ॥ बन्धे पृथक्पदत्वं च **माधुर्य**मुदितं बुधैः । अनेन हि पदन्यासाः कामं धारा मधुश्रुतः ॥ यथाहि च्छिद्यते रेखा चतुरं चित्रपण्डितैः । तथैव वागपि प्राज्ञैः समस्तगुणगुम्फिता ॥ बन्धस्याजरठत्वं च **सौकुमार्य**मुदाहृतम् । एतेन वर्जिता वाचो रूक्षत्वान्न श्रुतिक्षमाः ॥ विकटत्वं च बन्धस्य कथयन्ति **ह्युदारताम्** । वैचित्र्यं न प्रपद्यन्ते यथा शून्याः पदक्रमाः ॥ पश्चादिव गतिर्वाचः पुरस्तादिव वस्तुनः । यत्रार्थव्यक्तिहेतुत्वात्सोऽर्थव्यक्तिः स्मृतो गुणः ॥ औज्ज्वल्यं **कान्ति**रित्याहुर्गुणं गुणविशारदाः । पुराणचित्रस्थानीयं तेन वन्ध्यं कवेर्वचः ॥' इति । सरस्वतीकण्ठाभरणे तु चतुर्विंशतिर्गुणाः । तत्र दश निरूपिता एव ज्ञेयाः, इतरे तूच्यन्ते—श्लाघ्यविशेषणयोगत्व**मुदात्तता** । गाढबन्धत्व**मौर्जित्यम्** । चाटूक्तिसहकारिप्रियतराख्यानत्वं **प्रेयः** । सुप्तिङ्व्युत्पादनं **सुशब्दता** । यथा—'तस्याजीवनिरस्तु मातरव मा जीवस्य मा जीवतो भूयाद्वा जननेः किमम्ब जनिना जन्तोर्वृथा जीविनः । यस्त्वामेव न वन्दते न यजते नोपैति नालोकते नोपस्तौति न मन्यते न मनुते नाध्येति न ध्यायति ॥' अत्राजीवनिरजननिरित्यादीनां सुबन्तानां वन्दते यजत इत्यादीनां तिङन्तानां च व्युत्पत्तिः सुशब्दता । शब्दानामन्तःसंजल्परूपत्वं **सौक्ष्म्यम्** । यथा—'केवलं दधति कर्तृवाचिनः प्रत्ययानिह न जातु कर्मणि । धातवः सृजतिसंहृशास्तयः स्तौतिरत्र विपरीतकारकः ॥' अत्र श्रुतावगतवाक्यार्थस्य सृजतिसंहरतिशास्ति स्तूयत इति पदानामन्तःसंजल्परूपेण सूक्ष्मतया सूक्ष्मत्वम् । ध्वनिमत्ता **गाम्भीर्यम्** । यथा—'मौलौ धारय पुण्डरीकममितं तन्वात्मनो विक्रमं चक्राङ्कं वह पादयुग्ममवनीं दोष्णा समभ्युद्धर । लक्ष्मीं भ्रूनिकटे निवेशय भव ज्यायान्दिवोकस्पतेर्विश्रान्तःकरणैकचौर तदपि ज्ञातो हरिः खल्वसि ॥' अत्र नाभ्या पुण्डरीकधारणं अपरिमितविक्रमत्वं चक्राङ्कितकरत्वं दंष्ट्रया वसुधोद्धारणं वक्षस्थलनिवेशितलक्ष्मीकत्वमिन्द्रावरजत्वं च ध्वनतीति गाम्भीर्यम् । व्यासेनाभिधानं **विस्तरः** । समासेनाभिधानं **संक्षेपः** । यथा—'स मारुतिसमानीतमहौषधिहृतव्यथः । लङ्काक्षीणां पुनश्चक्रे विलापाचार्यकं शरैः ॥'

यत्तु केनचिदुक्तम्—'माधुर्यं द्रुतिकारणम्' इति, तन्न । द्रवीभावस्यास्वादस्वरूपाह्लादाभिन्नत्वेन कार्यत्वाभावात् । द्रवीभावश्च स्वाभाविकानाविष्टत्वात्मककाठिन्यमन्युक्रोधादिकृतदीप्तत्वविस्मयहासाद्युपहितविक्षेपपरित्यागेन रत्याद्याकारानुविद्धानन्दोद्बोधेन सहृदयचित्तार्द्रप्रायत्वम् ।

शृङ्गारे द्रुतिकारणम्' इति काव्यप्रकाशः । शृङ्गारादिष्वनुभवसिद्धमेवाह्लादजनकत्वं तदेव माधुर्यम् । तस्योत्कर्षाधायकत्वमाह—**द्रुतिकारणमिति** । एतद्दूषयति—**यत्त्विति** । तत्कार्यत्वाभावात् माधुर्यजन्यत्वासंभवात् । आह्लादातिरिक्तस्य द्रवीभावस्य निर्वक्तुमशक्यतया आह्लाद एव पर्यवसानम् । एवमाह्लादजनकत्वापेक्षया लघुन आह्लादस्यैव माधुर्यपदशक्यतावच्छेदकत्वमुचितमित्याह्लाद एव माधुर्यपदार्थ इति भावः । ननु द्रवीभावस्तावदाह्लाद एव भवतोच्यते तस्य रसाभिन्नतया रसधर्मत्वं नोपपद्यत इत्यत आह—**द्रवीभावश्चेति** । काठिन्यादिपरित्यागस्य रसोद्बोधहेतुत्वं दर्शयति—**स्वाभाविकेति** । मन्युः शोकः, दीप्तत्वं दग्धप्रायत्वम्, रत्यादीत्यादिपदेन शोकप्रशमयोर्ग्रहणम् । रत्यादिभिराकारैर्विषयैरनुविद्धः संवलितो य आनन्दोद्बोधो रसास्वादः तेन । एवं च शृङ्गारकरुणशान्तरसोद्बोधानन्तरं जायमानो रत्याद्य-

---

द्रुतिकारण माधुर्यमिति । काव्यप्रकाशोक्त लक्षणं दूषयति—**यत्त्विति** । द्रुतिकारणमाह्लादो माधुर्यमिति । दूषयति—**तन्नेति** । आस्वादो रसस्य स्वरूपं स्वरूपविशेषश्चित्तनिर्वृतिरूप आह्लादः । कार्यत्वाभावात् निरुक्ताह्लादजन्यत्वायोगात् । द्रवीभावस्य आह्लादजन्यत्वाभावेन आह्लादस्यापि तज्जनकत्वाभाव इति भावः । गूढविषयसंचाराक्षमत्वमनाविष्टत्वम् । मन्युः शोको दैन्यं वा । क्रोधादीत्यादिपदाज्जुगुप्सादिपरिग्रहः । विस्मयहासादीत्यादिपदेन भयादिपरिग्रहः । उपहितमुपधानं संबन्धस्तदात्मको विक्षेप इत्यर्थः । यद्वा विस्मयादिभि-

---

अत्र कथाविस्तरप्रतिपाद्यस्यार्थस्य प्रकृतसंग्रामरसविच्छेदाशङ्कया श्लोकार्धमात्रेणोक्तत्वात्संक्षेपः यावदर्थपदत्वं **संमितत्वम्** । यथा—'केचिद्वस्तुनि नो वाचि केचिद्वाचि न वस्तुनि । वाचि वस्तुनि चाप्यन्ये नान्ये वाचि न वस्तुनि ॥' अत्रार्थस्य पदानां च तुलाविधृतवत्तुल्यत्वेन संमितत्वम् । भावतो वाक्यवृत्तिर्**भाविकम्** । आरोहावरोहयोः क्रमो **गतिः** । यथा—'वराहः कल्याणं वितरतु स वो यस्य शशभृत्कलाकोटीकान्तं क्रमविदलदभ्युद्भृतिभिया । मिथः संमूर्च्छद्भिश्चतुरुदधिकल्लोलपटलैरनामृष्टं दंष्ट्राशिखरमधिशेते वसुमती ॥' अत्र पूर्वार्धे स्वरस्यारोहादुत्तरार्धे चावरोहाद्गतिः । उपक्रमनिर्वाहो **रीतिः** । विशिष्टभणिति**रुक्तिः** । यथा—'कुशलं तस्या जीवति कुशलं पृच्छामि जीवतीत्युक्तम् । पुनरपि तदेव कथयसि मृतां नु कथयामि या श्वसिति ॥' अत्र कुशलं तस्या इति पृष्टे कुशलमकुशलं चेति वक्तव्ये योऽर्थं जीवत्याद्युक्तिभङ्ग्या जीवितमात्रशेषतामात्रप्रतिपादनप्रकारः स उक्तिसंज्ञः । उक्तिप्रौढपरिपाकः **प्रौढिः** । यथा—'अभ्युद्भृता वसुमती दलितं रिपूरः क्षिप्तक्रमा कवलिता बलिराज्यलक्ष्मीः । अत्रैकजन्मनि कृतं यदनेन यूना जन्मत्रये तदकरोत्पुरुषः पुराणः ॥' इति ॥

तच्च—

संभोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥ २ ॥

संभोगादिशब्दा उपलक्षणानि । तेन संभोगाभासादिष्वप्येतस्य स्थितिर्ज्ञेया ।

मूर्ध्नि[1] वर्गान्त्यवर्णेन युक्ताष्टठडढान्विना ।
रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः ॥ ३ ॥

विषयकः सहृदयचित्तद्रवीभावरूपकेवलानन्दसंदोहानुभवो माधुर्यं तस्य जनकतासंबन्धेन रससंबन्धितया रसधर्मत्वमक्षतमेवेति भावः । केचित्तु—'रतिशोकप्रशमेषु गुर्जर्यादिरागवृत्तिरिव कश्चिदेको धर्मोऽस्ति स एव माधुर्यं येन सामाजिकानां चित्तं द्रवीभवति । रत्यादीनां रसरूपतया परिणामेन तस्य रसवृत्तित्वम्' इति वदन्ति, तन्न । तत्र तादृशधर्मसत्त्वे मानाभावात् । नच द्रुतिरूपकार्यान्यथानुपपत्त्या तत्कल्पनमिति वाच्यम् । तस्य रसस्वभावेनैव सिद्धत्वात्तदर्थं धर्मान्तरकल्पनानौचित्यात् । गुर्जर्यादौ तु प्रत्यक्षसिद्ध एव तादृशधर्मः । अन्ये तु—'सुश्रवत्वमेव माधुर्यं काव्यधर्मः' इत्याहुः, तन्न । असुश्रवत्वेऽपि काव्ये माधुर्यस्योपलम्भात् । माधुर्यविषयानाह—**तच्चेति** । माधुर्यं चेत्यर्थः । संभोगापेक्षया करुणे, तदपेक्षया विप्रलम्भे, तदपेक्षया शान्तेऽधिकम् । सातिशयमित्यर्थः । केचित्तु—'करुण' इति विप्रलम्भविशेषणम्, तन्न । 'अश्रुपातादयस्तत्र द्रुतत्वाच्चेतसो मताः' इत्यनेन करुणेऽपि चित्तद्रवीभावस्याङ्गीकारेण माधुर्यस्वीकारात् । 'अपसारय घनसारं—' इत्यादौ विप्रलम्भान्तरेऽपि माधुर्योपलम्भाच्च । एतस्य माधुर्यस्य । माधुर्यव्यञ्जकान्याह—**मूर्ध्नीति** । वर्गान्त्यवर्णेन युक्ताः कादयो मान्ता इत्यर्थः । लघू विसर्गवर्णान्तरायुक्तावयुक्तान्तौ च, न तु गुरुविपरीतौ । 'स्वयं हाराकारा गलति जलधारा कुवलयात्—' इत्यादौ । 'अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।' इत्यादौ दीर्घानुस्वारयोगेन गुरोरपि रेफस्य माधुर्यव्यञ्जकत्वदर्शनात् । केचित्तु—'लघू ह्रस्वान्तौ' इत्याहुः, तन्न । 'स्मरः खरः खलः कालः—'

रुपहित उपपादितो विक्षेपो विषयान्तराग्राहित्वम् । रत्यादीत्यादिपदेन हासादीनां ग्रहणम् । रत्यादेराकारः परिणामो ज्ञानं तेनानुविद्धः संवलित आनन्दस्तस्योद्बोधेन रसास्वादेन आर्द्रप्रायत्वं निरतिशयानन्दसान्द्रत्वम् । तच्च स्वविषयकानुभवसंबन्धेनानन्दभागित्वं तच्चानन्द एव पर्यवसन्नमित्यभिप्रायः । केचित्तु—'गुर्जर्यादिरागवृत्तिरिव रसवृत्तिः कश्चिदेको धर्मोऽस्ति स एव द्रुतिरूपाह्लादस्य जनको माधुर्यमुच्यते' इत्याहुः, तन्न । रसस्यैव तादृशाह्लादजनकत्वाङ्गीकारेणैवोपपत्तौ तद्वृत्तिधर्मान्तरकल्पनाया अन्याय्यत्वात् । तच्च माधुर्यं च । अधिकमुत्कर्षातिशयजनकम् । **क्रमादिति** । संभोगादीना पूर्वपूर्वमुपेक्ष्य उत्तरोत्तरत्र उत्कर्षातिशयजनकत्वमिति भावः । **संभोगाभासादिष्वपीति** । अपिरेवार्थः । एतस्य माधुर्यस्य । माधुर्यव्यञ्जकान्वर्णादीनाह—**मूर्ध्नीति** । पुरस्तादित्यर्थः । **युक्ता इति** । मूर्धस्थवर्गान्त्यसजातीयवर्णा इत्यर्थः । लघू वर्णान्तरयोगराहित्येन लघुप्रयत्नोच्चार्यौ, न तु गुरुविपरीतौ ।

---

1. **मूर्ध्नीति** । अग्रभागे स्वस्ववर्गान्त्यवर्णसहिता इत्यर्थः । यथा—अनङ्गमङ्गलेत्यादि ॥

अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ।

यथा—

'अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गयः ।
जनयन्ति मुहुर्यूनांमन्तःसंतापसंततिम् ॥'

यथा वा मम—

'लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलय-
न्समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलय-
व्रजोवृन्दं विन्दन्किरति मकरन्दं दिशि दिशि ॥'

इत्यादौ 'परस्परस्पर्धिवरः स्वयंवर—' इत्यादौ च रेफस्य ह्रस्वान्तत्वेन माधुर्यव्यञ्जकत्वापत्तेः । 'पुरो रेवापारे गिरिरिति दुरारोहशिखरः—' इत्यादौ ह्रस्वान्तत्वाभावेन माधुर्यव्यञ्जकत्वानुपपत्तेः । अवृत्तिः समासाभावः । अल्पवृत्तिरदीर्घसमासः । मधुरा दुःश्रवणवर्णाघटितत्वेन मनोरमा । रचना पदसंदर्भः । निरुक्तवर्णबहुला बहुतरनिष्ठुराक्षररहिता निःसमासा अल्पसमासा वा सुकुमारार्थप्रतिपादिका माधुर्यव्यञ्जिकेति तात्पर्यार्थः । माधुर्यमुदाहरति—**अनङ्गेति** । अनङ्गस्य मङ्गलभुवो जन्मस्थानानि । तस्या अपाङ्गस्य नेत्रप्रान्तस्य भङ्गयो विक्षेपाः । **लताकुञ्जमिति** । लतापदं सुरभिपुष्पलतावोधकतया सार्थकम् । अवृत्तेर्माधुर्यव्यञ्जकत्वं यथा—'मुद्रितामिन्दुमालोक्य पद्मिनीं पश्य सुन्दरि । हन्त कान्तस्य विच्छेदे मधुरोऽपि न रोचते ॥' सुकुमारार्थप्रतिपादकरचनाया माधुर्यव्यञ्जकत्वं यथा—'उचितं गोपनमनयोः स्तनयोः कनकाद्रिधर्मतस्करयोः । अवमानितविधुमण्डलमुखमण्डलगोपनं किमिति ॥' ओजोगुण-

---

तथात्वे 'अपसारय घनसारं कुरु हारं—' इति काव्यप्रकाशोक्तं तदुदाहरणमसंगतं स्यात् । 'स्वयं हाराकारा गलति जलधारा कुवलयात्—' इत्यादौ चानुभवसिद्धस्य दीर्घरेफस्य माधुर्यव्यञ्जकत्वस्यापलापप्रसङ्गाच्च । तद्व्यक्तौ माधुर्यव्यञ्जने । अवृत्तिः समासाभावः । अल्पवृत्तिरल्पसमासः । मधुरा मृदुपदानुप्रासादिरुचिरा रचना । यथा—'मधुरया मधुबोधितमाधवी—' इत्यादि । तथा माधुर्यव्यञ्जिका । **अनङ्गेति** । कामस्य मङ्गलभुवोऽभिमतसिद्धिस्थानानि तस्या नेत्रप्रान्तस्य भङ्गयो विक्षेपविशेषाः । **लतेति** । गुञ्जन्तो मधुरं कूजन्तो मदवन्तश्चालिपुञ्जा भ्रमरश्रेणयो यत्र । तच्चपलयन् कम्पयन् । दलितं प्रफुल्लम् । तरलयन् कम्पयन् । रजोवृन्दं परागसमूहम् । विन्दन् गृह्णन् । विकिरति विक्षिपति । मकरन्दं पुष्परसम् । उदाहरणद्वये मूर्धस्थवर्णान्त्यवर्णानामल्पसमासस्य च माधुर्यव्यञ्जकत्वम् । असमासस्य यथा—'मानं विमुञ्च कल्याणि दासं मामनुकम्पय । विजहीहि रुषो रागमधरस्य च

ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते ॥ ४ ॥
वीरबीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु ।

अस्यौजसः । अत्रापि वीरादिशब्दा उपलक्षणानि । तेन वीराभासादावप्यस्यावस्थितिः[1] ।

वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ ॥ ५ ॥
उपर्यधो द्वयोर्वा सरेफौ[2] टठडढैः सह ।
शकारश्च षकारश्च तस्य व्यञ्जकतां गताः ॥ ६ ॥
तथा समासो[3] बहुलो घटनौद्धत्यशालिनी ।

यथा—'चञ्चद्भुज–' इत्यादि ।

माह—**ओज इति** । दीप्तत्वमोजः । तत्र दीप्तत्वमाह—**चित्तेति** । उत्साहाद्याकारानुविद्धचमत्कारोद्बोधेन जायमान उत्साहाद्यविषयकचमत्कारोद्बोध इति तदर्थः । केचित्तु—'दीप्तत्वं कटुवर्णश्रवणजन्यश्रोत्रदुःखसंभिन्नसुखविशेषः, स एव चित्तविस्तारः' इत्याहुः, तन्न । अनिष्ठुराक्षरप्रायबन्धव्यज्यमाने वीरादौ तदभावप्रसङ्गात् । 'चित्तविस्ताररूपदीप्तत्वजनकमोजः' इति काव्यप्रकाशः, तन्न । वीरादिभ्य एव जायमानदीप्तत्वस्यैव ओजःस्वीकारेणोपपत्तौ तज्जनकधर्मान्तरकल्पने मानाभावात् । ओजोविषयानाह—**वीरेति** । वीरापेक्षया बीभत्से, तदपेक्षया रौद्रे ओजस आधिक्यमतिशयः । रौद्रवीरे च निष्प्रतिभटमोजः । बीभत्से तु माधुर्यलेशानुविद्धम् । हास्याद्भुतभयानकेषु द्वयोः समावेशो ध्वनिसिद्धान्तसंग्रहोक्तरीत्या ज्ञेय इति चण्डीदासः । एतन्मते बीभत्सापेक्षया रौद्रवीर्योरोजस आधिक्यम् । ओजोव्यञ्जकान्वर्णादीनाह—**वर्गस्येति** । सजातीयस्य विजातीयस्य वेत्यर्थः । तदन्तिमौ वर्गाद्यतृतीययोरन्त्यौ वर्गस्य द्वितीयचतुर्थौ । **सरेफाविति** । द्विवचनं प्रामादिकम् । रेफयुक्तस्य यस्यकस्यचिदपि वर्णस्य ओजोव्यञ्जकत्वात् । एतदुपलक्षणम् । माधुर्यव्यञ्जकातिरिक्तो युक्तो विसर्गयुक्तश्च वर्ण ओजोव्यञ्जकः । अत एव 'उत्कृत्योत्कृत्य—' इत्यादौ, 'यो यः पाञ्चालगोत्रे–' इत्यादौ च ओजोव्यञ्जकत्वमक्षतमेव । टादयस्तु केवला अप्योजोव्यञ्जकाः । **समासो बहुल इति** । ओजोव्यञ्जकवर्णघटितसमासाधिक्यमप्योजोव्यञ्जकमिति पृथगुपादानम् । घटना पदसंदर्भः । औद्धत्यशालिनी उद्भटाक्षरबहुला उद्भटार्थप्रतिपादिका च । द्वितीयप्रकारसंग्रहाय

कम्पनम् ॥' ओजोगुणमाह—**ओज इति** । चित्तविस्तारो वीरादिरसास्वादेन जायमानो विलयविशेषः । अत्रापि ओजोलक्षणेऽपि । तदन्तिमौ वर्गद्वितीयवर्गचतुर्थौ । द्वयोरुपर्यधश्च सरेफाविति वर्गस्यादितृतीयौ च तदन्तिमौ च । घटना बन्धः । औद्धत्यशालिनी डम्बरा । सा च संयुक्तवर्णबाहुल्येन भवति । चञ्चदिति व्याख्यातमिदं प्राक् । अत्र समासबाहुल्यडम्ब-

---

१. 'स्थितिः' क-ख. २. 'सरेफः' घ. ३. 'समासबहुलाः' घ.

चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ॥ ७ ॥
स प्रसादः समस्तेषु रसेषु रचनासु च ।

व्याप्नोति आविष्करोति ।

शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः ॥ ८ ॥

यथा—

'सूचीमुखेन सकृदेव कृतव्रणस्त्वं
मुक्ताकलाप लुठसि स्तनयोः प्रियायाः ।

एतदुपादानं सार्थकम् । तेन 'आपतन्तमसुं दूरादूरीकृतपराक्रमः । बलोऽवलोकयामास मातङ्गमिव केसरी ॥' इत्यादावोजोव्यञ्जकत्वमुपपन्नम् । प्रसादगुणमाह—**चित्तमिति । य इति** । आस्वाद्यव्यङ्ग्येषु आस्वादाख्यः कश्चिदेको धर्मोऽस्ति येन व्यङ्ग्यानामास्वाद्यत्वं चोपपद्यते । स एव प्रसादाख्यो गुण इत्यर्थः । तदुक्तं चण्डीदासेन—'चित्तं यो व्याप्नोति आविष्टं करोति स प्रसादनामा आस्वादात्मा गुणः ।' अनलपक्षे—व्यापनं संयोगानुकूलव्यापारः । गुणपक्षे त्वाह—**व्याप्नोतीति** । आविष्करोति व्यासङ्गनिराकरणेन निर्मलं करोति । प्रसादपदव्युत्पत्तिलभ्योऽयमर्थः 'आविष्टं करोति' इति पाठे स्वाश्रयनिविष्टं करोतीत्यर्थः । प्रसादविषयानाह—**समस्तेष्विति** । रसेषु काव्यात्मभूतेषु । तेन भावादीनामपि गुणत्वमुपपद्यते । अन्यथा तत्र काव्यव्यवहारो न स्यात् । **रचनासु चेति** । सप्तम्यर्थो व्यङ्ग्यत्वम् । तेन समस्तरचना व्यङ्ग्येत्यर्थः । ओजोमाधुर्यवदस्य रचनाविशेषो व्यञ्जको नास्ति, किंतु झटित्यर्थसमर्पकपदघटिता रचनैव व्यञ्जिकेति प्रतिपादयितुमाह—**शब्दा इति** । तद्व्यञ्जकाः प्रसादव्यञ्जकाः । ननु गुणानां रसधर्मत्वस्वीकारे प्राचीनसंमतशब्दार्थधर्मत्वमेषां कथमुपपद्यत इत्यत आह—

रबन्धयोरोजोव्यञ्जकत्वं वर्गस्यादीत्युक्तवर्णस्य । यथा—'अनेन च्छिन्दता मातुः कण्ठं परशुना तव । बद्धस्पर्धः कृपाणोऽयं लज्जते मम भार्गव ॥' अत्र तृतीयपादे दकारयुक्तौ धकारौ ओजोव्यञ्जकौ । 'विरूढप्रौढविक्रमः' इत्यत्रासंसक्तौ ढकारौ । वस्तुतस्तु माधुर्यव्यञ्जकातिरिक्ता वर्णान्तरसंयुक्ता द्वित्रा अन्येऽपि वर्णा ओजोव्यञ्जकाः । यथा—'समरे भाति संरम्भादुद्यद्दिनकरद्युतिः । हुताशकुण्डसंकाशलोचनो नृपपुंगवः ॥' अत्र द्वितीयपादे संयुक्तवर्णत्रयमोजोव्यञ्जकम् । ओजोव्यञ्जकाक्षरघटितबहुतरपदसमासस्ताट्टशाक्षरसंदोहघटितो बन्धश्च ओजोऽतिशयव्यञ्जकौ । 'दीप्तवह्निचयोद्दीप्तनेत्रापीतद्विपद्बलः । चण्डध्वानपरिध्वस्तहस्तिदानोऽस्त्यसौ युधि ॥' 'उद्यद्दिनकरवक्त्रः प्रज्वलज्ज्वलनेक्षणः । भार्गवो नृपवर्गस्य मृत्युरेष धुरि स्थितः ॥' प्रसादगुणमाह—**चित्तमिति** । आविष्टमधिकनिविष्टम् । तद्व्यञ्जकाः प्रसादव्यञ्जकाः । रसवृत्तिः कश्चिद्धर्मः येन सामाजिकानां चित्तं विषयान्तरेभ्यो व्यवच्छिद्य स्वस्मिन्नेवातिनिविष्टं करोति । माधुर्यौजसोर्जनकत्वसंबन्धेनैव रसवृत्तित्वं

बाणैः स्मरस्य शतशो विनिकृत्तमर्मा
स्वप्नेऽपि तां कथमहं न विलोकयामि ॥'

एषां शब्दगुणत्वं च गुणवृत्त्योच्यते बुधैः ।

'शरीरस्य शौर्यादिगुणयोग[1] इव' इति शेषः ।

श्लेषः समाधिरौदार्यं प्रसाद इति ये पुनः ॥ ९ ॥
गुणाश्चिरंतनैरुक्ता ओजस्यन्तर्भवन्ति ते ।

ओजसि भक्त्या[2] शब्दवाच्ये शब्दार्थधर्मविशेषे । तत्र श्लेषो बहूनामपि पदानामेकपदवद्भासनात्मा । यथा—

एषामिति । माधुर्यादीनामित्यर्थः । शब्दगुणत्वं शब्दार्थधर्मत्वम् । गुणवृत्त्या आश्रयरसव्यञ्जकत्वरूपपरम्परासंबन्धेन । बुधैर्वामनादिभिः । शौर्यादेरात्मधर्मस्य यथा शरीरवृत्तित्वं यथा वा स्थूलत्वादेः शरीरधर्मस्य आत्मवृत्तित्वं परम्परासंबन्धेन तथेत्यर्थः । ननु गुणानां रसवृत्तित्वस्य निरुक्तपरम्परायाः संबन्धत्वस्य च कल्पने गौरवमतः शब्दार्थवृत्तित्वमेव कल्पयितुमुचितमिति चेत्, न । क्वचिन्नीरसे गुणाभिव्यञ्जकशब्दार्थयोः संभवेऽपि माधुर्यादेरनुपलम्भात् । क्वचित्तु तदसंभवेपि रसत्वेनैव तदुपलम्भाच्च रसान्वयव्यतिरेकानुविधायित्वेन रसवृत्तित्वकल्पनस्यैवोचितत्वात् । ननु वामनादिभिः श्लेषादयो दश शब्दगुणा ओजआदयो दशार्थगुणा उक्ताः, भवद्भिस्तु माधुर्यादयस्त्रय एव कथमुच्यन्त इत्यतस्तान्यथासंभवं स्वोक्तगुणव्यञ्जकदोषाभावालंकारगुणीभूतव्यङ्ग्येष्वन्तर्भावयन्प्रथमं शब्दगुणान्स्वोक्तगुणव्यञ्जकदोषाभावयोरन्तर्भावयति—**श्लेष इति** । भक्त्या लक्षणया । ओजःपदवाच्ये ओजःपदप्रतिपाद्ये । चित्तविस्तारारूपे ओजस्यन्तर्भावासंभवादिति भावः । शब्दधर्मविशेषे बन्धगाढत्वरूपे । अत्रार्थपदं चिन्त्यम् । अर्थधर्मे प्रौढत्वरूप ओजसि शब्दश्लेषादीनामन्तर्भावासंभवात् । **एकपदवदिति** । संध्यादिवशादनेकपदानामुच्चारणकालभेदः स्पष्टं नावभासत इत्यर्थः । केचित्तु—'समासाभावात्' इति व्याचक्षते, तन्न । वामनोपदर्शितस्य समासत्वेऽपि 'अस्त्युत्तरस्यां दिशि देवतात्मा' इति श्लेषोदाहरणस्य समाससत्त्वेऽपि 'तडित्कपिलमाकाशं—' इत्यादौ श्लेषप्रत्युदाहरणस्य वासंगत्यापत्तेः । 'अस्ति भयमस्ति कौतुकमस्ति च मन्दाक्ष-

---

प्रसादस्य तदतिरिक्तेनेत्यवधेयम् । कृतघ्नः कृतच्छिद्रः । मर्म मनः । तां प्रियाम् । एषां निरुक्तगुणानाम् । शब्देत्युपलक्षणम् । अर्थगुणमपि बोध्यम् । गुणवृत्त्या स्वाश्रयरसव्यञ्जकत्वरूपपरम्परासंबन्धेन । बुधैर्वामनादिभिः । शौर्यादिगुणयोगः शौर्यादिगुणवत्त्वम् । अत्र स्वसमवाय्यात्मावच्छेदकत्वं परम्परासंबन्धः । वामनाद्युक्तदशविधगुणानां स्वोक्तगुणव्यञ्जकादौ यथायथमन्तर्भावमाह—**श्लेष इति** । भक्त्या लक्षणया । ओजःपदवाच्ये ओजःपदप्रतिपाद्ये । शब्दार्थधर्मविशेषे बन्धगाढत्वादौ । अन्तर्भवन्ति अभिन्नतया वर्तन्ते । **बहूनामिति** ।

१.—'योगः' इति नास्ति क-ख-पुस्तकयोः. २. 'भक्त्या' इति क-पुस्तके नास्ति. ३. '—पद—' घ.

'उन्मज्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः
सर्वाः पर्वतकंदरोदरभुवः कुर्वन्प्रतिध्वानिनीः ।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायं तथा
प्रायप्रेङ्खदसंख्यशङ्खधवला वेलेयमुद्गच्छति ।

अयं बन्धवैकट्यात्मकत्वादोज एव । समाधिरारोहावरोहक्रमः । आरोह उत्कर्षः, अवरोहोऽपकर्षः, तयोः क्रमो वैरस्यतानावहो विन्यासः । यथा—'चञ्चद्भुज–' इत्यादि । अत्र पादत्रये क्रमेण बन्धस्य गाढता । चतुर्थपादे त्वपकर्षः । तस्यापि च तीव्रप्रयत्नोच्चार्यतया ओज-

---

मस्ति चोत्कटा । बालानां प्रणयिजने भावः कोऽप्येष नैकरसः ॥' इति प्राचीनान्तरदत्तोदाहरणस्यासंग्रहापत्तेश्च । **उन्मज्जादिति** । प्रलयकालीनसमुद्रवर्णनमिदम् । यथायं सिन्धुसंबन्धी ध्वनिरुच्चरति तथेयं वेला विकृतसिन्धुजलमुद्गच्छति । 'अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि' इत्यमरः । उभयोः साधर्म्यमाह—उन्मज्जदिति । उन्मज्जतां जलकुञ्जरेन्द्राणां रभसेन वेगेन य आस्फालो जलाभिघातजन्यशब्दस्तस्यानुबन्धेन उद्धत उद्भटः । पक्षे–येषां रभसेन हर्षेण य आस्फाल उत्थानव्यापारातिशयस्तस्यानुबन्धेन आरम्भेण उद्धता उद्गताः । प्रतिध्वानिनीः प्रतिशब्दान्विताः । पक्षे–प्रतिध्वानिनीः शब्दनिरुद्धाः जलपूरणेन निःशब्दाः कुर्वतीः । श्रुतेः पन्थाः शब्दग्रहणसामर्थ्यं तस्योन्माथी नाशकः । पक्षे–श्रुतीनां वेदानां पथां चोन्माथी । वेला कीदृशी । प्रायेण रमणेन (बाहुल्येन) प्रेङ्खन्त उच्छलन्तो ये शङ्खास्तैर्धवला । अयं श्लेषो विकटबन्ध एव । अस्योत्कर्षाधायकत्वाद्गुणत्वमिति भावः । उत्कर्षो गाढबन्धत्वम् । अपकर्षो बन्धशैथिल्यम् । उत्कर्षमध्ये अपकर्षोपादाने अपकर्षमध्ये चोत्कर्षोपादाने च वैरस्यं यत्र न भवतीत्यर्थः । ननु क्रमनिबन्धयोरुत्कर्षापकर्षयोः समावेशः समाधिरिति फलितम्, तत्रापकर्षस्य कथमोजस्यन्तर्भाव इत्यत आह—**तस्यापीति** । चतुर्थपादस्यापीत्यर्थः । पद्यस्य पादे पादे आरोहावरोहक्रमः संभवतीति तत्रारोहपूर्वोऽवरोहो यथा—

संधिवशादेकपदवत्प्रतीतिरूपः । **उन्मज्जादिति** । इयं वेला समुद्रजलं तथोद्गच्छति यथायं ध्वनिरुच्चैरुच्चरति । कीदृक् । उन्मज्जन्तो ये जलकुञ्जरेन्द्रा जलहस्तिश्रेष्ठास्तेषां रभसास्फालानुबन्धेन वेगजनितस्फालातिशयेन उद्धत उत्कटः । प्रतिध्वानिनीः प्रतिशब्दयुक्ताः । श्रुतेः श्रवणस्य पन्था विषयान्तरग्रहणं तस्योन्माथी नाशकः । वेला कीदृशी । प्रेङ्खन्त उपरि चरन्तो येऽसंख्याः शङ्खाः शङ्खकपालानि तैर्धवला । अत्र समस्तानामसमस्तानां वा बहूनां पदानां संधिवशादेकत्वारोपः । अयं श्लेषः संधिवाहुल्येन वर्णानां संयुक्तवर्णवद् गुरुप्रयत्नोच्चार्यतया बन्धस्य वैकट्यं भवतीति भावः । उत्कर्षो गाढत्वम् । अपकर्षः शैथिल्यम् । वैरस्यतानावहः सामाजिकानां खेदाजनकः । विन्यासो ग्रन्थनम् । केचित्तु 'यत्र पद्ये प्रतिपादं प्रथममुत्कर्षः पश्चादपकर्षः, अत्रैवारोहावरोहक्रमरूपः समाधिः । 'चञ्चद्भुज–' इत्यादौ

स्विता । उदारता विकटत्वलक्षणा । विकटत्वं पदानां नृत्यत्प्रायत्वम्[1] । यथा—

'सुचरणविनिविष्टैर्नूपुरैर्नर्तकीनां
झणिति रणितमासीत्तत्र चित्रं कलं च ।'

अत्र च तन्मतानुसारेण रसानुसंधानमन्तरेणैव शब्दप्रौढोक्तिमात्रेणौजः । प्रसाद ओजोमिश्रितशैथिल्यात्मा । यथा—

'यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनाम्' इति ।

माधुर्यव्यञ्जकत्वं यदसमासस्य दर्शितम् ॥ १० ॥
पृथक्पदत्वं[2] माधुर्ये तेनैवाङ्गीकृतं पुनः ।

यथा— 'श्वासान्मुञ्चति—' इत्यादि ।

'निरानन्दः कौन्ते मधुनि, मधुरो बालवकुले, न सालेऽनालम्बो, लवमपि लवङ्गे न रमते । प्रियङ्गौ नासङ्गं रचयति, न चूते विरमति, स्मरंल्लक्ष्मीलीलाकमलमधुपानं मधुकरः ॥' लवङ्ग इति लघुप्रयत्नोच्चारणेनावरोहः । अवरोहपूर्वं आरोहो यथा—'अयमुदयति मुद्रा—' इति । **नृत्यत्प्रायत्वमिति** । प्रत्येकं पदच्छेदादिति भावः । झणितीत्यव्यक्तशब्दानुकरणम् । कलमिति रणितमित्यनेनान्वितम् । नन्वत्र वीरादिरसाभावादोज एव नास्ति तद्व्यञ्जके एतदीयबन्धगाढत्वे उदारतायाः कथमन्तर्भाव इत्यत आह—**तन्मतानुसारेणेति** । ये गुणानां शब्दार्थधर्मत्वमेव वदन्ति तन्मतेनेत्यर्थः । शब्दप्रौढोक्तिमात्रेण ओजो व्यवह्रियते इति शेषः । तथा च प्रकृते योग्यतामादायैव बन्धगाढत्वस्य ओजोव्यञ्जकत्वमिति भावः । **प्रसाद इति** । समाधौ श्लोके तत्पादे वा ओजःप्रसादयोरन्यतरस्य पुनरुन्मज्जनं नास्ति । अत्र तूभयोर्निमज्जनोन्मज्जनक्रमेण संपर्कः । तदुक्तं वामनेन—संपृक्तौ खल्वोजःप्रसादौ नदीवेणिकावदुद्वहतः' इति । **यो य इति** । व्याख्यातमिदं प्राक् । वर्णितमित्यस्माभिरिति शेषः । **श्वासानिति** । अत्र भुजावल्लरीमिति प्राणसमानेति च समासस-

---

प्रतिपादमुत्कर्षानन्तरमपकर्षः, द्वितीयपादे चरमवर्णस्य गाढत्वेऽपि चक्षुःप्रयत्नोच्चार्यतयाप कर्षः' इत्याहुः । उत्कर्षापकर्षयोरुत्कर्षस्यैव प्राधान्यं प्रधानेन व्यपदेशा भवन्तीति न्यायज्यवहार इति भावः । नृत्यत्प्रायत्वं गुरुप्रयत्नोच्चार्यतयाडम्बरत्वमेव । लघुवर्णघटितपदानामपि समभिव्याहारवशेन गुरुप्रयत्नोच्चार्यत्वमस्ति । **सुचरणेति** । ननु वीरादिरसे ओजः संभवति, कथमत्रौज इत्यत आह—**तन्मतानुसारेणेति** । **ओजोमिश्रितेति** । शैथिल्यं लघुप्रयत्नोच्चार्यबाहुल्येनानुद्भटत्वम् । 'तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः । नैकमोजः प्रसादो वा रसभावविदः कवेः ॥' इति माघे । प्रसादः शैथिल्यमेवेत्यवधेयम् । **यो य इति** । द्रोणवधे भूतेऽश्वत्थाम्नः क्रोधोक्तिरियम् । पाञ्चालेन धृष्टद्युम्नेन द्रोणो हत इति पाञ्चालगोत्रे क्रोधातिशयः । अधिकवया वृद्धः । गर्भशय्यां जरायुं गतः । गर्भस्थ इति यावत् ।

---

1. **नृत्यदिति** । लीलायमानत्वमित्यर्थः ।
2. **पृथगिति** । पृथक्पदानि यस्य तस्य भावः । समासदैर्घ्यनिवृत्तिपरं चैतत् ॥

अर्थव्यक्तेः प्रसादाख्यगुणेनैव परिग्रहः ॥ ११ ॥

अर्थव्यक्तिः पदानां हि झटित्यर्थसमर्पणम् ।

स्पष्टमुदाहरणम् ।

ग्राम्यदुःश्रवतात्यागात्कान्तिश्च सुकुमारता ॥ १२ ॥

अङ्गीकृतेति संबन्धः । कान्तिरौज्ज्वल्यम् । तच्च हालिकादिपद-विन्यासवैपरीत्येन लौकिकशोभाशालित्वम् । सुकुमारता अपारुष्यम् । अनयोरुदाहरणे स्पष्टे ।

त्त्वेऽपि पृथक्पदत्वस्य दीर्घसमासराहित्ये तात्पर्यान्न दोषः । यद्वा–'बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं खेदोऽस्मासु न मेऽपराध्यति भवान्सर्वंऽपराधा मयि । तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते नन्वेतन्मम का तवास्ति दयिता नास्मीत्यतो रुद्यते ॥' एतदुदाहरणं बोध्यम् । प्रसादाख्यगुणेन प्रसादगुण-व्यञ्जकेन । हालिकादीत्यादिना बालकादिपरिग्रहः । हालिकादिसाधारणप्रसिद्ध्यर्थक-पदेनेत्यर्थः । **स्पष्टे इति** । क्रमेण यथा–'ताम्बूलभृतगल्लोऽयं भद्रं जल्पति मानवः ।' विपर्ययस्तु 'ताम्बूलभृतगल्लोऽयं भल्लं जल्पति मानुषः ।' अत्र भल्लगल्लमानुषशब्दा ग्राम्याः । 'आनन्दमियमायातु कदा कामवशंवदा ।' विपर्ययस्तु 'कार्तार्थ्यमियमा-

---

तत्कर्मसाक्षी मत्पितृवधानुमत्या कृष्णादिः । प्रतीपः प्रतिकूलः । अन्तकस्येत्यनन्तरमपिकारो बोध्यः । अत्र प्रतिपादं मध्यवर्णानां शैथिल्यम् । वर्णितमस्माभिरिति शेषः । तेनैव निरुक्त-माधुर्यव्यञ्जकेनैव । प्रसादाख्यगुणेन प्रसादाख्यव्यञ्जकेन । अर्थसमर्पणमर्थप्रत्यायनम् । **ग्राम्येति** । ग्राम्यत्वत्यागात् कान्तिदुःश्रवत्वत्यागात् सुकुमारतेत्यन्वयः । **हालिकादीति** । आदिपदात्प्राकृतनरमात्रग्रहणम् । हालिकादिप्रयुज्यमानानां पदानां भल्लगल्लादिशब्दानां हालि-कादिसाधारणबोधजनकानां 'शुष्को वृक्षस्तिष्ठत्यग्रे' इत्यादीनां च विन्यासः प्रयोगस्तस्य वैप-रीत्येन भावेन अलौकिकशोभारसालंकारादिकृतवैचित्र्यम् । तद्वत्त्वमित्यर्थः । एवं च ग्राम्य-त्वाभावे सति रसालंकारादिवैचित्र्यं कान्तिरिति फलितम् । न तु ग्राम्यत्वत्यागमात्रेणैवौज्ज्व-ल्यम् । अन्यथा 'चित्रभानुरयमुज्ज्वलकान्तिः शेखरे लसति भूमिधरस्य ।' इत्यादावपि कान्तिः स्यात् । 'कन्ये कामयमानं मां न त्वं कामयसे कथम् ।' इत्यादौ ग्राम्यत्वरति-शृङ्गाररसानुप्रासालंकारसत्त्वेऽपि कान्तिवारणाय सत्यन्तम् । एतयोरुदाहरणे यथा मम—'स्वान्तं तन्वि तवानुरागमृदुलं हन्त्याशु मे मन्मथस्त्वच्चित्तं तु विरागरूक्षमकृती वेद्धुं न शक्नोत्यसौ । याचे त्वामिदमेव तच्छृणु पुनः क्रूराय तस्मै न तद्भ्रूचापं सखि नासिकां सुनिशितं नालीकमप्यात्मनः ॥ रोलम्बावलिकूजितं बहु जितं कान्ते तवानुग्रहा-न्नैवामी गणिता वनप्रियवधूसंबाधटङ्का मया । नाशङ्के मलयानिलान्न च विधोराराधनं भावये वामायां त्वयि तावदद्य दयिते तानि प्रतीपानि मे ॥' यदि तु ग्राम्यत्वाभावेनैव शो-भाविशेषो जन्यत इत्यङ्गीक्रियते तदा यथाश्रुतमेव सम्यक् । अन्यथा दोषत्वासंभावनायाम् ।

---

१. 'सुकुमारता अपारुष्यम्' इति क-ख-पुस्तकयोर्नास्ति.

क्वचिद्दोषस्तु समता मार्गाभेदस्वरूपिणी ।
अन्यथोक्तगुणेष्वस्या अन्तःपातो यथायथम् ॥ १३ ॥

मसृणेन विकटेन वा मार्गेणोपक्रान्तस्य सदर्भस्य तेनैव परिनिष्ठानं मार्गाभेद· । स च क्वचिद्दोषः । तथाहि—

'अव्यूढाङ्गमरूढपाणिजठराभोगं च बिभ्रद्वपुः
पारीन्द्र· शिशुरेष पाणिपुटके समातु कि तावता ।
उद्यद्दुर्धरगन्धसिन्धुरशतप्रोद्दामदानार्णव-
स्रोतःशोषणरोषणात्पुनरितः कल्पाग्निरल्पायते ॥'

यातु' इति । **क्वचिदिति** । सुकुमारबन्धमध्ये उद्धतार्थोपस्थितौ प्रौढबन्धमध्ये सुकुमारोपस्थितौ चेत्यर्थ । मार्गस्य रीतेरभेदोऽपरित्याग । तत्स्वरूपेत्यर्थ । अन्यथा प्रक्रान्तमार्गयोग्यार्थानुपस्थितौ । उक्तगुणेषु प्राचीनोक्तमाधुर्यसौकुमार्यौज सु । **यथायथमिति** । सुकुमारमार्गभेदस्य माधुर्यसौकुमार्ययो प्रौढमार्गभेदस्य स्रोजसीत्यर्थ । मसृणेन सुकुमारेण । उपक्रान्तस्य आरब्धस्य । सदर्भस्य प्रबन्धस्य । तेनैव उक्तमार्गेणैव परिनिष्ठान समाप्ति । स मार्गाभेद । मार्गाभेददोषत्यागस्य गुणत्वमुदाहरति—**अव्यूढेति** । अप्रौढावयवमित्यर्थ । अरूढोऽजातपाणिजठरस्याभोग परिपूर्णता यत्र । पारीन्द्र· सिंह । 'कण्ठीरवस्तु पारीन्द्र केसरी गजमोहन' इति हारावली । समातु इयत्ता प्राप्नोतु तावता अव्यूढाङ्गत्वादिना किम् । न किमपि ब्रुव्यतीत्यर्थ । ब्रुवेरभावमाह—**उद्यदिति** । उद्यज्जायमान दुर्धरस्य गन्धसिन्धुरशतस्य मत्तहस्तिसमूहस्य प्रोद्दामदानार्णवस्रोतस प्रौढमदजलविप्रवाहस्य शोषण यस्मात्तादृश रोषण यस्य तस्मात् । इतः पारीन्द्रशिशो । कल्पाग्निप्रलयकालाग्नि । अल्पायते तुच्छो भवति । 'यस्योग्रमदगन्धेन हस्तिनो भयविह्वला. । दूरादेव पलायन्ते गन्धहस्ती स उच्यते ॥' माधुर्यादावित्यनेन सौकुमार्यौजस्योर्ग्रहणम् । ओजोविपर्यास सौकुमार्यम् । तच्च दीर्घसमासराहित्येन पुरुषवर्णाना त्यागेन

उक्तगुणेषु उक्तगुणव्यञ्जकेषु । अन्त पातोऽन्तर्भाव । यथायथ यथासभवम् । मसृणेन सुकुमारेण । विकटेन उद्भटेन । मार्गेण बन्धेन । उपक्रान्तस्य आरब्धस्य । सदर्भस्य महाकाव्यविशेषस्य । तेनैव उपक्रान्तेनैव । परिनिष्ठान समापनम् । सदर्भस्येत्युपलक्षणम् । एकवाक्येऽपि समता बोध्या । **अव्यूढाङ्गमिति** । अव्यूढानि अपरिणतानि अङ्गानि करचरणादीनि यस्य तत् । अरूढोऽनिष्पन्न पाणिजठरस्याभोग. परिपूर्णता यत्र तत् । पारीन्द्र सिह. । 'कण्ठीरवस्तु पारीन्द्र. केसरी गजमादन' इति हारावली । समातु मान प्राप्नोतु । तावता क्षुद्रशरीरकत्वेन कि न्यूनत्वम्, अपि तु न । उद्यद् उद्गलत् । अस्य स्रोत इत्यनेन सबन्ध । गन्धसिन्धुरो गन्धहस्ती । यस्य गन्धमदेन प्रतिगजा पलायन्ते स दानार्णवो मदसमुद्रस्तस्य स्रोतो धारा तस्य शोषण शोषक रोषण यस्य तस्मात् । इत. पारीन्द्रशिशो । अल्पायते तुच्छो भवति । अर्थे वाच्ये सुकुमारसदर्भान्त.पातिनोऽस्य पद्यस्य समतानुरोधेन सुकुमार-

अत्रोद्धतेऽर्थे वाच्ये सुकुमारबन्धत्यागो गुण एव । अनेवंविधस्थाने माधुर्यादावेवान्तःपातः । यथा—'लताकुञ्जं गुञ्जत्—' इत्यादि ।

ओजः प्रसादो माधुर्यं सौकुमार्यमुदारता ।
तदभावस्य दोषत्वात्स्वीकृता अर्थगा गुणाः ॥ १४ ॥

ओजः साभिप्रायत्वरूपम् । प्रसादोऽर्थवैमल्यम् । माधुर्यमुक्तिवैचित्र्यम् । सौकुमार्यमपारुष्यम् । उदारता अग्राम्यत्वम् । एषां पञ्चानामप्यर्थगुणानां यथाक्रममपुष्टार्थाधिकपदानवीकृतामङ्गलरूपाश्लीलग्राम्याणां निराकरणेनैवाङ्गीकारः । स्पष्टान्युदाहरणानि ।

च भवति । एवं च सुकुमारमार्गाभेदस्य माधुर्यसौकुमार्ययोरन्तःपात इति भावः । इदानीमोजःप्रभृतीनां दशविधार्थगुणानां दोषाभावादिभिरङ्गीकारमगुणत्वं च यथायथमुपपादयति—**ओज इति** । तदभावस्य ओजःप्रभृतिगुणपञ्चकाभावस्य । अस्माभिर्दोषाभावत्वेनाङ्गीकृता इति भावः । 'अर्थप्रौढिरोजः' इति प्राचीनलक्षणम् । सा च पञ्चविधा—'पदार्थे वाक्यरचना वाक्यार्थे च पदाभिधा । प्रौढिव्यासससमासौ च साभिप्रायत्वमस्य च ॥' तत्राद्यप्रकारचतुष्टयस्य वैचित्र्यमात्रप्रयोजकत्वेन गुणत्वाभावमग्रे दर्शयिष्यति । चरमप्रकारं तु दोषाभावत्वेनैव संगृह्णाति । **ओज इति** । साभिप्रायत्वमर्थस्य प्रकृतोपकाराभिप्रायेण प्रयुक्तत्वम् । वैमल्यं मलप्रायस्य प्रयोजकपदार्थस्याभिनिवेशः । उक्तिवैचित्र्यं विचित्रयोक्त्या तस्यैवार्थस्य पुनः समर्पणम् । अपारुष्यममङ्गलार्थस्योक्तिवैचित्र्यवशात्सुकुमारप्रायत्वेन प्रतिपादनम् । रिरंसया पामरप्रयुज्यमानत्वं तद्भिन्नलक्षणमग्राम्यत्वम् । **स्पष्टानीति** । क्रमेण यथा—'कुर्यां हरस्यापि पिनाकपाणेः' इति । विपर्ययस्तु 'सदाशिवं नौमि पिनाकपाणिम्' इति । 'सुवर्णा कन्यका रूपयौवनारम्भशालिनी ।' अत्र यौवननवीनत्वप्रतिपादकमारम्भपदमधिकम् । विपर्ययस्तु 'अपास्तो हस्तो मे विमलमणिकाञ्चीपदगतः ।' अत्र

पदैर्घटने वर्णप्रातिकूल्याख्यदोष एव स्यात् । **गुण इति** । अर्थस्यौद्धत्यव्यञ्जकत्वादिति भावः । **अनेवमिति** । यत्र वर्णनीयविशेषानुरोधेन प्रक्रान्तमार्गत्यागो नास्ति तत्रेत्यर्थः । माधुर्यादावित्यादिपदादोजोग्रहणम् । माधुर्यव्यञ्जके ललितबन्धे ओजोव्यञ्जके उद्धतबन्धे चेत्यर्थः । **लताकुञ्जमिति** । आदिपदात् 'चञ्चद्भुज—' इत्यादिग्रहणम् । श्लेषादीनां दशानामर्थगुणत्वमपि प्राचीनैरङ्गीकृतानामपि यथासंभवं दोषाभावादावन्तर्भावयति—**ओज इति** । तदभावस्य ओजःप्रभृतेरभावस्य । स्वीकृता । अस्माभिरिति शेषः । उपपादयति—**ओज इति** । साभिप्रायत्वं विशेषणानां प्रकृतोपयुक्तत्वेन वक्तुरभिप्रेतत्वम् । अर्थस्य वाक्यार्थस्य वैमल्यमनतिप्रयोजननिरर्थकपदार्थसंबन्धरूपमलराहित्यम् । उक्तेरेकार्थप्रतिपादकस्यानेकशब्दस्य वैचित्र्यं विरूपत्वम् । वाक्यार्थस्यामङ्गलाव्यञ्जकत्वमपारुष्यम् । **अपुष्टार्थेति** । अन्त्यस्थताप्रत्ययस्य प्रत्येकान्वयादपुष्टार्थत्वादीनामित्यर्थः । **स्पष्टानीति** । दोषपरिच्छेदेऽपुष्टार्थत्वादीना पञ्चानां यान्युदाहरणानि दत्तानि तद्विपरीतानीत्यर्थः । दीप्तरसत्वं व्यक्तर-

अर्थव्यक्तिः स्वभावोक्त्यालंकारेण तथा पुनः ।
रसध्वनिगुणीभूतव्यङ्ग्यानां कान्तिनामकः ॥ १५ ॥

अङ्गीकृत इति संबन्धः । अर्थव्यक्तिर्वस्तुस्वभावस्फुटत्वम् । कान्तिर्दीप्तरसत्वम् । स्पष्टे उदाहरणे ।

श्लेषो विचित्रतामात्रमदोषः समता परम् ।

श्लेषः क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्मा । तत्र क्रमः क्रियासंततिः, विदग्धचेष्टितं कौटिल्यम्, अप्रसिद्धवर्णनाविरहोऽनुल्बणत्वम्, उपपादकयुक्तिविन्यास उपपत्तिः, एषां योगः संमेलनं स एव रूपं यस्या घटनायास्तद्रूपः श्लेषो वैचित्र्यमात्रम् । अनन्यसाधारणरसोपकारित्वातिशयविरहादिति भावः । यथा—

'दृष्ट्वैकासनसंस्थिते प्रियतमे—' इत्यादि ।

अत्र[1] दर्शनादयः क्रियाः, उभयसमर्थनरूपं कौटिल्यम्, लोकसंव्यवहाररूपमनुल्बणत्वम्, 'एकासनसंस्थिते' 'पश्चादुपेत्य' 'नयने पिधाय'[2]

काञ्चीपदमित्यनेनैव नितम्बस्य बोधाद्विशेषणमप्रयोजकम् । 'भानुः सदा युक्ततुरङ्ग एव' इत्यादि । विपर्ययस्तु 'सदाचरति' इति । 'सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये ।' अत्र मरणे कीर्तिशेषशब्दः । विपर्ययस्तु मृतादिशब्दः । 'कामं कंदर्पचण्डालो मयि वामाक्षि निर्दयः । रतिमन्तिमदेहत्वात्त्वयि निर्मत्सरः किमु ॥' विपर्ययस्तु 'कन्ये कामयमानं मां न त्वं कामयसे कथम् ।' इति । कान्तिनामकः । गुण इति शेषः । क्रमेणोदाहरणे—'पृष्ठेषु शङ्खधवलच्छविषु च्छदानां राजीभिरङ्कितमलक्तकरागिणीभिः । गोरोचनाहरितबभ्रुबहिःपलाशमामोदते कुमुदमम्भसि पल्वलस्य ॥' दीप्तरसत्वं यथा—'शून्यं वासगृहं—' इत्यादि । **उपपादकेति** । प्रकृतानुकूलहेतूपन्यास इत्यर्थः । **वैचित्र्यमात्रमिति** । मात्रपदेन गुणत्वव्यवच्छेदः । अत्र हेतुमाह—**अनन्येति** । तादृशरसोपकारित्वातिशयश्च रसव्यञ्जकवाक्यस्य काव्यव्यपदेशयोगित्वम् । उभयस्य ज्येष्ठाप्रीणनस्य कनिष्ठाप्रतारणस्य च समर्थनमनुष्ठानम् । यद्वा

सत्वम् । रसस्य प्राधान्याप्राधान्याभ्यां ध्वनिगुणीभूतव्यङ्ग्यव्यपदेशः । विचित्रता श्रोतृविस्मयजनकप्रतीतिविषयत्वम् । घटना अर्थानां मेलनं विचित्रतामात्रं न तु गुणत्वम् । अत्र हेतुमाह—**अनन्येति** । गुणानामसाधारणरसोपकारप्रयोजकत्वनियमादिति भावः । दृष्ट्वैकासनेत्युदाहरणं रसपरिच्छेदे नायिकाप्रकारकथनप्रकरणे दत्तम् । तत्रैव मया व्याख्यातम् । उभयसमर्थनं प्रियतमायाः प्रीणनमन्यस्याः प्रतारणम् । तयोः समर्थनं संघटनम् । लोकव्यवहाररूपं लोकव्यवहारप्रसिद्धरूपम् । उपपादकानि स्वाभिमतार्थसंपाद-

---

१. 'अत्र' इति क-पुस्तके नास्ति. २. 'निमील्य' घ.

'ईषद्वक्रितकंधरः' इति चोपपादकानि, एषां योगः । अनेन च वाच्योपपत्तिग्रहणव्यग्रतया रसास्वादो व्यवहितप्राय इत्यस्यागुणता ।

समता च प्रक्रान्तप्रकृतिप्रत्ययाविपर्यासेनार्थस्य विसंवादितावि[1]च्छेदः । स च प्रक्रमभङ्गरूपविरह एव । स्पष्टमुदाहरणम् ।

न गुणत्वं समाधेश्च

समाधि[1]श्चायोन्यन्यच्छायायोनिरूपद्विविधार्थ[2]दृष्टिरूपः । तत्रायोनिरर्थो यथा—

'सद्योमुण्डितमत्तहूणचिवुकप्रस्पर्धि नारङ्गकम् ।'

अन्यच्छायायोनिर्यथा—

'निजनयनप्रतिबिम्बैरम्बुनि बहुशः प्रतारिता कापि ।
नीलोत्पलेऽपि विमृशति करमर्पयितुं कुसुमलावी ॥'

अत्र नीलोत्पलनयनयोरतिप्रसिद्धं सादृश्यं विच्छित्तिविशेषेण निबद्धम् । अस्य चासाधारणशोभानाधायकत्वान्न गुणत्वम्, किंतु काव्यशरीरमात्रनिवर्तकत्वम् ।

उभयोर्ज्येष्ठाकनिष्ठयोः समर्थनमनुरूपप्रीणनम् । निरुक्तश्लेषस्य दोषत्वमेव प्रसक्तं कुतो गुणत्वमित्युपपादयति—**अनेन चेति** । निरुक्तश्लेषेण चेत्यर्थः । वाच्यस्य वाक्यार्थस्य उपपत्तिः संभवः । यद्वा वाच्याया उपपत्तेः कारणस्य ग्रहणं ज्ञानमत्र व्यग्रतया कष्टेन तज्जनकतया । व्यवहितप्रायो विलम्बेनोत्पादितः । अस्य श्लेषस्य । अगुणता गुणविरोधित्वम् । दोषत्वमिति यावत् । **स्पष्टमिति** । 'उदेति सविता ताम्रः' इत्यादि । अयोनिरल्पच्छायायोनिः । अन्यस्य काव्यान्तरस्य छाया वर्णनं योनिर्यस्य सः । **सद्य इति** । हूणो हूणदेशोत्पन्नो म्लेच्छः । नारङ्गकं पक्कनारङ्गम् । अत्र हूणचिवुकनारङ्गयोः सादृश्यमनिबद्धपूर्वम् । **निजेति** । विमृशति विचारयति । कुसुमलावी मालाकारी । नन्वच्छायायोनेरर्थस्य निबन्धनमप्रयोजनमत आह—**अत्रेति** । अतिप्रसिद्धं काव्यान्तरैः सहस्रशो निबद्धमिति । विच्छित्तिविशेषेण वैचित्र्यविशेषाधायकत्वेन । तथा चार्थान्तरयोगेन प्रसिद्धमपि सादृश्यं विलक्षणवैचित्र्यं जनयतीति

कानि । अनेन निरुक्तश्लेषेण । वाच्यस्य प्रियतमाचुम्बनस्य । उपपत्तिरुपपादकयुक्तिस्तस्या ग्रहणे अनुसंधाने । व्यग्रतया । सामाजिकानामिति शेषः । विसंवादिता विजातीयत्वप्रतिभासः । हूणो म्लेच्छविशेषः । मत्तो मदिरादिभक्षणेन । तस्य मुखस्यातिताम्रत्वादिति भावः । प्रस्पर्धि तुल्यम् । नारङ्गकं नारङ्गम् । पक्कमिति बोध्यम् । कुसुमलावी मालाकारी । विच्छित्तिविशेषेण वैचित्र्यविशेषप्रयोजकत्वेन । अस्य निरुक्तसमाधेः । काव्यशरीरस्य अर्थस्य निवर्तकत्वं निष्पादकत्वम् । मात्रपदेन रसस्यासाधारणशोभा-

---

1. **अयोनीति** । अयोनिरनन्यकारणः । अवधानमात्रहेतुक इति भावः ॥
2. **अर्थेति** । अर्थस्य दर्शनं दृष्टिः ॥

---

१. 'विरहः' घ. २. '–दृष्टि–' इति नास्ति क-ख-पुस्तकयोः.

क्वचित् 'चन्द्रम्' इत्येकस्मिन्पदार्थे वक्तव्ये 'अत्रेर्नयनसमुत्थं ज्योतिः' इति वाक्यवचनम्। क्वचित् 'निदाघशीतलहिमकालोष्ण-सुकुमारशरीरावयवा योषित्' इति वाक्यार्थे वक्तव्ये 'वरवर्णिनी' इति पदाभिधानम्। क्वचिदेकस्य वाक्यार्थस्य किंचिद्विशेषनिवेशादनेकैर्वाक्यैरभिधानमित्येवंरूपो व्यासः। क्वचिद्बहुवाक्यप्रतिपाद्यस्यैकवाक्येनाभिधानमित्येवंरूपः समासश्च। इत्येवमादीनामन्यैरुक्तानां न गुणत्वमुचितम्, अपि तु वैचित्र्यमात्रावहत्वम्।

तेन नार्थगुणाः पृथक् ॥ १६ ॥

तेनोक्तप्रकारेण। अर्थगुणा ओजःप्रभृतयः प्रोक्ताः ॥

इति साहित्यदर्पणे गुणविवेचनो नामाष्टमः परिच्छेदः।

भावः। अस्य च समाधेश्च। चतुर्थविधार्थप्रौढिरूपस्यौजसो गुणत्वाभावमाह—**क्वचिदिति**। चन्द्रमिति पश्येत्येकदेशम्। **निदाघेति**। 'शीतकाले भवेदुष्णा उष्णकाले च शीतला। सुकुमारशरीरा च सा ज्ञेया वरवर्णिनी ॥' व्यासो यथा—'असौ नानाकारो भवति सुखदुःखव्यतिकरः सुखं वा दुःखं वा भवति न भवत्येव च ततः। पुनस्तस्मादूर्ध्वं भवति सुखदुःखं किमपि तत्पुनस्तस्मादूर्ध्वं भवति न च दुःखं न च सुखम् ॥' अत्र येन संसारिणा यथाविधं कर्म कृतं तदनुसारेणैव विविधत्वमाश्रितः सुखदुःखभोगः क्रियते। यदि कुतश्चिदध्यात्मसाक्षात्कारः स्यात्तदैवास्य प्रवाहस्य शान्तिरित्येव विवक्षितं वैचित्र्येणोच्यते। समासो यथा—'श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्य। आर्थिनः प्रतिकूलानि परेषां न समाचरेत् ॥' अत्र परद्रव्यं न हरेत्, परदारान्न गृह्णीयात्, परापवादो न वक्तव्यः, इत्यादि वाक्यगताभिधेयस्य द्वितीयार्धेनाभिधानम्। **न गुणत्वमिति**। रसव्यञ्जकवाक्यस्य काव्यव्यपदेशोपयोगित्वाभावादिति शेषः। उपसंहरति—**तेनेति**। परोक्ताः। एवं दण्ड्याचार्यनिरूपितानामपि दशविधगुणानां यथासंभवं स्वोक्तगुणव्यञ्जकादावन्तर्भावो बोद्धव्यः।

इति श्रीरामचरणतर्कवागीशभट्टाचार्यविरचितायां साहित्यदर्पणविवृतौ
गुणविवेचनो नामाष्टमः प्रकाशः।

व्यवच्छेदः। प्रौढिरोजः। प्रौढिश्च 'पदार्थे वाक्यरचना वाक्यार्थे च पदाभिधा। प्रौढिर्व्यासस्समासौ च साभिप्रायत्वमस्य च ॥' इति वामनोक्तानां पञ्चप्रकाराणामोजसामन्तिमं प्रकारं प्रागेव दूषितवान्। इदानीं तस्यैव प्रकारचतुष्टयं दूषयति—**क्वचिदिति**। अत्रेर्ब्रह्मपुत्रस्य मुनिविशेषस्य। अत्रेर्नयनाच्चन्द्र उत्पन्न इति पौराणिकी वार्ता। वरवर्णिनीपदस्य तादृशवाक्यार्थे परिभाषितवाक्यत्वादिति भावः। व्यासो यथा—'अयं नानाकारो भवति सुखदुःखव्यतिकरः—' इत्यादि। समासो यथा—'ते हिमालयमामन्त्र्य—' इत्यादि। ननु शब्दार्थशोभायकत्वेनैव ओजःप्रभृतीनां गुणत्वमङ्गीकरणीयमिति चेत्, न। तेषां ये दोषाभावपर्यवसन्नास्तत्राव्याप्तेः। दोषाभावस्यापकर्षप्रयोजकदोषविघटकत्वमात्रेणैवोत्कर्षायकत्वासंभवादलंकारेऽतिव्याप्तेः। नहि तादृशगुणालंकारजन्यशोभायां किंचिद्वैलक्षण्यमस्ति येन गुणेभ्योऽलंकाराणां व्यावृत्तिः क्रियत इति ॥'

नवमः परिच्छेदः।

अथोद्देशक्रमप्राप्तमलंकारनिरूपणं बहुवक्तव्यत्वेनोल्लङ्घ्य रीतिमाह—

पदसंघटना रीतिरङ्गसंस्थाविशेषवत् ।
उपकर्त्री रसादीनां
रसादीनामर्थाच्छब्दार्थशरीरस्य काव्यस्यात्मभूतानाम् ।
सा पुनः स्याच्चतुर्विधा॥ १ ॥
वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा ।
सा रीतिः । तत्र—
माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका ॥ २ ॥

---

* रीतिं निरूपयितुमस्याः प्राथमिकत्वे युक्तिमाह—**अथेति** । गुणनिरूपणानन्तरमित्यर्थः । **उद्देशेति** । 'उत्कर्षहेतवः प्रोक्ता गुणालंकाररीतयः' इत्युद्देशक्रमप्राप्तकालमित्यर्थः । उल्लङ्घ्य । सूचीकटाहन्यायेन प्रथमं कृत्वेत्यर्थः ॥ **पदेति** । पदानां संघटना विशेषः । रीयते गुणानां विशेषो ज्ञायतेऽनयेति रीतिः । 'रीङ् गतौ' इत्यनेन साधुः । गत्यर्थानां ज्ञानार्थत्वात्तथा व्युत्पत्तिः । **अङ्गेति** । विलक्षणमुखाद्यवयवसंनिवेशविशेषवदित्यर्थः । ननु पदसंघटनाविशेषस्य काव्यातिरिक्तेऽपि सत्त्वादतिव्याप्तिरत आह—**उपकर्त्रीति** । स्वाश्रयव्यङ्ग्यरसादिवृत्तिगुणव्यञ्जकतया रसादीनामुत्कर्षाधायिकेत्यर्थः । एवं च गुणाभिव्यञ्जकपदविन्यासो रीतिरिति फलितम् । तदुक्तं वामनेन—'विशिष्टपदरचना रीतिः, विशेषो गुणात्मा' इति । ननु रीतेः साक्षादेव शब्दस्योत्कर्षाधायकत्वं निरुक्तं परम्परया तु रसादीनामित्युपपन्नम्, तथापि तस्याः काव्योत्कर्षाधायकत्वमनुपपन्नमित्यत आह—**रसादीनामिति** । अर्थात्संभवबलात् । तथा च काव्यस्य शरीरात्मनोरुत्कर्षाधायकत्वेनैव काव्योत्कर्षाधायकत्वमिति भावः । **वैदर्भीति** । विदर्भगौडपाञ्चाललाटदेशोद्भवैः कविभिः संमतत्वाद्यथायथं वैदर्भ्यादिसंज्ञा । वैदर्भीमाह—**माधुर्येति** । ललिता सुकुमाराक्षरप्राया

---

* मुद्रितपुस्तके तु—"उद्देशक्रमप्राप्तमलंकारनिरूपणं परित्यज्य रीतिनिरूपणे युक्तिमाह—**अथेति** । बहवो वक्तव्या विषया यत्र तत्त्वेन । रीतिनिरूपणस्याल्पवक्तव्यत्वेन चेति बोध्यम् । सूचीकटाहन्यायेनाल्पविषय एव प्रथमं शिष्याणां जिज्ञासेति भावः । वस्तुतस्तु रीतेर्गुणघटितत्वेनैव गुणनिरूपणानन्तरं तन्निरूपणस्योचितत्वमित्यवधेयम् । पदानां गुणाभिव्यञ्जकवर्णादीनां घटना योजना । शरीरस्य यथा शोभनाङ्गयोगस्तथेत्यर्थः । एतेन रीतेर्व्यभिचारित्वमुपपन्नम् । नीरसेषु गुणाभिव्यञ्जकशब्दार्थसत्त्वे तस्य रीतित्ववारणायाह—**उपकर्त्रीति** । उत्कर्षजननी काव्यात्मभूतानामिति विशेषणमनुक्तमपि प्रापयति । विदर्भादिदेशविशेषभवकविसंप्रदायाभिमतत्वेन वैदर्भ्यादिसंज्ञा । माधुर्यव्यञ्जका वर्णा माधु-

अवृत्तिरल्पवृत्तिर्वा वैदर्भी[1] रीतिरिष्यते ।

यथा—'अनङ्गमङ्गलभुवः—' इत्यादि ।

रुद्रटस्त्वाह—

'असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी ।
वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया ॥'

अत्र दशगुणास्तन्मतोक्ताः श्लेषादयः ।

ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः ॥ ३ ॥

समासबहुला गौडी

यथा—'चञ्चद्भुज—' इत्यादि ।

पुरुषोत्तमस्त्वाह—

'बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौडीया ।
रीतिरनुप्रासमहिमपरतन्त्रा स्तोकवाक्या च ॥'

वर्णैः शेषैः पुनर्द्वयोः ।
समस्तपञ्चषपदो बन्धः पाञ्चालिका मता ॥ ४ ॥

सुकुमारार्था च । एकसमस्ता अल्पसमासयुक्ता । स्वल्पो लघुप्राण उच्चारणप्रयत्नो येषां तादृशान्यक्षराणि यत्र । ननु गुणानां त्रित्वमेवोक्तम्, कथं दशत्वमत आह—**तन्मतोक्ता इति** । रुद्रटमतोक्ता इत्यर्थः । गौडीमाह—**ओज इति** । अत एवाडम्बर· उद्भट । उद्भटार्थप्रतिपादकतयापि उद्भटः । सुमहानतिगुरुः प्राणो येषां तादृशान्यक्षराणि यत्र । अनुप्रासो वक्ष्यमाणशब्दालंकारविशेषः तस्य महिमा आधिक्यं तत्परतन्त्रा तदधीना । स्तोकवाक्या शिथिलबन्धा । अत एव दण्डचाचार्यैरुक्तम्—'अल्पप्राणाक्षरोत्तरम् । शिथिलं मालतीमाला लोलालिकलिता यथा । अनुप्रासधिया गौडैस्तदिष्टम्' इति । पाञ्चालीमाह—**वर्णैरिति** । वैदर्भीगौडयोर्व्यञ्जकवर्णव्यतिरिक्तैर्वर्णैरित्यर्थः । समस्तानि पञ्चषाणि पदानि यत्र । **पाञ्चालिकेति** । रीतिरित्यनुषज्यते । अत्र स्वार्थे कप्रत्ययः, न तु टिकण् । तथा सतीप्र-

---

र्थगुणनिरूपणे दर्शिताः । एकसमस्ता अल्पसमासयुक्ता वा स्वल्पप्राणाक्षरोत्तरा लघुप्रयत्नोच्चार्यवर्णबहुला । तदुदाहरणं यथा—'गाहन्तां महिषाः—' इति । गौडीमाह—**ओज इति** । ओजःप्रकाशका वर्णा ओजोगुणनिरूपणे उक्ताः । आडम्बर उद्भटः । स्तोकवाक्या शिथिलबन्धा । तदुक्तं दण्ड्याचार्येण—'अल्पप्राणाक्षरोत्तरम् । शिथिलम्' इति । 'अनुप्रासधिया गौडैस्तदिष्टम्' इति च । तच्छिथिलम् । यथा—'दोर्दण्डाञ्चित—' इत्यादि । सानुप्रासशिथिलबन्धा गौडी यथा—'विभाति माला लोलाक्ष्या लोलालिकुलसंकुला । यदीयामोदमादाय यूनां मानसम् ॥' पाञ्चालीं रीतिमाह—**वर्णैरिति** । शेषैर्वैदर्भीगौडीव्यञ्जकवर्णभिन्नैः ।

---

1. **वैदर्भीति** । एतां पुनरेवं कवयः स्तुवन्ति—'सति वक्तरि सत्यर्थे सतिशब्दानुशासने । अस्ति तन्न विना येन परिस्रवति वाङ्मधु ॥' तद्रीत्यात्मकं वस्त्वित्यर्थः ॥

द्वयोर्वैदर्भीगौड्योः ।

यथा—

'मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥'

भोजस्त्वाह—

'समस्तपञ्चषपदामोजः कान्तिसमन्विताम् ।
मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः ॥'

यथा—

लाटी तु रीतिर्वैदर्भीपाञ्चाल्योरन्तरे स्थिता ।

'अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्द-
न्कुपितकपिकपोलक्रोडताम्रस्रमांसि ॥'

त्वयः स्यात् । **मधुरयेति** । मधुरशब्दयोगेनोपपन्नम् । यद्वा मनोरमयेत्यर्थः । मधुना बोधिता प्रकाशिता या माधवी वासन्ती तस्या मधुसमृद्ध्या मकरन्दसंदोहेन समेधिता सम्यग्वर्धिता मेधा स्वरमाधुर्यं यस्यास्तया । मधुकराङ्गनया भ्रमर्या । उन्मदध्वनिभृता उत्कृष्टहर्षजनकशब्दकारिण्या । निभृताक्षरमव्यक्तवर्णं यथा स्यात्तथा उज्जगे । उत्कृष्टगानं कृतमित्यर्थः । अत्र माधुर्यव्यञ्जकद्वित्रवर्णसत्त्वेऽपि विभिन्नवर्णप्राचुर्येणैव पाञ्चालीव्यवहारः । कान्तिरौज्ज्वल्यम् । मधुरां माधुर्यव्यञ्जकवर्णघटिताम् । सुकुमारां कोमलवर्णबहुलाम् । लाटीमाह—**लाटीति** । वैदर्भीमिश्रिता पाञ्चालीत्यर्थः । **अयमिति** । विशेषणानां योग्यतावलादयमित्यनेन सूर्यो लभ्यते । मुद्राभञ्जनः संकोचनाशकः । प्रकाशक इत्यर्थः । बालमचिरविकचं मन्दारपुष्पं पारिभद्र(जात)पुष्पमिव । विरहेण विधुरं विकलं यत्कोकद्वन्द्वं चक्रवाक-

---

मधुरयेति । मनोरमयेत्यर्थः । मधुना वसन्तेन बोधिता प्रकाशिता प्रफुल्लपुष्पीकृता या माधवी वासन्ती तस्या मधुसमृद्ध्या मकरन्दास्वादातिशयेन समेधिता संवर्धिता मेधा मधुरस्वरवैचक्षण्यं यस्यास्तया । निभृताक्षर कलस्वरम् । समस्तानि पञ्च षड् वा पदानि यत्र ताम् । ओजःकान्तिमाधुर्यसौकुमार्यगुणयुक्तामित्यर्थः । यथा मम—'दत्तोदात्तविपन्नलोकरभसो विद्रावितासद्गुणो नानायज्ञविधिप्रमोदितबुधः कारुण्यधाराञ्चितः । सद्विद्वानिकरप्रचारनिपुणो दारिद्र्यचिन्तामणिः श्रीमानेष मनोज्ञचारुकरणो राजा जयत्यञ्जसा ॥' लाटीमाह—**लाटीति** । अन्तरे मध्ये । तदुभयलक्षणाक्रान्तेत्यर्थः । **अयमिति** । पुरोवर्तिरव्युदयवर्णनमिदम् । अयं पुरोवर्ती कश्चिदुदयति उदयगिरिशिखरमारोहति । मुद्रा संकोचः । बालं नवोत्फुल्लम् ।

---

१. 'अन्तरा' ब.

कश्चिदाह—

'मृदुपदसमाससुभगा युक्तैर्वर्णैर्न चातिभूयिष्ठा ।
उचितविशेषणपूरितवस्तुन्यासा भवेल्लाटी ॥'

अन्ये त्वाहुः—

'गौडी डम्बरबद्धा स्याद्वैदर्भी ललितक्रमा ।
पाञ्चाली मिश्रभावेन लाटी तु मृदुभिः पदैः ॥'

क्वचित्तु वक्राद्यौचित्यादन्यथा रचनादयः ॥ ५ ॥

वक्रादीत्यादिशब्दाद्वाच्यप्रबन्धौ । रचनादीत्यादिशब्दाद्वृत्तिवर्णौ । तत्र वक्रौचित्याद्यथा—

'मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः ।

मिथुनं तस्य बन्धुः सङ्गसंपादकत्वेन मित्रम् । रात्रौ हि चक्रवाकमिथुनं मिथो वियुक्तं दिवा संयुक्तं भवतीति प्रसिद्धिः । सूर्यमालोक्य दिनज्ञानेन मिथो युक्तं भवतीति मित्रता । विभिन्दन्निति तमांसीत्यनेनान्वितम् । उचितैर्विशेषणैः पूरितस्य परिपुष्टात्मनो वस्तुविशेषस्य न्यासो यत्र सा । डम्बरबद्धा उद्भटरचना । ललितक्रमा मधुरा । मिश्रभावेन गौडीवैदर्भ्योः संपर्केण । इदानीं वक्राद्यौचित्येन प्रकृतरीतिपरीता अपि रचनादयः कर्तव्या इत्यत आह—**क्वचित्त्विति** । तत्र वक्राद्यौचित्यव्यञ्जका वक्तृवाच्ययोरौचित्यमुद्भटत्वं सुकुमारत्वं वा । बन्धस्यौचित्यं स्वभावः । तथा च वक्तृवाच्ययोरौद्धत्यसौकुमार्याभ्यां प्रबन्धस्य स्वभावेन वा उपक्रान्तायाः प्रकृते रसव्यञ्जिकाया वा रीतेर्विपरीता रचनादयः कार्या इति भावः । **मन्थेति** । दुन्दुभिर्दुन्दुभिशब्दः केन ताडितः । ताडनेन जनितविशेषाणां शब्दविशेष्यकत्वेनैवोपपत्तेरिति कश्चित् । वस्तुतस्तु ताडितः सशब्दः कृतः स विशेषणे हीति न्यायेन विशेषणानां शब्दमात्रगामित्वमिति ब्रूमः । कीदृशः । मन्थेन मन्थनेन आयस्तं

रात्रौ चक्रवाकमिथुनं वियुक्तं सूर्योदये संगमो (तं) भवतीति प्रसिद्धिः । कोकद्वन्द्वस्य चक्रवाकमिथुनस्य बन्धुरुक्तोपकारकारी । कपीना गण्डः स्वभावत एव रक्तः कोपे त्वत्यन्तरक्त इति सूचयितुं कुपितेति कपिविशेषणम् । ताम्रो रक्तः । अत्र योग्यत्वादयमिति सामान्यनिर्देशे विशेषलाभ इत्यन्ये । **उचितेति** । उचितैः प्रकृतोपयुक्तैर्विशेषणैः पूरितो व्याप्तः वस्तुन्यासो वर्णनीयनिर्देशो यत्र सा । एतन्मते 'मधुरयति पाञ्चाल्यां यदुदाहृतं तदेतदुदाहरणं बोध्यम् । ललितक्रमा मधुरबन्धा । मिश्रभावेन गौडीवैदर्भ्योः संपर्केण । यदा वैदर्भीरीतिप्रक्रान्तप्रबन्धमध्ये क्रुद्धो वक्ता उद्धतो वाच्यो वर्ण्यते तदा प्रक्रान्तरीतिं परित्यज्य गौडी रीतिरनुसरणीया । एवमन्यत्रापीत्याह—**क्वचित्त्विति** । तथा वक्राद्युचिता रचना रीतिः । मन्था यस्तेति श्लोको नाटकप्रकरणे उक्तः । नाटकेऽपीति यदुक्तं तद्व्यभिचरत्यपि । यथा अनर्घ-

कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम् ॥'

अत्र वाच्यक्रोधाद्यभिव्यञ्जकत्वेऽपि भीमसेनवक्तृत्वेनोद्धता रचनादयः । वाच्यौचित्याद्यथोदाहृते 'मूर्धव्याधूयमान–' इत्यादौ । प्रबन्धौचित्याद्यथा नाटकादौ रौद्रेऽप्यभिनयप्रतिकूलत्वेन न दीर्घसमासादयः । एवमाख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादयः । कथायां रौद्रेऽपि नात्यन्तमुद्धताः । एवमन्यदपि ज्ञेयम् ॥

इति साहित्यदर्पणे रीतिविवेचनो नाम नवमः परिच्छेदः ।

क्षुभितं यदर्णवस्याम्भस्तेन प्लुतं व्याप्तं कुहरं यस्य तादृशस्य चलतो मन्दरस्य ध्वानवद्धीरो गम्भीरः । तथा कोणाघातेषु वादनदण्डाभिघातेषु सत्सु । गर्जन्त्याः प्रलयकालीनघटाया अन्योन्यसंघट्टजन्यशब्द इव चण्डः । ईदृशं चण्डत्वं कोणाघातकाल इत्यर्थः । 'कोणो वादनदण्डः स्यात्' इति कोषः । यद्वा 'ढक्काशतसहस्राणि भेरीशतशतानि च । एकदा यत्र ताड्यन्ते कोणाघातः स उच्यते ॥' इति परिभाषायां यत्रेत्यस्य यन्निमित्तमित्यर्थकत्वेन एकदा ढक्कादिताडनजन्याः शब्दाः कोणाघाताः तेषु मध्ये गर्जदित्यादिवच्चण्ड इत्यर्थः । कृष्णा द्रौपदी तत्क्रोधप्रवर्तकत्वात्तदग्रदूतः । कुरुशतनिधनस्योत्पातसूचकः । 'यदान्तरीक्षे बलवान्मारुतो मारुताहतः । पतत्यधः स निर्घातो जायते वायुसंभवः ॥' इत्युक्तलक्षणो यो निर्घातस्तत्सहितो वात इत्यर्थः । वाच्यस्य वाक्यार्थस्य । क्रोधादित्यादिना उत्साहजुगुप्सयोर्ग्रहणम् । **भीमसेनवक्तृत्वेनेति** । भीमस्य क्रोधनत्वादौद्धत्यं प्रसिद्धमिति भावः । अत्र तादृशशब्दस्य घोरत्वेनोद्भटत्वाद्वाच्योद्भटत्वमपि संभवतीति शुद्धमुदाहरणमूह्यम् । वक्तुरनुद्धतत्वे वीरेऽपि सुकुमाररचना यथा–'भो लङ्केश्वर–' इत्यादि । अत्राक्रोधनत्वेनानुद्धतः श्रीरामो वक्ता । अभिनयप्रतिकूलत्वेन अभिनेयार्थप्रतिपत्तिविलम्बकत्वेन मसृणा माधुर्यव्यञ्जकाः । **नात्यन्तमुद्धता इति** । वर्णादयः ॥

इति श्रीरामचरणतर्कवागीशभट्टाचार्यविरचितायां साहित्यदर्पणविवृतौ
रीतिविवेको नाम नवमः प्रकाशः ।

राघवे—'उद्दामद्युमणिद्यतिव्यतिकरप्रक्रीडदर्कोपलज्वालाजालजटालजाङ्गलतटीनिष्कूजकोयष्टयः । भौमोष्मप्लवमानसूरकिरणक्रूरप्रकाशा दृशोरायुष्कर्म समापयन्ति धिगमूर्मध्येऽद्रि शून्या दिशः ॥' इति ॥" इति व्याख्यान्तरं वर्तते.

दशमः परिच्छेदः ।

अथावसरप्राप्तानलंकारानाह—

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलंकारास्तेऽङ्गदादिवत् ॥ १ ॥

यथा अङ्गदादयः शरीरशोभातिशायिनः शरीरिणमुपकुर्वन्ति, तथानुप्रासोपमादयः शब्दार्थशोभातिशायिनो रसादेरुपकारकाः । अलंकारा अस्थिरा इति नैषां गुणवदावश्यकी स्थितिः । शब्दार्थयोः प्रथमं शब्दस्य

अलंकारनिरूपणे संगतिमाह—**अथेति** । रीतिनिरूपणानन्तरमित्यर्थः । अवसरप्राप्तान् अवसरसंगत्या निरूपयितुं युक्तानित्यर्थः । प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तिरवसरः । प्रकृते सूचीकटाहन्यायेन प्रथमं रीतिनिरूपणजिज्ञासा जाता अस्यैवोद्देशक्रमप्राप्तालंकारनिरूपणप्रतिबन्धिका तन्निवृत्तावलंकारनिरूपणजिज्ञासा जायत इति भावः । अलंकाराणां सामान्यलक्षणमाह—**शब्दार्थयोरिति** । अस्थिराः काव्येष्वनियतवृत्तयः । काव्यव्याप्यका इति यावत् । एतेन परम्परया शब्दार्थधर्माणां गुणानां वारणम् । रीतेरस्थिरत्वात्तद्वारणायाह—**शोभातिशायिन इति** । शोभातिशयजनका इत्यर्थः । रीतेः शब्दशोभाजनकत्वेऽपि गुणालंकारवच्छोभातिशयजनकत्वं नास्तीति भावः । नीरसशब्दार्थयोरनुप्रासोपमादीनां वारणायाह—**रसादीनिति** । उपकुर्वन्त उत्कर्षयन्तः । एवं च यत्र रसो नास्ति तत्रोक्तिवैचित्र्यमात्रप्रयोजकेष्वनुप्रासोपमादिष्वलंकारपदप्रयोगो गौण एव । विवृणोति—**यथेति** । शरीरिणमात्मानम् । अनुप्रासादेः शब्दालंकारत्वादुपमादेरर्थालंकारत्वादुभयोः पृथगुपादानम् । गुणेष्वतिव्याप्तिं वारयति—**नैषामिति** । एषामलंकारिणाम् । शब्दालंकारनिरूपणस्य प्राथमिकत्वे हेतुं दर्शयंस्तत्रापि पुनरुक्तवदाभासनिरूपणस्य प्राथमिकत्वे हेतुमाह—**शब्दार्थयोरिति** । वक्तव्येषु निरूपणयोग्येषु । शब्दार्था-

---

1. **अलंकारा इति** । अलंक्रियतेऽनेनेति करणव्युत्पत्त्यालंकारशब्दः शब्दार्थालंकारबोधकः । साहित्यशास्त्रापरपर्यायोऽलंकारशब्दस्तु भावसाधनः ॥

---

१. 'प्रकृते—' इत्यादिः '—भावः' इत्यन्तः पाठः पुस्तकान्तरे नास्ति. २. 'अनियताः' इति मुद्रितः पाठः. ३. 'एतेन निरलंकारमपि काव्यमस्तीति' सूचितम् । धर्मा अनुप्रासोपमादयः । शोभातिशायिनः वैचित्र्यातिशयप्रयोजकाः । तेन वाच्यत्वप्रमेयत्वादीनामतद्रूपाणां नालकारत्वम्।' इति मुद्रितः पाठः. ४. 'अलंकारत्वव्यवच्छेदाय' इति मुद्रितः पाठः.५."तरङ्गनिकरोन्नीततरुणीगणसंकुला। सरिद्वहति कल्लोलवाह्व्याहततीरभूः।'इत्यादौ रसानुसंधानरहिते यद्रूपकानुप्रासयोरलंकारव्यवहारः स गौण एवेति मन्तव्यम्। लौकिकदृष्टान्तमाह—अङ्गदादिवदिति। आदिना कुण्डलादिपरिग्रहः।' इति मुद्रितः पाठः६.'उपकुर्वन्ति उत्कृष्टतया ज्ञापयन्ति' इत्यधिकं मुद्रितपुस्तके. ७.'गुणानामपि काव्यशोभाजनकत्वेनालंकारत्वप्रसक्तौ तद्वारणाय 'अस्थिरा इत्युक्तं तदर्थमाह' इति मुद्रितः पाठः.८.'गुणानां माधुर्यौजःप्रसादानां व्यञ्जकाभावेऽपि स्वस्वरसव्यञ्जकशब्दार्थयोः परम्परयावश्यं सद्भाव इति भावः । वस्तुतस्तु रीतीनामपि गुणव्यञ्जकवर्णादिघटितत्वादस्थिरत्वेनालकारत्वप्रसक्तौ तद्वारणाय शोभातिशायिन इत्यस्य विलक्षणवैचित्र्याधायकत्वमिति तदर्थकरणम् अवश्यं तेनैव गुणानामपि वारणसंभवादस्थिरा इति विशेषणमनुपयुक्तमित्यवधेयम्।'इत्यधिकं मुद्रितपुस्तके.९.मुद्रितपुस्तके'वक्तव्येषु—' इत्यादिः '—द्रष्टव्यः' इत्यन्तः पाठो नास्ति, किंतु तत्र 'शब्दमत्यक्षानन्त-

बुद्धिविषयत्वाच्छब्दालंकारेषु वक्तव्येषु शब्दार्थालंकारस्यापि पुनरुक्तवदाभासस्य चिरंतनैः शब्दालंकारमध्ये लक्षितत्वात्प्रथमं तमेवाह—

आपाततो यदर्थस्य पौनरुक्त्येन भासनम् ।
पुनरुक्तवदाभासः[1] स भिन्नाकारशब्दगः[2] ॥ २ ॥

उदाहरणम्—

'भुजङ्गकुण्डली व्यक्तशशिशुभ्रांशुशीतगुः ।
जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः ॥'

अत्र भुजङ्गकुण्डल्यादिशब्दानामापातमात्रेण सर्पाद्यर्थतया पौनरुक्त्यप्रतिभासनम् । पर्यवसाने तु भुजङ्गरूपं कुण्डलं विद्यते यस्येत्याद्यन्यार्थत्वम् । 'पायादव्यात्' इत्यत्र क्रियागतोऽयमलंकारः, 'पायात्' इत्यस्य 'अपायात्' इत्यत्र पर्यवसानात् । 'भुजङ्गकुण्डली' इति शब्दयोः प्रथमस्यैव परिवृत्तिसहत्वम् । 'हरः शिवः' इति द्वितीयस्यैव । 'शशिशुभ्रांशु'

लंकारस्यापीत्यनेन शब्दार्थोभयशक्तिमूलध्वनिवत्पश्चान्निरूपणयोग्यत्वमस्य सूचितम् । चिरंतनैरित्यादि शब्दालंकारप्रकरणे निरूप्यत्वे हेतुः । तत्रापि प्रथमनिरूपणे सूचीकटाहन्याय एव हेतुर्द्रष्टव्यः । **आपातत इति** । तात्पर्यानवधारणदशायामित्यर्थः । भिन्नाकारशब्दग इति यमकव्यावृत्त्यर्थम् । स च शब्दस्य भङ्गाभङ्गाभ्यां द्विविधः । शब्दभङ्गे यथा—'भाति सदानल्यागः स्थिरतायामवनितलतिलकः' इति । अत्रापाततो दानल्यागशब्दौ पुनरुक्तौ । पर्यवसाने तु सदा अनल्या प्रणतिराहित्येन भाति । स्थिरतायामगः पर्वत इत्यर्थः । शब्दाभङ्गे उदाहरति—**भुजङ्गेति** । शशिशुभ्रांशुशीतगुशब्दाभ्यां पौनरुक्त्यमापाततः । पर्यवसाने तु शशिनः कर्पूरस्येव शुभ्रा अंशवो यस्य तादृशः शीतगुश्चन्द्रो यत्र स इत्यर्थः । यद्वा शशिशुभ्रांशुः शीतकिरण इत्यर्थः । सदा अपायादित्यपि शब्दभङ्गः । चेतोहरः मनोरमः । अस्योभयालंकारत्वमुपपादयति—**भुजङ्गकुण्डलीति** । भुजङ्गावतंस इति । द्वितीयपरिवर्तने पौनरुक्त्यमेव नास्तीति भावः । एवमग्रेऽपि यथायथं बोध्यम् । द्वयोरपीत्यादिना शीतगुरिति

---

1. **पुनरिति** । पुनरुक्तस्येव पुनरुक्तवद् आभासो ज्ञानमिति पुनरुक्तवदाभासः ॥
2. **भिन्नेति** । भिन्नाकारो विजातीयानुपूर्वीको यः शब्दस्तद्गः ॥

रमर्थबोधस्य सर्वानुभवसिद्धत्वादिति भावः । अस्य शब्दार्थालंकारत्वं स्वयमेवोपपादयिष्यति । शब्दालंकारान्तरमपेक्ष्यास्य वैचित्र्यातिशयावहत्वेन तत्र प्रथमं शिष्याणां जिज्ञासेति भावः ।' इति पाठो दृश्यते.

१. '–अनिरूपण–' इति पुस्तकान्तरे. २. मुद्रितपुस्तके तु 'भिन्नाकार–' इत्यादेः '–शब्दालंकारत्वमिति भावः ।' इत्यन्तस्य स्थाने 'लाटानुप्रासवारणाय स इति । अव्याद्रक्षतु । पर्यवसाने वक्तृतात्पर्यग्रहानन्तरं सदापायादिति अकारप्रश्लेषादिति भावः । परिवृत्तिसहत्वं पर्यायशब्दोपादानेऽपि प्रकृतोपयोगित्वम् । द्वितीयस्यैव परिवृत्तिसहत्वमित्यन्वयः । एवमग्रेऽपि । भातीति । दानल्यागयोरेकार्थत्वात् पौनरुक्त्यम् । वस्तुतस्तु सदा अनल्या अप्रणामेन अगः पर्वत इव ।' इति व्याख्या वर्तते.

इति द्वयोरपि। '[1]भाति सदानत्यागः' इति न द्वयोरपि। इति शब्दपरिवृत्तिसहत्वासहत्वाभ्यामस्योभयालंकारत्वम्।

अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।

[2]स्वरमात्रसादृश्यं तु वैचित्र्याभावान्न गणितम्। रसाद्यनुगतत्वेन [3]प्रकर्षेण न्यासोऽ[2]नुप्रासः।

तृतीयस्यापीति लभ्यते। **न द्वयोरपीति।** द्वयोरपि न परिवृत्तिसहत्वमित्यर्थः। अस्य पुनरुक्तवदाभासस्योभयालंकारत्वं शब्दार्थोभयालंकारत्वम्। शब्दपरिवर्तने तदर्थकपदान्तरादानेऽपि वैचित्र्यसंभवादर्थान्वयव्यतिरेकानुविधायित्वात्, अर्थालंकारत्वे यत्र तु शब्दपरिवर्तने वैचित्र्यं न संभवति तत्र शब्दान्वयव्यतिरेकानुविधायित्वाच्छब्दालंकारत्वमिति भावः। अनुप्रासालंकारमाह—**अनुप्रास इति।** शब्दस्य वर्णपदैकदेशपदानामन्यतमस्य साम्यं सादृश्येन वर्तनम्। वर्णानां सादृश्यं च कत्वादिना एकस्थानोच्चार्यत्वेनापि। तेन वर्णत्वादिना सदृशस्य विजातीयवर्णस्यावर्तने नातिप्रसङ्गः, नापि श्रुत्यनुप्राससंग्रहः। पदपदैकदेशयोस्तु तत्तद्व्यञ्जनघटितत्वेन छेकलाटानुप्रासयोः संग्रहाय 'वर्णसाम्यम्' इत्यनुक्त्वा 'शब्दसाम्यम्' इति कृतम्। वस्तुतस्तु पदतदेकदेशसाम्येऽपि वर्णसाम्यसंभवाच्छब्दपदं वर्णमात्रपरम्। अत एव 'वर्णसाम्यमनुप्रासः' इति काव्यप्रकाशः। 'वैषम्येऽपि' इत्यादिना साम्येऽपीति लभ्यते। एतच्च लाटानुप्रासे नियतम्। न च समस्वरपदतदेकदेशसाम्यं यमकेष्वतिव्याप्तमिति वाच्यम्। तेषां प्रकरणनियम्यतया तदतिरिक्तत्वेनास्य विशेषणात्। ननु 'वैषम्येऽपि स्वरस्य' इत्यनेन व्यञ्जनसाम्यमनुप्रास इति लभ्यते, स्वरमात्रसाम्यं न कथमनुप्रास इत्यत आह—**स्वरमात्रेति।** अनुप्रासपदव्युत्पत्तिमाह—**रसादीति।** तृतीयाद्वयं विशेषणे। रसाद्यनुगतः प्रकृष्टश्चेत्यर्थः। [3]आश्रयशब्दप्रकर्षणद्वारा रसादिप्रकर्षकत्वम्। तेनैव प्रकृष्टत्वम्। आस इत्येकदेशार्थमाह—**न्यास इति।** अनुप्रा-

1. **भातीति।** संपूर्णश्लोकस्तु 'अरिवधदेहशरीरः सहसा रथिसूततुरगपादातः। भाति सदानत्यागः स्थिरतायामवनितलतिलकः॥' इति। अवनितलतिलको राजा भाति। कया। सदानत्या सतां विषये आनत्या अतिनम्रभावेन। यद्वा सदा सर्वकाले अनत्या अरिषु अनम्रतया। कीदृशः। अरिवधदा शत्रुसंहारिणी ईहा चेष्टा येषां तादृशा ये शरिणः शरविशिष्टा भटाः तानीरयति प्रेरयतीति अरिवधदेहशरीरः। सहसा शीघ्रं रथिभिः सुष्ठु ऊताः संबद्धास्तुरगा अश्वाः पादाताः पदातिकाश्च यस्य सः। स्थिरतायामगः। पर्वततुल्य इत्यर्थः। यथा वा—'अम्बरेण गगनेन संवृतं जीवनैः शिरसि वारिभिः श्रितम्। भोगिभिश्च भुजगैर्विभूषितं शंकरं शुभकरं भजामहे॥' इति। अत्र अम्बरेण गगनेनेति, जीवनैर्वारिभिरिति, भोगिभिर्भुजगैरिति, शंकरं शुभकरमिति आमुखे पौनरुक्त्यं पर्यवसानेऽन्यार्थकत्वात्तदभावः॥

2. **अनुप्रास इति।** अनुशब्दोऽनुगमार्थः, प्रशब्दः प्रकर्षार्थः, आसशब्दो न्यासार्थ इति योगार्थो दर्शितः॥

---

१. 'स्वरमात्रेऽपि सादृश्यम्' घ. २. 'प्रकृष्टः' क. ३. 'रसाद्यनुगतत्वमनुप्रासः' इत्यधिकं पुस्तकान्तरे.

छेको व्यञ्जनसङ्घस्य सकृत्साम्यमनेकधा ॥ ३ ॥

छेकश्छेकानुप्रासः । अनेकधेति स्वरूपतः क्रमतश्च । रसः सर इ[3]त्यादेः क्रमभेदेन सादृश्यं नास्यालंकारस्य विषयः । उदाहरणं मम तातपादानाम्—

'आदाय बकुलगन्धानन्धीकुर्वन्पदे पदे भ्रमरान् ।
अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः ॥'

अत्र गन्धानन्धीति संयुक्तयोः, कावेरीवारीत्यसंयुक्तयोः, पावनः पवन इति व्यञ्जनानां बहूनां सकृदावृत्तिः । छेको[1] विदग्धस्तत्प्रयोज्यत्वादेषु[3] छेकानुप्रासः ।

अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा ।
एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते ॥ ४ ॥

एकधा स्वरूपत एव, न तु क्रमतोऽपि । अनेकधा स्वरूपतः क्रमतश्च । सकृदपीत्यपिशब्दादसकृदपि । उदाहरणम्[2]—

'उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ।

सस्य पञ्चप्रभेदानाह—**छेक इति । अनेकधेति** । स्वरूपतः क्रमतश्चेत्यर्थः । अस्य छेकानुप्रासस्य विषयः स्थानम् । तथा च तद्वारणायैव क्रमतश्चेत्युपात्तम् । **आदायेति** । अन्धीकुर्वन् मधुलोभेन अन्धवद्भ्रान्तान् कुर्वन् । पदे पदे स्थाने स्थाने । कावेरीवारिसंयोगेन पावनः पवित्रकरः । वृत्त्यनुप्रासमाह—**अनेकस्येति** । व्यञ्जनस्येत्यर्थः । **असकृदिति** । अत्राप्यनेकस्येत्यनुषज्यते । **उन्मीलदिति** । वसन्तवर्णनमिदम् । अमी वसन्तसंबन्धिनो वासराः पथिकैः प्रवासिकामुकैः कथंकथमपि

1. **छेक इति** । अथवा छेका आलयस्थाः पक्षिणस्तेषां हि प्रायो द्विर्भाषितं भवति । तेन छेकभाषितोपलक्षितोऽनुप्रासश्छेकानुप्रास इति । 'छेकस्त्रिषु विदग्धेषु गृहासक्तमृगाण्डजे' इति चवर्गादौ रभसः । अयमनुप्रासः सजातीयाव्यवहितद्वित्रादिवर्णानामप्यावर्तने संभवति । तथा चोक्तम्—'सजातीयाव्यवहितवर्णा द्वित्रादयो यदि । आवर्तन्ते तदा केचिच्छेकानुप्रासमूचिरे ॥' इति ॥

2. **उदाहरणमिति** । यथा वा मदीये दशकण्ठवधे—'लीलालोलमरालबालललितव्याकोशकोशाम्बुजश्रेण्योत्तत्स्फारपरागरागललितं व्यालोलमम्भोभरम् । बिभ्राणां तरुणारुणारुणमिव प्रावारमुत्कण्ठिता यां कल्लोलभुजच्छलेन सरयूरालीमिवालिङ्गति ॥' इति । यामयोध्याम् ॥

---

१. 'स्वरूपतः क्रमतश्च' इति नास्ति क. पुस्तके. २. 'इत्यादिमतभेदेन' घ. ३. 'एष' इति क. पुस्तके नास्ति.

नीयन्ते पथिकैः कथंकथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥'

अत्र 'रसोल्लासैरमी' इति रसयोरेकधैव साम्यम्, न तु तेनैव क्रमेणापि द्वितीये पादे, कलयोरसकृत्तेनैव क्रमेण प्रथमे, एकस्य मकारस्य सकृत्, धकारस्य चासकृत्[1]। रसविषयव्यापारवती वर्णरचनावृत्तिः, तदनुगतत्वेन प्रकर्षेण न्यसनाद्वृत्त्यनुप्रासः।

उच्चार्यत्वाद्यदैकत्र स्थाने तालुरदादिके।
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ॥ ५ ॥

उदाहरणम्—

'दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः।
विरूपाक्षस्य जयिनीस्ताः स्तुमो[2] वामलोचनाः ॥'

अत्र 'जीवयन्ति' इति, 'याः' इति, 'जयिनीः' इति। अत्र जकारयकारयोरेकत्र स्थाने तालावुच्चार्यत्वात्सादृश्यम्। एवं दन्त्यकण्ठ्यानामप्युदाहार्यम्। एष च सहृदयानामतीव श्रुतिसुखावहत्वाच्छ्रुत्यनुप्रासः।

महता कष्टेन नीयन्ते याप्यन्ते। कीदृशाः। उन्मीलतः प्राचुर्येण उत्पद्यमानस्य मधुनो मकरन्दस्य गन्धेन लुब्धा ये मधुपास्तैर्व्याधूतेषु चूताङ्कुरेषु आम्रमुकुलेषु क्रीडतां कोकिलानां काकलीभिः सूक्ष्मध्वनिभिः कलकलैः प्रौढशब्दैरुद्गीर्णः प्रवासित्वेन निक्षिप्तः कर्णेषु ज्वरः पीडा येषु ते। पथिकैः कीदृशैः। ध्यानावधानेन ध्यानस्य निष्ठया क्षणं प्राप्तः प्राणसमायाः प्रियायाः समागमरसेन संभोगरसेन उल्लास आह्लादो यैस्तैः। रसयोः रेफसकारयोः। **प्रथमे इति**। पादे इत्यन्वयः। तदतिरिक्ताश्छेकानुप्रासा इह वेदितव्याः। संज्ञाव्युत्पत्तिमाह—**रसेति**। रसविषयव्यापरो रसव्यञ्जनं तद्वतीत्यर्थः। वृत्तिश्च त्रिविधा—उपनागरिका, परुषा, कोमला च। तदुक्तं काव्यप्रकाशे—'माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते। ओजःप्रकाशकैस्तैस्तु परुषा कोमला परैः ॥' परैः शेषैः। केचित् कोमलां ग्राम्यां वदन्ति। एतास्तिस्रो वृत्तयो वैदर्भीगौडीपाञ्चालीसंज्ञकरीतित्वेन प्राङ् निर्दिष्टा इति ग्रन्थकृतेह नोक्ताः। तदनुगतत्वेन वृत्त्यनुगतत्वेन। श्रुत्यनुप्रासमाह—**उच्चार्यत्वादिति**। स्थाने उच्चारणस्थाने। रदो दन्तः। आदिना मूर्धकण्ठोष्ठस्य संग्रहः। अत्र स्वरूपतः साम्याभावेऽप्यनुप्रासत्वं प्रागेवोपपादितम्। **दृशेति**। विरूपाक्षस्य शिवस्य। संज्ञाव्युत्पत्तिमाह—**एष इति**।

---

१. 'च' इति नास्ति क-पुस्तके. २. 'स्तुवे' इति क्वचित्पाठः.

व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु ।
आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत् ॥ ६ ॥

यथावस्थमिति यथासंभवमनुस्वारविसर्गस्वरयुक्ताक्षरविशिष्टम् । एष च प्रायेण पादस्य पदस्य चान्ते प्रयोज्यः । पादान्तगो यथा मम—

'केशः काशस्तबकविकासः कायः प्रकटितकरभविलासः ।
चक्षुर्दग्धवराटककल्पं त्यजति न चेतः काममनल्पम् ॥'

[1]पदान्तगो यथा—

'मन्दं हसन्तः पुलकं वहन्तः' इत्यादि ।

शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमात्रतः ।
[2]लाटानुप्रास इत्युक्तो

अनुप्रासविशेषः । अन्त्यानुप्रासमाह—**व्यञ्जनमिति** । आवर्त्यते पुनरुच्चार्यते । संज्ञाव्युत्पत्तिमाह—**अन्त्येति** । अन्त एवान्त्यः । तत्र [1]योग्यत्वात् । **केश इति** । प्रकटितः करभस्य उष्ट्रस्य विलासः सादृश्यं येन सः । लाटानुप्रासमाह—**शब्दार्थयोरिति** । शब्दः प्रातिपदिकं पदं च । भिन्नार्थशब्दपौनरुक्ते यमकस्यैव विषय इति तद्वारणायार्थेति । 'स्मेरराजीवनयने लोचने किं निमीलिते ।' इत्यादावर्थमात्रस्य पौनरुक्त्ये नायमनुप्रास इत्युभयोपादानम् । अर्थस्य पौनरुक्त्यं तु पूर्वपदार्थविशेषणविशेषाभ्यां सहोत्तरपदार्थविशेषणविशेष्ययोरैक्ये संभवति । तेन '–घनेन संवृते सुमुखि व्योम्नि विभाति चन्द्रमाः' इत्यादौ विशेषणयोर्भेदान्नायमनुप्रासः । नापि 'वपुः कान्तं वचः कान्तं मनस्तु परम्, तव' इत्यादौ विशेष्ययोर्भेदात् । ननु 'यातु यातु किमनेन तिष्ठतु मुञ्च मुञ्च सखि सादरं वचः' इत्यादौ क्रोधादिव्यञ्जके शब्दार्थपौनरुक्त्ये लाटानुप्रासप्रसङ्ग इत्यत आह—**भेद इति** । तात्पर्यविषयान्वयमात्रभेदे सतीत्यर्थः ।

---

1. **पदान्तग इति** । यथा वा—'सारासारविदः सतां भयभिदः प्रह्लोपतापच्छिदः कारुण्यार्द्रहृदः प्रपन्नसुहृदः स्फारीभवत्संविदः । त्राताशेषविशः प्रकाशितदिशः कीर्त्या महीनिर्विशः कर्षन्तीश निशः प्रसक्तसुदृशस्त्वत्पादपीठस्पृशः ॥' इति स्तुतिकुसुमाञ्जलिपद्यमुदाहरणीयम् । एतदनुप्रासानुसरणेनैवाश्वधाटीछन्दः सहृदयहृदयावर्जकं भवति । तत्र 'न्यायावधिः श्रुतनिकायाकरम्बिभुवनायावतारसिकश्छायावधीरितकलायाबलिः कनकदायादपट्टवसनः । जायास्पृहाजटिलमायातनूविहितकायाभिमानिचरितः पायाददो जगदपायाददभ्रकरुणाया निधी रघुपतिः ॥' इति मदीयं देवराजचरितपद्यमुदाहार्यम् ॥

2. **लाटेति** । प्रकाशे तु—'पदानां स पदस्यापि वृत्तावन्यत्र तत्र वा । नाम्नः सवृत्त्यवृत्त्योश्च तदेवं पञ्चधा मतः ॥' इत्यनेन लाटानुप्रासस्य पञ्चविधत्वमाम्नातम्, तत्तु टीकाकृता दर्शित-

---

१. 'प्रयोज्यत्वात्' इत्यधिकं मुद्रितपुस्तके. २. 'सेरराजीव–' इत्यादिः '–आह' इत्यन्तः पाठः पुस्तकान्तरे नास्ति.

उदाहरणम्—

'सेरे राजीवनयने नयने किं निमीलिते ।
पश्य निर्जितकंदर्पं कंदर्पवशगं प्रियम् ॥'

अत्र विभक्त्यर्थस्य पौनरुक्त्येऽपि मुख्यतरस्य प्रातिपदिकांशद्योत्यधर्मिरूपस्य भिन्नार्थत्वाल्लाटानुप्रासत्वमेव ।

'नयने तस्यैव नयने च ।'

अत्र द्वितीयनयनशब्दो भाग्यवत्त्वादिगुणविशिष्टत्वरूपतात्पर्यमात्रेण भिन्नार्थः ।

अत एव 'अन्वयमात्रभेदात्' इति काव्यप्रकाशः । तथा च 'यातु यातु' इत्यादावन्वयभेदो नास्ति । किं तु क्रोधव्यञ्जकमेव पौनरुक्त्यमिति भावः । नन्वर्थान्तरसंक्रमितवाच्ये ध्वनावापाततः शब्दार्थयोः पौनरुक्त्यावभासनेऽपि पर्यवसाने वक्तृतात्पर्यविषयविशेषणान्तरप्रतीत्या भिन्नार्थत्वाभासनेनायमनुप्रास इत्यभिप्रायेणाह— **नयने इति ।** द्वितीयेति भाग्यवत्त्वादिगुणरूपं यद्विशिष्टत्वं विशेषणं तन्मात्रेण वक्तृतात्पर्यमात्रेण भिन्नार्थ इति योजनावैपरीत्येनान्वयः । अत एव 'दैन्येऽथ लाटानुप्रासेऽनुकम्पायां प्रसादने । अर्थान्तरसंक्रमितवाच्ये हर्षेऽवधारणे ॥' इत्यर्थान्तरसंक्रमितवाच्यध्वनेः पृथगुपादानं संगच्छते । मात्रपदेन नयनत्वस्य व्यवच्छेदः । शब्दस्य पौनरुक्त्यं द्विरुक्तिः । प्रतिपादिकपौनरुक्त्यं च तावदेकस्मिन्समासे विभिन्नसमासे समासासमासयोश्च संभवतीति त्रिविधम् । यथा—'सितकरकररुचिरविभा, विभाकराकार, धरणिधर, कीर्तिः । पौरुषकमला, कमला सापि तवैवास्ति नान्यस्य ॥' अत्र करेति प्रातिपदिकावृत्तिरेकस्मिन्समासे, विभेति भिन्ने, कमलेति समासासमासयोश्च । समासासमासगतं प्रातिपदिकपौनरुक्त्यमुदाहरति—**सेरेति ।** फुल्लेत्यर्थः । नन्वत्र प्रातिपदिकस्य पौनरुक्त्यसत्वेऽपि विभक्त्यर्थस्य भिन्नत्वादर्थपौनरुक्त्यं नास्तीति कथमस्य विषय इत्यत आह—**अत्रेति ।** भिन्नत्वात्पुनरुक्तत्वात् । पदपौनरुक्त्यमप्यनेकानेकपदगतत्वेन द्विविधम् । तत्रैकपदपुनरुक्ते यथा—'वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः । सुधाकरः क्व नु पुनः कलङ्कविकलो भवेत् ॥' अत्र विभ-

---

मेव । अत्र कारिकायां वृत्तिपदेन कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चापि वृत्तय उपलक्ष्यन्ते । तेन 'चन्द्रायते शुक्लरुचापि हंसो हंसायते चारुगतेन कान्ता ।' इत्यादेरपि संग्रहः । कमलाकरादयस्तु—'मधुनि मधुकर त्वं रङ्गमङ्गीकरोषि—' इत्यादौ नामैकदेशावृत्तावप्यमुमिच्छन्ति । केचित्तु कारिकागतनामपदस्योपलक्षणमूरीकृत्य 'जित्वा विश्वं भवानद्य विहरत्यवरोधनैः । विहरत्यप्सरोभिस्ते रिपुवर्गो दिवं गतः ॥' इत्यप्युदाहरन्ति ॥

---

१. 'अतः—' इत्यादिः '—द्विरुक्तिः' इत्यन्तो ग्रन्थः पुस्तकान्तरे न दृश्यते, किंतु तत्र 'अर्थान्तरसंक्रमितवाच्यध्वन्यादावपि शब्दार्थपौनरुक्त्यमुद्देश्यविधेयभावेनान्वयभेदश्चास्तीति तद्वारणाय मात्र पदम् ।' इति पाठः.

'यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ॥'

अत्रानेकपदानां पौनरुक्त्यम् । एष च प्रायेण लाटजनप्रियत्वाल्लाटानुप्रासः ।

ऽनुप्रासः[1] पञ्चधा ततः ॥ ७ ॥

स्पष्टम् ।

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥ ८ ॥

क्तिसहितस्य प्रातिपदिकस्य तदर्थस्य च पौनरुक्त्यम् । प्रथमं सुधाकरपदं विधेयार्थम्, अपरमनुवाद्यार्थम् । अनेकपदपौनरुक्त्ये उदाहरति—**यस्य नेति** । अत्र पूर्वार्धे तापकरत्वात्तुहिनदीधितिर्दवदहनः । परार्धे तु तादृशदुःखाजनकत्वाद्दवदहनोऽपि तुहिनदीधितिरिति तात्पर्यविषयस्योद्देश्यविधेयभावेनान्वयस्य भेदः । पदार्थानां स्वभेद एव । मिलित्वा लाटानुप्रासः पञ्चप्रकारः । चरमप्रकारद्वयं पदानुप्रास इत्यन्ये । अयं चान्यैरुभयालंकारतयोक्तोऽपि शब्दविशेषान्वयव्यतिरेकानुविधायित्वाद्ग्रन्थकृता शब्दालंकारमध्ये गृहीतः । यमकालंकारमाह—**सत्यर्थ इति** । स्वरव्यञ्जनसंहतेः स्वरव्यञ्जनसमुदायस्य । स्वरव्यञ्जनयोरेकत्वेऽपि यमकं भवति । यथा—'नानाकारेण कान्ताभूराराधितमनोभुवा । विविक्तेन विलासेन ततक्ष हृदयं मम ॥' एतद्वर्णयमकं वामनसंमतम् । **क्रमेणेति** । येन क्रमेण प्रथमं स्वरव्यञ्जनसमूह उक्तस्तेनैवेत्यर्थः ।

---

1. **अनुप्रास इति** । छेकानुप्रासवृत्त्यनुप्रासश्रुत्यनुप्रासान्त्यानुप्रासलाटानुप्रासभेदैः पञ्चधा पञ्चप्रकारक इत्यर्थः ॥

2. **यमकमिति** । (१) यदि प्रथमपादो द्वितीये यम्यते तदा **मुखयमकम्** । यथा—'दर्पकान्तक विराजमानयाऽदर्प-कान्त-कविराज-मानया । त्वत्प्रसादविधिलब्धया धिया साधवो दधति वैबुधीं धुरम् ॥' (२) प्रथमस्तृतीयपादे चेत्तदा **संदंशः** । यथा—'सन्नारीभरणोमायमाराध्य विधुशेखरम् । सन्नाऽरीभ-रणोऽमायस्ततस्त्वं पृथिवीं जय ॥' (३) प्रथमश्चतुर्थपादे चेत्तदावृत्तिः । यथा—'मुदाऽऽरताडी समराजिराऽजितः प्रवृद्धतेजाः प्रथमो धनुष्मताम् । भवान्बिभर्तीह नगश्च मेदिनीमुदार-ताडी-समराजि-राजितः ॥' (४) द्वितीयस्तृतीयपादे चेत्तदा **गर्भः** । यथा—'आध्यास्ते शमजुषा भवतः प्रसादादामोदराजि-तरु-चारु चिरं जनेन । दामोदरा जितरुचा-रुचिरजनेन कीर्णं तृणेन मृदुना वनमार्तवेन ॥' (५) द्वितीयपादश्चतुर्थे चेत्तदा **संदष्टकम्** । यथा—'शारदीमिव नदीं प्रसादिनीमुच्च-कैरव-सरोज-राजिताम् । स्तोतुमेष मम मूर्तिमैश्वरीमुच्चकैरवसरोऽजराजिताम् ॥' (६) तृतीयपादश्चतुर्थे चेत्तदा **पुच्छम्** । यथा—'उत्तुङ्गमातङ्गकुलाकुले यो व्यजेष्ट शत्रून्समरे सदैव । स सारमानीय महारि चक्रं ससार मानी यमहारिचक्रम् ॥' (७) प्रथमपादस्त्रिष्वपि यम्यते चेत्तदा **पङ्क्तिः** । यथा—

'तनुशङ्करवैरसमायतयातनु शंकर वै रस मायतया । तनु शं करवै रसमायतया-तनुशं कर वैरसमायतया ॥' 'हे शंकर, मा मां रस संभावय । मां प्रति स्ववचनामृतं मुञ्चेति । वै प्रसिद्धौ । कैः । अतनु यथा स्यात्तथा ये तनुशङ्का निःशङ्का रवा भक्तजनं प्रत्यभयदानवचनानि तैः । कीदृशं मा कर्मभूतम् । असमोऽनन्यसदृशोऽयः शुभावहो विधिर्यस्य सोऽसमायः, तस्य भावस्तत्ता तया असमायतया उपलक्षितम् । कथंभूतया असमायतया । आयतया अनियतया । हे विभो, शं कैवल्यलक्षणं तनु विस्तारय । अहं रसं भक्तिरसं करवै । त्वं मा माम् अतनुशम् अतनुः कामस्तं श्यति तनूकरोतीत्य-तनुशस्तथाभूतं कर । कुर्वित्यर्थः । करेति च्छान्दसः प्रयोगः । 'छान्दसा अपि क्वचिद्भा-षायां प्रयुज्यन्ते' इति वचनात् । कया हेतुभूतया । वैरसमायतया । वैरेणान्तररिपुसद्भाव-जनितेन, सह मायया वर्तत इति समायः तस्य भावस्तत्ता तया । कीदृश्या । आय-तया विस्तीर्णया ।' इति तदर्थः । 'यमकं तु विधातव्यं न कदाचिदपि त्रिपात्' इति नियमादेकस्यापरपादद्वयगतत्वेन भेदो न भवतीत्यसंकीर्णं पादगतं यमकं सप्तधैव । (८) प्रथमः पादश्चतुर्थे पादे द्वितीयस्तृतीये चेद्यम्यते तदावृत्तिगर्भयोगात्**परिवृत्तिः** । यथा—'मुदा रताऽसौ रमणी यता यां स्मरस्यऽदोऽलं कु-रुतेन वोढा । स्मरस्यदोऽलं-कुरुतेऽनवोढामुदारतासौ रमणीयतायाम् ॥' (९) प्रथमो द्वितीये तृतीयचतुर्थे चेद्यम्यते तदा मुखपुच्छयोगाद् **युग्मकम्** । यथा—'शमित-संगमसज्ज-नताऽऽपदंशमितसङ्गम-सज्जनतापदम् । न-मत-काममहीन-विभासितं नमत काममहीन-विभा-सितम् ॥' इत्य-र्धाभ्यासमृते पादद्वयावृत्तौ द्वयमिति नव । (१०) अर्धावृत्तिः **समुद्गकम्** । यथा—कलि-तमोहनमारव-राजितं स्मर हरं शिखि चन्द्रकला-ऽऽञ्छितम् । कलितमोहन-मारव-राऽजितं स्मरहरं शिखिचन्द्रक-लाञ्छितम् ॥' (११) श्लोकावृत्तिर्**मंहायमकम्** । यथा—'सकलशं सकपालमलंकृतप्रमदमस्थिरसं मदनाशनम् । भवमदभ्र-महानिधने हितं शमनमज्जनमानमताऽलयम् ॥ सकल-शंसक-पालमलं कृतप्रमदमस्थिर-संमद-नाश-नम् । भव-मद-भ्रम-हानिधनेहितं शम-नमज्जन-मान-मताऽऽलयम् ॥' 'अदभ्रं यन्म-हद् अनिधनं अविनाशित्वं निजभक्तजनदेयं तत्र हितम् । शमनं यमं मज्जयतीति शमनमज्जनम् । अलयं निर्नाशम् । सकला ये शंसकाः स्तुतिकर्तारस्तान्पालयति तथा भूतम् । कृतः प्रमदः परमानन्दो येन स तादृशम् । भवे संसारे यो मदस्तेन यो भ्रमस्तस्य हानिः सैव धनं येषां ते संसारभ्रमविरक्तास्तैरीहितस्तम् । शमेन नमन्तो ये जनास्तेषां मानार्थं मतोऽङ्गीकृत आलयः प्रतिदेहस्थितिरूपो येन स तादृशम् । शेषं स्पष्टम् ।' इति तदर्थः । एतद्वितयमपि पादावृत्तिविशेष इत्येकादश पादयमकानि । पादभागवृत्ति त्वनेकविधम्—द्विधा विभक्तेषु पादेषु प्रथमादिपादानामाद्यभागाः पूर्ववद्द्वितीयादिपादेष्वाद्यभागेष्वेव यदि यम्यन्ते तदा पूर्ववन्मुखादयो दश भेदा उत्पद्यन्ते । यथा—प्रथमपादाद्यभागो द्वितीयतृती-यचतुर्थपादाद्यभागेषु यम्यत इति त्रिधा । द्वितीयपादाद्यभागस्तृतीयचतुर्थपादाद्यभागयो-र्यम्यत इति द्विधा । तृतीयपादाद्यभागश्चतुर्थपादाद्यभागे यम्यत इत्येकः । प्रथमपादाद्य-भागस्त्रिष्वप्याद्यभागेषु यम्यत इत्यन्य इति सप्तासंकीर्णभेदाः । प्रथमपादाद्यभागसमानो द्वितीयपादाद्यभागस्तृतीयपादाद्यभागसमानश्चतुर्थपादाद्यभाग इत्येकः संकरः । प्रथम-

अत्र द्वयोरपि पदयोः क्वचित्सार्थकत्वं क्वचिन्निरर्थकत्वम् । क्वचिदेकस्य सार्थकत्वमपरस्य निरर्थकत्वम् । अत उक्तम्—'सत्यर्थे' इति ।

आवृत्तिः पुनरुच्चारणम् । पदयोः स्वरव्यञ्जनसमूहयोः । **क्वचिदिति** । 'नगजानगजा दयिता दयिता' इत्यादौ । **क्वचिन्निरर्थकत्वमिति** । द्वयोरित्यनुषङ्गः । यथा—'विजितामरतामरेक्षणा' इत्यादौ । अत्र तामरेति समूहयोः पदैकदेशत्वान्निरर्थकत्वम् । **एकस्येति** । प्रथमस्य द्वितीयस्य वा स्वरव्यञ्जनसमूहस्येत्यर्थः । विविक्तविषयत्वं विभिन्नविषयत्वम् । यमकादिति शेषः । रसादीनामत्यन्तोपकारिणो यमकप्रपञ्चस्य निर्वचनमनतिप्रयोजनमिति संक्षेपेणैव यमकनिरूपणं ज्याय इत्यभिप्रायेणाह—

पादाद्यभागस्तृतीयपादाद्यभागसमानो द्वितीयपादाद्यभागश्चतुर्थपादाद्यभागसमान इत्यपरः संकर इति नव । अर्धावृत्त्या समं पूर्ववद्दश भेदाः । एवं प्रथमादिपादानामन्त्यभागस्य द्वितीयादिपादान्त्यभागेष्वेव यमने पूर्ववद्दश भेदा जायन्ते । यथा—प्रथमपादान्त्यभागस्य द्वितीयतृतीयचतुर्थभागेषु यमने त्रिधा । द्वितीयपादान्त्यभागस्य तृतीयचतुर्थपादान्त्यभागयोर्यमने द्विधा । तृतीयपादान्त्यभागस्य चतुर्थपादान्त्यभागे यमने एकः । प्रथमपादान्त्यभागस्य त्रिष्वप्यन्त्यभागेषु यमन इत्यपर इति सप्तासंकीर्णाः । प्रथमपादान्त्यभागद्वितीयपादान्त्यभागयोस्तृतीयपादान्त्यभागचतुर्थपादान्त्यभागयोश्च साम्ये एकः संकरः । प्रथमपादान्त्यभागतृतीयपादान्त्यभागयोर्द्वितीयपादान्त्यभागचतुर्थपादान्त्यभागयोश्च साम्येऽन्यः संकर इति नव । अर्धावृत्त्या समं पूर्ववद्दशभेदाः । इत्थं द्विखण्डीकृतेषु पादेषु विंशतिः, त्रिखण्डीकृतेषु त्रिंशत्, चतुःखण्डीकृतेषु चत्वारिंशद्भेदाः स्थानापरिवर्तिनो भवन्ति । एतेषामुदाहरणानि पादावृत्तिदिशैवावसेयानि । अथ स्थानपरिवर्तनभेदाः—प्रथमादिपादानामन्त्यादिभागा द्वितीयादिपादानामाद्यादिभागेषु यम्यन्त इत्याद्यन्तर्थतानुसारेणान्ताद्यादियमकादयः प्रभेदा भवन्ति । तथाहि—द्विखण्डे यथा प्रथमपादस्यान्त्यमर्धं द्वितीयपादस्याद्यार्धे चेद्यम्यते तदान्तादियमकम् । प्रथमभाग एव चेदन्त्यभागे तदाद्यन्तयमकम् । एवं प्रथमपादस्याद्यान्तभागौ द्वितीयस्यान्तादिभागयोर्यदि यम्येते तदाद्यन्तादियमकयोः समुच्चयः । अत्र त्रिखण्डचतुःखण्डयोः पूर्वपादमध्यभाग उत्तरपादस्यादिभागे यदि यम्यते तदा मध्यादियमकम् । पूर्वस्यादिभागश्चेदुत्तरपादस्य मध्यभागे तदादिमध्ययमकम् । पूर्वस्य मध्यादिभागौ चेदुत्तरस्याद्यमध्ययोस्तदा मध्याद्यादिमध्ययोः समुच्चयः । एवं प्रथमस्यान्त्यभागो द्वितीयस्य मध्यभागे चेत्तदान्त्यमध्यम् । पूर्वस्य मध्यभागश्चेद्द्वितीयस्यान्तभागे तदा मध्यान्तिकम् । पूर्वस्यान्त्यमध्यभागौ चेद्द्वितीयस्य मध्यान्तभागयोस्तदान्त्यमध्यमध्यान्तयोः समुच्चयः । यद्यपि पूर्वस्यादिभाग उत्तरस्यान्त्यभागे चेत्तदाद्यन्तकमन्त्यभागस्त्वाद्यभागे चेत्तदातादिकमित्यादि प्रकारद्वयं संभवति, तथापि द्विखण्डान्तर्गतमेव तदिति पृथङ् गण्यते । सर्वेषां चैषामपरः समुच्चय इति भिन्नपादे यमने प्रभेदाः । एवं तस्मिन्नेव पादे आद्यादिभागानां मध्यादिभागेष्वावृत्तौ भेदा द्रष्टव्याः । सर्वे चैते नियतस्थानविवक्षया स्थानयमकभेदा नियतेषु स्थानेष्वावृत्तेरिति बोध्यम् । अनियतस्थानयमकभेदा अपि बहवो भवन्तीति प्रभूततमभेदं यमकम् । एतेषामुदाहरणानि तत्र तत्र महाकविप्रयोगेष्वनुसंधेयानि, विस्तरभयान्नेह प्रपञ्च्यन्ते ॥

तेनैव क्रमेण दमो मोद इत्यादेर्विविक्तविषयत्वं सूचितम् । एतच्च पाद-पदार्धश्लोकावृत्तित्वेन पादाद्यावृत्तेश्चानेकविधतया प्रभूततमभेदम् । दिङ्मात्रमुदाह्रियते—

'नवपलाश-पलाशवनं पुरः स्फुटपराग-परागत-पङ्कजम् ।
मृदुल-तान्त-लतान्तमलोकयत्स सुरभिं सुरभिं सुमनोभरैः ॥'

अत्र पदावृत्तिः 'पलाशपलाश' इति, 'सुरभिं सुरभिं इत्यत्र च द्वयोः सार्थकत्वम् । 'लतान्तलतान्त' इत्यत्र प्रथमस्य निरर्थकत्वम् । 'परागपराग' इत्यत्र द्वितीयस्य । एवमन्यदप्युदाहार्यम् ।

'[1]यमकादौ भवेदैक्यं डलोर्बवोर्लरोस्तथा ।'

एतच्चेति । यमकं चेत्यर्थः । अत्र पदपदं पादैकदेशपरम्, अर्धपदं श्लोकार्धपरम् । **पादाद्यावृत्तेश्चेति** । पादस्य द्विधा त्रिधा चतुर्धा वा खण्डने चानेकविधत्वम् । आदिना पादश्लोकार्धयोः संग्रहः । तत्र प्रथमपादस्य द्वितीयाद्यन्यतमस्मिन्द्वितीयादि-समुदाये च, द्वितीयस्य तृतीयान्यतरस्मिंस्तृतीयादिसमुदाये च, तृतीयस्य चतुर्थे आवृत्तिः संभवतीति दशविधत्वमेव पादयमकस्य । एवं प्रथमार्धस्य द्वितीयार्धे, प्रथमपादस्य द्वितीये, तृतीयस्य चतुर्थे, द्वितीयस्य तृतीये पादे आवृत्तिः संभवतीति श्लोकार्धयमकस्य त्रैविध्यम् । श्लोकयमकमपि विजातीयचतुष्पादवृत्त्या च द्विविधम् । प्रभूततमभेदमतिप्रचुरप्रकारम् । **दिङ्मात्रमिति** । प्रकारान्तरोपलक्षणमल्पमित्यर्थः । **नवेति** । नवानि पलाशानि पत्राणि येषां तादृशं पलाशवनं किंशुकारण्यं यत्र तम् । स्फुटानि विकसितानि परागै रजोभिः परागतानि संबद्धानि पङ्कजानि यत्र तम् । मृदुलोऽत एव तान्त आतपेन ग्लानो लतान्तो यत्र तम् । स श्रीकृष्णः सुरभिं वसन्तं सुमनोभरैः पुष्पातिशयैः सुरभिं सुगन्धिम् । पदावृत्तिः पादैकदेशावृत्तिः । **द्वितीयस्येति** । निरर्थकत्वमित्यन्वयः । **अन्यदपीति** । पादवृत्त्यादिरूपयमक-मित्यर्थः । पादाभ्यासो यथा—'न मन्दयाऽवर्जित-मान-सात्मया नमन्दया-वर्जित-मानसात्मया । उरस्युपास्तीर्णपयोधरद्वयं मया समालिङ्ग्यत जीवितेश्वरः ॥' इत्यादि । अर्धाभ्यासो यथा—'नाऽस्थेयसत्वया वर्ज्यः परमायत-मानया । नास्थेयः स त्वया-ऽऽवर्ज्यः परमायतमानया ॥' इत्यादि । श्लोकावृत्तिद्वयं क्रमेण यथा—'विनायकेन भवता वृत्तोपचितबाहुना । खमित्रोद्धारिणाऽभीता पृथ्वीयमतुलाश्रिता ॥ विनायकेन भवता वृत्तोपचितबाहुना । खमित्रोद्धाऽरिणाऽभीता पृथ्वी यमतुलाश्रिता ॥' 'समा-नयास माऽनया समानयाऽसमानया । समानया समानया समान या समानया ॥' अयं चतुरक्षरपादश्लोकः । यमकादाविल्यादिना श्लेषादिग्रहणम् । तेन 'त्वं समुद्रश्च

---

1. **यमकादाविति** । अत्र विशेषः—'यमकादौ भवेदैक्यं डलयो रलयोर्बवोः । शेष-योर्नणयोश्चान्ते सविसर्गाविसर्गयोः । सविन्दुकाविन्दुकयोः स्वादभेदप्रकल्पनम् ॥' इति ॥

१.—'पद' घ.

इत्युक्तनयात् 'भुजलतां जडतामबलाजनः' इत्यत्र[1] न यमकत्वहानिः ।

अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद्यदि ।
अन्यः श्लेषेण काकु वा सा वक्रोक्तिस्ततो द्विधा[2] ॥ ९ ॥

द्विधेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च । क्रमेणोदाहरणम्—

'के यूयं स्थल एव संप्रति वयं प्रश्नो विशेषाश्रयः
किं ब्रूते विहगः स वा फणिपतिर्यत्रास्ति सुप्तो हरिः ।
वामा यूयमहो विडम्बरसिकः कीदृक्स्मरो वर्तते
येनास्मासु विवेकशून्यमनसः पुंस्वेव योषिद्भ्रमः ॥'

अत्र विशेषपदस्य 'विः पक्षी' 'शेषो नागः' इत्यर्थद्वययोगात्सभङ्गश्लेषः। अन्यत्र त्वभङ्गाः[3] ।

दुर्वारो महासत्त्वौ सतेजसौ । अयं तु युवयोर्भेदः स जडात्मा पटुर्भवान् ॥' इत्यादौ न श्लेषभङ्गः । वक्रोक्त्यलंकारमाह—**अन्यस्येति** । वक्तुरित्यर्थः । अन्यार्थकमन्यतात्पर्यकम् । अन्यथा अर्थान्तरप्रतिपादकत्वेन योजयेत् संगमयेत् । अन्यः श्रोता । ततः श्लेषकाकुवक्रोक्तिभ्याम् । श्लेषस्यापि पदभङ्गाभङ्गाभ्यां द्वैविध्येन श्लेषवक्रोक्तिरपि द्विविधा । **के यूयमिति** । जले यूयमित्यर्थान्तरे संगमयञ्श्रोताह—स्थल इति । वक्ता स्वतात्पर्यमेवावमयन्नाह—प्रश्न इति । विशेषाश्रयो विशेषविषयः । विः पक्षी शेषोऽनन्त इत्यभिप्रायेण तदपि श्रोतान्यथा योजयति—किं ब्रूत इति । किं पृच्छतीत्यर्थः । एवं वाक्छलेन कदर्थितो वक्ता श्रोतारमाक्षिपति—वामा इति । प्रतिकूलतया छलग्राहिण इत्यर्थः । तदपि योषिदभिप्रायेण श्रोतान्यथा योजयति—अहो इति । विडम्बरसिकः प्रतारणाचतुरः । येन स्मरविडम्बनेन विवेकशून्यमनसः । तव इति शेषः । यद्वा सामान्येनाक्षेपो विशेषे पर्यवस्यतीति वाग्वैदग्ध्यम् । तत्रैव श्लेषवक्रोक्तिद्वैविध्यं दर्शयति—**अत्रेति** । नागो नागराजः । अर्थद्वयप्रयो-

---

1. **अत्रेति** । अत्र कालिदासपद्ये डकार-लकारयोर्भेदसत्त्वेऽपि श्रुतिसाम्यान्न यमकत्वव्याघात इत्यर्थः ॥

2. **वक्रोक्तिरिति** । एकेनान्याभिप्रायेणोक्तं वाक्यं यदन्येनान्याभिप्रायकं कल्प्यते तदा वक्रोक्तियोगाद् वक्रोक्तिरिति । वक्तृश्रोतृनिर्वाह्योऽयमलंकार इति भावः । अत्र प्रदीपकारास्तु—"इयं च न वाक्योवाक्यमात्रे किं तु स्वतोऽप्यन्येनोक्तस्यान्यथायोजनमात्रे। न्यायसाम्यात् । यथा—'कृष्णो वैरिविमर्दने हरिपदप्रीत्यर्जने त्वर्जुनः पीतः पङ्कजलोचनाभिरभितो नेत्राञ्चलैश्चलैः । रक्तः सज्जनसंगमेषु करणश्रेणीमणे श्रीधर स्थाने वर्णचतुष्टयस्य भुवने भर्ता भवान्गीयते ॥' अत्र वर्णचतुष्टयस्य भर्ता श्रीधर इति सार्वलौकिकं वाक्यमन्वयाश्लेषादिनास्माभिः समर्थितम् ॥" इत्याहुः ॥

3. **अभङ्ग इति** । 'अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता । त्रिगुणा श्रयते बुद्धि-

'काले कोकिलवाचाले सहकारमनोहरे।
कृतागसः परित्यागात्तस्याश्चेतो [1]न दूयते ॥'

अत्र कयाचित्सख्या निषेधार्थे नियुक्तो नञ् अन्यथा काका दूयत एवेति विध्यर्थे घटितः।

शब्दैरेकविधैरेव भाषासु विविधास्वपि।
वाक्यं यत्र भवेत्सोऽयं भाषासम इतीष्यते ॥ १० ॥

[2]यथा मम—

'मञ्जुलमणिमञ्जीरे कलगम्भीरे विहारसरसीतीरे।
विरसासि केलिकीरे किमालि धीरे च गन्धसारसमीरे ॥'

एष श्लोकः संस्कृतप्राकृतसौरसेनीप्राच्यावन्तीनागरापभ्रंशेष्वेकविध एव।

'सरसं कइण कव्वं'

इत्यादौ तु 'सरसं' इत्यत्र संस्कृतप्राकृतयोः साम्येऽपि वाक्यगतत्वाभावे वैचित्र्याभावान्नायमलंकारः।

श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते।

ज्यत्वात्प्रतिपाद्यद्वये संगमनीयत्वात्। काकुवक्रोक्तिमुदाहरति—**काले इति**। कृतागसः कृतापराधस्य। पत्युः इति शेषः। घटितो योजितः। भाषासमावेशालंकारमाह—**शब्दैरिति। मञ्जुलेति**। मानिनीं प्रति सख्या वचनमिदम्। कलेन मधुरध्वनिना गम्भीरे मनोहरे। केलिकीरे क्रीडाशुके। धीरे मन्दे। गन्धसारसमीरे चन्दनवायौ। कइण कव्वं कवेः काव्यम्। श्लेषालंकारमाह—**श्लिष्टैरिति**। 'सकृदुच्चरितः शब्दः सकृदर्थं गमयति' इति नियमेन काव्ये स्वरभेदानादराद् यावन्तोऽर्था-

---

नैं तु दारुमयी क्वचित्॥' इत्यत्र दारुणा क्रूरा, काष्ठेनेत्युभयार्थपक्षेऽपि दारुणेति पदस्य न भङ्ग इत्यभङ्गपदश्लेषेण वक्रोक्तिरियम्॥

1. **नेति**। न दूयते, अपि तु दूयत एवेति काका योजना। अत्र काकोः शब्दधर्मतया शब्दालंकारता; अन्यथा योजनं च व्यञ्जनयेति सहृदयाः॥

2. **यथेति**। यथा वा विद्याधिपरनाम्नो रत्नाकरस्य—'लीलाविलोलकलकण्ठविहंगकेलिकोलाहलाकुलकुलायकुलामलाङ्के। कक्कोलकन्दकदलीलवलीलवङ्गमालाललामचलमञ्जलकूलकच्छे॥' अयं श्लोको भाषाषङ्कसमः। एतदनुबन्ध्युत्तरश्लोकस्तु—'यस्मिन्सलीलमसितोन्नतगण्डशैलनागः करोति विकरालकरावमर्षात्। रक्तातपाभिनवपल्लवभङ्गमर्कबिम्बालवालवलयस्य दिनद्रुमस्य॥' इति। मन्दराद्रिवर्णनमेतत्॥

---

१. 'सूक्ष्म' इत्यधिकं पुस्तकान्तरे.

[1]वर्णप्रत्ययलिङ्गानां प्रकृत्योः पदयोरपि ॥ ११ ॥
श्लेषाद्विभक्तिवचनभाषाणामष्टधा च सः ।

क्रमेणोदाहरणम्—

'प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥'

अत्र 'विधौ' इति विधु-विधि-शब्दयोरुकारेकारयोरौकाररूपत्वाच्छ्लेषः ।

'किरणा हरिणाङ्कस्य दक्षिणश्च समीरणः ।
कान्तोत्सङ्गजुषां नूनं सर्व एव सुधाकिरः ॥'

स्तावन्त एव शब्दा एकप्रयत्नेनोच्चार्यन्त इति नये युगपन्नानाशब्दोच्चारणेऽपि तेषां भेदोपलम्भो न भवति । तत्रापि प्रकरणादिनियमाभावादनेकार्थानामभिधयैव बोधः । प्रकरणादिनियमसत्वे तु एकस्याभिधयापरस्य व्यञ्जनयेति मतमाश्रित्येदं लक्षणम् । एवं चैकप्रयत्नोच्चार्यत्वेन लुप्तभेदानां वर्णादीनां मेलकः श्लेषः, तद्विशिष्टैः पदैरनेकार्थानामभिधया बोधने सति श्लेषो भवतीत्यर्थः । एवं सति नात्माश्रयः । श्लिष्टवर्णादिभेदेन श्लेषस्याष्टविधत्वमाह–**वर्णेति** । वर्णौ च प्रत्ययौ च लिङ्गं चेति विग्रहः । स श्लेषालंकारः । **प्रतिकूलतामिति** । सूर्यास्तवर्णनमिदम् । पतिष्यतोऽस्तं गमिष्यतो दिनभर्तुः सूर्यस्य किरणसहस्रमप्यवलम्बनाय अस्तमयविघाताय नाभूत् । अथ च पतिष्यतः स्खलिष्यतो जनस्य करद्वयमपि पतनविघाताय भवति। तस्य तु करसहस्रमप्यवलम्बनाय नाभूदिति श्लेषः । अर्थद्वयमपि श्लेषेण समर्थयति—प्रतिकूलतामिति । विधौ चन्द्रे प्रतिकूलतां विरुद्धफलभागित्वम् । उदयफलभागित्वमिति यावत् । बहुसाधनता बहुस्थित्युपायशालित्वं विफलतामेति । तथा च कालान्तरे सूर्यास्तगमनं प्रति तत्कालीनकिरणानां प्रतिबन्धकत्वं कल्प्यते । एवं च संध्याकाले तत्कालीनकिरणरूपप्रतिबन्धकानां सद्भावेऽपि सूर्यास्तगमनमित्थेति प्रथमार्थसमर्थनम् । पक्षे—विधौ दैवे प्रतिकूलतामनभिमतफलसाधनोन्मुखतामुपगते सति । बह्वभिमतफलोपायशालित्वं विफलता-

---

1. **वर्णेति** । रुद्रटस्तु वर्णादिश्लेषाणां प्रत्येकं लक्षणमाह—'यत्र विभक्तिप्रत्ययवर्णवशादैकरूप्यमापतति । वर्णानां विविधानां वर्णश्लेषः स विज्ञेयः ॥ यत्र प्रकृतिप्रत्ययसमुदायानां भवत्यनेकेषाम् । सारूप्यं प्रत्ययतः स ज्ञेयः प्रत्ययश्लेषः ॥ स्त्रीपुंनपुंसकानां शब्दानां भवति यत्र सारूप्यम् । लघुदीर्घत्वसमासैर्लिङ्गश्लेषः स विज्ञेयः ॥ सिध्यति यत्रान्यैः सारूप्यं प्रत्ययागमोपपदैः । प्रकृतीनां विविधानां प्रकृतिश्लेषः स विज्ञेयः ॥ यस्मिन्विभक्तियोगः समासयोगश्च जायते विविधः । पदभङ्गेषु विभक्तो विज्ञेयोऽसौ पदश्लेषः । सारूप्यं यत्र सुपां तिङां तथा सर्वथा मिथो भवति । सोऽत्र विभक्तिश्लेषो वचनश्लेषस्तु वचनानाम् ॥ यस्मिन्नुच्चार्यन्ते सुव्यक्तविविक्तभिन्नभाषाणि । वाक्यानि यावदर्थं भाषाश्लेषः स विज्ञेयः ॥' इति ॥

---

१. 'वर्णयोः' इत्यधिकं घ-पुस्तके.

अत्र 'सुधाकिरः' इति क्विप्-क-प्रत्यययोः[1]। किं चात्र बहुवचनैकवचनयोरैकरूप्याद्वचनश्लेषोऽपि।

'विकसन्नेत्रनीलाब्जे तथा तन्व्याः स्तनद्वयी।
तव दत्तां[2] सदामोदं लसत्तरलहारिणी॥'

अत्र नपुंसकस्त्रीलिङ्गयोः[3] श्लेषो वचनश्लेषोऽपि।

'अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति[4]।
सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः॥'

अत्र 'वक्ष्यति' इति वहि-वच्योः, 'सामर्थ्यकृत्' इति कृन्तति-करोत्योः[2] प्रकृत्योः।

'पृथुकार्तस्वरपात्रं—' इत्यादि। अत्र पदभङ्गे विभक्तिसमासयोरपि वैलक्षण्यात्पदश्लेषः, न तु प्रकृतिश्लेषः। एवं च—

मेतीत्यर्थः। प्रत्ययश्लेषमुदाहरति—**किरणा इति**। **क्विप्-क-प्रत्यययोरिति**। श्लेष इत्यनुषङ्गः। एवमग्रेऽपि। क इत्यत्प्रत्ययस्य संज्ञा। **वचनश्लेषोऽपीति**। सर्व इति, सुधाकिर इति च। अत्रादौ संधिवशादैकरूप्यम्। लिङ्गश्लेषमुदाहरति—**विकसदिति**। 'दत्ताम्' इति दाधातोः परस्मैपदद्विवचनात्मनेपदैकवचनयोरपि श्लेषः। आमोदमानन्दम्। अथ च नीलाब्जयोः सौरभदानं संभवति। नेत्रपक्षे—लसन्ती च तरले च हारिणी च मनोहरे चेति विग्रहः। स्तनद्वयीपक्षे—लसंस्तरलो हारमध्यगो मणिर्यत्र, सा चासौ हारिणी चेति विग्रहः। अद्वा लसंस्तरलो यत्र, एवंभूतो हारो यत्रास्ति। कर्मधारयोत्तरमतुब्निषेधस्य प्रायिकत्वादेतत्साधु[3]वचनम्। श्लेषोऽपीत्यपिना णिन्प्रत्ययस्य इन्प्रत्ययस्य च श्लेषः। प्रकृतिश्लेषमुदाहरति—**अयमिति**। राजपुत्रे जाते ज्योतिर्विदो वचनमेतत्। हृदि वक्ष्यतीति वहधातुः। ज्ञेषु पण्डितेषु वक्ष्यतीति वचधातुः। अमित्राणां सामर्थ्यच्छेत्ता, मित्राणां सामर्थ्यस्य कर्ता। पदश्लेषमुदाहरति—**पृथुकेति**। व्याख्यातमिदं दोषपरिच्छेदे। नन्वत्र प्रकृतिश्लेषोऽपि संभवतीत्यत आह—अत्र पदभङ्गे अर्थबोधनाय समस्तपदस्य पार्थक्ये। विभक्तिसमासयोरपीत्यपिना प्रकृतेः संग्रहः। विभक्तिरत्र समा-

---

1. **सुधाकिर इति**। सुधां किरन्तीति क्विपि प्रथमाबहुवचनम्। सुधां किरतीति क-प्रत्यये प्रथमैकवचनम्॥

2. **दत्तामिति**। विकसन्नेत्रनीलाब्ज इत्यस्य कर्तृत्वे दत्तामिति लोटि परस्मैपदद्विवचनम्, स्तनद्वयीत्यस्य कर्तृत्वे त्वात्मनेपदैकवचनमिति बोध्यम्॥

3. **वक्ष्यतीति**। धारयिष्यति, कथयिष्यतीति यथाक्रमं योजना॥

4. **सामर्थ्येति**। सामर्थ्यं कृन्ततीति करोतीति यथायोगमनुसंधेयम्॥

---

१. 'नपुंसकस्त्रीलिङ्गयोः श्लेषः' इति नास्ति क-ख-पुस्तकयोः. २. 'च' क. ३. 'वचनम्' इति नास्ति पुस्तकान्तरे.

'नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः ।
सदृशे वनवृद्धानां कमलानां तदीक्षणे ॥'

अत्र लुब्धशिलीमुखादिशब्दानां श्लिष्टत्वेऽपि विभक्तेरभेदात्प्रकृतिश्लेषः । अन्यथा सर्वत्र पदश्लेषप्रसङ्गः[1] ।

'सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः ।
नयोपकारसांमुख्यमायासि तनुवर्तनम् ॥'

अत्र 'हर' इति पक्षे शिवसंबोधनमिति सुप्। पक्षे[2] हृधातोस्तिङिति विभक्तेः । एवं 'भव' इत्यादौ । अस्य च भेदस्य प्रत्ययश्लेषेणापि गतार्थत्वे प्रत्ययान्तरासाध्यसुबन्ततिङन्तगतत्वेन विच्छित्तिविशेषाश्रयणात्पृथगुक्तिः ।

साङ्गम् । क्वचित्पदभङ्गाभावेऽपि प्रकृतिविभक्तिवैलक्षण्येन पदश्लेषो यथा—'यस्य[1] चेतः प्रियालोके तस्य स्मरकदर्थनम् ।' अत्र यद्यसोस्तत्तसोः प्रकृत्योः सुप्तिङो र्विभक्त्योरपि वैलक्षण्यात्पदश्लेषः । एवं च प्रकृतिविभक्तिवैलक्षण्येन पदश्लेषाङ्गीकारे च । **नीतानामिति** । तस्या ईक्षणे कमलानां पद्मानां मृगविशेषाणां च सदृशे । 'मृगभेदेऽपि कमलः कमला श्रीवरस्त्रियोः' इति मेदिनी । कीदृशानाम् । लुब्धैर्मधुलुब्धैर्भूरिभिः शिलीमुखैर्भ्रमरैराकुलीभावं नीतानाम् । पक्षे—लुब्धैर्व्याधैर्बहुभिर्बाणैर्व्याकुलीभावं व्याकुलतां नीतानाम् । वने जले, विपिने च वृद्धानां प्राप्ताधिकरूपाणाम् । ईक्षणेऽपि, पद्मिनीमुखे पतद्भिर्भ्रमरैर्व्याकुलत्वं नीयते । अन्यथा प्रकृतिभेदमात्रेणापि पदश्लेषाङ्गीकारे सर्वत्र प्रकृतिश्लेषस्थले । एवं च पदश्लेषासंकीर्णं प्रकृतिश्लेषोदाहरणं न स्यादिति प्रकृतिश्लेषोच्छेदप्रसङ्ग इति भावः । विभक्तिश्लेषमाह—**सर्वस्वमिति** । शिवं प्रति तद्भक्तस्य, पुत्रं प्रति दास्याश्चोक्तिरियम् । प्रथमे—हे हर, त्वं, सर्वस्य जनस्य सर्वस्वम्, भवस्य संसारस्य छेदतत्परश्च, नयस्योपकारस्य च सांमुख्यं यस्मात्तादृशं तनुवर्तनं शरीरवृत्तिमायासि । प्राप्नोषीत्यर्थः । द्वितीये—त्वं सर्वस्य सर्वस्वं हर । छेदे धनिनां मारणे तत्परो भव । उपकारसांमुख्यं नय अपनय । तद्विमुखो भवेत्यर्थः । आयासि परपीडाकारि वर्तनं जीवनोपायं तनु । विस्तारयेत्यर्थः । अस्य च विभक्तिश्लेषपरस्य च । प्रत्ययश्लेषेणापीत्यपिर्भिन्नक्रमे । प्रत्ययश्लेषेण गतार्थत्वेऽपीत्यर्थः । प्रत्ययान्तरेणासाध्यं यत्सुबन्तं तिङन्तं च तद्गतत्वेन विच्छित्तिविशेषाश्रयणाद् वैचित्र्यविशेषजननात् । कृत्तद्धितान्तस्य स्वादिव्यतिरेकेण प्रयोगाभावात् प्रत्ययान्तरसाध्यत्वम्, सुप्तिङन्तस्य तु न तथात्वमिति विशेषः । 'आयासि' इत्यत्र प्रकृतिविभक्तिवैलक्षण्येन पदश्लेषोऽपीत्यवधेयम् । भाषाश्लेष-

---

1. **यस्येति** । यसो दैवादिकस्य तसश्च लोण्मध्यमपुरुषैकवचने यस्य तस्येति । यत्तदोः षष्ठ्येकवचनेऽपि । तदाह—अत्र यद्यसोरित्यादिना ॥

---

१. 'प्रसङ्गात्' क. २. 'च' इत्यधिकं घ-पुस्तके.

'महदे सुरसंधं मे तमव समासङ्गमागमाहरणे ।
हर बहुसरणं तं चित्तमोहमवसर उमे सहसा ॥'

अत्र [1]संस्कृतमहाराष्ट्र्योः ।

माह—**महदे इति** । संस्कृतार्थो यथा—हे महदे उत्सवदे, हे उमे हे गौरि. आगमाहरणे विद्याग्रहणे मे मम तं प्रसिद्धं समासङ्गं अव रक्ष । कीदृशम् । सुरसंधं देवप्रार्थनीयम् । अवसरे समये तं प्रसिद्धं चित्तमोहं सहसा झटिति हर अपनय । कीदृशम् । बहुसरणं बहुविषयगामिनम् । प्राकृतार्थस्तु—मह–मम, देसु–देहि, रसं–रतिम् । धम्मे–धर्मे, तमवसं–तमोवशाम्, आसं–आशाम्, गमागमा–संसारात्, हर–अपनय,णे–अस्माकम्, हरवहु–शिववधूः, सरणं–रक्षयित्री, तं–त्वम्, चित्तमोहं–चित्तमोहः, अवसरउ–अवसरतु, मे–मम, सहसेति । भाषासमावेशे तु भाषाणामैकरूप्यमेव,

---

1. **संस्कृतेति** । संस्कृतप्राकृतयोरित्यर्थः । उत्कृष्टं प्राकृतं महाराष्ट्रीति व्यपदिश्यते । न तु 'भक्तिविना वश नोहे वीण्यानें वा मृदंगनादानें । कन्यादानफलाते पावे कैसा मृदंगनादानें ॥' इत्यादिमहाराष्ट्रजनसुप्रसिद्धगाथेति । तथा चोक्तं दण्डिना—'महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः । सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ॥' इति । संस्कृतमागध्योः श्लेषो यथा—'कुललालिलावलोले शलिलेशे शालशालिलवशूले । कमलाशवलालिवलेऽमाले दिशमन्तकेऽविशमे ॥' 'कुरारालिरावरोलं सलिलं तत्सारसालिरवशूरम् । कमलासवलालिवरं मारयति शाम्यतो विषमम् ॥' इति मागधीछाया । 'कूलानि लालयन्ति पोषयन्त्येवंशीला ये तेषां लावे छेदने लोलस्तस्मिन् । शलन्तीति शलाः सोद्यमाः ते सन्ति यत्र देशे स शली तं लिशत्यल्पीकरोतीति शलिलेशस्तस्मिन् । शालैर्गृहैः शालन्ते शोभन्ते ये तांल्लुनातीति शालशालिलवः स चासौ शूलं चेति, दुःखजनकत्वात्, तथाभूते । कमला लक्ष्मीस्तस्याः शवा दरिद्रास्तेषु ललति लसतीत्येवंशीलं बलं यस्य स तस्मिन् । मलनं मालः, न विद्यते मालो यस्यासावमालस्तस्मिन् । 'मल धारणे' । अनिवार्य इत्यर्थः । अन्तके मृत्यौ सति स वासुदेवे विषये या दिङ्मार्गस्तां दिशमविशं प्रविष्टोऽसि ।' इति संस्कृतवाक्यार्थः । मागधस्तु—'कुरराणां पक्षिविशेषाणां या आलिः पङ्क्तिस्तद्रावै रोलः कलकलो यत्र तत् । सारसानां यालिस्तद्रवेण शूरं तद्विरहिमारणसमर्थम् । कमलानामासवं मकरन्दं ये लान्ति ते च तेऽलिनश्च तैर्वरम् । विषमं वियोगिजनदुःखावहं तत्सलिलं शाम्यतः शमजुषोऽपि मारयति । शरदितादृशं सलिलं विलोक्य मुनयोऽपि क्षुभ्यन्ति ।' इति । संस्कृतपैशाच्योर्यथा—'कमनेकतमादानं सुरतनरजतु च्छलं तदासीनम् । अप्पतिमानं खमते सोऽगनिकानं नरं जेतुम् ॥' 'कामे कृतामोदानां सुवर्णरजतोच्छलद्दासीनाम् । अप्रतिमानं क्षमते स गणिकानां न रञ्जयितुम् ॥' इति पैशाचीछाया । 'हे सुरतनः निधुवनपुरुष । सुरतातिरिक्ते कर्मणि न तेऽभिज्ञतेत्यामन्त्रणाभिप्रायः । खमते शून्यबुद्धे, यस्त्वया श्लाघ्यते स पुरुषः कं नरं जेतुमजतु गच्छतु । अहो, न तादृशः पुरुषो यं स जेष्यतीति । किंभूतम् । अनेकतमान्या-

[1]पुनस्त्रिधा सभङ्गोऽथाभङ्गस्तदुभयात्मकः ॥ १२ ॥

एतद्भेदत्रयं चोक्तभेदाष्टके यथासंभवं ज्ञेयम्।

यथा वा—

'येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
यश्चोद्वृत्तभुजंगहारवलयोगङ्गां च योऽधारयत्।

न त्वर्थभेदः। इह त्वर्थभेदोऽपीति भेदः। **यथासंभवमिति**। 'पृथुकार्तस्वर–'इत्यादौ सभङ्गः। 'नीतानाम्–' इत्यादावभङ्गः। 'सर्वस्वं हर–' इत्यादौ सभङ्गाभङ्गः। एकत्रैव तत्त्रितयमुदाहरति—**यथा वेति**। सर्वदः सर्वाभीष्टदाता माधवः, सर्वदा उमा-

---

दानानि यस्य ताम्। तत्प्रसिद्धं छलं मायामासीनमाश्रितम्। अप्पतेर्वरुणस्येव मानो यस्य तम्। अगा अचला निकाना दीप्तिर्यस्य तम्।' इति संस्कृतवाक्यार्थः। पैशाचस्तु 'स पुरुषो रञ्जयितुमात्मरञ्जनाय कामविषये कृतामोदानां सुवर्णरजताभ्यामुच्छलन्त्यो दास्यो यासां तथाभूतानां गणिकानामप्रतिमानं न क्षमते न सहते। तदानीमादरमभिलषतः कस्यचिदुपकृतगणिकस्योक्तिरियम्।' इति। संस्कृतसूरसेन्योर्यथा—'तोदी सदिगगणमदोऽकलहं स सदा बलं विदन्तरिदम्। आर दमेहावसरं सासदमारं गदासारम्॥' 'ततो दृश्यते गगनमदः कलहंसशतावलम्बितान्तरितम्। आरतमेघावसरं शाश्वतमारं गतासारम्॥' इति। सूरसेनीच्छाया। 'तुदति परानिति तोदी, देशनं दिग् उपदेशः तया सह वर्तत इति सदिक् न गणेन सहायेन मदो यस्य सः, स वित्, सदा सर्वकालमेव अकलहं परिभूतत्वान्निर्वैरम्, अत एव दमेहाया उपशमचेष्टाया अवसरो यस्य तत्, तथास्यन्ते क्षिप्यन्ते इत्यासाः शरास्तान्वन्ति खण्डयन्तीत्यासदा धानुष्काः सह तैर्वर्तत इति सासदम्, गदासारम्, इदमारमरिसक्तं बलमन्तर्मध्ये आर ससार।' इति संस्कृतवाक्यार्थः। सौरसेनस्तु—'आरतो निवृत्तो मेघैनामवसरो यत्र। शाश्वतो मारः कामो यत्र। गत आसारो यतस्तत्। शारदनभोवर्णनमेतत्।' इति। संस्कृतापभ्रंशयोर्यथा—'धीरागच्छदुमे हतमुद्धरवारिसदःसु। अभ्रमदप्प्रसराहरणुरविकिरणा तेजःसु॥' 'धीरा गच्छतु मेघतमो दुर्धरवार्षिकदस्यु। अभ्रमदप्रसराहरणं रविकिरणास्ते यस्य॥' इत्यपभ्रंशच्छाया। 'हे उमे, अवेरिव गडुरिकाया इव किरणं विक्षेपणं निर्वासनं यस्याः तथाभूता, हतमुत्, अणुः कृशा, अभ्रे गगने माद्यति यः सः तथाविधोऽपां प्रसरो यस्याः सा अभ्रमदप्प्रसरा गङ्गा अहर्दिवसमपि उद्वता धरा प्रलयापन्निमग्ना यस्मात्तदुद्धरं तच्च तद्वारि च समुद्रजलं च तदेव सदो गृहं येषां तेषु तेजःसु। वडवानलतेजःस्वित्यर्थः। अगच्छत् अपतत्। हरनिर्वासनदुःखिता सती गङ्गात्मानं वडवानलेन्धनीचकारेति धीरा सपत्न्या व्यसनेन स्वस्था भव।' इति संस्कृतवाक्यार्थः। 'हे धीराः, दुर्धरा वार्धिका दस्यवो यत्र तथाभूततन्मेघतम इति गच्छत्वपसरतु। यस्य मेघतमसः ते न भ्रमं ददातीत्यभ्रमदः प्रसरो येषां तादृशा रविकिरणा हरणं हर्तारः।' इत्यपभ्रंशवाक्यार्थः॥

---

1. **पुनरिति**। त्रिविधोऽप्ययं श्लेषः प्रकृतानेकविषयाप्रकृतानेकविषयप्रकृताप्रकृतानेकविषयभेदैर्भिद्यते॥

यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः ॥'

अत्र 'येन–' इत्यादौ सभङ्गश्लेषः[2]। 'अन्धक–'इत्यादावभङ्गः। अनयोश्चैकत्र संभवात्सभङ्गाभङ्गात्मको ग्रन्थगौरवभयात्पृथङ्नोदाहृतः।

अत्र[3] केचिदाहुः—'सभङ्गश्लेष एव शब्दश्लेषविषयः। यत्रोदात्तादिस्वरभेदाद्भिन्नप्रयत्नोच्चार्यत्वेन[1] भिन्नयोः शब्दयोर्जतुकाष्ठन्यायेन श्लेषः। अभङ्गस्त्वर्थश्लेष एव। यत्र[2] स्वराभेदादभिन्नप्रयत्नोच्चार्यतया शब्दाभेदादर्थयोरेकवृन्तगतफलद्वयन्यायेन श्लेषः। यो हि यदाश्रितः स तदलंकार एव। अलंकार्यालंकरणभावस्य लोकवदाश्रयाश्रयिभावेनोपपत्तिः' इति। तदन्ये न क्षमन्ते[3]।

धवश्च त्वां पायात्। माधवपक्षे—अभवेन जन्मरहितेन अनः शकटं ध्वस्तं पादेन परावर्तितम्। बलेरसुरराजस्य जेता। कायः पुरा अमृतपरिवेषणावसरे स्त्रीकृतः स्त्रीत्वं प्रापितः। अमृतार्थं विवदमानानां देवासुराणाममृतपरिवेषणाय मायया नारायणेन मोहिनीरूपं धृतमिति पुराणवार्ता। यश्चोद्वृत्तस्य अघासुरस्य हन्ता। यद्वा कालियस्य पीडाकरः। आरवलयः अरिसंबन्धि सैन्यं यातीत्यर्थः। यद्वा उद्वृत्तभुजंगहारं बलं यस्य तेन गरुडेन यातीत्यर्थः। अगं गोवर्धनं कृष्णरूपेण, गां पृथ्वीं च कूर्मरूपेण योऽधारयत्। शशिनं मन्नातीति शशिमद्राहुः तस्य शिरोहर इति स्तुत्यं नाम यस्य चामरा आहुः। अन्धकानां यादवानां क्षयकरो द्वारकाख्यनिवासनिर्माता। उमाधवपक्षे—येन ध्वस्तमनोभवेन विनाशितकामेन बलिजितो विष्णोः कायः पुरा स्त्रीकृतः। मोहिनीरूपदिदृक्षुणा शिवेन प्रेषितो विष्णुः पुनर्मोहिनीरूपं दधारेति पुराणवार्ता[3]। यश्च उद्वृत्तौ उत्कर्षेण वर्तितौ भुजंगरूपौ हारवलयौ येन सः। यश्च शिरसि गङ्गामधारयत्। यद्वा शरीरार्धेन गौरीम्, शिरसि गङ्गां चेत्यभिप्रायेण चकारः। यस्य शिरः शशिमच्चन्द्रयुक्तं हर इति स्तुत्यं नाम चामरा आहुः। अन्धकस्य असुरविशेषस्य विनाशकरः। श्लेषस्तावच्छब्दालंकारोऽर्थालंकारश्च संभवति, तयोः परमतनिराकरणपूर्वकं भेदं निरूपयति–**अत्रेति। जतुकाष्ठेति।** पृथगुपलभ्यमानयोरपि जतुकाष्ठयोर्योगे यथैकत्वप्रतिभासस्तथेहापीत्यर्थः। **लोकव-**

---

1. **यत्रेति।** समासभेदेनोदात्तादिस्वरभेदाद्भिन्नप्रयत्नोच्चारणयोग्ययोरपि शब्दयोः श्लेषभङ्गभयेन स्वरभेदानादरादेकप्रयत्नोच्चारणे जतुकाष्ठन्यायेन शब्दश्लेष इति भावः॥

2. **यत्र स्वरेति।** समासाभेदेनोदात्तादिभेदाभावादभिन्नप्रयत्नोच्चार्यत्वेन शब्दभेदाभावे केवलमर्थयोरेकवृन्तगतफलद्वयन्यायेन श्लिष्टत्वादर्थश्लेष इति भावः॥

3. **पुराणवार्तेति।** अस्त्रीकृत इति च्छेदः। त्रिपुरवधे विष्णुर्यस्य बाणो बभूवेति पुराणवार्ता इति तु युक्तम्॥

---

१. 'श्लेषः' क-पुस्तके नास्ति. २. 'इह' घ. ३. 'मन्यन्ते' घ.

तथाहि—अत्र ध्वनिगुणीभूतव्यङ्ग्यदोषगुणालंकाराणां [1]शब्दार्थगतत्वेन व्यवस्थितेरन्वयव्यतिरेकानुविधायित्वेन नियम इति । न च 'अन्धकक्षय–' इत्यादौ शब्दाभेदः, 'अर्थभेदेन शब्दभेदः' इति [2]दर्शनात् । किं चात्र शब्दस्यैव मुख्यतया वैचित्र्यबोधोपायत्वेन कविप्रतिभयोट्टङ्कनाच्छब्दालंकारत्वमेव । विसदृशशब्दद्वयस्य बन्धे चैवंविधस्य वैचित्र्याभावाद् वैचित्र्यस्यैव चालंकारत्वात् । अर्थमुखप्रेक्षितया [3]चार्थालंकारत्वेऽनुप्रासादीनामपि रसादिपरत्वेनार्थमुखप्रेक्षितयार्थालंकारत्वप्रसङ्गः । शब्दस्याभिन्नप्रयत्नोच्चार्यत्वेनार्थालंकारत्वे 'प्रतिकूलतामुपगते हि विधौ' इत्यादौ [3]शब्दभेदेऽप्यर्थालंकारत्वं तवापि प्रसज्यतीत्युभयत्रापि शब्दालंकारत्वमेव । यत्र तु शब्दपरिवर्तनेऽपि न [4]श्लेषत्वखण्डना, तत्र—

दिति । यथा [2]लोके मौल्यादिगतं मुकुटादि मस्तकाद्यलंकारत्वेन व्यपदिश्यते तथा काव्येऽपीत्यर्थः । दूषयति—**तदन्ये इति** । शब्दाभेदादर्थश्लेष इति यदुक्तं तद्दूषयति—**न चेति** । दर्शनस्य प्रामाण्यानभ्युपगमे लाह—**किं चेति** । कविप्रतिभया कवीनामनुभवेन उट्टङ्कनाद् विषयीकरणात् । शब्दस्यान्वयानुविधायित्वं प्रदर्श्य व्यतिरेकानुविधायित्वं दर्शयति—**विसदृशेति** । बन्धे चेति चकारस्य वैचित्र्याभावाच्चेत्यन्वयः । ननु वैचित्र्यस्य शब्दान्वयव्यतिरेकानुविधायित्वेन किमायातमत आह—**वैचित्र्यस्यैवेति** । अलंकारत्वादलंकारनियामकत्वात् । अर्थमुखप्रेक्षितया अर्थानुसंधानसापेक्षत्वेन [3]अर्थालंकारत्वे अर्थालंकारत्वाङ्गीकारे । रसादिपरत्वेन रसाद्युत्कर्षाभिप्रायप्रयोज्यत्वेन । **शब्दभेदेऽपीति** । 'विधौ' इत्यादौ स्वरभेदाभावेन एकप्रयत्नेनैव शब्दद्वयोच्चारणादर्थद्वयप्रतीतिरिति भावः । उभयत्र सभङ्गाभङ्गाश्लेषयोः ।

---

1. **शब्दार्थेति** । पर्यायान्तरपरिवृत्तिसहत्वासहत्वाभ्यां शब्दार्थगतव्यवस्थितिरिति भावः ॥

2. **दर्शनादिति** । 'यावन्त एवमर्थाः स्युः शब्दास्तावन्त एव हि ।' इत्याद्युक्तिमूलकादित्यर्थः ॥

3. **शब्दभेद इति** । विधिविधुशब्दयोः पार्थक्येऽपीत्यर्थः ॥

4. **श्लेषत्वेति** । श्लेषत्वखण्डना श्लेषभङ्गः ॥

---

१. 'अर्थ' इति नास्ति क-ख-पुस्तकयोः. २. 'लोके' इति मुद्रितपुस्तके नास्ति. ३. 'अर्थालंकारत्वे' इति पुस्तकान्तरे नास्ति.

'स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् ।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥'

इत्यादावर्थश्लेषः । अस्य [1]चालंकारान्तरविविक्तविषयताया असंभवाद्विद्यमानेष्वलंकारान्तरेष्वपवादत्वेन तद्बाधकतया तत्प्रतिभोत्पत्तिहेतुत्वमिति केचित् ।

इत्थमत्र विचार्यते—समासोक्त्यप्रस्तुतप्रशंसादौ द्वितीयार्थस्यानभिधेयतया नास्य गन्धोऽपि । 'विद्व[2]न्मानसहंस—' इत्यादौ श्लेषगर्भे रूपकेऽपि मानसशब्दस्य चित्तसरोरूपोभयार्थ[1]त्वेऽपि रूपकेण श्लेषो बाध्यते । सरोरूपस्यैवार्थस्य विश्रा[2]न्तिधामतया प्राधान्याच्छ्लेषे ह्यर्थद्वय-

---

नन्वेवं श्लेषस्यार्थालंकारत्वोच्छेद इत्यत आह—**यत्र त्विति । स्तोकेनेति ।** सुवर्णादिगौरवप्रकर्षाप्रकर्षप्रकाशिका लुप्तिका शिखरशलाका तुलाकोटिः । अत्र स्तोकादिपदस्थानेऽल्पादिपदनिवेशेऽप्यर्थद्वयप्रतीतिरस्त्येव । 'अयम्—' इत्यादौ 'वक्ष्यति' इत्यादिपदस्थाने 'धारयिष्यति' इत्यादिपदनिवेशे तु नार्थद्वयप्रतीतिरिति तत्र शब्दालंकारत्वमेव । इदानीं श्लेषस्यालंकारान्तरविविक्तविषयत्वमुपपादयितुं परमतं निराकरोति—**अस्य चेति ।** श्लेषस्य चेत्यर्थः । **विविक्तेति ।** वियुक्तेत्यर्थः । अपवादत्वेन असंभवविषयान्तरत्वेन । तद्बाधकतया अलंकारान्तरबाधकतया । तत्प्रतिभोत्पत्तिहेतुत्वमलंकारान्तरप्रतीतिजनकप्रतीतिविषयत्वम् । तथा च प्राथमिकप्रतीतिविषयत्वेन श्ले[3]षस्य व्यपदेश एव, न तु चरमप्रतीतिविषयस्यालंकारान्तरस्य व्यपदेश इति भावः । श्लेषबाध्यानलंकारान्विशिष्य दर्शयति—**इत्थमिति** । तत्र प्रथमं समासोक्त्यादेः श्लेषबाध्यत्वभ्रमं निराकरोति—**समासोक्तीति ।** अस्य श्लेषस्य गन्धोऽपि [3]अल्पप्रसङ्गोऽपि व्यञ्जनयैव तत्र द्वितीयार्थस्य प्रतीतिरिति भावः । ननु श्लिष्टरूपके उभयार्थस्याभिधेयतया श्लेषबाध्यत्वमस्तीत्यत आह—**विद्वदिति ।** विदुषां ज्ञानिनां मानसमेव मानसं सरोविशेषस्तस्य हंस इत्यर्थः । श्लेषगर्भे श्लेषप्रतीतोत्थापिते । उभयार्थत्वेऽपि रूप्यरूपकोभयवाचकत्वेऽपि । श्लेषस्य बाध्यत्वप्रयोजकं संभवद्विषयान्तरत्वं दर्शयति—**सरोरूपस्यैवेति ।** एवकारेण चित्तरूपस्य व्यवच्छेदः (विश्रान्तिधामतया रूपकप्रतीतिपर्यवसानास्पदतया । **प्राधान्यादिति ।**

---

1. **अलंकारेति ।** अलंकारान्तरेभ्यो विविक्तोऽपरामृष्टो विभिन्नो विषयो यस्य तस्य भावस्तत्ता तस्याः । यत्र यत्र श्लेषो वर्तते तत्र तत्रान्योऽपि कश्चिदलंकार इति भावः ॥

2. **विद्वदिति ।** 'विद्वन्मानसहंस वैरिकमलासंकोचदीक्षागुरो दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर । सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो साम्राज्यं वरवीर वत्सरशतं वैरिश्चमुच्चैः क्रियाः ॥' इति संपूर्णः श्लोकः ॥

3. **श्लेषस्येति ।** श्लेषस्येव व्यपदेश इत्यन्वयः ॥

---

१. 'अर्थ' इति नास्ति क-पुस्तके. २. 'विश्राम' घ. ३. 'अल्पप्रसङ्गोऽपि' इति पुस्तकान्तरे नास्ति.

स्यापि समकक्षत्वम् । 'संनिहितबालान्धकारा भास्वन्मूर्तिश्च' इत्यादौ विरोधाभासेऽपि विरुद्धार्थस्य प्रतिभातमात्रस्य प्ररोहाभावान्न श्लेषः । एवं पुनरुक्तवदाभासेऽपि ।

तेन[1] 'येन ध्वस्त—' इत्यादौ प्राकरणिकयोः 'नीतानाम्—' इत्यादावप्राकरणिकयोरेकधर्माभिसंबन्धात्तुल्ययोगितायाम्,

'स्वेच्छोपजातविषयोऽपि न याति वक्तुं
देहीति मार्गणशतैश्च ददाति दुःखम् ।
मोहात्समुत्क्षिपति जीवनमप्यकाण्डे
कष्टं प्रसूनविशिखः प्रभुरल्पबुद्धिः ॥'

इत्यादौ च प्राकरणिकाप्राकरणिकयोरेकधर्माभिसंबन्धाद्दीपके,

अर्थयोः समकक्षत्वाभावोपपादकं समकक्षत्वं परस्परनिरपेक्षतया प्रधानत्वम् । तथा चार्थद्वयस्य समकक्षत्वे श्लेषस्य विषयः संभवति । प्रकृते तूद्देश्यविधेयभावेन गुणप्रधानभावापेक्षितया तुल्यकक्षत्वाद्रूपकेण श्लेषो बाध्यते । अन्यथा श्लिष्टपरम्परितरूपकस्य निर्विषयतापत्तेरिति भावः । नन्वेवमपि विरोधाभासोच्छेदस्तत्र समकक्षार्थद्वयस्याभिधानेन श्लेषस्य निर्बाधप्रसरत्वादित्यत आह—**संनिहितेति** । संनिहितो बालः केश एवान्धकारो यत्र सा, भास्वन्मूर्तिर्देदीप्यमानशरीरा । अथ संनिहितनवीनान्धकारा सूर्यस्वरूपा चेति विरोधः । प्रतिभातमात्रस्य पदार्थस्मृतिविषयस्यैव प्ररोहाभावादयोग्यत्वेन शब्दानुभवाभावात् । तथा चार्थद्वयस्य शब्दानुभवेऽपि श्लेषस्य विषयसंभवादुत्सर्गत्वम् । विरोधाभासस्यायोग्यतया शब्दानुभवाभावेऽपि विषय इत्यपवादत्वमिति भावः । **पुनरुक्तवदाभासेऽपीति** । द्वितीयार्थस्य पुनरुक्ततया शब्दानुभवो न भवतीति भावः । ननु तर्हि के श्लेषबाध्या इत्यपेक्षायामाह—**तेनेति** । समासोक्त्यादौ श्लेषस्य प्रसङ्गाभावादेव बाध्यत्वासंभवेनेत्यर्थः । 'प्राकरणिकयोरित्येकधर्माभिसंबन्धादित्यत्रेणान्वयः । माधवोमाधवयो रक्षणोपयोगित्वेन प्राकरणिकत्वम् । **अप्राकरणिकयोरिति** । पद्ममृगविशेषयोरुपमानत्वेऽप्राकरणिकत्वमिति भावः । तुल्ययोगितायामिति विद्यमानायामपीत्यत्रेणान्वयः । **स्वेच्छेति** । दुर्मतिराजसेवकस्योक्तिरियम् । प्रसूनविशिखः कामः, अल्पबुद्धिश्च प्रभुः । कष्टं कष्टहेतुः । कष्टहेतुत्वमुपपादयति पादत्रयेण—स्वेच्छया उपजाता उपपन्ना विषया उपभोगसाधनद्रव्याणि यस्य सः । न याति विषयान्नानुभवति । गत्यर्थानां ज्ञानार्थत्वात् । मार्गणशतैर्याचकसमूहैर्देहीति वक्तुमर्थात्तेभ्यो दुःखं ददाति । महाबुद्धिस्तु देहीति वचनं विनैव याचकेभ्यो धनं ददातीति भावः । मोहादपराधभ्रमात् समु-

---

1. **तेनेति** । विशेषविषयकालंकारान्तरैः श्लेषस्य बाध्यत्वेनेत्यर्थः ॥

---

१. 'इत्यत्र च' घ. २. 'एकधर्माभिधानसंभवात्' क.

'सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिव ।'

इत्यादौ चोपमायां विद्यमानायामपि श्लेषस्यैतद्विषयपरिहारेणासंभवाद् एषां च श्लेषविषयपरिहारेणापि स्थितेरेतद्विषये श्लेषस्य प्राधान्येन चमत्कारित्वप्रतीतेश्च श्लेषेणैव व्यपदेशो भवितुं युक्तः । अन्यथा तद्व्यपदेशस्य सर्वथाभावप्रसङ्गाच्चेति ।

अत्रोच्यते—न तावत्परमार्थतः श्लेषस्यालंकारान्तराविविक्तविषयता 'येन ध्वस्त—' इत्यादिना विविक्तविषयत्वात् । न चात्र तुल्ययोगिता, तस्याश्च द्वयोरप्यर्थयोर्वाच्यत्वनियमाभावात् । अत्र च माधवोमाधवयोरेकस्य वाच्यत्वनियमे परस्य व्यङ्ग्यत्वं स्यात् ।

किं च तुल्ययोगितायामप्येकस्यैव धर्मस्यानेकधर्मिसंबन्धितया प्रतीतिः । इह त्वनेकेषां धर्मिणां पृथक्पृथग्धर्मसंबन्धतया । 'सकलक-

---

क्षिपति हरति । अकाण्डे अकाले । कामपक्षे—स्वेच्छं यथेष्टमुपजाताः संभवन्तो विषया लक्ष्याणि यस्य सः । देहीति शरीरीति वक्तुं योग्यतां न याति न प्राप्नोति । मार्गणशतैः शरसमूहैः मोहान्मोहं विधाय । अशरीरोऽपि संभवद्बहुलक्ष्योऽपि कस्मैचिन्मार्गणशतैर्दुःखं ददाति । लक्ष्येषु विभज्य यदि शरान् क्षिपेत्तदा एकस्य वेधने शर शतासंभवाद्दुःखातिशयो न भवतीति भावः । अत्र स्मरस्योपमानत्वेनाप्राकरणिकत्वम्, राज्ञ उपमेयत्वेन प्राकरणिकत्वम् । **दीपके इति** । विद्यमानेऽपीति लिङ्गविपरिणामेनान्वयः । सकलकलं कोलाहलसहितम् । अथ च सकला समग्रा कला यस्य तादृशम् । **एतद्विषयेति** । तुल्ययोगितादिविषयेत्यर्थः । एषां तुल्ययोगितादीनाम् । अन्यथा एतद्विषये श्लेषानङ्गीकारे । एतन्मते दोषं प्रदर्श्य सिद्धान्तमाह—**अत्रोच्यत इति** । विविक्तविषयत्वाद् अलंकारान्तरपृथक्कृतविषयत्वात् । अत्र 'येन ध्वस्त—' इत्यादिश्लेषविषये । तस्यास्तुल्ययोगितायाः । एतद्दीपकस्याप्युपलक्षणम् । अर्थयोर्वाक्यार्थयोः । **वाच्यत्वनियमाभावादिति** । एकस्य वाच्यत्वनियमादिति तात्पर्यार्थः । न च 'रक्ताः स्वभावमधुरा वहन्त्यो रागमुल्बणम् । दशो दूत्यश्च कर्षन्ति कान्ताभिः प्रेषिताः प्रियम् ॥' इत्यादौ तुल्ययोगितायां द्वितीयार्थस्यापि वाच्यत्वेन कथमेकस्यैव वाच्यत्वमिति वाच्यम् । ये तु 'दुर्गालङ्घितविग्रहः—' इत्यादौ पदपरावृत्त्या द्वितीयार्थस्यापि वाच्यत्वमङ्गीकुर्वन्ति, तेषां मत इत्यर्थः । **अत्र चेति** । 'येन ध्वस्त—' इत्यादौ तुल्ययोगितानुरोधेनैकस्य वाच्यत्वनियमो वाच्यस्तथा सत्यपरस्य व्यङ्ग्यत्वापत्त्या श्लेषस्य विषयो न स्यादिति भावः । ननु पदपरावृत्तिपक्षे द्वयोरप्यर्थयोर्वाच्यत्वमत आह—**किं चेति** । इह तु श्लेषे तु । पृथक्पृथग्धर्मसंबन्धितया प्रतीतिरित्यन्वयः । अलंकाराणां यो यत्प्रतीतिजन्यप्रतीतिविषयः स तद्वाध्य इति नियमाभिप्रायेण श्लेषस्य बाध्यत्वमुपमायां प्रसह्य निषेधयति । **सकलकलमित्यादौ**

१. 'इह तु' क-ख. २. 'संबद्धतया' घ. ३. 'संबद्धतया' घ.

लम्–' इत्यादौ च नोपमाप्रतिभोत्पत्तिहेतुः श्लेषः । पूर्णोपमाया निर्विषयत्वापत्तेः । '[1]कमलमिव मुखं मनोज्ञमेतत्' इत्याद्यस्ति पूर्णोपमायाविषय इति चेत्, न । यदि 'सकल–' इत्यादौ शब्दश्लेषतया नोपमा तत्किमपराद्धं '[2]मनोज्ञम्' इत्यादावर्थश्लेषेण ।

'स्फुटमर्थालंकारावेतावुपमासमुच्चयौ, किं तु ।
आश्रित्य शब्दमात्रं सामान्यमिहापि संभवतः ॥'

इति [3]रुद्रटोक्तदिशा गुणक्रियासाम्यवच्छब्दसाम्यस्याप्युपमाप्रयोजकत्वात् । ननु गुणक्रियासाम्यस्यैवोपमाप्रयोजकता युक्ता, तत्र साधर्म्यस्य वास्तवत्वात् । शब्दसाम्यस्य तु न तथा, तत्र साधर्म्यस्यावास्तवत्वात् । ततश्च[4] पूर्णोपमाया अन्यथा[5]नुपपत्त्या गुणक्रियासाम्यस्यैवार्थश्लेषविषयत-

---

चेति । श्लेषेणोपमाबाधक इति भावः । तत्तदा । शब्दमात्रं सामान्यमाश्रित्यापीहालंकारमध्ये संभवत इत्यन्वयः । यद्यपि 'सकलकलम्–' इत्यादावेकप्रयत्नेन शब्दद्वयोत्पत्त्या शब्दस्याप्येकत्वं न संभवति, तथाप्येकानुपूर्व्यवच्छिन्नत्वेन शब्दयोरेकत्वप्रतिभास इति भावः । समुच्चयालंकारे एकधर्माभिसंबन्धस्य निवेशाभावात्तत्समुच्चयपदमत्र तुल्ययोगितापरं दीपकपरं च तयोस्तत्संभवात् । नन्वेवं 'किं च तुल्ययोगितायाम्–' इत्यादिना श्लेषतुल्ययोगितयोर्यो विषयविभागः कृतः स न संगच्छते 'येन ध्वस्त–' इत्यादावपि शब्दरूपैकधर्मसंबन्धस्य सत्त्वेन तुल्ययोगिताया विषयसंभवादिति चेत्, सत्यम् । यत्रानेकस्यैकधर्मसंबन्धावगमे द्विवचनबहुवचनचकाराद्यपेक्षा तत्रैव दीपकतुल्ययोगितयोर्विषयः । 'येन ध्वस्त–'इत्यादौ तु द्विवचनाद्यपेक्षाविरहेण तुल्ययोगितायाः विषय एव नास्ति । ययोरेकधर्मसंबन्धस्तयोरनेकप्रयत्नोच्चार्यपदवाच्यत्वं दीपकतुल्ययोगितालक्षणे निवेशनीयमतो नातिप्रसङ्गः । एवं च 'स्वेच्छोपजातविषयोऽपि–' इत्यादिदीपकस्य 'किरणा हरिणाङ्कस्य–' इत्यादि 'विकसन्नेत्रनीलाब्जे–' इत्यादि च तुल्ययोगितायाश्च विषय इति ध्येयम् । गुणक्रियासाम्यवद्गुणक्रियासाम्यस्येव । तत्र गुणक्रियासाम्यप्रयुक्तोपमायाम् । वास्तवत्वाद् वस्तुसमवेतत्वात् । न तथा नोपमाप्रयोजकता । तत्र शब्दसाम्यप्रयुक्तोपमायाम् । साधर्म्यस्य शब्दरूपसामान्यस्य धर्मस्य । अवास्तवत्वाद् उपमानोपमेयरूपवस्तुनोऽसम-

---

1. **कमलेति** । 'कमलमिव मुखं मनोज्ञमेतत्कचतितराम्' इत्यत्र मनोज्ञत्वलक्षणस्य गुणस्य, प्रकाशलक्षणायाः क्रियायाः, गुणक्रिययोर्वा साम्यात्पूर्णोपमाविषयोऽस्तीत्यर्थः ॥

2. **मनोज्ञमिति** । मनोज्ञत्वस्योपमानोपमेयभूतयोः कमलमुखयोर्भेदेन क्लिष्टत्वादर्थश्लेष इत्यर्थः ॥

---

१. 'रुद्रमोक्त' क. २. 'च' इति नास्ति घ-पुस्तके. ३. 'उपपत्तेः' घ. ४. 'विषयता' घ. ५. 'यत्र धर्मिणोर्भिन्नप्रयत्नोच्चार्यशब्दबोध्यतायां द्विवचनचकाराद्यपेक्षा' इति मुद्रितपुस्तके. ६. 'एवं च पूर्वोक्तनिरूपणे च सतीत्यर्थः' इति मुद्रितपुस्तके पाठः. ७. 'अत्र' इति मुद्रितपुस्तके.

ग परित्यागे पूर्णोपमाविषयतायुक्ता, ननु 'सकल–' इत्यादौ शब्दसाम्यस्यैवेति चेत्, न । 'साधर्म्यमुपमा' इत्येवाविशिष्टस्योपमालक्षणस्य शब्दसाम्याद्व्यावृत्तेरभावात् । यदि च शब्दसाम्ये साधर्म्यमवास्तवत्वान्नोपमाप्रयोजकम्, तदा कथं 'विद्वन्मानस–' इत्यादावाधारभूते चित्तादौ सरोवराद्याधारोपो राजादेर्हंसाद्याधारोपप्रयोजकः[1] ।

किंच यदि वास्तवसाम्य एवोपमाङ्गीकार्या[2], कथं त्वयापि 'सकलकल–' इत्यादौ बाध्यभूतोपमाङ्गीक्रियते[3] । किं चात्र श्लेषस्यैव साम्यनिर्वाहकता, न तु साम्यस्य श्लेषनिर्वाहकता । श्लेषबन्धतः प्रथमं साम्यस्य संभवात् । इत्युपमाया एवाङ्गित्वेन व्यपदेशो ज्यायान् 'प्रधानेन हि[4] व्यपदेशा भवन्ति' इति न्यायात्[5] ।

ननु शब्दालंकारविषयेऽङ्गाङ्गिभावसंकरो नाङ्गीक्रियते तत्कथमत्र श्लेषोपमयोरङ्गाङ्गिभावः संकर इति चेत्, न । अर्थानुसंधानविरहिण्यनुप्रासादावेव तथानङ्गीकारात् । एवं दीपकादावपि ज्ञेयम् ।

'सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः ।
निपतन्ति धार्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥'

वेतत्वात् । ततश्च शब्दसाम्यस्योपमाप्रयोजकत्वायोगाच्च । अविशिष्टस्य वास्तवत्वरूपविशेषरहितस्य । उपमालक्षणस्य काव्यप्रकाशाद्युक्तस्य । तथा च येन केनापि संबन्धेनोपमानोपमेयवृत्तिधर्म उपमा, न तु समवायसंबन्धेनेति नियमः । शब्दस्योपस्थाप्यत्वसंबन्धेनोपमानोपमेयवृत्तित्वेनोपमाप्रयोजकत्वमक्षतमिति भावः । उपमानोपमेययोरभेदप्रतीतिरूपकमित्यभिप्रायेणाह—**यदि चेति** । आधारभूते विषयरूपे । ननु श्लिष्टपदनिबन्धनपरम्परितरूपकान्यथानुपपत्त्या तत्र तथा कल्पनीयम्, न तूपमायामित्यत आह—**किं चेति । कथमिति** । तदेति शेषः । श्लेषस्यालंकारान्तरप्रतीतोत्पत्तिहेतुत्वेन तेनैव व्यपदेश इति यदुक्तं तदूषयति—**किं चात्रेति** । अङ्गित्वेन साध्यतया प्रधानत्वेन । तथा च श्लेषस्य प्रथमोपस्थितत्वेऽपि साधनत्वेनाप्रधानतया तेन व्यपदेशो नोचित इति भावः । तथानङ्गीकारात् अङ्गाङ्गिभावसंकरानङ्गीकारात् । श्लेषस्य शब्दालंकारत्वेऽप्यर्थानुसंधानसापेक्षत्वादुपमाङ्गत्वमक्षतमिति भावः । **एवमिति** । यथा एकशब्दत्वेनोपमां स्वीकृत्य तस्या एव प्राधान्यव्यपदेशस्तथा दीपकादावपीत्यर्थः । आदिपदात्तुल्ययोगितापरिग्रहः । 'सत्पक्षाः–' इत्यादौ केचिदुपमाध्वनिं केचिच्च श्लेषं स्वीकुर्वन्ति, तदुभयमपि नोचितमित्याह—**सत्पक्षा इति** ।

---

१. 'हंसाद्याधारोपरूपकः' इति घ. २. 'अङ्गीकर्तव्या' क; 'तदा' इत्यधिकं घ-पुस्तके. ३. 'अङ्गीकर्तव्या' क. ४. 'हि' इति नास्ति घ-पुस्तके. ५. 'इत्युक्तनयात्' घ.

अत्र शरद्वर्णनया प्रकरणेन धार्तराष्ट्रादिशब्दानां हंसाद्यर्थाभिधाने नियमनाद्व्युर्थोधनादिरूपोऽर्थः शब्दशक्तिमूलो वस्तुध्वनिः । इह च प्रकृतप्रबन्धाभिधेयस्य द्वितीयार्थस्य सूच्यतयैव विवक्षितत्वादुपमानोपमेयभावो न विवक्षित इति नोपमाध्वनिर्न वा श्लेष इति सर्वमवदातम् ।

पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ।

आदिशब्दात्खड्ग-मुरज-चक्र-गोमूत्रिकादयः । अस्य च तथाविधलिपिसंनिवेशविशेषवशेन[1] चमत्कारविधायिनामपि[2] वर्णानां तथाविधश्रोत्राकाशसमवायविशेषवशेन चमत्कारविधायिभिर्वर्णैरभेदेनोपचाराच्छब्दालंकारत्वम् । [3]तत्र पद्मबन्धो यथा मम—

'मारमासुषमा चारुरुचा मारवधूत्तमा ।
मात्तधूर्ततमावासा सा वामा मेऽस्तु मा रमा ॥'

सन्तः पक्षाः पत्राणि येषां ते । प्रसाधिताशा अलंकृतदिशः । मदेन शरत्कालकृतचित्तविकारविशेषेण उद्धत आरम्भ आरवो येषाम् । 'रभि शब्दे' इत्यस्य रूपम् । धार्तराष्ट्रा हंसविशेषाः । कालवशात् शरत्कालवशात् । वर्षासु हंसा मानसे सरसि तिष्ठन्ति, शरदि पृथिवीमागच्छन्तीति प्रसिद्धिः । पक्षे—सत्पक्षाः उत्तमसहायाश्च ते अमधुरगिरश्चेति समासः । प्रसाधिताशा वशीकृतदिशः । यद्वा प्रकृष्टं साधिता आशाः स्वेच्छाविषया यैः । अथवा प्रसाधिता धृता आशा जयेच्छा यैस्ते । मदेन गर्वेण उद्धता आरम्भा युद्धाद्याडम्बरा येषां ते । धार्तराष्ट्राः धृतराष्ट्रपुत्राः । कालवशान्मृत्युकालवशात् । नियमनान्नियन्त्रणात् । ध्वनिर्व्यङ्ग्यः । **नवाश्लेष इति** । प्रकरणनियमेन द्वितीयार्थस्यानभिधेयत्वादिति हेतुरत्र द्रष्टव्यः । चित्राख्यालंकारमनेकविधमाह—**पद्मादीति** । पद्माद्याकारवर्णस्तोमजनकत्व इत्यर्थः । **गोमूत्रिकादय इति** । आदिपदेन काकपद्यादयो ग्राह्याः । ननु श्रोत्रसंबन्धानां जन्यवर्णानां पद्माद्याकारजनकत्वरूपचित्रालंकाराभावात्कथमस्य शब्दालंकारत्वमतस्तदुपपादयति—**अस्य चेति** । चित्रालंकारस्येत्यर्थः । तथाविधस्य पद्मादिसदृशस्य लिपीनां वर्णसंस्थानानां संनिवेशविशेषस्य रचनाविशेषस्य वशेन चमत्कारविधायिनां वक्तृविस्मयकारिणां वर्णानां तथाविधः श्रोत्राकाशसमवायविशेषः कर्णरन्ध्रसंबन्धविशेषः तद्वशेन चमत्कारविधायिभिः श्रोतृविस्मयकारिभिः । एवं च पद्माद्याकारलिपिसंनिवेशविशेषमालोक्य वक्त्रा ये वर्णा उच्चार्यन्ते तैरेव श्रोतृणां श्रोत्रे पद्माद्याकारवर्णस्तोमो जन्यते । कार्यकारणयोर्भेदोपचारेण जन्यवर्णानामपि चित्रालंकारसंभव इति भावः । **मारमेति** । सा वामा मनोरमा स्त्री मे ममास्तु । रमा मास्तु ।

---

१. 'लिपिसंनिवेशेन' क. २. 'चमत्कार—' इत्यादिः 'वशेन' इत्यन्तः पाठः क-पुस्तके नास्ति. ३. 'अत्र' क.

एषोऽष्टदलपद्मबन्धो दिग्दलेषु निर्गमप्रवेश्याभ्यां श्लिष्टवर्णः, किंतु

कीदृशी । मारमासुषमा मारस्य कामस्य मा लक्ष्मीः सेव सुषमा परमा शोभा यस्याः सा । चारुरुचा मनोरमकान्त्या मारवध्वा रतेरप्युत्तमा । मात्तधूर्ततमावासा अगृहीतधूर्ततमगृहा । श्लिष्टवर्णः अनुलोमप्रतिलोमपाठेनैकरूपाक्षरः । अन्यथा क्वचित्प्रवेशः क्वचिन्निर्गम इत्यपि श्लिष्टवर्ण एव । अत्राष्टसु दिक्षु विततान्यष्टदलं पद्मं लेख्यम्, तत्कर्णिकायां श्लोकस्य प्रथममक्षरं लेख्यम्, ततः पूर्वादिदलेषु प्रदक्षिणक्रमेण द्वौ द्वौ वर्णौ लेख्यौ । एवं सप्तदशभिरक्षरैः पद्मं भवति । तत्र कर्णिकास्थवर्णोपक्रमेण प्राच्यदले निर्गमेनाग्नेयदले प्रवेशेन दक्षिणदले निर्गमप्रवेशाभ्यां नैर्ऋतदले निर्गमेन पश्चिमदले निर्गमप्रवेशाभ्यां वायव्यदले प्रवेशेन उत्तरदले निर्गमप्रवेशाभ्यां ईशानदले निर्गमेन प्राच्यदले पश्चात्प्रवेशेन श्लोकः पाठ्यः । तदुक्तम्—'वर्णद्वयेन चैकैकं दलभूतदलाष्टकम् । सर्वोत्तरादवर्णेन पद्मं स्यात्कृतकर्णिकम् ॥' इति । खड्गबन्धो यथा—'मारारिशंकरामेभमुखैरासाररंहसा । सारारब्धस्तवा, नित्यं तदार्तिहरणक्षमा ॥ माता नतानां, संघट्टः श्रियां, बाधितसंभ्रमा । मान्याथ, सीमा रामाणां, शं मे दिश्यादुमाद्रिजा ॥' अस्यार्थः—उमा अद्रिजा मे मह्यं शं कल्याणं दिश्यात् दद्यात् । कीदृशी । मारारिः शिवश्च, शक्रश्च, रामश्च, इभमुखो गणेशश्च, तैरासाररंहसा वृष्टिकणरीत्या नित्यमारब्धस्तवा । पुनः कीदृशी । सारा श्रेष्ठा । तेषां स्तुवतां शिवादीनां आर्तेः पीडायाः हरणे क्षमा । नतानां प्रणतानां माता मातेव पालयित्री । श्रियां संपदां संघट्टः संमेलनस्थानम् । बाधितसंभ्रमा निरुद्वेगा, सम्यग्भ्रमरहिता । रामाणां नारीणां पराकाष्ठा । 'अद्रिजा' इत्यत्र 'आदिजा' इति पाठे आद्येत्यर्थः । अनेन श्लोकद्वयेन खड्गबन्धः प्रस्तीर्यते । तत्र मुष्टेरुपर्यधः शाखाद्वयम् । उपरि शाखाचतुष्पथे प्राथमिक 'मा' कारं विन्यस्य तिर्यगधःक्रमेण 'रारि–' इत्यादि 'द्र' कारान्तांश्चतुर्दश वर्णान्न्यसेदित्येका धारा । ततः खड्गशिखायां 'सा' इति श्लिष्टम् । ततस्तिर्यगूर्ध्वक्रमेण 'रारब्ध–' इत्यादिवर्णचतुर्दशकं विन्यस्यापरां धारां कुर्यात् । इत्येषा पट्टिका । 'मा' कारः पूर्वं 'मा' कारं प्रविष्टः । एवमग्रेऽपि तत्रैव प्रविष्टं कल्पयित्वा दक्षिणशाखायां 'ता' इत्यादिवर्णसप्तकं विन्यस्य वामशाखायां तिर्यग्विलोमेन 'श्रि' कारादिवर्णसप्तकं लिखेत् । 'मा' कारचतुष्पथे प्राथमिक 'मा' कारं प्रविष्टः । ततस्तमेव 'मा' कारमारभ्याधोऽधो 'न्याथसी' इति त्रयो वर्णा मुष्टौ लेख्याः । ततोऽधश्चतुष्पथमध्ये तदन्तिम-'मा'कारं विन्यस्य तद्दक्षिणशाखायां 'रामाणां शं' इति चतुरो वर्णान्विन्यस्येत् । ततो वामशाखायां विलोमेन 'मे दिश्यादु' इति चतुरो वर्णाल्लिखेत् । 'मा' कारोऽधश्चतुष्पथस्थ 'मा' कारं प्रविष्टः । ततो मुष्टेरधः त्सरुके 'द्विजा' इति 'दिजा' इति वा वर्णद्वयं लेख्यमिति खड्गनिष्पत्तिः । मुरजबन्धो यथा—'सा सेनागमनारम्भे रसेनासीदनारता । तारनादजना मत्तधीरनागमनामया ॥' अत्र पङ्क्तिचतुष्टयेन लिखितस्य पादचतुष्टयस्याधः क्रमेण यथाक्रमं प्रथमद्वितीयतृतीयचतुर्थानूर्ध्वक्रमेण पञ्चमषष्ठसप्तमाष्टमान्वर्णान्गृहीत्वा प्रथमः पादः । द्वितीयात्प्रथमं प्रथमाद्वितीयतृतीयौ

---

1. मत्तेति । मत्तधीरनागमिति क्रियाविशेषणम् ॥

विदिग्दलेष्वन्यथा, कर्णिकाक्षरं तु श्लिष्टमेव । एवं खड्गबन्धादिकमप्यूह्यम् । [1]काव्यान्तर्गडुभूततया तु नेह प्रपञ्च्यते ।

[2]रसस्य परिपन्थित्वान्नालंकारः प्रहेलिका ॥ १३ ॥

उक्तिवैचित्र्यमात्रं सा च्युतदत्ताक्षरादिका ।

च्युताक्षरा-दत्ताक्षरा-च्युतदत्ताक्षरा च । [3]उदाहरणम्—

'कूजन्ति कोकिलाः साले यौवने फुल्लमम्बुजम् ।
किं करोतु कुरङ्गाक्षी वदनेन निपीडिता ॥'

द्वितीयाच्चतुर्थपञ्चमौ प्रथमात्षष्ठसप्तमौ द्वितीयादष्टमं गृहीत्वा द्वितीयः पादः । तृतीयात्प्रथमं तुर्याद् द्वितीयतृतीयौ तृतीयात्तुर्यपञ्चमौ तुर्यात्षष्ठसप्तमौ तृतीयादष्टमं गृहीत्वा तृतीयः पादः । पादचतुष्टयस्योर्ध्वक्रमेण प्रथमद्वितीयतृतीयचतुर्थानधः क्रमेण पञ्चमषष्ठसप्तमाष्टमान्गृहीत्वा चतुर्थः पादः पाठ्य एवं मुरजसिद्धिः । चक्रबन्धो विदग्धमुखमण्डने, गोमूत्रिकाबन्धो दण्डिनि ज्ञेयः । एवमन्येऽपि मुसल-शूल-शक्ति-हल-चतुरङ्ग-पीठ-रथ-तुरग-गज-पाठ्यादयो बोध्याः । एवं वर्णानामनुलोमप्रतिलोमपाठादिना एकरूपपदोच्चयहेतुत्वेऽपि सर्वतोभद्रादिनामकश्चित्रालंकारो वेदितव्यः । काव्यस्यान्तर्गडुभूततया अन्तर्गडुवदकिंचित्करत्वेन । इह काव्यालंकारविचारप्रकरणे । दण्ड्यादिभिरुक्तं प्रहेलिकायामलंकारत्वं दूषयति—**रसस्येति** । रसबोधस्येत्यर्थः । परिपन्थित्वाद्विलम्बकत्वात् । तथा च प्रत्युत दोषलक्षणाक्रान्ततया प्रहेलिकाकाव्ये नोपादेयेति भावः । ननु तर्हि प्राचीनैः किमित्यलंकारप्रकरणे प्रहेलिका प्रपञ्चितेत्यत आह—**उक्तीति** । वैचित्र्यमात्रं वैचित्र्यमात्रप्रयोजकम् । तथा च वैचित्र्यमात्रप्रयोजकत्वेनालंकारसाम्यात्तत्रालंकारपदप्रयोगो गौण एवेति

---

1. **काव्यान्तरिति** । गडुर्ग्रन्थिरिति सांप्रदायिकाः । यथेक्षुचर्वणदशायां ग्रन्थी रसव्यवधायकस्तथैव काव्ये चित्रादीति परमार्थः ॥

2. **रसस्येति** । अत एव भोजराजेनाप्युक्तम्—'प्रहेलिका सकृत्प्रश्नः सापि षोढा च्युताक्षरा । दत्ताक्षरोभयं मुष्टिर्बिन्दुमत्यर्थवत्यपि ॥ क्रीडागोष्ठीविनोदेषु तज्ज्ञैराकीर्णमन्त्रणे । परव्यामोहने चापि सोपयोगाः प्रहेलिकाः ॥' इति । एवमन्तःप्रश्न-बहिःप्रश्न-बहिरन्तःप्रश्न-जातिप्रश्न-पृष्टप्रश्न-उत्तरप्रश्न-प्रभृतयोऽपि क्रीडामात्रोपयोगिनः । एतेषां बन्धविशेषाणां प्रपञ्चः सरस्वतीकण्ठाभरण-काव्यालंकारादौ द्रष्टव्यः ॥

3. **उदाहरणमिति** । यथा वा—'तदा क्षणेन वीर्यस्य समदः सहितः पदम् । रेजे स्तुतनयः साक्षान्नयवेदी क्षतामतः ॥' अत्र यथेष्टाभ्यां मात्रापहारदानाभ्यां श्लोकद्वयमुत्पद्यते—'तदाक्षणेन वर्यस्य समिदः सहतः पदम् । रेजेऽस्ततनयः साक्षान्नयवेदे क्षतामतिः ॥ तदेक्षणेन वर्यस्य सामदः सहतिः पदम् । रेजे स्तुतिनयः साक्षान्नयवादोक्षितामृतः ॥'

---

१. मुद्रितपुस्तके तु 'काव्यान्तर' इत्यादिगद्यं 'काव्यान्तर्गडुभूता या सा तु नेह प्रपञ्च्यते' इति श्लोकरूपं नीतम्. २. 'वैचित्र्यमात्रप्रयोजिका, न तु रसाद्युपकारिका' इति मुद्रितपुस्तके.

तत्र 'रसाले' इति वक्तव्ये 'साले' इति 'र' च्युतः। 'वने' इत्यत्र 'यौवने' इति 'यौ' दत्तः। 'वदनेन' इत्यत्र 'मदनेन' इति 'म' च्युतः 'व' दत्तः। आदिशब्दात्क्रियाकारकगुप्त्यादयः। तत्र क्रियागुप्तिर्यथा—[1]

'पाण्डवानां सभामध्ये दुर्योधन उपागतः।
तस्मै गां च सुवर्णं च सर्वाण्याभरणानि च ॥'

अत्र 'दुर्योधनः' इत्यत्र 'अदुर्योऽधनः' इति। 'अदुः' इति क्रिया गुप्तिः। एवमन्यत्रापि।

अथावसरप्राप्तेष्वर्थालंकारेषु प्राधान्यात्सादृश्यमूलेषु लक्षितव्येषु तेषामप्युपजीव्यत्वेन[2] प्रथमम्[3] उपमामाह—

भावः। **वन इति**। वक्तव्य इत्यन्वयः। **एवमिति**। कारकसंबोधनगुप्त्यादावप्येवमुदाहार्यमित्यर्थः। तत्र 'दुर्योधन उपागतः' इत्यत्र 'योऽधन उपागतः' इति कर्तृपदं गुप्तम्। यथा वा—'ब्राह्मणेभ्यो नदीतीरे वस्त्राण्याभरणानि च। ददाति गां हिरण्यं च वसुधां च द्रुतं व्रज ॥' अत्र 'ब्राह्मण' इति संबोधनपदम्, 'इभ्यः' इति कर्तृपदम्, संप्रदानभ्रमजनकत्वाद् गुप्तम्। एवमेकद्वित्रिचतुःस्वरनियमोऽप्युक्तिवैचित्र्यमेव। क्रमेण यथा—'करपद्मलसच्चकनकप्रस्तगजग्रह। भक्तभव्यभरव्यम्य मम व्यसनमर्दय ॥', 'श्रीदीप्ती ह्रीकीर्ती धीनीती गीःप्रीती। एधेते द्वे द्वे ते ये नेमे देवेशे ॥' 'क्षितिविजितिस्थितिविहितित्रतरतयः परगतयः। उरु रुरुधुर्गुरु दुधुवुर्युधि कुरवः स्वमरिकुलम् ॥', 'आम्नायानामाहान्त्या वाग्गीतीरीतीः प्रीतीर्भीतीः। भोगो रोगो मोदो मोहो ध्येये धेच्छे देशे क्षेमे ॥' एवमेकादिचतुष्पर्यन्तवर्णस्थाननियमानामुदाहरणानि दण्डिनि द्रष्टव्यानि। अर्थालंकारान्निरूपयितुमुपमानिरूपणस्य प्राथमिकत्वे हेतुमाह—**अथेति**। शब्दालंकारनिरूपणानन्तरमित्यर्थः। अवसरप्राप्त्या अवसरसंगत्या निरूपणयोग्येषु अर्थालंकारेषु मध्ये सादृश्यमूलेषु सादृश्यप्रतिभोत्थापितेषु स्मरणादिषु लक्षितव्येषु निरूपणीयेषु तेषां सादृश्यमूलालंकाराणामुपजीव्यत्वेन उत्थापकत्वेन प्राधान्यात्प्रथममुपमां निरूपयतीत्यर्थः। एवं च हेतुता-

---

वर्यस्य प्रार्थनीयस्य पदम्। ततः सर्वं लभ्यत इत्यर्थः। समशब्दः सर्वपर्यायः। सममस्ति येषां ते समिनः सर्वेश्वरा दैत्यास्तान्यति खण्डयति यः। सहतः सहिष्णोः पदम्। अस्तस्यक्तस्तनयोऽन्धको येन। अन्धकस्य तत्पुत्रत्वात्। नयस्य वेदे ज्ञाने सति क्षतामतिर्निहतकुबुद्धिः। अथवैवं विपर्ययः—ईक्षणेन वर्यस्य पदं दर्शनमात्रेणाभीष्टप्रदः। सहतिः सह शत्रुहिंसया वर्तते। स्तुतिर्नयो यस्य। नयवादेनोक्षितं सिक्तं स्तुतमभूतं येन सः॥

1. **क्रियेति**। क्रियाकारकगुप्तादीनां विशेषोदाहरणानि मदीयमित्र-पण्डित-काशिनाथ-पाण्डुरङ्ग-परब-संकलिते सुभाषितरत्नभाण्डागारे द्रष्टव्यानि॥

---

१. 'उपजीव्यत्वात्' क. २. 'प्रथम' इति नास्ति क-ख-पुस्तकयोः. ३. 'उपमालंकारं' घ.

[1]साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः ॥ १४ ॥

संगतिर्दर्शिता । **साम्यमिति** । वाक्यस्यैकत्वे सति द्वयोः साम्यमुपमेत्यन्वयः । साम्यं साधर्म्यं गुणक्रियादिरूपम् । वाच्यमभिधया बोध्यम् । अवैधर्म्यं विरुद्धधर्मोक्तिशून्यम् । वैधर्म्याविषयकैक्यवाक्यविषयत्वे सतीवादिवाच्यमुभयसंबन्धि-

1. **साम्यमिति** । साम्यं सादृश्यं साधर्म्यमित्यनर्थान्तरम् । अत्रेदमनुसंधेयम्—उपमायामुपमानमुपमेयं साधारणो धर्मः साधर्म्यं चेति चत्वारः पदार्थाः । तत्र साधारणधर्मवत्त्वेन प्रसिद्धः पदार्थ उपमानम्, तद्धर्मवत्तया कविसंरम्भगोचर उपमेयम् । 'उत्कृष्टगुणवत्तया संभाव्यमानमुपमानम्, अपकृष्टगुणवत्तया संभाव्यमानमुपमेयम्' इति केचित् । 'सादृश्यप्रतियोगि उपमानम्, सादृश्यानुयोगि उपमेयम्' इत्यन्ये । उपमानोपमेययोः संगतो धर्मः साधारण इत्युच्यते । यस्य धर्मस्य संबन्धाद्येन सह यदुपमीयते स साधारणधर्मः तदुपमानं तच्चोपमेयमिति तत्त्वम् । यथा—'कमलमिव मुखं मनोज्ञमेतत्' इत्यादौ मनोज्ञत्वधर्मसंबन्धात्तद्वत्तया प्रसिद्धेन कमलेन सह मुखमुपमीयत इति मनोज्ञत्वं साधारणो धर्मः कमलमुपमानं मुखमुपमेयमित्युपमालंकारः । अत्र सर्वत्रेवादिपदादेरिव यथादिपदादपि सादृश्यावगमने पर्यायपरिवृत्तिसहत्वादुपमादीनामर्थालंकारत्वम् । इयमुपमा तत्तदुक्तिवैचित्र्येण नानालंकारभावमवगाहते । तथाहि—'चन्द्र इव मुखं मुखमिव चन्द्रः' इत्युपमेयोपमा । 'मुखं मुखमिव' इत्यनन्वयः । 'मुखमिव चन्द्रः' इति प्रतीपम् । 'चन्द्रं दृष्ट्वा मुखं स्मरामि' इति स्मरणम् । 'मुखमेव चन्द्रः' इति रूपकम् । 'मुखचन्द्रेण तापः शाम्यति' इति परिणामः । 'किमिदं मुखमुताहो चन्द्रः' इति संदेहः । 'चन्द्र इति चकोरास्त्वन्मुखमनुधावन्ति' इति भ्रान्तिमान् । 'चन्द्र इति चकोराः कमलमिति चञ्चरीकास्त्वन्मुखे रज्यन्ति' इत्युल्लेखः । 'चन्द्रोऽयं न मुखम्' इत्यपह्नवः । 'नूनं चन्द्रः' इत्युत्प्रेक्षा । 'चन्द्रोऽयम्' इत्यतिशयोक्तिः । 'मुखेन चन्द्रकमले निर्जिते' इति तुल्ययोगिता । 'निशि चन्द्रस्त्वन्मुखं च हृष्यति' इति दीपकम् । 'त्वन्मुख एवाहं रज्यामि चन्द्र एव चकोरो रज्यते' इति प्रतिवस्तूपमा । 'दिवि चन्द्रो भुवि त्वन्मुखम्' इति दृष्टान्तः । 'मुखं चन्द्रश्रियं बिभर्ति' इति निदर्शना । 'निष्कलङ्कं मुखं चन्द्रादतिरिच्यते' इति व्यतिरेकः । 'त्वन्मुखेन समं चन्द्रो निशासु हृष्यति' इति सहोक्तिः । 'मुखस्य पुरतश्चन्द्रो निष्प्रभः' इत्यप्रस्तुतप्रशंसा । 'मुखं नेत्राङ्कमनीयं स्मितज्योत्स्नाहारि' इति समासोक्तिः । एवं विविधभूमिकामासादयन्ती कविकर्मरङ्गे नृत्यन्ती उपमानर्तकी सहृदयहृदयान्यावर्जयतीति तत्प्राङ्निरूपणे बीजम् । प्रसङ्गात्तद्घटकसादृश्यस्य प्रतियोग्यनुयोगिनावुच्येते—'चन्द्रकलाम्बुजदामशिरीषं विद्युत्तारा कनकलता च । दमनककाञ्चनयष्टी दीपः सर्वैरेभिर्योषा वर्ण्या ॥' 'रोचनास्वर्णविद्युद्भिर्हरिद्राभिर्वराटकैः । चम्पकैर्हेमकेतक्या वर्ण्यते तत्तनोर्द्युतिः ॥' वराटकः प्रत्यग्रपद्मबीजम् । 'वेत्रवत्या तुल्यरुचां वधूनां कर्णान्ततो गण्डतलागतानि । भृङ्गाः सलीलं यदि नापतिष्यन्कोऽवेदयिष्यन्नवपङ्कजानि ॥', 'काश्मीरगौरवपुषामभिसारिकाणाम्—' इत्यादिप्रयोगदर्शनात्तत्साम्यमप्यवसेयम् । 'तमःशैवालजीमूतबर्हभ्रमरचामरैः । यमुनावीचिनीलाश्मनीलाम्भोजैः समः कचः ॥', 'ललाटमर्धचन्द्रेण हेमपट्टिकया तथा । वल्लीसरधनुर्वींचिभृङ्गालीपल्लवैर्भ्रुवौ ॥' 'चन्द्रादर्शौ कपोलस्य मुखस्येन्द्वब्जदर्पणाः । तिलप्रसूनं नासायाः कण्ठः कम्बोः

रूपकादिषु साम्यस्य व्यङ्ग्यत्वम्, व्यतिरेके च वैधर्म्यस्याप्युक्तिः,

---

साधर्म्यमुपमेत्यर्थः । वाच्यादिपदचतुष्टयस्य क्रमेण व्यावृत्तिमाह—**रूपकादिष्विति** । आदिना परिणामादिग्रहणम् । 'मुखं चन्द्रः' इत्यभेदप्रत्ययानन्तरं 'मुखं चन्द्रसाधर्म्यवत्' इति व्यञ्जनया साधर्म्यप्रतीतिरिति भावः । ननु 'विधवति मुखाब्जं—' इत्यादौ वक्ष्यमाणोदाहरणे साम्यस्य गम्यत्वात्कथं लक्षणगमनमिति चेत्, न । 'दध्यानय' इत्यादौ लुप्तस्यामादेः प्रतिसंधानात्कर्मतादेरिव लुप्तायप्रत्ययप्रतिसंधानात्साम्यस्य वाच्यताङ्गीकारात्समासस्यैवोपमावाचकत्वाङ्गीकाराच्च । अत एव दण्डिनोक्तं सादृश्यवाचकप्रकरणे—'समासश्च बहुव्रीहिः शशाङ्कवदनादिषु' इति । चकारात्कर्मधारयश्च । ननु तथापि सादृश्यवाचकसमासस्य सत्त्वे 'क्विप्समासगता द्वेधा धर्मेवादिविलोपने' इति वक्ष्यमाणमसंगतमिति चेत्, न । समासस्य सादृश्यवाचकत्वमस्वीकुर्वतां प्राचां मतानुसारेणैव तत्प्रकारस्य प्रणेष्यमाणत्वात् । एवं 'वदनं

समः स्मृतः ॥' कामतूणीकृत्य नासा वर्ण्यत इति श्रीहर्षः । 'नासावंशो मृगीदृशाम्' इति 'नासानाली तिलोपमा' इति च विशेषो द्रष्टव्यः । 'मृगतल्लोचनाम्भोजतत्पत्रझषखञ्जनैः । नेत्रं चकोरतन्नेत्रकेतकालिसराशुगैः ॥', 'प्रवालबिम्बबन्धूकपल्लवैरधरोष्ठकौ । वर्ण्यौ माधुर्यमाश्रित्य यावन्मधुरवस्तुभिः ॥', 'मुक्तामाणिक्यनारङ्गदाडिमीकुन्दकोरकैः । ताराभिश्च रदा, वाणी हंसालिशुकर्किंनरैः ॥', 'वेणुकोकिलवीणाभिर्माधुर्यं मधुरैः सह ॥', 'बाहुर्बिसेन विद्यद्बिल्लिमृणालैः, करस्तु पद्मेन । पल्लवविद्रुमकाभ्यां, चन्द्रकलाकुन्दकोरकैश्च नखाः ॥', 'पूगाब्जतत्कोरकबिल्वतालगुच्छेभकुम्भाचलकुम्भचक्रैः । सौवीरजम्बीरकबीजपूरसमुद्गछोलङ्गफलैरुरोजः ॥', 'नाभी रसातलावर्तहृदकूपनदादिभिः । वली तटिन्या तद्रूपैः पृष्ठं काञ्चनपट्टकैः ॥' तद्रूपैस्तदनुकारिपाशादिभिः । 'सूच्यग्रतलशून्याणुवेदिसिंहादिभिः समः । मुष्टिग्राह्यो भवेन्मध्यो जघनं पुलिनोपमम् ॥' मध्यस्यातिसूक्ष्मत्वात्तत्प्राधान्येनोपमानता । तेनैव 'सदसत्संशयगोचरोदरि' इति 'परमाणुमध्याः' इति च वर्णयन्ति । 'पीठप्रस्तरभूचक्रैर्नितम्बः परिवर्ण्यते । ऊरुस्तु हस्तिहस्तेन कदल्या करभेण च ॥', 'चरणः पल्लवाम्भोजस्थलपद्मप्रवालकैः । पूर्णेन्दुनाङ्गुष्ठनखौ गमनं हसहस्तिवत् ॥', 'कटाक्षो यमुनावीचिभृङ्गावलिविषामृतैः । ज्योत्स्नेन्दुपुष्पपीयूषफेनकैरववद्धसः ॥', 'मुक्ताफलं वा स्फुटविद्रुमस्थम्' इति कालिदासप्रयोगान्मुक्ताप्यत्र गणनीया । दर्शनं वमदब्जादिः श्वासस्तु सुरभिः शनैः । हंससारसशब्दाभ्यां वर्ण्यते नूपुरध्वनिः ॥', 'पुंसामत्यन्तपीनत्वमुच्चता दीर्घबाहुता । युगार्गलभुजङ्गेन्द्रदण्डस्तम्भेभहस्तकैः ॥' 'बाहु,र्वक्षः कपाटेन शिलापट्टेन वर्ण्यते । अंसे विपुलता मध्ये कार्श्यमुन्नतता पदे ॥', 'स्तनयोरिव योषाणामत्यन्तस्वच्छता हृदि । कान्तिप्रयोजकं यावत्तावत्तद्वत्प्रवर्ण्यते ॥', 'प्रतापोऽर्काग्निवज्राद्यैः कीर्तिश्चन्द्रादिशुभ्रकैः । करे पद्मोर्ध्वरेखादि पदे च्छत्रध्वजादिकम् ॥ गमनं हस्तिसिंहाभ्यां कार्कश्यं च भुजादिषु ॥' इति दिक् । विस्तरस्तु तत्तद्वर्णनानियामकमहाकविप्रयोगानुसारेणानुसंधेयः । उक्तं च—'कवीनां घटनान्यैव चराचरविलक्षणा । अकर्तुमन्यथा कर्तुं कर्तुं या क्षमते जगत् ॥' इति ॥

उपमेयोपमायां वाक्यद्वयम्, अनन्वये त्वेकस्यैव साम्योक्तिरित्यस्या भेदः ।

सा पूर्णा यदि सामान्यधर्म औपम्यवाचि[1] च ।
उपमेयं चोपमानं भवेद्वाच्यम्

मृगशावाक्ष्याः सुधाकरमनोहरम्' इत्यौपम्यवाचकस्य लोपे यदुदाहृतं तदपि प्राचीनमतानुसारेणैव वेदितव्यम् । एतन्मते तु प्रथमं धर्मलोपस्य द्वितीयं पूर्णाया उदाहरणं बोध्यम् । ननु तथापि 'मुखमस्या विधुं द्वेष्टि', सद्योमुण्डितमत्तहूणचिबुकप्रस्पर्धि नारङ्गकम्' इत्यादावव्याप्तिः साम्यस्य गम्यत्वात् । न च 'स्पर्धते जयति द्वेष्टि' इत्यादिदण्डिदर्शनात्तत्रापि साम्यस्य वाच्यत्वमिति वाच्यम् । तस्य साम्यव्यञ्जकपरत्वेनोपपत्तौ साम्यवाचकत्वकल्पनाया अन्याय्यत्वात् । अत्रोच्यते—द्वेषस्पर्धयोश्चेतनधर्मत्वेन मुखनारङ्गकयोरसंभवादुपमायां पर्यवसानेन तादृशस्थले निदर्शनालंकारस्यैवाङ्गीकारात् । 'इवादि' इत्युपादानात् 'मुखचन्द्रौ मनोज्ञौ' इत्यत्रोभयसाम्यस्य वाच्यत्वेऽपि नातिव्याप्तिः । **व्यतिरेके इति ।** 'अकलङ्कि मुखं तस्या न कलङ्की यथा विधुः' इत्याद्येकवाक्यगतव्यतिरेक इत्यर्थः । अत्राकलङ्कित्वमुपमानस्य कलङ्कित्वमुपमेयस्य वैधर्म्यम् । नन्वत्र साम्यस्य वाच्यत्वेऽपि तस्य नञा मुखे संबन्धाभावबोधादुभयसंबन्धित्वमेव नास्ति, कथमत्रोपमाप्रसक्तिरिति चेत्, न । मुखे चन्द्रसाधर्म्यबाधासंभवेन नञो मुखस्योत्कर्षातिशयप्रतीतिमात्रे तात्पर्यात् । **उपमेयोपमायामिति ।** 'मतिरिव कमला कमलेव मतिः—' इत्यादावित्यर्थः । अत्र श्रीमत्योरतुल्यत्वं साधर्म्यं वाक्यद्वयेन प्रतिपाद्यते । रसनोपमादेरपि विलक्षणवैचित्र्याधायकत्वेनालंकारान्तरत्वमित्यनेनैव तद्वारणमित्यवधेयम् । **वाक्यैक्य इति ।** वाक्यान्तरव्यवच्छेदकमेव न त्वेकपदव्यवच्छेदकम् । तेन मुखाब्जमित्यादावेकपदेऽप्युपमा । **अनन्वये त्विति ।** 'चन्द्रश्चन्द्र इवातन्द्रः' इत्यादावित्यर्थः । अत्रैकस्यैव चन्द्रस्यातन्द्रत्वं साधर्म्यमिवशब्देन प्रतिपाद्यते । ननु 'घटत्वमिव पटत्वं नित्यम्' इत्यादेरप्युपमात्वं स्यादिति चेष्टमेव, किंतु वैचित्र्यविशेषानाधायकत्वात्तस्यामलंकारव्यवहारो नास्तीति विशेषः । एवमन्यत्रापि बोध्यम् । केचित्तु—'इवादिशब्दवत्तुल्यादिपदेनापि साधारणधर्मस्य प्रतिपादनात्करिष्यमाणश्रौत्यार्थीविभागानुपपत्त्या साधारणधर्मसंबन्ध एवोपमा, न तु साधारणधर्ममात्रम् । स च प्रतियोगितारूपः । 'चन्द्र इव मुखम्' इत्यादौ चन्द्रप्रतियोगिकसादृश्याश्रयो मुखमिति प्रतीतेरानुभाविकत्वात् । तादृशसंबन्धश्च इवादिशब्देन वाच्यस्तुल्यादिपदेनार्थवशलभ्य इति श्रौत्यार्थीविभागः' इत्याहुः, तन्न । आर्थ्यामुपमायामव्याप्तेः । तत्र साधारणधर्मसंबन्धस्य विभक्त्यादिप्रतिसंधानलभ्यतया इवादिशब्दवाच्यत्वाभावात्, उभयसंबन्धित्वस्येवादिवाच्यत्वे श्रौती अर्थवशलभ्यत्वे चार्थीति विवक्षयैव विभागोपपत्तेश्च । उपमायाः पूर्णा लुप्ता चेति भेदद्वयमाह—**सेति** । सामान्यपदविवरणम् ।

---

1. **औपम्यवाचीति** । उक्तं च दण्डिना—'इववद्वायथाशब्दाः समाननिभसंनिभाः ।

सा उपमा । साधारणधर्मो द्वयोः सादृश्यहेतू[1] गुणक्रिये मनोज्ञत्वादि । औपम्यवाचकमिवादि । उपमेयं मुखादि । उपमानं चन्द्रादि ।

इयं पुनः ॥ १५ ॥

श्रौती यथेववाशब्दा इवार्थो वा वतिर्यदि ।
आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वतिः ॥ १६ ॥

यथेववादयः शब्दा उपमानान्तरप्रयुक्ततुल्यादिपदसाधारणा अपि श्रुतिमात्रेणोपमानोपमेयगतसादृश्यलक्षणसंबन्धं बोधयन्तीति तत्सद्भावे

साधारणेति । सादृश्यहेतू सामान्यव्यावृत्तिबोधकारणे विशेषणे इति यावत् । **औपम्यवाचकमिति** । अव्ययानामन्विताभिधानस्वीकारादिति भावः । उपलभ्यमानसाम्यस्यानुयोगि उपमेयम्, प्रतियोगि उपमानम् । पूर्णोपमायाः श्रौतार्थीभेदेन द्वैविध्यमाह—**इयं पुनरिति** । इयं पूर्णोपमा । श्रूयत इति श्रुतिः शब्दः, तया साक्षादेवोपलभ्यमानोपमेयसंबन्धा श्रौती । तस्या उपलम्भकानाह—**यथेवेति** । 'वा स्याद्विकल्पोपमयोरिवार्थे च समुच्चये' इति कोषाद्वाशब्दस्योपमार्थत्वम् । बहुवचनमाद्यार्थम् । तेन 'पङ्कजदलानिव लोचनानि' इत्यादौ वशब्दोऽप्युपमार्थः । पदार्थानुसंधानापेक्षया प्रतीयमानोभयसंबन्धा आर्थी । तस्या ज्ञापकानाह—**तुल्येति** । आद्यपदेन समसदृशादीनां ग्रहणम् । भेदमुपपादयति—**यथेवेति** । यद्यपि यथादयः शब्दा उपमानवाचकपदात्परं प्रयुज्यमानस्य तुल्यादिपदस्य साधारणस्तदुपमानोपमेयगतसाधर्म्यबोधकाः, तथापि श्रुतिमात्रेण स्वोपलब्धिमात्रेण न तु पदार्थानु-

---

तुल्यसंकाशनीकाशप्रकाशप्रतिरूपकाः ॥ प्रतिपक्षप्रतिद्वन्द्विप्रत्यनीकविरोधिनः । सदृक्षसदृशसंवादिसजातीयानुवादिनः । प्रतिबिम्बप्रतिच्छन्दूसरूपसमसंमिताः ॥ सलक्षणसदृक्षाभसपक्षोपमितोपमाः । कल्पदेशीयदेश्यादिप्रख्यप्रतिनिधी अपि ॥ सवर्णतुलितौ शब्दौ ये चान्यूनार्थवादिनः । समासश्च बहुव्रीहिः शशाङ्कवदनादिषु ॥ स्पर्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति । आक्रोशत्यवजानाति कदर्थयति निन्दति ॥ विडम्बयति संधत्ते हसतीर्ष्यत्यसूयति । तस्य मुष्णाति सौभाग्यं तस्य कान्तिं विलुम्पति ॥ तेन सार्धं विगृह्णाति तुलां तेनाधिरोहति । तत्पदव्यां पदं धत्ते तस्य कक्षां विगाहते ॥ तमन्वेत्यनुबध्नाति तच्छीलं तं निषेधति । तस्य चानुकरोतीति शब्दाः सादृश्यसूचकाः ॥ उपमायामिमे प्रोक्ताः, कवीनां बुद्धिसौख्यदाः ॥' इति । अभिधया लक्षणया व्यञ्जनया चोपमाप्रतीतिरिति तस्या वाचका इवादयः, लक्षकाः स्पर्धत इत्यादयः, स्पर्धादीनां सादृश्ये संकेताकरणात्, व्यञ्जकाः 'तस्य मुष्णाति सौभाग्यम्' इत्यादयः ॥

1. **यथेति** । अत्र वाशब्दवद् वशब्दोऽप्युपमार्थको बोध्यः । तथा च कालिदासः—'शात्रवं व पपुर्यशः' इति । यद्यपीह 'शात्रवं च' इति चपदितपाठो बहुत्रोपलभ्यते तथापि न श्राव्य इवार्थक-वशब्दोपादानेनैव चमत्कारोत्पत्तेः 'मणी वोष्ट्रस्य' इति भारतप्रयोगसमर्थनावसरे मनोरमायां दीक्षितैरुपेक्षितत्वाच्च ॥

---

१. 'सादृश्यहेतुर्मनोज्ञत्वादिः' क. २. 'साक्षादेव' इति पुस्तकान्तरे नास्ति.

श्रौत्युपमा । एवं 'तत्र तस्येव' इत्यनेनेवार्थे विहितस्य वतेरुपादाने । तुल्यादयस्तु 'कमलेन तुल्यं मुखम्' इत्यादावुपमेय एव । 'कमलं मुखस्य तुल्यम्' इत्यादावुपमान एव । 'कमलं मुखं च तुल्यम्' इत्यादावुभय-

---

संधानापेक्षया उपमानोपमेयवृत्तिसाधर्म्यं बोधयन्तीति हेतोस्तेषां यथादिशब्दानां सद्भावे प्रयोगे श्रौती उपमेत्यर्थः । अव्ययानामन्विताभिधानस्वीकाराद् यथा 'घटो न पटः' इत्यादौ नञ्पदं पदार्थोपस्थितिमन्तरेणैव पदार्थोपस्थितेः प्रागेव समभिव्याहृतपदार्थयोरन्वितं भेदं बोधयति, तथा 'कमलमिव मुखम्' इत्यादाविवादिपदमपि श्रवणमात्रेण समभिव्याहृतपदार्थयोरन्वितं साधर्म्यं बोधयति । अन्विताभिधानवादिमते ह्यखण्डवाक्यस्याखण्डवाक्यार्थे शक्तिरेकातिरिक्ता कल्प्यते, प्रथमं तयैव वाक्यार्थबोधो जायते, पश्चादेव शक्त्या लक्षणया वा प्रत्येकपदार्थोपस्थितिरिति भावः । अव्ययानामभिहितान्वयाङ्गीकारेऽपि अव्ययातिरिक्तनामार्थयोरभेदातिरिक्तसंबन्धेन साक्षादन्वयास्वीकारादव्ययार्थस्य नामार्थेन साक्षादेवान्वयः संभवतीत्यव्ययपदेनोपमानोपमेयभावेऽपि साधारणधर्मसंबन्धोपस्थापनेन विभक्त्यर्थप्रतिसंधानापेक्षेति बोध्यम् । **एवमिति** । 'तत्र तस्येव' इति पाणिनिसूत्रम् । तत्रेव तस्येवेत्यर्थे वतिर्भवतीति तदर्थः । इवार्थकस्य वतेरिवशब्दतुल्यव्युत्पत्तिः, तदुपादानेऽपि श्रौत्येवोपमेत्यर्थः । आर्थीमुपपादयति—**तुल्यादयस्त्विति** । 'शब्दाः' इत्यनुषङ्गः । 'कमलेन' इति षष्ठ्यर्थे तृतीया । षष्ठ्यर्थश्चात्र कुम्भस्य जलमितिवदाधेयत्वम् । तस्य च तुल्यपदार्थैकदेशे सादृश्येऽन्वयः । तथा च कमलवृत्तिसादृश्याश्रयो मुखमित्यर्थः । **उपमेय एवेति** । 'विश्राम्यन्ति' इत्यग्रेणान्वयः । स्वार्थं बोधयन्तीति तदर्थः । एवकारेण उपमानव्यवच्छेदः । एवं च तुल्यादिपदानामनव्ययतयान्विताभिधानस्वीकारेणार्थबोधात्प्राक् पदार्थोपस्थितिमात्रं जनयित्वा उपमेय एव विश्रान्तिः, पश्चात्तूपमानपदार्थानुसंधानेन तात्पर्यानुसंधानेन चोपमानस्य सादृश्योपमानप्रतीतिरिति भावः । **उपमान एवेति** । 'तुल्यादयः शब्दा विश्राम्यन्ति' इत्यन्वयः । कमलादीनां मुखोपमानत्वं प्रसिद्धमित्यभिप्रायेणेदम् । वस्तुतस्तु कमलमत्रोपमेयमेव । इयमेव विपर्यासोपमेति दण्डी । विषयविशेषे तुल्यादिपदानामपि षष्ठ्यर्थानुसंधानं विनाप्युभयसंबन्धिसाधर्म्यबोधकत्वमाह—**कमलं मुखं चेति** । अर्थानुसंधानादे-

---

1. **तत्रेति** । तत्रेति सप्तमीसमर्थात्तस्येति षष्ठीसमर्थाच्च इवार्थे वतिप्रत्ययो भवतीति तदर्थः । सप्तमीसमर्थाद्यथा—मथुरावत्सुघ्ने प्राकारः । मथुरायामिव मथुरावदिति विग्रहः । प्राकाराद्याधेयापेक्षाधिकरणविहितसप्तम्यन्ताद्वतिप्रत्ययविधानम् । मथुरायां यादृशः प्राकारस्तेन तुल्यः सुघ्ने प्राकार इत्यर्थः । षष्ठीसमर्थाद्यथा—चैत्रवन्मैत्रस्य गावः । चैत्रस्येव चैत्रवदिति विग्रहः । चैत्रादिस्वाम्यपेक्षसंबन्धविहितषष्ठ्यन्ताद्वतिः । चैत्रस्य यादृश्यो गावस्तत्तुल्या मैत्रस्येत्यर्थः ॥

---

१. 'अन्वित' इति मुद्रितपुस्तके.

त्रापि विश्राम्यन्तीत्यर्थानुसंधानादेव साम्यं प्रतिपादयन्तीति तत्सद्भावे आर्थी। एवं 'तेन[1] तुल्यं–' इत्यादिना तुल्यार्थे विहितस्य वतेरुपादाने।

द्वे तद्धिते समासेऽथ वाक्ये

द्वे श्रौती आर्थी च। उदाहरणम्—

'सौरभम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले॥'

अत्र क्रमेण त्रिविधा श्रौती।

वेति षष्ठ्यर्थानुसंधानादुभयसंबन्धसाम्यं बोधयन्त्येवेत्यर्थः। तुल्यादिपदानामपि क्वचित्षष्ठ्यर्थानुसंधानं विनाप्युभयसंबन्धसाम्यबोधकत्वस्य संभवेऽपीवादिवत्सर्वत्र तदभावात्तत्सद्भावेन श्रौत्युपमेति भावः। तुल्यार्थस्य वतेरुपादानेऽप्यार्थीमाह—**एवमिति**। 'तेन तुल्यं–' इति पाणिनिसूत्रम्। वतेरुपादाने आर्थीति संबन्धः। श्रौत्यार्थीभेदेन द्विविधायाः पूर्णोपमायास्त्रैविध्यमाह—**द्वे इति**। तद्धिते वत्कल्पादियोगे। **समास इति**। इवयोग एवोपमानात्सर्वविभक्तीनामिवेत्यलोपविधानसामर्थ्यात्समासः। स च नित्य एव। 'नित्यसमासे इवयोगे समासगा' इति काव्यप्रकाशदर्शनादिवार्थस्य विशेषसापेक्षत्वेऽप्यनभिधानबलात्समासः। एवं च प्रतियोगिपदासमभिव्याहारेण यदिवपदं प्रयुज्यते तत्प्रयोक्तृप्रमादजमेव। **वाक्ये** यथादियोगेऽत्रागमकत्वेन समासाभावात्तद्योगे वाक्यगतैवोपमेति भावः। एवं त्रिविधा श्रौती। आर्थी तु तद्धिते वदादियोगे तुल्यादिपदसमासस्य वैकल्पिकत्वात्समासे वाक्ये च संभवतीति भावः। समासपक्षेऽपि लुप्तषष्ठ्यर्थस्य लक्षणाया वा प्रतिसंधानादेवोपमानसंबन्धबोध इत्यार्थ्येव। **सौरभमिति**। मुखस्य सौरभमम्भोरुहवृत्तिसाधर्म्याभिन्नमित्यन्वयबोधः। यद्वा सौरभाभिन्नमम्भोरुहसाधर्म्यं मुखसंबन्धीति। स्तनौ

---

1. **तेनेति**। 'तेन तुल्यं क्रिया चेद्वतिः' इति संपूर्णसूत्रम्। तेनेति तृतीयासमर्थात्तुल्यमित्यर्थे वतिः प्रत्ययो भवति, यत्तुल्यं क्रिया चेत्सा भवतीति तदर्थः। उपमेयस्य क्रियात्वे उपमानवाचकात्तृतीयान्तात्तुल्यमित्यर्थे वतिप्रत्ययो भवतीति भावः। 'ब्राह्मणवदधीते क्षत्रियः' इति तदुदाहरणम्। ब्राह्मणेन तुल्यं ब्राह्मणवदिति विग्रहः। अध्ययनक्रियाविशेषणत्वात्तुल्यमिति द्वितीया नपुंसकत्वं च। ननु ब्राह्मणसादृश्यस्याध्ययनेऽभावात्कथमिह वतिरिति चेत्, न। ब्राह्मणशब्दस्य तत्कर्तृकाध्ययने लाक्षणिकत्वात्। सौष्ठवादिश्चात्र साधारणो धर्मः। तथा च ब्राह्मणकर्तृकाध्ययनतुल्यं क्षत्रियकर्तृकं वर्तमानकालिकमध्ययनमिति बोधः। अत्र 'क्रिया चेत्' इत्युक्त्या क्रियातुल्यत्व एवास्य वतेः साधुत्वम्। 'तत्र तस्येव' इति विहितस्य तु गुणजात्यादिनापि तुल्यत्वे साधुत्वमिति विवेकः। तेन 'पुत्रेण तुल्यः स्थूलः' इति गुणतुल्ये वाक्यमेव तिष्ठति, न तु वतिरिति बोध्यम्॥

2. **सौरभमिति**। अत्राम्भोरुहमुपमानम्, मुखस्येत्युपमेयम्, सौरभं साधारणो धर्मः। 'अम्भोरुहवत्' इत्यत्र 'तत्र तस्येव' इति षष्ठ्यन्तादिवार्थे वतिप्रत्यय इति तद्धितगा

'मधुरः सुधावदधरः पल्लवतुल्योऽतिपेलवः पाणिः
चकितमृगलोचनाभ्यां सदृशी चपले च लोचने तस्याः ॥'

अत्र क्रमेण त्रिविधा आर्थी ।

पीनत्वाभिन्नकुम्भवृत्तिसाधर्म्याश्रयाविति-अन्वयबोधः । एवमुत्तरत्रापि । **सुधावदिति** । प्रथमान्तात्तुल्यार्थे वतिः । पेलवः कोमलः । अत्रैकदेशस्याश्लीलत्वेऽपि पादचूतादिशब्दवत्कविनिवहप्रयुक्तत्वान्न दोषः । अत्र पेलवपदार्थैकदेशस्य तुल्यपदार्थैकदेशे साम्येऽभेदान्वयो व्युत्पत्तिवैचित्र्यात् । नन्वम्भोजस्येव मुखस्य सौरभमित्यादौ साधारणधर्मस्योपमानसंबन्धित्वबोधे षष्ठ्यर्थानुसंधानस्यापेक्षणीयतया कथं श्रौतीत्वमिति चेत्, न । नामार्थनिपातयोरन्वयबोधे विभक्त्यर्थानुसंधानस्यातन्त्रतया तत्र षष्ठ्या विशेषणविभक्तेरिव प्रयोगसाधुत्वमात्रार्थकत्वात् । अन्यथा 'चन्द्रादिव मुखा-

---

श्रौती पूर्णा । अम्भोरुहपदस्य तत्संबन्धिसौरभलक्षकत्वेन अम्भोरुहसंबन्धिसौरभसदृशं मुखसंबन्धिसौरभमिति बोधः । ततः सौरभयोः सादृश्यमूलकाभेदाध्यवसायेनाभिन्नधर्ममूला अम्भोरुहमुखयोरुपमाप्रतीतिः । 'अम्भोरुहस्येवास्य सौरभम्' इत्यादिस्थले षष्ठ्युपपत्तये सौरभपदस्यावृत्त्या अम्भोरुहेऽप्यन्वयेन तादृशबोधस्यानुभवेन वृत्तावपि तथैवौचित्यात् । कुम्भावित्युपमानम्, स्तनावित्युपमेयम्, पीनत्वादिः साधारणो धर्मः, इवशब्द उपमाप्रतिपादकः । 'कुम्भाविव' इत्यत्र 'इवेन समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च' इति वार्तिकेन समासे समासगा श्रौती पूर्णा । अत्र काव्यप्रकाशादौ 'इवेन–' इति वार्तिके नित्यपदप्रक्षेपो दृश्यते स चाप्रामाणिक इति तद्व्याख्यातारः । अत एव 'उद्धाहुरिव वामनः' इत्यादिव्यस्तप्रयोगाः संगच्छन्त इति मनोरमादावुक्तम् । तेन समासाभावे तु वाक्यगैव श्रौती पूर्णेति बोध्यम् । कुम्भसादृश्यप्रयोजकपीनत्वादिधर्मवन्तौ स्तनाविति बोधः । शरदिन्दुरुपमानम्, वदनमुपमेयम्, मदयतीति मादनं साधारणो धर्मः, यथेत्युपमाप्रतिपादकम् । अत्र 'यथासादृश्ये' इत्यनेनासादृश्ये एव समासनियमेन सादृश्ये समासाभावाद्वाक्यमिति वाक्यगा श्रौती पूर्णेति । अत्र यत्तच्छब्दप्रकृतिक-प्रकारवाचि-थाल्प्रत्ययान्तयथादिशब्दयोगे यद्धर्मवाञ्शरदिन्दुस्तद्धर्मवद्वदनमित्युभयविशेष्यको बोधः, ततो यत्तद्धर्मैक्यबोधात्सादृश्यं फलति, हृदयमादनलक्षणोऽनुगामी साधारणो धर्म इति तत्त्वम् ॥

1. **मधुर इति** । सुधा उपमानम्, अधर उपमेयम्, माधुर्यं साधारणो धर्मः, 'सुधावत्' इत्यत्र 'तेन तुल्यं–' इत्यादिना तृतीयान्तात् 'तुल्यार्थे वतिः' इति तद्धितगा आर्थी पूर्णा । सुधातुल्याभिन्नो मधुर इति बोधः । तुल्यत्वप्रयोजकं च माधुर्यं पश्चान्मनसा व्यञ्जनया वा बुध्यते । पल्लव इत्युपमानम्, पाणिरित्युपमेयम्, अतिपेशलत्वं साधारणो धर्मः, तुल्यपदमुपमाप्रतिपादकम् । 'पल्लवतुल्यः' इत्युपमानोपमाप्रतिपादकयोः समासत्वात्समासगार्थी पूर्णा । चकितहरिणलोचने उपमानम्, लोचने उपमेयम्, चपलत्वं साधारणो धर्मः सदृशी इत्युपमाप्रतिपादकम् । सदृशशब्देन सह समासाभावाद्वाक्यमिति वाक्यगार्थी पूर्णेति ॥

पूर्णा षडेव तत् ।

स्पष्टम् ।

लुप्ता सामान्यधर्मादेरेकस्य यदि वा द्वयोः ॥ १७ ॥
त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्ववत् ।

सा लुप्ता । तद्भेदमाह—

पूर्णावद्धर्मलोपे सा विना श्रौतीं तु तद्धिते ॥ १८ ॥

सा लुप्तोपमा धर्मस्य साधारणगुणक्रियारूपस्य लोपे पूर्णावदिति पूर्वोक्तरीत्या षट्प्रकारा, किं त्वत्र तद्धिते श्रौत्या असंभवात्[1] पञ्चप्रकारा । उदाहरणम्—

'[2]मुखमिन्दुर्यथा, पाणिः पल्लवेन समः प्रिये ।
वाचः सुधा इवोष्ठस्ते बिम्बतुल्यो, मनोऽश्मवत् ॥'

आधारकर्मविहिते द्विविधे च क्यचि, क्यङि ।
कर्मकर्त्रोर्णमुलि च, स्यादेवं पञ्चधा पुनः ॥ १९ ॥

त्तस्या निरञ्चति कथामृतम्' इत्यादौ संबन्धबोधकविभक्त्यभावादुपमानसंबन्धबोधो न स्यात् । **तदिति** । उक्तप्रकारादित्यर्थः । लुप्तामाह—**लुप्तेति** । आदिपदेन उपमानोपमेयेवादीनां [1]संग्रहः । अनुपादाने अवाच्यत्वे अप्रयोगे चेति यथासंभवं बोध्यम् । **तद्धिते श्रौत्या असंभवादिति** । धर्मस्यानुपादाने तन्निष्ठसंबन्धबोधिकायाः षष्ठ्याः सप्तम्या वानुत्पत्तौ तदन्तविहित इवार्थे वतिर्न संभवति । कल्पादेस्तु तुल्यार्थे विहितत्वेन तद्योगे आर्थ्येव संभवतीति भावः । **अश्मवदिति** । अश्मतुल्यमित्यर्थः । धर्मलुप्ताया एवोपमायाः पुनरपि पञ्चप्रकारानाह—**आधारेति** । अधिकरणात्कर्मणश्च विहिते क्यचि ईयप्रत्यये, कर्तुर्विहिते क्यङि आयि-

---

1. **पञ्चेति** । वाक्य-समासगतत्वेन द्विविधा श्रौती, वाक्य-समास-तद्धितगतत्वेन त्रिविधार्थीति मिलित्वा धर्मलोपे पञ्चविधा लुप्तोपमेत्यर्थः ॥

2. **मुखमिति** । अत्रेन्दुमुखयोरुपमानोपमेययोराह्लादकत्वादिः साधारणधर्मो नोपात्तः, यथाशब्देन समासाभावाद्वाक्यमिति वाक्यगा धर्मलुप्ता श्रौती । पल्लवपाण्योरुपमानोपमेययोर्मार्दवादिः साधारणो धर्मो नोपात्तः, समशब्देन समासाभावाद्वाक्यमिति वाक्यगा धर्मलुप्तार्थी । सुधावाचोरुपमानोपमेययोर्माधुर्यं साधारणो धर्मो नोपात्तः, इवेन समास इति समासगा धर्मलुप्ता श्रौती । बिम्बोष्ठयोरुपमानोपमेययो रक्तिमा साधारणधर्मो नोपात्तः, तुल्यशब्देन समास इति समासगा धर्मलुप्तार्थी । मनोऽश्मनोरुपमेयोपमानयोः काठिन्यं साधारणो धर्मो नोपात्तः । अश्मवदिति तृतीयान्तात्तुल्यार्थे वतिरिति तद्धितगा धर्मलुप्तार्थीति ज्ञेयम् ॥

---

१. 'ग्रहणम्' इति पुस्तकान्तरे.

'धर्मलोपे लुप्ता' इत्यनुषज्यते । क्यच्-क्यङ्-णमुलः कलापमते यिन्नागमः । क्रमेणोदाहरणम्—

'[1]अन्तःपुरीयसि रणेषु, सुतीयसि त्वं
पौरं जनं, तव सदा रमणीयते श्रीः ।
दृष्टः प्रियाभिरमृतद्युतिदर्शमिन्द्र-
संचारमत्र भुवि संचरसि क्षितीश ॥'

अत्र 'अन्तःपुरीयसि' इत्यत्र सुखविहारास्पदत्वस्य, 'सुतीयसि' इत्यत्र स्नेहनिर्भरत्वस्य च साधारणधर्मस्य लोपः । एवमन्यत्र ।

प्रत्यये, कर्मकर्त्रोरुपपदयोर्विहिते णमुलि क्लादेशे णमि, यिन्निति ईयप्रत्ययस्य संज्ञा । **अन्तःपुरीयसीति** । तुल्यलमाचारश्च ईयप्रत्ययार्थः । आचारश्चात्राधिकरणत्वान्वययोग्यक्रिया । सा च प्रकृते संचाररूपा ग्राह्या । व्युत्पत्तिवैचित्र्येण तुल्यत्वस्य प्रकृत्यर्थे आचारस्याख्यातार्थेऽन्वयः । तथा चान्तःपुरतुल्येषु रणेषु संचारकर्तेत्यन्वयबोधः । 'सुतीयसि' इत्यादौ त्वाचारो मननम्, पौरजनं सुततुल्यं मन्यस इत्यर्थः । 'रमणीयते' इत्यत्राचारो वर्तनम्, रमणीतुल्या श्रीर्वर्तत इत्यर्थः । अत्रात्यन्ताधीनत्वस्य उपभोगसाधनत्वस्य वा साधारणधर्मस्य लोपः । **दृष्ट इति** । अमृतद्युतिरिव दृष्ट इत्यर्थः । अत्र मनोज्ञत्वादिः साधारणो धर्मः । **इन्द्रसंचारमिति** । इन्द्र इव संचरसीत्यर्थः । अत्र विभावाद्यतिशयः साधारणधर्मः । केचित्तु—'क्यच्क्यङोरर्थ आचारस्तस्यात्र विद्यमानत्वाद्धर्मलोपोदाहरणमेतन्न भवति' इत्याहुः, तन्न । आचारस्य साधनत्वेऽपि प्रकृते सादृश्यहेतुत्वेन विवक्षणात्, उपदर्शितधर्माणां सादृश्यहेतुत्वेन झटिति प्रतीयमानत्वात् 'चन्द्रायते शुक्लरुचापि

---

1. **अन्तरिति** । 'अन्तःपुरे इवाचरसि अन्तः पुरीयसि' इत्यत्र 'उपमानादाचारे' इति सूत्रस्थेन 'अधिकरणाच्च' इति वार्तिकेनोपमानवाचकादन्तःपुरे इत्यधिकरणपदादाचारेऽर्थे क्यच् । 'सुतमिवाचरसि सुतीयसि' इत्यत्र 'उपमानादाचारे' इति सूत्रेणोपमानवाचकात्सुतमिति कर्मपदादाचारेऽर्थे क्यच् । 'रमणीवाचरति रमणीयते' इत्यत्र 'कर्तुः क्यङ् सलोपश्च' इति सूत्रेणोपमानवाचकाद् रमणीतिकर्तृपदादाचारेऽर्थे क्यङ् । क्यङो ङित्त्वादात्मनेपदम् । अमृतद्युतिमिव दर्शनमिति अमृतद्युतिदर्शनम् । 'कृन्मेजन्तः' इत्यनेनाव्ययसंज्ञाविधानादव्ययम् । अत्र 'उपमाने कर्मणि च' इति सूत्रेणोपमानवाचके अमृतद्युतिमिति कर्मण्युपपदे दृशधातोर्भावे णमुल् । 'कषादिषु यथाविध्यनुप्रयोगः' इति सूत्रेण 'यस्माण्णमुलुक्तः स एव धातुरनुप्रयोक्तव्यः' इत्यर्थकेन 'दृष्टः' इति दृशधातोरेवानुप्रयोगः । इन्द्र इव संचरणमितीन्द्रसंचारम् । अत्रापि 'उपमाने—' इति सूत्रेण चकारानुकृष्टे उपमानवाचके इन्द्र इति कर्तर्युपपदे संपूर्वकाच्चरतेर्भावे णमुल् । स च णमुल् 'तुमर्थे सेसेनसेऽसेन्—' इत्यादिसूत्रभाष्यगतेन 'अव्ययकृतो भावे भवन्ति' इति वाक्येन भाव एव भवतीत्यवसेयम् ॥

इह च यथादितुल्यादिविरहाच्छौत्यादिविशेषचिन्ता नास्ति । इदं च केचिद्[1]दौपम्यप्रतिपादकस्येवादेर्लोपं उदाहरन्ति, तदयुक्तम् । क्यङादेरपि तदर्थविहितत्वेनौपम्यप्रतिपादकत्वात् । ननु क्यङादिषु सम्यगौपम्यप्रतीतिर्नास्ति, प्रत्ययेनास्वतन्त्रत्वाद्[2] इवादिप्रयोगाभावाच्च, इति न वाच्यम् । कल्पबादावपि[3] तथाप्रसङ्गात् । न च कल्पबादीनामिवादितुल्यतयौपम्यस्य वाचकत्वम्, क्यङादीनां तु द्योतकत्वम् । ईवादीनामपि[4] वाचकत्वे निश्चयाभावात् । वाचकत्वे वा 'समुदितं पदं वाचकम्'

इंसः' इत्यादौ सत्यप्याचारे 'शुक्लरुचा' इति साधारणधर्मप्रयोगदर्शनाच्च, आचारस्याख्यातार्थान्वितत्वेन निराकाङ्क्षतया क्यच्क्यङोरर्थे सादृश्येऽभेदान्वयसंभवेन सादृश्यहेतुत्वायोगाच्च । **इहचेति** । श्रौतीत्यादिपदेनार्थीपरिग्रहः । वस्तुतस्तु यथा तुल्यार्थविहितस्य वतेर्योगे आर्थीत्वम्, तथात्रापि तुल्यार्थविहितक्यच्क्यङोर्योगे आर्थीत्वम् । श्रुतिः शब्दस्तेन साक्षात्प्रतीयमाना श्रौती, तदितरा आर्थीति वदतश्चण्डीदासस्य मते सुतरामार्थीत्वम् । वतेरितीवाद्युपलक्षणम् । कल्पबादेरित्यनुबन्धप्रकारसहितनिर्देशः । **निश्चयाभावादिति** । तथा चेवादेरव्ययतया उपमावाचकत्वमसिद्धं तत्तुल्यस्य कल्पादेः सुतरामेव तदसिद्धमिति भावः । ननु 'कमलमिव मुखम्' इत्यादावुपमालक्षणाव्याप्तिभयेन इवादेरुपमावाचकत्वमवश्यमङ्गीकार्यमित्यभिप्रायेणाह—**वाचकत्वे वेति** । इवादितुल्यत्वेन कल्पादेरुपमावाचकत्वाङ्गीकारे वेत्यर्थः । समुदितं

---

1. **केचिदिति** । काव्यप्रकाशकारादय इत्यर्थः । तथा चाहुः—'वादेर्लोपे समासे वा कर्मधारक्यचि क्यङि । कर्मकर्त्रोर्णमुलि—' इति ॥

2. **अस्वतन्त्रत्वादिति** । 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतः' इति दर्शनेन प्रत्ययानां स्वातन्त्र्येणार्थबोधकत्वविरहादिति भावः ॥

3. **कल्पबादाविति** । अत्रेदं तत्त्वम्—'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति । सूत्रविहितस्य कल्पप्प्रत्ययस्य 'विषकल्पं मनः—' इत्यादिसामानाधिकरण्येन निर्देशादीषदसमाप्तिविशिष्टो धर्मी अर्थः । ईषदसमाप्तिश्च किंचिदूनसकलधर्मसंबन्धरूपोपमैव । एवं चेवादेर्लोप इति वक्तुं न युज्यते, तत्र धर्मलोप एवेति वक्तुमुचितत्वात् । आदिपदेन वतेः परिग्रहः ॥

4. **इवादीनामिति** । वैयाकरणनये औपम्यप्रतिपादकत्वेनेष्टानामिवादीना वाचकत्वानङ्गीकारः । तथाहि—इवादीनां द्योतकत्वमेव न वाचकत्वम् । निपातत्वाद्उपसर्गवत् । अत एव 'शरैरुल्लैरिवोदीच्यानुद्धरिष्यन्रसानिव' इत्यादावुल्लादिपदस्योल्लसदृशपरत्वेनोल्लसदृशैः शरैरिति शरविशेषणतया तृतीयादिसंगतिः । वाचकत्वे तूल्लपदोत्तरं तृतीया न संगच्छते । उल्लाणामुद्धरणक्रियां प्रति करणत्वाभावाद् इवार्थसादृश्यान्वयित्वेन करणीभूतशरविशेषणत्वविरहाच्च ॥

5. **वाचकत्व इति** । आलंकारिकमत इत्यर्थः । अत्रेदमवधेयम्—उपसर्गाणां द्योतक-

'प्रकृतिप्रत्ययौ स्वस्वार्थबोधकौ' इति च मतद्वयेऽपि वत्यादिक्यङाद्योः साम्यमेवेति। यच्च केचिदाहुः—'वत्यादय इवार्थेऽनुशिष्यन्ते, क्यङादयस्त्वाचारार्थे' इति, तदपि न। न खलु क्यङादय आचारमात्रार्थाः, अपि तु सादृश्याचारार्था इति। तदेवं धर्मलोपे दशप्रकारा लुप्ता।

उपमानानुपादाने द्विधा वाक्यसमासयोः।

उदाहरणम्—

'तस्या मुखेन सदृशं रम्यं नास्ते न वा नयनतुल्यम्।'

प्रकृतिप्रत्ययसमुदायः, वाचकं प्रकृत्यर्थविशिष्टप्रत्ययार्थप्रतिपादकम्। स्वस्वार्थबोधकौ क्रमेण स्वार्थप्रतिपादकौ। **वत्यादीति**। आदिपदेन कल्पादिपरिग्रहः। **साम्यमेवेति**। सादृश्यवाचकत्वेन साम्यमित्यर्थः। **आचारार्थे इति**। 'अनुशिष्यन्ते' इत्यन्वयः। **अपि त्विति**। किंत्वित्यर्थः। 'अपि तर्हि' इति पाठे किं तर्हीत्यर्थः। उपसंहरति—**तदेवमिति**। वस्तुतस्तु 'चन्द्रायते शुक्लरुचापि हंसः' इत्यादौ साधारणधर्मोपादानेऽपि क्यङादियोगे उपमादर्शनादार्थ्या उपमायास्तद्धितादित्रितयगतत्ववत् क्यजादिपञ्चकगतत्वेन विशेषो बोध्यः। एवं चाष्टप्रकारायाः आर्थ्या धर्मलोपालोपाभ्यां षोडशप्रकारत्वं बोध्यम्। क्यजादिपञ्चके धर्मलोपे उदाहरणं यथा—'धीरः प्रीतिकरत्वेन पर्यङ्कीयति मञ्चके। मित्रीयति परं प्रेम्णा भक्त्या देवायते नृणाम्॥ देवदर्शं जनैः साधुः प्रतीक्ष्यत्वेन दृश्यते। कृपया विष्णुसंचारं नित्यं संचरति क्षितौ॥' अत्र तृतीयान्तपदार्थानां क्यजाद्यर्थे सादृश्येऽभेदेनान्वयः। उपमानलुप्तामुपमामाह—**उपमानेति**। 'लुप्तोपमा' इत्यनुषङ्गः। **न वेति**। न वा

त्वमिष्टमेव। अन्यथा उपास्यते हरः, अनुभूयते सुखम्, इत्यादौ धात्वर्थासनभवनक्रिययोरकर्मकत्वेन कर्मलकारोपपत्तिर्न स्यात्। इवादीनां तु वाचकत्वमेव। उपसर्गवाचकतायामिवेवादिवाचकतायां प्रतिबन्धकराहित्येन दृष्टान्तवैषम्यस्य सद्भावाद् विशेषणविशेष्ययोरेकविभक्तिकत्वे 'विशेष्येण सहैकार्थं भवेद्यत्र विशेषणम्। तत्र लिङ्गादयः प्रायो विशेष्यस्था विशेषणे॥' इत्यनुशासनस्येवोपमानोपमेययोरपि तत्र 'लिङ्गसंख्याविभेदेऽपि उपमानोपमेयता। विभक्तिः पुनरेकैव उपमानोपमेययोः॥' इत्यनुशासनस्य जागरूकत्वेन 'शरैरुस्रैः—' इत्यादावुपमानपदोत्तरतृतीयादेः सूपपादकत्वाच्च। प्रायोग्रहणेन 'दिग्यन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः करिण्यः कारुण्यास्पदम्—' इत्यादौ विशेष्यविशेषणयोर्लिङ्गादिभेदेऽपि न काचिदनुपपत्तिरित्यन्यत्र विस्तरः॥

1. **क्यङादय इति**। अयमभिप्रायः—'कर्तुः क्यङ् सलोपश्च' इत्यत्र 'उपमानादाचारे' इत्यत उपमानपदमनुवर्तते, तेनेवार्थसादृश्यादपि बोधे सादृश्याचारार्थः, क्यङिति॥

---

१. 'स्वार्थावबोधकौ' क. २. 'षोडशप्रकारा बोध्या' इति मुद्रितपुस्तके.

अत्र मुखनयनप्रतिनिधिवस्त्वन्तरयोर्गम्यमानत्वादुपमानलोपः। अत्रैव च 'मुखेन सदृशं' इत्यत्र 'मुखं यथेदं', 'नयनतुल्यं' इत्यत्र 'दृगिव' इति पाठे श्रौत्यपि संभवतीति। अनयोर्भेदयोः प्रत्येकं श्रौत्यार्थीत्वभेदेन चतुर्विधत्वसंभवेऽपि प्राचीनानां रीत्या द्विप्रकारत्वमेवोक्तम्।

औपम्यवाचिनो लोपे समासे क्विपि च द्विधा ॥ २० ॥

क्रमेणोदाहरणम्—

'वदनं मृगशावाक्ष्याः सुधाकरमनोहरम्।'[1]

'गर्दभति श्रुतिपरुषं व्यक्तं निनदन्महात्मनां पुरतः।'

अत्र 'गर्दभति'[2] इत्यत्रौपम्यवाचिनः क्विपो लोपः। न चेहोपमेयस्यापि लोपः। 'निनदन्' इत्यनेनैव निर्देशात्।

द्विधा समासे वाक्ये च लोपे धर्मोपमानयोः।

'तस्या मुखेन' इत्यादौ 'रम्यं' इति स्थाने 'लोके' इति पाठेऽनयोरुदाहरणम्।

क्विप्समासगता द्वेधा धर्मेवादिविलोपने ॥ २१ ॥

नयनतुल्यरम्यमास्त इत्यन्वयः। अन्यथा धर्मोपमानलोपोदाहरणमिदं स्यात्। **प्रतिनिधीति**। सदृशेत्यर्थः। इवादिलुप्तामाह—**औपम्येति**। यत्र कालापादिभिरायलोपः क्रियते तत्र पाणिनीयैः क्विबनुशिष्यते। **वदनमिति**। मृगशावस्याक्षीवाक्षि यस्या इति बहुव्रीहावक्षिपदलोपः। इवार्थस्य समागम्यतया इवपदाप्रयोगः। चञ्चलत्वस्य शब्दानुपात्तत्वाल्लोप इतीदं वक्ष्यमाणत्रिलोपोदाहरणम्। सुधाकर इव मनोहरमिति 'उपमानानां सामान्यवाचिभिः' इति कर्मधारयः। एतदेव प्रकृतोदाहरणम्। क्विपि उदाहरति—**गर्दभतीति**। गर्दभ इवाचरतीत्यर्थे क्विपि चिह्नार्थत्वात्तल्लोपः। यथा 'ग्रामध्वत्' इत्यादौ क्विपो लोपेऽपि कर्तृत्वस्य वाच्यत्वं तथेहापि सादृश्यस्येति सामान्यलक्षणगमनम्। अत्र श्रुतिपरुषनिनादः साधारणधर्मः शब्दोपात्त एव। **निर्देशादिति**। उपमेयस्येत्यनेनान्वयः। एवमेकलोपामुपमामुक्त्वा द्विलोपामाह—'लु-

---

1. **सुधाकरेति**। 'सुधाकर इव मनोहरम्' इति विग्रहे 'उपमानानि सामान्यवचनैः' इत्यनेन समास इति समासगेवादिलुप्ता। इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते स च न लुप्यते, किंतु समासेनैवोपमाविधानात् 'उक्तार्थानामप्रयोगः' इति न्यायेन प्रयोगाभावाल्लोपव्यवहार इत्यवसेयम्॥

2. **गर्दभतीति**। 'गर्दभ इवाचरति गर्दभति' इत्यत्र 'सर्वप्रातिपदिकेभ्यः क्विब् वा वक्तव्यः' इति वार्तिकेनोपमानवाचकाद् गर्दभपदादाचारेऽर्थे क्विप्प्रत्ययः तस्य सर्वापहारिलोपविधानात्क्विबो वादिलुप्ता॥

उदाहरणम्—

'विधवति [1]मुखाब्जमस्याः' [2]

अत्र 'विधवति' इति मनोहरत्व-क्विप्प्रत्यययोर्लोपः । केचित्त्वत्रापि प्रत्ययलोपमाहुः । 'मुखाब्जं' इति च समासगा ।

उपमेयस्य लोपे तु स्यादेका प्रत्यये क्यचि ।

यथा—

'अरातिविक्रमालोकविकस्वरविलोचनः ।
कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति ॥' [3]

अत्र 'सहस्रायुधमिवात्मानमाचरति' इति वाक्ये उपमेयस्यात्मनो लोपः । न चेहौपम्यवाचकलोप उक्तादेव न्यायात् । अत्र केचिदाहुः—'सहस्रायुधेन सह वर्तत इति सहस्रायुधः स इवाचरतीति वाक्यात्सहस्रायुधीयतीति पदसिद्धौ विशेष्यस्य शब्दानुपात्तत्वादिहोपमेयलोपः' इति, तन्न विचारसहम् । [4]कर्तरि क्यचोऽनुशासनविरुद्धत्वात् ।

धर्मोपमेयलोपेऽन्या

यथा—

'यशसि प्रसरति भवतः क्षीरोदीयन्ति सागराः सर्वे ।'

स्रोपमा' इत्यनुषज्यते । एवमग्रेऽपि । **विधवतीति** । विधुरिवाचरतीत्यर्थः । मुखमब्जमिवेति 'व्याघ्राद्यैस्तद्गुणस्तुल्यस्य' इति कर्मधारयः । अत्रेवादिसौरभाद्योर्लोपः । एवं 'शशाङ्कवदना' इत्यादिबहुव्रीहावप्येतदुदाहरणं बोध्यम् । **उपमेयस्यात्मन इति** । कर्मक्यचोर्योगे कर्मण एवोपमेयत्वं तस्याप्रयोगे तथेति भावः । **उक्तादेवेति** । क्यजादेः सादृश्यबोधकत्वव्यवस्थापनादित्यर्थः । **अनुशासनविरुद्धत्वा-**

---

1. **विधवतीति** । विधुरिवाचरति विधवति विधुसदृशो भवति ॥

2. **मुखाब्जमिति** । 'मुखस्यमब्जमिव' इति विग्रहे 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इत्यनेन समासः । अयं समास उपमानोपमेययोः समानलिङ्गत्व एव भवति विभिन्नलिङ्गत्वे मयूरव्यंसकादित्वात्समासः स च रूपकरूप इति शेखरादौ स्थितम् ॥

3. **सहस्रायुधमिति** । अत्र 'उपमानादाचारे' इत्यनेनोपमानवाचकात्सहस्रायुधमिति कर्मपदादाचारेऽर्थे क्यच् । आचारोऽत्र दुर्जयत्वादिः । तथा च सहस्रायुधमिवात्मानमाचरतीत्यर्थादात्मात्रोपमेयः । यद्यपीह स इति तच्छब्देन साक्षादुपात्तः कर्तैवोपमेयस्तथापि कर्मत्वेनोपमेयभूत आत्मा कर्मत्वेन नोपात्त इति यथोक्तोदाहरणम् ॥

4. **कर्तरीति** । 'उपमानात्—' इति शास्त्रेण कर्मण्येव क्यचोऽनुशासनादित्यर्थः ॥

अत्र क्षीरोदमिवात्मानमाचरन्तीत्युपमेय आत्मा साधारणधर्मः शुक्लता च लुप्तौ ।

त्रिलोपे च समासगा ॥ २२ ॥

यथा—

'राजते मृगलोचना ।'[1]

अत्र मृगस्य लोचने इव चञ्चले लोचने यस्या इति समासे उपमाप्रतिपादकसाधारणधर्मोपमानानां लोपः ।

तेनोपमाया भेदाः स्युः सप्तविंशतिसंख्यकाः ।

पूर्णा षड्विधा लुप्ता चैकविंशतिविधेति[2] मिलित्वा सप्तविंशतिप्रकाः

दिति । अनुशासनाभावादित्यर्थः । त्रिलोपे धर्मोपमानेवादिलोपे । **समास इति** । अत्र लोचनपदस्यैव समासे लोपो विहितः । अन्ययोस्तु गम्यमानत्वम् । **तेनेति** । उक्तप्रकारप्रपञ्चेनेत्यर्थः । **एकविंशतिविधेति** । धर्मलोपे दश, उपमानलोपे द्वे,

---

1. **मृगलोचनेति** । मृगलोचने इव लोचने यस्या इति विग्रहे 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्च' इति वार्तिकेन बहुव्रीहौ उपमानवाचके 'मृगलोचने' इति सप्तम्यन्ते पूर्वपदे 'लोचने' इत्युत्तरपदस्य लोपः । एवं च लोचनेत्युपमानस्यानुशासनिक-इवशब्द-चञ्चलत्वलक्षणसाधारणधर्मयोश्चैच्छिको लोप इति त्रिलोपे समासगा । यद्यप्यत्र लोचनपदस्यैवोपमानवाचकत्वं तथाप्यवयवधर्मेण समुदायस्य व्यपदेशान्मृगलोचनपदस्योपमानपूर्वपदत्वमवधेयम् । 'अनेकमन्यपदार्थे' इति सूत्रेण समानाधिकरणानामेव बहुव्रीहिविधाने क्वचिदुत्तरपदलोपार्थं क्वचिद्व्यधिकरणानामपि बहुव्रीहिविधानार्थमुत्तरपदलोपार्थं च 'सप्तमी–' इत्यादिवार्तिकारम्भः । तत्र सप्तमीपूर्वपदस्य यथा—कण्ठेस्थः कालोऽस्य कण्ठेकालः । 'अमूर्धमस्तकात्–' इति सप्तम्या अलुक् । पदयोः सामानाधिकरण्याद् बहुव्रीहौ सिद्धेऽप्युत्तरपदलोपार्थम् । उपमानपूर्वपदस्य यथा—उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः । अवयवधर्मेण समुदायस्य व्यपदेशाद् उष्ट्रस्योपमानतेत्युपमानपूर्वं उष्ट्रमुखशब्दः । उपमानोपमेयवृत्तित्वात्पदयोर्वैयधिकरण्यमिति बहुव्रीह्यर्थमुत्तरपदलोपार्थं च वचनमिति भाष्यकैयटयोः स्पष्टम् । मृगपदस्य तल्लोचने लक्षणेति मते तु नेदमुदाहरणम् ॥

2. **एकविंशतिविधेति** । प्रायोऽभिप्रायमेतत् । तथाहि—'कोकिल इवालपति कोकिलालापिनी' इत्यत्र 'कर्तुर्युपमाने' इति णिनिप्रत्यये, 'चञ्चा पुरुषः सोऽयं यः स्वहितं नैव जानीते' इत्यत्र चञ्चा तृणपुरुष इवेत्यस्मिन्नर्थे 'इवे प्रतिकृतौ' इति कन्प्रत्यये 'लुम्मनुष्ये' इति लुब्विधाने, 'आह्वादि वदनं तस्याः शरद्राकाशशाङ्कति' इत्यत्र आचारक्विपि पदान्तरेण प्रतिपादिते समाने धर्मेऽपि वाचकलुप्ता संभवति । 'यच्चोराणामस्य च समागमो यच्च तैर्वधोऽस्य कृतः । उपनतमेतदकस्मादासीद्वत काकतालीयम् ॥' इत्यत्र काकतालशब्दौ वृत्तिविषये काकतालसमवेतक्रियावार्तिनौ । तेन काकागमनमिव तालपतनमिव काकतालमितीवार्थे 'समासाच्च तद्विषयात्' इति ज्ञापकात्सुप्सुपेति समासः । उभयत्रो-

रोपमा । एषु चोपमाभेदेषु मध्येऽलुप्तसाधारणधर्मेषु भेदेषु विशेषः प्रतिपाद्यते—

एकरूपः क्वचित्कापि भिन्नः साधारणो गुणः ॥ २३ ॥
भिन्ने बिम्बानुबिम्बत्वं शब्दमात्रेण वा भिदा ।

एकरूपे यथा उदाहृतम्—'मधुरः सुधावदधरः–' इत्यादि ।

बिम्बप्रतिबिम्बत्वे यथा—

'भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥'

औपम्यवाचिलोपे द्वे, धर्मवादिलोपे च द्वे, उपमेयलोपे धर्मोपमेयलोपे धर्मवाद्युपमानलोपे चैकैकेत्येकविंशतिविधेत्यर्थः । **एकरूप इति** । जातिवन्नानाव्यक्तिष्वेक एव । गुणादिरित्युपाधिशक्तिवादिमतेनेदम् । यद्वा एकजातीय इत्यर्थः । एवं च क्वचिदेकजातीयत्वेन क्वचित्सादृश्यत्वेनैकोपचारादुभयवृत्तित्वं विवक्षणीयम् । गुणः साधर्म्यम् । भिन्ने भिन्नसाधारणधर्मे । बिम्बस्य सादृश्यस्य अनुबिम्बत्वं प्रणिधानगम्यत्वम् । एकधर्मस्यैकशब्देनोपादानं प्रायेण क्वचिच्छब्देनाप्युपादानं संभवतीत्याह—**शब्दमात्रेणैवेति** । क्रमेणोदाहरति—**मधुर इति** । एतद्गुणैकत्वे । क्रियैकत्वे यथा—'स्त्रीव गच्छति षण्ढोऽयं वक्त्येषा स्त्री पुमानिव ।' **भल्लेति** । भल्लेन बाणविशेषेण अपवर्जितैः कृत्तैः । तेषां यवनानाम् । तस्तार छादयामास । सरघा मधुम-

---

पमेयं क्रमेण देवदत्तागमनं चोरसमागमश्च । तेन देवदत्तचोरसमागमः काकतालसमागमसदृश इति फलति । ततः 'काकतालमिव काकतालीयम्' इति द्वितीयस्मिन्निवार्थे 'समासाच्च तद्विषयात्' इति छः । ततश्च पतता तालफलेन यथा काकस्य वध एवं समागतैश्चोरैर्देवदत्तस्य वध इति तत्त्वम् । यदाह भगवान्भाष्यकारः—'एवं तर्हि द्वावित्वार्थौ काकागमनमिव तालपतनमिव काकतालं काकतालमिव काकतालीयम्' इति । एतच्च विवृतं भाष्यप्रदीपकृता—'तत्र काकागमनं देवदत्तागमनस्योपमानम्, तालपतनं दस्यूपनिपातस्य । तालेन तु यः काकस्य वधः स देवदत्तस्य दस्युना वधस्योपमानमिति' इति । अकस्मादुपनतत्वं च समानो धर्मः । तदाह वृत्तिकारः—'अतर्कितोपनतं चित्रीकरणमुच्यते' इति । ततश्चात्र काकागमनतालपतनसमागमरूपस्य पतत्तालकृतकाकवधरूपस्य चोपमानस्यानुपादानात्प्रत्ययार्थोपमायामुपमानलोपः समासार्थोपमायां वाचकोपमानलोपो द्रष्टव्यः । 'पटुपटुर्देवदत्तः' इत्यत्र 'प्रकारे गुणवचनस्य' इत्यनेन सादृश्ये द्विर्भावे 'कर्मधारयवदुत्तरेषु' इत्यनेन समासे धर्मलुप्तेयम् । यो हि शास्त्रादिष्वपटुरेव पटुवदभिनयति स उच्यते पटुपटुरिति । पटुसदृश इत्यर्थः । विस्तरस्तु रसगङ्गाधरादावनुसंधेयः ॥

1. **बिम्बप्रतिबिम्बेति** । वस्तुतो भिन्नयोरप्युपमानोपमेयधर्मयोः परस्परसादृश्यादभिन्नयोः पृथगुपादानं बिम्बप्रतिबिम्बपदवाच्यम् । लोको हि दर्पणादौ बिम्बात्प्रतिबिम्बस्य भेदेऽपि मदीयमेवात्र वदनं संक्रान्तमित्यभेदेनाभिमन्यते । अन्यथा हि प्रतिबिम्बदर्शने कृशोऽहं स्थूलोऽहमित्याद्यभिमानो नोदियात् ॥

अत्र 'श्मश्रुलैः' इत्यस्य 'सरघाव्याप्तैः' इति दृष्टान्तवत्प्रतिबिम्बनम्। शब्दमात्रेण भिन्नत्वे यथा—

'स्मेरं विधाय नयनं विकसितमिव नीलमुत्पलं मयि सा।
कथयामास कृशाङ्गी मनोगतं निखिलमाकूतम्।'

अत्रैके एव स्मेरत्वविकसितत्वे प्रतिवस्तूपमावच्छब्देन निर्दिष्टे।

एकदेशविवर्तिन्युपमा वाच्यत्वगम्यते ॥ २४ ॥
भवेतां यत्र साम्यस्य

यथा—

'नेत्रैरिवोत्पलैः पद्मैर्मुखैरिव सरःश्रियः।
पदे पदे विभान्ति स्म चक्रवाकैः स्तनैरिव ॥'

अत्रोत्पलादीनां नेत्रादीनां सादृश्यं वाच्यं सरःश्रीणां चाङ्गनासाम्यं गम्यम्।

कथिता रसनोपमा[1]।

क्षिका ताभिर्व्याप्तैः क्षौद्रपटलैर्मधूत्पत्तिस्थानैः[1] 'मौचाक' इति प्रसिद्धैः। **श्मश्रुलैरित्यस्येति**। दृष्टान्तालंकारे यथा वाक्यार्थयोरिवाद्यभावात्सादृश्यं प्रणिधानगम्यं तथात्रापि श्मश्रुसरघयोः। अत्र श्यामलत्वविशेषः सादृश्यहेतुः। एवं च 'सादृश्यहेतू गुणक्रिये' इत्यस्योपलक्षणतया द्रव्यस्यापि साधारणधर्मत्वमवगन्तव्यम्। **स्मेरमिति**। आकूतमभिप्रायम्। **एके एवेति**। संख्यार्थादेकशब्दाद्विवचनासंभवादयं पाठो न युक्तः। किं तु 'अत्रैकमेव प्रफुल्लं प्रतिवस्तूपमावद् विभिन्नाभ्यां स्मेरविकसितशब्दाभ्यां निर्दिष्टम्' इति पाठो बोद्धव्यः। एकक्रियायाः शब्दभेदेनोपादाने यथा—'प्रकाशते मुखं तस्याश्चन्द्रमा दीप्यते यथा।' नन्वत्र वाक्यैक्याभावात्कथमुपमेति चेत्, न। यथा 'अमावास्यायां श्राद्धं कुर्याद्, रात्रौ श्राद्धं न कुर्यात्' इत्यत्र संभेदेनान्यतरवैयर्थ्यमिति न्यायेन रात्रीतरत्रामावास्यायां श्राद्धं कुर्यादित्येकवाक्यत्वं तथात्राप्येकवाक्यत्वस्वीकारात्। प्राचीनैरस्वीकृतामपि प्रमाणसिद्धामेकदेशविवर्तिनीमुपमामाह—**एकदेशेति**। यत्र वाक्ये कस्यचित्साम्यं वाच्यं कस्यचिद्गम्यं तत्रैकदेशवर्तिन्युपमेत्यर्थः। इयं चैकदेशविवर्तिरूपकवत्साङ्गस्याङ्गिनः सादृश्य एव संभवति। **नेत्रैरिवेति**। अङ्गना इव सरःश्रियः पदेपदे प्रतिवस्तु विभान्ति स्म। अत्र नेत्रादित्रयमुपमानस्य उत्पलादित्रयमुपमेयस्याङ्गम्। रसनोपमामाह—**कथि-**

---

1. **रसनेति**। यथा खलु रसनायां पूर्वत्वमधिगतायाः क्षुद्रघण्टिकायाः परग्रथनावसरे परत्वं तथैवात्र पूर्वपूर्वोपमेयस्योपमानत्वसंपादनाय परपरप्राप्तिरिति तत्त्वम्॥

---

१. 'मधूत्पत्तिस्थानैः' इति पुस्तकान्तरे नास्ति.

यथोर्ध्वमुखमेयस्य यदि स्यादुपमानता ॥ २५ ॥

यथा—

'चन्द्रायते शुक्रुरुचापि हंसो हंसायते चारुगतेन कान्ता ।
कान्तायते स्पर्शसुखेन वारि वारीयते स्वच्छतया विहायः ॥'

[1]मालोपमा यदेकस्योपमानं बहु दृश्यते ।

यथा—

'वारिजेनेव सरसी शशिनेव निशीथिनी ।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा ॥'

क्वचिदुपमानोपमेययोर्द्वयोरपि प्रकृतत्वं दृश्यते—

'हंसश्चन्द्र इवाभाति जलं व्योमतलं यथा ।
विमलाः कुमुदानीव तारकाः शरदागमे ॥'

'अस्य राज्ञो गृहे भान्ति भूपानां ता विभूतयः ।
पुरंदरस्य भवने कल्पवृक्षभवा इव ॥'

तेति । यथोर्ध्वमिति । पूर्वोपमायां यदुपमेयमुत्तरोपमायां तस्योपमानता यदि स्यादित्यर्थः । इयं साधारणधर्मस्याभेदे भेदे च संभवतीति द्विधा । तत्राद्या यथा—'महीभृतो वदान्यस्य भारतीवामला मतिः । चेष्टा मतिरिव स्वच्छा चेष्टेव गुणसंततिः ॥' अत्र स्वच्छत्वमेकमेव साधारणो धर्मः । द्वितीयामाह—**चन्द्रायत इति ।** चन्द्र इवाचरतीत्यर्थः । मालोपमामाह—**मालोपमेति ।** बह्वित्येकाधिकपरम् । तेन 'तां हंसमालाः शरदीव गङ्गां महौषधीर्नक्तमिवात्मभासः । स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ॥' इत्यादावुपमाद्वयेऽपि मालात्वमक्षतम् । इयमपि पूर्ववद्विधा । तत्राद्यामाह—**वारिजेनेति ।** अत्र मनोहरत्वमेकमेव सादृश्यहेतुः । द्वितीया यथा—'ज्योत्स्नेव नयनानन्दः सुधेव मदकारणम् । प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी ॥' अत्र नेत्रानन्दजननादयो विभिन्नधर्मा एव सादृश्यानां हेतवः । उपमेयस्य प्रकृतत्वमुपमानस्याप्रकृतत्वं प्रायिकमित्यभिप्रायेणाह—**क्वचिदिति ।** प्रकृतत्वं वर्णनीयस्योत्कर्षाधायकत्वेनाकाङ्क्षितत्वम् । **हंस इति ।** हंसादय इव चन्द्रादयोऽपि वर्णनीयशरत्कालस्योत्कर्षाधायकत्वेनाकाङ्क्षिताः । 'विमलाः' इति पाठो न रमणीयः, भिन्नलिङ्गतया कुमुदानीत्युपमानान्वयायोग्यत्वात् । तस्मात् 'लसन्ति' इति पाठो द्रष्टव्यः । प्राचीनसंमतानाक्षेपोपमादीनुपमाप्रकारान्वैचित्र्यातिशयाधायकत्वेनोपेक्षमाण आह—**अस्य राज्ञ इति ।** कल्पवृक्षभवाः कल्पवृक्षोत्पन्ना

---

1. **मालेति ।** यथा काचिन्माला सजातीयैः कुसुमैः काचिच्च विजातीयैर्निर्मीयते तथैवेयमपि सजातीयैर्विजातीयैर्वा बहुभिरुपमानैरिति भावः । एकस्य उपमेयस्येत्यर्थः ॥

---

१. 'यथा' पुस्तकान्तरे नास्ति. २. 'वस्तुतस्तु प्रकृतयोरेकधर्माभिसंबन्धरूपतुल्ययोगितैवेदं न तूपमा । एवं चात्र यथेवशब्दप्रयोगस्तुल्ययोगिताद्योतकत्वार्थत्वेन न गौण एवेत्यवधेयम् ।' इति मुद्रितपुस्तकेऽधिकम्.

अत्रोपमेयभूतविभूतिभिः 'कल्पवृक्षभवा इव' इत्युपमानभूता विभूतय आक्षिप्यन्त इत्याक्षेपोपमा। अत्रैव 'गृहे' इत्यस्य 'भवने' इत्यनेन प्रतिनिर्देशात्प्रतिनिर्देश्योपमा। इत्यादयश्च न लक्षिताः। एवंविधवैचित्र्यस्य सहस्रधा दर्शनात्।

उपमानोपमेयत्वमेकस्यैव त्वनन्वयः[1] ॥ २६ ॥

अर्थादेकवाक्ये।

यथा—

'राजीवमिव राजीवं जलं जलमिवाजनि।
चन्द्रश्चन्द्र इवातन्द्रः शरत्समुदयोद्यमे ॥'

अत्र राजीवादीनामनन्यसदृशत्वप्रतिपादनार्थमुपमानोपमेयभावो वै-

विभूतय इत्यर्थः। **आक्षिप्यन्त इति**। 'कल्पवृक्षभवाः' इति विशेषणेनोपस्थिता विभूतय एवाक्षिप्यन्त इत्यर्थः। **एवंविधेति**। यथाकथंचिद्वैचित्र्यविशेषाणां परिच्छेत्तुमशक्यतया तत्प्रयोजकप्रकाराणामपि परिच्छेदो न संभवतीति भावः। अनन्वयालंकारमाह—**उपमानेति**। नन्वेतद्रसनोपमायामुपमेयोपमायां चातिव्याप्तमत आह—**अर्थादिति**। पारिशेष्यादित्यर्थः। रसनोपमायां 'यथोर्ध्वं–' इत्यनेन उपमेयोपमायां 'पर्यायेण–' इत्यनेनानेकवाक्यलाभादेकवाक्य एवास्य विषय इति भावः। ननूपमेयोपमायां 'द्वयोः' इत्युपादानात्कथमतिव्याप्तिरिति चेत्, न। तत्र प्रत्येकपदार्थस्यापि पर्यायेणोपमानोपमेयसंभवात्। अतन्द्रो निर्मलः। ननूपमानोपमेयभावो भेद एव संभवति, कथमेकस्यैव स इत्यत आह—**राजीवादीना-**

---

1. **अनन्वय इति**। न विद्यतेऽन्वय उपमानान्तरेण संबन्धो यत्र सोऽन्वयः। स च पूर्णो लुप्तश्चेति द्विविधः। पूर्णस्तूपमावत्षड्विधोऽपि संभवति। यथा—'गङ्गा हृद्या यथा गङ्गा गङ्गा गङ्गेव पावनी। हरिणा सदृशो बन्धुर्हरितुल्यः परो हरिः॥ गुरुवद्गुरुराराध्यो गुरुवद्गौरवं गुरोः॥' लुप्तेऽपि धर्मलुप्तः पञ्चविधोऽपि संभवति। प्राग्युक्तसार्धश्लोके 'गङ्गा राजन्यथा गङ्गा गङ्गा गङ्गेव सर्वदा। हरिणा सदृशो विष्णुर्विष्णुतुल्यः सदा हरिः॥ गुरुवद्गुरुरास्तेऽस्मिन्मण्डले गुरुवद्गुरोः॥' इति पदान्तरदाने तथा वाचकलुप्तः। 'रामायमाणः श्रीरामः सीता सीतामनोहरा। ममान्तःकरणे नित्यं विहरेतां जगद्गुरू॥' इत्यत्र क्यङ्समासयोः। एवम् 'लङ्कापुरादतितरां कुपितः फणीव निर्गत्य जातु पृतनापतिभिः परीतः। क्रुद्धं रणे सपदि दाशरथिं दशास्यः संरब्धदाशरथिदर्शमहो ददर्श॥' एवं कर्तृणमुलादावप्यूह्यम्। 'अम्बरत्यम्बरं यद्वत्समुद्रोऽपि समुद्रति। विक्रमार्कमहीपाल तथा त्वं विक्रमार्कसि॥' इत्यत्र वाक्यार्थावयवेषु त्रिष्वन्वयेषु धर्मवाचकयोर्लोपः। मुख्यवाक्यार्थस्त्वनन्वयफलेन निरुपमत्वेन समानधर्मेण प्रयोजितो मालोपमैव। 'एतावति प्रपञ्चेऽस्मिन्सदेवासुरमानुषे। केनोपमीयतां तज्ज्ञै रामो रामपराक्रमः॥' अत्र वाचकधर्मोपमानां लोपः॥

वक्षिकः । 'राजीवमिव पाथोजम्' इति चास्य लाटानुप्रासाद्विविक्तो विषयः । किं त्वत्रोचितत्वादेकशब्दप्रयोग एव श्रेयान् । तदुक्तम्—

'अनन्वये च शब्दैक्यमौचित्यादानुषङ्गिकम् ।
अस्मिंस्तु लाटानुप्रासे साक्षादेव प्रयोजकम् ॥' इति ।

पर्यायेण द्वयोरेतदुपमेयोपमा[1] मता ।

एतदुपमानोपमेयत्वम् । अर्थाद्वाक्यद्वये ।

यथा—

'कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः ।
धरणीव धृतिर्धृतिरिव धरणी सततं विभाति बत यस्य ॥'

अत्रास्य राज्ञः श्रीबुद्ध्यादिसदृशं नान्यदस्तीत्यभिप्रायः ।

सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते ॥ २७ ॥

[2]यथा—

'अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलम् ।
स्मरामि वदनं तस्याश्चारु चञ्चललोचनम् ॥'

मिति । वैवक्षिक आरोप्य विवक्षितः । ननु लाटानुप्रासविषयविनिर्मोकेणास्य विषयो न संभवतीति तद्बाधकोऽयमेव स्यादित्यत आह—**राजीवमिति । विविक्तो विषय इति** । तथा चायं संभवद्विषयान्तरत्वान्न बाधक इति भावः । उचितत्वादुपमानोपमेयाभेदस्य झटिति प्रतीत्युपयुक्तत्वात् । श्रेयानतिप्रशस्तो न तु नियतः । औचित्यात्प्राशस्त्यात् । आनुषङ्गिकमनियतम् । साक्षादेव स्वयमेव । प्रयोजकं वैचित्र्याधायकम् । उपमेयोपमामाह—**पर्यायेणेति** । क्रमेणेत्यर्थः । रसनोपमायामेकस्यैव क्रमेणोपमानोपमेयभाव इति तद्वारणाय 'द्वयोः' इति । 'मुखमिव कमलम्' इत्यादौ युगपदेव द्वयोरुपमानोपमेयत्वमिति तद्वारणाय 'पर्यायेण' इति । अत्र सादृश्यहेत्वभेदेऽप्यभेदो बोध्यम् । तेन 'पल्लवमिवारुणं करतलं करतलमिव कोमलं पल्लवम्' इत्युपमाद्वयव्यवच्छेदः । अस्यां वैचित्र्यं दर्शयति—**अस्य राज्ञ इति** । स्मरणालंकारमाह—**सदृशेति** । सदृशानुभवस्य स्मृतिं प्रति संस्कारोद्बोधकत्वेन कारणत्वम् । संस्कारस्तु वस्त्वनुभवादुत्पन्नः । **सदृशेति** । संबन्धिज्ञानादिजन्यस्मृति-

---

1. **उपमेयोपमेति** । पूर्ववाक्यप्रतिपादितसाधारणधर्ममेव साधारणधर्मीकृत्य पूर्ववाक्यप्रतिपादितेनोपमेयेन पूर्ववाक्यप्रतिपादितस्योपमानस्योपमा उपमेयोपमा । उपमेयेनोपमा यत्रेति वा ॥

2. **यथेति** । यथा वा—'पूर्णेन्दुना मेघलवाङ्कितेन द्यां मुद्रिता सुन्दरि वीक्ष्यमाणः । विवाहहोमानिलधूमलेखामीलत्कपोलं भवती स्मरामि ॥' इति ॥

---

१. 'भावः' क.

'मयि सकपटं—' इत्यादौ च स्मृतेः सादृश्यानुभवं विनोत्थापितत्वान्नायमलंकारः । राघवानन्दमहापात्रास्तु वैसादृश्यात्स्मृतिमपि स्मरणालंकारमिच्छन्ति । तत्रोदाहरणं तेषामेव यथा—

'चिरीषमृद्वी गिरिषु प्रपेदे यदा यदा दुःखशतानि सीता ।
तदा तदास्याः सदनेषु सौख्यलक्षाणि दध्यौ गलदस्रु रामः ॥'

[1]रूपकं रूपितारोपाद्वि (पो वि) षये निरपह्नवे ।

वारणाय । तेन 'भवदभिमतवस्तून्याकिरन्त्याः समन्तात्सरसिजदलतल्पं मर्मरं कल्पयन्त्याः । हतकरुण वयस्या जीवनोपायमस्याः स्मरणमविरलं ते हन्त संपादयन्ति ॥' इत्यादौ संबन्धिज्ञानजन्यस्मरणस्य नालंकारत्वम् । एवं चिन्ताजन्यस्मृतेरपि नालंकारत्वमित्याह—**मयीति** । स्मृत्याख्यव्यभिचारिभावस्योदाहरणमिदम् । वैसादृश्याद्विरुद्धानुभवात् । तेषां राघवानन्दमहापात्राणाम् । **शिरीषेति** । गलदस्रु यथा स्यात्तथा दध्यौ स्मृतवान् । अत्र वैपरीत्यसंबन्धेन संबन्धिनो ज्ञानं संस्कारोद्बोधकम् । रूपकालंकारमाह—**रूपकमिति**[1] । अत्र[2] 'रूपितारोपात्' इति पञ्चम्यन्तपाठः प्रामादिकः । अर्थासंगतेः । प्रथमान्तपाठस्तु रमणीयः । उपमेये उपमानाभेदारोपस्यैव रूपकत्वाङ्गीकाराद् यत्र तत्प्रयुक्तस्यार्थान्तरस्य । तदुक्तं [3]चण्डीदासेन रूपकप्रकरणे—'अलंकारश्चात्राहार्यस्तादात्म्यारोप इत्यवधेयम्' इति । [4]न चातिसाम्यादपह्नुतभेदयोरभेदो रूपकमिति काव्यप्रकाशदर्शनात्तदानीं भेदप्रतीतेरभावात्कथमाहार्यत्वम् । बाधकालीनेच्छाजन्यज्ञानस्यैवाहार्यत्वाङ्गीकारादिति वाच्यम् । शाब्दस्य भेदानुभवस्य तदानीमसत्त्वेऽपि आनुमानिकस्य मानसस्य भेदप्रत्ययस्य सत्त्वात् । ननु 'गौर्वाहीकः' इत्यादावपह्नुतभेदयोरुपमानोपमेययोस्तादात्म्यारोपस्य कथं न रूपकत्वमिति न वाच्यम् । तस्य विच्छित्तिविशेषाजनकत्वेन रसाद्युपकारकत्वाभावात् । केचित्तु—विषयस्य प्राङ्निर्देशे रूपकस्य व्यवहारः, परनिर्देशे तु गौणी व्यवहारः' इत्याहुः तन्न । 'निर्माणकौशलं धातुश्चन्द्रिका लोकचक्षुषाम् । क्रीडागृहमनङ्गस्य सेयमिन्दीवरेक्षणा ॥' इत्यादौ विषयस्य प्राङ्निर्देशाभावेऽपि रूपकव्यवहारात् । रूपितस्य अपह्नवभेदोपमानस्य निरपह्नवे प्रतिषेधशून्ये विषये उपमेये आरोपस्तादात्म्यारोपो रूपकमित्यर्थः । अत एवोक्तं काव्यप्रका-

---

1. **रूपकमिति** । रूपयत्युपमानोपमेययोरभेदारोपेणैकतां नयतीति रूपकम् । यथा 'मुखं चन्द्रः' इत्यादौ मुखत्वचन्द्रत्वरूपधर्मवत्तयोपस्थितयोर्मुखचन्द्रयोरभेदारोपः ॥

---

१. 'प्रकृतगोपनमपह्नवः, ततः शून्ये विषये उपमेये रूपितस्योपमानस्यारोपात्तादात्म्याध्यासाद्रूपकनामालंकार इत्यर्थः । ननूपमानोपमेययोर्भेदमनुभवता कथं तादात्म्याध्यास इति चेत्, न आहार्यस्यैव तादृशारोपस्य रूपकालंकारत्वस्वीकारात् ॥' इत्यधिकं पुस्तकान्तरे. २. 'अत्र—' इत्यादिः '—अर्थान्तरस्य ।' इत्यन्तः पाठः पुस्तकान्तरे नास्ति. 'चण्डीदासेन' इति नास्ति पुस्तकान्तरे. ४. 'न चाति—' इत्यादिः 'य उपमानोपमेययोः' इति ।' इत्यन्तः पाठः पुस्तकान्तरे नास्ति.

रूपित–' इति परिणामाद् व्यवच्छेदः । एतच्च तत्प्रस्तावे[1] विवेचयिष्यामः[2] । 'निरपह्नवे' इत्यपह्नुतिव्यवच्छेदार्थम् ।

तत्परम्परितं साङ्गं निरङ्गमिति च त्रिधा ॥ २८ ॥

तद्रूपकम्[3] ।

तत्र

यत्र कस्यचिदारोपः परारोपणकारणम् ।
तत्परम्परितं श्लिष्टाश्लिष्टशब्दनिबन्धनम् ॥ २९ ॥
प्रत्येकं केवलं मालारूपं चेति चतुर्विधम् ।

तत्र श्लिष्टशब्दनिबन्धनं केवलपरम्परितं यथा—

'आहवे जगदुद्दण्डराजमण्डलराहवे ।
श्रीनृसिंहमहीपाल स्वस्त्यस्तु तव बाहवे ॥'

अत्र राजमण्डलं नृपसमूह एव चन्द्रबिम्बमित्यारोपो राजबाहो राहुत्वारोपो निमित्तम् । मालारूपं[4] यथा—

'पद्मोदयदिनाधीशः सदागतिसमीरणः ।
भूभृदावलिदम्भोलिरेक एव भवान्भुवि ॥'

शकारेण—'रूपकं स्वादाभेदोय उपमानोपमेययोः' इति । **परिणामादिति** । 'अस्य' इति शेषः । एतच्च रूपकपरिणामयोर्वैलक्षण्यं च । परिणामे ह्यारोप्यमाणस्य प्रकृतोपयोगित्वेनाप्रकृतत्वनियतोपमानत्वस्य बाधाद्रूपितपदेन तद्व्यवच्छेद इति भावः । विषय इत्यस्य वाच्य इति विशेषणं बोध्यम् । तेन 'लतामूले लीनो हरिणपरिहीनो हिमकरः स्वयं हाराकारा गलति जलधारा कुवलयात् । धुनीते बन्धूकं तिलकुसुमजन्मा हि पवनो बहिर्द्वारे पुण्यं परिणमिति कस्यापि कृतिनः ॥' इत्यादौ निगीर्णविषये मुखादौ निष्कलङ्कचन्द्राद्युपमानतादात्म्यारोपरूपातिशयोक्तौ नातिव्याप्तिः । रूपकप्रभेदानाह—**तदिति** । कार्यकारणभावैरूपा परम्परा संजाता अस्येति परम्परितम् । साङ्गं सावयवम् । निरङ्गं निरवयवम् । परम्परितरूपकमाह—**यत्रेति**। तस्यापि द्वैविध्यमाह—**श्लिष्टेति** । श्लिष्टशब्दनिबन्धनमश्लिष्टशब्दनिबन्धनं चेत्यर्थः । पुनरपि तस्य द्वैविध्यमाह—**प्रत्येकमिति** । त्रिरुक्तभेदयोरेकैकमित्यर्थः । **आहव इति** । जगदुत्कृष्टदण्डं यस्मात्तत्संबोधने तथा । **इत्यारोप इति** । अत्र श्लेषेण रूप्यरूपकयोर्द्वयोरेवाभिधानं शब्दसाम्यरूपसादृश्यमूलं प्रथमं रूपकम् । तेन राजमण्डलपदवाच्योपमर्दकलरूपसादृश्यनिबन्धनं द्वितीयं रूपकमिति भावः ।

---

1. **मालेति** । श्लिष्टं मालारूप परम्परितं रूपकमित्यर्थः ॥

---

१. 'परिणामप्रस्तावे' क-ख-ग. २. 'विचारयिष्यामः' क. ३. 'माला' क-ख. ४. 'भाव' इति नास्ति क-पुस्तके. ५. 'अत्र–' इत्यादिः '–भावः' इत्यन्तः पाठः पुस्तकान्तरे नास्ति.

अत्र पद्माया उदय एव पद्मानामुदयः, सतामागतिरेव सदागमनम्, भूभृतो राजान एव पर्वता इत्याद्यारोपो राज्ञः सूर्यत्वारोपनिमित्तम्।

अश्लिष्टशब्दनिबन्धनं केवलं यथा—

'पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः।
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहवः॥'

अत्र त्रैलोक्यस्य मण्डपत्वारोपो हरिबाहूनां स्तम्भत्वारोपो निमित्तम्।

मालारूपं यथा—

'मनोजराजस्य सितातपत्रं श्रीखण्डचित्रं हरिदङ्गनायाः।
विराजते व्योमसरः सरोजं कर्पूरपूरप्रभमिन्दुबिम्बम्॥'

अत्र मनोजादे राहुत्वाद्यारोपश्चन्द्रबिम्बस्य सितातपत्रत्वाद्यारोपे निमित्तम्। 'तत्र च राजभुजादीनां राहुत्वाद्यारोपो राजमण्डलादीनां चन्द्रमण्डलत्वाद्यारोपो निमित्तम्' इति केचित्।

अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत्॥ ३०॥
समस्तवस्तुविषयमेकदेशविवर्ति च।

तत्र

आरोप्याणामशेषाणां शाब्दत्वे प्रथमं मतम्॥ ३१॥

प्रथमं समस्तवस्तुविषयम्। यथा—

'रावणावग्रहक्लान्तमिति वागमृतेन सः।
अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे॥'

अत्र कृष्णस्य मेघत्वारोपे वागादीनाममृतत्वादिकमारोपितम्।

पद्मायाः संपदः। उदयं उपार्जनम्। पद्मपक्षे प्रकाशः। राजमण्डलादीनां सरूपशब्दवाच्यत्वं साम्यं प्रसिद्धमारोपकारणम्। बाहुराह्वादीनां तु तादृशधर्मान्तरमप्रसिद्धमित्यस्वरसः 'केचित्' इत्यनेन सूचितः। साङ्गरूपकमाह—**अङ्गिन इति**। रूपणमुपमानतादात्म्यारोपः। तस्य द्वैविध्यमाह—**समस्तेति**। समस्तानि वस्तूनि आरोप्यमाणानि विषयाः शब्दोपात्तानि यत्र तत्। **आरोप्याणामिति**। बहुवचनमविवक्षितम्। 'सूत्रे लिङ्गं संख्या कालश्चातन्त्राणि' इति न्यायात्। तेन 'दन्तांशुके शरालीभिस्तस्या भाति मुखाम्बुजम्' इत्यादेः संग्रहः। शाब्दत्वे शब्दोपात्तत्वे। रावण एवावग्रहो वृष्टिप्रतिबन्धकस्तेन क्लान्तम्। वागमृतेन वाग्जलेन। अभिवृष्य प्रीणयित्वा, पक्षे अभिषिच्य। मरुद्देव एव सस्यं व्रीह्यादि। कृष्णो विष्णुरेव मेघः। अत्र कृष्णोऽङ्गी, वागाद्यङ्गम्। मेघत्वारोपवत् मेघत्वारोपस्य शाब्दत्ववत् अमृतत्वाद्यारोपित-

---

१. 'शब्द' इति नास्ति क-ख-पुस्तकयोः. २. 'रूपं' इति नास्ति क-पुस्तके. ३. 'एषु च' घ.

यत्र कस्यचिदार्थत्वमेकदेशविवर्ति[1] तत् ।

कस्यचिदारोप्यमाणस्य । यथा—

'लावण्यमधुभिः पूर्णमास्यमस्या विकस्वरम् ।
लोकलोचनरोलम्बकदम्बैः केन दीयते ॥'

अत्र लावण्यादौ मधुत्वारोपः शाब्दः, मुखस्य पद्मत्वाद्यारोप आर्थः। न चेयमेकदेशविवर्तिन्युपमा विकस्वरत्वधर्मस्यारोप्यमाणे पद्मे मुखतया वर्तमानान्मुखे चोपचरितत्वात् ।

निरङ्गं केवलस्यैव रूपणं तदपि द्विधा ॥ ३२ ॥
मालाकेवलरूपत्वात्

तत्र मालारूपं निरङ्गं यथा—

'निर्माणकौशलं धातुश्चन्द्रिका लोकचक्षुषाम् ।
क्रीडागृहमनङ्गस्य सेयमिन्दीवरेक्षणा ॥'

त्वस्य शाब्दत्वम्। एकदेशविवर्तिसाङ्गरूपकमाह—**यत्रेति** । आर्थत्वमर्थवशलभ्यत्वम् । 'कस्यचित्' इत्यनेनान्यस्य शाब्दत्वलाभः । 'श्रौता आर्थाश्च ते तस्मिन्नेकदेशविवर्ति तत्' इति काव्यप्रकाशदर्शनाच्छाब्दत्वस्याप्येतल्लक्षणघटकत्वं बोध्यम् । रोलम्बो भ्रमरः । 'इन्दिन्दिरस्तु रोलम्बश्चञ्चरीको मधुव्रतः' इति हारावली । **न चेयमिति** । समभिव्याहृतपदार्थस्य मुख्यया वृत्त्यान्वयसंभव एवैकदेशविवर्तिनोरुपमारूपकयोरन्यतराङ्गीकारे बीजम् । 'मुखपद्मं विकस्वरम्' इत्युपमाङ्गीकारे क्रियाविशेषशालित्वरूपविकस्वरत्वस्य मुखे बाधात्कान्तिविशेषे लक्षणाप्रसङ्गः । 'मुखमेव पद्मम्' इति रूपकाङ्गीकारे तु विशेष्ये पद्मे विकस्वरत्वस्य मुख्यया वृत्त्यान्वयः संभवति । 'दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी । केशपाशालिवृन्देन सुवेषा हरिणेक्षणा ॥' इत्यत्र रूपकाङ्गीकारे भूषणादिकृतशोभाविशेषस्य लतायां बाधाच्छोभामात्रे लक्षणाप्रसङ्गः । उपमाङ्गीकारे तु मुख्यया वृत्त्यान्वयः संभवतीति । एतादृशं विशेषमवलोक्यैव केचिदेकदेशविवर्तिनीमुपमामेकदेशविवर्तिरूपक एवान्तर्भावयन्ति । केवलस्यैव न तु साङ्गस्य । तदपि निरङ्गरूपकमपि । **मालेति** । मालारूपत्वात् केवलरूपत्वाच्चेत्यर्थः । निर्माणकौशलं वराङ्गनासृष्टिव्युत्पत्तिः । सौन्दर्यातिशयसंपादकत्वमेवानयोः साम्यं तन्मूलक एवायमारोपः । अत्रेन्दीवरेक्षणाया एव रूपणं न तु

---

1. **एकदेशेति** । एकस्मिन्देशेंऽशे विवर्तनाद् विशेषतो वर्तनात् अर्थादारोप्यमाणस्य सर्वत्र शब्दवशलभ्यत्वे एकांशेऽर्थवशलभ्यत्वस्य विशेषस्य सद्भावादेकदेशविवर्तीति सार्थकमभिधानम् ॥

केवलं यथा—

'दासे कृतागसि भवेदुचितः प्रभूणां
पादप्रहार इति सुन्दरि नात्र दूये ।
उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रै-
र्यत्खिद्यते मृदु पदं ननु सा व्यथा मे ॥'

तेनाष्टौ[1] रूपके भिदाः ।

'चिरंतनैरुक्ताः' इति शेषः । क्वचित्परम्परितमप्येकदेशविवर्ति यथा—

'खड्गः[2] क्ष्मासौविदल्लः समिति विजयते मालवाखण्डलस्य ॥'

अत्रार्थः क्ष्मायां महिषीत्वारोपः खड्गे सौविदल्लत्वारोपे निमित्तम् । अस्य भेदस्य पूर्ववन्मालारोपत्वेऽप्युदाहरणं मृग्यम् ।

दृश्यन्ते क्वचिदारोप्याः श्लिष्टाः साङ्गेऽपि रूपके ॥ ३३ ॥

तत्रैकदेशविवर्ति श्लिष्टं यथा मम—

'करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य ।
विकसितकुमुदेक्षणं विचुम्बत्यय्यममरेशदिशो मुखं सुधांशुः ॥'

समस्तवस्तुविषयं यथा—अत्रैव 'विचुम्बति—' इत्यादौ 'चुचुम्बे

तदङ्गस्यापि । **दासे इति** । मानिनीं प्रसादयितुस्तत्पादाहतस्य नायकस्योक्तिरियम् । अत्र पादप्रहारे । **मृदु पदमिति** । 'तव' इति शेषः । तव पादप्रहारेऽपि मम पुलको भवति, तथापि मयि तव क्रोध इति भावः । सौविदल्लोऽन्तःपुरपालकः कञ्चुकी । क्ष्मायां महिषीत्वारोपो राजभोग्यत्वरूपसाम्यमूलकः । **मृग्यमिति** । 'छत्रं सितं शम्बरशात्रवस्य श्रीखण्डचित्रं हरितोऽबलायाः । विराजते चारु नभःसरोजं कर्पूरपूरप्रभमिन्दुबिम्बम् ॥' अत्र शम्बरशात्रवादे राजत्वाद्यारोप आर्थश्चन्द्रबिम्बस्य सितच्छत्रत्वारोपो निमित्तम् । **करमिति** । करं किरणमेव हस्तम् । पद्मोदयादेरेव पद्मोदयादिशब्दस्यैव । द्वयो रूप्यरूपकयो राजादिसूर्याद्योः । नन्वत्र शब्दसाम्य-

---

1. **अष्टाविति** । रूपकं तावत्त्रिविधम्—साङ्गं निरङ्गं परम्परितं चेति । तत्र साङ्गं समस्तवस्तुविषयम्, एकदेशविवर्ति चेति द्विविधम् । निरङ्गमपि केवलं मालारूपं चेति द्विविधम् । परम्परितं तु श्लिष्टाश्लिष्टशब्दनिबन्धनतया द्विविधं सत्प्रत्येकं केवलं मालारूपं चेति चतुर्विधमिति संकलनेऽष्टौ रूपकभेदाः ॥

2. **खड्ग इति** । एतत्पादत्रयीं तु 'पर्यङ्को राजलक्ष्म्या हरितमणिमयः पौरुषाब्धेस्तरङ्गो भग्नप्रत्यर्थिवंशोल्बणविजयकरिस्त्यानदानाम्बुपट्टः । सङ्ग्रामत्रासताम्यन्मुरलपतियशोहंसनीलाम्बुवाहः—' इति ॥

हरिदबलामुखमिन्दुनायकेन' इति पाठे । न चात्र श्लिष्टपरम्परितम् । तत्र हि[1] 'भूभृदावलिदम्भोलिः—' इत्यादौ राजादौ पर्वतत्वाद्यारोपं विना वर्णनीयस्य राजादेर्दम्भोलितादिरूपाणां सर्वथैव सादृश्याभावा[2]दसंगतम् । तर्हि कथं 'पद्मोदयदिनाधीशः—' इत्यादौ परंपरितम्, राजादेः सूर्यादिना सादृश्यस्य तेजस्वितादिहेतुकस्य संभवात्—इति न वाच्यम् । तथा हि—राजादेस्तेजस्वितादिहेतुकं सुव्यक्तं सादृश्यं न तु प्रकृते विवक्षितम् । पद्मोदयादेरेव द्वयोः साधरणधर्मतया विवक्षितत्वात् । इह तु महीधरादेः स्तनादिना सादृश्यं पीनोत्तुङ्गत्वादिना सुव्यक्तमेव—इति न श्लिष्टपरम्परितम् । क्वचित्समासाभावेऽपि रूपकं दृश्यते—

'मुखं तव कुरङ्गाक्षि सरोजमिति नान्यथा ।'

क्वचिद्वैयधिकरण्येऽपि यथा—

'सौजन्याम्बुमरुस्थली सुचरितालेल्यद्युभित्तिर्गुण-
ज्योत्स्नाकृष्णचतुर्दशी सरलतायोगश्वपुच्छच्छटा ।
यैरेषापि दुराशया कलियुगे राजावली सेविता
तेषां शूलिनि भक्तिमात्रसुलभे सेवा कियत्कौशलम् ॥'

इदं[4] मम । अत्र[5] केषांचिद्रूपकाणां शब्दश्लेषमूलत्वेऽपि रूपकविशेषत्वादर्थालंकारमध्ये गणनम् । एवं वक्ष्यमाणालंकारेषु बोध्यम् ।

विवक्षावशात्प्रसिद्धतेजस्वितादिरूपसाम्यविवक्षायास्तु 'त्रैलोक्यमण्डपस्तम्भाः' इत्यादौ तु दीर्घत्वपीवरत्वादिसाम्यसंभवेनात्र तन्मूलक एव स्तम्भत्वाद्यारोपोऽस्तु त्रैलोक्यादौ मण्डपत्वाद्यारोपस्य तत्कारणत्वस्वीकारेण किमिति चेत्, न । स्तम्भा यथा मण्डपभारसहिष्णवस्तथा हरिबाहवस्त्रैलोक्यभारसहिष्णव इति साम्यस्यैव प्रकृते विवक्षितत्वात् । तच्च त्रैलोक्यादौ मण्डपत्वाद्यारोपं विना दुर्बोधम् । **समासाभावेऽपीति** । अत एव दण्डिना व्यस्तं समस्तं व्यस्तसमस्तं चेति त्रिविधं रूपकमुक्तम् । 'भ्रूलतया' इत्यभेदे तृतीया । अन्यथा तादात्म्यारोपो न स्यात् । सुचरितमेवालेल्यं चित्रम्, द्युभित्तिराकाशकुड्यम् । सरलता कौटिल्यराहित्यमेव सरलता दाक्षिण्यम् । तस्या योगे श्वपुच्छच्छटा कुक्कुरलाङ्गूलकुण्डली । भक्तिमात्रसुलभे केवलयापि भक्त्या प्राप्ये । **अत्र केषांचिदिति** । साधनस्य श्लेषस्य शब्दालंकारत्वेऽपि साध्यत्वेन प्रधानस्यार्थालंकारमध्ये गणनमिति भावः । वक्ष्यमाणानां श्लेषापह्नवादी-

---

१. 'हि' इति क-पुस्तके नास्ति. २. '–रूपण' ख-घ. ३. 'असंभवात्' ख-घ. ४. 'शार्ङ्गिणि' क. ५ 'इदं मम' इति क-ख-पुस्तकयोर्नास्ति. ६. 'अत्र च' घ.

अधिकारूढवैशिष्ट्यं रूपकं यत्तदेव तत् ।
तदेवादिकारूढवैशिष्ट्यसंज्ञकम्[1] । यथा मम[2]—

'इदं वक्त्रं साक्षाद्विरहितकलङ्कः शशधरः
सुधाधाराधारश्चिरपरिणतं बिम्बमधरः ।
इमे नेत्रे रात्रिंदिवमधिकशोभे कुवलये
तनुर्लावण्यानां जलधिरवगाहे सुखतरः ॥'

अत्र कलङ्कराहित्यादिनाधिकं वैशिष्ट्यम् ।

विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि ॥ ३४ ॥
परिणामो[1] भवेत्तुल्यातुल्याधिकरणो द्विधा ।

आरोप्यमाणस्यारोपविषयात्मतया परिणमनात्परिणामः ।

नाम् । अधिकारूढवैशिष्ट्यं रूपकमाह—**अधिकारूढेति** । अधिकमत्यर्थमारूढं वैशिष्ट्यं विशेषणं यत्र तदित्यर्थः । सुधाधाराधार इति बिम्बस्य विशेषणम् । कलङ्करहितत्वादिविशेषणं चन्द्रादेरत्यन्तासंभवीति तत्र तदारोपणादधिकारूढवैशिष्ट्यम् । 'कलङ्कराहित्यादिना' इत्यभेदे तृतीया । परिणामालंकारमाह—**विषयात्मतयेति** । प्रकृतार्थोपयोगिनि वस्तुनि विषयतादात्म्येनारोप्ये सति परिणाम इत्यर्थः । प्रस्तुतप्रयोजनसाधनत्वेन प्रसिद्धिरेव प्रकृतार्थोपयोगित्वम् । रूपके सदृशवस्तुनस्तादात्म्यं विषये भासते । इह तु सजातीयफलसाधनतया विषयस्य तादात्म्यमारोप्यमाणे भासत इति विशेषः । तुल्याधिकरणः समानाधिकरणः । सच समानविभक्तिकपदद्वये प्रयोज्यः । विभिन्नविभक्तिकपदद्वयप्रयोज्यो व्यधिकरण एव तुल्याधिकरणः । संज्ञाबीजमाह—**आरोप्यमाणस्येति** । परिणमनात् परिणतबुद्धिविषयीकरणात् । बुद्धेः परिणामश्चानाहार्यत्वे सति धारावाहिकत्वम् । रूपके ह्याहार्य एव सकृदभेदबुद्धिः, अनन्तरं साधर्म्यप्रतीतिरेव न त्वभेदबुध्यन्तरम् । इह तु वस्तुनोरेककार्यकारित्वेनात्यन्ततिरस्कृतभेदयोरभेदप्रतीतिधारेति भावः । इह प्रायेण भवत्यर्थस्य करोत्यर्थस्य

---

1. **परिणाम इति** । अत्राहुः शेखरकाराः—उपमानप्रतियोगिकाभेदो रूपकम् । उपमेयप्रतियोगिकाभेदः परिणामः । प्रतीपवत्तत्राभेदे उपमेयप्रतियोगिकत्वतात्पर्यग्राहकं प्रकृतकार्योपयोगः । न तु तच्छरीरेऽस्य प्रवेशः । एवं च यत्रोपमानस्य स्वात्मनैव प्रकृतकार्योपयोगो यत्र चोदासीनता तत्र रूपकमेव । इत्थं च परिणामो विशेषणसमासायत्तः । रूपकं मयूरव्यंसकादिसमासायत्तं 'मुखचन्द्र' इत्यादौ । यदि तु चन्द्रमुखमिति विप्रयुज्यते तदा विशेषणसमासायत्तमपि रूपकमिति । परे तु—उपमानोपमेयपदानामुपमानप्रतियोगिकाभेदसंसर्गेण बोधकानां 'मयूरव्यंसकादयश्च' इति समासेन विशेषणसमासबाधाच्चन्द्रमुखमिति प्रयोग एव नेति वदन्ति ॥

---

१. 'संज्ञरूपकम्' घ. २. 'मम' इति नास्ति क-पुस्तके.

यथा—

'सितेनोपायनं दूरादागतस्य कृतं मम ।
स्तनोपपीडमाश्लेषः कृतो द्यूते पणस्तया ॥'

अन्यत्रोपायनपणौ वसनाभरणादिभावेनोपयुज्येते । अत्र तु नायकसंभावनद्यूतयोः सिताश्लेषरूपतया । प्रथमार्धे वैयधिकरण्येन प्रयोगः, द्वितीये सामानाधिकरण्येन । रूपके 'मुखचन्द्रं पश्यामि' इत्यादावारोप्यमाणचन्द्रादेरुपरञ्जकतामात्रम्, न तु प्रकृते दर्शनादावुपयोगः । इह तूपायनादेर्विषयेण तादात्म्यं प्रकृते च नायकसंभावनादावुपयोगः । अत एव रूपके आरोप्यस्यावच्छेदकत्वमात्रेणान्वयः । अत्र तु तादात्म्येन । 'दासे कृतागसि–' इत्यादौ रूपकमेव, न तु परिणामः ।

वा धातोः प्रयोगः । तत्र भवत्यर्थस्य प्रयोगो यथा—'तिरस्करिण्यो जलदा भवन्ति' । अत्र योषिद्वात्रावरणरूपप्रस्तुतप्रयोजनसाधनत्वेन प्रसिद्धे पटविशेषे आरोप्यमाणे तत्साधनस्य जलदस्य तादात्म्यारोपः । यथा वा—'मन्दो गन्धवहः क्षारो वह्निरिन्दुश्च जायते । चर्चा चन्दनपङ्कस्य शस्त्रघातः प्रवासिनाम् ॥' अत्र देहदाहादिरूपप्रस्तुतप्रयोजनसाधनत्वेन प्रसिद्धे वस्तुनि क्षारादावारोप्यमाणे तत्साधनस्य गन्धवहादेर्विषयस्य तादात्म्यारोपः । करोत्यर्थप्रयोगे परिणाममाह—**स्मितेनेति** । तृतीयात्राभेदे । उपायनं मैण्यादि प्रीत्यर्थं दीयमानं द्रव्यम् । स्तनोपपीडं स्तनावुपपीडय । तत इत्यत्र कृत इति पाठो न रमणीयः । कथितपदत्वदोषप्रसङ्गात् । पराजये एतद्दातव्यमित्यङ्गीकृतं द्रव्यं पणः । आरोप्यमाणयोः प्रकृतोपयोगित्वेन प्रसिद्धि विषयतादात्म्यारोपं चोपपादयति—**अन्यत्रेति** । संभावनान्तरद्यूतान्तरयोरित्यर्थः । उपयुज्येते हेतू भवतः । **अत्र त्विति** । प्रस्तुतयोरित्यर्थः । सिताश्लेषरूपतया सिताश्लेषतादात्म्येन उपयुज्येते इत्यन्वयः । उपयोगित्वेन प्रतीयेते **इति** तदर्थः । रूपकादस्य भेदमुपपादयति—**रूपके इति** । उपरञ्जकत्वमात्रमुपलक्षणत्वमेव । यथा 'आह्लादकं चन्द्रं पश्यामि' इत्यादावाह्लादकत्वस्य दर्शनानुपयोगित्वेनोपलक्षणत्वं तथेहापीति भावः । **न त्विति** । चन्द्रस्यदर्शनयोग्यत्वेऽपि यथाह्लादादिसाधनत्वेन प्रसिद्धिर्न तथा दर्शनसाधनत्वेनेति भावः । **प्रकृते चेति** । चकारस्योपयोगश्चेत्यन्वयः । ननु 'मुखचन्द्रः प्रकाशते' इत्यादौ चन्द्रादेरारोप्यमाणस्य प्रकाशसाधनत्वेन प्रसिद्धिरस्तीति परिणामप्रसङ्ग इत्यत आह—**अत एवेति** । परिणामलक्षणे 'विषयात्मतया' इत्यस्य निवेशादित्यर्थः । अवच्छेदकत्वमात्रेण विषयव्यावर्तकत्वमात्रेण, न तु विषयातादात्म्येन । **अत्र त्विति** । परिणामे इत्यर्थः । ननु 'दासे कृतागसि–' इत्यादौ पादभेदनरूपकार्यसाधनत्वेन प्रसिद्धस्य कण्टकस्य

---

१. 'माल्यादि' पुस्तकान्तरे. २. 'आश्लेषरूपतयेति । प्रयुज्यत इत्यन्वयः' इति पुस्तकान्तरेऽधिकम्.

आरोप्यमाणकण्टकस्य पादभेदनकार्यस्याप्रस्तुतत्वात्। न खलु तत्कस्यचिदपि प्रस्तुतकार्यस्य घटनार्थमनुसंधीयते।

अयमपि रूपकवदधिकारूढवैशिष्ट्यो दृश्यते। यथा—

'वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः॥'

अत्र प्रदीपानामौषध्यात्मतया प्रकृते सुरतोपयोगिन्यन्धकारनाशे उपयोगोऽतैलपूरत्वेनाधिकारूढवैशिष्ट्यम्।

संदेहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः॥ ३५॥
शुद्धो निश्चयगर्भोऽसौ निश्चयान्त इति त्रिधा।

यत्र संशय एव पर्यवसानं स शुद्धः। यथा—

'किं तारुण्यतरोरियं रसभरोद्भिन्ना नवा वल्लरी
वेलाप्रोच्छलितस्य किं लहरिका लावण्यवारांनिधेः।
उद्गाढोत्कलिकावतां खसमयोपन्यासविश्रम्भिणः
किं साक्षादुपदेशयष्टिरथवा देवस्य शृङ्गारिणः॥'

पुलकाङ्कुरत्वेनारोप इति परिणाम एवेत्यत आह—**दासे इत्यादौ। अप्रस्तुतत्वादिति**। मानभङ्गस्यैव तत्र प्रस्तुतत्वादिति भावः। ननु प्रस्तुतघटकस्यापि प्रस्तुतत्वमित्यतः पादभेदनमपि प्रस्तुतमत आह—**न खल्विति**। तत्पादभेदनं घटनार्थमपीत्यपेरन्वयः। उपपादनार्थमपीति तदर्थः। अनुसंधीयते प्रतीयते। अधिकारूढवैशिष्ट्यं परिणाममाह—**अयमपीति**। परिणामोऽपीत्यर्थः। यत्र हिमालये। संदेहालंकारमाह—**संदेहे इति**। प्रकृते उपमेयेऽन्यस्योपमानस्य प्रतिभोत्थापितः कविप्रौढोक्तिसिद्धः न तु वस्तुस्वभावसिद्धः। 'ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः' इति काव्यप्रकाशदर्शनात्, 'अनन्वयसंदेहावुपमास्वेव दर्शितौ' इति दण्डिदर्शनाच्चास्य ससंदेह इति संज्ञान्तरम्। संदेह इति संज्ञा तु 'उपमानोपमेयसंशयः संदेहः' इति वामनदर्शनादवसीयते। केचित्तु काव्यप्रकाशकारिकामेवं व्याकुर्वन्ति—भेदोक्तौ तु ससंदेहो भेदानुक्तौ तु संशयः' इत्यलंकारद्वयमेतदिति वदन्ति। तन्न। तथार्थकत्वे विशेष्यं दुर्लभं स्यात्। उपमानोपमेययोर्भेदोक्तौ ससंदेहस्तदनुक्तौ सत्यां संशय इत्यर्थो यदि क्रियते तदा प्रथमस्य व्यतिरेके द्वितीयस्य रूपकादावतिप्रसङ्गः स्यात् संशयालंकारस्य पृथक्त्वेनाप्युपादानाच्च। 'भेदोक्तौ तदनुक्तौ च संशयः स तु संदेहः' इति काव्यप्रकाशाभिप्रायमाकलय्य ग्रन्थकृत्तथालक्षणं कृतवान्। वेलायां तीरे उच्छलितस्य उद्गतस्य। उद्गाढोत्कलिकावतामत्यन्तोत्कण्ठाशालिनाम्। खसमयस्य खसिद्धान्तस्य स्वाचारस्य वा उपन्यासे ज्ञापने विश्रम्भिणः प्रणयिनः। 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः। 'विश्रम्भः केलिकलहे

यत्रादावन्ते च संशय एव मध्ये निश्चयः स निश्चयमध्यः ।
यथा—

'अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम् ।
कृतान्तः किं साक्षान्महिषवहनोऽसाविति पुनः
समालोक्याजौ त्वां विदधति विकल्पान्प्रतिभटाः ॥'

अत्र मध्ये मार्तण्डाद्यभावनिश्चयो राजनिश्चये द्वितीयसंशयोत्थानासंभवात् ।

यत्रादौ संशयोऽन्ते च निश्चयः स निश्चयान्तः । यथा—

'किं तावत्सरसि सरोजमेतदारा-
दाहो स्विन्मुखमवभासते तरुण्याः ।
संशय्य क्षणमिति निश्चिकाय कश्चि-
द्बिम्बोकैर्बकसहवासिनां परोक्षैः ॥'

अप्रतिभोत्थापिते तु 'स्थाणुर्वा पुरुषो वा' इत्यादिसंशये नायमलंकारः ।

'मध्यं तव सरोजाक्षि पयोधरभरार्दितम् ।
अस्ति नास्तीति संदेहः कस्य चित्ते न भासते ॥'

अत्रातिशयोक्तिरेव, उपमेये उपमानसंशयस्यैवैतदलंकारविषयत्वात् ।

विश्वासे प्रणयेऽपि च' इति मेदिनीकरः । अनवहितशिष्यताडनाय या यष्टिः सोपदेशयष्टिः । शृङ्गारिणः कामस्य । निश्चयगर्भ इत्यत्र गर्भपदस्य मध्यार्थत्वाभिप्रायेण व्याकरोति—**यत्रेति । अयं मार्तण्डः किमिति ।** त्वामाजौ समालोक्य प्रतिभटाः प्रतिकूलशूराश्चिरमिति विकल्पान्विदधति । विकल्पानाह—**अयमिति ।** व्यावर्तकधर्ममाह—**स खल्विति ।** इतो गतः सर्वा इत्यादिकृशानुव्यावर्तको धर्मः । एष कृशानुर्नियतं सर्वा दिशः प्रसरति । वाग्व्यभिमुखदिङ्मात्रप्रसारित्वात् । अयं तु सर्वदिक्प्रसारी न स इत्यर्थः । महिषवाहनत्वाभावः कृतान्तव्यावर्तको धर्मः । मार्तण्डाद्यभावनिश्चयो मार्तण्डादिभेदानुमानं न तु राजनिश्चय इति शेषः । अत्र हेतुमाह—**राजेति ।** द्वितीयसंशयानुत्थानात् द्वितीयसंशयानुत्थानप्रसङ्गात् । **किं तावदिति ।** संशय्येति योजना । बिम्बोकैर्निरुक्तसूचकैश्चेष्टाविशेषैः । बकसहवासिनां पद्मानां परोक्षैरपरिचेयैः । बिम्बोकानभिज्ञत्वातिशयज्ञापनाय पद्मानां बकसहवासित्वेनोपन्यासः । प्रतिभोत्थित इत्यस्य व्यावृत्तिमाह—**अप्रतिभेति ।** अत्रोच्चैस्तरत्वादिना सादृश्यमस्त्येव । प्रकृतेऽन्यस्येत्यस्य व्यावृत्तिमाह—**मध्यमिति ।** अत्रातिशयोक्तिरेवालंकारो न तु संदेहः । अत्र हेतुमाह—**उपमेय इति ।** एतदलंकारविषय-

साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान्[1] प्रतिभोत्थितः ॥ ३६ ॥

यथा—

'मुग्धा दुग्धधिया गवां विदधते कुम्भानधो बल्लवाः
कर्णे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि ।
कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाकाङ्क्षया
सान्द्रा चन्द्रमसो न कस्य कुरुते चित्तभ्रमं चन्द्रिका ॥'

अखरसोत्थापिता भ्रान्तिर्नायमलंकारः । यथा—'शुक्तिकायां रजतम् इति । न चासादृश्यमूला । यथा—

'संगमविरहविकल्पे वरमिह विरहो न संगमस्तस्याः ।
सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे ॥'

क्वचिद्भेदाद्ग्रहीतॄणां विषयाणां तथा क्वचित् ।
एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते ॥ ३७ ॥

क्रमेणोदाहरणम्—

'प्रिय इति गोपवधूभिः शिशुरिति वृद्धैरधीश इति देवैः ।
नारायण इति भक्तैर्ब्रह्मेत्याहि योगिभिर्देवः ॥'

लात् संदेहालंकारस्वरूपत्वात् । भ्रान्तिमदलंकारमाह—**साम्यादिति** । अत्र तत्पदद्वयमप्राकरणिकपरम् । प्रतिभोत्थिता कविप्रौढोक्तिसिद्धा । ननु रूपके उपमानोपमेयनिगरणरूपायामतिशयोक्तौ चातिप्रसङ्ग इति चेत्, न । तयोराहार्यरूपत्वाद् भ्रमस्य चाहार्यभिन्नत्वात् । भ्रमप्रमाभिन्नं तृतीयप्रकारकं ज्ञानमाहार्यमिति तत्सिद्धान्तः । **मुग्धा इति** । बल्लवा गोपाः गवामधः कुम्भान्विदधत इत्यन्वयः । चन्द्रिका किरणः । अत्र कविप्रौढोक्तिसिद्धो भ्रमः साम्यातिशयव्यञ्जकः । अत्र ध्वनिसत्त्वेऽपि वैचित्र्यविशेषस्यानुभवसिद्धत्वादलंकारत्वेनोपादानम् । अखरसोत्थापिता वस्तुस्वभावजनिता । अयं भ्रान्तिमान् । शुक्तौ चाकचक्यविशेष एव रजतसाधर्म्यम् । साम्यादित्यस्य व्यावृत्तिमाह—**न चेति** । भ्रान्तिनामायमलंकार इत्यनुषज्यते । **संगमेति** । संगमविरहयोरेकतरस्याभीष्टत्वविवेचन इत्यर्थः । इयं भावनातिशयजन्या भ्रान्तिः कविप्रौढोक्तिसिद्धापि न साम्यग्रहणमूला । उल्लेखालंकारमाह—**क्वचिदिति** । गृहीतॄणां बोधकानां विषयाणां हेत्ववच्छेदकादीनां तथाभेदात् अनेकधा विविधप्रकारेण उल्लेखोऽवधारणम् । **प्रिय इति** । वृद्धैर्नन्दादिभिः । भक्तैरक्रूरादिभिः । अग्राहि अबोधि । योगिभिर्नारदादिभिः । देवः श्रीकृष्णः ।

1. **भ्रान्तिमानिति** । अत्र भ्रान्तिमात्रमलंकारः । भ्रान्तिमानलंकार इति व्यवहारस्त्वौपचारिकः । तथा चाहुः—'प्रमात्रन्तरधीर्भ्रान्तिरूपा यस्मिन्नवगम्यते । स भ्रान्तिमानिति ख्यातोऽलंकारे त्वौपचारिकः ॥' इति ॥

अत्रैकस्यापि भगवतस्तत्तद्गुणयोगादनेकत्वोल्लेखे गोपवधूप्रभृतीनां रुच्यादयो यथायोगं प्रयोजकाः । यदाहुः—

'यथारुचि यथार्थित्वं यथाव्युत्पत्ति भिद्यते ।
आभासोऽप्यर्थ एकस्मिन्ननुसंधानसाधितः ॥'

अत्र भगवतः प्रियत्वादीनां वास्तवत्वाद् ग्रहीतृभेदाच्च न मालारूपकम्, न च भ्रान्तिमान्, न चायमभेदे भेद इत्येवंरूपातिशयोक्तिः । तथा हि—'अन्यदेवाङ्गलावण्यम्—' इत्यादौ लावण्यादेर्विषयस्य पृथक्त्वेनाध्यवसानम् । न चेह भगवति गोपवधूप्रभृतिभिः प्रियत्वाद्यध्यवसीयते । प्रियत्वादेर्भगवति तत्काले तात्त्विकत्वात् । केचिदाहुः—'अयमलंकारो नियमेनालंकारान्तरविच्छित्तिमूलः । उक्तोदाहरणे च शिशुत्वादीनां नियमाभिप्रायात्प्रियत्वादीनां भिन्नत्वाध्यवसाय इत्यतिशयोक्तिरस्ति ।

नन्वेकस्यानेकरूपेण स्फुरणे किं प्रयोजकं सर्वेषां ग्रहीतॄणां वा किमित्येकरूपेण स्फुरणं न भवतीत्यत आह—**अत्रेति** । तत्तद्गुणयोगात् प्रियत्वादितत्तत्प्रकारसंबन्धात् । रुच्यादीत्यादिपदेन वक्ष्यमाणकारिकोक्तार्थित्वव्युत्पत्त्योर्ग्रहणम् । यथायोगं यथासंभवं प्रयोजकाः कारणानि । भगवति यावद्गुणसत्त्वेऽपि रुच्यादिभेदेन विविधप्रकारेणैव स्फुरणं न त्वेकरूपेण । रुच्यादीनामन्यतमस्य कारणस्य सर्वत्राभावादिति भावः । **यथारुचीति** । रुचिरभिलाषः, आर्थित्वं प्रयोजनापेक्षित्वम्, व्युत्पत्तिर्भावना-रुच्यादीनामनतिक्रमेणेत्यर्थः । भिद्यते भिन्नत्वेनोपपद्यते । आभासो ज्ञानम् । अर्थे विषये । अनुसंधानसाधितः विविधविशेषणज्ञानजनितः । एकविषये व्यक्तिभेदेन विभिन्नप्रकारकज्ञानोत्पत्तौ तत्तद्विशेषणज्ञानसहकृतं रुच्यादिकं कारणमिति भावः । वास्तवत्वादनारोपितत्वात् । **गृहीतृभेदाच्चेति** । एवं च 'पिता प्रजानां शमनो रिपूणां वनीपकानाममरद्रुमश्च । कविः कवीनां सुहृदां सुधांशुः सतां गुरुर्भूमिपतिः प्रतीतः ॥' इत्यादौ पितृत्वादीनां प्रकाराणामवास्तवत्वेऽपि ग्रहीतृभेदादेव न मालारूपकमिति भावः । **न च भ्रान्तिमानिति** । अत्र प्रियत्वादीनां वास्तवत्वादिति हेतुर्बोध्यः । एवं चात्र सादृश्यजनितभ्रमाभावादत्र न भ्रान्तिमानिति भावः । अयमुक्तोल्लेखः । तात्त्विकत्वाद् विद्यमानत्वात् । **केचिदिति** । अयमुल्लेखः अलंकारान्तरं विच्छित्तेर्मूलं यस्य सः । अलंकारान्तरसहकृत एवायं विच्छित्तिविशेषं जनयतीति भावः । प्रियत्वादेर्धर्मस्य शिशुत्वादीनां नियमाभिप्रायाद् व्यवच्छेदे तात्पर्याद् भिन्नत्वाध्यवसायः शिशुत्वादिभेदप्रत्ययः । नन्वत्रातिशयोक्तिरेव वैचित्र्यप्रयोजिका

---

१. 'वध्वादीनां' क. २. 'तत्र हि' घ. ३. 'अवश्यंभावेन' इत्यधिक घ-पुस्तके. ४. 'नानारूपकं' इति मुद्रितपुस्तके.

तत्सद्भावेऽपि प्रत्येतृभेदेन नानात्वप्रतीतिरूपो विच्छित्तिविशेष उल्लेख-भिन्नालंकारप्रयोजकः। श्रीकण्ठजनपदवर्णने[1]—'वज्रपञ्जरमिति शरणागतैः, अम्बरविवरमिति वातिकैः' इत्यादिश्चातिशयोक्तेर्विविक्तो विषयः। इह च रूपकालंकारयोगः। वस्तुतस्तु—'अम्बरविवरं—' इत्यादौ भ्रान्तिमत्त्वमेवेच्छति न रूपकम्, भेदप्रतीतिपुरःसरस्यैवारोपस्य गौणीमूलरूपकादिप्रयोजकत्वात्। यदाहुः शारीरकमीमांसाभाष्यव्याख्याने श्रीवाचस्पतिमिश्राः—'अपिच परशब्दः परत्र लक्ष्यमाणगुणयोगेन वर्तते इति। यत्र प्रयोक्तृप्रतिपत्त्रोः संप्रतिपत्तिः स गौणः, स च भेदप्रत्ययपुरःसरः' इति। इह तु वातिकानां श्रीकण्ठजनपदवर्णने भ्रान्तिकृत एवाम्बरविवराद्यारोप इति। अत्रैव च 'तपोवनमिति मुनिभिः कामायतनमिति वेश्याभिः' इत्यादौ परिणामालंकारयोगः।

'गाम्भीर्येण समुद्रोऽसि गौरवेणासि पर्वतः।'

इत्यादौ चानेकधोल्लेखे गाम्भीर्यादिविषयभेदः प्रयोजकः। अत्र

आस्तां किमुल्लेखस्यालंकारत्वाङ्गीकारेणेत्यत आह—**तत्सद्भावेऽपीति**। अतिशयोक्तिसद्भावेऽपीत्यर्थः। **प्रत्येतृभेदेनेति**। एकस्मिन्नीश्वरे गोपवधूप्रभृतीनां रुच्यादिभेदेन प्रियत्वादिप्रतीतिरतिशयोक्त्यलंकारस्तन्मूलकः। सभ्यानां नानात्वप्रत्यय एव विच्छित्तिविशेष इति भावः। अम्बरविवरमाकाशावकाशः। रूपकस्य भेदप्रतीतिपुरःसरत्वे हेतुमाह—**गौणीमूलेति**। गौणी सादृश्यलक्षणा मूलमस्येत्यर्थः। **रूपकादिप्रयोजकत्वादिति**। रूपकादिस्वरूपत्वादिति तात्पर्यम्। गौण्या लक्षणाया भेदप्रतीतिपुरःसरत्वे प्राचीनसंवादमाह—**यदाहुरिति**। परशब्द उपमानाभिधायकः शब्दः। परत्र उपमेये लक्ष्यमाणगुणयोगेन प्रतीयमानसाधारणधर्मसंबन्धेन। यत्र यस्मिन्सति प्रयोक्तृप्रतिपत्त्रोः वक्तृश्रोत्रोः संप्रतिपत्तिः प्रमात्मकसादृश्यज्ञानं स गौणः। शब्दव्यापार इत्यर्थः। स च वक्तृतात्पर्यज्ञानविशेषरूपशब्दव्यापारश्च। प्रकृते रूपकवैधर्म्यं दर्शयति—**इह त्विति**। भ्रान्तिकृतो विशेषदर्शनजन्यः। अत्रैव श्रीकण्ठजनपदवर्णन एव। **परिणामालंकारयोग इति**। आरोप्यमाणयोस्तपोवनकामायतनयोस्तपःकामरूपप्रकृतप्रयोजनोपयोगित्वात्परिणाम इति भावः। विषयभेदेनोल्लेखमुदाहरति—**गाम्भीर्येणेति**। 'कामदत्वाच्च लोकानामसि त्वं कल्पपादपः॥' इत्युत्तरार्धमस्य। अत्रैकस्य पुंसो हेतुभेदेन समुद्रादिनेकरूपेणोल्लेखः।

---

1. **श्रीकण्ठेति**। बाणकृते हर्षचरिते श्रीकण्ठाख्यो जनपदस्तद्वर्णने॥

---

१. 'ग्रहीतृ-' घ. २. 'अतिशयोक्ति' इति नास्ति पुस्तकान्तरे.

च रूपयोगः । 'गुरुर्वचसि, पृथुरुरसि, अर्जुनो यशसि–' इत्यादिषु चास्य रूपकाद्विविक्तो विषय इति । अत्र हि श्लेषमूलातिशयोक्तियोगः ।

प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः ।

इयं द्विधा । क्वचिदपह्नवपूर्वक आरोपः, क्वचिदारोपपूर्वकोऽपह्नव इति । क्रमेणोदाहरणम्—

'नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनभङ्गाः ।
नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः ॥'

'एतद्विभाति चरमाचलचूडचुम्बि
हिण्डीरपिण्डरुचिशीतमरीचिबिम्बम् ।
उज्ज्वालितस्य रजनीं मदनानलस्य
धूमं दधत्प्रकटलाञ्छनकैतवेन ॥'

इदं मम ।

एवम् 'विराजति व्योमवपुःपयोधिस्तारामयास्तत्र च फेनभङ्गाः' इत्याकारेण च प्रकृतनिषेधो बोध्यः ।

गोपनीयं कमप्यर्थं द्योतयित्वा कथंचन ॥ ३८ ॥
यदि श्लेषेणान्यथा वान्यथयेत्साप्यपह्नुतिः ।

श्लेषेण यथा—

'काले वारिधराणामपतितया नैव शक्यते स्थातुम् ।
उत्कण्ठितासि तरले नहि नहि सखि पिच्छलः पन्थाः ॥'

गुरुरिति । गुरुर्विशालो जीवश्च । पृथुर्महान् वैन्यश्च । अर्जुनः शुक्लो धनंजयश्च । अत्रैकस्य पुंसो वक्षःस्थलाद्यवच्छेदेन गुरुत्वाद्यनेकरूपेणोल्लेखः । अपह्नुत्यलंकारमाह— **प्रकृतमिति** । उपमेयमित्यर्थः । निषिध्य स्वभिन्नत्वेनारोप्य अन्यस्थापनमुपनानारोपः । इयं चापह्नुतिश्च । अस्या उभयरूपत्वे विनिगमनाभाव एव प्रयोजक इति भावः । फेनभङ्गाः फेनखण्डानि । अत्र नभोमण्डलादीनां प्रथमं स्वभिन्नत्वेन पश्चादम्बुराशिलादिनारोपः । **एतदिति** । 'हिण्डीरोऽब्धिकफः फेनः' इत्यमरः । लाञ्छनकैतवेनेति कलङ्क्ष्वभेदव्यञ्जकमिदम् । निषिध्येत्यानन्तर्यमविवक्षितमिति भावः । प्रकारान्तरेणापह्नुत्यलंकारमाह—**गोपनीयमिति** । द्योतयित्वा बोधयित्वा । कथंचन शब्देन सादृश्यादिना वा । अन्यथा श्लेषभिन्नेन कालस्वभावादिना । अन्यथयेत् भिन्नत्वेन ख्यापयेत् । **काल इति** । प्रथमार्धे विरहिण्याः, तृतीयपादः सख्याः,

---

१. 'वाच्यः' क.

नह्ययं निश्चयान्तः संदेहः, तत्र संशयनिश्चययोरेकाश्रयत्वेनावस्थानात् । अत्र तु भ्रमरासंशयो नायकादेर्निश्चयः । किं च न भ्रमरादेरपि संशयः । एककोट्यनधिके ज्ञाने तथा समीपगमनासंभवात् । तर्हि भ्रान्तिमानस्तु । अस्तु नाम भ्रमरादेर्भ्रान्तिः । न चेह तस्याश्चमत्कारविधायित्वम् । अपि तु तथाविधनायकाद्युक्तेरेवेति सहृदयसंवेद्यम् । किंचाविवक्षितेऽपि भ्रमरादेः पतनादौ भ्रान्तौ वा नायिकाचाट्वादिरूपेणैव संभवति[१] तथाविधोक्तिः । न च रूपकध्वनिरयम्, मुखस्य कमलत्वेनानिर्धारणात् । न चापह्नुतिः, प्रस्तुतस्यानिषेधात् । इति पृथगेवायमलंकारश्चिरंतनोक्तालंकारेभ्यः । शुक्तिकायां रजतधिया पतति पुरुषे शुक्तिकेयं न रजतमिति कस्याश्चिदुक्तिर्नायमलंकारो वैचित्र्याभावात् ।

भवेत्संभावनोत्प्रेक्षा[1] प्रकृतस्य परात्मना ।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता ॥ ४० ॥

हिण उक्तिरियम् । एकाश्रयत्वेन एकात्मवृत्तित्वेन । तथा चात्र संशयनिश्चययोर्व्यधिकरणत्वान्नायं निश्चयान्तसंदेह इति भावः । ननु तत्र तयोः सामानाधिकरण्यनियमे किं मानमत आह—**किंचेति** । एककोट्यनधिके एककोटिमात्रावगाहिनि । तथा समीपगमनासंभवात् संदेहप्रसङ्गायोगात् । तर्हि एककोटिमात्रावगाहिज्ञानकनिश्चयत्वस्वीकारे भ्रान्तिमानिति । भ्रान्तेर्निश्चयरूपत्वादिति भावः । **नायकाद्युक्तेरिति** । चमत्कारविधायित्वमित्यनेनान्वितम् । उक्तिर्निश्चयः । ननु संबोध्यभ्रान्तिं विना तथाविधोक्तेरसंभव एव । एवं चास्य भ्रान्तिमूलकत्वं नियतम् । तथा च प्रकृते सैव चमत्कारविधायिनी । तथाविधोक्तिस्तु भ्रमव्यञ्जिकैवेत्यत आह—**किं चेति । पतनादाविति** । भ्रमव्यञ्जकोपादानं तस्य नियतत्वादाह—**भ्रान्ताविति** । अविवक्षितायामिति लिङ्गव्यत्ययेनान्वयः । चाट्वादिरूपेण चाट्वादिप्रकारेण । मुखस्य मुखादेः कमलत्वेन कमलत्वादिना अनिर्धारणात् अनारोपात्, प्रत्युत भिन्नत्वेन निर्णयात् । पतति रजतार्थे वर्तमाने । तथा च वस्तुतत्त्वमेव नालंकारत्वप्रयोजकमपि तु वैचित्र्याधायकत्वमेवेति भावः । उत्प्रेक्षालंकारमाह—**भवेदिति** । संभावना उत्कटैककोटिकः संशयः । प्रकृतस्य उपमेयस्य । परात्मना उपमानरूपेण । तादात्म्यसंबन्धलाभायात्मपदोपन्यासः । प्रकारत्वं तृतीयार्थः । तथा च तादात्म्यसंसर्गकोपमान-

---

1. **उत्प्रेक्षेति** । उत् ऊर्ध्वं गता प्रेक्षा दृष्टिः प्रतिभा वा यस्यां सोत्प्रेक्षा । वितर्क्यतः प्रेक्षा हि प्रायेणोक्तविधा जायत इति ॥

---

१. 'एव' इत्यधिकं घ-पुस्तके.

वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः ।
जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि ॥ ४१ ॥
तदष्टधापि प्रत्येकं भावाभावाभिमानतः ।
गुणक्रियास्वरूपत्वान्निमित्तस्य पुनश्च ताः ॥ ४२ ॥
द्वात्रिंशद्विधतां यान्ति[1]

तत्र वाच्योत्प्रेक्षायामुदाहरणं दिङ्मात्रं यथा—

'ऊरुः कुरङ्गकदृशश्चञ्चलचेलाञ्चलो भाति ।
सपताकः कनकमयो विजयस्तम्भः स्मरस्येव ॥'

अत्र विजयस्तम्भस्य बहुवाचकत्वाज्जात्युत्प्रेक्षा ।

'ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥'

अत्र सप्रसवत्वं गुणः ।

प्रकारकोपमेयविशेष्यकोत्कटैककोटिकः संशयः उत्प्रेक्षेत्यर्थः । संदेहालंकारवारणाय उत्कटैककोटिक इति । रूपकभ्रान्तिमदतिशयोक्तीनां निश्चयरूपत्वात्संशयपदेन वारणम् । उपमानं च क्वचित्संभवि क्वचित्प्रौढोक्तिसिद्धम् । आद्यं यथा—'गुणा गुणानुबन्धित्वात्' इति । अत्र प्रसवपदार्थः संभवत्येव । द्वितीयं यथा—ऊरुरित्यादि । अत्र सुरतेच्छारूपस्मरस्य कनकमयविजयस्तम्भः शशविषाणवदलीकः प्रौढोक्त्यैव सिद्धः । परा प्रतीयमाना । सा द्वयोर्वाच्यप्रतीयमानयोः । जातिर्जातिवाचकपदप्रतिपाद्योऽर्थः । एवं गुणादयोऽपि । **भावेति** । भावाभिमाने जात्यादिरूपभावसंभावनायाम् । अभावाभिमाने जात्यादिप्रतियोगिकाभावसंभावनायाम् । एवं च षोडशप्रकारत्वमुपपन्नम् । निमित्तस्य संभावनाजनकज्ञानविषयसाधारणधर्मस्य । ता उत्प्रेक्षाः । **ऊरुरिति** । शत्रुमभिभूय तद्विषये धीरैर्यः स्तम्भ आरोप्यते स विजयस्तम्भः । विजयस्तम्भपदस्य बहुवाचकत्वादिति । अनेकवृत्तिनित्यसामान्यजातित्वस्वीकारादिति भावः । गुणोत्प्रेक्षामाह—**ज्ञाने इति** । शास्त्रादिज्ञाने सत्यपि मौनं जल्पवितण्डाराहित्यम् । क्षमा पराभवानर्हत्वापराधसहिष्णुता । श्लाघा आत्मप्रशंसा, तस्या विपर्ययोऽभावः । गुणानुबन्धित्वात् गुणप्रयोजकत्वात् । प्रकर्षप्रयोजकधर्मोऽत्र गुणः । तस्य दिलीपस्य । कुक्षिगर्भयोर्विभागः प्रसवः तत्सहिताः सप्रसवाः । ज्ञानादीनां मौनाद्युत्पादने प्रसवसंभावना । ज्ञानादिसत्त्वे एव मौनादीनां गुणत्वमिति

1. **द्वात्रिंशदिति** । वाच्या प्रतीयमाना चेत्युत्प्रेक्षा द्विविधा । इवादिप्रयोगे वाच्या, तदभावे प्रतीयमाना । तत्र वाच्या जातिगुणक्रियाद्रव्याणामप्रकृतानामध्यवसेयता चतुर्विधा । तेषां च प्रत्येकं भावाभावाभिमानरूपतया द्वैविध्येनाष्टविधा । भेदाष्टकस्य च प्रत्येकं निमित्तस्य गुणक्रियारूपत्वेन षोडश भेदाः । तेषां च प्रत्येकं निमित्तस्य पुनरुपादानानुपादानाभ्यां द्वात्रिंशत्प्रकारा इति ॥

'गङ्गाम्भसि सुरत्राण तव निःशाननिस्वनः।
स्नातीवारिवधूवर्गगर्भपातनपातकी ॥'

अत्र स्नातीति क्रिया।

'मुखमेणीदृशो भाति पूर्णचन्द्र इवापरः।'

अत्र चन्द्र इत्येकव्यक्तिवाचकत्वाद्द्रव्यशब्दः। एते भावाभिमाने। अभावाभिमाने यथा—

'कपोलफलकावस्याः कष्टं भूत्वा तथाविधौ।
अपश्यन्ताविवान्योन्यमीदृक्षां क्षामतां गतौ ॥'

अत्रापश्यन्ताविति क्रियाया अभावः। एवमन्यत्। निमित्तस्य गुणक्रियारूपत्वे यथा—'गङ्गाम्भसि—' इत्यादौ स्नातीवेत्युत्प्रेक्षानिमित्तं पातकित्वं गुणः। 'अपश्यन्तौ—' इत्यादौ क्षामतागमनरूपं निमित्तं क्रिया। एवमन्यत्। प्रतीयमानोत्प्रेक्षा यथा—

'तन्वङ्ग्याः स्तनयुग्मेन मुखं न प्रकटीकृतम्।
हाराय गुणिने स्थानं न दत्तमिति लज्जया ॥'

अत्र लज्जयेवेतीवाद्यभावात्प्रतीयमानोत्प्रेक्षा। एवमन्यत्। ननु

ज्ञानादीनां मौनादिप्रयोजकत्वम्। क्रियोत्प्रेक्षामाह—**गङ्गेति**। सुरत्राणेति प्रसिद्धस्य राज्ञः संबोधनम्। प्रयाणकालीनवाद्यं निःशान्नः। अरिवधूवर्गस्य गर्भपातनमेव पातकं पापजननयोग्यकर्म, तद्वान्। पापकर्मा हि गङ्गास्नानं करोति। शब्दोऽपि पापकर्मवानिति तदीयगङ्गाजलसंबन्धे स्नानसंभावना। द्रव्योत्प्रेक्षामाह—**मुखमिति**। अपरः प्रसिद्धातिरिक्तः। अयं प्रौढोक्तिसिद्धः। एते दर्शितप्रकारोत्प्रेक्षाप्रकाराः। **कपोलेति**। तथाविधौ अतिसुन्दरौ। क्षामतां कृशत्वम्। ननु कपोलयोः परस्परदर्शनाभावः सिद्ध एव कथमत्र संभावनेति चेत्, न। विरहजनितकृशत्वे परस्परदर्शनाभावजन्यकृशत्वसंभावनायां तात्पर्यात्। पातकित्वं पापजननयोग्यत्वं गुणक्रियातिरिक्तो धर्मः यथाश्रुतस्य शब्देऽसंभव इति ध्येयम्। एतेन 'निष्पन्दमरविन्दाक्षि नेत्रद्वन्द्वमिदं तव। चिरविच्छिन्नमेकान्तं कान्तमाध्यायति ध्रुवम् ॥' इत्यादौ गुणक्रियाभिन्नस्य निष्पन्दत्वादेरपि निमित्तस्य संग्रहः। यद्वा निमित्तस्यापि भावाभावरूपत्वं द्वैविध्यं बोध्यम्। **तन्वङ्ग्या इति**। कालिम्ना वृतत्वात्। मुखप्रकटीकरणाभाव इति भावः। गुणिने सूत्रवते, अथ च विद्यादिगुणशालिने। दानाभावो हि लज्जासंपादकः। स्तनयोरिति सान्द्रत्वेन हारस्यावकाशाप्राप्तिस्तत्रेयमुत्प्रेक्षा। उत्प्रेक्षां विनापि तव हृदये वस्तुमिवेति फलोत्प्रेक्षां विनापि। उत्प्रेक्षयैव उत्प्रेक्षावा-

ध्वनिनिरूपणप्रस्तावेऽलंकाराणां सर्वेषामपि व्यङ्ग्यत्वं भवतीत्युक्तम्। संप्रति पुनर्विशिष्य कथमुत्प्रेक्षायाः प्रतीयमानत्वम्[1]। उच्यते—व्यङ्ग्योत्प्रेक्षायां 'महिलासहस्स–' इत्यादावुत्प्रेक्षणं विनापि वाक्यविश्रान्तिः। इह तु स्तनयोर्लज्जाया असंभवाल्लज्जयेवेत्युत्प्रेक्षयैवेति व्यङ्ग्यप्रतीयमानोत्प्रेक्षयोर्भेदः। अत्र वाच्योत्प्रेक्षायाः षोडशसु भेदेषु मध्ये विशेषमाह—

तत्र वाच्याभिदा पुनः।
विनाद्रव्यं त्रिधा सर्वाः स्वरूपफलहेतुगाः॥ ४३॥

तत्रोक्तेषु वाच्यप्रतीयमानोत्प्रेक्षयोर्भेदेषु मध्ये ये वाच्योत्प्रेक्षायाः षोडश भेदास्तेषु च जात्यादीनां त्रयाणां ये द्वादश भेदास्तेषां प्रत्येकं स्वरूपफलहेतुगम्यत्वेन द्वादशभेदतया षट्त्रिंशद्भेदाः। द्रव्यस्य स्वरूपोत्प्रेक्षणमेव संभवतीति चत्वार इति मिलित्वा चत्वारिंशद्भेदाः। अत्र स्वरूपोत्प्रेक्षा यथा पूर्वोदाहरणेषु 'सरस्य विजयस्तम्भः–' इति। 'सप्रसवा इव–' इत्यादयो जातिगुणस्वरूपगाः[2]। फलोत्प्रेक्षा यथा—

'रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम्॥'

अत्राख्यातुमिति भूप्रवेशस्य फलं क्रियारूपमुत्प्रेक्षितम्। हेतूत्प्रेक्षा यथा—

'सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम्।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम्॥'

अत्र दुःखरूपो गुणो हेतुत्वेनोत्प्रेक्षितः। एवमन्यत्।

उक्त्यनुक्त्योर्निमित्तस्य द्विधा तत्र स्वरूपगाः।

चकेवाद्यध्याहारेणैव वाक्यविश्रान्तिरित्यन्वयः। अनयोरुत्प्रेक्षाध्वनिप्रतीयमानोत्प्रेक्षयोः। **स्वरूपेति**। तादर्थ्यचतुर्थ्यन्तेन तुमुनन्तेन वा पदेन यत्रोत्प्रेक्षा सा फलोत्प्रेक्षा। हेतुविभक्त्यन्तपदेन उत्प्रेक्षा हेतूत्प्रेक्षा। ताभ्यामितरा स्वरूपोत्प्रेक्षा संभवतीति फलहेतुभावेन द्रव्यसंभावनाया वैचित्र्याजनकत्वादिति भावः। पूर्वोदाहरणेषु 'ऊरुः–' इत्यादिषु। रामास्तो रामविक्षिप्तः। बाणस्य भूतलप्रवेशो रामवीर्यातिशयं ख्यापयति। तत्र प्रियाख्यानसंभावना। **सैषेति**। सीतां प्रति श्रीरामस्योक्तिरियम्। विचिन्वता अन्विष्यता। अत्र सीताचरणासंबन्धः सीताचरणविश्लेषदुःख-

---

१. 'उच्यते' इत्यधिकं घ-पुस्तके. २. 'रूपगाः' इति घ-पुस्तके

तेषु चत्वारिंशत्संख्याकेषु भेदेषु मध्ये ये स्वरूपगायाः षोडशभेदास्ते उत्प्रेक्षानिमित्तस्योपादानानुपादानाभ्यां द्वात्रिंशद्भेदा इति मिलित्वा षट्पञ्चाशद्भेदा वाच्योत्प्रेक्षायाः । तत्र निमित्तस्योपादानं यथा पूर्वोदाहृते 'स्रातीव–' इत्युत्प्रेक्षायां निमित्तं पातकित्वमुपात्तम् । अनुपादाने यथा—'चन्द्र इवापरः' इत्यत्र तथाविधसौन्दर्याद्यतिशयो नोपात्तः । हेतुफलयोस्तु नियमेन निमित्तस्योपादानमेव । तथाहि—'विश्लेषदुःखादिव' इत्यत्र यन्निमित्तं बद्धमौनत्वम् 'आख्यातुमिव' इत्यत्र च भूप्रवेशस्तयोरनुपादानेऽसंगतमेव वाक्यं स्यात् । प्रतीयमानायाः षोडशसु भेदेषु विशेषमाह—

प्रतीयमाना भेदाच्च प्रत्येकं फलहेतुगाः ॥ ४४ ॥

यथोदाहृते 'तन्वङ्ग्याः स्तनयुग्मेन–' इत्यत्र लज्जयैवेति हेतुरुत्प्रेक्षितः । अस्यामपि निमित्तस्यानुपादानं न संभवति । इवाद्यनुपादाने निमित्तस्य वाकीर्तने उत्प्रेक्षणस्य प्रमातुर्निश्चेतुमशक्यत्वात् । स्वरूपोत्प्रेक्षाप्यत्र न भवति । धर्मान्तरतादात्म्यनिबन्धनायामस्यामिवाद्यप्रयोगे विशेषणयोगे सत्यतिशयोक्तेरभ्युपगमात् । यथा—'अयं राजापरः पाकशासनः' इति । तदेवं द्वात्रिंशत्प्रकारा प्रतीयमानोत्प्रेक्षा ।

उक्त्यनुक्त्योः प्रस्तुतस्य प्रत्येकं ता अपि द्विधा ।

ता उत्प्रेक्षाः । उक्तौ यथा—'ऊरुः कुरङ्गकदृशः–' इति । अनुक्तौ यथा मम प्रभावत्याम्—'**प्रद्युम्नः**—इह हि संप्रति दिगन्तरमाच्छादयता तिमिरपटलेन ।

त्वेन संभावितः । **मिलित्वेति** । 'चतुर्विंशतिप्रकारफलहेतूत्प्रेक्षाभिः' इति शेषः । **हेतुफलयोस्त्विति** । हेतूत्प्रेक्षाफलोत्प्रेक्षयोस्त्वित्यर्थः । हेतूत्प्रेक्षायामुत्प्रेक्ष्यमाणस्य फलमेव निमित्तं फलोत्प्रेक्षायां तु हेतुरेवेत्यवधेयम् । **असंगतमेवेति** । विभक्त्याद्युपस्थापितस्य हेतुत्वस्य कार्यत्वस्य वा अन्वयानुपयोग्यलाभेनान्वयबोधविधुरं स्यादित्यर्थः । धर्मान्तरतादात्म्यनिबन्धनायां धर्मान्तरतादात्म्यविषयिण्यामस्यामुत्प्रेक्षायां विशेषणस्यासंभवित्वसंपादकधर्मस्य योगे इत्यर्थः । अध्यवसीयमानस्य प्रौढोक्तिसिद्धत्वेनोत्कृष्टत्वमिति विषयस्यापकृष्टत्वरूपमधःकरणमतिशयोक्तिप्रयोजकम् । **अभ्युपगमादिति** । इवाद्ययोगे संभावनायाः सिद्धत्वेनावभासादिति भावः ।

---

१. 'च' घ-पुस्तके पाठः. २. 'दिगन्तं' घ-पुस्तके.

घटितमिवाञ्जनपुञ्जैः पूरितमिव मृगमदक्षोदैः ।
ततमिव तमालतरुभिर्वृतमिव नीलांशुकैर्भवनम् ॥'

अत्राञ्जनेन घटितत्वादेरुत्प्रेक्षणीयस्य विषयव्याप्तत्वं नोपात्तम् ।

यथा वा—

'लिम्पतीव[1] तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।

अत्र तमसो लेपनस्य व्यापनरूपो विषयो नोपात्तः । अञ्जनवर्षणस्य तमःसंपातः । अनयोरुत्प्रेक्षानिमित्तं च तमसोऽतिबहुलत्वं धारारूपेणाधःसंयोगश्च यथासंख्यम् । केचित्तु—'अलेपनकर्तृभूतमपि तमोलेपनकर्तृत्वेनोत्प्रेक्षितं व्यापनं च निमित्तम्, एवं नभोऽपि वर्षणक्रियाकर्तृत्वेन' इत्याहुः ।

अलंकारान्तरोत्था सा वैचित्र्यमधिकं भजेत्[3] ॥ ४५ ॥

तत्र सापह्ववोत्प्रेक्षा यथा मम—

'अश्रुच्छलेन सुदृशो हुतपावकधूमकलुषाक्ष्याः ।
अप्राप्य मानमङ्गे विगलति लावण्यवारिपूर इव ॥'

श्लेषहेतुगा यथा—

'मुक्तोत्करः संकटशुक्तिमध्याद्विनिर्गतः सारसलोचनायाः ।
जानीमहेऽस्याः कमनीयकम्बुग्रीवाधिवासाद्गुणवत्त्वमाप ॥'

रूपकस्येति । अभ्युपगमादित्यन्वयः । विषयस्याधःकरणाभावाद् रूपकस्यैव प्रसर इति भावः । प्रस्तुतस्य विषयस्य । ता निरुक्ताष्टविंशतिप्रकारा उत्प्रेक्षाः । **लिम्पतीवेति** । गाढान्धकारवर्णनमिदम् । तमःसंपात इति विषयो नोपात्त इत्यन्वयः । अतिबहुलत्वं अतिबहुत्वप्रयुक्तनिबिडसंयोगः । एवं सति साधारणधर्मत्वमुपपन्नम् । **धारारूपेणेति** । तमस इति योजना । **अधःसंयोगश्चेति** । तमसो द्रव्यत्ववादिमतमाश्रित्योक्तम् । **व्यापनं चेति** । निबिडसंयोगानुकूलव्यापारश्चेत्यर्थः । **एवमिति** । अवर्षणक्रियाकर्तृभूतमपीत्यर्थः । उत्प्रेक्षितमित्यनुषज्यते । अत्र धारारूपेणाधःसंपातो निमित्तं नभसोऽञ्जनवर्षणकर्तृत्वेन संभावनायां प्रकृतस्योपमेयस्य तमसो बोधो दुर्घट इत्यस्वरसः केचिदित्यनेन सूचितः । अपरे तु 'तमोऽञ्जनत्वेनोत्प्रेक्षितं नीलत्वमत्र निमित्तम्' इत्याहुः । सा उत्प्रेक्षा सापह्नवा अपह्नुत्यलंकारमूला । मानमियत्ताम् । **संकटेति** । कारणस्य गुणवत्त्वप्राप्तिकारणत्वाभावसूचकम् । गुणवत्त्वमुत्कर्षप्रयोजकधर्मयोगित्वम्, अथ च सूत्रवत्त्वम् । अपकृष्टजातानां-

1. लिम्पतीवेति । 'असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥' इति तूत्तरार्धम् ॥

१. 'आतं क-पुस्तके नास्ति. २. 'धारारूपः' क. ३. 'वहेत्' घ.

अत्र गुणवत्त्वे श्लेषः । कम्बुग्रीवाधिवासादिवेति हेतूत्प्रेक्षाया हेतुः । अत्र 'जानीमहे' इत्युत्प्रेक्षावाचकम् । एवम्—

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः ।

क्वचिदुपमोपक्रमोत्प्रेक्षा यथा—

'पारेजलं नीरनिधेरपश्यन्मुरारिरानीलपलाशराशीः ।
वनावलीरुत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवलाभाः ॥'

इत्यत्राभाशब्दस्योपमावाचकत्वादुपक्रमे उपमा । पर्यवसाने तु जलधितीरे शैवालस्थितेः संभावनानुपपत्तेः संभावनोत्थानमित्युत्प्रेक्षा । एवं विरहवर्णने—'केयूरायितमङ्गदैः—' इत्यत्र विकासिनीलोत्पलति स्म कर्णे मृगायताक्ष्याः कुटिलः कटाक्षः' इत्यादौ च ज्ञेयम् । भ्रान्तिमदलंकारे 'मुग्धा दुग्धधिया—' इत्यादौ भ्रान्तानां बलवादीनां विषयस्य चन्द्रिकादेर्ज्ञानमेव नास्ति । तदुपनिबन्धनस्य कविनैव कृतत्वात् । इह तु संभावनात्कर्तुर्विषयस्यापि ज्ञानमिति द्वयोर्भेदः । संदेहे तु समकक्षतया कोटिद्वयस्य प्रतीतिः । इह तूत्कटा संभाव्यभूतैका कोटिः । अतिशयोक्तौ विषयिणः प्रतीतस्य पर्यवसाने-

---

मप्युत्तमस्थानवासेन गुणवत्त्वं भवतीति भावः । हारस्य गुणवत्त्वप्राप्तौ स्वभाव एव हेतुस्तत्रेयमुत्प्रेक्षा । अथ च शुक्तिमध्यापेक्षया कम्बुग्रीवाया महत्त्वमुचितमेव । **एवमिति** । उत्प्रेक्षावाचका इत्यर्थः । आदिपदात्खलु-किमु-प्रभृतीनां ग्रहणम् । यथा—'रुचयोऽस्तमितस्य भास्वतः स्खलिता यत्र निरालयाः खलु । अभिसायमतोविलेपनापणकाश्मीरजपण्यवीथयः ॥', 'पृथुवर्तुलतन्निताम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया । विधिरेककचक्रचारिणं किमु निर्मित्सति मान्मथं रथम् ॥' इवशब्दस्योत्प्रेक्षावाचकत्वं प्रसिद्धमिति तन्नोक्तम् । आदिपदेन वा तस्यापि ग्रहणम् । उत्कलिकासहस्रेण तरङ्गसमूहेन प्रतिक्षणमुत्कूलिताः कूलं प्रापिताः ये शैवालास्तत्तुल्या इत्यर्थः । 'कथितोत्कलिकोत्कंठाहेलासलिलवीचिषु' इति मेदिनी । **उपक्रम इति** । प्रथममुपमाप्रतीतिरित्यर्थः । संभावनोत्थापनं संभावनाप्रतीतिः । **केयूरायितमिति** । अङ्गदैः कंकणैः । अनयोरायतकुकोरुपमावाचकत्वादुपक्रमे उपमाप्रतीतिः । पर्यवसाने तु भुजमध्ये कर्णे च कंकणकटाक्षयोरसंभवात्संभावनोत्थानमित्युत्प्रेक्षा । इदानीं भ्रान्तिमदादिभ्य उत्प्रेक्षाया भेदमुपपादयति—**भ्रान्तिमदिति** । तदुपनिबन्धनस्य चन्द्रिकादिवर्णनस्य । **विषयस्य चेति** । चकाराद्विषयिणश्च संग्रहः । समकक्षतया तुल्यस्वरूपतया । उत्कटा निश्चितप्राया संभाव्यभूता अनिर्धारितस्वरूपा । कोटिः

---

१. 'क-पुस्तके समस्त' पाठः. २. 'पर्यवसानात्' घ-पुस्तके.

ऽसत्यता प्रतीयते । इह तु प्रतीतिकाल एवेति भेदः ।

'रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु ।
पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण ॥'

इत्यत्र यत्तर्वादौ तिमिराक्रान्तन्ता रञ्जनादिरूपेण संदिह्यत इति संदेहालंकार इति [1]केचिदाहुः, तन्न एकविषये समानबलतयानेककोटिस्फुरणस्यैव संदेहत्वात् । इह तु तर्वादिव्याप्तेः प्रतिसंबन्धिभेदो व्यापनादेर्निगरणेन रञ्जनादेः स्फुरणं च । अन्ये तु—'अनेकत्वनिर्धारणरूपविच्छित्त्याश्रयत्वेनैककोट्यधिकेऽपि भिन्नोऽयं संदेहप्रकारः' इति वदन्ति स्म, तदप्ययुक्तम् । निगीर्णस्वरूपस्यान्यतादात्म्यप्रतीतिर्हि संभावना । तस्याश्चात्र स्फुटतया सद्भावान्नुशब्देन चेवशब्दवत्तस्या द्योतनादुत्प्रेक्षैवेयं भवितुं युक्ता । अलमदृष्टसंदेहप्रकारकल्पनया ।

'यदेतच्चन्द्रान्तर्जलदलवलीलां वितनुते
तदाचष्टे लोकः शशक इति नो मां प्रति तथा ।
अहं त्विदुं मन्ये त्वदरिविरहाक्रान्ततरुणी-
कटाक्षोल्कापातव्रणकिणकलङ्काङ्कितततनुम् ॥'

प्रकारः । एककोटिकज्ञानस्यापि यत्संशयत्वमुच्यते तदनिर्धारणत्वरूपसंशयधर्मयोगाद् गौणमेव । पर्यवसाने शाब्दबोधानन्तरम् । **प्रतीतिकाल एवेति** । रूपकवदाहार्यएवान्यतादात्म्यप्रत्ययः संभावनेति भावः । रञ्जिता नीलद्रव्येण लिप्ता । नामितं प्रह्वीकृतम् । स्थगितं संवृतम् । विषमेषु निम्नभागेषु । संहृता अपनीताः । **प्रतिसंबन्धिभेद इति** । तथा चैकविषयानेककोटिज्ञानत्वाभावादस्य संशयत्वमनुपपन्नमिति भावः । नन्विदं तमसा तरुशैलादिव्यापनं न तु रञ्जनमित्याद्याकारा नानासंदेहा एवेत्यत आह—**व्यापनादेरिति** । निगरणेन अधःकरणेन । **एककोट्यधिकेऽपीति** । भावप्रधानो निर्देशः । एककोटेरुत्कटत्वेऽपीति तदर्थः । **निगीर्णेति** । निगीर्णत्वमधःकृतत्वं तच्च विच्छित्तिविशेषं प्रत्यकिंचित्करत्वमेव न तु शब्दानुपात्तत्वमात्रम् । तथा सति 'ऊरुः कुरङ्गकदृशः—' इत्यादौ विषयोपादानादव्याप्तिः स्यात् । अन्यतादात्म्यप्रतीतिरुपमानतादात्म्यारोपः । प्रतीतिरत्र निर्धारणरूपा प्रत्येतव्याः । तेनातिशयोक्तिव्युदासः । **यदेतदिति** । वस्त्विति शेषः । जलदलवलीलां मेघख-

1. **केचिदिति** । अलंकारसर्वस्वकारादयः ॥

१. '–अधिकः' क-घ.

इत्यत्र मन्येशब्दप्रयोगेऽप्युक्तरूपायाः संभावनाया अप्रतीतेर्वितर्क-मात्रं नासावपह्नवोत्प्रेक्षा ।

सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते[1] ॥ ४६ ॥

विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोऽध्यवसायः । अस्य चोत्प्रेक्षायां विषयिणोऽनिश्चितत्वेन निर्देशात्साध्यत्वम् । इह तु निश्चितत्वेनैव प्रतीतिरिति सिद्धत्वम् । विषयनिगरणं चोत्प्रेक्षायां विषयस्याधःकरणमात्रेण । इहापि मुखं द्वितीयश्चन्द्र इत्यादौ । यदाहुः—

'विषयस्यानुपादानेऽप्युपादानेऽपि सूरयः ।
अधःकरणमात्रेण निगीर्णत्वं प्रचक्षते ॥' इति ।

भेदे[2]ऽप्यभेदः संबन्धेऽसंबन्धस्तद्विपर्ययौ ।
पौर्वापर्यात्ययः कार्यहेत्वोः सा पञ्चधा ततः ॥ ४७ ॥

ण्डसादृश्यं वितनुते धारयति । तथा शशकवचनम् । तद्वस्तुनः[1] शशकवचनं न ममेत्यर्थः । वितर्कमात्रं प्रौढोक्तिसिद्धकोटयुपस्थितिमात्रम् । तथा च यदेतदित्यनेन किमप्यनिर्दिष्टस्वरूपं वस्तु प्रस्तुतम्, तस्यात्र शशरूपत्वं प्रतिषिध्य[2] किरणकलङ्करूपत्वं व्यवस्थापितं न तूपमानतादात्म्यं संभावितमिति भावः । अतिशयोक्त्यलंकारमाह—**सिद्धत्वे इति** । निश्चितविषयिग्राहकत्वे इत्यर्थः । निश्चयरूपत्व इति पर्यवसितोऽर्थः । अध्यवसायपदार्थमाह—**विषयेति** । विषयिणोऽध्यवसायप्रकारस्य अभेदप्रतिपत्तिस्तादात्म्यारोपः । सिद्धत्व इत्यस्य व्यावृत्तिमाह—**अस्य चेति** । अध्यवसायस्य चेत्यर्थः । निर्देशाद् विषयीकरणात् । साध्यत्वं व्यक्ताप्रामाण्यत्वम् । प्रतीतिरिति विषयिण इत्यन्वयः । ननु शब्देनानुपादानं निगरणम्, एवं सत्युक्तप्रस्तुतायामुत्प्रेक्षायामतिशयोक्तौ चोक्तविषयायां कथं लक्षणगमनमत आह—**निगरणं चेति** । अधःकरणमात्रेण विच्छित्तिविशेषं प्रत्यकिंचित्करत्वेनापकर्षमात्रेण न तु शब्दानुपादानेनापि । **भेद इति** । भेदे सत्यप्यभेदप्रतिपत्तिरित्यर्थः । एवमग्रेऽपि । पौर्वापर्यात्ययः पौर्वापर्यविपर्यासः । स च पूर्वोत्पन्ने परोत्पन्नत्वारोपः परोत्पन्ने पूर्वोत्पन्नत्वारोप इत्युभयस्वरूप एकः प्रकारः । क्रमोत्पन्ने च समकालोत्पन्नत्वारोप इति

---

1. **अतिशयोक्तिरिति** । अतिशयोऽतिशयिता प्रसिद्धिमतिक्रान्ता उक्तिरतिशयोक्तिः । विषयिणा विषयस्य निगरणमतिशयस्तस्योक्तिरिति रसगङ्गाधरकाराः ॥

2. **भेद इति** । भेदेऽभेदः, अभेदे भेदः, संबन्धेऽसंबन्धः, असंबन्धे संबन्धः, कार्यकारणपौर्वापर्यव्यत्यास इति पञ्चविधातिशयोक्तिः ॥

१' 'तद्वस्तुनः शशकवचनं' इति लिखितपुस्तके नास्ति. २. 'प्रतिषिद्धकिरण-' इति मुद्रितपाठः.

तद्विपर्ययौ अभेदे भेदः, असंबन्धे संबन्धः । सातिशयोक्तिः । अत्र भेदेऽभेदो यथा मम—

'कथमुपरि कलापिनः कलापो
विलसति तस्य तलेऽष्टमीन्दुखण्डम् ।
कुवलययुगलं ततो विलोलं
तिलकुसुमं तदधः प्रवालमस्मात् ॥'

अत्र कान्ताकेशपाशादेर्मयूरकलापादिभिरभेदेनाध्यवसायः । यथा वा—'विश्लेषदुःखादिव बद्धमौनम्' । अत्र चेतनगतमौनित्वमन्यदचेतनगतं चान्यदिति द्वयोर्भेदेऽप्यभेदः । एवम्—

'सहाधरदलेनास्या यौवने रागभाक्प्रियः ।'

अत्राधरस्य रागो लौहित्यम्, प्रियस्य रागः प्रेम, द्वयोरभेदः ।

अभेदे भेदो यथा—

'अन्यदेवाङ्गलावण्यमन्याः सौरभसंपदः ।
तस्याः पद्मपलाशाक्ष्याः सरसत्वमलौकिकम् ॥'

संबन्धेऽसंबन्धो यथा—

'अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः ।
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।

द्वितीयः । केशपाशादेरित्यादिपदेन भालनेत्रनासाधरग्रहणम् । [1]सादृश्यनिबन्धनाभेदारोपरूपातिशयोक्तिमुदाहृत्य एकशब्दप्रतिपाद्यत्वनिबन्धनाभेदारोपरूपामुदाहरति—**यथा वेति** । अत्र युगपद्वृत्तिद्वयस्य स्वार्थोपस्थापकत्वाङ्गीकारेण शक्यलक्ष्ययोरेकदैवैकशब्दोपस्थाप्यत्वमित्यभिप्रायेणाह—**अत्रेति** । चेतनगतं मौनित्वं वचनाभावरूपम्, अचेतनगतं च ध्वन्यभावरूपम् । आद्ये शक्तिर्द्वितीये लक्षणा । ताभ्यामेकदैव उभयमुपस्थाप्यते श्लेषेण । एकशब्दप्रतिपाद्यत्वनिबन्धनाभेदारोपरूपामतिशयोक्तिमुदाहरति—**एवमिति** । अत्र द्वयोरप्येकत्वनिबन्धनकार्यसाधनत्वरूपातिशयोक्तिरवधेया । **अन्यदेवेति** । सरसत्वं रसबोद्धृत्वम् । **अस्या इति** । सर्गविधौ सृष्टिकर्मणि । चन्द्रः प्रजापतिरभूत् । नु वितर्के । चन्द्रस्य कान्तिमयत्वात्कान्तिप्रदत्वं संभाव्योक्तम् । मदन इति प्रजापतिरभूदित्यन्वयः । अत्र हेतुः—शृङ्गारेति । पुष्पाकरश्चैत्रः । अत्र सौरभ्यसौकुमार्यास्पदत्वं हेतुर्बोध्यः । अस्य प्रसिद्धत्वान्न निर्हेतुकत्वदोषः । यद्वा शृङ्गारैकरस इति चैत्रस्यापि विशेषणम् । ननु विधिरेव क-

---

१. 'सादृश्य—' इत्यादिः '—अतिशयोक्तिरवधेया' इत्यन्तः पाठः पुस्तकान्तरे नास्ति.

वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥'

अत्र पुराणप्रजापतिनिर्माणसंबन्धेऽप्यसंबन्धः ।

असंबन्धे संबन्धो यथा—

'यदि स्यान्मण्डले सक्तमिन्दोरिन्दीवरद्वयम् ।
तदोपमीयते तस्या वदनं चारुलोचनम् ॥'

अत्र यद्यर्थबलादाहृतेन संबन्धेन संभावनया संबन्धः । कार्यकारणयोः पौर्वापर्यविपर्ययश्च द्विधा भवति । कारणात्प्रथमं कार्यस्य भावे, द्वयोः समकालत्वेन च । क्रमेण यथा—

'प्रागेव हरिणाक्षीणां चित्तमुत्कलिकाकुलम् ।
पश्चादुद्भिन्नबकुलरसालमुकुलश्रियः ॥'

'सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यं मण्डलं च महीक्षिताम् ॥'

इह केचिदाहुः—'केशपाशादिगतो लौकिकोऽतिशयोऽलौकिकत्वेनाध्यवसीयते । केशपाशादीनां कलापादिभिरध्यवसाये '[1]अन्यदेवा-

स्मादस्या निर्माता नेत्यत आह—**वेदेति** । वेदाभ्यासेन परमतात्पर्यपर्यालोचनेन जडो विषयोपभोगाचतुरः, अत एव विषयव्यावृत्तकौतूहलः । पुराण इति प्रजापतिरिति संबन्धः । मुनिर्मननशीलः । एतेन सृष्टिकर्मणि चित्तैकाग्र्यत्वं नास्तीति सूचितम् । तद्विनैतादृशरूपसृष्टिर्न भवतीति भावः । इदं काव्यप्रकाशे शुद्धसंदेहोदाहरणत्वेनोपन्यस्तम् । तन्मते विधेर्निर्मातृत्वव्यावृत्तिरपि संशयितैवेति न निश्चयान्तत्वमस्य । **यदि स्यादिति** । इयमद्भुतोपमेति दण्डी । नन्विन्दीवरद्वयस्येन्दुमण्डले व्यतिरेकप्रतीतिरेव जायते कथं संबन्धाध्यवसाय इत्यत आह—**यद्यर्थेति** । यद्यर्थबलाद् यद्यर्थसामर्थ्याद् आहृतेन कल्पितेन [2]संबन्धेन पदार्थेन संभावनया अध्यवसायेन संबन्धः । 'गृह्यते' इति शेषः । यद्यर्थप्रयोग एवायं प्रकारः संभवति आहार्य एव संबन्धाध्यवसाय इति भावः । अत एवोक्तं काव्यप्रकाशे—'यद्यर्थोक्तौ च कल्पनम्' इति । द्वयोः कार्यकारणयोः समकालत्वे समकालोत्पन्नत्वे । **प्रागेवेति** । उत्कलिकाकुलं उत्कण्ठाव्याप्तं जातम् । उद्भिन्नानामुत्फुल्लानां बकुलाम्रमुकुलानां च श्रियो जाता इत्यर्थः । सममेव एकदैव समाक्रान्तमारूढं वशीकृतं च । पित्र्यं पितुरागतम् । अनयोः कारणस्यात्यन्तशीघ्रकारित्वं व्यज्यते । केचित्तु 'सममेवेत्यादिद्वितीयप्रकारः 'धुनोति चांसि तनुते च कीर्तिम्' इतिवत् समुच्चयालंकारस्यैव विषयः'

१. 'अन्यदेव–' इत्यादिः '–उत्प्रेक्षा' इत्यन्तः पाठो घ-पुस्तके नास्ति. २. 'संभवेन' इति मुद्रितपुस्तके.

ङ्गलावण्यं—' इत्यादिप्रकारेष्वव्याप्तिर्लक्षणस्य' इति, तन्न । तत्रापि ह्यन्यदङ्गलावण्यमन्यत्वेनाध्यवसीयते । तथाहि 'अन्यदेव' इति स्थाने 'अन्यदिव' इति पाठेऽध्यवसायस्यासाध्यत्वमेवेत्युत्प्रेक्षाङ्गीक्रियते । 'प्रागेव हरिणाक्षीणां—' इत्यत्र बकुलादिश्रीणां प्रथमभावितापि पश्चाद्भावित्वेनाध्यवसिता । अत एवात्रापीवशब्दप्रयोगे उत्प्रेक्षा । एवमन्यत्र ।

पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् ।
एकधर्माभिसंबन्धः स्यात्तदा तुल्ययोगिता[1] ॥ ४८ ॥

अन्येषामप्रस्तुतानां धर्मो गुणक्रियारूपः । उदाहरणम्—

'अनुलेपनानि कुसुमान्यबलाः
कृतमन्यवः पतिषु दीपदशाः ।
समयेन तेन सुचिरं शयित-
प्रतिबोधितस्मरमबोधिषत ॥'

अत्र संध्यावर्णनस्य प्रस्तुतत्वात्प्रस्तुतानामनुलेपनादीनामेकबोधन-क्रियाभिसंबन्धः ।

इति वदन्ति, तन्न । विरूपशब्दाभ्यामेव क्रिययोरुपादाने हि समुच्चयस्वीकारात् । कलापादिभिरध्यवसाये विवक्षिते इति शेषः । **अव्याप्तिरिति** । अन्यदेवेत्यत्र लावण्यान्तरस्य भेदसत्त्वेनाध्यवसायरूपत्वाभावादिति भावः । एवमन्यत्रापि यथायथं ज्ञेयम् । **अन्यदिति** । अतिशयप्रतीतये एतद्यत्रैरेव भेदस्तत्राध्यवसीयत इत्यर्थः । **तथाहीति** । निरुक्ताध्यवसायस्वीकारेऽनुभवसिद्धोत्प्रेक्षा न स्यादिति भावः । **बकुलादिश्रीणामिति** । एवमुत्कलिकायाः पश्चाद्भावितापि पूर्वभावित्वेनाध्यवसितेति बोध्यम् । **एवमिति** । उक्तदिशा । अन्यत्र तृतीयचतुर्थप्रकारयोरव्याप्त्युद्धारो बोद्धव्य इत्यर्थः । तथाहि—तादृशरूपस्य निर्माता विधिरनिर्मातृत्वेन इन्दुमण्डलासक्तमिन्दीवरद्वयमिन्दुमण्डलसक्तत्वेनाध्यवसीयत इति भावः । तुल्ययोगितालंकारमाह—**पदार्थानामिति । अनुलेपनानीति** । चन्दनद्रवानित्यर्थः । कुसुमानि शुक्लपुष्पाणि । तेन तमस्विना समयेन । पतिषु कृतमन्यवोऽबलाः सुचिरं शयितप्रतिबोधितस्मरं यथा स्यात्तथा अनुलेपनादीनि अबोधिषत । बोधिता इत्यर्थः । तमस्यनुलेपनादीनां शुभ्रस्फूर्तिरस्ति, ततश्च स्मरोद्बोधो जायते, मृगमदादीनां तमोग्रस्ततया स्फूर्तिर्न संभवतीति भावः । **अत्रेति** । प्रस्तुते तमसि स्फुर-

---

1. **तुल्ययोगितेति** । तुल्या योगितान्वयो यत्रेति ॥

'तदङ्गमार्दवं द्रष्टुः कस्य चित्ते न भासते ।
मालतीशशभृल्लेखाकदलीनां कठोरता ॥'

इत्यत्र मालत्यादीनामप्रस्तुतानां कठोरतारूपैकगुणसंबन्धः ।

एवम्—

'दानं वित्तादृतं वाचः कीर्तिधर्मौ तथायुषः ।
परोपकरणं कायादसारात्सारमाहरेत् ॥'

अत्र दानादीनां कर्मभूतानां सारतारूपैकगुणसंबन्ध एकाहरण-क्रियासंबन्धः ।

अप्रस्तुतप्रस्तुतयोर्दीपकं[1] तु निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥ ४९ ॥

क्रमेणोदाहरणम्—

'बलावलेपादधुनापि पूर्ववत्-
प्रबाध्यते तेन जगज्जिगीषुणा ।
सतीव योषित्प्रकृतिश्च निश्चला
पुमांसमभ्येति भवान्तरेष्वपि ॥'

अत्र प्रस्तुताया निश्चलायाः प्रकृतत्वे अप्रस्तुतायाश्च सत्या योषित एकानुगमनक्रियासंबन्धः ।

द्रूपत्वादनुलेपनादीनामपि प्रस्तुतत्वमित्यभिप्रायः । **तदङ्गमिति** । अत्र वर्णनीयतया नायिका प्रस्तुता । मालत्यादीनां तूपमानत्वेनाप्रस्तुतत्वम् । गुणक्रियोभयाभिसंबन्धे तुल्ययोगितामुदाहरति—**दानमिति** । दीपकालंकारमाह—**अप्रस्तुतेति** । ननु 'कमलमिव मुखं मनोज्ञं—' इत्यादावतिव्याप्तिरिति चेत्, न । साम्यवाचकपदाभावे सतीत्यस्य विवक्षणीयत्वात् । एवं वैधर्म्योक्त्यभावे सतीत्यपि बोध्यम् । तेन 'त्वं समुद्रश्च दुर्वारौ महासत्त्वौ सतेजसौ । अयं तु युवयोर्भेदः स जडात्मा पटुर्भवान् ॥' इत्यादिव्यतिरेकालंकारे नातिव्याप्तिः । प्रकारत्रयेण दीपकमाह—**अथेति** । अथवेत्यर्थः । अनेकासु क्रियास्वेकं कारकं यदि संबद्धं स्यात्तदापि दीपकं स्यादित्यर्थः । बलावलेपात् सामर्थ्यगर्वात् । अधुनापि अस्मिन् जन्मन्यपि । पूर्ववत्पूर्वजन्मनीव । तेन शिशुपालेन । भवान्तरेषु जन्मान्तरेषु । द्वितीयं दीपकमुदाहरति—

---

1. **दीपकमिति** । प्रकृतार्थमुपात्तो धर्मः प्रसङ्गादप्रकृतमपि दीपयति प्रकाशयति सुन्दरीकरोतीति दीपकम् । अथवा । दीप इव दीपकम् । संज्ञायां कन् । दीपसादृश्यं च प्रकृताप्रकृतप्रकाशकत्वेनावसेयम् ॥

'दूरं समागतवति त्वयि जीवनाथे
भिन्ना मनोभवशरेण तपस्विनी सा ।
उत्तिष्ठति स्वपिति वासगृहं त्वदीय-
मायाति याति हसति श्वसिति क्षणेन ॥'

इदं मम । अत्रैकस्या नायिकाया उत्थानाद्यनेकक्रियासंबन्धः । अत्र च गुणक्रिययोरादिमध्यावसानसद्भावेन त्रैविध्यं न लक्षितम् । तथाविधवैचित्र्यस्य सर्वत्रापि सहस्रधासंभवात् ।

[1]प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययोः ।
एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक् ॥ ५० ॥

यथा—

'धन्यासि वैदर्भि गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि ।
इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति ॥'

अत्र समाकर्षणमुत्तरलीकरणं च क्रियैकैव पौनरुक्त्यनिरासाय भिन्नवाचकतया निर्दिष्टा । इदं मालयापि दृश्यते यथा—

'विमल एव रविर्विशदः शशी
प्रकृतिशोभन एव हि दर्पणः ।
शिवगिरिः शिवहाससहोदरः
सहजसुन्दर एव हि सज्जनः ॥'

दूरमिति । प्रतिवस्तूपमालंकारमाह—**प्रतीति** । वाक्ययोर्वाक्यार्थयोः गम्यसाम्ययोः प्रतीयमानोपमानोपमेयभावयोः । तेन 'पद्मं मनोज्ञं रुचिरः शशाङ्कः' इत्यादौ नातिव्याप्तिः । तत्र वाक्यार्थयोरुपमानोपमेयभावप्रत्ययाभावात् । 'प्रकाशते मुखं तस्याश्चन्द्रमा दीप्यते यथा' इत्यादुपमावारणाय गम्येति । न चात्र प्रागुक्तरीत्यैकवाक्यत्वमेवेति वाच्यम् । अत्र गम्य इत्युपादानादेव तत्र तथा कल्पनात् । अन्यथा भिन्नवाक्ये उपमाप्रसक्त्यभावेन प्रतिवस्तूपमैव न स्यात् । दृष्टान्तवारणायाह—**एकोऽपीति** । 'एकरूपः क्वचित्कापि भिन्नः साधारणो गुणः' इत्युक्तदिशा प्राप्तस्य भिन्नसामान्यधर्मस्य व्यवच्छेदः पृथग्भिन्नशब्दाभ्यां तेन दीपकस्य व्यवच्छेदः । **धन्यासीति** । दमयन्तीं प्रति हंसस्योक्तिरियम् । **पौनरुक्त्येति** । कथितपदत्वेनेत्यर्थः । भिन्नवाचकतया विभिन्नवाचकत्वेन । इयं प्रतिवस्तूपमा । **विमल इति** । शिवगिरिः कैलासः शिवस्य हासस्य च सहोदरस्तुल्यः । नन्वत्र प्रतिवाक्यं धर्मभेद

---

1. **प्रतीति** । प्रतिवस्तु प्रत्यर्थमुपमा यस्यामिति ॥

---

१. 'पद्मं' इत्यधिकं क-पुस्तके.

अत्र विमलविशदादेरर्थत एक एव । वैधर्म्येण यथा—

'चकोर्य एव चतुराश्चन्द्रिकाचामकर्मणि ।
विनावन्तीर्न निपुणाः सुदृशो रतनर्मणि ॥'

दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम् ।

सधर्मस्येति प्रतिवस्तूपमाव्यवच्छेदः । अयमपि साधर्म्यवैधर्म्याभ्यां द्विधा । क्रमेणोदाहरणम्—

'अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।
अनधिगतपरिमलापि हि हरति दृशं मालतीमाला ॥'

'त्वयि दृष्टे कुरङ्गाक्ष्याः स्रंसते मदनव्यथा ।
दृष्टानुदयभाजीन्दौ ग्लानिः कुमुदसंहतेः ॥'

'वसन्तलेखैकनिबद्धभावं परासु कान्तासु मनः कुतो नः ।
प्रफुल्लमल्लीमधुलम्पटः किं मधुव्रतः काङ्क्षति वल्लिमन्याम् ॥'

इदं पद्यं मम । अत्र 'मनः कुतो नः' इत्यस्य 'काङ्क्षति वल्लिमन्याम्' इत्यस्य चैकरूपयैव पर्यवसानात्प्रतिवस्तूपमैव । इह तु कर्णे मधुधारावमनस्य नेत्रहरणस्य च साम्यमेव, न त्वैकरूप्यम् । अत्र सामर्थ्यसमर्थकवाक्ययोः सामान्यविशेषभावोऽर्थान्तरन्यासः । प्रतिवस्तूपमादृष्टान्तयोस्तु न तथेति भेदः ।

संभवन्वस्तुसंबन्धोऽसंभवन्वापि कुत्रचित् ॥ ५१ ॥

एवेति कथं प्रतिवस्तूपमेत्यत आह—**अत्रेति** । अर्थतस्तात्पर्यात् । विमलादिपदानां विभिन्नार्थवाचकत्वेऽपि पर्यवसाने तात्पर्यबलाद्वैमल्यरूपैकार्थबोधकत्वमिति भावः । अवन्तीरवन्तिदेशोत्पन्ना नारीः । विनाशब्दोऽत्र भिन्नार्थः । दृष्टान्तालंकारमाह—**दृष्टान्त इति** । सधर्मस्य सदृशस्य वस्तुनः सामान्यधर्मस्य प्रतिबिम्बनं प्रणिधानगम्यसाम्यत्वम् । अत्रापि वाक्ययोरित्यनुवर्तते । तेन 'भल्लापवर्जितैः' इत्यत्र नातिव्याप्तिः । एकवाक्यत्वात् । अयमपि दृष्टान्तोऽपि स्रंसते नश्यति । ग्लानिः संकोचः । मदनव्यथाग्लान्योः संतोषविरोधित्वात्साम्यम् । अनयोः सत्त्वासत्त्वाभ्यां वैधर्म्यम् । **इह त्विति** । प्रीतिजनन एव पर्यवसानादैकरूप्येऽपि प्रीतेर्वैलक्षण्याद्वैलक्षण्यमिति भावः । **अत्रेति** । प्रतिवस्तूपमादृष्टान्तयोरित्यर्थः । न तथा न सामान्यविशेषभावो न वा समर्थ्यसमर्थकभावः । निदर्शनालंकारमाह-**संभवन्निति** । असंभवन्नबाधितः ।

---

1. **दृष्टान्त इति** । तदुक्तम्—'दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम्' इति ॥

---

१. 'पान' घ. २. 'रतकर्मणि' क.

यत्र बिम्बानुबिम्बत्वं बोधयेत्सा निदर्शना[1]।

तत्र संभवद्वस्तुसंबन्धनिदर्शना यथा—

'कोऽत्र भूमिवलये जनान्मुधा तापयन्सुचिरमेति संपदम्।
वेदयन्निति दिनेन भानुमानाससाद चरमाचलं ततः॥'

अत्र रवेरीदृशार्थवेदनक्रियायां वक्तृत्वेनान्वयः संभवत्येव। ईदृशार्थज्ञापनसमर्थचरमाचलप्राप्तिरूपकर्मवत्त्वात्। स च रवेरस्ताचलगमनस्य परितापिनां विपत्प्राप्तेश्च बिम्बप्रतिबिम्बभावं बोधयति। असंभवद्वस्तुनिदर्शना त्वेकवाक्यानेकवाक्यगतत्वेन द्विविधा। तत्रैकवाक्यगा यथा—

'कलयति कुवलयमाललितं कुटिलः कटाक्षविक्षेपः।
अधरः किसलयलीलामाननमस्याः कलानिधिविलासम्॥'

अत्रान्यस्य धर्मं कथमन्यो वहत्विति कटाक्षविक्षेपादीनां कुवलयमालादिगतललितादीनां कलनमसंभवत्ललितादिसदृशं ललितादिकमवगमयत्कटाक्षविक्षेपादेः कुवलयमालादेश्च बिम्बप्रतिबिम्बभावं बोधयति। यथा वा—

'प्रयाणे तव राजेन्द्र मुक्ता वैरिमृगीदृशाम्।
राजहंसगतिः पश्चिमाननेन शशिद्युतिः॥'

अत्र पादाभ्यामसंबन्धराजहंसगतेस्त्यागोऽनुपपन्न इति तयोस्तत्संबन्धः कल्प्यते, स चासंभवन्राजहंसगतिमिव गतिं बोधयति। अनेकवाक्यगा यथा—

'इदं किलाव्याजमनोहरं वपुः तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया समिद्धतां छेत्तुमृषिर्व्यवस्यति॥'

बिम्बानुबिम्बत्वमुपमानोपमेयभावं बोधयेत्। 'व्यञ्जनया' इति शेषः। **कोऽत्रेति**। मुधा निष्प्रयोजनम्। ततो दिनान्तरे। **ईदृशार्थेति**। पूर्वार्धेत्यर्थः। स च वेदनक्रियान्वयः। बिम्बानुबिम्बभावं सादृश्यम्। तच्चादर्शनप्रयोजकत्वेनेति बोध्यम्। **कलयतीति**। अत्र धर्मधर्मिणोरुपमाकल्पनम्। धर्मयोरुपमाकल्पने निदर्शनालंकारमुदाहरति—**यथा वेति**। मुक्ता त्यक्ता। तयोः पदयोस्तत्संबन्धः राजहंसगतिसंबन्धः। **इदमिति**। शकुन्तलामालोक्य दुष्यन्तस्योक्तिरियम्। अव्याजमनोहरं

---

1. **निदर्शनेति**। निश्चित्य दर्शनं सादृश्याविष्करणं निदर्शना। दृशेर्ण्यन्तात्स्त्रियां भावे युच्॥

अत्र यत्तच्छब्दनिर्दिष्टवाक्यार्थयोरभेदेनान्वयोऽनुपपद्यमानस्तादृशवपुषस्तपःक्लमत्वसाधनेच्छा नीलोत्पलपत्रधारया समिल्लताछेदनेच्छेवेति बिम्बप्रतिबिम्बभावे पर्यवस्यति ।

यथा वा—

'जन्मेदं वन्ध्यतां नीतं भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्मया ॥'

अत्र भवभोगलोभेन जन्मनो व्यर्थतानयनं काचमूल्येन चिन्तामणिविक्रय इवेति पर्यवसानम् । एवम्—

'क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥'

अत्र मन्मत्या सूर्यवंशवर्णनमुडुपेन सागरतरणमिवेति पर्यवसानम् । इयं च क्वचिदुपमेयवृत्तस्योपमानेऽसंभवेऽपि भवति । यथा—

'योऽनुभूतः कुरङ्गाक्ष्यास्तस्या मधुरिमाधरे ।
समास्वादि स मृद्वीकारसे रसविशारदैः ॥'

अत्र प्रकृतस्याधरस्य मधुरिमधर्मस्य द्राक्षारसेऽसंभवात्पूर्ववत्साम्ये पर्यवसानम् । मालारूपापि यथा मम—

'क्षिपसि शुकं वृषदंशकवदने मृगमर्पयसि मृगादनरदने ।
वितरसि तुरगं महिषविषाणे निदधच्चेतोभोगविताने ॥'

इह बिम्बप्रतिबिम्बताक्षेपं विना वाक्यार्थापर्यवसानम् । दृष्टान्ते तु पर्यवसितेन वाक्यार्थेन सामर्थ्याद्बिम्बप्रतिबिम्बताप्रत्यायनम् । नापी-

---

स्वभावसुन्दरम् । अर्थादनेन तपःक्लमं साधयितुं य इच्छतीत्यर्थः । ऋषिः कण्वः । व्यवस्यति इच्छति । **जन्मेदमिति** । वीतरागस्योक्तिरियम् । वन्ध्यतां निष्फलताम् । **एवमिति** । उडुपेन क्षुद्रनौकया । उपमेयवृत्तस्य उपमेयधर्मस्य उपमेये बाधादुपमाकल्पनमिति विशेषः । एवं 'मुखं ते चन्द्रमस्पर्धि पङ्कजद्वेषि लोचनम् ।' अत्र स्पर्धाद्वेषयोश्चेतनधर्मत्वान्मुखलोचनयोरसंभवादुपमायां पर्यवसानम् । वृषदंशको मार्जारः । मृगादनस्तरक्षुः । वितरसि क्षिपसि । अत्र वैषयिकसुखानुभवसंताने चेतोनिधानं वृषदंशकवदनादौ शुकाद्यर्पणमिवेत्युपमायां पर्यवसानम् । दृष्टान्तादेर्निदर्शनाभेदमुपपादयति—**इहेति** । निदर्शनायामित्यर्थः । ननु 'कोऽत्र भूमिवलये–' इत्यादौ जनतापकरः सूर्योऽप्यस्तं याति किमुतान्य इति । दण्डापूपन्यायादर्थान्तरप्रीतिरस्तीतीयमर्थापत्तिरित्यत आह—**नापीयमिति** । मुक्तानामिति

यमर्थापत्तिः तत्र 'हारोऽयं हरिणाक्षीणां—' इत्यादौ सादृश्यपर्यवसानाभावात् ।

आधिक्यमुपमेयस्योपमानान्न्यूनताथ वा ॥ ५२ ॥

व्यतिरेकः

सं[1] च

एक उक्तेऽनुक्ते हेतौ पुनस्त्रिधा[2] ।
चतुर्विधोऽपि साम्यस्य बोधनाच्छब्दतोऽर्थतः ॥ ५३ ॥
आक्षेपाच्च द्वादशधा श्लेषेऽपीति त्रिरष्टधा ।
प्रत्येकं स्यान्मिलित्वाष्टचत्वारिंशद्विधः पुनः ॥ ५४ ॥

उपमेयस्योपमानादाधिक्ये हेतुरुपमेयगतमुत्कर्षकारणमुपमानगतं निकर्षकारणं च । तयोर्द्वयोरप्युक्तावेकः प्रत्येकं समुदायेन वानुक्तौ त्रिविध इति चतुर्विधेऽप्यस्मिन्नुपमानोपमेयस्य निवेदनं शब्देनाक्षेपेण चेति द्वादशप्रकारोऽपि श्लेषेऽपिशब्दादश्लेषेऽपीति चतुर्विंशतिप्रकारः । उपमानान्न्यूनतायामप्यनयैव भङ्ग्या चतुर्विंशतिप्रकारतेति मिलित्वाष्टचत्वारिंशत्प्रकारो व्यतिरेकः ।

उदाहरणम्—

'अकलङ्कं मुखं तस्या न कलङ्की विधुर्यथा ।'

अत्रोपमेयगतमकलङ्कत्वमुपमानगतं च कलङ्कित्वं हेतुद्वयमप्युक्तम् । यथाशब्दप्रतिपादनाच्च शाब्दमौपम्यम् । अत्रैव 'न कलङ्कि वि-

---

मौक्तिकानां प्राप्तापवर्गाणां चेत्यर्थः । **सादृश्येति** । तथा सादृश्यपर्यवसानस्थले निदर्शनैव, विशेषत्वादन्यत्र त्वर्थापत्तिरिति भावः । व्यतिरेकालंकारमाह—**आधिक्यमिति** । व्यतिरिच्यते उपमानवैलक्षण्येनोपलभ्यते उपमेयमनेनेति व्यतिरेकपदव्युत्पत्तिरवधेया । आधिक्यपक्षं विकल्पयति—**एक इति** । नोक्त इति हेतावित्यनुषङ्गः । शब्दत इवादिशब्दात् । अर्थतस्तुल्यादिपदार्थानुसंधानात् । आक्षेपाद् व्यञ्जनातः । श्लेषेऽपीत्यादिना श्लेषाभावसमुच्चयः । त्रिरष्टधा चतुर्विंशतिप्रकारा । निकर्षोऽपकर्षः । **प्रत्येकमिति** । उत्कर्षकारणानुक्तावपर इत्यर्थः । **अनयैव भङ्ग्येति** । निरुक्तक्रमेणेत्यर्थः । तथाहि—उपमेयस्योपमानान्न्यूनतायां हेतुरुपमेयगतं निकर्षकारणमुपमानोत्कर्षकारणं च । तयोर्द्वयोरप्युक्तावेकः । प्रत्येकं समुदायेन वा-

---

१. 'स च' इति घ-पुस्तके नास्ति. २. 'स च' घ.

धूपमम्' इति पाठ आर्थम् । 'जयतीन्दुं कलङ्किनम्' इति पाठे त्विवं-वत्तुल्यादिपदविरहादाक्षिप्तम् । अत्रैवाकलङ्कपदत्यागे उपमेयगतोत्कर्ष-कारणानुक्तिः । कलङ्किपदत्यागे चोपमानगतनिकर्षकारणानुक्तिः । द्वयोरनुक्तौ द्वयोरनुक्तिः । श्लेषे यथा—

'अतिगाढगुणायाश्च नाब्जवद्भङ्गुरा गुणाः ।'

अत्रैवार्थे वतिरिति शाब्दमौपम्यम् । उत्कर्षनिकर्षकारणयोर्द्वयो-रप्युक्तिः । गुणशब्दः श्लिष्टः । अन्ये भेदाः पूर्ववदूह्याः । एतानि चोपमेयस्योपमानादाधिक्य उदाहरणानि । न्यूनत्वे दिङ्मात्रं यथा—

'क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते सत्यम् ।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु ॥'

अत्रोपमेयभूतयौवनास्थैर्यस्याधिक्यम् । तेनात्र 'उपमानादुपमेयस्या-धिक्ये विपर्यये वा व्यतिरेकः' इति केषांचिल्लक्षणे[1] 'विपर्ययेवेतिपदमन-र्थकम्' इति यत्केचिदाहुः, तन्न विचारसहम् । तथाहि—अत्राधिक-न्यूनत्वे सत्त्वासत्त्वे एव विवक्षिते । अत्र च चन्द्रापेक्षया यौवनस्या-सत्त्वं स्फुटमेव । अस्तु वात्रोदाहरणे यथाकथंचिद्गतिः ।

नुक्तौ त्रिविध इत्याद्युक्तप्रकारेण चतुर्विंशतिविधत्वं बोध्यम् । **जयतीति** । जयः पराभवः स चापकृष्टत्वेन ज्ञानं तस्य च मुखेऽसंभवात्सादृश्ये पर्यवसानमित्याक्षेप इति भावः । **द्वयोरिति** । अकलङ्किकलङ्किपदयोरित्यर्थः । द्वयोरनुक्तिः उत्कर्षनि-कर्षकारणयोरनुक्तिः । मुखे चन्द्रसादृश्यनिषेधे नैवाधिक्यं प्रतीयते । **अतिगाढेति** । अतिगाढगुणशालित्वमुपमेयगतोत्कर्षकारणं भङ्गुरगुणभागित्वमुपमानाब्जापकर्षकार-णम् । **पूर्ववदिति** । 'तस्या नाब्जवद्भङ्गुरा गुणाः' इति, 'अतिगाढगुणायाश्च नाब्ज-वद्गुणाः' इति, 'तस्या नाब्जवद्गुणाः' इति प्रकारत्रयमूह्यम् । **क्षीणः क्षीण इति** । मानिनीं प्रत्युक्तिरियम् । **विरमेति** । 'मानात्' इति शेषः । यातं यौवनं तु अनि-वर्ति । यौवनं पुनर्न वर्धत इति तात्पर्यार्थः । अत्र पुनर्वर्धनमुपमानचन्द्रोत्कर्षकारणम् । अपुनर्वर्धनमुपमेययौवननिकर्षकारणम् । उपमानन्यूनतायां व्यतिरेकमस्वीकुर्वतां मतं दूषयति—**अत्रोपमेयेति** । चन्द्रास्थैर्यमत्रोपमानं बोध्यम् । तेन 'क्षीणः क्षीणः—' इत्यादावाधिक्यव्यतिरेकेणैव संग्रहसंभवेन विपर्यये वा न्यूनतायां वा तथाहीति सत्त्वासत्त्वे उत्कृष्टत्वापकृष्टत्वे । ननु यौवनास्थैर्यस्याधिक्यस्य निवेदनं प्रकृतस्य मान-भङ्गस्योपकारकमिति तस्यैव वैचित्र्याधायकत्वम्, न तु यौवनासत्त्वस्येत्यत आह—

---

1. **केषांचिदिति** । अलंकारसर्वस्वकाराणाम् ॥

---

१. 'वादि' घ.

'हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूतपथः सितीकृतः ।'

इत्यादिषु का गतिरिति सुष्ठूक्तं 'न्यूनताथवा' इति ।

सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः ।
सा सहोक्तिर्मूलभूतातिशयोक्तिर्यदा भवेत् ॥ ५५ ॥

अतिशयोक्तिरप्यत्राभेदाध्यवसायमूला कार्यकारणपौर्वापर्यविपर्ययरूपा च । अभेदाध्यवसायमूलापि श्लेषभित्तिकान्यथा च । क्रमेणोदाहरणम्—

'सहाधरदलेनास्या यौवने रागभाक्प्रियः ।'

अत्र रागपदे श्लेषः ।

'सह कुमुदकदम्बैः काममुल्लासयन्तः
सह घनतिमिरौघैर्धैर्यमुत्सारयन्तः ।
सह सरसिजषण्डैः स्वान्तमामीलयन्तः
प्रतिदिशममृतांशोरंशवः संचरन्ति ॥'

अस्तु वेति । हनूमदाद्यैरिति । दमयन्तीं प्रति दूतत्वेनेन्द्रादिभिः प्रेषितस्य नलस्य तत्प्रयोजनासिद्धौ विषादोक्तिरियम् । अत्र प्रभुप्रयोजननिष्पादकत्वेन हनूमदादेरुपमानस्योत्कृष्टत्वं तद्व्यतिरेकेणोपमेयस्य नलस्यापकृष्टत्वं च प्रतीयते । अत्र दूतयोरुपमानोपमेयभावविवक्षणेऽपि उपमानस्यैवाधिक्यम्, न तूपमेयस्येति । सहोक्त्यलंकारमाह—**सहार्थस्येति।** सहार्थश्च साकं-सार्धं-समं-सजुः-प्रभृतिः । एकं वस्तुवाचकमन्वयि । अभेदाध्यवसायमूला अभेदाध्यवसायरूपा । श्लेषभित्तिका श्लेषप्रतिपन्नभेदमूला । अन्यथा अश्लेषभित्तिका । संबन्धिभेदादवगतभेदमूलेति यावत् । **सहाधरेति ।** सहशब्दस्य रागभजनमर्थः, तृतीयायाः संबन्धित्वं तस्य च सहार्थेऽन्वयः । सहशब्दस्याव्ययत्वात्तदर्थस्य द्वारीभूतविभक्त्यर्थं विनापि समकालीनत्वसंबन्धेन रागभाक्सहार्थैकदेशे रागभजनेनान्वयः । यौवन इति सति सप्तम्याः समकालीनत्वमर्थः, अस्यापि रागभजनेनान्वयः । अस्या इति तात्पर्यबलादधरदलेन प्रियेण चान्वयः । तथा चास्याः प्रिय इदमधरदलसंबन्धियौवनकालीनरागाश्रय इत्यन्वयबोधः । रागः प्रेम लौहित्यं च, तयोरभेदारोपः । अन्यथा एकत्वाभावादेकस्योभयान्वयासंभवेन लक्षणमसंगतं स्यात् । **सह कुमुदेति ।** कुमुदकदम्बस्योल्लासो विकासः, कामस्योल्लासो वर्धनम्, तयोः सादृश्येनैवाभेदारोपः । तेजःसंसर्गाभावरूपस्य तिमिरस्योत्सारणं तद्देशे संबन्धाभावः, धैर्यस्योत्सारणं विनाशः, तयोः सादृश्येनैवाभेदारोपः । सरसिजषण्डानामामीलनं संकोचः, स्वान्तस्यामीलनं विषमान्तरादाकर्षणम्, तयोरपि सादृश्येनैवाभेदारोपः । एवं चात्रोल्लासादयः सहशब्दानामर्थाः, कर्मत्वं तृतीयानामर्थः, तस्य सहार्थान्वयः । सहार्थस्य च समकालीनत्वसंबन्धेन उ-

इदं मम । अत्रोल्लासादीनां संबन्धिभेदादेव भेदः, न तु श्लिष्टतया ।

'सममेव नराधिपेन सा गुरुसंमोहविलुप्तचेतना ।
अगमत्सह तैलबिन्दुना ननु दीपार्चिरिव क्षितेस्तलम् ॥'

इयं च मालयापि संभवति । यथोदाहृते 'सह कुमुदकदम्बैः—' इत्यादौ ।

'लक्ष्मणेन समं रामः काननं गहनं ययौ ।'
इत्यादौ चातिशयोक्तिमूलाभावान्नायमलंकारः ।

विनोक्तिर्यद्विनान्येन नासाध्वन्यदसाधु वा ।

नासाधु अशोभनं न भवति । एवं च यद्यपि शोभनत्व एव पर्यवसानं तथाप्यशोभनत्वाभावमुखेन शोभनवचनस्यायमभिप्रायो यत्कस्य-

---

ल्लासयन्त इत्यादिपदार्थैकदेशे उल्लासादावन्वयः । तथा कुमुदकदम्बादिकर्मकोल्लासादिसमकालीनोल्लासादिकर्तारश्चन्द्रांशव इत्यन्वयबोधः । अत्राभेदाध्यवसायमूलभूतं भेदमुपपादयति—**अत्रोल्लासादीनामिति** । मदुक्तदिशा संबन्धिभेदाद्भेदो बोध्यः । कार्यकारणपौर्वापर्यरूपातिशयोक्तिमूलां सहोक्तिमुदाहरति—**सममेवेति** । एकदैवेत्यर्थः । नराधिपेन अजेन । सा इन्दुमती । अत्राजस्य पतनमिन्दुमतीपतनजन्यमपि समकालीनत्वेनाध्यवसितम् । इयं च सहोक्तिश्च । मूलभूतेत्यादिविवक्षायाः फलमाह—**लक्ष्मणेनेति** । वस्तुतस्तु यत्र वैचित्र्यमनुभूयते तत्रैवालंकारत्वमङ्गीकरणीयम् । अन्यथा 'सह मणिवलयेर्हिं बाष्पधारा गलन्ति—' इति काव्यप्रकाशकारदत्तोदाहरणमसंगतं स्यात् । अत्र स्वस्थानाच्यवनरूपं गमनमेकमेव । न च गमनयोरेकजातीयत्वेऽपि व्यक्तिभेदाद्भेद इति वाच्यम् । 'लक्ष्मणेन समं रामः काननं गहनं ययौ' इत्यादावपि तथाकल्पनस्य संभवात् । व्यावृत्तभावेन तद्विवक्षणस्याकिंचित्करत्वात् । एवं 'वर्धते सह पान्थानां मूर्छया चूतमञ्जरी' इति दण्डिदत्तोदाहरणे तृतीयार्थो वृत्तित्वम् । मूर्छावृत्तिवृद्धिसमकालीनवृद्ध्याश्रया चूतमञ्जरीत्यन्वयः । विनोक्त्यलंकारमाह—**विनोक्तिरिति** । यत् यदि । एकपदार्थाशोभनत्वाभावादिप्रयोजकापरपदार्थव्यतिरेककथनं विनोक्तिरित्यर्थः । **यद्यपीति** । 'नासाध्वित्यस्य' इति शेषः । पर्यवसानं तात्पर्यम् । तथा च साधुत्वस्य साधुशब्देनैव प्रतिपादनमुचित-

---

1. **विनोक्तिरिति** । इयं च न केवलं विनाशब्दस्य सत्व एव भवति । अपि तु विनाशब्दार्थवाचकमात्रस्य । तेन नञ् निर्-वि-अन्तरेण-ऋते-रहितेत्यादिप्रयोगे विनोक्तिरेव । अलंकारभाष्यकारस्तु 'नित्यसंबन्धानामसंबन्धवचनं विनोक्तिः' इति लक्षणमाह । तत्र 'मृणालमन्दानिलचन्दनानामुशीरशैवालकुशेशयानाम् । वियोगदूरीकृतचेतनाया विनैव शैत्यं भवति प्रतीतिः ॥' इत्युदाहार्यम् । अत्र शैत्यस्याविनाभावेऽपि विनाभावो निबद्धः ॥

---

१. 'तथा' घ.

चिद्वर्णनीयस्याशोभनत्वं तत्परसंनिधेरेव दोषः। तस्य पुनः स्वभावतः शोभनत्वमेवेति।

यथा—

'विना जलदकालेन चन्द्रो निस्तन्द्रतां गतः।
विना ग्रीष्मोष्मणा मञ्जुर्वनराजिरजायत॥'

असाध्वशोभनं यथा—

'अनुयान्त्या जनातीतं कान्तं साधु त्वया कृतम्।
का दिनश्रीर्विनार्केण का निशा शशिना विना॥'

'निरर्थकं जन्म गतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम्।
उत्पत्तिरिन्दोरपि निष्फलैव दृष्टा विनिद्रा नलिनी न येन॥'

अत्र परस्परविनोक्तिभङ्ग्या चमत्कारातिशयः। विनाशब्दप्रयोगाभावेऽपि विनार्थविवक्षायां विनोक्तिरेवेयम्। एवं सहोक्तिरपि सहशब्दप्रयोगाभावेऽपि सहार्थविवक्षाया भवतीति बोध्यम्।

[1]समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः॥ ५६॥
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः।

मिति भावः। अशोभनत्वाभावमुखेन अशोभनत्वाभावप्रतिपादनद्वारा। तस्य परसंनिधिजातदोषस्य वस्तुनः। पुनर्दोषविगमे सति स्वभावत एव, न तु दोषविगमरूपोपाधेः शोभनत्वमित्यन्वयः। दोष[1]विगमेन यत्र शोभनत्वं भवति सामान्यविषय इति भावः। **विनेति**। निस्तन्द्रतां निर्मलत्वम्। [2]अत्र स्वतः सुन्दरयोश्चन्द्रवनराज्योर्मेघग्रीष्मोष्मसंनिधानरूपदोषविगमेन शोभनत्वं प्रतिभातीत्यर्थः। परजनातीतं मृतम्। का कुत्सिता विनिद्रा प्रफुल्ला। परस्परस्य दर्शनं विना परस्परजन्मनिरर्थकत्वमुखेनाशोभनत्वमिति भङ्ग्येत्युक्तम्। **एवं सहोक्तिरिति**। [3]अत एव 'सममेव नराधिपेन सा' इदमित्युदाहरणमुपपन्नम्। समासोक्त्यलंकारमाह—**समासोक्तिरिति**। समैः प्रस्तुताप्रस्तुतसाधारणैः। यत्रेत्यव्ययं य इत्यर्थे। लिङ्गं स्त्रीत्वादि व्यवह्रियते विशेषेण प्रतीयतेनेनेति व्यवहारोऽवस्थाभेदः। इह तु स्वावस्थासमारोपेणेत्यादि वक्ष्यमाणस्वरसाद् अत्र व्यवहारसमारोपे कृतप्रकृतविशेषाधानस्यानुभवसिद्धतया व्यवहारः। अथवा 'तत्त्वमौपम्ये यत्प्रतीयते' इति प्राचीनोक्तानुसारेण च

---

1. **समेति**। समासेन संक्षेपेणोक्तिरर्थद्वयकथनं समासोक्तिः॥

---

१. 'दोष–' इत्यादि '–भावः' इत्यन्तः पाठः पुस्तकान्तरे नास्ति. २. 'अत्र वर्षाकालं विना चन्द्रस्याशोभनत्वं न भवति, शोभनत्वं तु तस्य स्वत एव। वनराजेस्तु ग्रीष्मोष्माणं विना शोभनत्वं भवत्येव' इति पुस्तकान्तरे पाठः. ३. यथा–'सहाधरदलेनास्या यौवने रागवान्प्रियः' इति पुस्तकान्तरे पाठः।

अत्र समेन कार्येण प्रस्तुतेऽप्रस्तुतव्यवहारसमारोपः । यथा—

'व्याधूय यद्वसनमम्बुजलोचनाया
वक्षोजयोः कनककुम्भविलासभाजोः ।
आलिङ्गसि प्रसभमङ्गमशेषमस्या
धन्यस्त्वमेव मलयाचलगन्धवाह ॥'

अत्र गन्धवाहे हठकामुकव्यवहारसमारोपः ।

लिङ्गसाम्येन यथा—

'असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः ।
अनाक्रम्य जगत्कृत्स्नं नो संध्यां भजते रविः ॥'

अत्र पुंस्त्रीलिङ्गमात्रेण रविसंध्ययोर्नायकनायिकाव्यवहारः । विशेषणसाम्यं तु श्लिष्टतया, साधारण्येन, औपम्यगर्भत्वेन च त्रिधा । तत्र श्लिष्टतया यथा मम—

'विकसितमुखीं रागासङ्गाद्गलत्तिमिरावृतिं
दिनकरकरस्पृष्टामैन्द्रीं निरीक्ष्य दिशं पुरः ।

व्यवहारसमानरूपैव समासोक्तिरनेनाङ्गीकृता । ननु 'परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः' इति काव्यप्रकाशलक्षणानुसारेण प्रकृतवाचिना श्लिष्टविशेषणबलादप्रकृतव्यञ्जनरूपद्वितीयार्थस्योपमानत्वानङ्गीकारेणासंगतिप्रसङ्गात् । अन्यस्याप्रस्तुतस्य समासेन सकृदुच्चारणरूपसंक्षेपेणावस्थाद्वयप्रतीतिः समासोक्तिरिति संज्ञाव्युत्पत्तिरवधेया । यद्वा समस्तकार्यादेरासेन उपन्यासेन उक्तिरप्रस्तुतावस्थाव्यञ्जनम् । **व्याधूयेति** । अत्र नायिकायाः स्तनवसनाक्षेपपूर्वकालिङ्गनमेव कार्यं प्रकृतस्य वायोरप्रकृतस्य नायकस्य चेति समानम् । यदि पुनर्नायिकायास्तादृशालिङ्गनमप्राप्नुतः कस्यचिदात्मनोऽधन्यत्वनिवेदनमेतत्स्यात्तदा वायोरप्रकृतत्वान्नेयं समासोक्तिः । किंतु 'धन्याः खलु वने वाताः—' इत्यादिवक्ष्यमाणवद्वैधर्म्येणाप्रस्तुतप्रशंसैव । अहमधन्य इति प्रस्तुतस्य गम्यत्वात् । एवं च 'नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्दशीकरैः' इत्याद्युदाहरणमस्यावगन्तव्यम् । यत्र वायुर्वर्णनीयत्वेन प्रकृतस्तत्र चुम्बनरूपकार्यसाम्येन शृङ्गारित्वरूपनायकावस्थासमारोपश्चारुत्वमावहति । **असमाप्तजिगीषस्येति** । मनस्विनो नीतिवेदिनः । अत्र दृष्टान्तत्वेनाप्रकृतयोरपि रविसंध्ययोः प्रकृताङ्गत्वेनैव प्रकृतत्वमवधेयम् । न चायं समासोक्तिमूलक्रोऽर्थान्तरन्यास इति वाच्यम् । [1]प्रथममप्रकृतार्थप्रतीतेरसंभवात्प्राथमिकप्रतीतिविषयस्यैव समर्थकत्वाङ्गीकारात् । [2]आरोपितस्त्रीपुंसभावयोः स्त्रीपुंसविशेषत्वाभावेन सामान्यसमर्थकत्वायोगाच्च । साधरण्येन वाच्यव्यङ्ग्यगतत्वेन । **विकसितेति** । मुखमेकदेशो वक्त्रं च । रागो

---

१. 'प्रथममप्रकृतार्थसमर्थकत्वं विना प्रकृतत्वग्रहासंभवेन समासोक्तेरनवकाशात्' इति पुस्तकान्तरे.
२. 'आरोपित–'इत्यादिः 'अयोगाच्च' इत्यन्तः पाठः पुस्तकान्तरे नास्ति.

जरठलवलीपाण्डुच्छायो भृशं कलुषान्तरः
श्रयति हरितं हन्त प्राचेतसीं तुहिनद्युतिः ॥'

अत्र मुखरागादिशब्दानां श्लिष्टता। अत्रैव हि 'तिमिरावृतिम्' इत्यत्र 'तिमिरांशुकम्' इति पाठे एकदेशस्य रूपणेऽपि समासोक्तिरेव। नत्वेकदेशविवर्ति रूपकम्। तत्र हि तिमिरांशुकयो रूप्यरूपकभावो द्वयोरावरकत्वेन स्फुटसादृश्यतया परसाचिव्यमनपेक्ष्यापि स्वमात्रविश्रान्त इति न समासोक्तिबुद्धिं व्याहन्तुमीशः। यत्र तु रूप्यरूपकयोः सादृश्यमस्फुटं तत्रैकदेशान्तररूपणं विना[1] तदसंगतं स्यादित्यशाब्दमप्येकदेशान्तररूपणमार्थमपेक्षत एवेति। तत्रैकदेशविवर्तिरूपकमेव। यथा—

'जस्स रणन्तेउरए करे कुणन्तस्स मण्डलग्गलअम्।
रससंमुही वि सहसा परम्मुही होइ रिउसेणा ॥'

अत्र रणान्तःपुरयोः सादृश्यमस्फुटमेव। क्वचिच्च यत्र स्फुटसादृश्यानामपि बहूनां रूपणं शाब्दमेकदेशस्य चार्थं तत्रैकदेशिविवर्ति रूपकमेव। रूपकप्रतीतेर्व्यापितया समासोक्तिप्रतीतितिरोधायकत्वात्। नन्वस्ति रणान्तःपुरयोरपि सुखसंचारतया स्फुटं सादृश्यमिति चेत्, सत्यमुक्तम्। अस्त्येव। किंतु वाक्यार्थपर्यालोचनसापेक्षम्, न खलु निर-

रक्तिमा सुरतेच्छा च। गलन्ती नश्यन्ती तिमिरावृतिर्यस्यास्ताम्, पक्षे—गलन्ती स्खलन्ती तिमिरमेवावृतिर्वसनं यस्यास्ताम्। पक्वलवलीफलस्येव पाण्डुच्छाया कान्तिर्यस्य। कलुषान्तरः कलङ्कमलिनाभ्यन्तरः, पक्षे—ईर्ष्याकषायितचित्तः। अत्र प्राच्यां बन्धकीव्यवहारश्चन्द्रे नायकव्यवहारश्च प्रतीयते। एकदेशविवर्तिरूपकेण सहास्या विषयविभागं करोति—**तत्र हीति**। परस्य नायिकारूपणस्य साचिव्यमानुकूल्यम्। स्वमात्रेण सुखसामर्थ्येनैव विश्रान्तः वैचित्र्यविशेषे कार्ये उपक्षीणः। **जस्स इति**। 'यस्य रणान्तःपुरे करे कुर्वाणस्य मण्डलाग्रलताम्। रससंमुख्यपि सहसा पराङ्मुखी भवति रिपुसेना॥' इति संस्कृतम्। मण्डलाग्रलतां खड्गलताम्। रसेन समरेच्छया, सुरतेच्छया च। संमुखी अभिमुखगामिनी। अत्र यदि लिङ्गसाम्येन मण्डलाग्रलतायां नायिकाव्यवहारः पराङ्मुखत्वरूपकार्यसाम्येनापि रिपुसेनायां प्रतिनायिकाव्यवहारः प्रतीयते, तथापि तदुभयं रणेऽन्तःपुररूपणस्यासंगतिप्रसङ्गसापेक्षमित्येकदेशविवर्तिरूपकमेवेदमिति भावः। **क्वचिच्च यत्रेति**। अत्र साहचर्य-

---

१. 'विना' इत्यादिः '—रूपणं' इत्यन्तः पाठो घ-पुस्तके नास्ति.

पेक्षम् । मुखचन्द्रादेर्मनोहरत्वादिवद्रणान्तःपुरयोः स्वतः सुखसंचारत्वाभावात् । साधारण्येन यथा—

'निसर्गसौरभोद्भ्रान्तभृङ्गसंगीतशालिनी ।
उदिते वासराधीशे स्मेराजनि सरोजिनी ॥'

अत्र निसर्गेत्यादिविशेषणसाम्यात्सरोजिन्या नायिकाव्यवहारप्रतीतौ स्त्रीमात्रगामिनः स्मेरत्वधर्मस्य समारोपः कारणम् । तेन विना विशेषणसाम्यमात्रेण नायिकाव्यवहारप्रतीतेरसंभवात् । औपम्यगर्भत्वं पुनस्त्रिधा संभवति, उपमारूपकसंकरगर्भत्वात् । तत्रोपमागर्भत्वे यथा—

'दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी ।
केशपाशालिवृन्देन सुवेषा हरिणेक्षणा ॥'

अत्र सुवेषत्ववशात्प्रथमं दन्तप्रभाः पुष्पाणीवेत्युपमागर्भत्वेन समासः । अनन्तरं च दन्तप्रभासदृशैः पुष्पैश्चितेत्यादिसमासान्तराश्रयेण समानविशेषणमाहात्म्याद्धरिणेक्षणायां लताव्यवहारप्रतीतिः । रूपकगर्भत्वे यथा—'लावण्यमधुभिः पूर्णा—' इत्यादि । संकरगर्भत्वे यथा—'दन्तप्रभापुष्प—' इत्यादि । 'सुवेषा' इत्यत्र 'परीता' इति पाठे ह्युपमारूपकसाधकाभावात्संकरसमाश्रयणम् । समासान्तरं पूर्ववत् । समासान्तरम-

---

मर्यादया प्रथमत एवात्राप्रस्तुतोपस्थितिरिति भावः । **नायिकाव्यवहारेति** । यस्या मुखे स्वाभाविकं सौरभं तस्या एव व्यवहारसमारोपः । ननु श्लिष्टविशेषणस्य ह्यर्थशब्दप्रयोगसामर्थ्यादेवार्थान्तरप्रतिपादकत्वं साधारणविशेषणस्य तु वाच्यविशेषाधानेनैवोपलक्षणत्वात्कथं तेनार्थान्तरप्रतीतिरित्यत आह—**अत्रेत्यादि** । मात्रपदेन सरोजिन्या व्यवच्छेदः । सरोजिनीविकासे चित्तोल्लासविशेषरूपस्मेरत्वस्य तादात्म्यारोपः । कारणं सहकारि । तेन स्मेरत्वसमारोपेण । **असंभवादिति** । साधारणविशेषणस्य वाच्यविशेषाधानेनैव उपक्षीणतया व्यङ्ग्यबोधे सामर्थ्याभावादिति भावः। एवं च साधारणविशेषणमप्रस्तुतासाधारणधर्मारोपादिसहकृतमेवार्थान्तरप्रतिपादकमिति फलितम् । उपमारूपकयोः संदिग्धत्वे संकरः । **दन्तप्रभेति** । नन्वेतद्रूपकगर्भमेवेत्यत आह—**वेषत्ववशादिति** । सुवेषत्वस्यान्यथानुपपत्तेरित्यर्थः । पुष्पपल्लवाभ्यामपि शरीरशोभाविशेषस्य[1] संभवेऽपि अलिवृन्देन तस्यासंभवात्तत्रैवोपमासमासस्यावश्यकत्वमित्यवगन्तव्यम् । लताप्रतीतौ सुवेषत्वेन शोभात्मारोपो वेदितव्यः । **लावण्येति** । अत्र लावण्यमधुनोराह्लादकत्वे लोचनरोलम्बयोः श्यामत्वादिना स्फुट-

---

१. 'भूषणादिकृत' इत्यधिकं मुद्रितपुस्तके. २. 'सुवेषत्वस्य' इत्यधिकं पुस्तकान्तरे.

हिन्ना लताप्रतीतिः । एषु च येषां मते उपमासंकरयोरेकदेशविवर्तिता नास्ति तन्मते आद्यतृतीययोः समासोक्तिः । द्वितीयस्तु प्रकार एकदेशविवर्तिरूपकविषय एव । पर्यालोचने त्वाद्ये प्रकारे एकदेशविवर्तिन्युपमैवाङ्गीकर्तुमुचिता । अन्यथा—

'ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्दधानार्द्रनखक्षताभम् ।
प्रमोदयन्ती सकलङ्कमिन्दुं तापं रवेरभ्यधिकं चकार ॥'

इत्यत्र कथं शरदि नायिकाव्यवहारप्रतीतिः । नायिकापयोधरेणार्द्रनखक्षताभशक्रचापधारणासंभवात् । ननु 'आर्द्रनखक्षताभम्' इत्यत्र स्थितमप्युपमानत्वं वस्तुपर्यालोचनया ऐन्द्रे धनुषि संचारणीयम् । यथा—'दध्ना जुहोति' इत्यादौ हवनस्यान्यथासिद्धेर्दध्नि संचार्यते विधिः । एवं चेन्द्रचापाभमार्द्रनखक्षतं दधानेति प्रतीतिर्भविष्यतीति चेत्, न । एवंविधानिर्वाहे कष्टसृष्टिकल्पनादेकदेशविवर्त्युपमाङ्गीकारस्यैव ज्यायस्त्वात् । अस्तु वात्र यथाकथंचित्समासोक्तिः । 'नेत्रैरिवोत्पलैः पद्मैः—'

सादृश्यसंभवाद्रूपकाणां बहुत्वाभावाच्च समासोक्तिरेव, नत्वेकदेशविवर्तिरूपकम् । एकदेशविवर्तिरूपकस्य यदेतदुदाहरणं दत्तं तन्मतभेदेनेत्यवगन्तव्यम् । नन्वत्र मध्वादीनां मुखे बाधात्प्राथमिकबोधानुपपत्तिरिति चेत्, न यथा 'मुखचन्द्रं चुम्बति' इत्यादौ चुम्बनस्य चन्द्रे बाधान्मुखे पर्यवसानं तथा मुखसंबन्धस्य मध्वादावसंभवाल्लावण्यादौ पर्यवसानमिति स्वीकारात् । नन्वेवमपि पूर्ववत्समासद्वयाङ्गीकारेणोपमागर्भमेवेदमस्तु किमधिकेन रूपकगर्भत्वकल्पनेन इति चेत्, सत्यम् । गतानुगतिकन्यायेनास्य प्रकारस्य स्वीकाराद् ग्रन्थकृतैव खण्डनीयत्वाच्च । **द्वितीयस्त्विति** । मुखे मध्वाद्यन्वयस्यासंभवात्प्रथमत एव पद्माध्याहारेण प्रतीतिः, कुतो व्यञ्जनामात्रप्राणा समासोक्तिरिति भावः । **वस्तुपर्यालोचनयेति** । अभिप्रेतार्थबोधनानुरोधेन संचारणीयं यावितमण्डलन्यायेनार्पणीयम् । अत्र वैदिकदृष्टान्तमाह—**दध्नेति** । अन्यथासिद्धेः सायंप्रातर्जुहोतीति वचनान्तरप्राप्तेः । दधि दधिपदे संचार्यते उपक्रम्यते । विधिरप्राप्तप्रापकत्वरूपविधिशक्तिः । तदुक्तम्—'सर्वत्राख्यातसंबन्धे श्रूयमाणे पदान्तरे । विधिशक्त्युपसंक्रान्ते स्याद्धातोरनुवादता ॥' इति यथाख्याते स्थिता विधिशक्तिर्धात्वर्थस्यान्यथासिद्धत्वे तत्रानुपयोगिनी अदग्धदहनन्यायेन पदार्थान्तरस्य विधेयतायामुपयोगं लभमाना पदान्तरे संचार्यते तथात्रापीति भावः । **अनिर्वाह इति** । अशक्यनिर्वाहेत्यर्थः । ननु धर्मिकल्पनातो धर्मकल्पना लघीयसीति न्यायेनोपमेयस्योपमानत्वकल्पनमपेक्ष्यैकदेशविवर्त्युपमाकल्पना गुरुरित्यत आह—**अस्त्विति**. **नेत्रैरिवेति** । 'नेत्रैरिवोत्पलैः पद्मैर्मुखैरिव सरः श्रियः । पदे पदे विभान्ति स्म चक्रवाकैः स्तनैरिव ॥' इति प्रागुक्तोदाहरण इत्यर्थः । अन्यगत्यसंभवात्समासोक्तिप्रकारासंभ-

इत्यादौ चान्यगत्यसंभवात् । किं चोपमायां व्यवहारप्रतीतेरभावात्कथं तदुपजीविकायाः समासोक्तेः प्रवेशः । यदाहुः—

'व्यवहारोऽथवा तत्त्वमौपम्ये यत्प्रतीयते ।
तन्नौपम्यं समासोक्तिरेकदेशोपमा स्फुटा ॥'

एवं चोपमारूपकयोरेकदेशविवर्तिताङ्गीकारे तन्मूलसंकरेऽपि समासोक्तेरप्रवेशो न्यायसिद्ध एव, तेनौपम्यगर्भविशेषणोत्थापितत्वं नास्या विषय इति । विशेषणसाम्ये श्लिष्टविशेषणोत्थापिता साधारणविशेषणोत्थापिता चेति द्विधा । कार्यलिङ्गयोस्तुल्यत्वे च द्विविधेति चतुःप्रकारा समासोक्तिः । सर्वत्रैवात्र व्यवहारसमारोपः कारणम् । स च क्वचिल्लौकिके वस्तुनि लौकिकवस्तुव्यवहारसमारोपः । शास्त्रीये वस्तुनि शास्त्रीयवस्तुव्यवहारसमारोपः । लौकिके वा शास्त्रीयवस्तुव्यवहारसमारोपः । शास्त्रीये वा लौकिकवस्तुव्यवहारसमारोप इति चतुर्धा । तत्र लौकिकवस्त्वपि रसादिभेदादनेकविधम् । शास्त्रीयमपि तर्कायुर्वेदज्योतिःशास्त्रप्रसिद्धतयेति बहुप्रकारा समासोक्तिः । दिङ्मात्रं यथा—'व्याधूय यद्वसनं—' इत्यादौ । लौकिके वस्तुनि लौकिकस्य हठकामुकव्यवहारादेः समारोपः ।

'यैरेकरूपमखिलास्वपि वृत्तिषु त्वां
पश्यद्भिरव्ययमसंख्यतया प्रवृत्तम् ।

वात् । 'एकदेशविवर्त्युपमैवाङ्गीकर्तुमुचिता' इति पूर्वेणान्वयः । ननु प्रागुक्तयुक्त्योत्पलादावुपमानत्वं संचारणीयमिति चेत्, न । 'आर्द्रनखक्षतामम्' इत्यत्रार्थ्या उपमाया अर्थवशेनैव कल्पनाया योग्यत्वात् । प्रकृते तु श्रौत्यास्तदसंभवादिति भावः । नन्विवशब्दव्यत्ययेनात्रापि व्यवहारसमारोप इत्यत आह—**किं चेति** । विशेषणानां सादृश्योपलम्भमहिम्ना विशेष्यस्याप्यध्याहारेण प्रथमत एव सादृश्यप्रतीतिरनुभवसिद्धा तयैव श्रोतुराकाङ्क्षाविरहाद् व्यवहारव्यञ्जनं न भवतीति भावः । **व्यवहार इति** । औपम्यगर्भविशेषणसाम्ये सति व्यवहारोऽप्रस्तुतस्य साधर्म्यं तत्त्वं स्वरूपं वा[1] यत्प्रतीयते तदौपम्यं समासोक्तिर्न भवति तत्र हेतुरेकदेशेति । स्फुटा सर्वानुभवसिद्धा । तथा च सादृश्यप्रतीतिरेवानुभवसिद्धा न व्यवहारप्रतीतिरिति । नात्र समासोक्तिप्रसङ्ग इति भावः । तत्त्वप्रतीतौ समासोक्तिमन्ये स्वीकुर्वन्ति तन्मतानुसारेणैवाथवा तत्त्वमित्युक्तम् । व्यवहारादेरित्यादिपदेन स्वरूपस्य ग्रहणम् । **यैरिति** ।

---

१ 'भवति' इति मुद्रितपुस्तके.

लोपः कृतः किल परत्वजुषो विभक्ते-
स्तैर्लक्षणं तव कृतं ध्रुवमेव मन्ये ॥'

अत्रागमशास्त्रप्रसिद्धे वस्तुनि व्याकरणप्रसिद्धवस्तुव्यवहारसमारोपः । एवमन्यत्र । रूपकेऽप्रकृतमात्मस्वरूपसंनिवेशेन प्रकृतस्य रूपमवच्छादयति । इह तु स्वावस्थासमारोपेणावच्छादितस्वरूपमेव तं पूर्वावस्थातो विशेषयति । अत एवात्र व्यवहारसमारोपो न तु स्वरूपसमारोप इत्याहुः । उपमाध्वनौ श्लेषे च विशेष्यस्यापि साम्यम्, इह तु विशेषणमात्रस्य । अप्रस्तुतप्रशंसायां प्रस्तुतस्य गम्यत्वम्, इह त्वप्रस्तुतस्येति भेदः ।

उक्तैर्विशेषणैः साभिप्रायैः परिकरो मतः ॥ ५७ ॥

अत्रेश्वरः संबोध्यः । वृत्तिषु वस्तुषु, पदार्थान्वयेषु च । अव्ययमविनश्वरम्, अव्ययपदवाच्यं च । असंख्यतया अनन्तरूपतया, संख्याविशेषप्रतिपादकतया च । परत्वजुष उत्कर्षभाजस्तव विभक्तेर्भेदग्रहस्य, पक्षे—परवर्तिन्या विभक्तेः स्वादेर्लक्षणं विशिष्टज्ञानं सूत्रं च । आगमशास्त्रप्रसिद्धे वस्तुनीश्वरे व्याकरणशास्त्रप्रसिद्धवस्तुनो निपातस्य व्यवहारसमारोपः । रूपकादस्याः परैरुपपादितं भेदं दर्शयति—**रूपक इति** । अप्रकृतं वस्तु आत्मरूपसंनिवेशेन आत्मस्वरूपारोपणेन रूपं स्वरूपम् । इह तु समासोक्तौ तु । स्वावस्था स्वसाधर्म्यम् । तं प्रकृतपदार्थं पूर्वावस्थातः प्रकृतावस्थामवच्छाद्य विशेषयति उत्कृष्टत्वेन ज्ञापयति । अत्राप्यप्रकृतमिति कर्तृपदमन्वेति । विशेष्यस्यापीत्यादिना विशेषणस्यापि साम्यं प्रतीयत इति शेषः । गम्यत्वं व्यङ्ग्यत्वम् । परिकरालंकारमाह—**उक्तैरिति** । विशेषणस्य प्रकृतोपयोगित्वज्ञापनमित्यर्थः । 'विशेषणैः' इति बहुत्वमत्र विवक्षितं तेनैव वैचित्र्यस्यानुभवसिद्धत्वात् । साभिप्रायैः प्रकृतार्थपरिपोषणाभिप्रायेण प्रयुक्तैः । यद्यप्यपुष्टार्थस्य दोषत्वाभिधानात्तन्निराकरणेन पुष्टार्थस्य स्वीकारः कृतस्तथाप्येकानिष्टत्वेन बहूनां विशेषणानामेवोपन्यासे

---

1. **एवमन्यत्रेति** । 'गण्डान्ते मददन्तिनां प्रहरतः क्ष्मामण्डले वैधृते रक्षामाचरतः सदा विदधतो लाटेषु यात्रोत्सवम् । पूर्वामत्यजतः स्थितिं शुभकरीमासेव्यमानस्य ते वर्धन्ते विजयश्रियः किमिव न श्रेयस्विनां मङ्गलम् ॥' अत्र ज्योतिःशास्त्रप्रसिद्धवस्तुसमारोपः ॥

2. **परिकर इति** । परिकरोति प्रकृतार्थमुपकरोतीति परिकरः साभिप्रायशब्दः सोऽस्मिन्नस्तीति परिकरः । मत्वर्थीयोऽच् । भूषणार्थाभावान्न सुट् । 'साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः । चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः ॥' इति विशेषोऽवधेयः । वृक्षात्तदङ्कुर इवायं परिकरान्नातिरिच्यते । परिकरस्याङ्कुर इति व्युत्पत्तेः ॥

---

१. 'वदन्ति' घ.

यथा—

अङ्गराज सेनापते द्रोणोपहासिन् कर्ण, रक्षैनं भीमाद्दुःशासनम् ।'

शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम् ।

'स्वभावादेकार्थैः' इति शब्दश्लेषाद् व्यवच्छेदः । 'वाचनं' इति च ध्वनेः । उदाहरणम्—

'प्रवर्तयन्क्रियाः साध्वीर्मालिन्यं हरितां हरन् ।
महसा भूयसा दीप्तो विराजति विभाकरः ॥'

अत्र प्रकरणादिनियमाभावाद् द्वावपि राजसूर्यौ वाच्यौ ।

[1]क्वचिद्विशेषः सामान्यात्सामान्यं वा विशेषतः ॥ ५८ ॥

वैचित्र्यमित्यलंकारमध्येऽयं गणित इति काव्यप्रकाशः । **अङ्गराजेति** । भीमेन बाध्यमानं दुःशासनं रक्षितुमशक्नुवन्तं कर्णं प्रत्यश्वत्थाम्नो लज्जाप्रतिपादकं वचनमिदम् । उक्तविशेषणत्रयेण कर्णस्य रक्षणोपयोगित्वं प्रतीयते । तथाविधस्य स्वपक्षरक्षणाक्षमतायां लज्जातिशयः प्रतीयत इति । श्लेषालंकारमाह—**शब्दैरिति** । स्वभावादित्यर्थपदस्याभिधेयमात्रपरत्वरूपतात्पर्यग्राहकत्वम् । अन्यथा एकार्थैरित्ययोग्यं सर्वेषामेव शब्दानां वाच्यलक्ष्यव्यङ्ग्यरूपनानार्थसंभवात् । वाचनमभिधालक्षणाभ्यां प्रतिपादनम् । एकस्मिन्विशेष्येऽभिधया अपरस्मिन्विशेष्ये लक्षणया अर्थद्वयप्रतिपादनेऽर्थश्लेष इति भावः । ध्वनेर्वाचकव्यञ्जनस्य शब्दस्य व्यवच्छेद इति पूर्वेणान्वयः । प्रवर्तयन्निति कर्तरि शक्तम् । सूर्यपक्षे—करस्पर्शेन पावित्र्यजननद्वारा उपयोगिलाक्षणिकम् । तदुक्तं विष्णुपुराणे—'स्पृष्टो यदंशुभिर्लोकः क्रियायोग्योऽभिजायते । पवित्रताकारणाय तस्मै शुद्धात्मने नमः ॥' इति । साध्वीः क्रियाः वेदोदितकर्माणि । हरितां दिग्वृत्तीनां मालिन्यं दैन्यादनौज्स्यम् । पक्षे—दिशां तमःश्यामताम् । महस्तेजस्तच्च 'अधिक्षेपापमानादेः' इति प्रागुक्तं शौर्यं वा तेन दीप्तोऽधृष्यः, पक्षे—ज्योतिषा जाज्वल्यमानः । नन्वत्र प्रकरणाद्राजप्रतीतौ सूर्ये व्यञ्जनैवोपमाध्वनिरेवायमित्यत आह—**प्रकरणादिनियमाभावादिति** । आदिना संयोगादिपरिग्रहः । नन्वेवं शब्दश्लेष एवायं विभाकरपदस्य राजसूर्योभयवाचकत्वादिति चेत्, संकीर्णमेवेदमुदाहरणम् । असंकीर्णोदाहरणं तु 'स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् । अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥' अत्रोन्नत्यधोगतिपदाभ्यामुत्कर्षापकर्षौ लक्ष्यौ । अप्रस्तुतप्रशंसालंकारमाह—**क्वचिदिति** । एतच्च वाक्यप-

---

1. **क्वचिदिति** । क्वचित्सामान्यादप्रस्तुताद्विशेषः प्रस्तुतः, क्वचिद्विशेषादप्रस्तुतात्सामान्यं प्रस्तुतम्, क्वचित्कार्यादप्रस्तुतात्प्रस्तुतं निमित्तम्, क्वचिन्निमित्तादप्रस्तुतात्प्रस्तुतं कार्यम्, क्वचित्समादप्रस्तुतात्समं प्रस्तुतं चेद्गम्यते तदा पञ्चधाऽप्रस्तुतप्रशंसा स्यादिति निर्गलितार्थः ॥

कार्यान्निमित्तं कार्यं च हेतोरथ समात्समम् ।
अप्रस्तुतात्प्रस्तुतं चेद्गम्यते पञ्चधा ततः ॥ ५९ ॥
अप्रस्तुतप्रशंसा स्याद्

क्रमेणोदाहरणम्—

'पादाहतं यदुत्थाय मूर्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥'

अथात्मदपेक्षया रजोऽपि वरमिति विशेषे प्रस्तुते सामान्यमभिहितम् ।

'स्वगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ॥'

अत्रेश्वरेच्छया क्वचिदहितकारिणोऽपि हितकारित्वं हितकारिणोऽप्यहितकारित्वमिति सामान्ये प्रस्तुते विशेषोऽभिहितः । एवं चात्राप्रस्तुतप्रशंसामूलोर्थान्तरन्यासः । दृष्टान्ते प्रख्यातमेव वस्तु प्रतिबिम्बत्वेनोपादीयते । इह तु विषामृतयोरमृतविषीभावस्याप्रसिद्धेर्न तस्य सद्भावः ।

'इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव
म्लानारुणिमेव विद्रुमदलं श्यामेव हेमप्रभा ।
कार्कश्यं कलया च कोकिलवधूकण्ठेष्विवं प्रस्तुतं
सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव ॥'

श्चकेऽन्वेति । अप्रस्तुतादिति सामान्यादित्यादिपञ्चकस्य विशेषणम् । अप्रस्तुतादिति यथायथं लिङ्गविपरिणामाविपरिणामाभ्यां विशेष इत्यादिपञ्चकस्य विशेषणम्, ततस्तदा अप्रस्तुतेन प्रस्तुतस्य प्रशंसाव्यञ्जनम् । यद्वा प्रस्तुतव्यञ्जकमप्रस्तुतकथनमप्रस्तुतप्रशंसा । **पादाहतमिति** । बलदेवस्योक्तिरियम् । सामान्यमभिहितमिति । देहिन इति सामान्यवाचकम् । **स्वगियमिति** । अजविलापोऽयम् । अहितकारिविशेषो विषं हितकारिविशेषोऽमृतम् । नन्वत्र बिम्बप्रतिबिम्बभावसत्त्वात् दृष्टान्त एवायमित्यत आह—**दृष्टान्त इति** । तस्य दृष्टान्तस्य सद्भावः संभवः । अस्याः संकीर्णोदाहरणं तु 'मणिर्लुठति पादेषु काचः शिरसि धार्यते । यथैवास्ति तथैवास्तु काचः काचो मणिर्मणिः ॥' अत्राविवेचकेनोत्कृष्टस्यानादरेऽपि नोत्कर्षापचयः । अनुत्कृष्टस्यादरेऽपि नोत्कर्ष इति प्रस्तुतमप्रस्तुतेन वाक्यार्थेन प्रतीयते । **इन्दुर्लिप्त इति** । जडिता निष्पन्दा । कार्कश्यं माधुर्यविपर्यासः । प्रस्तुतं प्रचुरीभूतम् । **बर्हस्य श्याम-**

अत्र संभाव्यमानेभ्य इन्द्वादिगताञ्जनलिप्तत्वादिभ्यः कार्येभ्यो वदनादिगतसौन्दर्यविशेषरूपं प्रस्तुतं कारणं प्रतीयते ।

'गच्छामीति मयोक्तया मृगदृशा निश्वासमुद्रे किणं
त्यक्त्वा तिर्यगवेक्ष्य बाष्पकलुषेनैकेन मां चक्षुषा ।
अद्य प्रेम मदर्पितं प्रियसखीवृन्दे त्वया बध्यता-
मित्थं स्नेहविवर्धितो मृगशिशुः सोत्प्रासमाभाषितः ॥'

अत्र कस्यचिदगमनरूपे कार्ये कारणमभिहितम् । तुल्ये प्रस्तुते तुल्याभिधाने च द्विधा श्लेषमूला सादृश्यमात्रमूला च । श्लेषमूलापि समासोक्तिवद्विशेष्यमात्रेश्लेष श्लेषवद्विशेष्यस्यापि श्लेषे भवतीति द्विधा । क्रमेण यथा—

'सहकारः सदामोदो वसन्तश्रीसमन्वितः ।
समुज्ज्वलरुचिः श्रीमान्प्रभूतोत्कलिकाकुलः ॥'

अत्र विशेषणमात्रश्लेषवशादप्रस्तुतात्सहकारात्कस्यचित्प्रस्तुतस्य नायकस्य प्रतीतिः ।

'पुंस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि
यायाद्यदि प्रणयने न महानपि स्यात् ।
अभ्युद्धरेत्तदपि विश्वमितीदृशीयं
केनापि दिक्प्रकटिता पुरुषोत्तमेन ॥'

कोमलत्वाभाव एव गर्हा । संभाव्यमानेभ्य उत्प्रेक्षणीयेभ्यः । अनुक्तनिमित्तेयमुत्प्रेक्षा । तन्निष्ठकार्यत्वस्य तद्विषये उपचारादिदमुपपन्नम् । उदाहरणान्तरं तु 'नाघ्रातं न कृतं कर्णे स्त्रीभिर्मधुनि नार्पितम् । लब्धिषां दीर्घिकास्वेव विशीर्णं नीलमुत्पलम् ॥' अत्रोत्पलाघ्राणाद्यभावरूपकार्येभ्यः प्रस्तुतायाः शोच्यावस्थाया हेतोः प्रतीतिः । तत्सत्त्वनियतसत्ताकत्वमेव कार्यत्वमभावानामवगन्तव्यम् । **गच्छामीति** । सखायं प्रति कस्यचिदुक्तिरियम् । सोत्प्रासं सूक्ष्महासयुक्तम् । मृगशिशुं प्रति मरणसूचकं तादृगाभाषणमत्र कारणम् । **विशेषणमात्रश्लेषेति** । मात्रपदेन विशेष्यव्यवच्छेदः । विशेष्यस्यापीत्यपिना विशेषणपरिग्रहः । आमोदः सौरभम्, आनन्दश्च । वसन्तकालोपकरणपल्लवादियुक्तः । सम्यगुज्ज्वला रुचिर्दीप्तिर्यस्य सः, पक्षे सम्यगुज्ज्वले शृङ्गारे रुचिरभिलाषो यस्य सः । श्रीः शोभा, वेषरचना च । प्रभूताभिः प्रचुराभिरुत्कलिकाभिरुद्गतमुकुलैराकुलो व्याप्तः, पक्षे—प्रकर्षेण भूतया उत्कलिकया नायिकोत्कण्ठया आकुलो व्याकुलः । **पुंस्त्वादपीति** । पुरुषभावाद् यदि प्रविचलेत् स्त्री यदि भवेत् । अधः पातालमपि यदि यायात् । प्रणयने याचननिमित्तं यदि महान्न

अत्र पुरुषोत्तमपदेन विशेष्येणापि श्लिष्टेन प्रचुरप्रसिद्ध्या प्रथमं विष्णुरेव बोध्यते । तेन वर्णनीयः कश्चित्पुरुषः प्रतीयते ।

सादृश्यमात्रमूला यथा—

'एकः कपोतपोतः शतशः श्येनाः क्षुधाभिधावन्ति ।
अम्बरमावृतिशून्यं हरहर[1] शरणं विधेः करुणा ॥'

अत्र कपोतादप्रस्तुतात्कश्चित्प्रस्तुतः प्रतीयते । इयं च क्वचिद्वैधर्म्येणापि भवति ।

'धन्याः खलु वने वाताः कह्लारस्पर्शशीतलाः ।
राममिन्दीवरश्यामं ये स्पृशन्त्यनिवारिताः ॥'

अत्र वाता धन्या अहमधन्य इति वैधर्म्येण प्रस्तुतः प्रतीयते । वाच्यस्य संभवासंभवोभयरूपतया त्रिप्रकारेयम् । तत्र संभवे उक्तोदाहरणान्येव ।

असंभवे यथा—

कोकिलोऽहं भवान्काकः समानः कालिमावयोः ।
अन्तरं कथयिष्यन्ति काकलीकोविदाः पुनः ॥'

अत्र काककोकिलयोर्वाक्योर्वाक्यं प्रस्तुताध्यारोपणं विनासंभवि ।

स्यात्, खर्वः स्यात् । तदपि तथापि विश्वमुद्धरेत् । इतीयं दिक् । ईदृशोऽयं प्रकारः केनाप्यनिर्वचनीयेन पुरुषोत्तमेन विष्णुना प्रकटिता दर्शिता । तेन हि दैत्यहृतं राज्यमुद्धर्तुं मोहिनीरूपस्त्रीत्वं प्राप्तम् । जलप्लुतं विश्वमुद्धर्तुं वराहरूपेण पातालं गतम् । बलिदैत्यापहृतं राज्यमुद्धर्तुं पादत्रयभूमियाचननिमित्तं वामनत्वं प्राप्तम् । राजपक्षे—पुंस्त्वात् पौरुषाद् यदि प्रविचलेद् यद्यधो नीचत्वमपि यायाद् याचननिमित्तं यदि महिमशून्यः स्यात् तदपि विश्वं स्वराज्यमुद्धरेदित्ययं प्रकारश्च केनापि पुरुषोत्तमनाम्ना राज्ञा प्रकटितः । विशेष्येणापि विशेष्यवाचकेनापि । प्रचुरप्रसिद्ध्या भूरिप्रयोगेण, अतिप्रसिद्ध्या वा । प्रकृतस्यैवात्र व्यङ्ग्यत्वं न तूपमानस्येति नोपमाध्वनित्वम् । द्वयोरभिधेयत्वाभावान्न श्लेषत्वम् । कश्चित्प्रस्तुत इति । यस्य बहवः शत्रवो गोपनस्थानं नास्ति स इत्यर्थः । इयं च अप्रस्तुतप्रशंसा च । वैधर्म्येणापि विधर्मान्तरव्यञ्जकवैधर्म्यविशिष्टस्य कथनेनापि । एवं च षड्प्रकारा अप्रस्तुतप्रशंसेति फलितम् । **धन्या इति** । दशरथस्योक्तिरियम् । कह्लारस्य कह्लारवतो जलस्य स्पर्शेन शीतलाः । सौगन्ध्यप्रतीतिरत्र लक्षणाप्रयोजनम् । **अत्रेति** । वाता धन्या इति वैधर्म्येण अहमधन्य इति प्रस्तुत इत्यन्वयः । वाच्यस्य वाक्यार्थस्य । कोकिलोऽहमि-

---

१. 'हरिहरि' घ.

उभयरूपत्वे यथा—

'अन्तश्छिद्राणि भूयांसि कण्टका बहवो बहिः ।
कथं कमलनालस्य माभूवन्भङ्गुरा गुणाः ॥'

अत्र प्रस्तुतस्य कस्यचिद्ध्यारोपणं विना कमलनालान्तश्छिद्राणां गुणभङ्गुरीकरणे हेतुत्वमसंभवि । अन्येषां तु संभवीत्युभयरूपत्वम् । अस्याश्च समासोक्तिवद् व्यवहारसमारोपप्राणत्वाच्छब्दशक्तिमूलत्वाद्वस्तुध्वनेर्भेदः । उपमाध्वनावप्रस्तुतस्य व्यङ्ग्यत्वम् । एवं समासोक्तौ श्लेषेऽपि द्वयोरपि वाच्यत्वम् ।

उक्ता व्याजस्तुतिः पुनः ।
निन्दास्तुतिभ्यां वाच्याभ्यां गम्यत्वे स्तुतिनिन्दयोः ६०

निन्दया स्तुतेर्गम्यत्वे व्याजेन स्तुतिरिति व्युत्पत्त्या व्याजस्तुतिः । स्तुत्या निन्दाया गम्यत्वे व्याजरूपा स्तुतिः । क्रमेण यथा—

'स्तनयुगमुक्ताभरणाः कण्टककलिताङ्गयष्टयो देव ।
त्वयि कुपितेऽपि प्रागिव विश्वस्ता [द्विट्ं] स्त्रियो जाताः ॥'

इदं मम ।

त्यन्तरं विशेषं काकलीकोविदाः सूक्ष्ममधुरध्वनिविदः । वाकोवाक्यमुक्तिप्रत्युक्ती तौ प्रस्तुतौ तयोरध्यारोपणं स्वरूपव्यञ्जनम् । छिद्राणि विवराणि, दोषाश्च । कण्टकाः तीक्ष्णाग्रवृक्षावयवाः, क्षुद्रशत्रवश्च । गुणास्तन्तवः, यशांसि च । छिद्राणां विवराणां गुणभङ्गुरीकरणे पद्मनालतन्तुच्छेदने । अन्येषां कण्टकानाम् । तस्याश्च श्लेषमूलतुल्याप्रस्तुतप्रशंसायाश्च । **समासोक्तिवदिति** । समासोक्तौ यथा श्लिष्टशब्दप्रयोगमात्रेण व्यवहारो न प्रतीयते किं तु विशेषणसाम्यानुसंधानेनापि, तथात्रापि विशेषणसाम्यानुसंधानमप्यपेक्षितम्, शब्दशक्तिमूलवस्तुध्वनौ तु तन्नापेक्षितमिति ततोऽस्या भेद इति भावः । द्वयोः प्रस्तुताप्रस्तुतयोर्वाच्यत्वं प्रकरणादिनियमाभावादित्यर्थः । व्याजस्तुत्यलंकारमाह—**उक्तेति** । वाच्याभ्यामापाततः । प्रतीयमानाभ्याम् । ननु निन्दाव्याजेन स्तुतिर्भवत्येव व्याजस्तुतिः स्तुतिव्याजेन निन्दा तु व्याजनिन्दैव भवति कथं व्याजस्तुतिरित्यतः संज्ञया द्विविधं योगार्थमाह—**निन्दयेति । स्तनयुगेति ।** राजानं प्रति कस्यचिदुक्तिरियम् । स्तनयुगे मुक्ताभरणं हारो यासाम्, पक्षे—स्तनयुगान्मुक्ताभरणं यासाम् । कण्टको रोमाञ्चः, तीक्ष्णाग्रवृक्षावयवश्च । प्रागितरकोपात् पूर्वकाल इव । विश्वस्ता अयमस्माकं नापकर्तेति विश्वासाश्रयाः, पक्षे—विधवाः । 'विश्वस्ता विधवा समे' इत्यमरः । अत्र स्त्रीणां पीडाजनकत्वेनापाततो

---

१. 'प्रागिव विश्वस्ता अपि कुपिते त्वयि रिपुस्त्रियः' क; 'रिपुस्त्रिय-' घ.

'व्याजस्तुतिस्तव पयोद मयोदितेयं
सञ्जीवनाय जगतस्तव जीवनानि ।
स्तोत्रं तु ते महदिदं घन धर्मराज-
साहाय्यमर्जयसि यत्पथिकान्निहत्य ॥'

पर्यायोक्तं यदा भङ्ग्या[1] गम्यमेवाभिधीयते ।

उदाहरणम्—

'स्पृष्टास्ता नन्दने शच्याः केशसंभोगलालिताः ।
सावज्ञं पारिजातस्य मञ्जर्यो यस्य सैनिकैः ॥'

अत्र हयग्रीवेण स्वर्गो विजित इति प्रस्तुतमेव गम्यं कारणं वैचित्र्यविशेषप्रतिपत्तये सैन्यस्य पारिजातमञ्जरीसावज्ञस्पर्शनरूपकार्यद्वारेणाभिहितम् । न चेदं कार्यात्कारणप्रतीतिरूपाप्रस्तुतप्रशंसा । तत्र कार्यस्याप्रस्तुतत्वात् । इह तु वर्णनीयस्य प्रभावातिशयबोधकत्वेन कार्यमपि कारणवत्प्रस्तुतम् । एवं च—

'अनेन पर्यासयताश्रुबिन्दून्मुक्ताफलस्थूलतमान्स्तनेषु ।
प्रत्यर्पिताः शत्रुविलासिनीनामाक्षेपसूत्रेण विनैव हाराः ॥'

अत्र वर्णनीयस्य राज्ञो गम्यभूतशत्रुमारणरूपकारणवत्कार्यभूतं तथाविधशत्रुस्त्रीक्रन्दनजलमपि प्रभावातिशयबोधकत्वेन वर्णनार्हमिति पर्यायोक्तमेव ।

निन्दा, पर्यवसाने तु शत्रुनाशकत्वेन स्तुतिः प्रतीयते । **व्याजस्तुतिरिति** । अयमर्थस्तुतिः धर्मराजस्य साहाय्याचरणेन आपाततः स्तुतिः, पर्यवसाने तु पथिकापकारेण निन्दा प्रतीयते । पर्यायोक्त्यलंकारमाह—**पर्यायोक्तमिति** । भङ्ग्या उक्तिवैचित्र्यविशेषेण अभिधीयते अभिधेयवत्स्फुटं प्रतीयते । एवं च पर्यायेण भङ्ग्या व्यङ्ग्यस्य स्फुटप्रतिपादनं पर्यायोक्तम् । **केशेति** । केशानां संभोगाय भूषणाय लालिताः सयत्नं पालिताः । इन्द्रस्यातिपराभवेन भयस्य, हयग्रीवोद्यमे पारिजातमञ्जरीणामनुभूतत्वादादरस्य चाभावश्च सावज्ञमित्यनेन प्रतीयते । इत्थं च हयग्रीवेण स्वर्गः सुतरां जित इति व्यङ्ग्यं सुव्यक्तमेव । वैचित्र्यविशेषस्याप्रस्तुतप्रशंसाजन्यवैचित्र्यादिलक्षणवैचित्र्यस्य प्रतिपत्तये सिद्धये । कार्यद्वारेण कार्याभिधानमुखेन अभिहितं स्फुटं प्रतिपादितम् । **अनेनेति** । पर्यासयता पातयता । आक्षेपसूत्रेण ग्रन्थनगुणेन । वर्णनार्हं वर्णनार्हत्वेन प्रस्तुतम् । पर्यायोक्तमेवेत्येवकारेणाप्रस्तुतप्रशंसाव्यवच्छेदः । काव्यप्रकाशे कार्यात्कारणरूपाप्रस्तुतप्रशंसाया दत्तमुदाहरणं पर्या-

---

1. भङ्ग्येति । येन रूपेण विवक्षितोऽर्थस्तदतिरिक्तः प्रकारो भङ्गी ॥

'राजन्राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुब्जे भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते ।
इत्थं राजशुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरा-
च्चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते ॥'

अत्र प्रस्थानोद्यतं भवन्तं श्रुत्वा सहसैवारयः पलायिता इति कारणं प्रस्तुतम् । 'कार्यमपि वर्णनार्हत्वेन प्रस्तुतम्' इति केचित् ।

अन्ये तु—'राजशुकवृत्तान्तेन कोऽपि प्रस्तुतप्रभावो बोध्यत इत्यप्रस्तुतप्रशंसैव' इत्याहुः ।

[1]सामान्यं वा विशेषेण विशेषस्तेन वा यदि ॥ ६१ ॥
कार्यं च कारणेनेदं कार्येण च समर्थ्यते ।
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः ॥ ६२ ॥

क्रमेणोदाहरणम्—

'बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
संभूयाम्भोधिमभ्येति महानद्या नगापगा ॥'

योक्तविषयत्वेन संभावयति—**राजन्निति** । शत्रुजयोद्यतं राजानं प्रति तच्चरस्योक्तिरियम् । तवारेर्भवने वास्तुनि अध्वगैः पञ्जरान्मुक्तो राजशुकः शून्यवलभौ राजादिहीनगृहे चित्रस्थान् राजादीनवलोक्यैकैकमेवमाभाषते । चित्रस्थांस्तानवलोक्य किमाभाषत इत्यत आह—**राजन्निति** । देव्योऽपि राजपत्न्योऽपि तूष्णीं स्थिता न पाठयन्ति । कुब्जा तद्भोजने नियुक्ता काचित् । कुमारैरेव सचिवैरस्मद्भोजनसहचारैः । अद्यापि इदानीमपि । **कार्यमपीति** । शुकाभाषणरूपं कार्यम् । अर्थान्तरन्यासालंकारमाह—**सामान्यमिति** । व्यापकधर्मावच्छिन्नमित्यर्थः । विशेषेण व्याप्यधर्मावच्छिन्नगोचरेण । साधर्म्येण साधर्म्यप्रकारकज्ञानेन वैधर्म्यज्ञानेन वा यदि समर्थ्यते उत्पाद्यते संशयायोग्यत्वादिरूपानुपपत्तिनिराकरणेन दृढप्रतिपत्तिविषयः क्रियत इति यावत् । तदा अर्थान्तरन्यास इत्यर्थः । एवमग्रेऽपि । तेन सामान्येन सामान्यविशेषयोर्विधीयमानधर्म एव विशेषसामान्ययोः साधर्म्यं तस्य क्वचित्ताद्रूप्येण क्वचिद्व्याप्यधर्मेण क्वचिद्व्यापकधर्मेण ग्रह एव समर्थकः । वैधर्म्यं निरुक्तसाधर्म्यविरुद्धधर्मः । कारणस्य साधर्म्यं प्रकृतकार्यसाधनत्वम् । वैधर्म्यं स्वविरुद्धस्वकार्यविरुद्धसाधनत्वम् । इदं कारणं कार्यस्य साधर्म्यं प्रकृतकारणजन्यत्वम् । वैधर्म्यं स्वविरुद्धस्य स्वकारणविरुद्धजन्यत्वम् । सामान्यविशेषसाधर्म्येण समर्थनमाह—**बृहत्सहाय इति** । कार्यान्तं कार्यातिशयम् । महाकार्यमित्यर्थः । क्षोदीयानपि अतिक्षुद्रोऽपि ।

---

1. **सामान्यमिति** । सामान्यं विशेषस्य विशेषो वा सामान्यस्य समर्थक इति भेदद्वयम् । तथा कार्यं कारणस्य कारणं वा कार्यस्य समर्थकमित्यपि भेदद्वयम् । एवं च भेदचतुष्टये प्रत्येकं साधर्म्यवैधर्म्याभ्यां भेदद्वये भेदाष्टकमुपपद्यते ॥

अत्र द्वितीयार्धगतेन विशेषरूपेणार्थेन प्रथमार्धगतः सामान्योऽर्थः सोपपत्तिकः क्रियते ।

'यावदर्थ्यपदां वाचमेवमादाय माधवः ।
विरराम महीयांसः प्रकृत्या मितभाषिणः ॥'
'पृथ्वि स्थिरा भव भुजङ्गम धारयैनां
त्वं कूर्मराज तदिदं द्वितयं दधीथाः ।
दिक्कुञ्जराः कुरुत तन्त्रितये दिधीर्षां
देवः करोति हरकार्मुकमाततज्यम् ॥'

अत्र कारणभूतं हरकार्मुकाततज्यीकरणं पृथिवीस्थैर्यादेः कार्यस्य समर्थकम् ।

गच्छति प्राप्नोति । साधयतीति यावत् । संभूय मिलित्वा । नगापगा गिरिणदी । नद्या नगसंबन्धदर्शनेन जलबाहुल्याभावः प्रतीयते, तेन चातिक्षुद्रत्वम् । द्वितीयार्धगतेन द्वितीयवाक्यार्थसंगतेन विशेषरूपेण विशेषस्वरूपेण नगापगया अर्थेन महानदीमेलनप्रयुक्तसमुद्रप्राप्तिरूपमहाकार्यसाधनत्वप्रतिपत्तिविषयेण सोपपत्तिको विधीयमानः संशयनिरासेन निश्चयविषयः । एकविशेषस्य यद्दृश्यते बाधकाभावेन तुल्यन्यायतया तत्सधर्माणामन्येषामपि तत्संभवतीति विशेषदर्शिनां सामान्यविधीयमानस्य संशयो निवर्तत इति सुतरां दृढप्रतिपत्तिरिति भावः । अत्र सामान्यसमर्थनमुखेनास्यक्षुद्रतरस्यापि शिशुपालस्य कालयवनादिबृहत्सहायसंपत्त्यास्मत्पराभवरूपबृहत्कार्यसाधनत्वं समर्थितमित्यवधेयम् । विशेषस्य सामान्यसाधर्म्येण समर्थनमाह —**यावदर्थ्यपदामिति** । यावन्त्येवार्थ्यानि प्रकृतोपयुक्तार्थादनपेतानि पदानि यस्यां तां नत्वनुपयुक्तार्थपदैर्बहुलाम् । एतेन वाक्यस्याल्पत्वं सूचितम् । आदाय कथयित्वा । महीयांसो महत्तराः । प्रकृत्या स्वभावेन । मितभाषिणः अल्पवचसः । अत्र व्यञ्जनया विधीयमानमपि माधवस्याल्पभाषणं प्रतिपाद्यबाहुल्ये सत्यनुपपन्नमहत्तरस्य स्वभावत एवाल्पभाषणमिति सामान्यगोचरसाधर्म्यज्ञानेन समर्थ्यते । सामान्यधर्मो विशेषेष्वप्रतिहतप्रसर इति विशेषदर्शनेनानुपपत्तिनिरास इति भावः । कारणसाधर्म्येण कार्यसमर्थनमाह—**पृथ्वीति** । श्रीरामेण हरधनुर्ज्यायोगोद्यमे कृते पृथ्व्यादीनामस्थैर्यादिकं संभावयतो लक्ष्मणस्योक्तिरियम् । भुजङ्गमोऽनन्तः । एनां पृथ्वीम् । द्वितयमनन्तं पृथ्वीं च । तन्त्रितये कूर्मानन्तपृथ्वीषु । दिधीर्षां धारणेच्छाम् । देवः श्रीरामः । आततज्यं आरूढगुणम् । आततज्यीकरणं गुणयोगानुकूलव्यापारः । पृथ्व्यादीनां स्थैर्यादेः सिद्धत्वे तत्तन्नियोगानुपपत्त्या स्थैर्यादिविशेषो लक्षणीयः, तस्य च ज्यायोगसंभावनायामनुष्ठितत्वेन कार्यत्वमक्षतमेव, तच्च ज्यायोगसंभावनायाः कारणत्वग्रहेणैव समर्थ्यते । स्थैर्यादीनां नियुज्यमा-

---

१. 'विशेषेण' घ.

'सहसा विदधीत न क्रियां—' इत्यादौ संपत्करणं कार्यं सहसा विधानाभावस्य विमृश्यकारित्वरूपस्य कारणस्य समर्थकम् । एतानि साधर्म्ये उदाहरणानि । वैधर्म्ये यथा—

'इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम् ।
शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः ॥'

अत्र सामान्यं विशेषस्य समर्थकम् । 'सहसा विदधीत—' इत्यत्र सहसा विधानाभावस्यापत्प्रदत्वं विरुद्धं कार्यं समर्थकम् । एवमन्यत् ।

हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं[1] निगद्यते ।

नत्वेन कार्यत्वं प्रतीयते, तच्च कारणमन्तरेण नोपपद्यते, इत्यनुपपत्तिरत्रावधेया । कार्यसाधर्म्येण कारणसमर्थनमाह—**सहसेति** । अत्र विधीयमानस्य सहसा विधानाभावस्य किंचिदिष्टं प्रति साधनत्वमवगम्यते । तच्च क्वचिदिष्टे साध्यत्वग्रहमन्तरेण नोपपद्यत इति कार्यस्य समर्थकत्वं संपद्वरणं कार्यमिति कार्यं कार्यत्वप्रतीतिविषयः । कार्यत्वप्रतीतिरत्र 'उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः' इतिवत् विमृश्यकारित्व एव सहसाविधानाभावः पर्यवस्यतीति नानयोर्भेदः । विशेषवैधर्म्येण सामान्यसमर्थनं यथा—'गुणानामेव दौरात्म्याद्धुर्यो धुरि नियुज्यते । अलंजातकिणस्कन्धः सुखं स्वपिति गौर्गडिः ॥' दुःखावहकर्मप्रयोजकत्वाद्गुणानां निन्दा । धुर्यो धूर्वहनयोग्यः । किणो वहनचिह्नविशेषः । गडिरलसः । अत्र गुणवन्त एव धुर्या भारवहने नियुज्यन्त इत्यन्ययोगव्यवच्छेदप्रतीतिरन्यत्रायोगग्रहेणैवोपपद्यत इति धूर्वहनयोग्यतया धुर्यविशेषे गडिगवे धूर्वहनायोगरूपवैधर्म्यज्ञानं समर्थकम् । किणहीनस्कन्धत्वेन सुखस्वपनेन च भारवहनायोगः प्रतीयते । सामान्यवैधर्म्येण विशेषसमर्थनमाह—**इत्थमिति** । ब्रह्माणं प्रति बृहस्पतेस्तारकदौरात्म्यनिवेदनमिदम् । क्लिश्नाति विबाधते । शाम्येत् अपकारान्निवर्तेत । **समर्थकमिति** । अनुकूलाचरणेनोपशमाभावोऽयोग्यतयानुपपन्न एव । दुर्जनसामान्यस्वभावेन प्रत्युपकारमात्रोपसाम्यत्वेन वैधर्म्येण समर्थ्यत इति भावः । कारणवैधर्म्येण कार्यसमर्थनं यथा—'बहिरेव चिरादनाश्रये विलसत्येष तुषारदीधितिः । भज संपदमत्र संततं ननु संतापमितः प्रसूयते ॥' चन्द्रस्य संतापजनकत्वानुभवेन संमदजनकत्वे बाधं प्रति संदधतीं विरहिणीं प्रति तत्सख्या उक्तिरियम् । अनाश्रये अवचनस्थे । अत्र सूर्यस्य संतापजनकत्वप्रदर्शनेन तद्विरुद्धस्य चन्द्रस्य संतापविरुद्धसंमदजनकत्वमुपपन्नम् । कार्यवैधर्म्येण कारणसमर्थनमाह—**सहसेति** । विरुद्धं विरुद्धजन्यम् । **समर्थकमिति** । संपद्विरुद्धकार्ये विपदि विवेकविरुद्धविवेकाभावजन्यत्वज्ञानेन संपदि विवेकजन्यत्वं दृढं प्रत्याय्यते । यज्जन्यं यद्विरुद्धं तत्कारणविरुद्धजन्यमेवेति नियमादिति भावः । अत्र घटत्वादौ व्यभिचारवारणाय जन्यमिति । काव्यलिङ्गालंकारमाह—**हेतोरिति** ।

1. **काव्येति** । काव्याभिमतं लिङ्गं काव्यलिङ्गं । तर्कवैलक्षण्यार्थं काव्यग्रहणम् । न ह्यत्र व्याप्तिपक्षधर्मतोपसंहारादयः क्रियन्ते ॥

तत्र वाक्यार्थता—

'यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी ।
येऽपि त्वद्गमनानुसारिगतयस्ते राजहंसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥'

अत्र चतुर्थपादे पादत्रयवाक्यानि हेतवः । पदार्थता यथा मम—

'त्वद्वाजिराजिनिर्धूतधूलीपटलपङ्किलाम् ।
न धत्ते शिरसा गङ्गां भूरिभारभिया हरः ॥'

अत्र द्वितीयार्धे प्रथमार्धमेकपदं हेतुः । अनेकपदं यथा मम—

'पश्यन्त्यसंख्यपथगां त्वद्दानजलवाहिनीम् ।
देव त्रिपथगात्मानं गोपयत्युग्रमूर्धनि ॥'

इह केचिद् वाक्यार्थगतेन काव्यलिङ्गेनैव गतार्थतया कार्यकारणभावेऽर्थान्तरन्यासं नाद्रियन्ते, तदयुक्तम् । तथा ह्यत्र हेतुस्त्रिधा भवति—ज्ञापको निष्पादकः समर्थकश्चेति । तत्र ज्ञापकोऽनुमानस्य विषयः, निष्पादकः काव्यलिङ्गस्य, समर्थकोऽर्थान्तरन्यासस्य, इति

वाक्यपदार्थत्वे वाक्यपदान्यतरप्रतिपाद्ये वाक्यार्थस्य पदार्थस्य वा हेतुत्वे व्यङ्ग्ये इति पर्यवसितोऽर्थः । क्रियान्वयसमाप्तौ वाक्यार्थत्वम् । अन्यथा पदार्थत्वम् । अयमेव हेत्वलंकार उच्यते । **यत्त्वन्नेत्रेति** । वर्षाजनितोत्कण्ठस्य प्रोषितस्योक्तिरियम् । मुखच्छायानुकारी मुखकान्तिसदृशः । गताः । मानसमिति शेषः । सादृश्यविनोदमात्रं सादृश्यमात्रेण विनोदः । मात्रपदेन सङ्गव्यवच्छेदः । दैवेन दुर्दैवेन । चतुर्थपादे चतुर्थपादप्रतिपाद्ये सादृश्यमात्रविनोदाभावे । पादत्रयवाक्यानि पादत्रयरूपवाक्यत्रयार्थाः । **त्वद्वाजीति** । अत्र कविप्रौढोक्तिसिद्धं तादृशं पङ्किलत्वं संभाव्यमानभूरिभारभयकरणहरगङ्गात्यागे हेतुः । वास्तवहेतूदाहरणं तु—'वदनाम्बुरुहालोकनिन्दितेन्दुप्रभाभराम् । त्वामवेक्ष्य मनोजस्य को युवा न वशंवदः ॥' अत्र पूर्वार्धस्यैकपदार्थस्यार्थः परार्धार्थे हेतुः । **पश्यन्त्यसंख्यपथगामिति** । अत्र पूर्वार्ध क्रियान्वयसमाप्तौ वाक्यत्वमनापन्नमनेकपदघटितं तदर्थस्य हेतुता । अत्रापि कविप्रौढोक्तिसिद्धो हेतुः । संभाव्यमानमात्मगोपनं कार्यम् । वास्तवहेतूदाहरणं तु—'अपाङ्गान्तनटन्नेत्रं वीक्ष्यमाणा मनागपि । अनङ्गसचिवाः कान्ता हरन्ति जगतां मनः ॥' कार्यकारणभावेऽर्थान्तरन्यासमनङ्गीकुर्वतः काव्यप्रकाशकारादेर्मतं दूषयति—**इह केचिदिति** । पदार्थगतेन काव्यलिङ्गेनार्थान्तरन्यासासंभवादाह—**वाक्यार्थगतेनेति** । अन्यथा हेत्वनुक्तौ साकाङ्क्षतया कारणजिज्ञासया । असमञ्जसं

पृथगेव कार्यकारणभावेऽर्थान्तरन्यासः काव्यलिङ्गात् । तथाहि—'यत्त्वन्नेत्र—' इत्यादौ चतुर्थपादवाक्यम् । अन्यथा साकाङ्क्षतयासमञ्जसमेव स्यात् इति पादत्रयगतवाक्यं निष्पादकत्वेनापेक्षते । 'सहसा विदधीत—' इत्यादौ तु

'परापकारनिरतैर्दुर्जनैः सह संगतिः ।
वदामि भवतस्तत्त्वं न विधेया कदाचन ॥'

इत्यादिवदुपदेशमात्रेणापि निराकाङ्क्षतया स्वतोऽपि गतार्थं सहसा विधानाभावं संपद्वरणं सोपपत्तिकमेव करोतीति पृथगेव कार्यकारणभावेऽर्थान्तरन्यासः काव्यलिङ्गात् ।

'न धत्ते शिरसा गङ्गां भूरिभारभिया हरः ।
त्वद्वाजिराजिनिर्धूतधूलिभिः पङ्किला हि सा ॥'

इत्यत्र हिशब्दोपादानेन पङ्किलत्वादितिवद्धेतुत्वस्य स्फुटतया नायमलंकारः । वैचित्र्यस्यैवालंकारत्वात् ।

[1]अनुमानं तु विच्छित्त्या ज्ञानं साध्यस्य साधनात् ॥ ६३ ॥

यथा—

'जानीमहेऽस्या हृदि सारसाक्ष्या विराजतेऽन्तः प्रियवक्त्रचन्द्रः ।
उत्कान्तिजालैः प्रसृतैस्तदङ्गेष्वापाण्डुता कुड्मलताक्षिपद्मे ॥'

अत्र रूपकवशाद्विच्छित्तिः ।

सुदृढप्रतिपत्तिजननाक्षमम् । पादत्रयगतवाक्यं पादत्रयस्वरूपवाक्यम् । निष्पादकत्वेन निष्पादकत्वप्रतिपादकत्वेन । स्वतोऽपि हेतूक्तिं विनापि । गतार्थं निःसंशयप्रतिपादितस्वार्थम् । तथा च हेत्वाकाङ्क्षया यद्वाक्यं यद्वाक्यमपेक्षते तदर्थस्य तदर्थो निष्पादकः, स एव काव्यलिङ्गस्य विषयः । यत्र हेतूपदेशादिना हेतुनिरपेक्षं वाक्यं तत्र हेतुवाक्यस्यार्थः समर्थक एव, स चार्थान्तरन्यासस्य विषयः । एवंविधं भेदमनङ्गीकृत्य समर्थकहेतोरपि काव्यलिङ्गविषयत्वस्वीकारेऽर्थान्तरन्यासमात्रोच्छेदप्रसङ्ग इति भावः । अनुमानालंकारमाह—**अनुमानं त्विति** । विच्छित्त्या अलंकारादिकृतवैचित्र्येण । परिपुष्टवैचित्र्यमिति शेषः । साध्यस्य व्यापकस्य । साधनात् साधनगोचरव्याप्यत्वज्ञानात् । अनुमितिं प्रति साधनस्य हेतुत्वाङ्गीकारेऽतीतानागतलिङ्गकानुमितिर्न स्यात् । **जानीमहे इति** । विरहवर्णनमिदम् । जानीमहे अनुमिनुमः ।

---

1. **अनुमानमिति** । तच्चानुमानं स्वार्थपरार्थभेदेन द्वेधा । यत्र मयायमवगतोऽर्थ इति स्वपरामर्शस्य निश्चयः स्यात्तत्स्वार्थम् । यत्र परेणानवगतस्य वस्तुनः प्रतिपादनात्परप्रत्यायकत्वं तत्परार्थम् । द्विविधमप्येकोऽलंकार इति विमर्शिन्यां व्यक्तम् ॥

यथा वा—

'यत्र पतत्यबलानां दृष्टिर्निशिताः पतन्ति तत्र शराः ।
तच्चापरोपितशरो धावत्यासां पुरः स्मरो मन्ये ॥'

अत्र कविप्रौढोक्तिवशाद्विच्छित्तिः । उत्प्रेक्षायामनिश्चिततया प्रतीतिः, इह तु निश्चिततयेत्युभयोर्भेदः ।

अभेदेनाभिधा हेतुर्हेतोर्हेतुमता सह ।

यथा मम—'तारुण्यस्य विलासः—' इत्यत्र वशीकरणहेतुर्नायिका वशीकरणत्वेनोक्ता । विलासहासयोस्त्वध्यवसायमूलोऽयमलंकारः ।

अनुकूलं प्रातिकूल्यमनुकूलानुबन्धि चेत् ॥ ६४ ॥

यथा—

'कुपितासि यदा तन्वि निधाय करजक्षतम् ।
बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा ॥'

अस्य च विच्छित्तिविशेषस्य सर्वालंकारविलक्षणत्वेन स्फुरणात्पृथगलंकारत्वमेव न्याय्यम् ।

विरहजन्यपाण्डुलाक्षिकुड्मलतयोश्च प्रियवक्त्रचन्द्रकिरणजन्यत्वमुत्प्रेक्ष्य हेतुः क्रियते । अत्र रूपकोत्प्रेक्षाभ्यां परिपुष्टवैचित्र्यमनुमानमलंकारः । कविप्रौढोक्तिजन्यविच्छित्तिपरिपुष्टवैचित्र्यमनुमानमुदाहरति—**यथावेति** । तत्तस्मात् । आसामबलानाम् । मन्ये अनुमिनोमि । अत्र 'अबलादृष्टिपातसहचरितशरपातोऽबलापुरोवर्तिचापरोपितशरजन्योऽबलादृष्टिपातसहचरितशरपातत्वात्' इत्यनुमानम् । तत्रेतरस्य बाधात्स्मरस्य सिद्धिः । वस्तुतस्त्वलंकारादिसहकारं विनापि यत्र वैचित्र्यमनुभूयते तत्राप्ययमलंकारः । यथा—'विकसन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः ।' अत्र वर्षाकालानुमानम् । [अभिधा] हेत्वलंकारमाह—**अभेदेनेति** । हेतोर्हेतुमता कार्येण सहाभेदेनाभेदारोपेण अभिधा हेतुरित्यर्थः । **तारुण्यस्येति** । अत्र प्रकरणान्नायिकाया लाभः । हासः प्रकाशः । नन्वत्र लक्षणया वशीकरणकारणप्रतीतिरेव न त्वभेदप्रतीतिरित्यत आह—**विलासहासयोस्त्विति** । अध्यवसाय आहार्यभेदप्रतीतिः । तथा च नायिकाया विलासहासयोः कार्यकारणभावरूपसंबन्धाभावेन कारणलक्षणाया असंभवादाहार्याभेदप्रतीतिरवश्यमङ्गीकरणीया तत्साहचर्यात्प्रकृतेऽप्याहार्यप्रतीतिरेव, न तु लाक्षणिकी प्रतीतिरिति भावः । अनुकूलालंकारमाह—**अनुकूलमिति** । अनुकूलानुबन्धि आनुकूल्यकरम् । **कुपितेति** । नायिकां प्रति सख्या वचनमिदम् । अत्र करजक्षतभुजबन्धयोः प्रातिकूल्यं नायकानुकूल्यपरम् । आक्षे-

---

१. 'करम्' इति पुस्तकान्तरे.

वस्तुनो वक्तुमिष्टस्य विशेषप्रतिपत्तये ।
निषेधाभास आक्षेपो वक्ष्यमाणोक्तगो द्विधा ॥ ६५ ॥

तत्र वक्ष्यमाणविषये क्वचित्सर्वस्यापि सामान्यतः सूचितस्य निषेधः, क्वचिदंशोक्तावंशान्तरे निषेध इति द्वौ भेदौ । उक्तविषये च क्वचिद्वस्तुस्वरूपस्य निषेधः, क्वचिद्वस्तुकथनस्येति द्वौ । इत्याक्षेपस्य चत्वारो भेदाः । क्रमेण यथा—

'स्मरशरशतविधुराया भणामि सख्याः कृते किमपि ।
क्षणमिह विश्रम्य सखे निर्दयहृदयस्य किं वदाम्यथवा ॥'

अत्र सख्या विरहस्य सामान्यतः सूचितस्य वक्ष्यमाणविशेषे निषेधः ।

'तव विरहे हरिणाक्षी निरीक्ष्य नवमालिकां दलिताम् ।
हन्त नितान्तमिदानीमाः किं हतजल्पितैरथवा ॥'

अत्र मरिष्यतीत्यंशो नोक्तः ।

'बालअ णाहं दूती तुअ प्पिओसि त्ति ण मह वावारो ।
सा मरइ तुज्झ अअसो एअं धम्मक्खरं भणिमो ॥'

अत्र दूतीत्वस्य वस्तुनो निषेधः ।

पालंकारमाह—**वस्तुन इति** । विशेषप्रतिपत्तये विवक्षितवस्तुनो वक्तुर्वा वैलक्षण्यसूचनाय । विवक्षितस्य वक्ष्यमाणोक्तरूपद्वैविध्येनाक्षेपस्यापि द्वैविध्यमाह—**वक्ष्यमाणोक्तग इति** । वक्ष्यमाणविषय उक्तविषयश्चेत्यर्थः । सर्वस्यापि समुदितस्यापि । वक्ष्यमाणविषये विवक्षितकथनाभावस्यैव वैचित्र्यव्यञ्जकत्वमिति । तत्र प्रकारान्तरासंभवाद् द्वितीयप्रकारस्यैव वस्तुतत्कथननिषेधत्वेन द्वैविध्यमाह—**उक्तविषये चेति** । **स्मरशरशतेति** । कृते निमित्तम् । विरहस्य कान्तिविच्छेदस्य । सामान्यतो विरहत्वेन सूचितस्य स्मरशरशतेत्यनेन निर्दयहृदयेत्यनेन च व्यञ्जितस्य विषये मरणयोग्यत्वेनातिमहति निषेध इति विवक्षितस्य वचननिषेधेनैव निषेध इति भावः । इदानीं त्वयि गतेऽपि सावश्यं मरिष्यतीति त्वयि तन्निवेदनमनर्थकमिति विवक्षितवस्तुनो विरहस्य मरणाव्यभिचारितरूपवैलक्षण्यं विशेषकथननिषेधेनैव व्यज्यते । विरहविशेषस्य प्रकरणादिना वाच्यवत्स्फुटप्रतीयमानतया तत्कथननिषेधस्याकिंचित्करत्वेनाभासत्वम् । **तवेति** । दलितां विकसिताम् । अत्र जल्पनस्य निन्द्यया सूचितस्य मरिष्यतीत्यंशस्य सुहृदनिष्टत्वेनाशक्य(वाक्य)वक्तव्यत्वं वस्तुवैलक्षण्यं प्रतीयते । **बालअ इति** । 'बालक नाहं दूती तस्याः प्रियोऽसीति न मम व्यापारः । सा म्रियते तवायश एवं धर्माक्षरं भणामः ॥' इति संस्कृतम् । दूतीत्वेन कथितात्मनः सख्या वचनमिदम् । धर्माक्षरं यथार्थवचनम् । अत्र स्वस्मिन् सतोऽपि दूती-

'विरहे तव तन्वङ्गी कथं क्षपयतु क्षपाम्।
दारुणव्यवसायस्य पुरस्ते भणितेन किम् ॥'

अत्र कथनस्योक्तस्यैव निषेधः। प्रथमोदाहरणे सख्या अवश्यंभाविमरणमिति विशेषः प्रतीयते। द्वितीयेऽशक्यवक्तव्यत्वादि। तृतीये दूतीत्वे यथार्थवादित्वम्। चतुर्थे दुःखस्यातिशयः। न चायं विहितनिषेधः। अत्र निषेधस्याभासत्वात्।

अनिष्टस्य तथार्थस्य विध्याभासः परो मतः।

तथेति पूर्ववद्विशेषप्रतिपत्तये। यथा—

'गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥'

अत्रानिष्टत्वाद्गमनस्य विधिः प्रस्खलद्रूपो[1] निषेधे पर्यवस्यति। विशेषश्च गमनस्यात्यन्तपरिहार्यत्वरूपः प्रतीयते।

त्वस्य निषेधेन दूत्यन्तरवन्नाहं मिथ्या वदामीति स्ववैलक्षण्यं व्यज्यते। निषेधस्यारोप्यमाणत्वादाभासत्वम्। **विरह इति**। वर्षारम्भे प्रवसन्तं नायकं प्रति सख्या वचनमिदम्। दारुणव्यवसायस्य दुरुच्छेदतत्समीपप्रापणनिश्चयस्य[2]। अत्र 'पूर्वार्धे तत्समीपं त्वं याहीति वक्तुमिष्टं वस्तु तस्य व्यञ्जकनिषेधेनैवार्थतो निषेधः सिध्यतीति न लक्षणगमनानुपपत्तिरित्यभिप्रायेणाह—**कथनस्योक्तस्यैवेति**। पूर्वार्धस्यैवेत्यर्थः। अवश्यंभाविमरणं मरणाव्यभिचारित्वं विरहविशेषस्य वस्तुनो वैलक्षण्यम्। **अशक्येति**। अवक्तव्यं वचनं यस्य तत्त्वम्। आदिना अतिप्रसिद्धत्वपरिग्रहः। दूतीत्वे यथार्थवादित्वं दूतीत्वे सत्यपि यथार्थवादित्वम्। दुःखस्य[3] दूतीदुःखस्य। न चाक्षेपालंकारघटकनिषेधो वास्तवनिषेध एव, न तु निषेधाभास इति वाच्यम्। आक्षेपालंकारे निषेधाभासस्यैव वैचित्र्याधायकत्वाद् इत्यभिप्रायेणाह—**नचेति**। अयमाक्षेपालंकारघटकनिषेधः। प्रकारान्तरेणाक्षेपालंकारमाह—**अनिष्टस्येति**। परो निरुक्तरूपादन्य आक्षेप इत्यनुषज्यते। प्रस्खलद्रूपोऽत्यन्तमसंभवन्।

---

१. 'प्रस्थानरूपः' क. २. 'दुरन्तचेष्टस्य। वर्षासु प्रियविच्छेदहेतुत्वाद् व्यवसायस्य निन्दा। कथनोक्तस्यैवेति। उक्तस्यैव सखीकान्तविरहकालयापनकारणजिज्ञासारूपवस्तुनः कथनस्य निषेध इत्यर्थः। अत्र तादृशजिज्ञासा मम दुःखातिशयं जनयतीति तन्निवेदनं न कार्यमिति सख्यन्तरापेक्षयास्य वैलक्षण्यं सूचितम्।' इति पुस्तकान्तरे पाठः ३. 'दुःखस्य दूतीदुःखस्य' इति पुस्तकान्तरे नास्ति.

विभावना[1] विना हेतुं कार्योत्पत्तिर्यदुच्यते ॥ ६६ ॥
उक्तानुक्तनिमित्तत्वाद्द्विधा सा परिकीर्तिता ।

विना कारणमुपनिबध्यमानोऽपि कार्योदयः किंचिदन्यत्कारणमपेक्ष्यैव भवितुं युक्तः । तच्च कारणान्तरं क्वचिदुक्तं क्वचिदनुक्तमिति द्विधा । यथा—

'अनायासकृशं मध्यमशङ्कतरले दृशौ ।
अभूषणमनोहारि वपुर्वयसि सुभ्रुवः ॥'

अत्र वयोरूपनिमित्तमुक्तम् । अत्रैव 'वपुर्भाति मृगीदृशः' इति पाठेऽनुक्तम् ।

सति हेतौ फलाभावे[2] विशेषोक्तिस्तथा द्विधा ॥ ६७ ॥

तथेत्युक्तानुक्तनिमित्तत्वात् । तत्रोक्तनिमित्ता यथा—

'धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः ।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः ॥'

अत्र महामहिमशालित्वं निमित्तमुक्तम् । अत्रैव चतुर्थपादे 'कियन्तः सन्ति भूतले' इति पाठे त्वनुक्तम् । अचिन्त्यनिमित्तत्वं चानुक्तनिमित्तस्यैव भेद इति पृथङ् नोक्तम् । यथा—

'स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरतापि तनुं यस्य शंभुना न हृतं बलम् ॥'

अत्र तनुहरणेनापि बलाहरणे निमित्तमचिन्त्यम् । इह च कार्याभावः कार्यविरुद्धसद्भावमुखेनापि निबद्ध्यते । विभावनायामपि कारणाभावः कारणविरुद्धसद्भावमुखेन[2] । एवं च 'यः कौमारहरः—' इत्यादे-

---

विभावनालंकारमाह—**विभावनेति** । हेतुं प्रसिद्धकारणम् । किंचिदप्रसिद्धम् । वयसि यौवने । 'वयः पक्षिणि बाल्यादौ वयो यौवनमात्रके' इति कोषः । विशेषोक्त्यलंकारमाह—**सतीति** । फलाभावे फलाभावकथने सति । अत्र निमित्तं फलाभावप्रयोजकमुत्कण्ठायाः कारणं नायकाद्यभावस्तद्विरुद्धो नायकादिः कार्यमुत्कण्ठाभावः । कार्यकारणविरुद्धसद्भावमुखेन कार्याभावकारणाभावोक्तौ विशेषोक्तिविभावनयोः शुद्धोदाहरणे क्रमेण यथा—'धनिनोऽपि स्थिरस्वान्ता यौवने धर्मत-

---

1. **विभावनेति** । विभाव्यते विचार्यते हेतुरस्यामिति विभावना । बाहुलकादधिकरणे युच् ॥

---

१. 'फलाभावो' क. २. 'अपि' घ.

रुत्कण्ठाकारणविरुद्धस्य निबन्धनाद्विभावना । 'यः कौमार—' इत्यादेः कारणस्य च कार्यविरुद्धाया उत्कण्ठाया निबन्धनाद्विशेषोक्तिः । एवं चात्र विभावनाविशेषोक्त्योः संकरः । शुद्धोदाहरणं तु मृग्यम् ।

जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः ।
क्रिया क्रियाद्रव्याभ्यां यद्द्रव्यं द्रव्येण वा मिथः ॥ ६८ ॥
विरुद्धमेव भासेत विरोधोऽसौ दशाकृतिः ।

क्रमेण यथा—

'तव विरहे मलयमरुद्वानलः शशिरुचोऽपि सोष्माणः ।
हृदयमलिरुतमपि भिन्ते नलिनीदलमपि निदाघरविरस्याः ॥'

'संततमुसलासङ्गाद्बहुतरगृहकर्मघटनया नृपते ।
द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः ॥'

'अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥'

'वल्लभोत्सङ्गसङ्गेन विना हरिणचक्षुषः ।
राकाविभावरीजानिर्विषज्वालाकुलोऽभवत् ॥'

त्पराः । अनात्मश्लाघिनः शूरा भूपाला रघुवंशजाः ॥' अत्र स्थिरस्थान्तत्वमुन्मादविरुद्धं धर्मोपार्जनकारणं वार्धकं तद्विरुद्धं यौवनम् । विरोधालंकारमाह—**जातिरिति** । जात्याद्यैरित्याद्यपदेन गुणक्रियाद्रव्याणां ग्रहणम् । गुणक्रियाद्रव्याणां जात्या सह विरोधस्तु गुणादिभिः सह जातिविरोध एवेति पृथङ् नोक्तः । **विरुद्धमेवेति** । क्वचिदारोपेण क्वचित्कविप्रौढोक्त्या क्वचित्कालभेदेन क्वचिदीश्वरादिमहिमातिशयेन समावेशं लभमानैर्जात्यादिभिः सह जात्यादेर्यदापाततो विरोधभानं स विरोधालंकार इति भावः । चतुर्भिः पादैर्जात्यादीनां चतुर्णां विरोधमाह—**तवेति** । गुणेन सह गुणविरोधमाह—**संततेति** । मुसलं धान्यकण्डनोपकरणम् । भवति त्वयि । भवता द्विजेभ्यस्तथा वित्तानि दत्तानि यथा तेषां दासीभिरेव कर्मकरणात्तत्पत्नीनां कराः सुकुमारा जाता इत्यर्थः । अत्र काठिन्यकोमलत्वयोर्गुणयोरापाततो विरोधभानम् । समाधानं तु कालभेदेन । गुणस्य क्रियया विरोधमाह—**अजस्येति** । स्वप्नस्य सिद्ध्या मनःसंयोगरूपतया गुणत्वम् । गुणस्य द्रव्येण सह विरोधमाह—**वल्लभेति** । राकाविभावरीजानिः पूर्णचन्द्रः । अत्र पूर्णचन्द्रेण द्रव्येण सह दाहजनकत्वस्य गुणस्य तादात्म्येनापाततो विरोधभानम् । विरहहेतुकत्वात्तु समाधा-

1. **विरोध इति** । अयमेव विरोधाभास इत्युच्यते । आ ईषद्भासत इत्याभासः, विरोधश्चासावाभासश्चेति । वस्तुतस्त्वयं जात्यादिभेदानामहृद्यत्वाच्छुद्धत्वश्लेषमूलत्वाभ्यां द्विविध इति सहृदयाः । तत्र श्लेषमूलो यथा विन्ध्याटवीवर्णने—'पुष्पवत्यपि पवित्रा' इति ॥

'नयनयुगासेचनकं मानसवृत्त्यापि दुष्प्रापम् ।
रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे ॥'

'त्वद्वाजि–' इत्यादि, 'वल्लभोत्सङ्ग–' इत्यादिश्लोके चतुर्थपादे 'मध्यंदिनदिनाधिप' पाठे द्रव्ययोर्विरोधः । अत्र 'तव विरह–' इत्यादौ पवनादीनां बहुव्यक्तिवाचकत्वाज्जातिशब्दानां दवानलोष्महृदयभेदन-सूर्यैर्जातिगुणक्रियाद्रव्यरूपैरन्योन्यं विरोधो मुखत आभासते । विरहहेतुकत्वात्समाधानम् । अत्र 'अजस्य–' इत्यादावजत्वादिगुणस्य [1]जन्मग्रहणादिक्रियया विरोधः । भगवतः प्रभावस्यातिशायित्वात्तु समाधानम् । 'त्वद्वाजि–' इत्यादौ 'हरोऽपि शिरसा गङ्गां न धत्ते इति विरोधः । [2]'त्वद्वाजि–' इत्यादिकविप्रौढोक्त्या तु समाधानम् । स्पष्टमन्यत् । विभावनायां कारणाभावेनोपनिबध्यमानत्वात्कार्यमेव बाध्यत्वेन प्रतीयते । विशेषोक्तौ च कार्यभावेन कारणमेव । इह त्वन्योन्यं द्वयोरपि बाध्यत्वमिति भेदः ।

नम् । क्रियायाः क्रियया सह विरोधमाह—**नयनेति** । व्याख्यातमिदं प्राक् । प्रहर्षजननक्रियया सह खेदजननक्रियया आपाततो विरोधभानम् । विरहहेतुकत्वात्तु समाधानम् । क्रियाया द्रव्येण सह विरोधमाह—**त्वद्वाजीति**[3] । अत्र हरेण द्रव्येण सह गङ्गाधारणाभावक्रियायास्तादात्म्येनापाततो विरोधभानम् । द्रव्यस्य द्रव्येण सह विरोधमाह—**वल्लभेति** । अत्र चन्द्रसूर्ययोर्द्रव्ययोस्तादात्म्येन विरोधभानम् । **जातिशब्दानामिति** । प्रतिपाद्यतया जातीनां पवनत्वादीनामिति शेषः । यद्वा पवनादीनामिति धर्मपरो निर्देशः । पवनत्वादीनामिति तदर्थः । [4]जातिः शब्दो येषाम् । **दवानलेति** । दवानलत्वेत्यर्थः । मुखतः प्रथमतः । **विरहहेतुकत्वादिति** । मलयमरुदादेर्विरहिणां संतापजनकत्वेन दावानलत्वाद्यारोपात्समावेश इति भावः । नन्वजत्वं जन्माभाव एव कथमस्य गुणत्वमिति चेत्, जातिक्रियाभिन्नाना विशेषणानामपि गुणत्वस्वीकारात् । **विशेषोक्तौ चेति** । कार्याभावेनोपनिबध्यमानत्वात्कारणमेव बाध्यत्वेन प्रतीयत इत्यन्वयः । **इह त्विति** । विरोधालंकारे त्वित्यर्थः । ननु 'मलयमरुद्दवानल–' इत्यादौ रूपकमेवेति चेत्, न । सहानवस्थाननियमरूपविरोधस्य पुरःस्फूर्तिकतया वैचित्र्याधायकत्वात् । असंगत्यलंकारमाह—

१- 'जन्म' क-पुस्तके नास्ति. २. 'त्वद्वाजि–' इत्यादि क-पुस्तके नास्ति. ३. मुद्रितपुस्तके तु 'त्वद्वाजिराजिनिधूतधूलीपटलपङ्क्तिलाम् । न धत्ते शिरसा गङ्गां भूरिभारभिया हरः ॥' इत्यत्र हरपदेन गङ्गाधरत्वानुपस्थितेरापाततो विरोधो न भासते । अत उत्तरार्धमेव पठनीयम्—'गङ्गां गङ्गाधरो धत्ते नातिभारेण मूर्धनि । एवमग्रे हरोऽपि गङ्गाधरोऽपीत्यर्थः ।' इति पाठः. ४. 'जातिः शब्दो येषाम् इति पुस्तकान्तरे नास्ति.

कार्यकारणयोर्भिन्नदेशतायामसंगतिः ॥ ६९ ॥

यथा—

'सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम् ।
साक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रयैरपटवो जाताः स इत्यद्भुतम् ॥'[1]

अस्याश्चापवादकत्वादेकदेशस्थयोर्विरोधे[2] विरोधालंकारः ।

कार्यकारणयोरिति । भिन्नदेशतायां वैयधिकरण्ये । **सा बालेति** । सखायं प्रति नायिकामप्राप्य दुःखभाज उक्तिरियम् । अप्रगल्भमनसः कार्याकार्यावधारणाक्षमचेतसः । तस्या बालात्वेन मदुपभोगरूपकार्यावधारणाक्षमत्वं युक्तम् । मम तु तत्प्राप्त्युपायरूपकार्यावधारणाक्षमत्वमित्याश्चर्यत्वम् । कातराः सभयचेतसः । स्त्रीणां स्वाभाविकं भयम्, मम तु स्मरभयमिति भावः । स्त्री वयम् । अत्र बालत्वादीनां कारणानां नायिकावृत्तित्वनप्रगल्भमनस्त्वादीनां कार्याणां नायकवृत्तित्वमिति वैयधिकरण्यम् । केचित्तु—'कार्यकारणभावयोर्धर्मयोरत्यन्तं भिन्नदेशतया युगपदुत्पन्नत्वेन ख्यातिरसंगतिः । एकधर्मिण्यवच्छेदकभेदेन भिन्नदेशतावारणायात्यन्तमिति । तेन 'दष्टो भुजङ्गेन पदेऽक्षिघूर्णना—' इत्यत्र नातिव्याप्तिः । दंशनघूर्णनयोरेकस्मिञ्शरीरे संगतिसत्त्वात् । कालभेदेन तदुभयख्यातिवारणाय युगपदिति । तेन 'क्रियाशरीरेऽत्र परत्र भोगः' इत्यत्र नातिव्याप्तिः' इत्याहुः । तन्न । 'दन्तक्षतं कपोले वध्वा वेदना सपत्नीनाम्' इत्यत्र स्त्रीत्वोदाहरणे बोधकाभावेन कार्यकारणयोर्युगपदुत्पन्नत्वख्यातिविरहात् । 'सा स्त्री वयं कातराः' इत्यत्र स्त्रीत्वस्य कारणत्वस्योत्पन्नत्वाभावादेव कार्योत्पत्तियुगपदुत्पन्नत्वख्यातिविरहात् । न च स्त्रीत्वस्योत्पन्नत्वमारोप्यमिति वाच्यम् । तस्य वैचित्र्यानावहत्वेन तदङ्गीकारस्यान्याय्यत्वात् । 'दष्टो भुजंगेन—' इत्यादौ युगपदुत्पन्नत्वख्यातिविरहादेवातिप्रसङ्गभङ्गेन तद्वारणार्थमुपात्तस्यात्यन्तपदस्यानर्थकत्वाच्च । अस्मन्मते तु कार्यकारणयोर्वैयधिकरण्यस्यैव यत्र विच्छित्तिविशेषजनकत्वं तत्रैव तस्यालंकारत्वस्वीकारः । 'दष्टो भुजंगेन—' इत्यादौ कार्यकारणयोरवच्छेदकभेदसत्त्वेऽप्यधिकरणस्यैकत्वेन वैयधिकरण्याभावात् 'क्रिया शरीरे—' इत्यादौ वैयधिकरण्यस्य सत्त्वेऽपि तस्य विच्छित्तिविशेषानाधायकत्वादेव नातिप्रसङ्गः । ननु कार्यकारणयोः सहानवस्थानलक्षणो विरोधोऽत्रास्ति तस्यैवात्रालंकारत्वमास्तां किमधिककल्पनयेत्यत आह—**अस्याश्चेति** । कार्यकारणवैयधिकरण्यरूपाया असंगतेर्विलक्षणवैचित्र्याधायकत्वेन विशेषत्वात् । समानाधिकरणयोर्विरोधे विरोधालंकारस्य विषय इत्यर्थः । विषमालंकारमाह—

---

१. 'जनाश्रितैः' घ. २. 'विरोधे' इति क-पुस्तके नास्ति.

गुणौ क्रिये वा चेत्स्यातां विरुद्धे हेतुकार्ययोः ।
यद्वारब्धस्य वैकल्यमनर्थस्य च संभवः ॥ ७० ॥
विरूपयोः संघटना या च तद्विषमं मतम् ।

क्रमेण यथा—

'सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा ।
तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोकाभरणं प्रसूते ॥'

अत्र कारणरूपासिलतायाः 'कारणगुणा हि कार्यगुणमारभन्ते' इति स्थितेर्विरुद्धा शुक्लयशस उत्पत्तिः ।

'आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम् ।
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥'

अत्रानन्दजनकस्त्रीरूपकारणात्तापजनकविरहोत्पत्तिः ।

'अयं रत्नाकरोऽम्भोधिरित्यसेवि धनाशया ।
धनं दूरेऽस्तु वदनमपूरि क्षारवारिभिः ॥'

अत्र केवलं काङ्क्षितधनलाभो नाभूत्, प्रत्युत क्षारवारिभिर्वदनपूरणम् ।

'क्व वनं तरुवल्कभूषणं नृपलक्ष्मीः क्व महेन्द्रवन्दिता ।
नियतं प्रतिकूलवर्तिनो बत धातुश्चरितं सुदुःसहम् ॥'

अत्र वनराज्यश्रियोर्विरूपयोः संघटना । इदं मम ।

गुणाविति । कार्यकारणयोर्गुणौ विरुद्धौ क्रिये वा विरुद्धे यत्स्यातां तद्विषममित्यत्रेणान्वयः । वैकल्यमभिमतफलानव्याप्तिः । अनर्थस्य अनिष्टफलस्य । विरूपयोरेकत्र वस्तुन्यत्यन्तमसंभवतोः संघटनं मेलनम् । कार्यकारणयोर्गुणविरोधमाह—**सद्य इति । कारणगुणा इति** । यद्यप्यवयविरूपकार्यगुणक्रिययोरेकावयवरूपकारणगुणक्रियाजन्यत्वनियमस्तथापि तत्र तथा दर्शनादन्यत्रापि तथात्वं कविसृष्टौ कल्प्यत इति नानुपपत्तिरिति भावः । कार्यकारणयोः क्रियाविरोधमाह—**आनन्दमिति** । नायिकां प्रति नायकस्योक्तिरियम् । अत्र कारणस्य नायिकायाः क्रिया आनन्ददानं नायिकाकार्यस्य विरहस्य क्रिया शरीरतापनं तद्विरुद्धम् । यद्यप्यानन्दतापौ गुणौ तथाप्यत्र द्वयोर्धात्वर्थघटकत्वेन क्रियात्वेनैव व्यवहारः । तृतीयं प्रकारमाह—**अयमिति** । अत्र समुद्रसेवया धनप्राप्तिरूपफलस्यानवाप्तिः । क्षारवारिभिर्वदनपूरणस्यानिष्टस्य प्राप्तिः । सेव्यस्यानभीष्टसंपादकत्वातिशयं स्वस्य दुरदृष्टातिशयं वा व्यञ्जयति । चतुर्थं प्रकारमाह—**क्व वनमिति** । अत्रैकस्मिन्वस्तुनि

---

१. 'यत्' घ. २. 'वैकल्पं' घ.

यथा वा—

'विपुलेन सागरशयस्य कुक्षिणा
भुवनानि यस्य पपिरे युगक्षये ।
मदविभ्रमासकलया पपे पुनः
स पुरस्त्रियैकतमयैकया दृशा ॥'

समं[1] स्यादानुरूप्येण श्लाघा योग्यस्य वस्तुनः ॥ ७१ ॥

यथा—

'शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा ।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥'

श्रीरामेऽत्यन्तमसंभवतोर्वनवासराजश्रीलाभयोर्मेलनं वस्तुतस्तदानीं श्रीरामस्य राजश्रीलाभ एव नास्तीति न विरुद्धयोः संघटनम्, किंतु दशरथप्रयत्नस्य रामस्य राज्यलाभरूपफलानव्याप्तिः प्रत्युतानिष्टस्य रामवनवासस्य संभव इति तृतीयप्रकार एवेदं पर्यवस्यति । एवं च 'शरीरादपि मृद्वङ्गी केयमायतलोचना । अयं क्व च कुकूलाग्निकर्कशो मदनानलः ॥' इत्युदाहरणमस्य वेदितव्यम् । अत्राङ्गमार्दवमदनानलसहनयोरेकत्र नायिकायां मेलनम् । विपुलेनेत्याद्युक्त्वेत्यादावपि विषमत्वं यथायोगमनुगन्तव्यमिति काव्यप्रकाशोक्तं चतुर्थप्रकार एव संगमयति—**यथा वेति । विपुलेनेति** । सागरशयस्य श्रीकृष्णस्य । मदविभ्रमेण असकलया कटाक्षरूपया पपे पीतः । कटाक्षेण सर्वाङ्गीणं दृष्ट इत्यर्थः । यत्र यदेकदेशेन कुक्षिणा जगत्पीयते स पुनश्चक्षुरेकदेशेन स्त्रिया पीयत इति विरूपयोर्मेलनम् । चतुर्थः प्रकारः क्वद्वयप्रयोग एव संभवतीति वदन्तः केचिदेतदवयव्यवयवयोः कार्यकारणयोः क्रियाविरोधोदाहरणमेतद्वदन्ति । तथाहि—कुक्षिरवयवः कारणं तत्कर्तृका भुवनपानक्रिया कुक्षिकार्यस्यावयविनः सागरशयस्य कर्मतासंबन्धेन पानक्रियया विरुध्यते । भुवनपातृकुक्षिमतः कटाक्षपेयत्वस्य विरुद्धतया भानादिति, तन्न । प्रमाणान्तरवेद्यस्य हेतुहेतुमद्भावस्यात्र बोधाभावेनाप्रत्ययात् । धारणदर्शनरूपयोः पानयोः स्वतो विरोधाभावाद् उपदर्शितविरोधस्य क्रियागतत्वाभावेन प्रकृतानुपयोगित्वाच्च । समालंकारमाह—**समं स्यादिति** । आनुरूप्येण योग्यकर्मणा । श्लाघा प्रशंसा । **शशिनमिति** ।

---

1. **सममिति** । सह तुल्यतया मीयते इति समम् ॥

---

१. 'कृष्णशरीरस्य जन्यत्वाङ्गीकारेऽपि जगत्पातृकुक्षेस्तदजनकत्वात् 'योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम्' इत्युपक्रम्याभिहितेन 'लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः' इत्यनेन जगत्पालनकर्तुरीश्वरदेहस्य नित्यत्वाभिधानात्' इति पुस्तकान्तरे पाठः ।

विचित्रं तद्विरुद्धस्य कृतिरिष्टफलाय चेत् ।

यथा—

'प्रणमत्युन्नतिहेतोर्जीवितहेतोर्विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः को मूढः सेवकादन्यः ॥'

आश्रयाश्रयिणोरेकस्याधिक्येऽधिकमुच्यते ॥ ७२ ॥

आश्रयाधिक्ये यथा—

'किमधिकमस्य ब्रूमो महिमानं वारिधेर्हरिर्यत्र ।
अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि ॥'

आश्रिताधिक्ये यथा—

'युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्यां सविकासमासत ।
तनौ ममुस्तत्र न कैटभद्विष-
स्तपोधनाभ्यागमसंभवा मुदः ॥'

अन्योन्यमुभयोरेकक्रियायाः कारणं मिथः ।

इयमिन्दुमती कौमुदी अनुरूपमजं शशिनमुपगतेत्यर्थः । एवमग्रेऽपि । समगुणयोर्योगेन प्रीतिर्येषां ते तथा । नृपाणामिन्दुमतीलिप्सया समागतानामजेतरराजानाम् । विवव्रुः कथयामासुः । विचित्रालंकारमाह—**विचित्रमिति** । तद्विरुद्धस्य इष्टविरुद्धस्य । प्रणमति अपकृष्टो भवति । उन्नतिरुत्कर्षः । जीवितं प्राणरक्षा । दुःखीयति दुःखमिच्छति । अधिकालंकारमाह—**आश्रयेति** । एकस्याश्रयस्य आश्रयिणो वा आधिक्ये महत्त्वातिशये । प्रतिपाद्ये इति शेषः । **अज्ञात एवेति** । एकदेश एव शयनात्समुद्रस्थैः सर्वैः सत्त्वैर्न ज्ञायत इत्यर्थः । अत्र 'कुक्षौ निक्षिप्य' इत्यनेन हरेर्महत्त्वमवगम्यते, समुद्रैकदेशे तच्छयनेनाश्रयस्य समुद्रस्यातिशयमहत्त्वं व्यज्यते । **युगान्तेति** । नारदागमे श्रीकृष्णस्य हर्षातिशयवर्णनमिदम् । युगान्तकाले प्रलयसमये प्रतिसंहृताः[2] स्वोदरं प्रवेशिता आत्मानः समस्तप्राणिनो येन तस्य कैटभद्विषः श्रीकृष्णस्य यस्यां तनौ जगन्ति सविकासमयत्नेन यथा स्यात्तथा आसत तस्यां तनौ तपोधनस्य नारदस्य अभ्यागमसंभवा मुदो न ममुर्नावकाशं प्राप्ताः । अत्र 'जगन्ति' इत्यादिना श्रीकृष्णतनोराश्रयस्याधिक्यमुक्तम् । तत्रावकाशालाभादाश्रितानां मुदामतिमहत्त्वं व्यज्यते । अन्योन्यालंकारमाह—**अन्योन्यमिति** । अत्र चेदित्यनुषज्यते । उभयोरेकजातीययोः क्रिययोर्मिथः परस्परं

---

१. 'जीवन' क-ख-ग-घ. २. 'संभृताः' घ.

'त्वया सा शोभते तन्वी तया त्वमपि शोभसे ।
रजन्या शोभते चन्द्रश्चन्द्रेणापि निशीथिनी ॥'

[1]**यदाधेयमनाधारमेकं चानेकगोचरम् ॥ ७३ ॥**
किंचित्प्रकुर्वतः कार्यमशक्यस्येतरस्य वा ।
कार्यस्य करणं दैवाद्विशेषस्त्रिविधस्ततः ॥ ७४ ॥

क्रमेण यथा—

'दिवमप्युपयातानामाकल्पमनल्पगुणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिव कवयो न ते वन्द्याः ॥'

'कानने सरिदुद्देशे गिरीणामपि कंदरे ।
पश्यन्त्यन्तकसंकाशं त्वामेकं रिपवः पुरः ॥'

'गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥'

चेत्करणं तदान्योन्यनामालंकारो भवतीत्यर्थः । **त्वया सेति** । अत्र परस्परशोभयोः परस्परकारणम् । क्रियापदं गुणस्याप्युपलक्षणम् । तेन 'निशया रुचिरश्चन्द्रश्चन्द्रेण रुचिरा निशा' इत्यत्राप्ययमलंकारः । 'दुदोह गां स यज्ञाय सस्याय मघवा दिवम्' इत्यादिव्यावृत्तये 'उभयोः' इति । अत्र खं खं दोहनं प्रत्येव खं खं कारणं न तु परस्परस्य दोहनं प्रति परस्परं कारणम् । अत्र कारणयोः क्रिययोश्च शब्दैक्यं वैचित्र्यपरिपोषकमेव, न तु नियामकम् । तेन 'नलेन भायाः शशिना निशेव त्वया सभाया निशया शशीव' इत्यादौ शब्दभेदेऽप्ययमलंकारः । विशेषालंकारमाह—**यदाधेयमिति** । यच्छब्दो यदार्थः । इतरस्य शक्यस्य कार्यस्य अप्रक्रान्तस्य करणमुत्पत्तिर्दैवात्प्रतिसंधानं विना । **दिवमपीति** । अनल्पो गुणानां माधुर्यादीनां गुणो यासां ताः । अत्र निर्मातृत्वेन प्रसिद्धाधारान्कवीन् विनापि काव्यरूपाणां गिरां स्थितिः । **कानन इति** । अत्र भावनातिशयेनैकेनैव स्वभावेन काननादावनेकत्र युष्मत्पदार्थस्य युगपत्स्थितिः । पर्यायालंकारलक्षणे क्रमादित्यस्योपादानादत्र परिशेषाद् युगपदित्यस्य लाभः । **गृहिणीति** । इन्दुमत्या मरणे तत्पत्युरजस्यायं विलापः । गृहिणी हृतेत्यन्वयः । एवमन्यत्रापि । स्वमेव गृहिण्यादि सर्वमिति भावः । इष्टोपदेशकत्वात्सचिवः । मिथो रहसि समीहितसाधकत्वात्सखी । ललिते कला विधौ सुरते । नन्विन्दुमतीहरणमेव सचिवादिहरणं तच्चैकमेव कार्यं कथमत्र

1. **यदिति** । आधारमन्तरेणाधेयं न वर्तत इति स्थितावपि यस्तत्परिहारेणाधेयस्योपनिबन्धः स एको विशेषः । यच्चैकं वस्तु परिमितं युगपदनेकधा वर्तमानं क्रियते स द्वितीयः । यत्किंचिदारभमाणस्यासंभाव्यवस्त्वन्तरकरणं स तृतीय इति ॥

[1]व्याघातः स तु केनापि वस्तु येन यथाकृतम् ।
तेनैव चेदुपायेन कुरुतेऽन्यस्तदन्यथा ॥ ७५ ॥

यथा—'दृशा दग्धं मनसिजं–' इत्यादि ।

सौकर्येण च कार्यस्य विरुद्धं क्रियते यदि ।

व्याघात इत्येव ।

'इहैव त्वं तिष्ठ द्रुतमहमहोभिः कतिपयैः
समागन्ता कान्ते मृदुरसि न चायाससहना ।
मृदुत्वं मे हेतुः सुभग भवता गन्तुमधिकं
न मृद्वी सोढा यद्विरहकृतमायासमसमम् ॥'

अत्र नायकेन नायिकाया मृदुत्वं सहगमनाभावहेतुत्वेनोक्तम् । नायिकया च प्रत्युत सहगमने ततोऽपि सौकर्येण हेतुतयोपन्यस्तम् ।

परं परं प्रति यदा पूर्वपूर्वस्य हेतुता ॥ ७६ ॥
तदा [2]कारणमाला स्यात्

यथा—

'श्रुतं कृतधियां सङ्गाज्जायते विनयः श्रुतात् ।
लोकानुरागो विनयान्न किं लोकानुरागतः ॥'

कार्यान्तरोत्पत्तिरिति चेत्, सचिवादिहरणे तात्पर्यात् । व्याघातालंकारमाह—**व्याघात इति** । येनोपायेन यथा यत्प्रकारं कृतं तदन्यथा तद्विरुद्धप्रकारमित्यर्थः । **दृशा दग्धमिति** । हरस्य दृशेत्यर्थः । **दृशैवेति** । कटाक्षरूपया दृशेत्यर्थः । इत्थं क्रियया जयमुक्त्वा रूपेणापि जयमाह—**विरूपाक्षस्येति** । विरूपमसुन्दरं त्रिस्त्राल्लोचनानां वामं सुन्दरमतो जय इत्यर्थः । अत्र दृगुपायेन हरेण साधितस्य दाहस्य दृगुपायेनैव वामलोचनादिभिरन्यथाकरणम् । प्रकारान्तरेणापि व्याघातमाह—**सौकर्येणेति** । क्रियते कथ्यते । केनापि येनोपायेन तत्कार्यमुच्यते, तदन्येन तेनैवोपायेन सौकर्येण तद्विरुद्धं कार्यं यद्युच्यते तदा व्याघात इति तात्पर्यार्थः । **इहैवेति** । त्वमिहैव तिष्ठ, न तु मया सह गच्छ, अधिकं मृदुत्वमित्यन्वयः । असममतुलम् । कारणमालालंकारमाह—**परं परमिति** । पूर्वपूर्वस्य कार्यस्य । **श्रुतमिति** । अध्य-

---

1. **व्याघात इति** । यं कंचिदुपायविशेषमवलम्ब्य केनचिद्यन्निष्पादितं तत्ततोऽन्येन केनचित्तत्प्रतिद्वन्द्विना तेनैवोपायविशेषेण यदन्यथा क्रियते स निष्पादितवस्तुव्याहतिहेतुत्वाद् व्याघातः ॥

2. **कारणेति** । अत्र यद्यपि कार्याणामपि माला विद्यते तथापि कारणगुणवर्णनमेव कविसंरम्भ इति 'विवक्षापूर्विका हि शब्दार्थप्रतिपत्तिः' इति न्यायेन कारणमालेत्यभिधानम् ॥

[1]तन्मालादीपकं पुनः ।
धर्मिणामेकधर्मेण संबन्धो यद्यथोत्तरम् ॥ ७७ ॥

यथा—

'[2]त्वयि संगरसंप्राप्ते धनुषासादिताः शराः ।
शरैररिशिरस्तेन भूस्तया त्वं त्वया यशः ॥'

अत्रासादनक्रिया धर्मः ।

पूर्वं पूर्वं प्रति विशेषणत्वेन परं परम् ।
स्याप्यतेऽपोह्यते वा चेत्स्यात्तदै[3]कावली द्विधा ॥ ७८ ॥

क्रमेणोदाहरणम्—

'सरो विकसिताम्भोजमम्भोजं भृङ्गसंगतम् ।
भृङ्गा यत्र ससंगीताः संगीतं सस्मरोदयम् ॥'

'न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः ॥'

यनमित्यर्थः । कृतधियां पण्डितानाम् । मालादीपकालंकारमाह—**तन्मालादीपकमिति** । **त्वयीति** । तेन अरिशिरसा । तया भुवा । एकावल्यलंकारमाह—**परं परमिति** । यद्विशेष्यं अपोह्यते निषिध्यते । अत्र शरादि । अत्राम्भोजभृङ्गसङ्गीतानि उत्तरोत्तरत्र विशेष्याणि पूर्वपूर्वेषु सरोऽम्भोजभृङ्गेषु विशेषणत्वेनोपन्यस्तानि । अपोहने लाह—**न तज्जलमिति** । अत्र पङ्कजषट्पदगुञ्जितान्युत्तरोत्तरविशेष्याणि पूर्वपूर्वेषु जलपङ्कजषट्पदेषु विशेषणत्वेनापोहितानि । प्रकारान्तरेणाप्येकावल्यलंकार-

1. **मालेति** । यथा मालायां पूर्वपूर्वग्रथितपुष्पाणामुत्तरोत्तरधारणादुपकारकत्वं तद्वदत्रापि मालारूपतेति तत्त्वम् । अप्पयदीक्षितैः पुनरेवमवादि—'वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः । मदेन भाति कलभः प्रतापेन महीपतिः ॥ त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम् । वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी ॥ उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः । माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखावलाः ॥' इति । इह देहलीदीपन्यायेनानेकोपकारस्य पदस्यार्थस्योभयोर्वावृत्तौ क्रमेणोदाहरणानि ॥

2. **त्वयीति** । 'संग्रामाङ्गणमागतेन भवता चापे समारोपिते देवाकर्णय येन येन सहसा यद्यत्समासादितम् । कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ॥' इति प्रकाश उदाहृतश्च श्लोको वासवदत्तागद्यानुरूपः ॥

3. **एकावलीति** । एकावली हारविशेषस्तत्सदृशत्वादित्याशाधरः ॥

क्वचिद्विशेष्यमपि यथोत्तरं विशेषणतया स्थापितमपोहितं च दृश्यते । यथा—

'वाप्यो भवन्ति विमलाः स्फुटन्ति कमलानि वापीषु ।
कमलेषु पतन्त्यलयः करोति संगीतमलिषु पदम् ॥'

एवमपोहनेऽपि ।

उत्तरोत्तरमुत्कर्षो वस्तुनः सार[1] उच्यते ।

यथा—

'राज्ये सारं वसुधा वसुधायामपि पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गनानङ्गसर्वस्वम् ॥'

माह—**क्वचिदिति । एवमपोहनेऽपीति** । 'पुण्यक्षेत्रं न सर्वत्र पुण्यक्षेत्रे न नास्तिकाः । नास्तिकेषु न धर्मोऽस्ति न धर्मे दुःखहेतुता ॥' अत्र पूर्वपूर्वेषु विशेष्याः पुण्यक्षेत्रनास्तिकधर्माः । परपरेषु नास्तिकधर्मदुःखहेतुतासु विशेषणत्वेनापोहिताः । सारालंकारमाह—**उत्तरोत्तरमिति** । वस्तुनो विशेषस्य उत्तरोत्तरमुत्कर्षः सार उच्यत इत्यर्थः । केचित्तु 'आश्लोकसमापनमुत्तरोत्तरोत्कर्षेणायमलंकारो भवति, तथात्व एव वैचित्र्यविशेषप्रतीतेः' इत्याहुः, तन्न । 'लोकस्त्रजि द्यौर्दिवि चादितेया अप्यादितेयेषु महान्महेन्द्रः । किं कर्तुमर्थीयति सोऽपि रागाज्जागर्ति कक्षा किमतः परा ते ॥' इत्यादौ श्लोकार्धसमाप्तिपर्यन्तमुत्कर्षसत्त्वेनाप्यस्यालंकारस्य संभवात् । राज्यं राज्याङ्गं तत्र वसुधा सारं तत्र सौधमट्टालिकागृहं सारं सौधवर्तिनि तल्पं सारं शय्यावर्तिनि अनङ्गसर्वस्वं वराङ्गना सारेत्यर्थः । सर्वत्र निर्धारणे सप्तमी । एतदनुरोधेनैव राज्यादिपदानां मुख्यार्थपरित्यागः । तदुपादाने तु सामान्यविशेषभावाभावान्निर्धारणे सप्तमी न स्यात् । नहि भवति घटेषु पटः सुन्दर इति । अत्र क्लीबाक्लीबयोः क्लीबः स चैकवद्वेति एकशेषेण क्लीबत्वमुपपन्नम् । यद्वा राज्ये वसुधा सारं वस्त्वित्यर्थः । अथवा राज्ये वसुधासारं धनं तद्वदुपादेयमित्यर्थः । तथा च मेदिनी—'सारो बले स्थिरांशे च यज्ञे पुंसि धने जले । न्याय्ये क्लीबं त्रिषु वरे' इति । केचित्तु 'राज्ये राजत्वविषये यानि वस्तूनि तेषु वसुधा सारम् । वसुधायामित्यादावधिकरणे सप्तमी । वसुधायां यानि वस्तूनि सन्ति तेषु पुरं सारम् । एवमग्रेऽपि । सर्वत्र तेष्विति निर्धारणे सप्तमी । राजत्वस्याधिकरणत्वासंभवाद्विषयत्वविवक्षा । राज्यवसुधादीनां सामान्यविशेषभावाभावेन निर्धारणासंभवात् यानीत्यादेरध्याहारः । सारस्य रूपस्य विशेषणत्वाभावान्न स्त्रीत्वादि' इत्याहुः, तन्न । धर्मे वेदा इतिवद् राज्ये वसुधेत्यत्र वसुधायाः प्रतिपादकत्वाभावेन राज्यत्वस्य प्रतिपाद्यत्वरूपविषयत्वासंभवात् यानीत्यध्याहारेण न्यूनपदत्वदोषप्रसङ्गात् सारस्य विशेषणत्वं विनोत्कर्षप्रतीतेः सामानाधिकरण्येन विशेषणविशेष्ययो रूप्यरूपकभावसंभवाच्च । नहि भवति चन्द्रः सुन्दरमिति ।

---

1. **सार इति** । अयमलंकारसर्वस्वकृतोदारनाम्ना व्यवहृतः ॥

[1]**यथासंख्यमनूद्देश उद्दिष्टानां क्रमेण यत् ॥ ७९ ॥**

यथा—

'उन्मीलन्ति नखैर्लुनीहि वहति क्षौमाञ्चलेनावृणु
क्रीडाकाननमाविशन्ति वलयक्काणैः समुत्रासय ।
इत्थं वञ्जुलदक्षिणानिलकुहूकण्ठेषु सांकेतिक-
व्याहाराः सुभग त्वदीयविरहे तस्याः सखीनां मिथः ॥'

क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात् ।
भवति क्रियते वा चेत्तदा पर्याय इष्यते ॥ ८० ॥

क्रमेण यथा—

'स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
क्रमेण नाभिं प्रथमोदबिन्दवः ॥'

'विचरन्ति विलासिन्यो यत्र श्रोणिभरालसाः ।
वृकृकालशिवास्तत्र धावन्त्यरिपुरे तव ॥'

यदि सारपदस्य धनपरत्वं विवक्ष्यते तदा रूप्यरूपकभावः संभवति । उत्कर्षप्रतीतिस्तु व्यञ्जनयैवेति ध्येयम् । यथासंख्यालंकारमाह—**उद्दिष्टानामिति** । अनुद्देशः पश्चादुद्देशः । बहुत्वमत्राविवक्षितम् । तेन 'ददर्श कृष्णं रामं च व्रजे गोदोहनं गतौ । पीतनीलाम्बरधरौ शरदम्बुरुहेक्षणौ ॥' इत्यादावप्ययमलंकारः । **उन्मीलन्तीति** । प्रोषितं प्रति तद्वृत्तागतस्य कस्यचिदुक्तिरियम् । उन्मीलन्ति स्फुटन्ति । वञ्जुला इति कर्तृपदं संकेतगम्यम् । लुनीहि वञ्जुलमुकुलानीति कर्मपदं संकेतगम्यम् । वहति दक्षिणानिल इति संकेतगम्यम् । आवृणुत इति संकेत्यम् । आविशन्ति कुहूकण्ठा इति संकेत्यम् । समुत्रासय तानिति संकेत्यम् । वञ्जुलादीनां नामग्रहणे नायिकाया विरहपीडातिशयो भवतीति तत्सखीनामयं साकेतिको व्यवहारः । संकेतश्चात्र योग्यकर्त्राद्यध्याहारः । पर्यायालंकारमाह—**क्वचिदेकमिति** । भवति स्वयं भवति । क्रियते परेण क्रियते । **स्थिताः क्षणमिति** । तस्याः पार्वत्याः । तत्र प्रथमोदबिन्दुरूपमेकं वस्तु पक्ष्मादावनेकत्र क्रमेण स्वयं भवति । अनेकस्यैकत्र भवनमुदाहरति—**विचरन्तीति** । अत्रैकस्मिन्नरिपुरे विलासिनीनां वृकादीना चानेकानां

---

1. **यथासंख्यमिति** । ऊर्ध्वं निर्दिष्टा उद्दिष्टाः पश्चान्निर्देशोऽनूद्देशः । ऊर्ध्वं निर्दिष्टानामर्थानां पश्चान्निर्दिष्टैरर्थैः क्रमेण संबन्धो यथासंख्यमिति वाक्यार्थः । वामनादयस्त्वमलंकारं क्रमसंज्ञयाभिदधिरे । यदाहुः—'उपमेयोपमानानां क्रमसंबन्धः क्रमः' इति ॥

'विसृष्टरागादधरान्निवर्तितः
स्तनाङ्गरागादरुणाच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रप्रणयी तया करः ॥'
'ययोरारोपितस्तारो हारस्तेऽरिवधूजनैः ।
निधीयन्ते तयोः स्थूलाः स्तनयोरश्रुबिन्दवः ॥'

एषु च क्वचिदाधारः संहतरूपोऽसंहतरूपश्च । क्वचिदाधेयमपि । यथा—'स्थिताः क्षणं–' इत्यत्रोदबिन्दवः पक्ष्मादावसंहतरूप आधारे क्रमेणाभवन् । 'विचरन्ति–' इत्यत्राधेयभूता वृकादयः संहतरूपारिपुरे क्रमेणाभवन् । एवमन्यत् । अत्र चैकस्यानेकत्र क्रमेणैव वृत्तेर्विशेषालंकाराद् भेदः । विनिमयाभावात्परिवृत्तेः ।

[1]**परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत् ।**

क्रमेणोदाहरणम्—

'दत्वा कटाक्षमेणाक्षी जग्राह हृदयं मम ।
मया तु हृदयं दत्वा गृहीतो मदनज्वरः ॥'

अत्र प्रथमेऽर्धे समेन, द्वितीयेऽर्धे न्यूनेन ।

'तस्य च प्रवयसो जटायुषः
स्वर्गिणः किमिव शोच्यतेऽधुना ।

(केषां)'क्रमेण भवनम् । एकस्यानेकत्र करणमुदाहरति—**विसृष्टरागादिति**। अत्रैकः करस्तपसः पूर्वं रागदानार्थमधरे क्रीडार्थं कन्दुके कृतः । तपःकाले तु कुशाङ्कुरेऽक्षसूत्रे च कृत इत्ययं क्रमः । अनेकस्यैकत्र करणमाह—**ययोरिति** । तारः शुद्धमुक्ताघटितः । अत्रैकस्मिन्स्तने पतिसत्त्वे हारस्य तदसत्त्वेऽश्रुबिन्दूनां करणम् । **क्वचिदाधेयमपीति** । संहतरूपमसंहतरूपं चेत्यर्थः । ननु द्विविधोऽत्र पर्यायः परिवृत्त्यभिन्न एव पूर्वत्र त्यक्तग्रहणरूपत्वेन परत्रैकवस्तुत्यागानन्तरापरवस्तुग्रहणरूपत्वेन परिवृत्तिसंभवादत आह—**विनिमयाभावादिति** । एकवस्तुत्यागोपाधिकापरवस्तूपादानरूपस्य विनिमयस्याभावादित्यर्थः । परिवृत्तेर्भेद इत्यन्वयः । तथा च पूर्वत्र वस्तुभेदाभावादपरत्रापरवस्तूपादानं प्रत्यन्यवस्तुत्यागस्य नियमाभावात्पर्यायद्वये परिवृत्त्यभेदसंभावना नास्तीति भावः । परिवृत्त्यलंकारमाह—**परिवृत्तिरिति** । **समेनेति** । द्वयोरेवोपादेयत्वात्समत्वम् । ज्वरस्य भयहेतुत्वान्न्यूनत्वम् । परिसंख्या-

---

1. **परिवृत्तिरिति** । विनिमयोऽत्र किंचित्त्यक्त्वा कस्यचिदादानम् ॥

येन जर्जरकलेवरव्यया-
त्क्रीतमिन्दुकिरणोज्ज्वलं यशः ॥'

अत्राधिक्येन ।

प्रश्नादप्रश्नतो वापि कथिताद्वस्तुनो भवेत् ॥ ८१ ॥
तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथवा तदा ।
[1]परिसंख्या

क्रमेणोदाहरणम्—

'किं भूषणं सुदृढमत्र यशो न रत्नं
किं कार्यमार्यचरितं सुकृतं न दोषः ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम् ॥'

अत्र व्यवच्छेद्यं रत्नादि शाब्दम् ।

लंकारमाह—**प्रश्नादिति** । कथिताद् उपादेयत्वेन निर्णीयोक्तात् । **तादृगिति** । कथितसदृशेत्यर्थः । व्यपोहो निषेधः । अत्र वाच्यव्यपोह्यां प्रश्नपरिसंख्यामाह—**किमिति** । भूषणमत्युत्कर्षप्रयोजकम् । सुदृढं स्थिरतरम् । रत्नस्य भङ्गापहरणादिसत्वान्न तथात्वम् । आर्यैर्मन्वादिभिश्चरितं सुकृतं पुण्यजनकं तपस्यादि, न दोषः पापजनकः परदारगमनादिः । किमप्रतिहतं चक्षुरुत्कृष्टज्ञानसाधनं धिषणा मनो न नेत्रम् । तस्यावकरप्रतिहन्यमानत्वात् । **जानातीति** । प्रत्युत्तरपरितुष्टस्य प्रश्नकर्तुः प्रत्युत्तरयितृप्रशंसेयम् । [2]यद्वा स्वस्यैवोत्तरमभिप्रेत्य प्रश्नान्तरमाह—जानातीति । सदसद्विवेकं को जानातीति प्रश्नः । तदभिप्रायबोधेन रुष्टस्योत्तरमिदम्—**त्वदपर इति** । त्वं तु न जानासीत्यर्थव्यपोहोऽत्र बोध्यः । केचित्तु 'तदपरः' इति पाठं कल्पयित्वा 'धिषणातोऽपरः' इति व्याचक्षते, [3]तन्न । धिषणाप्रशंसायां जानातीत्यन्वयापत्तेः ।

---

1. **परिसंख्येति** । परिशब्दोऽत्र वर्जनार्थकः । 'परेर्वर्जने' इति पाणिनिसूत्रात् । संख्या बुद्धिः । 'यत्सांख्यैः प्राप्यते स्थानम्' इति भगवद्वचनात् । तेन वर्जनबुद्धिः परिसंख्येत्यन्वर्थमभिधानम् । सा चैषा प्रश्नपूर्विका अप्रश्नपूर्विकेति द्विविधा । प्रत्येकं च पुनः शाब्दत्वार्थत्वाभ्यां द्विविधेति चतुर्विधा । यत्र कविप्रतिभोत्थापितेतरव्यावृत्तिस्तत्रैवालंकारविषयः । तेन 'पञ्च पञ्चनखा भक्ष्या धर्मतः परिकीर्तिताः । गोधा कूर्मः शशः खड्गी शल्यकश्चेति ते स्मृताः ॥' इत्यादिशास्त्रीयपरिसंख्यायां नालंकारतेत्यन्यत्र विस्तरः ॥

१. 'तदपरः' घ. २. 'यद्वा—' इत्यादिः '—बोध्यः' इत्यन्तः पाठः पुस्तकान्तरे नास्ति. ३. 'तन्न' इति पुस्तकान्तरे नास्ति.

'किमाराध्यं सदा पुण्यं कश्च सेव्यः सदागमः ।
को ध्येयो भगवान्विष्णुः किं काम्यं परमं पदम् ॥'

अत्र व्यवच्छेद्यं पापाद्यार्थम् । अनयोः प्रश्नपूर्वकत्वम् ।

अप्रश्नपूर्वकत्वे यथा—

'भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे ।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् ॥'
'बलमार्तभयोपशान्तये विदुषां संमतये बहु श्रुतम् ।
वसु तस्य न केवलं विभोर्गुणवत्तापि परप्रयोजनम् ॥'

श्लेषमूलत्वे चास्य वैचित्र्यविशेषो यथा—

'यस्मिंश्च राजनि जितजगति पालयति महीं चित्रकर्मसु वर्णसंकराश्चापेषु गुणच्छेदाः—' इत्यादि ।

[1]उत्तरं प्रश्नस्योत्तरादुन्नयो यदि ॥ ८२ ॥
यच्चासकृदसंभाव्यं सत्यपि प्रश्न उत्तरम् ।

यथा मम—

'वीक्षितुं न क्षमा श्वश्रूः स्वामी दूरतरं गतः ।
अहमेकाकिनी बाला तवेह वसतिः कुतः ॥'

अनेन पथिकस्य वसतियाचनं प्रतीयते ।

प्रतीयमानव्यपोह्यां प्रश्नपरिसंख्यामाह—**किमाराध्यमिति** । कार्यमित्यर्थः । पुण्यं कार्यं न पापं, नरकसाधनत्वात् । सत्समागमः, सेव्यो नासत्समागमः, पापसाधनत्वात् । विष्णुर्ध्येयो न धनं, भयप्रमादादिसाधनत्वात् । वाच्यव्यपोह्यामप्रश्नपरिसंख्यामाह—**भक्तिरिति** । व्यसनमनुशीलनम् । युवतिरूपकामास्त्रे । प्रतीयमानव्यपोह्यामप्रश्नपरिसंख्यामाह—आर्तभयोपशान्तये, न परपीडनाय । संमतये सम्यग्ज्ञानाय, न विवादाय । श्रुतमध्ययनम् । तस्य दशरथस्य । चित्रकर्मसु न मनुष्येषु । वर्णानां शुक्लादिद्रव्याणां विप्रादीनां च संकरो मेलकः । चापेषु न जनेषु गुणस्य मौर्व्याश्छेदो द्वैधीभवनमथ च गुणस्य विद्यादेश्छेदो विरहः । उत्तरालंकारमाह—**उत्तरमिति** । उन्नयः प्रणीयमानत्वम् । असकृदिति प्रश्ने उत्तरे चान्वेति । असंभाव्यं

---

1. **उत्तरमिति** । प्रश्नेऽसति यद्युत्तरात्प्रश्नस्योन्नयः कल्पनं तदेकमुत्तरम् । अपि चासकृत्प्रश्ने सति यदसंभाव्यं संभावयितुमशक्यमसकृदुत्तरं प्रतिवचनं तत्पुनरपरमुत्तरमिति योजना । अयं चोत्तरालंकारो द्विविधोऽपि प्रश्नोत्तरयोरन्यतरस्योभयोश्च साभिप्रायत्वेन निरभिप्रायत्वेन च चतुर्विध इत्यष्टधा ॥

---

१. 'जितजगति' इति क-ख-पुस्तकयोर्नास्ति.

'विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अतितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिणाम् ॥'

अत्र च समानन्यायस्य श्लेषमूलत्वे वैचित्र्यविशेषो यथोदाहृते 'हारोऽयं–' इत्यादौ । न चेदमनुमानम् । समानन्यायस्य संबन्धरूपत्वाभावात् ।

विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुतः ।

यथा—'नमयन्तु शिरांसि धनूंषि वा कर्णपूरीक्रियन्तामाज्ञा मौर्व्यो वा ।' अत्र शिरसां धनुषां च नमनयोः संधिविग्रहोपलक्षणत्वात्, संधिविग्रहयोश्चैकदा कर्तुमशक्यत्वाद्विरोधः । स चैकपक्षाश्रयणपर्यवसानः । तुल्यबलत्वं चात्र धनुःशिरोनमनयोर्द्वयोरपि स्पर्धया संभाव्यमानत्वात् । चातुर्यं चात्रौपम्यगर्भत्वेन । एवं 'कर्णपूरीक्रियन्ताम्' इत्यत्रापि । एवं 'युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः' । अत्र श्लेषावष्टम्भेन चारुत्वम् ।

स्त्वमत्र समानो धर्मः । मुक्तानां वर्णनीयत्वेन प्राकरणिकत्वम् । **विललापेति** । सोऽजः । द्रव्यत्वमत्र समानो धर्मः । अयसो वर्णनीयत्वाभावादप्राकरणिकत्वम् । **संबन्धरूपत्वाभावादिति** । व्याप्तिरूपत्वाभावादित्यर्थः । व्याप्तिश्च ज्ञाप्यज्ञापकयोरव्यभिचरितसामानाधिकरण्यरूपः । प्रकृते तु एकस्य साधर्म्यग्रहेण औचित्यात्तत्समानस्य तादृशधर्मान्तरग्रहो भवतीति ज्ञाप्यज्ञापकयोर्व्याप्त्यसंभवादिति भावः । विकल्पालंकारमाह—**विकल्प इति** । तुल्यबलत्वं तत्तदुदाहरणे यथायथं बोध्यम् । अर्थतोऽलंकारादेः चारुतावैचित्र्यं यदि स्यादित्यर्थः । 'विरोधश्चान्तरा यतः' इति पाठस्तु न सम्यक् । अर्थासंगतेः । 'चातुरी यतः' इति पाठे तु यतो विरोधाच्चातुरी वैचित्र्यं स विकल्प इत्यर्थः । **नमयन्त्विति** । बलवद्युयुत्सोरुक्तिरियम् । अरय इति कर्तृपदमत्रोह्यम् । कर्णपूरीक्रियन्तां कर्णभूषणसदृशीक्रियन्ताम् । कर्णसंगतीक्रियन्तामिति यावत् । अरिभिरिति कर्तृपदमत्रोह्यम् । नन्वसमर्थस्य शिरोनमनं समर्थस्य धनुर्नमनमिति कथं तुल्यबलत्वमत आह—**अत्र शिरसामिति** । संधिविग्रहयोर्वैरोच्छेदाय राजाद्यनुष्ठेयत्वात्तुल्यबलत्वम् । विरोधमुपपादयति—**संधिविग्रहयोरिति** । ननु सर्वत्रोदाहरणे तादृशविरोधो न संभवतीत्यत आह—**स चेति** । विरोधश्चेत्यर्थः । तुल्यबलयोरेकतरस्यैव प्रकृतेऽन्वय एकपक्षाश्रयणं यस्य स इत्यर्थः । तथा च तुल्यबलयोरेकस्मिन्प्रकृतेऽनन्वयविरोध इति परमतात्पर्यम् । इदानीं धनुःशिरोनमनयोर्यथाकथंचित्तुल्यबलत्वमुपपाद्योपलक्षणं विनैव लक्षणं संगमयति—**तुल्यबलत्वमिति** । वक्तुः स्पर्धाजन्यसंभावनाविषयत्वादित्यर्थः । **चातुर्यमिति** । वैचित्र्यमित्यर्थः । **औपम्यगर्भत्वेनेति** । शिरोनमनस्योत्कटत्वेन धनुर्नमनस्योपमानत्वेन पर्यवसानमिति भावः । **युष्माकमिति** । अत्र तनुने-

'दीयतामर्जित वित्तं देवाय ब्राह्मणाय वा ।'

इत्यत्र चातुर्याभावान्नायमलंकारः ।

समुच्चयोऽयमेकस्मिन्सति कार्यस्य साधके ॥ ८४ ॥
खलेकपोतिकान्यायात्[1]तत्करः स्यात्परोऽपि चेत् ।
गुणौ क्रिये वा युगपत्स्यातां यद्वा गुणक्रिये ॥ ८५ ॥

यथा मम—

'हहो धीरसमीर हन्त जननं ते चन्दनक्ष्माभृतो
दाक्षिण्य जगदुत्तर परिचयो गोदावरीवारिभिः ।
प्रत्यङ्गं दहसीति मे त्वमपि चेदुद्दामदावाग्निव-
न्मत्तोऽयं मलिनात्मको वनचर. किं वक्ष्यते कोकिलः ॥'

अत्र दाहे एकस्मिंश्चन्दनक्ष्माभृज्जन्मरूपे कारणे सत्यपि दाक्षिण्यादीना हेत्वन्तराणामुपादानम् । अत्र सर्वेषामपि हेतूना शोभनत्वात्सद्योग. । अत्रैव चतुर्थपादे मत्तादीनामशोभनाना योगादसद्योगः ।

त्रयोर्भवार्तिशमनसाधनक्षमत्वेन तुल्यबलत्वम् । तयोरेकतरस्यैव भवार्तिशमनरूपे प्रकृतकार्ये हेतुत्वेनान्वयो न तु समुच्चयवदुभयोरिति विरोध । श्लेषावष्टम्भेन श्लेषानुकूल्येन । 'पतत्यविरत वारि नृत्यन्ति शिखिनो मुदा । अद्य कान्त कृतान्तो वा दु खस्यान्त करिष्यति ॥' अत्र विप्रलम्भशृङ्गारावष्टम्भेन चारुत्वम् । एवमन्यत्रापि यथायथ चारुत्वमवगन्तव्यम् । चारुतार्थत इति यदुक्त तस्य व्यावृत्तिमाह—**दीयतामिति** । अत्र देवब्राह्मणयोरुत्तमपात्रत्वेन तुल्यबलत्वम् । प्रकृते दाने एकतरस्यैव सबन्धो न तूभयोरित्यस्ति विरोध । समुच्चयालकारमाह—**समुच्चयोऽयमिति** । खलेकपोतिकान्यायश्च—'वृद्धा युवान शिशव कपोता खले यथामी युगपत्पतन्ति ।' यथा भक्षणार्थं कपोताना खले युगपत्पतन तथैककार्यानुष्ठानार्थं युगपदनेकस्योपस्थापनम् । प्रकारान्तरेण समुच्चयालकारमाह—**गुणाविति** । गुणश्च क्रियाभिन्नधर्ममात्रम् । क्रिया धात्वर्थरूपा । **हंहो इति** । विरहिण उक्तिरियम् । दाक्षिण्य दक्षिणदिग्भवत्वम्, अथ च सारल्यम् । **कि वक्ष्यते कोकिल इति** । कोकिल सुतरा दाहजनको भवतीति भाव । अयमर्थापत्त्यलकारसकीर्ण । सतामुपादेयाना कारणाना केवलाना योग सद्योग । तेषामेवानुपादेयाना योगोऽसद्योग ।

---

1 **तत्कर इति** । चेत्परोऽन्योपि तत्कर. तस्य कार्यस्य सपादक स्यात् । एष एक प्रकार गुणयो. क्रिययोर्गुणक्रिययोर्वा यौगपद्येनावस्थाने त्रिविध इति चतुर्विध. । सोऽय समुच्चय सद्योगेऽसद्योगे सदसद्योगे च भवतीति त्रिधा भिद्यते ॥

सदसद्योगो यथा—

'शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गनगतः खलो मनसि सप्त शल्यानि मे ॥'

इह केचिदाहुः—'शशिप्रभृतीनां शोभनत्वं खलस्याशोभनत्वमपि सदसद्योगः' इति । अन्ये तु—'शशिप्रभृतीनां स्वतःशोभनत्वं धूसरत्वादीनां त्वशोभनत्वमिति सदसद्योगः ।' अत्र हि शशिप्रभृतिषु धूसरादेरत्यन्तमनुचितत्वमिति विच्छित्तिविशेषस्यैव शोभनत्वे प्रक्रमादिति । इह च खलेकपोतवत्सर्वेषां कारणानां साहित्येनावतारः । समाध्यलंकारे त्वेककार्यं प्रति साधके समग्रेऽप्यन्यस्य काकतालीयन्यायेनापतनमिति भेदः ।

'अरुणे च तरुणि नयने तव मलिनं च प्रियस्य मुखम् ।
मुखमानतं च सखि ते ज्वलितश्चास्यान्तरे स्मरज्वलनः ॥'

अत्राद्येऽर्धे गुणयोर्यौगपद्यम्, द्वितीये क्रिययोः । उभयोर्यौगपद्ये यथा—

उभयमिश्रणे सदसद्योगः । **शशीति** । मे मनसि सप्तैव शल्यानि दुःखदायकत्वात् । किं किमित्याह—**शशीति** । स्वाकृतेः शोभनशरीरस्य अनक्षरं वचनहीनम् । धनपरायणो धनलालसत्वेन सदसद्विवेकहीनः । शशिप्रभृतीनामिति सज्जनपर्यन्तानाम् । धूसरत्वादीनामिति सततदुर्गतत्वपर्यन्तानां ग्रहणम् । खलस्य तु स्वतोऽशोभनत्वं नृपाङ्गनगतत्वस्य शोभनत्वमिति वैपरीत्येन सदसद्योगः । मनोदुःखं प्रति धूसरत्वादिविशिष्टाश्चन्द्रादयः कारणानि कारणीभूतानां विशेष्याणां विशेषणानां च यथासंभवं सतामसतां च योग एव सदसद्योग इति भावः । अन्येषां मतमुपपादयति—**अत्रहीति** । विच्छित्तिविशेषस्यैवेत्येवकारेण मनसीत्यादेर्व्यावृत्तिः । नन्वेतन्निरर्थकमत आह—**मनसीति** । तथा च वाक्यसमापकत्वेनैव तत्सार्थकमिति भावः । प्रथममतं दूषयति—**नृपाङ्गनगत इति** । विशेष्यस्यैवेत्येवकारेण विशिष्टव्यवच्छेदः । तथा चात्र विशेष्यविशेषणयोर्योग एव वैचित्र्यावहो नतु विशिष्टानां योगः । क्रमभेदरूपदोषावहत्वादिति भावः । समाध्यलंकारादस्य भेदमाह—**इहेति** । साहित्येन मिलितत्वेनावतारः । समग्रे समर्थे पर्याप्ते काकतालीयन्यायेन अप्रतिसंहृतत्वेनापतनमुपस्थापनम् । यत्र कार्यविशेषं मिलितान्येव कारणानि जनयन्ति समुच्चयस्य विषयः । यत्र त्वेकस्मिन्कारणे फलसाधनायानुष्ठीयमाने दैवादुत्पन्नेन कारणान्तरेण तत्फलस्य सुकरत्वं स समाधिरिति भावः । गुणयौगपद्ये समुच्चयमाह—**अरुणे चेति** ।

---

१. 'समाधानं' इति मुद्रितपुस्तकेऽधिकम् ।

'कलुषं च तवाहितेष्वकस्मात्सितपङ्केरुहसोदरश्रि चक्षुः ।
पतितं च महीपतीन्द्र तेषां वपुषि प्रस्फुटमापदां कटाक्षैः ॥'
'धुनोति चासिं तनुते च कीर्तिम् ।'

इत्यादावेकाधिकरणेऽप्येष दृश्यते । न चात्र दीपकम् । एते हि गुणक्रियायौगपद्ये समुच्चयप्रकारानियमेन कार्यकारणकालनियमविपर्ययरूपातिशयोक्तिमूलाः । दीपकस्य चातिशयोक्तिमूलत्वाभावः ।

समाधिः सुकरे कार्ये दैवाद्वस्त्वन्तरागमात् ।

यथा—

'मानमस्य निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् ॥'

[1]प्रत्यनीकमशक्तेन प्रतीकारे रिपोर्यदि ॥ ८६ ॥
तदीयस्य तिरस्कारस्तस्यैवोत्कर्षसाधनः ।

तस्यैवेति रिपोरेव । यथा मम—

'मध्येन तनुमध्या मे मध्यं जितवतीत्ययम् ।
इभकुम्भौ भिनत्त्यस्याः कुचकुम्भनिभौ हरिः ॥'

प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम् ॥ ८७ ॥
निष्फलत्वाभिधानं वा [2]प्रतीपमिति कथ्यते ।

नायिकां प्रति सख्या उक्तिरियम् । नयने वृत्ते इति शेषः । **कलुषमिति** । रोषकषायितमित्यर्थः । सितपङ्केरुहस्य सोदरा सादृशी श्रीः शोभा यस्य तत् । अस्य वैयधिकरण्ये एव प्रयोगप्राचुर्यं विच्छित्तिविशेषजनकत्वं च । क्वचित्सामानाधिकरण्येऽपि प्रयोगमाह—**धुनोति चेति** । कार्यकारणयोः कालनियमः पौर्वापर्यं तस्य विपर्ययो यौगपद्यमारोपितं झटिति फलोत्पादनप्रतिपत्त्यर्थम् । समाध्यलंकारमाह—**समाधिरिति** । दैवादकस्माद् वस्त्वन्तरागमात्कारणान्तरसमाधानात्कार्ये सुकरे सति समाधिरित्यर्थः । एतेन प्रक्रान्तकारणेन कार्यस्य दुष्करत्वं प्रतीयते । **मानमिति** । सखायं प्रति कस्यचिदुक्तिरियम् । दिष्ट्या भाग्येन । उदीर्णमुत्पन्नम् । प्रतीपालंकारमाह—**प्रसिद्धस्येति** । **निष्फलत्वाभिधानमिति** । उपमानस्येत्यन्वयः ।

---

1. **प्रत्यनीकमिति** । अनीकेन सदृशं प्रत्यनीकम् । सादृश्यस्य यथार्थत्वेनैव संग्रहे पुनः सादृश्यग्रहणाद्गुणीभूतेऽपि सादृश्येऽव्ययीभावः । लोके प्रतिपक्षस्य तिरस्कारायानीकं प्रयुज्यते । तदशक्तौ प्रतिपक्षसंबन्धिनः कस्यचित्तिरस्कारः क्रियते । स चानीकसदृशप्रयुज्यमानत्वात्प्रत्यनीकमुच्यते । अत्र च प्रतिपक्षगतं बलवत्त्वम्, आत्मगतं दुर्बलत्वं च गम्यत इति पण्डितराजः ॥

2. **प्रतीपमिति** । प्रतिगच्छन्त्यापो यस्मिन्निति प्रतीपं निम्नोन्नतस्थलम्, तत्सादृश्यादलंकारे लक्षणा । 'ऋक्पूः—' इत्यादिनाप्रत्ययः । 'ह्रस्वनुपसर्गेभ्योऽप ईत्' इतीदादेशः ॥

क्रमेण यथा—

'यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं–' इत्यादि ।

'तद्वक्त्रं यदि मुद्रिता शशिकथा हा हेम सा चेद्द्युति-
स्तच्चक्षुर्यदि हारितं कुवलयैस्तच्चेत्स्मितं का सुधा ।
धिक्कंदर्पधनुर्भ्रुवौ यदि च ते किं वा बहु ब्रूमहे
यत्सत्यं पुनरुक्तवस्तुविमुखः सर्गक्रमो वेधसः ॥'

अत्र वक्त्रादिभिरेव चन्द्रादीनां शोभातिवहनात्तेषां निष्फलत्वम् ।

उक्त्वा चात्यन्तमुत्कर्षमत्युत्कृष्टस्य वस्तुनः ॥ ८८ ॥
कल्पितेऽप्युपमानत्वे प्रतीपं केचिदूचिरे ।

यथा—

'अहमेव गुरुः सुदारुणाना-
मिति हालाहल तात मा स्म दृप्यः ।
ननु सन्ति भवादृशानि भूयो
भुवनेऽस्मिन्वचनानि दुर्जनानाम् ॥'

अत्र प्रथमपादेनोत्कर्षातिशय उक्तः । तदनुक्तौ तु नायमलंकारः । यथा—'ब्रह्मेव ब्राह्मणो वदति' इत्यादि ।

मीलितं वस्तुनो गुप्तिः केनचित्तुल्यलक्ष्मणा ॥ ८९ ॥

अभिधानं ज्ञापनं उपमानोपमेयभावे वैपरीत्यमत्रेति प्रतीपमुच्यते । द्वितीयपक्षे निष्फलत्वाभिधानेनोपमेयस्य प्रकर्षप्रतीतेरुपमानप्रातिकूल्यमिति प्रतीपमुच्यते । आद्ये उपमानस्योपमेयत्वकल्पनेन द्वितीये वैफल्याभिधानेनापकर्षः प्रतीयते । **तद्वक्त्रमिति** । शशिनः कथा सौन्दर्यप्रशंसा । हाशब्देन हेम्नः शोच्यत्वम्, तेन च तस्य वैफल्यं प्रतीयते । विफलार्थो वा हाशब्दः । हारितं विफलीभूतम् । यद्वा—हा खेदे, रितं गतम् । नष्टमिति यावत् । **यत्सत्यमिति** । वेधसः सर्गक्रमः पुनरुक्तवस्तुहीन इति यद्दीयते तत्सत्यमेवेत्यर्थः । एतेन केशपाशादिसत्त्वे चामरादीनां वैफल्यं प्रतीयते । वैफल्यमुपपादयति—**वक्त्रादिभिरेवेति** । प्रकारान्तरेण प्रतीपालंकारमाह—**उक्त्वेति** । येन धर्मेण उत्कर्ष उच्यते तेनैव धर्मेणाप्रसिद्धमप्युपमानं त्वं कल्पय इति भावः । अपिकारात्पूर्वोक्तप्रकारयोः समुच्चयः । **अहमेवेति** । हे हालाहल, हे तात, अहमेव सुदारुणानां गुरुरिति दर्पवान्मा भूः । कथमित्यत आह—**नन्विति** । ननु भोः, अस्मिन्भुवने दुर्जनानां वचनानि भूयो यथा स्यात्तथा सन्ति । अत्र दारुणत्वातिशयः सामान्यगुणस्तद्योगादुपमानत्वमभूतपूर्वमपि दारुणत्वांशे दर्पनिषेधादनुभूतमेव विवक्षितम् । **ब्रह्मेवेति** । अत्रोत्कर्षो गम्य एव न तु वाच्यः ।

अत्र समानलक्षणं वस्तु क्वचित्सहजं क्वचिदागन्तुकम्। क्रमेण यथा—

'लक्ष्मीवक्षोजकस्तूरीलक्ष्म वक्षःस्थले हरेः।
ग्रस्तं नालक्षि भारत्या भासा नीलोत्पलाभया॥'

अत्र भगवतः श्यामा कान्तिः सहजा।

'सदैव शोणोपलकुण्डलस्य यस्यां मयूखैररुणीकृतानि।
कोपोपरक्तान्यपि कामिनीनां मुखानि शङ्कां विदधुर्न यूनाम्॥'

अत्र माणिक्यकुण्डलस्यारुणिमा मुखे आगन्तुकः।

सामान्यं प्रकृतस्यान्यतादात्म्यं सदृशैर्गुणैः।

यथा—

'मल्लिकाचितधम्मिल्लाश्चारुचन्दनचर्चिताः।
अविभाव्याः सुखं यान्ति चन्द्रिकास्वभिसारिकाः॥'

मीलिते उत्कृष्टगुणेन निकृष्टगुणस्य तिरोधानम्। इह तूभयोस्तुल्यगुणतया भेदाग्रहः।

तद्गुणः स्वगुणत्यागादत्युत्कृष्टगुणग्रहः॥ ९०॥[1]

यथा—

'जगाद वदनच्छद्मपद्मपर्यन्तपातिनः।
नयन्मधुलिहः श्वैत्यमुदग्रदशनांशुभिः॥'

मीलिते प्रकृतस्य वस्तुनो वस्त्वन्तरेणाच्छादनम्। इह तु वस्त्वन्तरगुणेनाक्रान्तता प्रतीयत इति भेदः[१]।

मीलितालंकारमाह—**सामान्यमिति**। प्रकृतस्य प्रस्तुतस्य अन्यतादात्म्यमितरभिन्नत्वेनापरिचेयत्वम्। **मल्लिकेति**। 'धम्मिलः संयताः कचाः' इत्यमरः। अत्राभिसारिकावर्णनीयत्वेन प्रस्तुताश्चन्द्रिकाभिन्नत्वेनापरिचिताः। तद्गुणालंकारमाह—**तद्गुण इति**। अत्युत्कृष्टगुणस्य अर्थात्संनिकृष्टस्य वस्तुनोऽतिनिबिडगुणस्य ग्रहः स्फूर्तिः। अत्युत्कृष्टेति गुणविशेषणं स्वगुणतिरोधाने बीजम्। **जगादेति**। अत्र प्रक्रान्तो बलदेवः कर्ता। नन्वत्रोत्कृष्टगुणेन निकृष्टगुणतिरोधानमस्तीति मीलितादस्य को भेद इत्यत आह—**मीलित इति**। इह तु तद्गुणे तु। संनिकृष्टगुणेन स्वगुणस्यैव तिरोधानं

1. **तद्गुण इति**। तस्योत्कृष्टगुणस्य गुणा अस्मिन्निति तद्गुणः॥

---

१. 'भेदः' इति नास्ति घ-पुस्तके.

[1]तद्रूपाननुहारस्तु हेतौ सत्यप्यतद्गुणः ।

यथा—

'हन्त सान्द्रेण रागेण भृतेऽपि हृदये मम ।
गुणगौर निषण्णोऽपि कथं नाम न रज्यसि ॥'

यथा वा—

'गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते ॥'

पूर्वत्रातिरक्तहृदयसंपर्कात्प्राप्तवदपि गुणगौरशब्दवाच्यस्य नायकस्य रक्तत्वं न निष्पन्नम् । उत्तरत्राप्रस्तुतप्रशंसायां विद्यमानायामपि गङ्गायमुनापेक्षया प्रकृतस्य हंसस्य गङ्गायमुनयोः संपर्केऽपि न तद्रूपता । अत्र [2]च गुणाग्रहणरूपविच्छित्तिविशेषाश्रयाद्विशेषोक्तेर्भेदः ।

न तु वस्तुनः । मीलिते तु वस्तुनोऽपीति विशेषः । मीलिते स्वजातीयोत्कृष्टगुणतिरोधानमत्र तु विजातीयोत्कृष्टगुणेनापकृष्टगुणतिरोधानं 'स्वगुणत्यागात्' इत्यनेन लभ्यत इत्यपि बोध्यः । अनेन सामान्यालंकारादप्यस्य भेदस्तत्र 'सदृशैर्गुणैः' इत्युपादानात् । अतद्गुणालंकारमाह—**तद्रूपेति** । तद्रूपस्य उत्कृष्टगुणवस्तुनो गुणस्याननुहारः । अपकृष्टगुणेन वस्तुना अग्रहणमित्यर्थः । **हेताविति** । उत्कृष्टगुणवस्तुसंनिधानमत्र हेतुरवधेयः । रागेण अनुरागेण भृते पूर्णे । गुणगौर यशःशुक्ल । शुक्लगुणस्य रक्तगुणयोगेन रक्तत्वं सुतरां जायते । अत्र श्लेषादनुरागरक्तिम्नोरेकत्वाध्यासादेतदुपपद्यते । अत्र प्राकरणिकेन नायकेन प्राकरणिकस्य नायिकाहृदयस्य गुणाग्रहणम् । प्राकरणिकेनाप्राकरणिकगुणाग्रहणेऽप्ययमलंकार इत्याह—**राजहंसेति** । चीयते गङ्गाजलसंपर्केणोपचीयते । अपचीयते यमुनाजलसंपर्केणोपक्षीयते । प्राप्तवदपि भवितुं योग्यमपि । ननूत्तरत्राप्रस्तुतप्रशंसया स्वसंबन्धिगुणग्राही जन एव प्रकृतो न तु राजहंस इति प्रकृतस्याप्रकृतगुणाग्रहणोदाहरणं कथमेतत्संगच्छतामत आह—**उत्तरत्रेति** । प्रस्तुतस्य प्रतिपाद्यत्वेन प्राकरणिकस्य गङ्गायमुनाम्ब्वपेक्षया प्रतिपाद्यत्वेन राजहंसस्यापेक्षिकं प्रकृतत्वमिति भावः । नन्वत्र कारणसत्त्वे कार्यानुत्पत्तिरस्तीति विशेषोक्त्यलंकार एवायमित्यत आह—**अत्र चेति** । विच्छित्तिविशेषाश्रयाद् वैचित्र्यविशेष-

---

1. **तदिति** । उत्कृष्टगुणपदार्थसंनिधानाख्ये हेतौ सत्यपि तद्रूपस्योत्कृष्टगुणस्याननुहारो न्यूनगुणेनाननुवर्तनमतद्गुणः । तस्योत्कृष्टगुणस्य गुणा अस्मिन्न सन्तीति ॥

---

१. 'तु' क-ख.

वर्णान्तरोत्पत्त्यभावाच्च विषमात् ।

संलक्षितस्तु सूक्ष्मोऽर्थ आकारेणेङ्गितेन वा ॥ ९१ ॥
कयापि सूच्यते भङ्ग्या यत्र सूक्ष्मं तदुच्यते ।

सूक्ष्मः स्थूलमतिभिरसंलक्ष्यः । अत्राकारेण यथा—

'वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे ।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख ॥'

अत्र कयाचित्कुङ्कुमभेदेन संलक्षितं कस्याश्चित्पुरुषायितं पाणौ पुरुषचिह्नखड्गलेखालिखनेन सूचितम् । इङ्गितेन यथा—

'संकेतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥'

अत्र विटस्य भ्रूविक्षेपादिना लक्षितः संकेतकालाभिप्रायो रजनीकालभाविना पद्मनिमीलनेन प्रकाशितः ।

व्याजोक्तिर्गोपनं व्याजादुद्भिन्नस्यापि वस्तुनः ॥ ९२ ॥

संबन्धात् । कारणसत्त्वे कार्यानुत्पत्तिरूपवैचित्र्यादुक्तवैचित्र्यं विलक्षणम् । तत्प्रयोजकत्वादलंकारस्य वैलक्षण्यमिति भावः । ननु नायिकाहृदयादिरूपकारणगुणस्य विरुद्धस्तत्संपृक्तनायकादिरूपकार्यगुण इति विषमालंकार एवायं संपर्कस्य कार्यत्वात्संपृक्तस्यापि कार्यत्वमुपचर्यत इत्यभिप्रायेणाह—**वर्णान्तरेति** । कार्यस्य कारणगुणविरुद्धगुणोत्पत्तावेव विषमस्य विषयः । प्रकृते तु तदभावान्न तद्विषय इति भावः । **विषमादिति** । भेद इत्यन्वयः । सूक्ष्मालंकारमाह—**संलक्षित इति** । आकारो धर्मः । इङ्गितं क्रियाभङ्गी विदग्धचेष्टा । मतेः स्थूलत्वं गहनार्थाग्राहित्वम् । **वक्त्रस्यन्दीति** । कापि वयस्या तन्व्याः नायिकायाः कण्ठे वक्त्रात्स्यन्दिभिः स्वेदबिन्दुसंतानैर्भिन्नं रेखारूपकृतविभागं कुङ्कुमं दृष्ट्वा तस्याः पुंस्त्वं सुरते पुरुषायितं व्यञ्जयन्ती ज्ञापयन्ती स्मित्वा तस्या एव पाणौ खड्गलेखां लिलेख । पुरुषायिताया एव वक्त्रगलितस्वेदानां गण्डे गलनं संभवति न तूत्तानसुप्तायाः । अतः सूक्ष्ममपि पुरुषायितं लक्षितं पुरुषधर्मस्य खड्गलेखायाः सस्मितलिखनेन प्रकाशितम् । खड्गलेखा खड्गाकृतिचिह्नविशेषः पुंसां हस्ते तिष्ठति । कुङ्कुमभेदोऽत्राकारः । एतदेवाह—**अत्र कयाचिदिति । संकेतेति** । संकेतकालजिज्ञासामित्यर्थः । विटं धूर्तमुपनायकं ज्ञात्वा भ्रूविक्षेपादितदिङ्गितादिना ज्ञात्वेति बोध्यम् । हसता हर्षसूचकचेष्टावता नेत्रेणार्पितं ज्ञापितमाकूतमभिप्रायो यस्य यत्र वा तद्यथा स्यात्तथा निमीलितमित्यर्थः । संकेतकालाभिप्रायः संकेतकालजिज्ञासा । व्याजोक्त्यलंकारमाह—**व्याजोक्तिरिति** । व्याजात्कारणा-

यथा—

'शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लस-
द्रोमाञ्चादिविसंस्थुलाखिलविधिव्यासङ्गभङ्गाकुलः ।
आः शैत्यं तुहिनाचलस्य करयोरित्यूचिवान्सस्मितं
शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद्वः शिवः ॥'[1]

नेयं प्रथमापह्नुतिः, अपह्नवकारिणो विषयस्यानभिधानात् । द्वितीयापह्नुतेर्भेदश्च तत्प्रस्तावे दर्शितः ।

स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम् ।

दुरूहयोः कविमात्रवेद्ययोरर्थस्य डिम्भादेः स्वयोस्तदेकाश्रययोश्चेष्टास्वरूपयोः । यथा मम—

'लाङ्गूलेनाभिहत्य क्षितितलमसकृद्दारयन्नग्रपद्भ्या-
मात्मन्येवावलीय द्रुतमथ गगनं प्रोत्पतन्विक्रमेण ।

न्तरोद्भावनच्छलाद् उद्भिन्नस्य कार्यादिना व्यक्तीभूतस्य । **शैलेन्द्रेति** । शैलेन्द्रेण हिमालयेन प्रतिपाद्यमानाया दीयमानाया गिरिजायाः पार्वत्या हस्तस्योपगूढेन संपर्केणोल्लसन् यो रोमाञ्चादिः पुलककम्पादिस्तेन विसंस्थुलोऽयथाभूतो योऽखिलविधिव्यासङ्गः समस्तवैदिककियासंबन्धस्तस्य भङ्गेनाकुलो व्याकुलः । शैलस्य हिमालयस्यान्तःपुरवर्तिनो ये मातृकामण्डला मण्डलीभूता मातरस्तेषां गणैः । अत्र रोमाञ्चादिना कार्येणोद्भिन्नः स्वकीयोद्भावविशेषः शैत्यरूपकारणान्तरोद्भावनेन शिवेन गोपितः । ननु प्रकृतगोपनेनाप्रकृतोद्भावनमपह्नुतिरुक्ता तदनयोः को भेद इत्यत आह—**नेयमिति** । प्रथमस्याप्रकृतनिषेधपूर्वकप्रकृतस्थापनरूपा । विषयस्य अप्रकृतारोपविषयस्य । अत्र तु गोपनाकारिभिन्नेन काव्यादिना विषयो व्यज्यत एव, नत्वभिधीयत इति भावः । द्वितीयापह्नुतेः, 'गोपनीयं कमप्यर्थं द्योतयित्वा कथंचन । यदि श्लेषेणान्यथा वान्यथयेत्साप्यपह्नुतिः ॥' इत्युक्तलक्षणायास्तत्प्रस्तावे दर्शित इति । अत्र गोपनकृता गोपनीयं प्रथममभिधीयते, अत्र तु न तथेति भावः । स्वभावोक्त्यलंकारमाह—**स्वभावोक्तिरिति** । व्याचष्टे—**दुरूहयोरिति** । डिम्भादेरित्यादिपदेनाकृत्रिमक्रियारूपवन्मात्रपशुपक्ष्यादिपरिग्रहः । 'मात्रं कात्स्न्र्येऽवधारणे' इत्यमरः । स्वपदं स्वकीयपरतायां व्याचष्टे—**स्वयोरिति** । तस्याप्यवधारणपरतामाह—**तदेकाश्रययोरिति** । डिम्भादिमात्रगतयोरित्यर्थः । कारिकास्थे क्रियारूपपदे व्याचष्टे—**चेष्टास्वरूपयोरिति** । स्वरूपं वर्णसंस्थानादि । तत्र डिम्भस्य क्रियावर्णनं यथा—'करारविन्देनं पदारविन्दं मुखारविन्दे विनिवेशयन्तम् । वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ॥' आदिपदग्राह्यस्य तरक्षोः क्रियावर्णनमाह—**लाङ्गूलेनेति** । क्षितितलमिति काकाक्षिन्यायेन पूर्वापरयोरन्वेति । आत्मनि

---

1. **शैलेन्द्रेति** । अत्र रोमाञ्चादिनोद्भिन्नो रतिभावः शैत्यप्रक्षेपणेनापलपितः ॥

स्फूर्जद्धुंकारघोषः प्रतिदिशमखिलान्द्रावयन्नेव जन्तू-
न्कोपाविष्टः प्रविष्टः प्रतिवनमरुणोच्छूनचक्षुस्तरक्षुः ॥'

अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यतः ॥ ९३ ॥
यत्प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम् ।

यथा—

'मुनिर्जयति योगीन्द्रो महात्मा कुम्भसंभवः ।
येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥'

यथा वा—

'आसीदञ्जनमत्रेति पश्यामि तव लोचने ।
भाविभूषणसंभारां साक्षात्कुर्वे तवाकृतिम् ॥'

न चायं प्रसादाख्यो गुणः । भूतभाविनोः प्रत्यक्षायमाणत्वे तस्याहे-

---

स्वदेहे अवलीय लीनो भूत्वा । अतिवामनीभूयेति यावत् । प्रतिवनं यावद्वनम् । तरक्षुर्व्याघ्रविशेषः । ईदृशक्रिया अकृत्रिमा रुष्टतरक्षोरेव । वर्णवर्णनं दण्डाचार्येणोदाहृतं यथा—'तुण्डैरातास्रकुटिलैः पक्षैर्हरितकोमलैः । त्रिवर्णराजिभिः कण्ठैरेते मञ्जुगिरः शुकाः ॥' संस्थावर्णनं यथा—'पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव । शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानास्रमात्रानास्तामेतद्व्रजति स पशुर्दूरमेद्येहि यामः ॥' अत्र विपुलपुच्छखुरचतुष्टयदीर्घग्रीवा अश्वस्यैव संस्थानानि । भाविकालंकारमाह—**अद्भुतस्येति** । प्रत्यक्षायमाणत्वं वर्णनाविशेषवशेन प्रत्यक्षवद्भासमानत्वं भावो वक्तुरभिप्रायः । स च वर्णनीयगोचरवर्ति स्वरूपस्तद्योगाद्भाविकं तद्योगश्च व्यञ्जकत्वेन । अद्भुतस्य प्रत्यक्षायमाणत्वे भाविकमाह—**मुनिरिति** । दिव्यौ विष्णोरवतारौ तौ प्रसिद्धौ । अत्र चुलुकीकृतसमुद्रे दृश्यमानदिव्यमत्स्यकच्छपरूपमद्भुतं वस्तु वर्णनाविशेषवशेन मुनिः संनिकृष्टश्रोतॄणां प्रत्यक्षवद्भासते । भूतभाविनोः प्रत्यक्षायमाणत्वे भाविकमाह—**आसीदिति** । अत्रानयोः अत्र पूर्वार्धे भूतस्य परार्धे भाविनः प्रत्यक्षायमाणत्वं नयनशोभाविशेषवशेनाञ्जनं सौन्दर्यातिशयवशीकृतस्य धनिनः पत्युरादरातिशयेन भूषणसंभारमनुमाय सख्या तथाभिहितं यथा भूतभाविनामप्यञ्जनभूषणसंभारौ संनिकृष्टश्रोतॄणां प्रत्यक्षवद् भासेते । केचित्तु 'यौवनोद्भेदादञ्जनं विनापि चक्षुषि तच्छोभा भूषणाभावेऽपि वपुषि तच्छोभारम्भः' इति व्याचक्षते, तन्न । तादृशार्थस्य व्यञ्जकाभावेनाप्रतीतेः । भूतभाविनोरञ्जनभूषणयोः प्रत्यक्षायमाणत्वे तत्कृतचारुत्व एव तात्पर्यात् । ननु संनिकृष्टपदार्थस्य वर्णनातः प्रत्यक्षायमाणत्वं तदा भवति यदि प्रसन्नार्थाः शब्दाः प्रयुज्यन्ते । एवं सति प्रसादाख्यो गुण एवायमित्यभिप्रायेणाशङ्कते—**न चायं प्रसादाख्यो गुण इति** । भूतभाविनोरित्यद्भुतस्याप्युपलक्षणम् । तस्य प्रसादगुणस्य ।

1. **भाविकमिति** । कविगतो भाव आशयः श्रोतरि प्रतिबिम्बत्वेनास्तीति, भावो भावना वा पुनः पुनश्चेतसि निवेशनं सोऽत्रास्तीति व्युत्पत्तिः ॥

तुत्वात् । न चाद्भुतो रसः । विस्मयं प्रत्यस्य हेतुत्वात् । न चातिशयोक्तिरलंकारः । अध्यवसायाभावात् । न च भ्रान्तिमान् । भूतभाविनोर्भूतभावितयैव प्रकाशनात् । न च स्वभावोक्तिः । तस्य लौकिकवस्तुगतसूक्ष्मधर्मस्वभावस्यैव यथावद्वर्णनं स्वरूपम् । अस्य तु वस्तुनः प्रत्यक्षायमाणत्वरूपो विच्छित्तिविशेषोऽस्तीति । यदि पुनर्वस्तुनः क्वचित्स्वभावोक्तावप्यस्या विच्छित्तेः संभवस्तदोभयोः संकरः ।

'अनातपत्रोप्ययमत्र लक्ष्यते
सितातपत्रैरिव सर्वतो वृतः ।
अचामरोऽप्येष सदैव वीज्यते
विलासबालव्यजनेन कोऽप्ययम् ॥'

अत्र प्रत्यक्षायमाणस्यैव वर्णनान्नायमलंकारः । वर्णनावशेन प्रत्यक्षायमाणत्वस्यास्य सरूपत्वात् । यत्पुनरप्रत्यक्षायमाणस्यापि वर्णने प्रत्यक्षायमाणत्वं तत्रायमलंकारो भवितुं युक्तः । यथोदाहृते 'आसीदज्ञनम्–' इत्यादौ ।

अद्भुतस्य प्रत्यक्षायमाणत्वपक्षे शङ्कते—**न चाद्भुतो रस इति** । विस्मयं चमत्कारम् । चमत्कारायोगे रसरूपत्वासंभवादिति भावः । नन्वत्र वर्णनीयगतः कोऽप्यतिशयः प्रतीयत इत्यतिशयोक्तिरेवायमित्याशङ्कते—**न चातिशयोक्तिरिति** । अध्यवसायाभावाद् अभेदारोपाभावात् । ननु भूतभाविपदार्थाभाववति तत्प्रकारकप्रतीतिरत्रास्तीति भ्रान्तिमानेवायमित्याशङ्कते—**न च भ्रान्तिमानिति** । भूतभाविनोर्वर्तमानत्वेन भानेऽपि भ्रमः संभवतीति तद्वारणाय भूतभावितयैवेत्युक्तम् । प्रकाशनात्तद्वृत्ति विषयीकरणात् । तस्य स्वभावोक्त्यलंकारस्य । **सूक्ष्मेति** । कवितृमात्रवेद्य इत्यर्थः । यथावद्वर्णनं संभावनातिक्रमेण वर्णनम् । अस्य भाविकालंकारस्य तु । विच्छित्तिविशेषोऽस्तीतिशब्दो हेतौ । **अनातपत्रोऽपीति** । अत्र सदनुमानवशेन वक्तुः प्रत्यक्षायमाणयोः सितातपत्रचामरयोर्वर्णनम्, न तु वर्णनाविशेषवशेन श्रोतृणां तयोः प्रत्यक्षायमाणत्वमिति । नास्ति भाविकावसर इति भावः । अस्य भाविकालंकारस्य । नन्वेवमासीदज्ञनमित्यादावपि सदनुमानवशेन प्रत्यक्षायमाणत्ववर्णनमिति नास्य विषय इत्यत आह—**यत्पुनरिति** । यद् यदा धर्मिसंनिकर्षादिरूपहेत्वभावदशायामित्यर्थः । **वर्णने इति** । वर्णने वाग्वैचित्र्यविशेषे सतीत्यर्थः । **तत्रायमिति** । तत्राप्ययमित्यर्थः । न चातपत्रोऽपीत्यादावप्युक्तरीत्या भाविकप्रसक्तिरिति वाच्यम्; श्रोतृणां धर्मिसंनिकर्षाभावेन प्रत्यक्षायमाणत्वाभावात्तस्यापि प्रकृतोपयोगित्वेन

लोकातिशयसंपत्तिवर्णनोदात्तमुच्यते ॥ ९४ ॥
यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत् ।

क्रमेणोदाहरणम्—

'अधः कृताम्भोधरमण्डलानां यस्यां शशाङ्कोपलकुट्टिमानाम् ।
ज्योत्स्नानिपातात्क्षरतां पयोभिः केलीवनं वृद्धिमुरीकरोति ॥'

'नाभिप्रभिन्नाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान्पुरुषोऽधिशेते ॥'

रसभावौ तदाभासौ भावस्य प्रशमस्तथा ॥ ९५ ॥
गुणीभूतत्वमायान्ति यदालंकृतयस्तदा ।
रसवत्प्रेय ऊर्जस्वि समाहितमिति क्रमात् ॥ ९६ ॥

तदाभासौ रसाभासो भावाभासश्च । तत्र रसयोगाद्रसवदलंकारो यथा—'अयं स रसनोत्कर्षी—' इत्यादि । अत्र शृङ्गारः करुणस्याङ्गम् । एवमन्यत्रापि । प्रकृष्टप्रियत्वात्प्रेयः । यथा मम—

'आमीलितालसविवर्तिततारकाक्षीं
मत्कण्ठबन्धनदरश्लथबाहुवल्लीम्
प्रस्वेदवारिकणिकाचितगण्डबिम्बां
संस्मृत्य तामनिशमेति न शान्तिमन्तः ॥'

विवक्षीणीयत्वात् । उदात्तालंकारमाह—**लोकेति** । लोकानतिशेतेऽतिक्रामतीति या संपत्तिर्धनसमृद्धिस्तस्या वर्णना व्यञ्जनया ज्ञापनम् । अन्यविधमुदात्तालंकारमाह—**यद्वेति** । महतां प्रस्तुतसंबन्धिमहताम् । चरितं महत्त्वप्रतिपादकसाधर्म्यम् । प्रस्तुतमहत्त्वव्यञ्जकप्रस्तुतमहत्त्वसंबन्धिचरितमुदात्तमित्यर्थः । **अधःकृतेति** । यस्यां नगर्यां उरीकरोति स्वीकरोति । प्राप्नोतीति यावत् । अत्र पौराणां समृद्ध्यतिशयो व्यङ्ग्यः । **नाभीति** । नाभेः प्रभिन्नमुत्पन्नमम्बुरुहमासनं यस्य तेन । अमुं समुद्रम् । अत्र प्रस्तुतसमुद्रस्य महत्त्वव्यञ्जकं सर्वलोकसंहारकस्य हरेश्चरितम् । रसवदाद्यलंकारचतुष्टयमाह । **रसभावाविति** । गुणीभूतरसान्तरादीनामुत्कर्षाधायकत्वेनाङ्गत्वम् । रसस्येतराङ्गत्वे रसवत् । भावस्येतराङ्गत्वे प्रेयः । आभासयोरितराङ्गत्वे ऊर्जस्वि । भावप्रशमस्येतराङ्गत्वे समाहितमित्यर्थः । 'न भावहीनोऽस्ति रसः—' इत्युक्तदिशा रसव्यभिचारिभावयोरव्यभिचारेणालंकार्यालंकारभावासंभवात्तयोरङ्गाङ्गिभावेनैतदलंकारप्रसङ्ग इति ध्येयम् । **एवमन्यत्रापीति** । वीरादेः शृङ्गाराद्यङ्गत्वेऽप्युदाहरणान्यूह्यानीत्यर्थः । करुणस्य भावाद्यङ्गत्वे उदाहरणं गुणीभूतव्यङ्ग्यप्रकरणे 'मानोन्नतां प्रणयिनीं—' इत्यादि स्वयमेवोक्तम् । **आमीलितेति** । अलसेन रसा-

अत्र संभोगशृङ्गारः स्मरणाख्यभावस्याङ्गम् । स च विप्रलम्भस्य । ऊर्जो बलम्, आनौचित्यप्रवृत्तौ तदत्रास्तीत्यूर्जस्वि । यथा—

'वनेऽखिलकलासक्ताः परिहृत्य निजस्त्रियः ।
त्वद्वैरिवनितावृन्दे पुलिन्दाः कुर्वते रतिम् ॥'

अत्र शृङ्गाराभासो राजविषयरतिभावस्याङ्गम् । एवं भावाभासोऽपि । समाहितं परीहारः । यथा—

'अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ।
ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात् '

अत्र मदाख्यभावस्य प्रशमो राजविषयरतिभावस्याङ्गम् ।

भावस्य चोदये संधौ मिश्रत्वे च तदाख्यकाः ।

तदाख्यका [1]भावोदयभावसंधिभावशबलनामानोऽलंकाराः । क्रमेणोदाहरणम्—

'मधुपानप्रवृत्तास्ते सुहृद्भिः सह वैरिणः ।
श्रुत्वा कुतोऽपि त्वन्नाम लेभिरे विषमां दशाम् ॥'

अत्र त्रासादयो राजविषयरतिभावस्याङ्गम् ।

'जन्मान्तरीणरमणस्याङ्गसङ्गसमुत्सुका ।
सलज्जा चान्तिके सख्याः पातु नः पार्वती सदा ॥'

अत्रौत्सुक्यलज्जयोश्च संधिर्देवताविषयरतिभावस्याङ्गम् ।

वेशजनितालस्येन विवर्तितं स्थिरीकृतं तारकं यस्य तादृशमक्षि यस्यास्ताम् । मत्कण्ठबन्धने दरश्लथा ईषच्छिथिला बाहुवल्लिर्यस्यास्ताम् । पुलिन्दाः किरातविशेषाः । अत्र परोढाविषयत्वाच्छृङ्गाराभासः । **एवं भावाभासोऽपीति** । भावाभासस्याङ्गत्वेऽपीत्यर्थः । एतदुदाहरणं यथा—'बन्दीकृत्य नृपद्विषां मृगदृशस्ताः पश्यतां प्रेयसीं श्लिष्यन्ति प्रणमन्ति लान्ति परितश्चुम्बन्ति ते सैनिकाः । अस्माकं सुकृतैर्दशोर्निपतितस्यौचित्यवारांनिधे विध्वस्ता विपदोऽखिलास्तदिति तैः प्रत्यर्थिभिः स्तूयसे ॥' अत्र राजविषयरतिभावस्योत्तरार्धद्योत्यो भावः । शत्रुविषयत्वादाभासरूपोऽङ्गम् । अविरलेति तवेक्षणे त्वत्कर्मदर्शने सतीत्यर्थः । भावोदयादीनामलंकारत्रयमाह–**भावस्य चेति** । चकाराद् गुणीभूतत्वमायाति । चेत्यनुवर्तते । अत्रायातीति सप्तम्य-

---

1. **भावोदयेति** । भावस्योदय उद्गमावस्था, संधिर्द्वयोर्विरुद्धयोः स्पर्धित्वेनोपनिबन्धः, शबलता बहूनां पूर्वोपमर्देन निबन्ध इति ॥

---

१. 'अनिशमिति' मुद्रितपुस्तके.

'पश्येत्कश्चिच्चल चपल रे का त्वराहं कुमारी
हस्तालम्बं वितर हहहा व्युत्क्रमः क्वासि यासि ।
इत्थं पृथ्वीपरिवृढ भवद्विद्विषोऽरण्यवृत्तेः
कन्या कंचित्फलकिसलयान्याददानाभिधत्ते ॥'

अत्र शङ्कासूयाधृतिस्मृतिश्रमदैन्यविबाधौत्सुक्यानां शबलता राजविषयरतिभावस्याङ्गम् । इह केचिदाहुः—'वाच्यवाचकरूपालंकरणमुखेन रसाद्युपकारका एवालंकाराः । रसादयस्तु वाच्यवाचकाभ्यामुपकार्या एवेति न तेषामलंकारता भवितुं युक्ता' इति । अन्ये तु—'रसाद्युपकारमात्रेणेहालंकृतिव्यपदेशो भाक्तश्चिरंतनप्रसिद्ध्याङ्गीकार्य एव' इति । अपरे च—'रसाद्युपकारमात्रेणालंकारत्वं मुख्यतो रूपकादौ तु वाच्याद्युपधानम्, अजागलस्तनन्यायेन' इति । अभियुक्तास्तु—'स्वव्यञ्जकवाच्यवाचकाद्युपकृतैरङ्गभूतै रसादिभिरङ्गितो रसादेर्वाच्यवाचकोपस्कारद्वारेणोपकुर्वद्भिरलंकृतिव्यपदेशो लभ्यते । समासोक्तौ तु नायिकादिव्यवहारमात्रस्यैवालंकृतिता, नत्वास्वादस्य, तस्योक्तरीतिविरहात्' इति मन्यन्ते । अत एव ध्वनिकारेणोक्तम्—

'प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः ॥'

न्तमवगन्तव्यम् । योग्यत्वात् । **पश्येदिति** । चल इतोपसर । श्रमभरेण किंचिन्निद्रायिता झटिति चेतनां प्राप्याह—**व्युत्क्रम इति** । वैपरीत्यमित्यर्थः । इदानीं रसवदादीनामलंकारत्वमस्वीकुर्वतां केषांचिन्मतमाह—**इह केचिदिति** । वाच्यवाचकरूपालंकरणमुखेन शब्दार्थस्वरूपशोभाजननद्वारेणेह रसवदादावलंकृतिव्यपदेशोऽलंकारपदप्रयोगो भाक्तो गौणः । चिरंतनप्रसिद्ध्या प्राचीनमतेन । वाच्याद्युपधानं वाच्यवाचकालंकरणम् । **अजागलस्तनन्यायेनेति** । अजागलस्तनो यथा दुग्धानुपयोगी तथा प्रकृतानुपयोगीत्यर्थः । **स्वव्यञ्जकेति** । स्वमङ्गभूतं रसादि तद्व्यञ्जकाभ्यामेव वाच्यवाचकाभ्यामुपकृतैर्न तु प्रधानीभूतरसादिव्यञ्जकाभ्याम् । प्रत्युत स्वव्यञ्जकशब्दार्थघटितत्वेन तयोरुपकारका एवाङ्गरसादयो न तूपकार्याः । एतेन रसादयस्तु वाच्यवाचकाभ्यामुपकार्या एवेति य षणमुक्तं तन्निरस्तम् । नन्वत्र गुणप्रधानभावेनालंकारालंकार्यभाव उपपद्यतां समासोक्तौ तु व्यवहारसमारोपजन्यास्वादस्यालंकारत्वस्वीकारेऽलंकार्याभावात्कथं स उपपद्यत इत्यत आह—**समासोक्तौ त्विति** । व्यवहारमात्रस्य प्रस्तुते वस्तुन्यप्रस्तुतसाधर्म्यारोपमात्रस्य, न तु तज्जन्यास्वादस्य । उक्तरीतिविरहात् वाच्यवाचकालंकारद्वारेण रसाद्युपकारकत्वस्याभावात् । **प्रधान इति** । अन्यत्र रसादौ वाक्यार्थे वा । रसाद्युपकारकत्वमात्रेणालं-

यदि च रसाद्युपकारमात्रेणालंकृतित्वं तदा वाचकादिष्वपि तथा प्रसज्येत । एवं च यच्च कैश्चिदुक्तम्—'रसादीनामङ्गित्वे रसवदाद्यलंकारः । अङ्गत्वे तु द्वितीयोदात्तालंकारः', तदपि परास्तम् ।

यद्येत एवालंकाराः परस्परविमिश्रिताः ॥ ९७ ॥
तदा पृथगलंकारौ संसृष्टिः संकरस्तथा ।

यथा लौकिकालंकाराणामपि परस्परमिश्रणे पृथक्चारुत्वेन पृथगलंकारत्वं तथोक्तरूपाणां काव्यालंकाराणामपि परस्परमिश्रत्वे संसृष्टिसंकराख्यौ पृथगलंकारौ । तत्र

मिथोऽनपेक्षयैतेषां स्थितिः [1]संसृष्टिरुच्यते ॥ ९८ ॥

एतेषां शब्दार्थालंकाराणाम् । यथा—

'देवः पायादपायान्नः सेरेन्दीवरलोचनः ।
संसारध्वान्तविध्वंसहंसः कंसनिषूदनः ॥'

अत्र पायादपायादिति यमकम् । संसारेत्यादौ चानुप्रास इति शब्दालंकारयोः संसृष्टिः । द्वितीये पादे उपमा, द्वितीयार्धे च रूपकमित्यर्थालंकारयोः संसृष्टिः । एवमुभयोः स्थितत्वाच्छब्दार्थालंकारसंसृष्टिः ।

कारत्वं मुख्यत इति प्रागुक्तमपरेषां मतं दूषयति—**यदीति । एवं चेति ।** उक्तरीतिविरहादित्यर्थः । प्रत्येकमलंकारानुक्तौ तेषां मेलके संसृष्टिसंकरालंकारावाह—**यद्येत इति ।** एते उक्ताऽयमकोपमादयः परस्परविमिश्रिता एकस्मिन्पद्ये गद्ये वा स्थिताः । तयोः सामान्यलक्षणमुक्त्वा विशेषलक्षणमाह—**मिथ इति ।** परस्परव्यपेक्षाविरहेणेत्यर्थः । स्थितिरेकस्मिन्पद्ये गद्ये वा शब्दालंकाराणामर्थालंकाराणामुभयेषां च परस्परानपेक्षया स्थित्या त्रिविधा संसृष्टिः । आद्या यथा—'चारुचन्द्रमसं भीरु बिम्बं पश्येदमम्बरे । मन्मनो मन्मथाक्रान्तं निर्दयं हन्तुमुद्यतम् ॥' अत्र प्रथमार्धे उपमा, द्वितीयार्धेऽनुप्रासः, तृतीयपादे यमकम् । द्वितीया यथा—'द्विषद्भयत्रायतां देवः फुल्लेन्दीवरलोचनः । भवान्धकारसंक्षोभरविः केशिनिषूदनः ॥' अत्र प्रथमार्धे उपमा द्वितीयार्धे रूपकम् । उभयसंसृष्टिर्द्विविधा—शुद्धा, संसृष्टिमिश्रा च । आद्या यथा—'त्वयि वीर परं विराजते दमयन्तीकिलकिञ्चितं किल । तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम् ॥' अत्र यमकानुप्रासाभ्यां शब्दालंकाराभ्यां सह प्रतिवस्तूपमाया अर्थालंकारस्य संसृष्टिः । एकस्मिन्नेव पद्ये चतुर्विधां संसृष्टिमुदाहरति—**देव इति ।** हंसः सूर्यः । **एवमिति ।** शब्दालंकारयोरर्थालंकारयोश्च स्वजातीयत्वेना-

---

1. **संसृष्टिरिति ।** तिलतण्डुलन्यायेन स्फुटावगम्यभेदालंकारमिश्रणे संसृष्टिरिति । सैषा शब्दालंकारगतत्वेनार्थालंकारगतत्वेनोभयालंकारगतत्वेन च त्रिधा भिद्यते ॥

अङ्गाङ्गित्वेऽलंकृतीनां तद्वदेकाश्रयस्थितौ ।
संदिग्धत्वे च भवति संकरस्त्रिविधः पुनः ॥ ९९ ॥

अङ्गाङ्गिभावो यथा—

'आकृष्टिवेगविगलद्भुजगेन्द्रभोग-
निर्मोकपट्टपरिवेष्टनयाम्बुराशेः ।
मन्थव्यथाव्युपशमार्थमिवाशु यस्य
मन्दाकिनी चिरमवेष्टत पादमूले ॥'

अत्र निर्मोकपट्टापह्नवेन मन्दाकिन्या आरोप इत्यपह्नुतिः । सा च मन्दाकिन्या वस्तुवृत्तेन यत्पादमूलवेष्टनं तच्चरणमूलवेष्टनमिति श्लेषमुत्थापयतीति तस्याङ्गम् । श्लेषश्च पादमूलवेष्टनमेव । चरणमूलवेष्टनमित्यतिशयोक्तेरङ्गम् । अतिशयोक्तिश्च मन्थव्यथाव्युपशमार्थमिवेत्युत्प्रेक्षाया अङ्गम् । उत्प्रेक्षा चाम्बुराशिमन्दाकिन्योर्नायकनायिकाव्यवहारं गमयतीति समासोक्तेरङ्गम् ।

यथा वा—

'अनुरागवती संध्या दिवसस्तत्पुरःसरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ॥'

न्तरङ्गतया संसृष्टीभूय वैचित्र्यविशेषं जनयित्वा संसृष्टित्वेनाप्यतिरिक्तवैचित्र्यजनकत्वमिति भावः । **अङ्गाङ्गित्वे इति** । गुणप्रधानभावे इत्यर्थः । एकाश्रयस्थितौ एकस्मिन्पादे पदे वा स्थितौ । **आकृष्टीति** । समुद्रमन्थनसमये देवादीनामाकर्षणवेगेन विगलन् यो भुजगेन्द्रभोगस्य वासुकिदेहस्य निर्मोकपट्टस्त्यक्तचर्मपट्टः तद्वेष्टनया । तद्वेष्टनच्छलेनेत्यर्थः । पादमूले एकदेशे । पक्षे—चरणसमीपे । अवेष्टत [1]अवहत् । पक्षे—संनाहक्रियावत्यतिष्ठत् । अङ्गाङ्गिभावमुपपादयति—**अत्रेति** । सा च अपह्नुतिश्च । वस्तुवृत्तेन वस्तुगत्या । 'नायकनायिका' इति पाठे नायकेन सहिता नायिका नायकनायिका । द्वन्द्वविषय एकशेषप्राप्तेः । **अनुरागेति** । अनुरागो लौहित्यम्, सुरताभिलाषश्च । संदेहसंकरातिरिक्तस्थले एकाश्रयस्थितेर्विषयो भविष्यतीति चरमो-

---

1. **संकर इति** । नीरक्षीरन्यायेनास्फुटभेदालंकारमिश्रणे संकरः । स एषोऽङ्गाङ्गिभावेन संदेहेनैकाश्रयानुप्रवेशेन च त्रिविधः ॥

---

१. 'अहरत्' इति मुद्रितपुस्तके.

अत्र समासोक्तिर्विशेषोक्तेरङ्गम् । संदेहसंकरो यथा—

'इदमाभाति गगने भिन्दानं संततं तमः ।
अमन्दनयनानन्दकरं मण्डलमैन्दवम् ॥'

अत्र किं मुखस्य चन्द्रतयाध्यवसानादतिशयोक्तिः, उत इदमिदमिति मुखं निर्दिश्य चन्द्रत्वारोपान्मुखम्, अथवा इदमिति मुखस्य चन्द्रमण्डलस्य च द्वयोरपि प्रकृतयोरेकधर्माभिसंबन्धात्तुल्ययोगिता, आहोस्विच्चन्द्रस्याप्रकृतत्वाद्दीपकम्, किं वा विशेषणसाम्यादप्रस्तुतस्य मुखस्य गम्यत्वात्समासोक्तिः, यद्वाप्रस्तुतचन्द्रवर्णनया प्रस्तुतस्य मुखस्यावगतिरित्यप्रस्तुतप्रशंसा, यद्वा मन्मथोद्दीपनः कालः स्वकार्यभूतचन्द्रवर्णनामुखेन वर्णित इति पर्यायोक्तिरिति बहूनामलंकाराणां संदेहात्संदेहसंकरः ।

यथा वा—'मुखचन्द्रं पश्यामि' इत्यत्र किं मुखं चन्द्र इत्युपमा, उत चन्द्र एवेति रूपकमिति संदेहः । साधकबाधकयोर्द्वयोरेकतरस्य सद्भावे न पुनः संदेहः । यथा—'मुखचन्द्रं चुम्बति' इत्यत्र चुम्बनं मुखस्यानुकूलमित्युपमायाः साधकम् । चन्द्रस्य तु प्रतिकूलमिति रूपकस्य बाधकम् । 'मुखचन्द्रः प्रकाशते' इत्यत्र प्रकाशाख्यो धर्मो रूपकस्य साधको मुखे उपचरितत्वेन संभवतीति नोपमाबाधकः ।

'राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम् ।'

अत्र योषित आलिङ्गनं नायकस्य सदृशेनोचितमिति लक्ष्म्यालिङ्गनस्य राजन्यसंभवादुपमाबाधकम्, नारायणे संभवाद्रूपकम् । एवम्—

'वदनाम्बुजमेणाक्ष्या भाति चञ्चललोचनम् ।'

अत्र वदने लोचनस्य संभवादुपमायाः साधकता, अम्बुजे चासंभवाद्रूपकस्य बाधकता । एवं 'सुन्दरं वदनाम्बुजम्' इत्यादौ साधारणधर्मप्रयोगे 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति वचनादुपमा-

---

क्तमपि संदेहसंकरं प्रथमं दर्शयति—**इदमिति** । संततं सम्यग्व्याप्तम् । पक्षे—संततं तमः स्मरकृताज्ञानं भिन्दानम् । 'इदमाभाति वदनं' इति पाठो न रमणीयः । विषयस्य निगरणाभावादतिशयोक्तेरसंभवापत्तेः, इदमिति मुखं निर्दिश्येति निर्वचनासंगतिप्रसङ्गाच्च । 'वदनम्' इत्यत्र 'गगनम्' इति पाठोऽपि न सुन्दरः । अव्याव-

समासो न संभवतीत्युपमाया बाधकः । एवं चात्र मयूरव्यंसकादित्वाद्रूपकसमास एव । एकाश्रयानुप्रवेशो यथा मम—

'कटाक्षेणापीषत्क्षणमपि निरीक्षेत यदि सा
तदानन्दः सान्द्रः स्फुरति पिहिताशेषविषयः ।
सरोमाञ्चोदञ्चत्कुचकलशनिर्भिन्नवसनः
परीरम्भारम्भः क इव भवितास्मोरुहदृशः ॥'

अत्र कटाक्षेणापीषत्क्षणमपीत्यत्र च्छेकानुप्रासस्य निरीक्षेतेत्यत्र क्षकारमादाय वृत्त्यनुप्रासस्य चैकाश्रयेऽनुप्रवेशः । एवं चात्रैवानुप्रासार्थापत्त्यलंकारयोः । यथा वा—'संसारध्वान्तविध्वंस—' इत्यत्र रूपकानुप्रासयोः । यथा वा—'कुरबका[1] रवकारणतां ययुः' इत्यत्र रबका रवका इत्येकं बकार-वकार इत्येकमिति यमकयोः ।

यथा वा—

'अहिणअपओअरसिएसु पहिअसामाइएसु दिअहेसु ।
रहसपसारिअगीआणं णच्चिअं मोरविन्दाणम् ॥'

र्तकत्वात् । तस्मात् 'इदमाभाति रुचिरम्' इति पाठो रुचिरः । **कटाक्षेणापीति** । सान्द्रादिविशेषणद्वयेन आनन्दस्य ब्रह्मानन्दसदृशत्वं प्रतीयते । सरोमाञ्चादुदञ्चद् उच्चात् कुचकलशान्निर्भिन्नं विगलितं वसनं यत्र सः । **क इवेति** । निरुपम इत्यर्थः । कटाक्षेणापीषत्क्षणमपीति वर्णद्वयघटितस्य क्षकारस्य क्रमस्वरूपाभ्यां सकृत्साम्याच्छेकानुप्रासः । पश्चान्निरीक्षेतेति क्षकारमादाय क्रमस्वरूपाभ्यामसकृत्साम्यसंभवाद्वृत्त्यनुप्रासः । एवं चतुर्थपादेऽपि मकारभकारघटितवर्णपिण्डस्य च्छेकवृत्त्यनुप्रासौ वेदितव्यौ । एकपदे संकरमाह—**अहिणअ इति** । अभिनवपयोधरसितेषु पथिक-

---

1. **कुरबका इति** । 'विरचिता मधुनोपवनश्रियामभिनवा इव पत्रविशेषकाः । मधुलिहां मधुदानविशारदाः—' इत्यवशिष्टा पादत्रयी । अर्थालंकारविषयाणां कुवलयानन्दादिषु सूपपादितत्वादिह तद्गतविशेषो न न्यासीति शिवम् ॥'

श्रीमानुदारचरितः श्रुतपारदृश्वा जागर्ति भूसुरशशी सरयूप्रसादः ।
यश्च व्यधाज्जयपुरेन्द्रसमाश्रयेण निर्मत्सरान्तरतमोभिदुरान्निबन्धान् ॥
तस्मादजायत महेश्वरपादसेवी दुर्गाप्रसाद इति शास्त्रनिविष्टचेताः ।
यश्चाधुना जयपुरे गणिते सगोले व्युत्पादयन्द्विजवटून्समयाकरोति ॥
तेनेयं दर्पणच्छाया विहिता सारसंहतिः ।
यदत्र कुकृतं तत्तु सुकृतं कुरुतानघाः ॥

इत्ययोध्यापरप्रान्तवर्तिपण्डितपुरीवास्तव्यद्विवेदोपाख्याचार्यश्रीसरयूप्रसादसुतदुर्गाप्रसादविरचिता साहित्यदर्पणच्छाया ब्रह्मार्पणं भवतु ॥

अत्र 'पहिअसामाइएसु' इत्येकाश्रये पथिकश्यामायितेत्युपमा । पथिकसामाजिकेष्विति रूपकं प्रविष्टमिति ।

श्रीचन्द्रशेखरमहाकविचन्द्रसूनु-
श्रीविश्वनाथकविराजकृतं प्रबन्धम् ।
साहित्यदर्पणममुं सुधियो विलोक्य
साहित्यतत्त्वमखिलं सुखमेव वित्त ॥ १०० ॥

यावत्प्रसन्नेन्दुनिभानना श्रीर्नारायणस्याङ्कमलंकरोति ।
तावन्मनः संमदयन्कवीनामेष प्रबन्धः प्रथितोऽस्तु लोके ॥१०१॥

इत्यालंकारिकचक्रवर्तिसांधिविग्रहिकमहापात्रश्रीविश्वनाथकविराजकृते साहित्यदर्पणे दशमः परिच्छेदः ।

समाप्तश्चायं प्रबन्धः ।

श्यामायितेषु दिवसेषु । रभसप्रसारितग्रीवाणां नृत्यं मयूरवृन्दानाम् ॥' इति संस्कृतम् । महति उत्सवायते । पथिकानां प्रियाविरहदुःखेन श्यामत्वम्, दिवसानां मेघेनेत्युपमा । पक्षे—पथिका एव सामाजिकास्तेषु नाट्यदर्शनेन सामाजिकानामुत्सवो भवतीति रूपणम् । पथिकानां मयूरनृत्यं सुखदं न भवतीति महतीत्युक्तम् । वस्तुतस्तु 'मुखचन्द्रं पश्यामि' इत्यादौ यथा समासद्वयसंभवात्संदेहः, तथेहापि 'पहिअसामाइएसु' इति प्राकृतयोनिशब्दद्वयसंभवात्संदेह एवेत्यवधेयम् । एवं चैकपदवृत्तिसंकरस्योदाहरणम् 'संसारध्वान्तविध्वंसहंसः' इत्याद्यवगन्तव्यम् । यथा वा—'मनो विद्धं सरोजाक्षीस्मरशक्त्या सुनिर्भरम् । सा चेद्विसृजते गाढं स्वास्थ्य मालम्बते खलु ॥' इत्याद्युदाहरणमुन्नेयमिति ॥

अक्षिपक्षरसचन्द्र (१६२२) संमिते हायने शकवसुंधरापतेः ।
श्रीलरामचरणाग्रजन्मना दर्पणस्य विवृतिः प्रकाशिता ॥
दोषं कंचन वीक्ष्य सूक्ष्ममतयो द्विन्नाः शपन्त्यत्र चे-
त्तन्मां न व्यथयेद्गुरोरपि गिरो निर्दूषणा दुर्वचाः ।
छात्राणां मतिमादधाति यदसौ गूढार्थसंदीपना-
दानन्दं वितनोति यद्गुणवतां तेनास्म्यमोघश्रमः ॥[1]


इति श्रीरामचरणतर्कवागीशभट्टाचार्यविरचितायां साहित्यदर्पणविवृतौ दशमः प्रकाशः ।

---


१. 'मन्मानसाम्बुजद्वन्द्वं सेव्यमानं मुनीश्वरैः । वाञ्छाकल्पतरुं वन्दे रामचन्द्रपदद्वयम् ॥' इत्यधिकं पुस्तकान्तरे.


साहित्यदर्पणभूमिकायां २१-२२ पृष्ठयोर्वर्णितानां

चित्रबन्धानामाकाराः




धनुर्बन्धः।





शरबन्धः।
शूलबन्धः।
द्र
स
बीं
न्न
दे
म
क
लो
षं
रु
प
ना
न
मा
सा
ग
ला
दा
गं
ता
मू
हि
वा
स्तु
ष्या
शि
तां
सि
व
दे
श
टे
कू
क
लौं
सूं
स्वा
स
ज
रा
भो
मु
मा


शक्तिबन्धः।




हलबन्धः।




अष्टभिश्चक्रबन्धः।



पद्मबन्धः। (पृ. ४६९)



मुरजबन्धः। (पृ. ४७०)



साहित्यदर्पणस्योदाहरणश्लोकानामकाराद्यनुक्रमणिका ।

अ	पृष्ठम्	पङ्क्तिः.
अकलङ्कं मुखं तस्याः...	५२४ ।	१७
अकस्मादेव तन्वङ्गि ...	१३१ ।	१५
[1]अङ्गानि खेदयसि ...	३२४ ।	१२
[2]अर्घ्यमर्घ्यमिति ...	१४१ ।	५
अचला अबला वा स्युः	३९३ ।	३
[3]अजस्य गृह्णतो जन्म...	५५० ।	१२
अजायत रतिस्तस्याः...	३९७ ।	१९
अत्ता एत्थ निमज्जइ...	१७ ।	१
[4]अत्युन्नतस्तनमुरो नयने	१०६ ।	४
अत्युन्नतस्तनयुगा- ...	२२६ ।	३
[5]अत्रान्तरे किमपि वाक्	१२६ ।	२
[6]अत्रासीत्फणिपाशबन्ध-	३३० ।	१७
अत्रास्मार्षमुपाध्याय...	४१० ।	७
[7]अथ तत्र पाण्डुतनयेन	१५३ ।	८
[8]अद्य प्रचण्डभुजदण्ड-	३४२ ।	५
अद्यापि देहि वैदेहीं...	३३१ ।	३
अद्यापि स्तनशैल ...	३८९ ।	२
अधःकृताम्भोधरमण्डलानां	५७६ ।	४
[9]अधरः किसलयरागः	३१९ ।	६
अधरे करजक्षतं ...	३९४ ।	१
[10]अध्यासितुं तव चिरात्	३४२ ।	११
अनङ्गमङ्गलभुवः ...	४२७ ।	३
[11]अनलंकृतोऽपि सुन्दर...	१०९ ।	६
अनन्यसाधारणधीर्धृता	२१५ ।	३
अनणुरणन्मणिमेखलं	४०३ ।	८

	पृष्ठम्	पङ्क्तिः.
अनायासकृशं मध्यं ...	५४९ ।	६
अनुयान्त्या जनातीतं	३१८ ।	२
,, ...	५२८ ।	७
अनुरागवती संध्या ...	५८० ।	१५
[12]अनुरागवन्तमपि ...	४०४ ।	४
[13]अनुलेपनानि कुसुमानि	५१८ ।	१०
अनातपत्रोऽप्ययमत्र	५७५ ।	७
अनेन छिन्दता मातुः	३८४ ।	४
[14]अनेन पर्यासयता- ...	५४० ।	१४
अनेन लोकगुरुणा ...	२३३ ।	१
अन्तःपुरीयसि रणेषु...	४८१ ।	३
अन्तश्छिद्राणि भूयांसि	५३९ ।	२
[15]आन्तिकगतमपि मासिय-	१३४ ।	१२
अन्यदेवाङ्गलावण्य-...	५१६ ।	१३
[16]अन्यासु तावदुपमर्दसहासु	१५५ ।	३
अन्यास्ता गुणरत्नरोहण-	४१५ ।	६
,, ...	३८१ ।	३
[17]अप्रियाणि करोत्वेष वाचा	३०१ ।	११
[18]अभ्युन्नता पुरस्तादवगाढा	२८९ ।	७
अमितः समितः प्राप्तैः	२०४ ।	९
अमुक्ता भवता नाथ	३६६ ।	९
अयि मयि मानिनि मा कुरु	३८० ।	१
अयमुदयति मुद्राभञ्जनः	४४१ ।	१०
अयं मार्तण्डः किम् ...	५०१ ।	३
अयं रत्नाकरोऽम्भोधि-	५५३ ।	१२

१. चन्द्रकलायाम् । २. कालिदासस्य रघुवंशे । ३. कालिदासस्य कुमारसंभवे । ४. धनिकस्य । ५. भवभूतेर्मालतीमाधवे । ६. बालरामायणे । ७. माघस्य शिशुपालवधे । ८. प्रभावत्याम् । ९. कालिदासस्याभिज्ञानशाकुन्तले । १०. भट्टनारायणस्य वेणीसंहारे । ११. विश्वनाथस्य । १२. शिशुपालवधे । १३. शिशुपालवधे । १४. रघुवंशे । १५. विश्वनाथस्य । १६. विकटनितम्बायाः । १७. वेणीसंहारे । १८. अभिज्ञानशाकुन्तले ।

	पृ.	प.
[1]अयं स रशनोत्कर्षी...	२२८।	६
,, ...	४१७।	९
अयं सर्वाणि शास्त्राणि	४५८।	६
अरविन्दमिदं वीक्ष्य...	४९१।	१३
अरातिविक्रमालोक-...	४८५।	७
अरुणे च तरुणि नयने	५६७।	१२
[3]अलमलमतिमात्रं साहसेन	२७३।	३
[4]अलं स्थित्वा श्मशानेऽस्मिन्	२२०।	२
अलिकुलमञ्जुलकेशी ...	३४३।	११
[5]अलिअपसुत्तअ ...	१६७।	५
[6]अविदितगुणापि ...	५२१।	७
अविरलकरवालकम्पनैः	५७७।	७
अव्यूढाङ्गमरूढपाणि-	४३४।	५
[8]अशक्नुवन्सोढुमधीरलोचनः	१९४।	२
[9]अश्रुच्छलेन सुदृशो ...	५१२।	१३
अश्वत्थामा हत इति...	२९३।	७
[10]असमाप्तजिगीषस्य ...	५२९।	८
[11]असावन्तश्चद्विकच-	३२१।	९
[12]असंभृतं मण्डनमङ्गयष्टेः	१२३।	५
[13]असंशयं क्षत्रपरिग्रहक्षमा	१५१।	७
[13]अस्माकं सखि वाससी	९४।	११
अस्य राज्ञो गृहे भान्ति	४८९।	१२
[14]अस्य वक्षः क्षणेनैव ...	३२८।	८
,, ...	३४२।	२
[15]अस्याः सर्गविधौ प्रजापति	५१६।	१६
[16]अहमेव मतो महीपतेः	१००।	८
अहमेव गुरुः सुदारुणानाम्	५६९।	११
[17]अहिणअपओअरसिएसु	५८२।	१३

आ

आकृष्टवेगविगलद् ...	५८०।	४
आक्षिपन्त्यरविन्दानि	३१७।	५
आचरति दुर्जनो यत्	४१५।	२
अतिगूढगुणायाश्च ...	५२५।	५
आत्मा जानाति यत्पापम्	३७२।	८
आदाय बकुलगन्धान्	४४७।	५
[18]आदित्योऽयं स्थितो मूढाः	२२०।	८
आनन्दममन्दमिमम्...	५५३।	९
आनन्दयति ते नेत्रे...	३७१।	८
आनन्दयति ते नेत्रे योऽधुना	३७२।	३
आनन्दितखपक्षोऽसौ	३९६।	१३
[19]आनन्दाय च विस्मयाय च	३०९।	६
[20]आपतन्तममुं दूरा-...	२०६।	१२
आपातसरसे भोगे ...	३९५।	११
[21]आमीलितालसविवर्ति-	५७६।	१४
आवर्त एव नाभिस्ते...	३९५।	६
आशीःपरम्परां वन्द्यां	३६३।	७
[22]आश्लिष्टभूमिं रसितारमुच्चैः	१४६।	४
[23]आसमुद्रक्षितीशानाम्	३५६।	५
आसादितप्रकटनिर्मल--	२६६।	८
आसीदञ्जनमत्रेति ...	५७४।	९
आहवे जगदुद्दण्ड-- ...	४९३।	१०
आहारे विरतिः समस्त--	२२२।	६
आहूतस्याभिषेकाय ...	१०१।	४
[24]आहूतेषु विहङ्गमेषु ...	४०४।	७

१. श्रीमहाभारते द्रोणपर्वणि। २. श्रीहर्षदेवस्य रत्नावल्याम्। ३. श्रीमहाभारते द्रोणपर्वणि। ४. गाथासप्तशत्याम्। ५. सुबन्धोर्वासवदत्तायाम्। ६. शिशुपालवधे। ७. विश्वनाथस्य। ८. वेणीसंहारे। ९. कल्हणस्य राजतरङ्गिण्याम्। १०. विश्वनाथस्य चन्द्रकलायाम्। ११. कुमारसंभवे। १२. अभिज्ञानशाकुन्तले। १३. रुद्रस्य शृङ्गारतिलके। १४. प्रभावत्याम्। १५. विक्रमोर्वश्याम्। १६. रघुवंशे। १७. गाथासप्तशत्याम्। १८. श्रीमहाभारते द्रोणपर्वणि। १९. महावीरचरिते। २०. शिशुपालवधे। २१. विश्वनाथस्य। २२. शिशुपालवधे। २३. रघुवंशे। २४. भल्लटशतके।

	पृ.	प.
आज्ञा शक्रशिखामणि-	३९४।	११
इ		
[1]इति गदितवती रुषा ...	१२०।	५
[2]इत्थमाराध्यमानोऽपि	५४३।	४
[3]इदं किलाव्याजमनोहरं वपुः	३२०।	३
,, ...	५२२।	२१
इदमाभाति गगने ...	५८१।	२
[4]इदं वक्त्रं साक्षात् ...	४९८।	३
इन्दुर्विभाति कर्पूरगौरैः	३८२।	८
इन्दुर्विभाति यस्तेन ...	३७३।	९
इन्दुर्लिप्त इवाञ्जनेन ...	५३६।	१६
इन्द्रजिच्चण्डवीर्योऽसि	३२९।	४
[5]इयं स्वर्गाधिनाथस्य ...	३१८।	८
इह पुरोऽनिलकम्पित-	५०६।	३
इहैव त्वं तिष्ठ द्रुतम् ...	५५७।	६
ई		
ईक्षसे यत्कटाक्षेण ...	३८३।	१२
उ		
[6]उँअ निच्चलनिप्पन्दा	६२।	४
[7]उत्कृत्योत्कृत्य कृत्तिम्...	४०६।	८
,, ...	१८२।	१७
उत्क्षिप्त करकङ्कणद्वयमिदम्	११४।	१६
उतिष्ठ दूति यामो ...	११६।	१३
उत्फुल्लकमलकेसर- ...	३३३।	१३
[8]उत्साहातिशयं वत्स ...	२८७।	१७
उदन्वच्छिन्ना भूः ...	३८७।	६
[9]उदेति पूर्वं कुसुमं ततः फलम्	३२५।	११
उदेति सविता ताम्रः...	३८६।	३
,, ...	४०८।	१३
[10]उद्दामोत्कलिकाविपाण्डुर	२७४।	१७
उद्यत्कमललौहित्यैः ...	३६९।	७
[11]उन्नमितैकभ्रूलत- ...	२९४।	९
उन्मज्जज्जलकुञ्जरेन्द्र-	४३१।	१
उन्मीलन्मधुगन्धलुब्ध-	४४७।	१४
उन्मीलन्ति नखैर्लुनीहि	५६०।	३
उपकृतं बहु तत्र किमुच्यते	४०।	७
उपदिशति कामिनीनां	४९।	२
उर्व्यसावत्र तर्वाली ...	३८२।	६
उवाच मधुरां वाचं ...	३७८।	७
उवाच मधुरं धीमान्	३७८।	१०
ऊ		
ऊरुः कुरङ्गकदृशश्चञ्चल-	५०८।	७
ए		
एकं ध्याननिमीलनात्	४१८।	७
एकः कपोतपोतः शतशः	५३८।	४
[12]एकस्मिञ्शयने पराङ्मुखतया	१६८।	४
[13]एकस्यैव विपाकोऽयम्	२९५।	१६
[14]एकत्रासनसंस्थितिः ...	१०८।	१५
[15]एतद्विभाति चरमाचल-	५०५।	९
एवमुक्तो मन्त्रिमुख्यैः	३८५।	१२
[16]एवंवादिनि देवर्षौ ...	१४८।	१४
एष दुश्यवनं नौमि ...	४२२।	७
एष मूर्तो यथा धर्मः...	४०१।	१३
[17]एसा कुडिलधणेण ...	१५४।	२
एसो ससहरबिम्बो ...	४११।	३
ऐ		
ऐन्द्रं धनुः पाण्डुपयोधरेण	५३२।	५
ऐशस्य धनुषो भङ्गम्...	३९४।	४
ओ		
ओवट्टइ उल्लट्टइ ...	३७७।	२

१. बालरामायणे। २. शिशुपालवधे। ३. कुमारसंभवे। ४. अभिज्ञानशाकुन्तले। ५. विश्वनाथस्य। ६. ययातिविजये। ७. सातवाहनस्य गाथासप्तशत्याम्। ८. मालतीमाधवे। ९. बालचरिते। १०. अभिज्ञानशाकुन्तले। ११. रत्नावल्याम्। १२. अभिज्ञानशाकुन्तले। १३. अमरुशतके। १४. वेणीसंहारे। १५. अमरुशतके; सुभाषितावलौ तु पुलिनस्य। १६. विश्वनाथस्य। १७. कुमारसंभवे। १८. विश्वनाथस्य।

	पृ.	प.
औ		
[1]औत्सुक्येन कृतत्वरा...	४१६।	१३
क		
[2]कटाक्षेणापीषत् ...	५८२।	३
कटिस्ते हरते मनः ...	३६३।	२
[3]कथमुपरि कलापिनः...	५१६।	३
कथमीक्षे कुरङ्गाक्षीं ...	१६४।	४
[4]कदली कदली करभः करभः	१९९।	९
कदा वाराणस्यामिह...	१८६।	९
कपोलफलकावस्याः ...	५०९।	७
कपोले जानक्याः करिकलभ	४२१।	३
कमलालिङ्गितस्तारहार-	४०२।	६
कमले चरणाघातं ...	३६४।	२
कमलेव मतिर्मतिरिव	४९१।	८
[5]कमलेण विअसिएण...	१५६।	२
[6]कर्ता द्यूतच्छलानां जतुमय	३४१।	५
कर्पूरखण्ड इव राजति	४०१।	३
[7]करमुदयमहीधरस्तनाग्रे	१३६।	११
,, ...	४९६।	१४
करिहस्तेन संबाधे ...	४०६।	१२
कलयति कुवलयमाला	५२२।	१०
कलुषं च तवाहितेष्वकस्मात्	५६८।	१
कस्स व ण होइ रोसो	२४५।	१०
कान्तास्त एव भुवनत्रितयेऽपि	१९२।	१०
[8]कान्ते तथा कथमपि...	१०४।	११
कानने सरिदुद्देशे ...	५५६।	९
[9]काप्यभिख्या तयोरासीत्	४०२।	१३
[10]कामं प्रिया न सुलभा	२८९।	३
कार्तार्थ्यं यातु तन्वङ्गी	३६१।	१४
[11]कालरात्रिकरालेयं ...	३३०।	३
कालान्तककरालास्यं ..	२९६।	११
काले कोकिलवाचाले...	४५६।	१
[12]कोलो मधुः कुपित एष च	५९।	१०
काले वारिधराणाम् ...	५०५।	१९
का विसमा देव्वगई...	५६४।	१
[13]किं करोषि करोपान्ते	३५२।	१६
[14]किं तावत्सरसि सरोजमेतत्	५०१।	१०
[15]किं तारुण्यतरोरियं...	५००।	११
किं देव्या न विचु-...	३२७।	१७
[16]किं भूषणं सुदृढ-...	५६२।	८
किमधिकमस्य ब्रूमो ...	५५५।	७
किमाराध्यं सदा पुण्यं	५६३।	१
किरणा हरिणाङ्कस्य ...	४५७।	७
[17]किं रुद्धा प्रियया कया	११८।	२
[18]किं शीकरैः क्रमविमर्दिभि-	३२३।	५
[19]किसलयमिव मुग्धं...	१५५।	११
कुञ्जं हन्ति कृशोदरी	३७५।	६
कुपितास्य यदा तन्वि...	५४६।	११
कुर्या हरस्यापि ...	३७८।	१
[20]कुर्वन्त्याहाहतानां ...	२९८।	१२
कुमारस्ते नराधीश ...	३९३।	१
कूजन्ति कोकिलाः ...	४७१।	६
कृतप्रवृत्ति	३६९।	५
[21]कृतमनुकृतं	१७८।	१२
[22]कृत्वा दीने निपीडनां...	१५४।	८
[23]कृष्टा केशेषु भार्या ...	२९७।	६
के द्रुमास्ते क्व वा ग्रामे	१३०।	१५
के यूयं स्थल एव संप्रति	४५५।	५

१. रत्नावल्याम्। २. विश्वनाथस्य। ३. विश्वनाथस्य। ४. जयदेवस्य प्रसन्नराघवे। ५. विश्वनाथस्य। ६. वेणीसंहारे। ७. विश्वनाथस्य। ८. शृङ्गारतिलके। ९. रघुवंशे। १०. अभिज्ञानशाकुन्तले। ११. बालरामायणे। १२. विश्वनाथस्य। १३. विश्वनाथस्य। १४ शिशुपालवधे। १५. बन्धोः। १६. बकस्य। १७. शृङ्गारतिलके। १८. अभिज्ञानशाकुन्तले। १९. उत्तररामचरिते। २० वेणीसंहारे। २१. वेणीसंहारे। २२. विश्वनाथस्य। २३. वेणीसंहारे।

	पृ.	प.
केशः काशः स्तबकविकासः	४४९ ।	५
कोऽत्र भूमिवलये ...	५२२ ।	३
कोकिलोऽहं भवान्काकः	५३८ ।	१४
[1]क्रूरग्रहः सकेतुश्चन्द्र–	२६९ ।	२
[2]क्वचित्ताम्बूलाक्तः ...	१०६ ।	९
[3]क्व सूर्यप्रभवो वंशः ...	५२३ ।	९
[4]क्व वनं तरुवल्कभूषणं	५५३ ।	१६
[5]क्वाकार्यं शशलक्ष्मणः...	१९६ ।	२
...	४१७ ।	४
क्षात्रधर्मोचितैर्धर्मैः ...	३१९ ।	१२
[6]क्षिपसि शुकं वृषदंशक–	५२३ ।	१७
[7]क्षिप्तो हस्तावलग्नः ...	४१८ ।	१२
क्षीर्णः क्षीणोऽपि शशी	५२५ ।	९
क्षीरोदजावसतिजन्म–	३६५ ।	२
[8]क्षेमं ते ननु पक्ष्मलाक्षि	१७४ ।	८
ख		
खड्गः क्ष्मासौविदल्लः ...	४९६ ।	९
ग		
गङ्गाम्भसि सुरत्राण–...	५०९ ।	१
[9]गच्छ गच्छसि चेत्कान्त–	५४८ ।	९
गच्छामीति मयोक्तया	५३७ ।	३
गता निशा इमा बाले	३७७ ।	६
गर्दभति श्रुतिपरुषं ...	४८४ ।	८
[10]गमनमलसं शून्या दृष्टिः	३०८ ।	४
गाङ्गमम्बु सितमम्बु ...	५७१ ।	६
गाढकान्तदशनक्षतव्यथा	२०७ ।	३
[11]गाढालिङ्गनवामनीकृत–	४०१ ।	२१
[12]गाण्डीवीकनकशिला–	३७५ ।	८
गाम्भीर्येण समुद्रोऽसि	५०४ ।	१२

	पृ.	प.
गीतेषु कर्णमादत्ते ...	३६५ ।	७
[13]गुरुतरकलनूपुरानुनादं	१२९ ।	४
गुरुपरतन्त्रतया बत...	६३ ।	६
[14]गुरोर्गिरः पञ्चदिनान्यधीत्य	१७६ ।	४
ग्रभामि काव्यशशिनं...	४०० ।	९
[15]गृहीतं येनासीः ...	३९२ ।	१२
[16]गृहिणी सचिवः सखां	५५६ ।	११
[17]गृह्यता भर्जितमिदं ...	२९३ ।	१३
घ		
घटितमिवाञ्जनपुञ्जैः...	५१२ ।	१
घोरो वारिमुचां रवः...	३८८ ।	२
च		
चकोर्य एव चतुराश्चन्द्रिका–	५२१ ।	२
चक्राधिष्ठिततां चक्री...	४०५ ।	२
[18]चञ्चद्भुजभ्रमितचण्ड–	२८६ ।	३
,, ...	४१६ ।	६
चण्डाल इव राजासौ...	४०१ ।	२
चण्डीशचूडाभरण– ...	३९६ ।	१५
चन्द्रं मुञ्च कुरङ्गाक्षी...	३८९ ।	८
चन्द्रायते शुक्लरुचापि	४८९ ।	३
चरणानतकान्तायाः ...	३८५ ।	९
[19]चरणपतनप्रत्याख्यानात्	१९५ ।	७
चलण्डामरचेष्टितः ...	३८२ ।	४
[20]चलापाङ्गां दृष्टिं स्पृशसि	२२१ ।	४
[21]चारुणा स्फुरितेनायं...	३२७ ।	९
चित्रं चित्रमनाकाशे...	४०८ ।	१७
[22]चिन्ताभिः स्तिमितं मनः	१७० ।	१३
चिरं जीवतु ते सूनुः	४०२ ।	१९
[23]चिररतिपरिखेदप्राप्त...	१४५ ।	२

१. विशाखदत्तस्य मुद्राराक्षसे । २. अमरुशतके । ३. रघुवंशे । ४. विश्वनाथस्य । ५. कालिदासस्य विक्रमोर्वश्याम् । ६. विश्वनाथस्य । ७. अमरुशतके । ८. काव्यालंकारे । ९. चन्द्रशेखरस्य । १०. दण्डिनः काव्यादर्शे । ११. मालतीमाधवे । १२. अमरुशतके । १३. भारवेः किरातार्जुनीये । १४. शिशुपालवधे । १५. शङ्खधरस्य लटकमेलके । १६. वेणीसंहारे । १७. रघुवंशे । १८. क्षेमेश्वरस्य चण्डकौशिके । १९. वेणीसंहारे । २०. अमरुशतके । २१. अभिज्ञानशाकुन्तले । २२. अभिज्ञानशाकुन्तले । २३. चन्द्रशेखरस्य । २४. शिशुपालवधे ।

	पृ.	प.
ज		
जह संहरिज्जइ तमो...	३२१ ।	५
जक्षुर्बिसं धृतविकासि	३७८ ।	१५
[1]जगाद वदनच्छद्म ...	५७० ।	१७
[2]जघनस्थलनद्धपत्रवल्ली	१९३ ।	८
[3]जनस्थाने भ्रान्तं ...	२२९ ।	६
जन्मान्तरीणरमणस्याङ्ग–	५७७ ।	१६
[4]जन्मेन्दोर्विमले कुले...	२९८ ।	५
जन्मेदं वन्ध्यतां नीतं	५२३ ।	५
जलकेलितरलकरतल–	२५१ ।	४
[5]ज्वलतु गगने रात्रौ ...	१२५ ।	४
जस्स रणन्ते उरए ...	५३० ।	११
जाता लज्जावती मुग्धा	३९८ ।	२
जानीमहेऽस्या हृदि ...	५४५ ।	१६
[6]जीयन्ते जयिनोऽपि...	३१० ।	११
[7]जुंगोपात्मानमत्रस्तो ...	३६८ ।	४
ज्ञातिप्रीतिर्मनसि ...	२९७ ।	१८
ज्ञाने मौनं क्षमा शक्तौ	५०८ ।	१०
ज्योत्स्ना इव सिता ...	४०२ ।	१२
ज्योत्स्नाचयः पयःपूरः	३८३ ।	१५
ण		
[8]णंवरिअतं जुअजुअलं	१४३ ।	५
त		
ततश्चचार समरे ...	३९३ ।	१०
तत्पश्येयमनङ्गमङ्गल...	३२८ ।	६
[9][10]तदिच्छ सिद्ध्यै कुरु ...	३७४ ।	४
तदङ्गमार्दवं द्रष्टुः ...	५१९ ।	१
[11]तदितथमवादीर्यन्मम	१०७ ।	२०
[12]तदप्राप्तिमहादुःख–...	२१६ ।	७
तद्वक्रं यदि मुद्रिता ...	५६९ ।	३

	पृ.	प.
[13][14]तद्विच्छेदकृशस्य ...	४०५ ।	९
तद्वेशोऽसदृशोऽन्याभिः	४०३ ।	४
[15]तनुस्पर्शादस्या दरमुकुलिते	१३९ ।	२
तन्वङ्ग्याः स्तनयुग्मेन	५०९ ।	१३
[16]तव कितव किमाहितैः	१२० ।	१
तव विरहे मलयमरुत्	५५० ।	८
तव विरहे हरिणाक्षी...	५४७ ।	११
[17]तवास्मि गीतरागेण ...	२६६ ।	१३
तस्य च प्रवयसो जटायुषः	५६१ ।	१७
तस्यास्तद्रूपसौन्दर्यं ...	३४४ ।	४
तस्या मुखेन सदृश ...	४८३ ।	७
तह से झत्ति पउत्ता	१२२ ।	१७
तामिन्दुसुन्दरमुखीं ...	३७३ ।	५
तामुद्वीक्ष्य कुरङ्गाक्षीं...	३९७ ।	१६
[18]तां जानीथाः परिमितकथां	११७ ।	२
[19]तारुण्यस्य विलासः ...	१२३ ।	१५
[20]तिष्ठेत्कोपवशात्प्रभा	४१४ ।	६
[21]तीर्णे भीष्ममहोदधौ	३०० ।	७
तीर्थे त्वदीये गजसेतुबन्धात्	३८८ ।	८
[22]तीव्राभिषङ्गप्रभवेण वृत्ति	१४४ ।	१०
तृष्णापहारी विमलो...	३२१ ।	१५
[23]ते हिमालयमामन्त्र्य	३७७ ।	२
[24]त्वद्वाजिराजिनिर्धूत--	१९० ।	८
,, ...	५४४ ।	७
त्वया तपस्विचाण्डाल	३२७ ।	१३
त्वया सा शोभते तन्वी	५५६ ।	१
त्वयि दृष्टे कुरङ्गाक्ष्याः	५२१ ।	९
त्वयि संगरसंप्राप्ते ...	५५८ ।	४
त्वामस्मि वच्मि विदुषां	२१२ ।	७

१. शिशुपालवधे । २. कविमल्लभल्लाचार्यस्योदारराघवे । ३. वाचस्पतिभट्टस्य । ४. वेणीसंहारे । ५. मालतीमाधवे । ६. उदात्तराघवे । ७. रघुवंशे । ८. वेणीसंहारे । ९. रघुवंशे । १०. विश्वनाथस्य कुवलयाश्वचरिते । ११. कुमारसंभवे । १२. शिशुपालवधे । १३. श्रीविष्णुपुराणे । १४. विश्वनाथस्य । १५. विश्वनाथस्य । १६. शिशुपालवधे । १७. अभिज्ञानशाकुन्तले । १८. कालिदासस्य मेघदूते । १९. विश्वनाथस्य चन्द्रकलायाम् । २०. विक्रमोर्वश्याम् । २१. वेणीसंहारे । २२. कुमारसंभवे । २३. कुमारसंभवे । २४. विश्वनाथस्य ।

	पृ.	प.
[1]त्वामामनन्ति प्रकृतिं...	४०८।	२
[2]त्रस्यन्ती चलशफरी...	१३२।	२
[3]त्रिभागशेषासु निशासु	१६४।	१०
द		
[4]दत्ते सालसमत्परं भुवि	१०३।	४
दत्वा कटाक्षमेणाक्षी...	५६१।	१४
[5]दत्वाभयं सोऽतिरथो...	३२३।	१२
[6]दधद्विद्युल्लेखामिव ...	३०३।	१६
दन्तप्रभापुष्पचिता ...	५३१।	९
[7]दलति हृदयं गाढोद्वेगो	२९९।	११
दलिते उत्पले रक्ते ...	३८१।	१३
[8]दशाननकिरीटेभ्यः ...	२०८।	७
दानं वित्तादृतं ...	५१९।	५
दासे कृतागसि भवेत्	४९६।	२
दिङ्मातङ्गघटाविभक्त	४१५।	१२
दिनं मे त्वयि संप्राप्ते...	३६४।	१०
दिवाकरादक्षति यो गुहासु	४०१।	६
[9]दिवमप्युपयातानां ...	५५६।	७
[10]दिवि वा भुवि वा ममास्तु	१९०।	२
[11]दिशि मन्दायते ...	२०६।	८
दीधीवेवीड्समः ...	४१०।	४
दीपयन्रोदसीरन्ध्र-...	२३१।	५
दीयतामर्जितं वित्त--	५६६।	१
[12]दीर्घाक्षं शरदिन्दुकान्ति	८४।	२
[13]दुर्गालङ्घितविग्रहो मनसिजं	५८।	३
[14]दुल्लहजणाणुराओ ...	२९०।	२
[15]दूरं समागतवति त्वयि	५२०।	१

	पृ.	प.
दूरागतेन कुशलं ...	१३०।	२
दृप्तारिविजये राजन्...	३६२।	२
[16]दृशा दग्धं मनसिजं...	४४८।	१०
दृश्येते तन्वि यावेतौ...	३२५।	७
[17]दृष्टा दृष्टिमधो ददाति	१०३।	९
[18]दृष्टिं हे प्रतिवेशिनि...	२०६।	२
[19]दृष्टिस्तृणीकृतजगत्त्रय-	१००।	१४
[20]दृष्ट्वैकासनसंस्थिते प्रियतमे	१०९।	१५
,, ...	४३७।	११
दृष्ट्या केशवगोपराग-	२३४।	८
देवः पायादपायान्नः...	५७९।	११
देशः सोऽयमरातिशोणितज-	३३१।	१८
देहि मे वाजिनं राजन्	३९०।	१०
[21]दोर्दण्डाञ्चितचन्द्रशेखरधनुः	१८३।	११
[22]द्वयं गतं संप्रति शोचनीयतां	३८४।	१४
[23]द्वीपादन्यस्मादपि ...	२६६।	२
ध		
धनिनोऽपि निरुन्मादा	५४९।	१२
धन्यः स एव तरुणो नयने	२१२।	३
[24]धन्यासि वैदर्भि गुणैः	५२०।	११
[25]धन्यासि या कथयसि	१०५।	१४
धन्याः खलु वने वाताः	५३८।	८
धम्मिल्लस्य न कस्य प्रेक्ष्य	३७१।	१
धम्मिल्ले नवमल्लिका–	२०८।	११
धम्मिल्लमर्धमुक्तं कलयति	१३१।	५
धवलयति शिशिररोचिषि	३९८।	८
धातुमत्तां गिरिर्धत्ते...	३७४।	५

१. कुमारसंभवे। २. शिशुपालवधे। ३. कुमारसंभवे। ४. विश्वनाथस्य प्रभावतीपरिणये। ५. वेणीसंहारे। ६. प्रभावत्याम्। ७. मालतीमाधवे। ८. रघुवंशे। ९. भट्टप्रभाकरस्य। १०. कुमारसंभवे। ११. काव्यालंकारे। १२. कुलशेखरनृपतेः। १३. रघुवंशे। १४. कालिदासस्य मालविकाग्निमित्रे। १५. चन्द्रशेखरस्य। १६. रत्नावल्याम्। १७. विश्वनाथस्य। १८. राजशेखरस्य विद्धशालभञ्जिकायाम्। १९. श्रीहर्षदेवस्य। २० विज्जाकायाः। २१. भवभूतेरुत्तररामचरिते। २२. अमरुशतके। २३. भवभूतेर्वीरचरिते। २४. कुमारसंभवे। २५. रत्नावल्याम्। २६. श्रीहर्षस्य नैषधीयचरिते २७. विज्जाकायाः।

	पृ.	प.
धिन्वन्त्यमूनि मदमूर्च्छद–[1]	२२७।	१
धीरो वरो नरो याति...	३७७।	८
धुनोति चासिं तनुते...	५६८।	३
धृतायुधो यावदहं ...	१४६।	१०
न		
नं[2] खलु वयममुष्य दानयोग्याः	११९।	७
नं[3] च मेऽवगच्छति यथा	११४।	१४
नं[4] तज्जलं यन्न सुचारु...	५५८।	१२
न तथा भूषयत्यङ्गम्...	१४७।	७
न धत्ते शिरसा गङ्गां...	५४५।	१०
न मे रमयिता कोऽपि	३७३।	११
न ब्रूते परुषां गिरं ...	१२४।	१६
न्यक्कारो ह्ययमेव मे[5] ...	६।	४
नयनज्योतिषा भाति ...	४०२।	३
नयनयुगासेचनकम् ...	१८५।	१२
,, ...	५५१।	१
नयने तस्यैव नयने च	४०८।	१
नवजलधरः सन्नद्धोऽयम्[6]	३६७।	२
नवनखपदमङ्गं[7] ...	१६९।	२
नवपलाशपलाशवनं[8] ...	४५४।	४
नष्टं वर्षवैरमनुष्यगणना–[9]	८८।	१
नाभिप्रभिन्नाम्बुरुहासनेन[10]	५७६।	६
नाशयन्तो घनध्वान्तं	३८३।	१
नाहं रक्षो न भूतो ...[11]	३०१।	३
निजनयनप्रतिबिम्बैः–	४३७।	१०
निर्माणकौशलं धातुः	४९५।	११
निरर्थकं जन्म गतं नलिन्याः[12]	५२८।	९
निर्वाणवैरदहनाः[13] ...	२७०।	४
निर्वीर्यं गुरुशापभाषित–[14]	३२३।	१६
निःशेषच्युतचन्दनं स्तनतटं[15]	६०।	२
निश्वासान्ध इवादर्शः[16]	२००।	४
निसर्गसौरभोद्भ्रान्त ...	५३१।	३
निहताशेषकौरव्यः...[17]	२९७।	१३
,, ...	३२२।	२
नीतानामाकुलीभावं ...	४५८।	१
नेदं नभोमण्डलमम्बुराशि–[18]	५०५।	७
नेत्रे खञ्जनगञ्जने सरसिज-[19]	१०५।	५
नेत्रैरिवोत्पलैः ...	४८८।	९
नो चाटु श्रवणं कृतं न च[20]	११६।	६
प		
पंणअकुविआणं दोण्णं[21]	१६७।	९
पद्मोदयदिनाधीशः ...	४९३।	१४
पन्थिअ ण एत्थ सत्थरमत्थि	२०३।	८
पन्थिअ विआसिओ विअ[22]	१३५।	५
परापकारनिरतैर्दुर्जनैः सह	५४५।	५
परिषदियमृषीणां[23] ...	२९२।	१०
परिस्फुरन्मीनविघट्टितोरवः[24]	१५२।	२
परिहरति रतिं मतिं लुनीते	३९८।	१२
पर्वतभेदि पवित्रं जैत्रं[25]	४०७।	५
पल्लवाकृतिरक्तोष्ठी ...	३७७।	९
पल्लवोपमितिसाम्यसपक्षं[26]	१२८।	९
पश्यन्त्यसंख्यपथगां ...	५४४।	१०
,, ...	२१८।	१
पश्यामि शोक– ...	३२६।	२२
पश्येत्कश्चिच्चल चपल रे	५७८।	१
पाणिपल्लवपेलवः ...	३७४।	९

१. वेणीसंहारे । २. शिशुपालवधे । ३. शिशुपालवधे । ४. भट्टिकाव्ये । ५. हनुमन्नाटके । ६. विक्रमोर्वश्याम् । ७. शिशुपालवधे । ८. शिशुपालवधे । ९. रत्नावल्याम् । १०. रघुवंशे । ११. वेणीसंहारे । १२. बिल्हण–राजकन्ययोः । १३. वेणीसंहारे । १४. वेणीसंहारे । १५. अमरुशतके । १६. भगवतो वाल्मीकेः । १७. वेणीसंहारे । १८. विश्वनाथस्य । १९. चन्द्रशेखरस्य । २०. गाथासप्तशत्याम् । २१. विश्वनाथस्य । २२. महावीरचरिते । २३. किरातार्जुनीये । २४. त्रिविक्रमस्य दमयन्तीकथायाम् । २५. शिशुपालवधे । २६. विश्वनाथस्य ।

	पृ.	प.
[1]पाणिरोधमविरोधितवाञ्छं	१२७ ।	१०
पाण्डवानां सभामध्ये...	४७२ ।	४
पाण्डु क्षामं वदनं हृदयं	१६४ ।	१४
[2]पादाहतं यदुत्थाय ...	५३६ ।	५
पादाघातादशोकस्ते ...	३९३ ।	२२
पान्तु वो जलदश्यामाः	४९४ ।	४
[3]पारेजलं नीरनिधेरपश्य–	५१३ ।	५
[4]पुंस्त्वादपि प्रविचलेद्यदि	३७ ।	१५
पूरिते रोदसी... ...	४१३ ।	९
[5]पूर्यन्तां सलिलेन रत्नकलशा	३०० ।	१४
पृथुकार्तस्वरपात्रं ...	४०९ ।	५
[6]पृथ्वि स्थिरा भव ...	५४२ ।	५
प्रज्वलज्जलधारावत्...	४०१ ।	१
प्रणमत्युन्नतिहेतोः ...	५५५ ।	३
[7]प्रणयिसखीसलीलपरिहास-	१४४ ।	२
[8]प्रतिकूलतामुपगते हि विधौ	४५७ ।	४
प्रयाणे तव राजेन्द्र ...	५२२ ।	१६
प्रवर्तयन्क्रियाः साध्वीः	५३५ ।	६
[9]प्रवृद्धं यद्वैरं मम खलु	२८५ ।	१६
प्रससार शनैर्वायुः ...	३६२ ।	३
प्रसाधय पुरीं लङ्कां राजा	३२२ ।	१८
[10]प्रसाधिकालम्बितमग्रपादं	१३१ ।	१०
[11]प्रस्थानं वलयैः कृतं...	१७१ ।	७
प्रागेव हरिणाक्षीणां ...	५१७ ।	१०
प्राणप्रयाणदुःखार्त–	३३१ ।	७
[12]प्रीणेशेन प्रहितनखरेष्वङ्ग–	१५० ।	८
[13]प्रीतिभं त्रिसरकेण गतानां	१४२ ।	११
[14]प्रीत्यावेकरथारूढौ पृच्छन्तौ	२९६ ।	८

	पृ.	प.
प्रायश्चित्तं चरिष्यामि...	१४८ ।	२
[15]प्रायेणैव हि दृश्यन्ते कामं	३१९ ।	२
प्रिय इति गोपवधूभिः	५०३ ।	१४
प्रियजीवितताकार्यं–...	३४४ ।	२
[16]प्रेमार्द्राः प्रणयस्पृशः...	१६३ ।	१५
प्रोज्ज्वलज्ज्वलनज्वाला	३८१ ।	१०
ब		
बलमार्तभयोपशान्तये	५६३ ।	७
[17]बलावलेपादधुनापि ...	५१९ ।	१२
बालअ णाहं दूती ...	५४७ ।	१४
[18]बाले नाथ विमुञ्च ...	१०८ ।	२
[19]बृहत्सहायः कार्यान्तं...	५४१ ।	१३
[20]ब्राह्मणातिक्रमत्यागो ...	२३२ ।	१
भ		
भक्तिर्भवे न विभवे ...	५६३ ।	५
[21]भग्गं भीमेन भवतो ...	२७४ ।	११
[22]भम धम्मिअ वीसत्थो	२०० ।	७
[23]भल्लापवर्जितैस्तेषां ...	४८७ ।	७
भाति पद्मः सरोवरे...	३६२ ।	८
[24]भानुः सकृद्युक्ततुरङ्ग एव	३९२ ।	१०
[25]भिसिणीअलसअणीए	१६४ ।	१७
भिक्षो मांसनिषेवणं प्रकुरुषे	३४१ ।	१३
भुक्तिमुक्तिकृदेकान्त-	२१४ ।	५
[26]भुजङ्गकुण्डली... ...	४४५ ।	६
भूतयेऽस्तु भवानीशः	३६५ ।	४
[27]भूमौ क्षिप्तं शरीरं ...	३०२ ।	१५
[28]भूयः परिभवक्लान्तिलज्जा	२८८ ।	७
[29]भो लङ्केश्वर दीयतां जनकजा	१८१ ।	५

१ शिशुपालवधे २. शिशुपालवधे । ३. शिशुपालवधे । ४. भल्लटशतके । ५. वेणीसंहारे । ६. बालरामायणे ७. मालतीमाधवे । ८. शिशुपालवधे । ९. वेणीसंहारे । १० रघुवंश-कुमारसंभवयोः । ११. अमरुशतके । १२. विश्वनाथस्य । १३. शिशुपालवधे । १४ वेणीसंहारे । १५. वेणीसंहारे । १६. मालतीमाधवे । १७. शिशुपालवधे । १८. अमरुशतके । १९. शिशुपालवधे । २०. भवभूतेर्महावीरचरिते । २१. वेणीसंहारे । २२. गाथासप्तशत्याम् । २३. रघुवंशे । २४. अभिज्ञानशाकुन्तले । २५. विश्वनाथस्य । २६. राजानकरुय्यकस्य श्रीकण्ठस्तवे । २७. वेणीसंहारे । २८. वेणीसंहारे । २९. राजशेखरस्य बालरामायणे ।

	पृ.	प.
[1]आर्तद्विरेफ भवता भ्रमता	१४९ ।	११
भ्रूभङ्गे रचितेऽपि दृष्टिमधिकं	१६७ ।	१४
म		
[2]मखशतपरिपूतं ...	२९९ ।	४
[3]मञ्जुलमणिमञ्जीरे ...	४५६ ।	७
मत्वा लोकमदातारं संतोषे	३३२ ।	१४
[4]मन्नामि कौरवशतं समरे	२३० ।	५
[5]मधु द्विरेफः कुसुमैकपात्रे	२२ ।	२
मधुपानप्रवृत्तास्ते ...	५७७ ।	१३
[6]मधुरया मधुबोधितमाधवी	४४१ ।	३
मधुरः सुधावदधरः...	४७९ ।	१
[7]मधुरवचनैः सभ्रूभङ्गैः	१०७ ।	२
[8]मध्यस्य प्रथिमानमेति	१०२ ।	१४
मध्यं तव सरोजाक्षि...	५०१ ।	१६
मध्येन तनुमध्या मे...	५६८ ।	१४
मनोजराजस्य सितातपत्रं	४९४ ।	८
[9]मनः प्रकृत्यैव चलं ...	२९३ ।	१७
मन्थायस्तार्णवाम्भः—	४४२ ।	१०
मन्दं हसन्तः पुलकं...	४४९ ।	८
[10]मयि सकपटं किंचित्कापि	१५० ।	१६
मल्लिकामुकुले चण्डि...	२०९ ।	१२
मल्लिकाचितधम्मिल्लाः	५७० ।	११
[11]मल्लीमतल्लीषु वनान्तरेषु	१९३ ।	११
महदे सुरसंघं मे ...	४६० ।	१
महिलासहस्रभरिए ...	२०९ ।	१६
मा गर्वमुद्वह कपोलतले	१२९ ।	९
मातः किमप्यसदृश ...	३३० ।	१०
मानमस्या निराकर्तुः...	५६८ ।	९
मानं मा कुरु तन्वङ्गि	३९८ ।	५
मानोन्नतां प्रणयिनीं...	२२९ ।	१
[12]मामाकाशप्रणिहितभुजं	१४५ ।	१०
[13]मारमासुषमाचारुरुचा	४६९ ।	१०
मुग्धा दुग्धधिया ...	५०२ ।	३
मुखमिन्दुर्यथा पाणिः	४८० ।	१०
मुखं तव कुरङ्गाक्षि ...	४९७ ।	११
मुखं चन्द्र इवाभाति...	४०३ ।	३
मुखमेणीदृशो भाति...	५०९ ।	४
मुञ्च मानं हि मानिनि	३७५ ।	४
मुक्तोत्करः संकटशुक्ति	५१२ ।	१६
मुनिर्जयति योगीन्द्रो...	५७४ ।	६
[14]मुहुरङ्गुलिसंवृताधरोष्ठं	२२१ ।	९
मुहुरुपहसितमिवा ...	१२० ।	३
[15]मूर्ध्व्याधूयमान— ...	४०६ ।	२
मृगरूपं परित्यज्य विधाय	३२६ ।	१२
मृणालव्यालवलया. ...	१२५ ।	१२
मृत्कुम्भवालुकारन्ध्र—	१४० ।	१०
म्रियते म्रियमाणे या...	३२८ ।	२
य		
[16]यः कौमारहरः स एव	१४ ।	५
यः स ते नयनानन्दकरः	३७२ ।	१
[17]यं सर्वशैलाः परिकल्प्य	३७२ ।	१०
यत्र ते पतति सुभ्रु ...	३६६ ।	७
यत्र पतत्यबलानां ...	५४६ ।	२
यत्रोन्मदानां प्रमदाजनानां	२३५ ।	११
[18]यत्त्वन्नेत्रसमानकान्ति	५४४ ।	२
,, ...	५६९ ।	२
[19]यत्सत्यव्रतभङ्ग— ...	२८७ ।	९
[20]यदाह धात्र्या प्रथमोदितं	१८७ ।	७

१. विश्वनाथस्य । २. अमरुशतके । ३. शूद्रकस्य मृच्छकटिके । ४. विश्वनाथस्य । ५. वेणीसंहारे । ६. कुमारसंभवे । ७. शिशुपालवधे । ८. शृङ्गारतिलके । ९. चन्द्रशेखरस्य । १० रत्नावल्याम् । ११. विश्वनाथस्य । १२. उदारराघवे । १३. मेघदूते । १४. विश्वनाथस्य । १५. अभिज्ञानशाकुन्तले । १६. विश्वनाथस्य । १७. शीलाभट्टारिकायाः । १८. कुमारसंभवे । १९. कान्यकुब्जाधिपतेर्यशोवर्मणः । २० वेणीसंहारे । २१. रघुवंशे ।

	पृ.	प.
यदि मय्यर्पिता दृष्टिः	३७८ ।	११
[1]यदि समरमपास्य नास्ति	३३१ ।	२१
यदि स्यान्मण्डले ...	५१७ ।	५
[2]यदेतच्चन्द्रान्तर्जल ...	५१४ ।	१३
[3]यद्यद्विरहदुःखं ...	३७३ ।	१४
यद्वीर्यं कूर्मराजस्य ...	३२२ ।	६
[4]यद्वैद्युतमिव	३२० ।	१५
[5]यमुनाशम्बरमम्बरं ...	३६४ ।	५
[6]यातेरिव शर्मिष्ठा ...	३२६ ।	५
[7]योरारोपितस्तारो ...	५६१ ।	५
[8]रशोऽधिगन्तुं सुखलिप्सया	३८७ ।	८
[9]रशसि प्रसरति ...	४८५ ।	१६
स्य न सविधे दयिता	४५१ ।	१
[10]यस्यालीयत शल्कसीन्नि	२१ ।	८
या जयश्रीर्मनोज्ञस्य ...	३८३ ।	५
यान्ति नीलनिचोलिन्यो	३९५ ।	९
यां विनामी वृथा प्राणाः	३८३ ।	९
[11]यामः सुन्दरि याहि ...	१७१ ।	२
[12]यावदर्थपदां वाचं ...	५४२ ।	३
यासां सत्यपि सद्गुणानुसरणे	१२७ ।	२
युक्तः कलाभिस्तमसां	४०८ ।	६
[13]युगान्तकालप्रतिसंहृतात्मनो	५५५ ।	१०
[14]युष्मान्हेपयति क्रोधाल्लोके	२८७ ।	१
[15]येन ध्वस्तमनोभवेन	४६१ ।	४
यैरेकरूपमखिलास्वपि	५३३ ।	१७
योऽनुभूतः कुरङ्गाक्ष्याः	५२३ ।	१३
योगेन दलिताशयः ...	३६३ ।	५
[16]यो यः शस्त्रं बिभर्ति	२९४ ।	२

र

रक्तोत्फुल्लविशाललोलनयनः	१९३ ।	१५
[17]रक्तप्रसाधितभुवः ...	२७३ ।	११
रक्षांस्यपि पुरः ...	३६६ ।	३
रजनीषु विमलभानो...	२०८ ।	३
[18]रञ्जिता नु विविधास्तरुशैला	५१४ ।	२
रतिलीलाश्रमं भिन्ते...	३७८ ।	१३
रतिकेलिकलः किंचित्	३२५ ।	३
रथ्यान्तश्चरतस्तथा ...	१८४ ।	१३
रमणे चरणप्रान्ते ...	३८९ ।	१२
राजते मृगलोचना ...	४८६ ।	५
राजनारायणं ...	५८१ ।	८
राजन्राजसुता न पाठयति	५४१ ।	१
[19]राजानः सुतनिर्विशेषमधुना	३०४ ।	८
राजीवमिव राजीवं ...	४९० ।	८
राज्यं च वसु देहश्च...	१८१ ।	२
[20]राज्ये सारं वसुधा ...	५५९ ।	८
[21]रामं मन्मथशरेण ताडिता	१४७ ।	२
,, ...	३८५ ।	२
[22]रामो मूर्ध्नि निधाय–	२६५ ।	१३
रावणस्यापि रामास्तो	५१० ।	१५
[23]रावणावग्रहक्रान्त ...	४९४ ।	१८
[24]रोलम्बाः परिपूरयन्तु	१६५ ।	११

ल

लक्ष्मणेन समं रामः...	५२७ ।	६
लक्ष्मीवक्षोजकस्तूरी...	५७० ।	३
लग्नं रागावृताङ्ग्या ...	३९७ ।	१
[25]लङ्केश्वरस्य भवने ...	२७० ।	१६
लज्जापज्जत्तपसाहणाइँ	१०२ ।	७
लताकुञ्जं गुञ्जन्मद ...	४२७ ।	६
लतेव राजसे तन्वि ...	४०२ ।	१७
[26]लाक्षागृहानलविषान्न	२८५ ।	१०

१. वेणीसंहारे । २. वेणीसंहारे । ३. अभिज्ञानशाकुन्तले । ४. किरातार्जुनीये । ५. राघवानन्दस्य । ६. विश्वनाथस्य । ७. शिशुपालवधे । ८. शिशुपालवधे । ९. वेणीसंहारे । १०. चन्द्रकस्य । ११. वेणीसंहारे । १२. वेणीसंहारे । १३ किरातार्जुनीये । १४. प्रभावत्याम् । १५. रुद्रटस्य काव्यालंकारे । १६. रघुवंशे । १७. उदात्तराघवे । १८. रघुवंशे । १९. रघुवंशे । २०. विश्वनाथस्य । २१. कुन्दमालायाम् । २२. वेणीसंहारे ।

	पृ.	प.
लाङ्गूलेनाभिहत्य ...	५७३ ।	११
लावण्यमधुभिः पूर्ण–	४९५ ।	३
लावण्यं यदसौ कान्तिः	२१३ ।	५
लिम्पतीव तमोऽङ्गानि	५१२ ।	५
[2]लीलागतैरपि तरङ्गयतो	२९५ ।	१२
व		
वक्त्रस्पन्दिस्वेद ...	५७२ ।	५
वदनमिदं न सरोजं ...	५०६ ।	१२
वदनाम्बुजमेणाक्ष्या...	५८१ ।	२१
वदनं मृगशावाक्ष्या ...	४८४ ।	७
[3]वत्सस्य मे प्रकृति–...	३२९ ।	८
[4]वनेचराणां वनितासखानां	५०० ।	४
वनेऽखिलकलासक्ताः...	५७७ ।	३
वर्ण्यते किं महासेनो...	३७४ ।	७
वर्षत्येतदहर्पतिर्नतु घनो	२९१ ।	८
वल्लभोत्सङ्गसङ्गेन ...	५५० ।	१४
[5]वसन्तलेखैकनिबद्धभावं—	५२१ ।	११
वाचमुवाच कौत्सः ...	३७८ ।	४
वाणीरकुडङ्गुडीणसउणि	२३३ ।	५
वाप्यो भवन्ति विमलाः	५५९ ।	३
वारिजेनेव सरसि ...	४८९ ।	७
वासवाशामुखे भाति...	३८२ ।	३
विकसन्नेत्रनीलाब्जे ...	४५८ ।	३
[6]विकसितमुखीं रागासङ्गात्	५२९ ।	१३
विचरन्ति विलासिन्यो	५६० ।	१४
[7]विदूरं केयूरे कुरु ...	११७ ।	९
विधवति मुखाब्जमस्या	४८५ ।	२
[8]विनयति सुदृशो दृशोः परागं	१६८ ।	१२
विना जलदकालेन ...	५२८ ।	४

	पृ.	प.
[9]विपिने क्व जटानिबन्धनं	१७७ ।	७
विपुलेन सागरशयस्य	५५४ ।	२
विभाति मृगशावाक्षी	३७३ ।	८
विमल एव रविर्विशदः	५२० ।	१५
विरहे तव तन्वङ्गि ...	५४८ ।	१
[10]विलेलाप सबाष्प ...	५६५ ।	१
[11]विलोकनेनैव तवामुना	१९० ।	५
विलोक्य विततं व्योम्नि	३९० ।	५
[12]विवृण्वती शैलसुतापि	१२२ ।	११
[13]विसृष्टरागादधरान्निवर्तितः	५६१ ।	१
[14]विसृज सुन्दरि ...	३०७ ।	१२
वीक्षितुं न क्षमा श्वश्रूः	५६३ ।	१५
[15]वेदान्तेषु यमाहुरेकपुरुषं	२६४ ।	७
वृद्धोऽन्धः पतिरेष मच्चकगतः	१४१।	११
व्यतिक्रमलवं... ...	३८५ ।	५
[16]व्यपोहितुं लोचनतो ...	१३२ ।	९
व्याजस्तुतिस्तव ...	५४० ।	१
व्याधूय यद्वसन ...	५२९ ।	२
श		
[17]शठान्यस्याः	९५ ।	२
[18]शशिनमुपगतेयं ...	५५४ ।	८
[19]शशी दिवसधूसरो ...	५६७ ।	२
शिखरिणि क्व नु नाम	२०९ ।	३
[20]शिरःसि धृतसुरापगे ...	२६३ ।	५
[21]शिरीषमुखैः स्यन्दित एव	१८१ ।	१०
शिरीषमृद्वी गिरिषु ...	४९२ ।	४
[22]शीतांशुर्मुखमुत्पले	२९५ ।	८
[23]शुश्रूषस्व गुरून्कुरु ...	३२० ।	१९
[24]शून्यं वासगृहं ...	२१ ।	२

१. विश्वनाथस्य । २. जानकीराघवे । ३. वेणीसंहारे । ४. कुमारसंभवे । ५. विश्वनाथस्य । ६. विश्वनाथस्य । ७. राघवानन्दस्य नाटके । ८. शिशुपालवधे । ९. विश्वनाथस्य राघवविलासे । १०. रघुवंशे । ११. शिशुपालवधे । १२. कुमारसंभवे । १३. कुमारसंभवे । १४. मालविकायाम् । १५. विक्रमोर्वश्याम् । १६. किरातार्जुनीये । १७. अमिरुशतके । १८. रघुवंशे । १९. भर्तृहरेः । २० चन्द्रशेखरस्य पुष्पमालायाम् । २१. श्रीहर्षदेवस्य नागानन्दे । २२. रत्नावल्याम् । २३. अभिज्ञानशाकुन्तले । २४. अमरुशतके ।

	पृ.	प.
शूरा अमरतां यान्ति ...	३६२ ।	५
शेफालिकां विदलितां ...	१६५ ।	६
शैलेन्द्रप्रतिपाद्यमान ...	५७३ ।	२
[1]शोणं वीक्ष्य मुखं ...	९४ ।	४
[2]श्रवणैः पेयमनेकैः ...	२६१ ।	५
श्रीरस्याः पाणिरप्यस्याः	२९१ ।	१५
श्रीहर्षो निपुणः कविः...	२६७ ।	१३
[3]श्रुताप्सरोगीतिरपि ...	१०१ ।	८
श्रुतं कृतधियां सङ्गात् ...	५५७ ।	१५
श्रुत्वा यान्तं बहिः ...	१२८ ।	१५
[4]श्वासान्मुञ्चति भूतले ...	१३० ।	७

स

स एकस्त्रीणि जयति ...	५४९ ।	१७
स एव सुरभिः कालः ...	१२२ ।	५
सकलकलं पुरमेतत् ...	४६६ ।	१
सज्जनो दुर्गतो मग्नः ...	३९४ ।	७
सज्जेहि सुरहिमासो ...	२०७ ।	७
[5]सतीमपि ज्ञातिकुलैक० ...	३२९ ।	१७
[6]सत्पक्षा मधुरगिरः ...	४६८ ।	१४
सदा चरति खे भानुः ...	३९२ ।	५
सदाशिवं नौमि	३७७ ।	११
सदैव शोणोपलकुण्डलस्य	५७० ।	६
सद्योमुण्डितमत्त ...	४३७ ।	८
सद्यः करस्पर्श– ...	५५३ ।	५
सद्यः पुरीपरिसरेपि ...	१४२ ।	२
सद्वंशसंभवः शुद्धः ...	३१७ ।	१३
[7]सममेव नराधिपेन ...	५२७ ।	२
[8]सममेव समाक्रान्तं ...	५१७ ।	१२
[9]समय एव करोति ...	३८४ ।	१०

	पृ.	प.
समाश्लिष्टाः समाश्लेषैः ...	१२४ ।	११
समीक्ष्य पुत्रस्य चिरात्पिता	१५३ ।	२
[10]सरसिजमनुविद्धं शैवलेनापि	१२४ ।	४
सरसं कईण कव्वं ...	४५६ ।	१२
सरागया स्रुतघन– ...	४१८ ।	१
सरोविकसिताम्भोज ...	५५८ ।	१०
[11]सर्वक्षितिभृतां नाथ ...	३४० ।	१९
सर्वस्वं हर सर्वस्वं ...	४५९ ।	५
स वः शशिकलामौलिः ...	३७३ ।	४
सहकारः सदामोदो ...	५३७ ।	११
[12]सह कुमुदकदम्बैः ...	५२६ ।	१०
[13]सं हत्वा वालिनं वीरः ...	३७३ ।	२
[14]सहभृत्यगणं सबान्धवं ...	३२२ ।	१०
सहसाभिजनैः स्निग्धैः ...	४०१ ।	१०
[15]सहसा विदधीत न ...	३९३ ।	६
सहाधरदलेनास्या– ...	५१६ ।	१०
” ...	५२६ ।	८
[16]सांन्द्रानन्दमनन्तमव्यय–	३५२ ।	११
[17]सा पत्युः प्रथमापराधसमये	१०३ ।	१४
[18]सा बाला वयमप्रगल्भमनसः	५५२ ।	३
सायं स्नानमुपासितं ...	२१५ ।	७
सार्थकानर्थकपदं ...	१४८ ।	८
[19]सार्धं मनोरथशतै– ...	१०८ ।	७
सुचरणविनिविष्टैः ...	४३२ ।	३
[20]सुतनु जहिहि कोपं ...	१९५ ।	२
सुधेव विमलश्चन्द्रः ...	४०२ ।	११
सुनयने नयने	४०८ ।	१९
सुभग त्वत्कथारम्भे ...	१२८ ।	३
सुभगे कोटिसंख्यबलमुपेत्य	२०९ ।	७

१. विश्वनाथस्य । २. विश्वनाथस्य । ३. बालरामायणे । ४. रत्नावल्याम् । ५. रत्नावल्याम् । ६. कुमारसंभवे । ७. विश्वनाथस्य । ८. अभिज्ञानशाकुन्तले । ९. वेणीसंहारे । १० रघुवंशे ११. रघुवंशे । १२. शिशुपालवधे । १३. अभिज्ञानशाकुन्तले । १४. विक्रमोर्वश्याम् । १५. विश्वनाथस्य । १६. रघुवंशे । १७. वेणीसंहारे । १८. किरातार्जुनीये । १९. विश्वनाथस्य । २०. अमरुशतके; सुभाषितावली तु लीलाचन्द्रस्य । २१. अमरुशतके; सुभाषितावली तु कल्याणदत्तस्य । २२. शृङ्गारतिलके । २३. अमरुशतके ।

	पृ.	प.
सूचीमुखेन[1] सकृदेव	... ४२९ ।	६
सूर्याचन्द्रमसौ[2] यस्य	... ३२४ ।	५
सैषा[3] स्थली यत्र विचिन्वता	५१० ।	१९
सौजन्याम्बुमरुस्थली	... ४९७ ।	१३
सौरभमम्भोरुह–	... ४७८ ।	५
संकेतकालमनसं	... ६३ ।	१०
”	... ५७२ ।	९
संगमविरहविकल्पे	... ५०२ ।	९
संग्रामे निहताः शूरा	... ३७४ ।	११
संततमुसलासङ्गात्	... ५५१ ।	१०
संधौ सर्वस्वहरणं	... २३२ ।	५
संप्रति संध्यासमयः	... ४११ ।	८
स्तनयुगमुक्ताभरणाः	... ५३९ ।	१३
स्तनावद्रिसमानौ ते	... ४०१ ।	५
स्तोकेनोन्नतिमायाति	... ४६४ ।	१
स्थिताः[4] क्षणं पक्ष्मसु	... ५६० ।	१०
स्नाता तिष्ठति कुन्तलेश्वरसुता	९३ ।	१४
स्निग्धश्यामलकान्ति–	... ५० ।	१
स्पृष्टास्ता[5] नन्दने शच्या	... ५४० ।	७
स्मरशरशतविधुराया	... ५४७ ।	८
स्मरार्त्यन्धः कदा	... ३६९ ।	४
स्मितेनोपायनं दूरात्	... ४९९ ।	२
स्मेरं विधाय नयनं	... ४८८ ।	३
स्मेरराजीवनयने	... ४५० ।	२
स्वगियं[6] यदि जीवितापहा	५३६ ।	९

	पृ.
स्वच्छाम्भः स्नपनविधौ	... १२६ ।
स्वपिहि त्वं समीपे मे	... ३९० । १
स्वामिन्भङ्गुरयालकं	... १०७ ।
स्वामी[10] निःश्वसिते	... ११० ।
स्वामी[11] मुग्धतरो वनं	... १९२ । ५
स्वेच्छोपजातविषयोऽपि	४६५ । ६

ह

हते[12] जरति गाङ्गेये	... ३२४ । २०
हन्[13]मदाद्यैर्यशसा	... ५२६ ।
हन्त संततमेतस्या	... ३७९ । १
हन्त सान्द्रेण रागेण	... ५७१ । ३
हन्त हन्त गतः कान्तो	४०८ । १५
हन्तुमेव प्रवृत्तस्य	... ३९१ । ५
हरन्ति हृदयं यूनां	... ३९१ । १
हरवन्नीलकण्ठोऽयं	... ४०१ । ४
हरस्तु[14] किंचित्–	... १९० । १२
हसति परितोषरहितं	... ३२० । ११
हा[15] पूर्णचन्द्रमुखि	... ३०० । १
हारोऽयं हरिणाक्षीणां	५६४ । ११
हितान्न यः संशृणुते	... ३८८ । ११
हिममुक्तचन्द्र[16]...	... २११ । २
हीरकाणां निधेरस्य	... ३९५ । ४
हृदि बिसलताहारो	... ५०६ । १५
हंसश्चन्द्र इवाभाति	... ४८९ । १०
हंहो[18] धीरसमीर–	... ५६६ । ७

आपाततः प्रेक्षापथमारूढानां कवीनां प्रबन्धानां चाभिधानैः समेतासावनुक्रमणिका समाप्तेति शिवम् ॥

---

१. कृष्णनन्दस्य सहृदयानन्दे । २. विक्रमोर्वश्याम् । ३. रघुवंशे । ४. विश्वनाथस्य (?) । ५. कुमारसंभवे । ६. मेण्ठस्य । ७. रघुवंशे । ८. शिशुपालवधे । ९. शृङ्गारतिलके । १०. भिक्षाटनस्य । ११ विश्वनाथस्य । १२. वेणीसंहारे । १३. नैषधीयचरिते । १४. कुमारसंभवे । १५. विश्वनाथस्य प्रभावत्याम् । १६. विश्वनाथस्य ।